निरुक्तम् ।

(निघण्टु-भाष्यम्)

जम्बूमार्गाश्रमवासि-भगवद्दुर्गाचार्य-विरचितया

ऋज्वर्थाख्यटीकया सहितम् ।

श्रीलश्री

वङ्गदेशीयासियातिक्समाजाभ्यर्थनया व्ययेन च

काश्यधीतवेदादि-वङ्गसामगेन

श्रीसत्यव्रतसामश्रमिभट्टाचार्य्येण

सम्पादितम् ।

चतुर्थो भागः ।

॥ अथ नवमाध्यायः ॥

तत्र,

प्रथमः पादः ॥

॥ ॐ ॥ अथ यानि पृथिव्यायतनानि सत्त्वानि स्तुतिं लभन्ते तान्यतोऽनुक्रमिष्यामस्तेषा मश्वः प्रथमागामी भवत्यश्वो व्याख्यातस्तस्यैषा भवति ॥ १ ॥

"अथ"—इति विशेषाधिकारे। प्रकृतार्थादनन्तर मधिकरोति। "पृथिव्यायतनानि" पृथिव्याश्रयाणि "सत्त्वानि" द्रव्याणि च, तेषा मप्यत्र विवक्षितत्वात्। "स्तुतिं लभन्ते"—इति समाम्नातानि। "तानि"* "अतः" परम् "अनुक्रमिष्यामः" व्याख्यया इति शेषः। पूर्वस्मादाप्रीगणाद् विलक्षणोऽय मश्वादिगण इति पृथगधिकार-वचनम्। पृथिव्यायतनत्वाविशेषात् सर्प-लाङ्गल-कुषुम्भक-प्रभृतीना मप्यत्रैवान्तर्भावः; तान्यपि हि स्तुतिं लभन्ते†, उपलक्षणं चेद मिति। तेषां युगपदभिधानासम्भवात् क्रमोऽर्थादङ्गीकृतो भवति, सति च क्रमे न मुख्यातिक्रमो नाय्य इत्यतो ब्रवीति।—

---

* अश्वः, शकुनिः इत्यादीनि षड्विंशत्। ५अ० २ख० १भा० ४६४पृ० द्र०।

† "कङ्कतो न कङ्कतः (१म० २४अ० १२सू० १ऋ०)—इत्यादौ सर्पस्य, "शुनं वाहाः (४म० ५अ० १२सू० ४ऋ०)"—इत्यादौ लाङ्गलस्य, "इषीकाः कुषुम्भकः (१म० २४अ०१२सू० १५, १६ऋ०)"—इत्यनयोः कुषुम्भकस्य स्तुतिर्दृश्यते। "कुषुम्भको नकुलः"—इति तत्रैव सायणः। प्रभृतिपदात् मयूर-वृश्चिकादीना मपि ग्रहः।

"तेषा मश्वः प्रथमागामी भवति"—इति* । स पुनः किमर्थं प्रथमागामी? पुरुषानन्तरं जन्म इति हि विज्ञायते,—तस्या आहुत्याः पुरुषोऽजायत, द्वितीयां यत् जुहोत् ततोऽश्वोऽजायत ; विशिष्टे चाश्वमेधलक्षणे कर्मणि विशिष्टोऽस्याङ्गभावः इति† । सः ("अश्वः") स पुनरयं "व्याख्यातः" एव प्राक्—"अश्नुते अध्वानं महाशनो भवतीति वा" इत्यत्र‡ ॥

"तस्य" "एषा" प्राधान्यस्तुतिः अश्वस्तोमीय एव—॥ १ ॥

अश्वो वोल्हा§ सुखं रथं हसना मुपमन्त्रिणः । शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ॥ अश्वो वोल्हा‖ सुखं वोल्हा¶ (रथं वोढा**) सुख मिति कल्याणनाम कल्याणं पुण्यं सुहितं भवति (सुहितं गम्यतीति वा हसैता वा पाता वा पालयिता वा शेप मृच्छतीति वारि वारयति††) मा नो व्याख्यातस्तस्यैषा भवति‡‡ ॥ २ ॥

---

* १भा० ४९पृ० ५ख० ३ख० (१) ।

† "तस्मादश्वो मेध्योऽभवत् (ऐ० ब्रा० २, १, ८)"—इत्यादावप्येव मेव ।

‡ नै० का० १ख० ७पा० ५ख० १भा० २४९पृ० । इतः पुरस्तादप्युक्तम्—"यः कश्चाध्वान मश्नुवीताश्वः स वचनीयः स्यात्" इति नै० का० १ख० ४पा० १ख० १भा० ८३पृ० ।

§ "वोल्हा" च ।

‖, ¶ "वोढा" च ।

**,†† नेमौ पाठौ क-ख-ग-पुस्तकेषु दृश्येते ।

‡‡ टीकाकृता भगवद्दुर्गाचार्य्येणायं खण्डः कुतो न व्याख्यातः? कथं वा ऋग्भाष्ये प्रमाणत्वेनासौ सायणेनागृहीतस्येति चिन्त्य मेव। तत्र मन्त्रार्थस्त्वाह सायणः ।

मा नो॑ मि॒त्रो वरु॑णो अर्य॒माऽऽयुरिन्द्र॑ ऋभु॒क्षा म॒रुत॒ः परि॑ख्यन्। यद्वाजिनो॑ दे॒वजा॑तस्य॒ सप्ते॑ः प्रव॒क्ष्यामो॑ वि॒दथे॑ वी॒र्या॑णि॥ यद्वाजिनो देवैर्जातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि मा नस्त्वं मित्रश्च वरुणश्चार्यमा चायुश्च वायुरयन इन्द्रश्चोरुक्षयण ऋभूणां राजेति वा मरुतश्च परिख्यञ्छकुनिः शक्नोत्युन्नेतु मात्मानं शक्नोति नदितु मिति वा शक्नोति तकितु मिति वा सर्वतः शङ्करोऽस्त्विति वा शक्नोतेर्वा तस्यैषा भवति॥३॥

"मा नो मित्रः"—इति *। दीर्घतमस आर्षम्। अश्व एवाज्ञ्यते अनेन सूक्तेन। "यद् वाजिनः"—इति। 'यद्' यानि 'वाजिनः' अस्याश्वस्य 'देवजातस्य' "देवैर्जनितस्य"; वसुभिरादित्यात्, "सूरादश्वं वसवो निरतष्ट"—इति †; अग्नेर्वा, "प्रजापतिना द्वितीया मजुहोत्,

---

तथाहि—"'वीळ्हा' सह्यं देशम् प्रापयन् 'अश्वः', 'सुखं' कल्याणं 'रथम्' इच्छति। 'उपमन्त्रिणः' उपमन्त्रयन्तो नर्मसचिवाः 'हसनाम्' उपहसनां वाचम् 'इच्छन्ति'। तथा "शेपो वैतस इति पुंस्प्रजननस्य"—इति यास्कः (१भा० २५९७०); यथा 'शेपः' 'रोमण्वन्तौ भेदौ' इच्छति। 'मण्डूकः' 'वाः इत्' इदवधारणे, उदक मेवेच्छति। तथाहं त्वत्परिस्रवण मिच्छामि। तस्मात् 'इन्द्रायेन्दो परिस्रव' इति"—इति ऋ० सं० ७, ५, २५, ४। "इन्द्रायेन्दो परिस्रवेत्यध्येषणा"—इत्युक्तं पुरस्तात् ९, २, १॥

* ऋ० सं० २, २, ७, १। य० मा० सं० २५, २४। "या तेनोच्यते सा देवता इति न्यायेनाश्वो देवता"—इत्याह सायणः तत्र ऋग्भाष्ये।

† ऋ० सं० २, ३, ११, २। "वसवः रश्मयः, यूयं सूरात् आदित्यात् अश्व मेवं महानुभावं निरतष्ट निःशेषेण साधु सम्पादितवन्तः"—इत्यादि च तद्व्याख्यान माह तत्रैव सायणः।

ततोऽश्वोऽजायत"—इति *। 'सप्तेः' "सरणस्य"। 'प्रवक्ष्यामः' प्रकर्षेण वक्ष्यामः। 'विदथे' एतस्मिन् "यज्ञे" 'वीर्याणि' गुणान्। किं तेषाम्? 'मा नः' माऽस्माकं तान्युच्यमानानि 'मित्रः', 'वरुणः', 'अर्यमा', वायुः, 'इन्द्रः', 'मरुतः' 'परिख्यन्' आचक्षीरन् †। किन्तर्हि? अनुमन्यन्ताम्। 'आयुः' अत्र "वायुः=अयनः" वकार-लोपेन। स कस्मात्? अयनात्; एति ह्यसौ विश्वम् ‡। 'इन्द्रः', 'ऋभुक्षाः' स हि "उरुक्षयणः", उरावन्तरिक्षे क्षियति निवसति। अथ वा क्षियतिरैश्वर्यार्थः। कस्य ईष्टे? "ऋभूणां" देवानां "राजा" "इति" ("वा") च, तेषा मीष्टे। एवम् ऋभुशब्दात् पूर्वपदम्, क्षियतेरैश्वर्यकर्मणः उत्तरपदम् § ॥

"शकुनिः" ‖। कस्मात्? स हि "शक्नोत्युन्नेतु मात्मानम्"। ऊर्द्ध्वं नेतुम्, लघुत्वात्। शकेः पूर्वपदम्, नयतेरुत्पूर्वस्योत्तरपदम्। ("नदितु मिति वा") अथ वा नदतेस्तकतेर्वा शब्दार्थगत्यर्थयोः पूर्वोत्तरपदं विकल्पेन। अथ "वा" "सर्वतः शङ्करः" अथ मस्मा-कम् "अस्त्विति" सर्वेण नित्य माशासितव्यो भवति। एवं सति

---

* एषा हि शतपथीया श्रुतिः। अपरापि श्रूयते ऐतरेयके "तस्मादश्वः समभवत्"—इति ३, १, ११।

† "मा परिख्यन् परिख्यानं मा कुर्वन्तु। परिख्यानं नाम निन्दा। महानुभावं देवजात मश्वं तुच्छा नराः स्तुवन्तीति मा कुर्वन्तु।"—इत्याह ऋग्भाष्ये सायणः।

‡ "आयुः सततगन्ता वायुः; वकारलोपो वा (२, ३, ७, १)"—इति, "आयुः सततगतिर्वायुरुच्यते (४, २, १३)"—इति च ऋग्भाष्ये सायणः। "आयोष्ट्वा सदने सादयामि (य० मा० सं० १५, ६३)"—एष च मन्त्रो द्रष्टव्यः।

§ १भा० ३०२ पृ० (१०) देवराजीयं व्याख्यानं द्रष्टव्यम्।

‖ १भा० ४९४, ४९५ पृ० ५ख० २ख० (२)।

'शम्'—इति सुखनाम * पूर्वपदम्, करोतेरुत्तरपदम् "शक्नोतेः" एव वैकल्प्यात्। किं मसौ शक्नोति-पदस्य योग्यं शङ्कितुम्॥

"तस्य" "एषा" प्राधान्यस्तुतिः "भवति"—॥ ३॥

कनिक्रदज्जनुषं प्रब्रुवाण इयर्त्ति वाचमरितेव नावम्। सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत्॥ न्यक्रन्दीज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयति वाचमीरयितेव नावं सुमङ्गलश्च शकुने भव कल्याणमङ्गलो मङ्गलङ्गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वाङ्गल मङ्गवन्मज्जयति पापकमिति नैरुक्ता माङ्गच्छत्विति वा मा च त्वा काचिदभिभूतिः सर्वतो विदद् गृत्समद मर्थ मभ्युत्थितं कपिञ्जलोऽभिववाशे तदभिवादिन्येषर्ग् भवति॥ ४॥

"कनिक्रदज्जनुषम्"—इति †। गृत्समदस्यार्षम्। शकुनिरुतश्रवणे जपे विनियोगः। 'कनिक्रदत्' "न्यक्रन्दीत्" पुनःपुनः भृशं वा क्रन्दसीति मध्यमपुरुषेण नुतिरुत्तर मर्द्धर्च मपेक्ष्य। 'जनुषं' 'प्रब्रुवाणः' आत्मनोऽभिजातिं कथयन्निव ‡, 'इयर्त्ति वाचम्' इयर्षि

* शमा० ३१४, ३१८ ३० ३अ० ६ख० (१९)।

† ऋ० सं० २, ८, ११, १। अस्य च सूक्तस्य "कपिञ्जलरूपीन्द्रो देवता"—इत्याह च तत्र सायणः।

‡ "जनुषम् जनिष्यमाण मर्थम्"—इति च तत्रैव ऋग्भाष्ये सायणः।

वाचम् । कथम्? ('अरिता इव') "ईरयिता इव" नाविक इव, पुनःपुनः "नावं" पारगमनाय । यस्त्व मेव मीरयसि, स त्वं 'सुमङ्गलः च' हे 'शकुने' प्रशस्तमङ्गलस्त्व अस्माकं 'भव' । वय मपि च तुभ्य मित्याशास्महे—'मा त्वा का चित्' 'अभिभा' "अभिभूतिः" परोपद्रवः । 'विश्वा' सर्वप्रकारा सर्वतो 'विदत्' विदत्विति । "यथास्य शब्दः, तथा नामेरयति", तदिदं शकुनिषु बहुल मित्यत्रोक्तम् ॥

"मङ्गलं" कस्मात्? "गिरतेः" धातोः "गृणात्यर्थे" वर्त्त-मानस्य, स्तुत्यं हि तद् भवति । "गिरति अनर्थान् इति वा" अस्यैव वा गिलनार्थस्य । कि मिदं गिलति? उत्पद्यमान मेवेद मनर्थात् । गिलति भक्षयति वा । अथ वा "अङ्गलम्" एतन्मकारो-पजनेन, मङ्गलम् । कोऽर्थः? "अङ्गवत्" अङ्गैरवयवैः दधिमध्वक्ष-तादिभिः तद्वत् । रो मत्वर्थे, व्यत्ययस्त्व र-लोः । अथ वा मज्जयतेः मङ्गलम् । किम्? "मज्जयति पापकम्—इति नैरुक्ताः" उत्पद्यमान मेवैतत् मङ्गलिनः पुरुषस्य 'मज्जयति' नाशयति यदस्य किञ्चित् पातकं भवति । एवं मज्जयतेर्मङ्गलम् इति नैरुक्ताः विदुः । "मां गच्छतु इति वा"; गमेर्वा । स एतत् मन्यते मा मेतद् गच्छत्विति ॥

"गृत्समद मर्थ मभ्युत्थितम्" इति । स्तुतिलाभकारणं स किल किञ्चिदर्थं सिसाधयिषुरभ्युत्तस्थौ, त मभ्युत्थितं "कपिञ्जलः" शकुनः "अभिववाशे" तत्सिद्धि मावेदयन् । यथा चैतदेवम्, "तदभिवादिनी एषा * ऋग् भवति" ॥ ४ ॥

---

* इह "एषा"—इति पदेन "कनिक्रदज्जनुषम्"—इत्यस्या एव ऋचो ग्रहण मिष्टम्; सायणीय भाष्याच्चास्य संशयोच्छेदकम् ।

भद्रं वद दक्षिणतो भद्र मुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल: ॥ इति सा निगदव्याख्याता गृत्समदो गृत्समदनो* गृत्स इति मेधाविनाम गृणाते स्तुतिकर्मणो† मण्डूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणा मण्ड एषा मोक इति वा मण्डो मदेर्वा मुदेर्वा तेषा मेषा भवति ॥ ५ ॥

"भद्रं वद दक्षिणतः"—इति‡। इह शकुनिः किल कस्याञ्चिद् दिशि साधुर्भवति, कस्याञ्चिदसाधुः§। स एष ब्रवीति ।—'दक्षिणतः', 'उत्तरतः', 'पश्चात्', 'पुरस्तात्' च सर्वत एव त्व मस्माकम् 'कपिञ्जलः' 'भद्रं' 'वद' इति ॥

---

* "गृत्सो मदनो" क, ख, ग ।

† "गृणातेः स्तुतिकर्मणो" क, ङ, च ।

‡ निगदोऽयम् । "परसम्बोधनार्था मन्त्राः निगदाः"—इत्याद्याधिकरणमाला-व्याख्यायां माधवः। मीमांसायां जैमिनिना च निगदविचारे इमानि सूत्राणि प्रणीतानि,—"निगदो वा चतुर्थं स्याद्धर्मविशेषात् । व्यपदेशाच्च । यजूंषि वा तद्रूपत्वात् । वचनाद्धर्मविशेषः । अर्थाच्च । गुणार्थो व्यपदेशः । सर्वेषा मिति चेत् । न, ऋग्व्यपदेशात्" ।—इति (२ अ० १पा० ३५—४१सू०) । "प्रोक्षणीरासादयेति निगदस्त्रिविधाद् बहिः । यजुर्वा च्चैस्त्वधर्मस्य भेदादस्य चतुर्थता । परप्रत्यायनार्थत्वादुच्चैस्त्वं यजुरेव सः । तल्लक्षणेन मुक्तत्वात् त्रैविध्य मिति सुस्थितम्" ॥—इति च निष्कर्षार्थः। जै० न्यायि० २, १, १२। सप्तमेऽध्यायेऽप्युक्त मेकवाच "निगदव्याख्याता"—इति २भा० ४१४पृ० ६ पं०; षष्ठे चैकत्र ङ-प्रभृतिपुस्तकेषु २भा० १५५पृ० १८ पं० ।

§ शाकुनकग्रन्था द्रष्टव्याः ।

"गृत्समदः—गृत्समदनः"; गृत्सश्चासौ मदनश्च गृत्समदनः। गृत्सः—मेधावी *, मदनः—हर्षालुः॥

"मण्डूकाः"—इति †। एतत् पदम् वक्तव्यम्। य एते "मण्डूकाः", एते "मज्जूकाः"। कस्मात्? "मज्जनात्"; नित्यमग्ना ह्येत उदके। "मदतेः वा" स्यात् "मोदतिकर्मणः"; नित्यप्रमुदिता हि ते। "मन्दतेः वा" स्यात् "तृप्तिकर्मणः"; नित्यतृप्ता हि ते, प्रचुरोदकत्वात्। "मण्डयतेः"—"इति वैयाकरणाः" ‡; ते हि भक्तिभिर्नानाचित्राभिः विधाचा मण्डिता भवन्ति। "मण्ड एषाम् ओकः"—"इति" "वा"; 'मण्डे' उदके 'एषाम्' 'ओकः' निवासः §—'इति वा' मण्डूकाः॥

"तेषाम् एषा भवति"—॥ ५॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः॥ संवत्सरं शिश्याना|| ब्राह्मणा व्रतचारिणोऽब्रुवाणा अपि¶ वोपमार्थे स्यात् ब्राह्मणा इव व्रतचारिण इति वाचं पर्जन्यप्रीतां** प्रावादिषुर्मण्डूका वसिष्ठो वर्षकामः पर्जन्यं

---

* १भा० ३२८, ३२९ पृ० ३अ० १५ख० (२)।

† १भा० ४९४, ४९९ पृ० ५अ० ३ख० (२)।

‡ "शलिमण्डिभ्या मूकण्" सि० कौ० उ० ४पा० ४२सू०।

§ "ओक इति निवासनामोच्यते" २भा० २५७ पृ०।

|| "शयाना" क, ख, ग।

¶ "ऽब्रुवाणादपि" क, ख, ग।

** "पर्जन्यप्रीता" अत्र सर्वत्रैवैव मेवैकजकारात्मकः पाठो ङ-प्रभृतिषु।

तुष्टाव तं मण्डूका अन्वमोदन्त स मण्डूकाननुमोदमानान् दृष्ट्वा तुष्टाव तदभिवादिन्येषर्ग् भवति ॥ ६ ॥

"संवत्सरं शशयानाः"—इति *। वसिष्ठस्यार्षम्। 'संवत्सरं' ('शशयानाः') "शिश्यानाः", निर्वाचः संवत्सरं सुप्ता इव स्थित्वा 'ब्राह्मणाः' "ब्रुवाणाः" सर्वथा सन्तो वक्तुम्, 'व्रतचारिणः' कृतवाक्संयमाः, ततः प्राविट्कालं प्राप्य अभिहृष्टाः ('पर्जन्यजिन्विताम्') पर्जन्येन तर्पिताम् 'वाचम्' 'प्र मण्डूकाः अवादिषुः' प्रावादिषुर्मण्डूकाः। अथ वा न युक्तो रूढिपरित्यागो ब्राह्मणशब्दस्येति लुप्तोपमः प्रकल्प्यते —"ब्राह्मणा इव व्रतचारिणः" इति। यथा ब्राह्मणा उपाकृत्य प्रावृषि पवित्रपाणयो मेखलिनो नियतकालां तां वैदिकीं वाचं वदन्ति †, एवं प्रावादिषुरिति॥

"वसिष्ठो वर्षकामः" इति। स्तुतिलाभनिमित्तं स किल वर्षन्तं "पर्जन्यम्" "तुष्टाव"। "तं मण्डूकाः" "अन्वमोदन्त" स्तुहि स्तुहि इति। "सः" तान् "मण्डूकान्" "अनुमोदमानान्" वाश्यमानान् ‡ "दृष्ट्वा" लब्धं वर्षनिमित्त मिति परितुष्टः, तानेव "तुष्टाव"। यथा चैतदेवम्, "तदभिवादिनी एषा § ऋक् भवति" ॥ ६ ॥

---

* ऋ० सं० ५, ७, ३, १। "वृष्टिकामेनैतत् सूक्तं जप्यम्"—इति तत्र सायणः।

† तथा हि स्मृत्यन्तरम्—"प्रौष्ठपदीं हस्तेनोपाकरणम् (३प्र० १ख० १सू०)"—इति गोभिलीयार्थम् ; अन्येषां मतेन तेन।

‡ "वाश्ट शब्दे"—इति धा० दि० आ० ५७। तिरश्चां शब्दे इति भाष्यत्र।

§ इह "एषा"—इति पदेन "संवत्सरं शयानाः"—इत्यस्या एव ऋचो ग्रहणम्। अत एव "संवत्सरं शयानाः"—इत्यस्या एव व्याख्यानारम्भे आह सायणः "अत्र निरुक्तम्,—वसिष्ठो वर्षकामः"—इत्यादि।

उप प्र वद मण्डूकि वर्षं मा वद तादुरि। मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः॥ इति सा निगदव्याख्याताक्षा अश्नुवत एनानिति* वाभ्यश्नुवत एभिरिति वा तेषा मेषा भवति॥ ७॥

"उप प्र वद"—इति। हे मण्डूकि! मण्डूकानां मातः! अथ वा मण्डूकपते! मण्डूकि! ('मा') माम् 'उप' गम्य ('प्र') प्रकर्षेण 'वद'। कथं च प्रवद? 'वर्षम्' ('आ') आभिमुख्येन 'वद' 'तादुरि' तरणशीले! अथ वा तावत्-उदरि! यावच्छरीरं तावदेवोदरं यस्याः। ततो वृष्टे देवे आप्लुते उदकेनैतस्मिन्नेकजलीभूते 'मध्ये' 'ह्रदस्य' उदकस्य बहुलः 'प्लवस्व' उपरि 'विगृह्य' प्रसार्य 'चतुरः' 'पदः' पदानित्यर्थः। पादशब्दस्य पदादेशः क्रियते† ॥

"अक्षाः"—इत्येवमादीनि सम्यस्तुतित्वात् पृथिव्यायतनत्वसामान्यादिह वर्गे समाम्नातानि‡। तेषां च यथासमाम्नान मेव "अक्षाः" प्रथमं निर्वक्तव्याः§। कस्मात्? "अश्नुवत एनान् इति वा" दीव्यन्तः कितवाः एतान् अक्षान् पाणिभिः। "अश्नुवते" व्यापयन्ति त एते; अश्नोतेः कर्मणि कारके। अथ वा "अभ्यश्नुवते" अभिपूर्वस्य

---

* "अश्नुवन्त्येता मिति" क, ग। "अश्नुवन्त्येनानिति" ख।

† "पादः पत्"—इति पा० ६, ४, १३०।

‡ अक्षादिगणस्यैवाग्रमेण एषः अक्षादिगणः। स च "अक्षाः-ग्रावाणः-नाराशंसः"—इति पदत्रयात्मकः १भा० ४९४८० ३ख० ४, ५, ६।

§ १भा० ४९४, ४९९३० ५ख० ३ख० (४) द्रष्टव्यम्।

तस्यैवाश्नोतेः करणे कारके; तैर्हि कितवाः प्रतिकितवं धनम् अभ्यश्नुवते ।

"तेषाम्" "एषा भवति" स्तुतिः—॥ ७ ॥

प्रा॒वे॒पा मा॑ बृह॒तो मा॑दयन्ति प्रवाते॒जा इरि॑णे॒ वर्वृ॑तानाः । सोम॑स्येव मौजव॒तस्य॑ भ॒क्षो वि॒भीद॑को॒ जागृ॑वि॒र्मह्य॑ मच्छान् ॥ प्रवेपिणो मा महतो विभीदकस्य फलानि मादयन्ति प्रवातेजाः प्रवणेजा* इरिणे वर्त्तमाना इरिणं निर्ऋणम् ऋणातेरपार्णं† भवत्यपरता अस्मादोषधय इति वा (सोमस्येव मौजवतस्य भक्षः‡) मौजवतो मूजवति जातो मूजवान् पर्वतो मुञ्जवान् मुञ्जो विमुच्यत इषीकयेषीकेषतेर्गतिकर्म्मण इयमपीतरेषीकैतस्मादेव विभीदको विभेदनाज्जागृविर्जागरणान्मह्य मचच्छदत्प्रशंसत्येनान् प्रथमया निन्दत्युत्तराभिर्ऋषेरक्षपरिद्यूनस्यैतदार्षं§ वेदयन्ते ग्रावाणो हन्तेर्वा गृणातेर्वा गृह्णातेर्वा॥ तेषामेषा भवति ॥ ८ ॥

"प्रा॒वे॒पा मा॑"—इति । अक्षपुत्रस्य मौजवत आर्षम् । 'प्रावेपाः'

---

* "प्रवतेजा" क, ख, ग ।

† "निरिणं निरिणातेरपार्णं" क, ख, ग ।

‡ नास्त्येष पाठः क-ख-ग-पुस्तकेषु ।

§ "॰परिद्यूनस्यैतदार्षं" ख ।

|| "गृह्णातिर्वा" क, ग ।

"प्रवेपिणः" प्रकर्षेण वेपनशीलस्य वृक्षस्य जाताः ('इरिणः') "मद्रतः' ('मा') माम् 'मादयन्ति'। 'प्रवातेजाः' प्रचुर-वाते स्थाने काले वा जाताः, प्रावृट्काले; पक्वानां वा प्रचुरवाते काले पतनाभिप्रायं जन्म। "विभीदकः" एक एव वा विशिष्यते यः प्रवणे उदकबहुले देशे जातः, "तस्य फलानि" अक्षाः। 'इरिणे वर्त्तानाः' निर्गतर्णे आस्फुरकस्थाने* वर्त्तमानाः; न हि तत्र पुत्रपौत्रानुगमणं भवति। "अपार्णं" वा; उपसर्गस्यान्यत्व मेव केवलम्; अथ वा "अपार्णम्" अपगतोदकम्। "अपरता अस्मात् ओषधयः इति वा"†। कथं मादयन्ति? "सोमस्य इव" यथा सोमस्य "मौजवतस्य" "भक्षः" यजमानं मादयति, हर्षयति, तर्पयति तथा। 'विभीदकः' विभेत्ता कोष्ठस्य, 'जागृविः' जागरणकर्त्ता; यो जयति, स हर्षेण जागर्त्ति; योऽपि जीयते स दुःखेन जागर्त्ति। स एषः 'विभीदकः' एवम्प्रकारो 'मह्यम्' ('अच्छान्') "अचच्छदत्"।

---

* "आस्फारकस्थाने"—इति रोथ्-इष्ट-पुस्तके। स्फुरतेर्णिजन्तस्यैतद्रूपम्, "चिस्फुरोर्णौ (पा० ६, १, ५४)"—इति वैकल्पिकात्वविधानात्।

† ऋ० सं० २, ५, ५, ४ ऋचो व्याख्यायाम् "इरिणं मूषरप्रदेशम्"—इति, ऋ० सं० ५, ७, १०, २ ऋचो व्याख्यायाम् "इरिणं विस्तृणं तडाकदेशम्"—इति, ऋ० सं० ६, ६, १०, ४ ऋचि "गौराविवैरिणम्"—इति व्याख्यायाम् "यथा गौरमृगावन्यस्माद् देशात् इरिणं तडाकादिकं प्रति जलपानार्थं मागच्छतः, तद्वत्"—इति, ऋ० सं० ६, ६, १०, १ऋचि "गौराविवैरिणे"—इति व्याख्यायाम् "यथा तृषितो गौरो एतन्नामको मृगो इरिणे तडाकादिषु उदकपानार्थं शीघ्र मागच्छतः, तद्वत्"—इति, ऋ० सं० ७, ८, २, १ऋचो व्याख्यायाम् "इरिणे आस्फारे"—इति, ऋ० सं० ७, ८, ४, ४ऋचो व्याख्यायाम् "इरिणे इन्धनरहिते आस्फारे"—इति चाह सायणः।

त्वेन फलशब्देन सर्वार्थेषु पुनःपुनः भृशं वा मनः छादयित्वा देवने एवैकस्मिन् मम मनः उत्साहयति ॥

“मौजवतः” सोमः । स कस्मात्? “मूजवति जातः” * । अथ “मूजवान्” कः ? “पर्वतः” । स कस्मात् मूजवान् ? (“मुञ्जवान्”) मुञ्जैस्तद्वान् ।

अथ “मुञ्जः” कस्मात्? स हि “विमुच्यते इषीकया” ।

अथ “इषीका” कस्मात् ? “इषतेः गतिकर्मणः” सा हि निर्गता भवति मुञ्जात् । “इय मपीतरा इषीका एतस्मादेव” या इष्वेषा, अन्या वा ; सापि हि निर्गता भवति† ॥

“ग्रावाणः”‡ कस्मात् ? “हन्तेः वा” तदर्थोपपत्तेः, व्याप्त्युपजनाभ्याम् । “गृणातेः वा” स्तुत्यर्थस्य; स्तूयन्ते हि ते । “गृह्णातेः वा” गृह्यन्ते हि ते ॥

“तेषाम्” “एषा” स्तुतिः “भवति”—॥ ८ ॥

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः । यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥ प्रवदन्त्वेते प्रवदाम वयं ग्रावभ्यो वाचं वदत वदद्भ्यो यदद्रयः पर्वता आदरणीयाः§ सह सोम माशवः क्षिप्रकारिणः श्लोकः शृणोतेर्घोषो

---

* “तत्र मूजवतः सोमो जायते”—इत्यादि ऋग्भाष्ये सायणः ।

† इषीकाशब्दोदाहरणम् अथ० सं० १०का० १अनु० १२सू० ४ऋ० ।

‡ १आ० ४१४, ४११४० ५अ० ३ख० (२) ।

§ “आदरणीयाः” क, ख, ग ।

घुष्यतेः सोमिनो यूयं स्थेति वा सोमिनो गृहेष्विति वा येन नराः प्रशस्यन्ते स नाराशंसो* मन्त्रस्तस्यैषा भवति ॥ ९ ॥

"प्रैते वदन्तु"—इति†। अर्बुदस्येय मार्षम्। अस्मात् ते 'अद्रयः' "अदरणीयाः" अदरणार्हाः, 'पर्वताः' पर्ववन्तः, 'शाक माशवः' सहभूताः सोम मश्नीथ, अभिषुणुथ। ते तस्याभिषुण्वन्तः 'इन्द्राय' 'श्लोकं' श्रवणीयम्, हृद्यम्, 'घोषं' शब्दं 'भरथ' धारयथ, निर्वर्त्तयथ। ये ते यूय ममुना प्रकारेण यस्मात् 'सोमिनः' भवथ। अथ वा 'सोमिनः' तद्वतो यजमानस्य "गृहेषु" एवं कुरुध्वे, तस्माद् युष्मानधिकृत्य ब्रवीमि—'प्रैते वदन्तु' युष्मदर्थं स्तुतीः उद्गातारः‡। 'प्रवदाम' च 'वयम्' होतारः। अध्वर्यूनपि च ब्रूमहे,— एभ्यः 'ग्रावभ्यः' 'वाचं वदद्भ्यः' 'वदत' वाचं याक्तक मेतान् प्रतीति ॥

"नराशंसः"-इति समाम्नातः§। कः पुनरेष नराशंसः? "येन नराः प्रशस्यन्ते, स नराशंसो मन्त्रः"‖। किमत्र मन्त्रः स्तूयते? न

* "नराशंसो"—इति हस्तिलिखितपुस्तकस्थः पाठो हस्तलेखकप्रमादजो वा।

† ऋ० सं० ८, ४, २९, १। ग्रावस्तोत्र मेतत् सूक्तम्।

‡ "एते ग्रावाणः उपलाः प्रवदन्तु अभिषवशब्दं कुर्वन्तु"—इति सा०।

§ १भा० ४९४, ४९९पृ० ५ख० २ख० (९) "नाराशंसः"।

‖ अत्र सर्वत्रैव नाराशंस इत्येव साधु-पाठः। "नराशंस एव नाराशंसः, मन्त्रोऽभिधेयः"—इति देवराजः ४९७पृ० १पं०। नराशंसशब्दस्य तु यज्ञः अग्निर्वा वाच्यः। २भा० ४९,४पृ० ८ख० १पा० २ख०; १भा० ४९८, ४९१पृ० ५ख० २ख० (४) द्रष्टव्यम्।

इत्युच्यते लक्षणम्; मन्त्रैः नराः स्तूयन्ते*। एवन्तर्हि नराणामेव समाम्नानं प्राप्नमासीत्? न, तेषां सामान्यस्तुत्यभावात्, राज्ञां च स्तुत्युपपत्तेः। तेषामपि च सामान्या स्तुतिर्नास्ति; अस्ति त्वेकैकशो न केषाञ्चिद्; अतो भावयव्यं लक्षणीकृत्य नाराशंसो मन्त्र उदाह्रियते। "तस्य" नाराशंसस्य मन्त्रस्य उदाहरणम्; "तस्य" वा भावयव्यस्य प्राधान्यस्तुतिः "एषा" ऋक् "भवति"—॥ ९॥

अमन्दान् स्तोमान् प्रभरे मनीषा सिन्धावधि क्षियतो भाव्यस्य। यो मे सहस्रममिमीत सवानतूर्त्तो राजा श्रव इच्छमानः॥ अमन्दान् स्तोमानबालिशान-नल्पान्वा बालो बलवर्त्ती† भर्त्तव्यो भवत्यम्बास्मा अलं भवतीति वाम्बास्मै बलं भवतीति वा बलो वा प्रतिषेध-व्यवहितः प्रभरे मनीषया मनस ईषया स्तुत्या प्रज्ञया वा सिन्धावधि निवसतो भावयव्यस्य राज्ञो यो मे सहस्रं निरमिमीत सवानतूर्त्तो राजातूर्ण इति वात्वर-माण इति वा प्रशंसा मिच्छमानः॥ १०॥

॥ इति नवमाध्यायस्य प्रथमः पादः॥ ९. १.

---

† "स नाराशंसं शंसति। प्रजा वै नरो वाक् शंसः प्रजास्वेव तद् वाचं दधाति"—इत्यादि ऐ० ब्रा० ६, ५, १।

§ "बलभर्त्ता" क, ख, ग।

"अमन्दान् स्तोमान्"—इति* । दानपरितुष्टः कक्षीवान् ब्रवीति । 'अमन्दान्' "अबालिशान्", "अनल्पान्" वा; अबालिशयोग्यान् 'प्रभरे' प्रहरे उच्चारये। 'मनीषा' "स्तुत्या, प्रज्ञया वा"। कस्य? ('भाव्यस्य') "भावयव्यस्य" भावनेनैवासावर्जनेनैव सर्वार्थान् यवयति मिश्रयति अनुतिष्ठयतीति भावयव्यः†। क "निवसतः"? 'सिन्धौ अधिक्षियतः'‡। यः किं मकरोत्? 'यो मे' 'सहस्रं' बहून् 'सवान्' यज्ञान् ('अमिमीत') "निरमिमीत" निर्मितवान्, बहूनां यज्ञानां यागोपकरणं दत्तवान्। 'अतूर्त्तः' "अतूर्णः" अचपलः, अत्वरमाणः। क्रमेण यो निरमिमीत सहस्रं मम सवान् 'श्रवः' "प्रशंसाम्" "इच्छमानः" 'अमन्दान्' स्तोमान्, तस्मै भावयव्याय राज्ञे प्रभरे अहमिति ॥ १० ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य (नवमाध्यायस्य) प्रथमः पादः ॥ ९, १ ॥

---

* ऋ० सं० २, १, ११, १। "भावयव्यस्य स्तुतिरूपत्वात् स एव देवता"—इति "यद्यपि स्वनयेन दत्ता इति श्रूयमाणत्वात्, तस्यैव स्तुत्या भाव्यम्, तथापि पितृपुत्रयोरभेदात् आत्मा वै पुत्रनामासि इतिवत् पितृनाम्ना व्यवहर्तुं शक्यत्वात् प्रथमायां ऋचि "भावयव्यस्य"—इत्युक्तत्वाच्च भावयव्यं तुष्टावेत्येतदविरुद्धम्"—इति च सायणः।

† "भाव्यस्य भावयव्यस्य, तत्पुत्रस्य स्वनयस्येत्यर्थः"—इति सायणः।

‡ "सिन्धौ सिन्धुदेशे। यद्वा स्वनया सिन्धुतीरे समुद्रतीरे। अधिक्षियतः अधिनिवसतः"—इति च सायणः।

॥ द्वितीयः पादः ॥

यज्ञसंयोगाद्राजा स्तुतिं लभेत राजसंयोगाद्युद्धोपकरणानि तेषां रथः प्रथमागामी भवति रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा रपतेर्वा (रसतेर्वा *) तस्यैषा भवति ॥ १ (११) ॥

"यज्ञसंयोगाद्राजा स्तुतिं लभेत"—इति, एवमादि। तदेतत् पूर्वप्रकृतस्यैव भावयव्यस्य स्तुतिलाभनिमित्त मेव मन्त्रगत मनूद्यते। यस्मात् सहस्रं सवान् निरमिमीत, तस्मात् प्रभर इति केचित् मन्यते; अपरे पुनः युद्धोपकरणाना मुत्तरेषां सामान्य मेतत् स्तुतिलाभनिमित्त मिति वर्णयन्ति†। तत् कथम्? इति। अश्वमेधे हि "जीमूतस्येव भवति प्रतीकम्"—इत्यनेन‡ सर्वयुद्धोपकरणोपेतं रथ मधिरूढः, सन्नद्धकवचः, राजा स्तूयते। स कस्मादित्युपोद्घ-

* नास्त्येष पाठः क-ख-ग-पुस्तकेषु।

† सायणभाष्ये तु भावयव्यदाननिमित्त मन्यथैव वर्णितम्; "प्राता रत्नम् (ऋ० सं० १म० १८अ० ५सू०)"—इति व्याख्यानारम्भे एव "अचेतिदासमाचष्टे"—इत्यादिकं विस्तृतं तत्रैवालोच्यम्।

‡ ऋक्संहितायाः षष्ठमण्डलीय-षष्ठाध्याये जीमूतस्येत्येकोनविंशत्यृचं चतुर्दशं सूक्तम्। तत्र पायुर्भारद्वाजः सङ्ग्रामाङ्गान्यृक्शोऽभितुष्टाव। तथाहि,—(यथाक्रमेण) वर्म, धनुः, ज्याम्, आर्त्नी, इषुधिम्, सारथिम्, रश्मीन्, अश्वान्, रथम्, रथगोपान्, इषूः, प्रतोदम्, हस्तघ्नम्, युद्धभूमिम्, ब्रह्मणस्पतिम्, अदितिम्, कवचम्, सोमम्, वरुणम्, देवान्, ब्रह्म चेति। युद्धेऽनेन सूक्तेन राजानं सन्नाहयति (आ० गृ० सू० ३, ११)।

स्योच्यते,—"यज्ञसंयोगाद् राजा स्तुतिं लभेत" स तावद् यज्ञसंयोगात् स्तुतिं लभते।

अथ पुनर्युद्धोपकरणानि कि मिति स्तुतिं लभन्ते? इति,—"राजसंयोगाद् युद्धोपकरणानि"। युद्धाय उपक्रियन्ते इति युद्धोपकरणानि; युद्धे वा उपकुर्वन्तीति युद्धोपकरणानि। स एष हि व्यापी स्तुतिसङ्क्रमन्याय आचार्येणोपदर्शितः। तद्यथा—युद्धोपकरणानि राजसंयोगात् स्तुतिं लभन्ते; तस्य तानि अङ्गानीति तत्सम्बन्धात् स्तूयन्ते,—राजापि यज्ञसंयोगाद्,—यज्ञोऽपि देवसंयोगात्,*—देवता अध्यात्मसम्बन्धात्; सोऽय मेवात्मैवाङ्गप्रत्यङ्गभावेनावस्थितः सर्वावस्थातः† स्तूयत इत्यात्मस्तुतिः‡ सर्वस्थानाधिपतिभागिनी आत्मप्रतिष्ठा बोद्धव्या; तथोपकरणस्तुतिरिति§। एष स्तुतिसङ्क्रमन्यायः सर्वत्रोपसन्धेयः॥

"तेषां रथः प्रथमागामी भवति"‖। स कस्मात्? तदाधारत्वादितरेषां युद्धोपकरणानाम्। "रथः" कस्मात्? "रंहतेः गतिकर्मणः" तस्य हि तदर्थैवोत्पत्तिः। "स्थिरतेः वा स्याद् विपरीतस्य"

---

* "दैवतासम्बन्धात्" ख।

† "सर्वावस्थः" ख।

‡ "इत्यात्मस्तुतिरेवेयं सर्वा" ख।

§ अतएवोक्तं पुरस्तात्—"आत्मैवैषां रथो भवत्यात्माश्व आत्मायुध मात्मेषव आत्मा सर्वं देवस्यदेवस्य"—इति २भा० ३१२६०।

‖ तेषां युद्धोपकरणानां मित्यर्थः। इत आरभ्य रथादिगणः। एषोऽपि अश्वादिगणव्याख्यामूत एव। १भा० ५ख० २ख० ७—१५।

स्थिरः सन् रथ इत्युक्तः ; तत्र हि स्थिरः सुप्रतिष्ठितो योद्धा भवति ; न तथा अश्वादिषु * ॥

"तस्य" "एषा" "भवति" स्तुतिः—॥१ (११)॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि॥ वनस्पते दृढाङ्गो हि भवास्मत्सखा प्रतरणः सुवीरः कल्याणवीरो गोभिः सन्नद्धो असि वीळयस्वेति संस्तम्भस्वास्थाता ते जयतु जेतव्यानि दुन्दुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा दुन्दुभ्यतेर्वा स्याच्छब्दकर्मणस्तस्यैषा† भवति॥ २(१२)॥

"वनस्पते वीड्वङ्गः"—इति ‡। गर्गस्यार्षम्। हे 'वनस्पते' वानस्पत्य! रथ! त्व मुच्यसे,—'वीड्वङ्गः' "दृढाङ्गः" ('भूयाः') "भव"। ततश्च 'अस्मत्सखा' अस्मन्मित्रः। 'प्रतरणः' प्रतारणः, सङ्ग्रामाणां पारं नेता। 'सुवीरः' "कल्याणवीरः" अविक्लवानवखण्डिताधिष्ठाता भव। किञ्च; कृतप्रतीकारस्त्व मस्माभिः 'गोभिः सन्नद्धः असि' समन्ततो नद्धो बद्धः गव्येन चर्मणा स्नायुना च। स त्वं कृतप्रतीकार

---

* १भा० ४९५, ४९७पृ० ५अ० २ख० (७) द्रष्टव्यम्।

† "स्याद्धकर्मणस्तस्यैषा" क, ख, ग।

‡ ऋ० सं ४, ७, २५, १। एषा रथारोहणे विनियुक्ता ग० सू० २, ९। य० वा० सं० २९, ५२। अथ० सं० ६, १२५, १।

मात्मानं मत्वा तेन हेतुना सुतरा मास्मानं 'वीलयस्व' संस्तम्भय हि। संस्तम्भे च लब्धावस्थितः 'आस्थाता ते' अधिष्ठाता तव योद्धा, यानि तेन ('जेत्वानि') "जेतव्यानि" आत्मनोऽभीप्सितानि, तानि सर्वाणि 'जयतु' ॥

"दुन्दुभिः"—इति *। अस्य योऽभिधेयः, तस्य "शब्दानुकरणम्" आत्मनो नामधेयप्रतिलम्भनिमित्तम्; यथैवासावभिहन्यमानः शब्दङ्करोति † दुन्दुभिरिति तदेव तस्य नाम। "द्रुमो भिन्न इति वा"। द्रुमशब्दात् पूर्वपदम्, भिदेरुत्तरपदम्; तत्सम्भवो ह्यसौ‡ द्रुमैकदेशनिष्कुषितश्चर्मणा पिनद्धः ॥

"तस्य एषा भवति"—॥ २ (१२) ॥

उप॑ श्वासय पृथि॒वीमु॒त द्यां पु॑रु॒त्रा ते॑ मनुतां॒ विष्ठि॑तं॒ जग॑त्। स दु॑न्दुभे स॒जूरिन्द्रे॑ण दे॒वैर्दू॒राद्दवी॑यो॒ अप॑ सेध॒ शत्रू॑न्॥ उपश्वासय पृथिवीं च दिवञ्च बहुधा ते घोषं मन्यतां विष्ठितं स्थावरं जङ्गमञ्च यत्स दुन्दुभे सहजोषण इन्द्रेण च देवैश्च दूराद् दूरतर मपसेध शत्रूनिषुधिरिषूणां§ निधानं तस्यैषा भवति॥ ३ (१३)॥

* १भा० ४९४, ४९७पृ० ५अ० ३ख० (८) द्रष्टव्यम्।

† "शब्दालङ्करोति" क।

‡ "तत्सतत्लोऽसौ" ख।

§ "रिषुणो" क, ख, ग।

"उपश्वासय पृथिवीम्"—इति *। अत आरभ्य सर्वा एता † युद्धोपकरणा ऋचः, भारद्वाजस्यार्षम् ‡। हे 'दुन्दुभे!' 'उपश्वासय' उपशब्दय, आपूरय शब्देन एतां 'पृथिवीम्' कृत्स्नाम्। 'उत' 'द्याम्'। अपि चैकस्यापि सतस्तव 'पुरुत्रा' बहुत्वे वर्त्तमानस्य 'मनुताम्' "मन्यताम्" "घोषम्"। यच्चेदं 'विष्ठितं' "स्थावरम्", यच्चेदं ('जगत्') "जङ्गमञ्च"। यस्यैवं तव सामर्थ्यं द्यावापृथिव्यावापूरयितुम्, 'सः' त्वम् 'दुन्दुभे!' 'सजूः' "सहजोषणः" सहप्रीतिः 'इन्द्रेण' "च" अन्यैः "च" 'देवैः'। 'दूरात्' ('दवीयः') "दूरतरम्" 'अपसेध' अपकालय अपुनरागमनाय ('शत्रून्') अस्माकं शत्रून्।—इत्येतदाशास्महे त्वत्तः॥

"इषुधिः"="इषूणां निधानम्" तूणः; तस्मिन्निषवो निधीयन्ते§॥

"तस्य एषा भवति"—॥ ३ (१३)॥

ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चा कृ॑णोति॒ सम॑नाव॒-ग॒त्य॑। इ॒षु॒धिः सङ्काः॒ पृत॑नाश्च॒ सर्वाः॑ पृ॒ष्ठे निन॑द्धो

---

* ऋ० सं० ४, ७, २५, ४। "उप श्वासय पृथिवी मुत द्या मिति त्वचेन दुन्दुभि मभिमृशेत्"—इति श्रौ० सू० ३, ११। य० वा० सं० २९, ५५। अथ० ६, १२६, ४।

† "आजङ्गति"—इत्यन्ता अष्टौ (द्र० पृ० परस्तादिहैव ३०)

‡ एतत्पूर्वोदाहृतापि ऋक् युद्धोपकरणा एव परं न तस्याः भारद्वाजदृष्टत्वम्; आसान्तु सर्वासां विभिन्नसूक्तीयत्वेऽप्यस्त्येव भारद्वाजदृष्टत्वेन साम्यम्। वस्तुतोऽस्याः किल गर्गो नाम भारद्वाजो द्रष्टा; उपरितनानान्तु पायुर्नाम भारद्वाज इति।

§ १भा० ४६४, ४६७पृ० ५अ० २ख० (९) द्रष्टव्यम्।

जयति प्रहुतः ॥ बह्वीनां* पिता बहुरस्य पुत्र इतीषून-भिप्रेत्य प्रस्मयत इवापाव्रियमाणः† शब्दानुकरणं वा सङ्काः सचतेः सम्पूर्वाद्वा किरतेः पृष्ठे निनद्धो जयति प्रहुत इति व्याख्यातं हस्तघ्नो हस्ते हन्यते‡ तस्यैषा भवति ॥ ४ (१४) ॥

"बह्वीनां पिता"—इति। योऽयं मिषुधिः 'बह्वीनां' "बह्वनाम्" इषूणां ('पिता') पाता रक्षिता, तदर्थत्वात्। यस्य चेषुधेः 'बहुः' इषुकलापः 'पुत्रः' पुरुणो बहूनः त्राता; तदर्थं ह्यसौ रचत इत्येवं व्युत्पाद्यम्। यश्चायं 'चिश्चाकृणोति' "प्रस्मयत इव अपव्रियमाणः" प्रकर्षेण स्मयत इव उद्घाट्यमानः, चित्रपुङ्खत्वात्। अथ वा हसतीव शोभया पुङ्खदीप्त्या। अस्मिन् पक्षे चिश्चातिरपठितोऽपि धातुः कल्प्यत इति; विकारपक्षेषु तदर्थान्यधातूपादानम्—इत्याचार्य-परिभाषा। अथ "वा" "शब्दानुकरणम्" चिश्चिदित्येवं शब्दं करोति। कदा? 'समना' सङ्ग्राम मवगत्य प्राप्य। स एष इषुधिः 'सङ्काः' सङ्कटान् सम्पृक्तान् वा सङ्ग्रामान् 'पृतनाः च सर्वाः' याः स्पर्द्धमानैः इषव एव केवल मभिलक्ष्य क्षिप्यन्ते पताकार्थम्, तानेवंविधान् सङ्ग्रामान् 'पृष्ठे' रथस्य, मनुष्यस्य वा 'निनद्धः' 'जयति प्रसूतः' क्षिप्तो धनुष्मता।— इत्येतदाशास्महे ॥

---

* "बह्वीनां" क, ख, ग।

† "प्रस्मयत इति वावभ्रीयमाणः" क, ख। "प्रस्मयत इवावव्रियमाणः" ग।

‡ ऋ० सं० ५, १, १९, ५। य० वा० सं० २९, ४२।

"हस्तघ्नः"—कलापीपट्टकः*, गोधेति च य माहुः†। स कस्मात्? "हस्ते" ह्यवस्थितोऽसौ ज्यया "हन्यते"‡॥

"तस्य एषा भवति"— ॥ ४ (१४) ॥

अहि॑रिव भो॒गैः पर्ये॑ति बा॒हुं ज्याया॑ हे॒तिं प॑रि॒बा-धमा॑नः। ह॒स्त॒घ्नो विश्वा॑ व॒युना॑नि वि॒द्वान् पु॒मान् पुमां॑सं॒ परि॑ पातु वि॒श्वतः॑॥ अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात् परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् पुमान् पुरुमना भवति पुंसतेर्वा-भीशवो व्याख्यातास्तेषा मेषा भवति॥ ५ (१५)॥

"अहि॒रिव भो॒गैः"—इति§। योऽयम् 'अहिरिव भोगैः' सर्प व कुटिलभावैः; सर्पग्राहकस्य बाहुं सर्पेणेव ('पर्येति') "परिवेष्ट-ति" 'बाहुम्' धनुष्मतः पुरुषस्य||। "ज्याया हे॒तिं परि॒बाधमानः"। "ज्याया वधात्" ज्याघातात् बाहुं सर्वतस्त्रायमाणः, तदर्थत्वात् तस्य। सोऽय मेवन्धर्मा 'हस्तघ्नः' 'पुमान्' इव पुरुमना इव; कश्चिदात्मः

* "कालापीपट्टकः" क।

† १भा० ४९४, ४९७पृ० ५अ० ३ख० (१०) द्रष्टव्यम्।

‡ "हस्ते हस्तसमीपवर्तिनि प्रकोष्ठे स्थितः सन् ज्यया हन्यत इति हस्तघ्नः"—इति सायणः।

§ ऋ० सं० ५, १, ११, ४। "अत्र धन्विनः प्रकोष्ठे बध्यमानस्य हस्तघ्नस्य स्तुतिः"—इति सायणः। य० वा० सं० २९, ५१।

|| "बाहुं प्रकोष्ठम्, लक्षणया बाहुशब्दः प्रकोष्ठे वर्तते"—इति सायणः।

प्रज्ञानबहुलः 'पुमांसम्' एतं धनुष्मन्तम् 'परिपातु विश्वतः' सर्वप्रकारं सर्वतः पातु ।— इत्येतदाशास्महे ॥

स्त्रिय मपेक्ष्याल्पमनस्कां पुरुषे बहुतरं मनः "पुंसतेः वा" पुरुषार्थस्य ; पौंस्य मिति बलनाम भवति * ॥

"अभीशवः"—इति † वक्तव्यम्। ते पुनरमी "व्याख्याताः" अभिधानतोऽभिधेयतश्च—"अभीषवोऽभ्यश्नुवते" (२भा० २८२पृ०)-इति॥

"तेषाम् एषा भवति"— ॥ ५ (१५) ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः । अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥ रथे तिष्ठन्नयति वाजिनः पुरस्तात् सतो यत्रयत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयामि ‡ मनः पश्चात्सन्तो §ऽनुयच्छन्ति रश्मयो धनुर्धन्वतेर्गतिकर्मणो वधकर्मणो वा धन्वन्त्यस्मादिषवस्तस्यैषा भवति॥ ६ (१६) ॥

"रथे तिष्ठन्नयति वाजिनः"—इति ‖ । यदेतत् 'रथे' 'तिष्ठन्' वर्त्तमानः 'सुषारथिः' "कल्याणसारथिः" सुशिक्षितोऽपि सारथिः,

---

* १भा० ११०, १७९ पृ० द्र० ।

† १भा० ४९४, ४९८ पृ० ५च० २ख० (११)।

‡ "पूजयत" क, ख, ग ।

§ "पश्चात्यतो" क, ख, ग ।

‖ ऋ० सं० ५, १, १०, १ । "अत्र पूर्वार्द्धे सारथिस्तुतिरुत्तरार्द्धेऽभीशूनां स्तुतिः" —इति सायणः । य० वा० सं० २९, ४३ ।

नेता रथस्य 'वाजिनः' 'पुरः' "पुरस्तात्" अग्रतः "सतः" रथयुक्तान्, रथस्य नीडे 'पश्चात्' सन् उपतिष्ठंस्तिष्ठन्*। क्व ? 'यत्र यत्र कामयते' यत्र यत्रेच्छति योद्धा, तत्र तत्र 'नयति'। तदेतत् किं सारथेर्माहाभाग्यम् ? न—इत्युच्यते ; अनभीशूको हि सारथिः किं कुर्यात् सुशिक्षितोऽपि ? एवम् 'अभीशूनाम्' एतं 'महिमानं' माहाभाग्यं 'पनायत' पूजयामि। यत् 'मनः' अश्वाना मतिप्रवृद्ध-जवाना मपि, येषु अश्वेषु उपनिबद्धाः 'रश्मयः'† प्रगृहीताः सारथिना 'पश्चात्' "सन्तः" 'अनुयच्छन्ति' उपरमयन्तीत्यर्थः। सम्बोध्याभावात् पनायतेत्यस्य पूजयामीति पुरुषवचनव्यत्ययः‡॥

"धनुः"§, "धन्वतेः" गत्यर्थस्य ; तद्बलेन हीषवो गच्छन्ति। "वधकर्मणो वा" शत्रुवधाय हि तदुत्पद्यते॥

"तस्य एषा भवति"—॥ ६(१६)॥

धन्वना गा धन्वनाजिञ्जयेम धन्वना तीव्राः समदो जयेम। धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम॥ इति सा निगदव्याख्याता समदः समदो वात्तेः सम्मदो वा मदतेर्ज्या जयतेर्वा जिनातेर्वा प्रजावयतीषूनिति वा तस्या एषा भवति॥ ७(१७)॥

---

* स्वस्य पुरा रथिनः पश्चात् सारथेः स्थान मिति स्फुटम्।

† "रश्मिनः, अश्वग्रीवाभ्यां व्याप्य वर्त्तमानाः पाशाः"—इति सायणः।

‡ "पनायत हे जनाः। स्तुत"—इति सायणः।

§ १भा० ४९४, ४९८ पृ० ५अ० २ख० (११)।

"धन्वना गाः"—इति *। ताः 'गाः' 'धन्वना' धनुषा वयम् अरिभ्यः † 'जयेम'। अपि च 'आजिम्'। इतरेतरस्पर्द्धया यत्र लक्ष्यवेधायैव केवलं मिषवः क्षिप्यन्ते वैतर्क्येण प्रतापार्थं वा तम् 'आजिम्' आजवनं धनुषैव जयेम। अपि च याः 'तीव्राः' दारुणाः 'समदः' सङ्ग्रामाः, अनेकशस्त्रसम्पातसङ्कटाः, अनेकवीरपुरुषाकीर्णाः, ताः अपि वयं 'जयेम' 'धन्वना' धनुषैव। अपि च किं बहुना समासत एव ब्रूमः—'धनुः शत्रोः अपकामं कृणोति' यत्रयत्र शत्रुरस्मान् जेतुकामः स्यात्, ततस्ततोऽपगतकाम मस्मत्तो धनुः करोतु ‡। अपगतकामे च तस्मिन् शत्रौ वयं 'धन्वना' धनुषैवैताः 'सर्वाः' दिशः, 'प्रदिशः' च § 'जयेम'।—इत्येतदाशास्महे॥

"समदः। समदो वा, सम्मदो वा"। सम्पूर्वस्य "अत्तेः" भक्षणार्थस्य; भक्षित इव हि तत्र परस्परतः। "मदतेर्वा" हर्षणार्थस्य द्वितीयम्—सम्मदो वेति; संहृष्टास्तत्र हि परस्परतो युध्यन्ते॥

"ज्या"—इति ‖ वक्तव्यम्। सा पुनरियं "जयतेर्वा जिनातेर्वा" धातन्यत्व मर्थैकत्वम्। तद्बलेन हि जीयते। स पुनरेष धनुर्गुणः॥

"तस्या एषा भवति"—॥ ७ (१७)॥

---

* ऋ० सं० ५, १, १९, १। य० वा० सं० २९, ३९।

† "अपरेभ्यः" ख।

‡ प्रतिकामं २, ४, १०, २; १०, १, १५, ८। अनुकामं ९, ७, १०, ९।

§ "किञ्च धन्वना वयं 'सर्वाः प्रदिशः' सर्वासु दिक्षु वर्त्तमानान् शत्रून् जयेम। प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्त्तते मञ्चाः क्रोशन्तीतिवत्"—इति सायणः।

‖ १आ० ४६४, ४६८ पृ० ५ख० २ख० (१२)।

वृक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताधि धन्वं ज्या इयं समने पारयन्ती ॥ वक्ष्यन्तीवागच्छति कर्णं प्रिय मिव सखाय मिषुं परिष्वजमाना योषेव (शिङ्क्ते*) शब्दं करोति वितताधि धनुषि ज्येयं समने सङ्ग्रामे पारयन्ती (पारं नयन्ती †) इषुरीषते‡र्गतिकर्मणो वधकर्मणो वा तस्यैषा§ भवति ॥ ८ (१८) ॥

"वृक्ष्यन्तीव"—इति ‖। येयं योषिदिव का चित् कस्मै चिद्-
ष्टाय पुरुषाय किञ्चिद् रहस्यं 'वक्ष्यन्ती इव' कथयिष्यन्तीव ज्या,
नुष्मता पुरुषेण इषुं चिक्षिप्सता सव्येन दक्षिणेन वा पाणिना कृष्य-
ाणा सव्यं दक्षिणं वा 'कर्णं' प्रत्याकृष्यते। धनुष्मता तथा मध्यम्
ात्मनो निनीय इषुं 'गनीगन्ति' "आगच्छति"। कथम्? इति।
प्रियं सखायं परिषस्वजाना" 'प्रियम्' इष्टं का चित् 'सखायं'
मानख्यानम् उपजातप्रीतिम्¶, स्त्रीपुरुष मिव इषुम् "परिष्वज-
माना" सम्प्रत्यर्थं एव; सस्वजानेत्यभ्यासोऽनर्थकः, अर्थविशेषाभा-
वात्। यथा हि सा कर्णं प्रत्याकृष्यते धनुष्मता, तथा मध्य मात्मनो

---

*, † नेमौ पाठौ क-ख-ग-पुस्तकेषु ।

‡ "इषुरिषते॰" कातिरिक्तेषु सर्वत्र, क-नाम-हस्तिपुस्तकसम्मतस्त्वेष पाठः ।

§ "॰र्गतिकर्मणस्तस्यैषा" क, ख, ग ।

‖ ऋ॰ सं॰ ५, २, १६, २ । य॰ वा॰ सं॰ २९, ४० । "सव्यं दक्षिणं वा 'कर्णं' प्रति 'आगनीगन्ति' "आगच्छति"—इत्येव ख ।

¶ "सखायं पति मिव"—इति सायणव्याख्यानम् ।

निनीषेषुं परिष्वजत इव। कि मेतावदेव? न-इत्युच्यते,—या च इयं 'योषा इव शिङ्क्ते' योषिदिव; विदग्धा* का चित् कामिना पुरुषेण आत्मानं प्रत्याक्रम्यमाणोपजायमानपरितोषा कामिनः पुरुषस्य हर्ष मुत्पादयन्ती 'शिङ्क्ते' सुकुमार मव्यक्तशब्दं करोति। 'वितताधिधन्वन्' धनुषि अध्यारोपिता, सेयम् अस्माक मेवमादिगुणयुक्ता 'ज्या', 'समने' "सङ्ग्रामे" 'पारयन्ती' अस्तु, "पारम्" अन्तं "नयन्ती" अस्तु शत्रूणाम्।—इत्येतदाशास्महे॥

"इषुः"—इति †। एतत् "ईषतेः‡ गतिकर्मणः" तदर्थ मेवासावुत्पद्यते §, वधार्थस्य वा; तदर्थ मेव ह्यसौ गच्छति‖॥

"तस्य एषा भवति"—॥ ८ (१८)॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सम् च वि च द्रवन्ति तत्रास्मभ्य मिषवः शर्म यंसन्॥ सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोऽस्या दन्तो मृगयतेर्वा गोभिः सन्नद्धा पतति

---

* विदग्धालक्षणन्तु—वाक्कौशलयुक्तत्वम्। सा च द्विविधा; वाग्विदग्धा, क्रियाविदग्धा चेत्यादि रसमञ्जर्यादौ द्रष्टव्यम्। "योषा नारी"—इत्येव सायणः।

† १भा० ४९४, ४९८ पृ० ५ऋ० २ख० (१४)।

‡ "इषतेः"—इति क, कातिरिक्तमूलसम्मतश्चैष पाठः।

§ "इष गतौ" धा० दि० प० २१। "इषति" १भा० १५२ पृ०। "इषितः" ३भा० ४९८, ४८० पृ०।

‖ "ईष गतिहिंसादर्शनेषु" धा० भ्वा० आ० ६११। "ईषते" १भा० २७३ पृ०, परस्ताच्च १०, १, ११।

प्रहृतेति व्याख्यातं* यत्र नराः सन्द्रवन्ति च विद्रवन्ति च तत्रास्मभ्य मिषवः शर्म यच्छन्तु शरणं सङ्ग्रामेष्वश्वाजनीं कशेत्याहुः कशा प्रकाशयति भय मश्वाय कृष्यतेर्वाणूभावाद्वाक् पुनः प्रकाशयत्यर्थान् खशया क्रोशतेर्वाश्वकशायां एषा भवति॥ ९ (१९)॥

"सुपर्णं वस्ते"—इति †॥ य एते 'सुपर्णं' 'वस्ते' वसतेऽङ्गाद्धं "वाजान्" 'इषवः'। येषां च एतेषां('मृगः') "मृगमयः" 'दन्तः', यदि मार्गाणि फलानि; अमार्गेषु वा व्यथनस्वभावात् मार्गयन्तीव,—किं तु तद् वेद्धव्यं स्याद् यदहं विद्धेय मिति‡। ये चेमे 'गोभिः सन्नद्धाः' गव्येन स्नाम्ना स्नेम्णा च समन्ततो नद्धाः §, 'पतति' गच्छन्ति, अनुज्ञाता 'प्रसृताः' चिप्ताः। त एवमादिगुणयुक्ता 'इषवः', 'यत्र' यस्मिन् सङ्ग्रामे 'नरः' नराः मनुष्याः 'संद्रवन्ति' सङ्गच्छन्ति 'च', 'विद्रवन्ति च' पुनर्विगच्छन्ति, 'तत्र' अस्मभ्यं 'शर्म' "शरणं" सुखं जयनिमित्तं ('यंसन्') "यच्छन्तु" ददतु।—इत्येतदाशास्महे॥

"अश्वाजनी"—इति ‖, एतत् पदम्। तां पुनरेतां "कशा—इत्याहुः"। अश्वाजनीत्येतत् न निर्वक्तव्यम्, प्रत्यक्षवत्त्वादस्य।

---

* पुरस्तात् १अ० २पा० १ख० १७पृ०।

† ऋ० सं० ५, १, २१, १। य० वा० सं० २९, ४७।

‡ "मृगो मृगावयवो शृङ्गं दन्तो भवति; इषवः काश्चिद् दन्तमुखा भवन्ति हि। अथ वास्याः दन्तो मृगः, मपून् मृगयमाणो भवति"—इति सा० भा०।

§ "किञ्च 'गोभिः' गोर्विकारैः स्नायुभिः 'सन्नद्धा' सम्यग् बद्धा, अथ वा गौरिति ज्यानाम, तया सन्नद्धा। अत्र वचनव्यत्ययः। तथा च निगमः,—इयेष्टके नियतामीमयद् गौः (ऋ० सं० १०, २७, २२)"—इत्यादि सायणः।

‖ १भा० २९५, २९८ पृ० ५अ० ३ख० (१५)।

अथ "कशा" कस्मात् ? सा हि "प्रकाशयति" प्रख्यापयति "भयम् अश्वाय"। "कृष्यतेः वा अणूभावात्"; अपकृष्टा हि सा भवति चर्मणोऽल्वी। "वाक्" अपि कशा इत्युच्यते; सा "पुनः प्रकाशयत्यर्थान्" इति। अथ वा "खशया" वाक्; खे मुखाकाशे शेते इति। "कोशतेः वा" शब्दार्थस्य॥

या लम्बकशा, तस्याः "एषा भवति"—॥ ९ (१९)॥

आ ज॒ङ्घन्ति॒ सान्वे॑षाञ्ज॒घना॒ँ उप॑ जिघ्नते। अश्वा॑ज॒नि प्र॒चे॑तसो॒ऽश्वा॑न्त्स॒मत्सु॑ चोदय॥ आघ्नन्ति* सानून्येषां सरणानि सक्थीनि सक्थिः सचतेरासक्तोऽस्मिन् कायो जघनानि चोपघ्नति जघनं जङ्घन्यतेरश्वाजनि (प्रचेतसः†) प्रवृद्धचेतसोऽश्वान्त्समत्सु समरणेषु सङ्ग्रामेषु चोदयोलूखल मुरुकरं वोर्द्ध्वखं वोर्करं‡ वो मे कुर्वित्यब्रवीत्तदुलूखल मभवदुरुकरं चैतत्तदुलूखल§ मित्याचक्षते परोक्षेणेति च ब्राह्मणं तस्यैषा भवति। १० (२०)॥

"आ जङ्घन्ति सान्वेषाम्"—इति ||। 'आ जङ्घन्ति'—इति शत

---

* "आघ्नति" क, ख, ग।

† नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

‡ "वोर्करं वोर्द्ध्वखं" क, च।

§ "चैतदुलूखल" क, च।

|| ऋ० सं० ५, १, ११, २। य० वा० सं० २९, ४०।

सम्बोधनम्। हे 'अश्वाजनि!'* 'आजङ्घन्ति!' ('सानु') "सानूनि" 'एषाम्' "सरणानि" समुच्छ्रितानि "सक्थीनि" कटिप्रदेशान् 'जघना उपजिघ्नते!' "जघनानि" स्फिग्देशाः, तांश्च हे अश्वाजनि! उपजिघ्नति! इद मपि शतर्थेव। रथ्यानां हि कटिप्रदेश मश्वाजन्य-भिघ्नन्ति, पस्त्यानां† स्फिग्देशान्। हे 'अश्वाजनि!' या त्व मेव मभिहंसि; सा त्व मेतान् 'अश्वान्' 'प्रचेतसः' "प्रकृष्टचेतसः" गमनं प्रति समुत्सुकान् 'समत्सु' "समरणेषु" सङ्ग्रामेषु तथा 'चोदय' यथा जयेयम्।—इत्येतदाशास्महे॥

"सानूनि = सक्थीनि" तानि पुनः "सरणानि"; तद्बलेन हि सरन्ति सर्त्तारः। "सक्थिः" कस्मात्? "सचतेः"। किं मस्मिन् सक्तम्? "आसक्तोऽस्मिन्" "कायः" कृत्स्नं शरीरम्। "जघनम्" कस्मात्? तद्धि ("जङ्घन्यते"‡) भृशं हन्यते कशया॥

"उलूखलम्"—इति, § एतत् पदम्। तत् कस्मात्? तद्धि उरुकरत्वात् "उरुकरम्" बङ्क्रनम् करोति; उरुशब्दात् पूर्वपदम्, करोतेरुत्तरपदम्। "उर्करं वा" ऊर्क्शब्दात् पूर्वपदम्, करोते-र्वोत्तरपदम्; ऊर्जं एव हि करणार्थं तदुत्पद्यते। "ऊर्द्ध्वखं वा" ऊर्द्ध्वशब्दात् पूर्वपदम्, खशब्दादुत्तरपदम्; ऊर्द्ध्व मेव हि तस्य खातं

* "अश्वाजनि! अश्वानां क्षेप्त्रि! कशे!"—इति सा० भा०।

† पस्त्यं=स्थलम् (१भा० ३०९, ३०८ पृ०९); पस्त्यानां=स्थलानाम्, स्थलद्व्या-रवाहाना मिति यावत्। "पृष्ठ्यानां"—इति ख-पाठः। पृष्ठवाहाना मिति तदर्थः।

‡ ऋ० सं०—"अपजर्जनत्" ९, २, २५, ५; "जङ्घनन्त" १, १४, ४, १; "जङ्-घ्नतः" ९, ३, ६, १५।

§ १ भा० ४६५, ४६९ पृ० ५ अ० ३ ख० (१६)।

भवति। अथ वा "उरु मे कुरु—इत्यब्रवीत् तदुलूखल मभवत्"। तत् किल क्रियमाणं उरु मे खं कुर्वित्यब्रवीदिव, तथागुणयुक्तत्वात् तस्य। ब्राह्मण मपि च भवति—"उरुकरं वै तत्तदुलूखल मित्याचक्षतेऽपरोक्षेण" उरु करोतीत्युरुकर मेतत् प्रत्यक्ष मव्यवहितगुणविधानम् *। तत्पुनरेतत् र-कोर्थ्यत्यये न व्यवहितगुण मुच्यते उलूखल मिति†॥

"तस्य" "एषा" स्तुतिः "भवति"—॥१०(२०)॥

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे। इह द्युमत्तमं वद जयता मिव दुन्दुभिः। इति सा निगदव्याख्याता॥ ११ (२१)॥

॥ इति नवमाध्यायस्य द्वितीयः पादः॥ ९. २.

"यच्चिद्धि त्वं गृहेगृहे"—इति‡। शुनःशेपस्यार्षम्। "आयजी वाजसातमा"—इति च§। सोमाभिषवे विनियोगः॥। अभि

---

* "मव्यवहितगुणाभिधानम्"—इति ख।

† इत आरभ्य द्वादशानाम् (१ भा० ४९५ पृ० ५ ख० ३ ख० १९—१८.) एक जातीयत्वाभावात् विभिन्नार्थत्वाच्च न गणीभूतत्वेन व्यपदेश आचार्याणाम्, अन्यादि गणान्तर्गतत्वन्त्वस्त्येवैषा मपि।

‡ ऋ० सं० १, २, २५, ५; १ म० ६ अ० ५ सू० ५ ऋक्।

§ ऋ० सं० १ म० ६ अ० ५ सू० ७ ऋक्। परस्ताच्चेमां व्याख्यास्यति ४पा० १ख०।

‖ ऋ० सं० १ म० ६ अ० यत्र ग्रावेति पञ्चमं सूक्तं नवर्चम्। तत्र, आद्यास्तस्रोऽन्नःसवे होमे विनियुज्यन्ते, पञ्चम्याद्यास्तस्रः सोमाभिषवे, अन्त्या द्रोणकलशे सोमानयने। इत्यत्र अभिषवे विनियुक्तासु चतसृषु मध्ये "यच्चिद्धि"—इति प्रथमा, "आयजी"—इति तु तृतीया।

मन्त्र चोपधीयते अग्निचयने। हे 'उलूखलक !' 'युज्यसे'। यद्यपि त्वम् अन्नसंस्कारार्थं 'गृहेगृहे' युज्यसे, तथापि त्वम् 'इह' एव अस्मद् गृहे 'द्युमत्तमं' दीप्तिमत्तमम् गम्भीरम् (अन्नैर्बहुभिः संस्क्रियमाणैः) शब्दं 'वद'। कथम् ? "जयतां मिव दुन्दुभिः" ये हि जयन्ति, तेषा मेतदेव जयस्य पूर्वरूपं भवति गम्भीरस्वरो दुन्दुभिः; ये पुनर्जीयन्ते, तेषां हृस्वस्वर इति ॥ ११ (२१) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य (नवमाध्यायस्य) द्वितीयः पादः ॥ ९। २ ॥

॥ तृतीयः पादः ॥

वृषभः प्रजां वर्षतीति वातिवृहति* रेत इति वा तद् वृषकर्मा वर्षणाद् वृषभस्तस्यैषा भवति॥ १(२२)॥

"वृषभः"† कस्मात्? स हि "प्रजां वर्षति" प्रजोत्पत्तिकारणं रेतः सिञ्चति योनौ। "अतिबृहति रेतः इति वा" रेतः सेक्तु मतिशयेनाशावात्मान मुद्यच्छति। "तद् वृषकर्मा, वर्षणात् वृषभः"। तेनास्य वृषकर्मणा रेतोवर्षलक्षणेन गौरप्यतिशयेन यो युक्तोऽसावपि 'वृषणात्' रेतोवर्षणाद्धेतोः भकार मुपजनीकृत्वा वृषभ इत्युच्यते‡॥

"तस्य" गो-वृषभस्य "एषा" स्तुतिः "भवति"—॥ १ (२२) ॥

---

* "वातिबृहती" क, ख; "वातिवृहति" च।

† १भा० ४६५, ४६९ पृ० ५अ० ३ख० (१७)।

‡ उक्त पुरस्तात्,—"वृषभो वर्षितापाम्" इति (१भा० ४०१ पृ०), "वृषभस्य वर्षितुरपाम्"—इति च (१भा० ४०१ पृ०); इह तु गो-वृषभ एवोच्यते।

न्यक्रन्दयन्नुपयन्त एनममेहयन् वृषभं मध्य आजेः।
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय॥

न्यक्रन्दयन्नुपयन्त एन मिति व्याख्यात ममेहयन् वृषभं मध्य आजेराजयनस्या*जवनस्येति वा तेन (तं†) सूभर्वं राजानं भर्वतिरत्तिकर्मा तद्वा सूभर्वं सहस्रं गवां मुद्गलः प्रधने जिगाय प्रधन इति सङ्ग्रामनाम प्रकीर्णान्यस्मिन् धनानि भवन्ति द्रुघणो द्रुममयो घन‡स्तत्रेतिहास माचक्षते मुद्गलो भार्म्यश्व ऋषिर्वृषभञ्च द्रुघणञ्च युक्ता सङ्ग्रामे व्यवहृत्याजिं जिगाय तदभिवादिन्येषर्ग् भवति॥ २ (२३)॥

"न्यक्रन्दयन्नुपयन्त एनम्"—इति§। एवं तावद् "व्याख्यातम्" प्रतिपदम्; एकवाक्यतया तु मन्त्रस्य व्याख्येय मिति। मन्त्रदृ ब्रवीति,— यद् वृषभकेनाजैषीस्त्व मेनं राजान मिति। तत्र श्रृणुत।—यम् 'एनम्' 'आजेः' शरपथस्य सङ्ग्रामस्य 'मध्ये' वर्त्तमान 'वृषभम्' 'न्यक्रन्दयन्' 'उपयन्त' उपयन्ति; न्यक्रन्दयत एनं हे जनाः! फुत्कारवन्तं कारयतेति||; उपयन्ति उपगच्छन्ति परि-

---

* "मध्य आजयनस्या" क, ख ग।

† नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

‡ "द्रुममयो घण॰" ङ, च।

§ ऋ॰ सं॰ ८, ५, १०, ५। भर्म्यश्वपुत्रो मुद्गलस्य ऋषिः।

|| "न्यक्रन्दयन्, नितरां क्रन्दन मकुर्वन्। के? उपयन्तः समीपे गच्छन्तो नराः। यथा प्रचण्डेन क्रन्दनेन शत्रवो भीताः पलायन्ते तथा कुर्वन्"—इति सा॰ भा॰।

च्छन्ति। 'अमेहयन्' मेहयन्तस्य तं मुद्गलं खीयताम्; यावदयं सङ्ग्रामं करोति ततो न ह्यसुखं भविष्यतीति; स हि गोमिनां माजिस्तां खभावः। 'तेन' अमुना वृषभेण 'सुभर्वं' सुभगं शोभन-भोगं "राजानम्"; "तद्वा", 'सुभगं' सुयवसदेशं समृद्धम् *, 'शत-वत्' शतैस्तद्वत्सङ्ख्याकम्, 'सहस्रं' 'गवां' दशशतानि; यद्वा, असङ्ख्यं वङ्क। किम्? इति। 'मुद्गलः' अहम्, 'प्रधने' सङ्ग्रामे घनं प्रति-स्पर्द्धय विजिगीषोरावयोः प्रवृत्तयोर्वाहिकायां 'जिगाय' जित-वानिति॥

"द्रुघणः" इति †, एतत् पदम्। स पुनरेष "द्रुममयो घनः"। [illegible]द्रु-प्रकृतिः, तत्प्रकृतिवचने मयट्; द्रु-शब्दात् पूर्वपदम्, घन-[illegible]ब्दादुत्तरपदम्; मुद्गरोऽभिधेयः॥

"तत्रेतिहास माचक्षते"—इति। स्तुतिलाभनिमित्त मुभयोरप्येक[illegible]व वृषभद्रुघणयोः—"भार्म्यश्वऋषिरित्येवमादि[illegible]। स किल द्वितीय-[illegible]रभावात् राज्ञा सह प्रतिस्पर्द्धमानः ऐश्वर्यादन्यादिस्[illegible] "द्रुघणं" [illegible]षभेन सह "युक्त्वा" राज्ञा सहाजिं ससर्प, स च तं "जिगाय" [illegible]जितवान् ‡।

यथा चैतदेवम्, तस्यार्थस्य अभिवादिनी "एषा ऋक् भवति"—२ (२३)॥

---

* "सुभर्वम्, भर्वतिरत्तिकर्मा, शोभनचर्वणादिभक्षकम्, तादृशो यथा भवति [illegible]था कृत्वेत्यर्थः। यद्वैतद् गोसहस्रविशेषणम्"—इति सा० भा०।

† १भा० ४९५, ४९९९० ५अ० ३ख० (१८)।

‡ बृहद्देवतायाञ्चेत्यम्,—"मुद्गलस्य हृता गावश्चौरैस्त्यक्त्वा जरद्गवम्। स शिष्टं शकटे कृत्वा मत्वैक ऋजुराहवम्। द्रुघणं युयुजेऽन्यच्च चौरमार्गानुसारकः। द्रुघणं चाग्रतः क्षिप्ता चौरेभ्यो जगृहे स्वगाः॥"—इति।

इमन्तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम्। येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु॥ इमन्तं पश्य वृषभस्य सहयुजं काष्ठाया मध्ये द्रुघणं शयानं येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु पृतनाज्य मिति* सङ्ग्रामनाम पृतनाना मजनाद्वा जयनाद्वा मुद्गलो मुद्गवान् मुद्गगिलो (वा†) मदनङ्गिलतीति वा मदङ्गिलो वा मुदङ्गिलो वा भार्म्यश्वो भृम्यश्वस्य पुत्रो भृम्यश्वो भृमयोऽस्याश्वा अश्वभरणाद्वा पितुरित्यन्ननाम पातेर्वा पिबतेर्वा प्यायतेर्वा तस्यैषा भवति॥ ३ (२४)॥

"इमं तं पश्य वृषभस्य"—इति‡। जिताया गावौ अवसिताजि मरण माज्यन्त एवापविद्धं मुद्गरो मुद्गलः केन चित् पृष्टः;—केन स युक्तः वृषभेणेमं राजान मजैषीरिति? स त मुपदिशन्नेव द्रुघ माज्यन्ते तस्मिन्नपविद्ध मसावश्व मिव कुत्सयन् राजान मनयच्च तस्मै प्रत्याचष्टे,—इमन्तं पश्य येनाजैष मिति§। 'वृषभस्य' ('युञ्जम्'

* "पृतनाज्य इति" क, ख, ग।

† नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

‡ ऋ० सं० ८, ५, २१, ४। अस्या अपि भार्म्यश्वपुत्रो मुद्गल ऋषिः।

§ "कश्चन सखायं सेनादिसहायाभावेन जयविषय उपहासं कुर्वाणं प्रति ब्रवीति। राजा द्रुघणेन वृषभेण चाजिं जिगायेत्युक्तवान्; पूर्वं वृषभो वर्णितः अत्र द्रुघणो वर्ण्यते।"—इति सा० भा०।

"सहयुजम्"। क्व वर्त्तमानम्? 'काष्ठायाः' आज्यन्तस्य * 'मध्ये' 'द्रुघणं' 'शयानम्' अपविद्धम्। "येन जिगाय शतवत्सहस्रम्"—इति व्याख्यातम् (३५पृ०४पं०)॥

"पृतनाज्यम्—इति सङ्ग्रामनाम"। तत् कस्मात्? "पृतनानाम् अजनाद्वा" पृतनाः मनुष्याः, ते यस्मिन्नजन्ति गच्छन्ति; पृतना-शब्दात् पूर्वपदम्, अजतेरुत्तरपदम्। "जयनाद्वा" तत्रोत्तरपदे विकल्पयन्ति; ते हि तत्र जयन्ति। "मुद्गलः—मुद्गवान्"। लो मत्वर्थे। अथ "वा" "मुद्गगिलः" मुद्गभोजनप्रायः; मुद्ग-शब्दात् पूर्वपदम्, गिल-शब्दात् उत्तरपदम्। "मदनं गिलति इति वा" मदनः कामः, त मसौ गिलति वशीकरोति; जितेन्द्रिय इत्यर्थः; मदन-शब्दात् पूर्वपदम्, गिलतिशब्दात् उत्तरपदम्। "मदङ्गिलः वा" मद उद्रेकः, त मसौ गिलति, उपशान्त इत्यर्थः। "मुदं गिलः वा" हर्ष मसौ गिलति; निवृत्त इत्यर्थः †। "भार्म्यश्वः—भृम्यश्वस्य पुत्रः"। "भृम्यश्वः" पुनः "भृमयोऽस्याश्वाः" अनवस्थायिनः। "अश्व-भरणाद् वा" बिभर्त्ति वासावश्वान्॥

"पितुः—इति" ‡, एतद् वक्तव्यम्। तत् पुनरेतत् "अन्ननाम" §। तत् कस्मात्? "पातेः वा" रक्षणार्थस्य, "पिबतेः वा" पानार्थस्य॥

"तस्य एषा भवति"—॥ २ (२४)॥

---

* "आज्यन्तोऽपि काष्ठोच्यते"—इति १भा० ३२५पृ०।

† "निवृत्त इत्यर्थः"—इति रोथसहष्ट-हस्तिपुस्तकपाठः।

‡ १भा० ४९५, ४९९पृ० ५ख० २ख० (२९)।

§ "पितुमतीं=अन्नवतीं"—इति पुरस्ताच्चोक्तम्। २भा० १८०पृ०।

पितुं नु स्तोषं महो धर्माणन्तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥ तं पितुं स्तौमि महतो धारयितारं बलस्य तविषीति बलनाम तवतेर्वा वृद्धिकर्मणो* यस्य त्रित ओजसा† बलेन त्रितस्त्रिस्थान इन्द्रो वृत्रं विपर्वाणं व्यर्दयति नद्यो व्याख्यातास्तासामेषा भवति॥ ४ (२५)॥

"पितुं नु स्तोषम्"—इति‡। अगस्त्यस्यार्षम्। 'यस्य' पितोः 'ओजसा' बलेन बलाधिपतिरपीन्द्रः§, ('त्रितः') "त्रिस्थानः" त्रिषु स्थानेष्वप्रतिहतप्रभावः‖। 'वृत्रं' मेघम्, 'विपर्वं' विगतपर्वाणम्, विगतसन्धिबन्धनं कृत्वा 'वि अर्दयत्' विविध मर्दयति अपुनरावृत्तये "तं" 'पितुम्' अन्न मह'तविषीं' तविषीसंज्ञकस्य 'महः' "महतः" बलस्य 'धर्माणं' "धारयितारं" ('स्तोषम्') "स्तौमि"। को [illegible] नाम न [illegible] स्तुयात् यस्मादृते त्रिलोकाधिपतिरपीन्द्रः किञ्चिदप्यश[illegible] कर्त्तुमित्यभिप्रायः। "तविषीति बलनाम"¶; "तु वृद्धौ"—इत्यस्य**; तद्धि सर्ववस्तुभ्यो ज्यायः॥

---

* "तवतेर्वृद्धिकर्मणो" क, ख, ग।

† "त्रितो ओजसा" क, ख, ग।

‡ ऋ० सं० २, ५, ६, १। य० वा० सं० ३४, ७।

§ १भा० २५१, ४४०पृ० द्र०।

‖ त्रिस्थान इन्द्रः सूर्य एव। अतएव "इन्द्रो दिव इन्द्र ईशे पृथिव्याः (ऋ० सं० ८, ४, १५, ४)"—इत्यस्यापि सूर्यस्तुत्येकाहनिष्केवल्ये विनियोगो युज्यते। १भा० १८९पृ० द्र०।

¶ "तविषी" १भा० २१५, ११७पृ० (१०)।

** अदा० प०। १भा०—"तूताव" ४७५पृ०, "अनुसन्नवीत्वत्" २४९पृ०।

"नद्यः"* अवसरप्राप्ताः, ताः पुनरेताः "व्याख्याताः"—"नद्ना भवन्ति अव्द्वत्यः"—इति (२भा० २३७पृ०) ॥

"तासाम् एषा भवति"—॥ ४ (२५) ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि परुष्णि स्तोम मासेवध्व मसिक्न्या च सह मरुद्वृधे वितस्तया चार्ज्जीकीय आशृणुहि सुषोमया चेति समस्तार्थोऽथैकपदनिरुक्तं गङ्गा गमनाद्यमुना प्रयुवती गच्छतीति वा प्रवियुतं गच्छतीति वा सरस्वती सर इत्युदकनाम सर्त्तेस्तद्वती शुतुद्री शुद्राविणी क्षिप्रद्राविण्याशु तुन्नेव द्रवतीति वेरावतीं परुष्णीत्याहुः पर्ववती भास्वती†) कुटिलगामिन्यसिक्न्यशुक्लासिता सितमिति वर्णनाम तत्प्रतिषेधोऽसितं मरुद्वृधाः‡ सर्वा नद्यो मरुत एना वर्द्धयन्ति वितस्ताविदग्धा विवृद्धा महाकूलार्जीकीयां विपाडित्याहुः§ ऋजीकप्रभवा|| ऋज्जुगा-

* १भा० ४९५, ४७०पृ० ५ष० २ख० (२०) ।

† नास्त्येतत् पदं क-ख-ग-पुस्तकेषु ।

‡ "मरुद्वृधः" क, ख, ग ।

§ "विपाड्त्याहुः" क, ख, ग ।

|| "०ऋजूकप्रभवा" ङ, च ।

मिनी वा विपाड्विपाटनाद्वा विपाशनाद्वा विप्रापणाद्वा पाशा अस्यां व्यपाश्यन्त वसिष्ठस्य मुमूर्षतस्तस्माद्विपाडुच्यते* पूर्वं मासीदुरुञ्जिरा सुषोमा सिन्धुर्यदेना मभिप्रसुवन्ति नद्यः सिन्धुः स्यन्दनादाप आप्नोतेस्तासा मेषा भवति॥ ५ (२६)॥

"इमं मे गङ्गे यमुने"–इति†। हे 'मरुद्वृधे!',—'गङ्गे!'(१), 'यमुने!'(२), 'सरस्वति!'(३), शुतुद्रि!'(४) यूयम् 'इमम्' ('मे') मम 'स्तोमम्' ('सचत') "आसेवध्वम्"। 'परुष्ण्या'(५) सह 'मरुद्वृधे' 'आर्जीकीये!'(६) त्व मपि 'असिक्न्या'(७) 'वितस्तया'(८) 'सुषोमया'(९) च सह 'आ शृणुहि' आभिमुख्येन स्थित्वा शृणु —"इति समस्तार्थः"। एवं सर्वत्र पूर्वं समस्तार्थो वक्तव्य इत्युपप्रदर्शनार्थम् §॥

* "०ड्विपाडुच्यते" क, ख, ग।

† ऋ० सं० ८, ३, ९, ५। "प्रियमेधपुत्रस्य सिन्धुक्षित आर्षम्"—इति सा० भा०

‡ पदकारस्तु "परुष्णि। आ"—इति चिच्छेद; यास्कोऽप्येवं मन्त्रैव व्याख्यातवा "परुष्णि! स्तोमम् आ सेवध्वम्"—इति; सायणेन चैतदेवानुसृतम्।

§ अत्र हि मन्त्रे नवानां नदीनां नामानि श्रूयन्ते; 'मरुद्वृधे'—इति तु सर्वास मेव विशेषण मिति दुत्तिकृन्मतम्। सायणस्त्विह—"अत्र प्रधानभूताः सप्त नद्यः; त वयवभूता नद्यस्तिस्रः श्रूयन्ते"—इति। युक्ततरश्चैतत् अप्रधाने तृतीयानिर्देशात् प्रधा च सम्बुद्धिदर्शनात्; एवञ्चोपपद्यन्ते सप्त सिन्धवः इति। अतएव "अश्वो वारो"— इत्यस्या ऋचो व्याख्यानावसरे "सप्त सिन्धून्, इमं मे गङ्गे-इत्यस्या मृच्याम्नाता गङ्गाद्या सप्तसङ्ख्याकाः नदीः"—इति च सा० भा० (१, २, २८, २)।

"अथैकपदनिरुक्तम्"।— "गङ्गा, गमनात्"; सा हि विशिष्टं स्थानं गच्छति; गमयति वा प्राणिनो विशिष्टं स्थान मिति* गङ्गा (१)। "यमुना, प्रयुवती गच्छति" प्रकर्षेण मिश्रयत्यन्याभिः नदीभिः स्वान्युदकानि गच्छति। "प्रवियुतं गच्छतीति वा" स्तिमित मिव तरङ्गैर्गच्छति (२)। "सरस्वती", "सर इत्युदक-नाम"†; तत् कस्मात्? "सर्त्तेः" "सृ गतौ"—इत्यस्य, तेन सरसा विशिष्टेन "तद्वती"; विज्ञायते हि राजसूये सारस्वतीना मपा मभिषेकार्थवादः,—"वरुणस्य वा अभिषिच्यमानस्येन्द्रियं वीर्य मपाक्रमत्, तत् त्रेधाभवत्; भृगुस्तृतीय मभवच्छ्रायन्तीयं सरस्वती तृतीयं प्राविशदिति‡ (३)। "शुतुद्री§=शुद्राविणी=क्षिप्रद्राविणी"। शु—इति क्षिप्रनाम। अथ वा आशु क्षिप्र मसौ "तुन्नेव" विद्धेव केन चिद् "द्रवति"; आकारलोपः पूर्वपदे (४)। "इरावतीं परुष्णीत्याहुः" येय मिरावतीति लोके प्रसिद्धा, ता मिमा मेतस्मिन् मन्त्रे मन्त्रार्थविदः परुष्णीत्याहुः॥। सा कस्मात्? "पर्ववती"।

---

* पौराणिकमतानुसारेणोक्त मिदम्।

† १भा० ९९, ११११पृ० (७८) द्र०।

‡ वस्तुतः पञ्चनददेशीयानां पञ्चाना मेव नदीनां सामान्यतः सरस्वतीत्येक मेव नाम। तथा हि,—"पञ्च नद्यः सरस्वती मपियन्ति सस्रोतसः। सरस्वती तु पञ्चधासो देशेऽभवत् सरित्"—इति य० वा० स० ३४, ११॥

§ शतद्रुरितीदानीं प्रसिद्धः (Sutlej.)।

॥ यद्यपि ऋक्संहितादौ बहुत्र इरावतीशब्दो दृश्यते, परं भाष्यकृद्भिस्तत्र तत्र तस्यार्थान्तरं कृत मिति संहिताकाले नेरावतीशब्दवाच्यैषा नदीत्यनुमेमे; किन्तु ऐतरेयके "ऐरावतीं नावं पारकामाः समारोहेयुः(९, ४, ५)"—इति दर्शनाद् ब्राह्मणकालत एवैषा इरावतीत्येव (Ravee.)।

किं युक्तं भवति? "कुटिलगामिनी" इति, तदस्याः पर्वत्वम्; यानि कुटिलानि तानि पर्वाणीव तस्याः, तैस्तद्वतीति (५)। "असिक्नी"* कस्मात्? सा हि "अशुक्ला=असिता"। कथम्? "सित मिति वर्णनाम" स च पुनः शुक्ल इति प्रसिद्धो लोके,—"सितासितौ यदूत्तमौ" इति बलदेववासुदेवावधिकृत्योक्तम्; ("तत्प्रतिषेधः") तस्य शुक्लस्य प्रतिषेधः "असितम्" कृष्ण मित्यर्थः†। तस्मात् कृष्णोदका असिक्नी (६)। "मरुद्वृधाः", "सर्वाः नद्यः मरुतः एनाः वर्द्धयन्ति" वर्षेण; तस्मात् प्रत्येकं नद्यभिधान मनुषज्यते विशेषणत्वेन,—हे मरुद्वृधे!, गङ्गे! यमुने! इत्यादि "वितस्ता=अविदग्धा"; वैदेहको नामाग्निः स किल नदीः अन्याः निर्ददाह, न ता मिति सामिधेनी-ब्राह्मणे विज्ञायते अथवा "विद्धा, महाकुला" विस्तीर्णा (७)‡। "आर्जीकीयां लोके विपाडित्याहुः"§। सा कस्मात्? "ऋजीकप्रभवा" ऋजीको नाम पर्वतः, तस्मात् प्रभवतीति तद्धितेन। अथ वा "ऋजुगामिनी" सती आर्जीकीया। "विपाट्", "विपाटनाद् वा" विपाटयत्यसौ भूमि मतिवेगवत्वाद् गच्छतीति। "विपाशनाद् वा"। किं मस्यां व्यपाश्यन्त? "पाशा अस्यां व्यपाश्यन्त वसिष्ठस्य मुमूर्षतः"। वसिष्ठः किल ममज्जास्यां मुमूर्षुः,

* इदानीं सैषा चन्द्रभागेति प्रसिद्धेत्यनुमेने (Chenub.)।

† "असितः कृष्ण इत्यर्थः"—इति ख।

‡ यद्याप्येषा वितस्तैव मन्यतेऽस्माभिः (Jhelum.)।

§ अधुना विपाशेत्येव विशेषः (Beas.)।

पुत्रमरणशोकार्त्तः पाशैरात्मानं बद्ध्वा; तस्य किल ते पाशा अस्यां 'व्यपाश्यन्त' व्यमुच्यन्त उदकेन। ततः प्रभृति विपाट् अभवत्। "पूर्व्वम् आसीत् उरुञ्जिरा" * नाम सा, उरुजलेत्यर्थः। "विपाशनाद् वा" उदकानां विपाट् (८)। "सुषोमा—सिन्धुः" †। सा कस्मात्? "यद् एनाम्" "अभिप्रसुवन्ति" अभिगच्छन्ति अन्याः प्रभूताः "नद्यः"। "सिन्धुः" कस्मात्? "स्यन्दनात्"; सा ह्यविच्छेदेन विशेषतः स्यन्दत इति (९) ‡॥

"आपः"—इति §, एतत् पदम्। ताः पुनरेताः "आप्नोतेः" सर्व्वं माभिराप्य मिति॥

"तासाम् एषा भवति"—॥ ५ (२६)॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ आपो हि स्थ सुखभुवस्ता नोऽन्नाय

---

* एवञ्च आर्जीकीयेति प्रथमं नाम, तत उरुञ्जिरेति, ततो विपाडिति लोकप्रसिद्धः। लोकप्रसिद्धस्यैतस्याभिधानस्यापि व्यवहारो दृश्यते वेदे "प्र पर्व्वतानामुशती (ऋ० सं० ३, २, ११, १)"—इत्यादौ "विपाट्छुतुद्री पयसा जवेते"—इति यथा। यास्कोऽप्येतां ऋच मनुपदं व्याख्यास्यत्येव द्वन्द्वपर्व्वे।

† इदानीन्तु सिन्धुनद इति प्रसिद्धः (Indus.)।

‡ सायणमते त्विह दश नद्यः श्रूयन्ते, तत्र प्राधान्यतः सप्तैव स्तूयन्ते—गङ्गा, यमुना, सरस्वती, शुतुद्री, असिक्नी-नाम नद्या सह सङ्गता परुष्णी (इरावती), वितस्तया सह सङ्गता मरुद्वृधा (चन्द्रभागा ?), सुषोमया (सिन्धुना) सह सङ्गता च आर्जीकीया (विपाशा) इति। यद्यपि शुतुद्र्याद्यास्तत्त्व एव नद्यः सिन्धौ सङ्गताः परं विपाडेवैका साक्षादिति बोध्यम्; तथाहि—चन्द्रभागायां वितस्ता पतिता, वितस्तामिलितचन्द्रभागा इरावती च सम्मिलिते भूते विपाशायाम्, शुतुद्री च विपाशाया मेव, विपाडेव सिन्धौ। इमा एव सप्त नद्यः स्यन्दनाद्धेतोः सप्त सिन्धवः इत्युच्यन्ते च।

§ १भा० ४६५, ४७० पृ० ५ अ० ३ख० (२१)।

धत्त महते च नो रणाय रमणीयाय (च*) दर्शनायौषधय ओषद्धयन्तीति † वौषत्येना ‡ धयन्तीति वा दोषं धयन्तीति वा तासा मेषा भवति ॥ ६ (२७) ॥

"आपो हि ष्ठा"—इति § । सिन्धुद्वीपस्यार्षम् । हे 'आपः' आपयित्र्यः! 'स्थः' 'मयोभुवः' मयो भावयित्र्यस्थ, ("सुखभुवः") सुखभावयित्र्यः, याः, ताः यूयं 'नः' अस्माकम् 'ऊर्जे' "अन्नाय" यथा वयं मन्नं लप्स्याम, भोजनाय च नः 'दधातन' धारयत अनुगृह्णीध्वम् । किञ्च; 'महे रणाय' "महते च नो रणाय रमणीयाय", 'चक्षसे' दर्शनाय; श्रुतिस्मृत्युदितसम्यग्दर्शना भूत्वा अन्नप्रयोगे यथा वर्त्तेमहि, तथा जुषध्वं यूयम् ।—इत्येतदाशास्महे ॥

"ओषधयः"—इति ||, एतत् पदम् । ताः पुनः एताः "ओषद्धयन्ति" यत् किञ्चिदोषत् शरीरे दहद् रोगजातं भवति, क्षयादि, तदेता अत्ताः सत्यो धयन्ति, पिबन्ति, नाशयन्ति । तदेवम् ओषतेः पूर्वपदम्, धयतेरुत्तरपदम्; कर्त्तरि कारके । "ओषति एना धयन्ति—इति वा" ओषति कस्मिंश्चिदुदरादावङ्गे एना धयन्ति पिबन्ति प्राणिनो दाहोपशमनाय; तावेव धातू ¶ कर्मणि कारके

* नास्त्येतत् पदं क-ख-ग-पुस्तकेषु ।

† "दोषं धयन्तीति" क, ख, ग।

‡ "वोषत्येना" क, ख, ग।

§ ऋ० सं० ७, ६, ५, १। य० वा० स० ११, ५० ; ३६, १४ । सा० सं० उ० आ० ९, २, १०, १ । "आपो हिष्ठीयाभिस्त्रिरभिमार्जनम्"—इति गो० सं० सू० ।

|| १भा० ४६५, ४७० पृ० ५ख० २ख० (२१)।

¶ १ "उष दाहे" धा० भ्वा० प० ६९६। २ "धेट् पाने" धा० भ्वा० प० ९०२।

"दोषं धयन्तीति वा" यः कश्चिदुपजायते दोषो वातादिकृतः शरीरे, त मेता धयन्तीति। दोषशब्दात् पूर्वपदम्, धयतेरेवोत्तरपदम्; कर्त्तर्य्येव कारके॥

"तासाम्" ओषधीनाम् "एषा" ऋक् "भवति"—॥६ (२७)॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणा महं शतं धामानि सप्त च॥ या ओषधयः [पूर्]वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये नु तद्बभ्रूणा [म]हं बभ्रुवर्णानां हरणानां भरणाना मिति* वा। [श]तं धामानि सप्त च†। धामानि त्रयाणि भवन्ति [स्थ]ानानि नामानि जन्मानीति जन्मान्यत्राभिप्रेतानि [सप्]तशतं पुरुषस्य मर्मणां तेष्वेना दधतीति वा रात्रि[र]ाख्याता तस्या एषा भवति॥७ (२८)॥

"या ओषधीः पूर्वा जाताः"—इति§। ओष[...]यमेव॥|[...]ग्निचयने चैव मनेन मन्त्रेण ग्राम्यारण्याभिरोष[...]यते¶। 'याः'

---

* "भरणानां हरणाना मिति" क, [ख], ग।
† "शतं धामानि सप्त चेति", ङ च।
‡ "स्थानान्यत्राभिप्रेता[नि]" क, ख, ग।
§ ऋ० सं० ८, ५, ८, १। य० वा० स० १२, ७५। आथर्वणी भिषग्नाम [ऋ]षिम्।
|| १०म० ८अ० त्रयोविंशत्यृचं सप्तमं सूक्तम्। तत्र द्वाविंशाः ऋचो व्याख्याने [भि]षक्त्वाणः=ओषधिसामर्थ्यज्ञः, आत्मणा-वैद्यः"—इत्याह सायणः।
¶ दीक्षितानां ज्वराद्युपसन्तापे सञ्जातेऽनेन सूक्तेन मार्जयेत्। आ० ६, ९. इ०।

एताः "ओषधयः" 'पूर्वाः' प्रथमाः 'जाताः'। कुतः? 'देवेभ्यः'; न तावद् देवा उत्पद्यन्ते, अथैता एव पूर्व मुत्पद्यन्ते। कियति काले? 'त्रियुगं पुरा' कलि-द्वापर-त्रेताभ्यः पूर्वम्, आदिकल्पे, आद्ये कृतयुगे; देवाना मपि ह्यन्न मनपेक्ष्य जीवनहेतुस्थितिर्नास्तीति पूर्व मन्न मुत्पद्यते पश्चाद् देवा इति। किं तासाम्? इति,—"मनै नु बभ्रूणा महं शतं धामानि सप्त च"। तासाम् 'अहं' 'बभ्रूणां' "बभ्रुवर्णानाम्"; ओषधयः स्वभावतः सर्वा एव पच्यमाना बभ्रुवर्णाः कपिलाः सम्पद्यन्ते। 'मनै' जाने 'शतं धामानि, सप्त च'; सप्ताधि शत महं तासां यथावज्जाने। अथ वा बभ्रूणा मिति वर्णव्याप "हरणानाम्"—इति; ता हि क्षुदादि हरन्ति। "भरणानाम्—इ वा" भर्त्र्यस्ताः सर्वस्य भूतग्रामस्य वा। ओषधयः प्रथमा जाताः "देवे त्रीणि युगानि पुरा मन्ये" तद् बभ्रूणा महं बभ्रुवर्णानां हरणा मिति वा। 'शतं धामानि सप्त च' व्याख्यात मेतत्। "धाम [illegible]वन्ति,—स्थानानि, नामानि जन्मानि" इति; इह "जन्मा[illegible]तानि"। सप्तशतम् ओषधिजातयः एतस्मिन् म अभिप्रेताः [illegible] "सप्तशतं पुरुषस्य मर्मणाम्, तेषु एना दध —इति वा" अस्मिन् पक्षे धामानि स्थानानि * ॥

---

* अत्र वाजसनेयकम्।—"या ओषधीः पूर्वा [illegible]ता देवेभ्यस्त्रियुगं पुरेत्यत[illegible] देवास्तेभ्य एतास्त्रिः पुरा जायन्ते, वसन्ते प्रावृषि शरदि, मनै नु बभ्रूणा मह मि[illegible] सौ[illegible] बभ्रुः, सौम्या ओषधय ओषधः पुरुषः। शतं धामानीति यदिदं शत[illegible] शतार्थः शतवीर्य एतानि ह्यस्य तानि शतं धामानि सप्त चेति य एवेमे सप्तशी[illegible] प्राणास्तानेतदाह"—इति ७, २, ४, २६।

"रात्रिः"—इति *, एतत् पदम्। तत् पुनरभिधानतोऽभिधेय-तश्च व्याख्यातम्,—"रातेर्दानकर्मणः"—इति † ॥

"तस्याः" "एषा" स्तुतिः "भवति"—॥ ७ (२८) ॥

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः। दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्त्तते तमः॥ आपूपुरस्त्वं रात्रि पार्थिवं रजः स्थानैर्मध्यमस्य दिवः सदांसि बृहती महती वितिष्ठस आवर्त्तते त्वेषं तमो रजोऽरण्यान्यरण्यस्य पत्न्यरण्य मपार्णं ग्रामाद्गमनं भवतीति वा तस्या एषा भवति॥ ८ (२९)॥

"आ रात्रि पार्थिवं रजः"—इति ‡। कुशिकस्यार्षम्, रात्र्या वा। हे 'रात्रि!' या त्वम् "आपूपुरः" 'पार्थिवं रजः' पृथिवीलोकम् आपूरयसि। किं केवल मेतदेव? न, इत्युच्यते,—'पितुः धामभिः' "मध्यमस्य स्थानैः" सह, सहान्तरिक्षेण; तदपि ह्यापूर्यते तमसा। कि मेतावदेव? न, इत्युच्यते;—किन्तर्हि? 'दिवः' द्युलोकस्यापि यानि 'सदांसि' सदनानि; येषु हि द्युलोकवासिनः सदनेषु स्थानेषु, सीदन्ति तान्यपि। 'बृहती' महती यस्मात् त्वम्, तस्माद् दूरेऽपि वर्त्तमाना 'वितिष्ठसे' विष्टभ्य तिष्ठसि। न केवलं विष्टभ्यैव

---

* १भा० ४६५, ४७० पृ० ५प० ३ख० (२४)।

† "रा दाने" धा० अदा० प० ४७। १भा० ३५५ पृ० ३ प० २०ख० (४)। परस्ताच्च रातिरित्यस्य व्याख्यानं "दत्तिः"—इति कृत माचार्येण १२, २, ९।

‡ य० वा० सं० ३४, ३२। "रात्रिदेवत्या पथ्याबृहती"—इति महीधरः।

तिष्ठसि; किन्तर्हि? आ-पूर्य द्युलोक मपि तत्पूरणातिशिष्टं 'तमः' 'त्वेषं' महत् पुन रिम मेव लोकं प्रति आवर्त्तते यस्याः तव, सा त्व मस्माकं सर्वदा शिवा भव।—इत्येतदाशास्महे॥

"अरण्यानी"—इति *, एतत् पदम्। सा पुनः "अरण्यस्य पत्नी" पालयित्री देवता †। अथ अरण्यं कस्मात्? "अरण्यम्=अपार्णं ग्रामात्"; तद्धि ग्रामादपार्ण मपगतं भवति; "ऋ गतौ"—इत्यस्य। "अरमणं भवति—इति वा" रमेः प्रतिषेधपूर्वस्य; न ह्यरण्ये रति-र्भवति॥

"तस्याः एषा भवति" स्तुतिः—॥ ८ (२९)॥

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि। कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दती३ ॥ अरण्यानीत्येनामामन्त्रयते यासावरण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विन्दतीवेतीवः परिभयार्थे वा श्रद्धा श्रद्धानात्तस्या एषा भवति॥ ९ (३०)॥

"अरण्यान्यरण्यानि"—इति ‡। ऐरम्मदस्य देवमुनेरार्षम्। सम्बुद्धावेकवचनं पूर्वम्, द्वितीयाबहुवचन मुत्तरम् §। उत्पन्नदिङ्मोहो

---

* १मा० ४९५, ४७० पृ० ५ अ० २ख० (१४)।

† वार्त्तिककार-कात्यायनमते तु "हिमारण्ययोर्महत्त्वे"—इति महदरण्य मेव अरण्यानीत्युच्यते। पा० ४, १, ४९ वा० द्र०।

‡ ऋ० सं० ८, ८, ४, १। "महदरण्य मरण्यानी, तद्देवताकम्"—इति सा०।

§ "अरण्यान्यरण्यानि"—इत्यत्र। अत्र च स्वरशास्त्र मेव नियामकम्।

मन्त्रदृक् अरण्ये भीतोऽरण्याधिदेवता मरण्यानीं ब्रवीति,—अहं तावदेतस्मिन्नरण्ये निरमणे भीतः; कथं त्वं न बिभेषि? इति। भीषयमाण इव।—हे 'अरण्यानि' कथं त्वम् 'अरण्यानि' "वनानि" प्रति केवलं 'प्रेव' "पराचीव" पराङ्मुखीव * अनावर्त्तमाना 'नश्यसि'? 'असौ' असाविति दृश्यमाना इव†। यतो ब्रवीमि—"कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दतीँ३"‡। अथ "वा इवः परिभयार्थे"; न त्व मीषदपि बिभेषीति परिरीषदर्थः। तद्यथा—परि मधुरं पर्य्याप्त मिति॥

"श्रद्धा"—इति,§ एतत् पदम्। अत्र "श्रत्"—इति सत्यनाम|| पूर्वपदम्, तत् सत्य मस्यां धीयत इति श्रद्धा, धर्मार्थकाममोक्षेषु अविपर्य्ययेणैव मेतदिति या बुद्धिरुत्पद्यते, तदधिदेवताभावाख्या श्रद्धेत्युच्यते। सा पुनः आग्नेयं सर्वं प्रकाश मिति अग्निरेवा¶ ॥

"तस्या एषा भवति" स्तुतिः—॥ ९ (३०)॥

---

* "पराङ्मुखेव"—इति ख।

† एवञ्च इवशब्दः सम्प्रत्यर्थे व्याख्यातः।

‡ अत्र वितर्कं प्लुतः। तथाहि ऋ० प्रा० "अधः स्विदासी३दुपरि स्विदासी३दयं प्लुतिर्भीरिव विन्दतीँ३ त्विः"—इति १, ९। "सा त्वं कथा कथं ग्रामं न पृच्छसि? निर्जनेऽरण्ये कथं रमसे? नूनं त्वा त्वां भीर्भयं न विन्दति न लभते किम्? वितर्कं प्लुतिः"—इति सा० भा०।

§ १भा० ४९५, ४७१ पृ० ५अ० ३ख० (२५)।

|| १भा० २१९ पृ० ३अ० १०ख० (२)। ऋ० सं० ८, ८, ९, १।

¶ पुरस्तात् २भा० ३४४, ३४९पृ० ७अ० ३पा० १ख० द्र०।

श्रद्धयाग्निः समिध्यते* श्रद्धया हूयते हविः। श्रद्धां भगस्य मूर्द्धनि† वचसा वेदयामसि॥ श्रद्धयाग्निः साधु समिध्यते‡ श्रद्धया हविः साधु हूयते श्रद्धां भगस्य भागधेयस्य मूर्द्धनि§ प्रधानाङ्गे वचनेनावेदयामः पृथिवी व्याख्याता तस्या एषा भवति॥ १० (३१)॥

"श्रद्धयाग्निः समिध्यते"—इति||। श्रद्धायाः कामायन्या आर्षम्। य एव 'अग्निः' 'श्रद्धया' उपेतः; श्रद्धयैवास्तिक्य बुद्धि मालम्ब्य¶ 'समिध्यते' कर्मणि, स एव "साधु" शोभनं समिध्यते; इतरो हि समिद्धोऽप्यसमिद्ध एव, अश्रद्धासमिद्धाग्निकर्मणः फलाभावात्। एव मेव "श्रद्धया हूयते हविः" यदेव श्रद्धया हूयते हविः, तदेव "साधु हूयते"; अन्यस्याफलत्वात्; उक्तञ्च—'नाश्रद्दधानाय हविर्जुषन्ति देवाः"—इति। एवं चेत्—"श्रद्धां भगस्य मूर्द्धनि वचसा वेदयामसि"। 'भगस्य' "भागधेयस्य" धर्मस्य** 'मूर्द्धनि' "प्रधानाङ्गे" मूर्द्धा शिरः, प्रधान मिद मङ्गं धर्मस्य या श्रद्धा, तदभावे धर्माभावाद्। अपि च 'वचसा' एव "वचनेन" एव मन्त्रगतेन—"अश्रद्धा मनृते दधाच्छ्रद्धां सत्ये प्रजापतिः"—इत्यनेनैव तदुद्घाव्य

---

*, † "समिध्यते"—क, च। इतिविरुद्धस्तैषः।

‡, § "मूर्द्धनि"—इत्येव पाठः सर्वेष्वपिपुस्तकेषु।

|| ऋ० सं० ८, ८, ९, १। दशममण्डलीयैकादशानुवाकस्य त्रयोविंशं श्रद्धासूक्तं नामेदं पञ्चर्चम्। अस्य च सूक्तस्य कामगोत्रजा श्रद्धानाम ऋषिः, श्रद्धैव देवता च।

¶ "पुरुषगतोऽभिलाषविशेषः श्रद्धा"—इति सा० भा०।

** "भगस्य भजनीयस्य धनस्य"—इति सा० भा०।

शिरः-प्रकाशम् 'वेदयामसि' "आवेदयामः" आघोषयामो नाशद्गु-धानस्य धर्म इति * ॥

"पृथिवी" † "व्याख्याता"; "अथ वै दर्शनेन पृथुः"—इत्यत्र ‡।

"तस्या एषा भवति"—॥ १० (३१) ॥

स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथः॥ सुखा नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कण्टक ऋच्छतेः कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मण उद्गततमो§ भवति यच्छ नः शर्म (यच्छन्तु||) शरणं सर्वतः पृथ्वथा व्याख्याता तस्या एषा भवति ॥ ११ (३२) ॥

"स्योना पृथिवि भवा"—इति¶। मेधातिथेरार्षम्। हिरण्य-नाशप्रायश्चित्तेष्टौ भौमस्यैककपालस्य पुराऽनुवाक्या**। हे 'पृथिवि!' 'स्योना' "सुखा"†† त्व मस्माकं 'भव'। कथम्? "अनृक्षरा निवे-

---

* अतएव अश्रद्धा इत्यव उच्यन्ते; ऋ० सं० ५, २, ९, २ऋक् द्रष्टव्या।

† १भा० ४९५, ४७१ पृ० ५अ० ३ख० (२९)।

‡ २भा० ९४पृ० १अ० ४पा० ३ख० द्र०।

§ "उद्गततरो" क, ख, ग।

|| नास्त्येतत् पदम् क-ख-ग-पुस्तकतोऽन्यत्र।

¶ ऋ० सं० १, २, ६, ५। य० वा० सं० ३५, २१।

** महानाम्नीव्रते भूमिस्पर्शने च विनियुक्ता। आ० ८, ४, द्र०। स्मार्ते हेमन्त-प्रत्यवरोहणेऽप्येषा जप्या। आ० गृ० २, ३. द्र०।

†† "स्योनशब्दो विस्तीर्णवाची। तथा च वाजसनेयब्राह्मणे— * * *। यद्वा स्योनशब्दः सुखवाची"—इति सा० भा०।

शनी"। 'अनृचरा' निष्कण्टका*, 'निवेशनी' निवासयोग्या†। निविष्टानां चास्माकं 'यच्छ' देहि 'शर्म' सुखम् ('सप्रथः') "सर्वतः पृथुः" विस्तीर्णमिति ॥

"ऋचरः=कण्टकः", "ऋच्छतेः"।—। "कण्टकः",—"कं तपः वा", "कृन्ततेः वा", "कण्टतेः वा स्याद् गतिकर्मणः; उद्गततमो भवति"। क मस्त्रं तापयामीति एव मर्थ मुद्गतः, कण्टकः। कण्टतेर्वा; स ह्युद्गततमो भवति वृचात् ॥

"अप्वा‡", "व्याख्याता"। "यदेनया विद्धोऽपवीयते, व्याधिर्वा भयं वा"—इत्यत्र व्याख्या§ ॥

"तस्या एषा भवति"—॥ ११ (३२) ॥

अमीषाञ्चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि। अभिप्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ अमीषां चित्तानि (प्रज्ञानानि||) प्रतिलोभयमाना गृहाणाङ्गान्यप्वे परेह्यभिप्रेहि निर्दहैषां हृदयानि शोकैरन्धेनामित्रास्तमसा संसेव्यन्ता मप्वाव्याग्नेः पत्नी तस्या एषा भवति ॥ १२ (३३) ॥

---

* "ऋचवत् चरति, मनुष्यवत् नश्यतीति ऋचरा। न ऋचरा अनृचरा"—इति रोथस निरु० १२२ पृ०।

† ऋ० सं० १, २, ६, १. "निवेशनीं = उपवेशनहेतुभूताम्"—इति; २, ८, ५, ६. "निवेशनः = सर्वैर्गन्तव्यः"—इति च सा० भा०।

‡ १भा० ४६५, ४७१ पृ० ५अ० ३ख० (२०)।

§ २भा० ६अ० २पा० २ख० १८५, १८८पृ० द्र०।

|| नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

"अमीषां चित्तम्"—इति * । अप्रतिरथस्यार्षम् । हे 'अप्वे !' † 'अमीषाम्' अस्मच्छत्रूणां ('चित्तम्') "चित्तानि" मनांसि 'प्रतिलोभयन्ती' "प्रतिलोभयमाना" प्रत्येकं लोभयन्ती 'गृहाण अङ्गानि' सर्वगात्राणि आविश; त्वयैते आविष्ट-सर्वगात्राः साध्वसिनः उत्पन्नवेपथवः सम्मूढाः अप्रतिपत्त्याः सन्तु । 'परेहि' परागच्छ एतान् । अपि च यावच्च प्रत्यवस्थितास्तावदेकैकं चिप्रम् 'अभिप्रेहि' । अभिप्रगत्य च 'निर्दह' "एषाम्" ('हृत्') "हृदयानि" 'शोकैः' । त्वया एते निर्दग्धहृदयाः ('अमित्राः') अस्मदमित्राः "अन्धेन तमसा" 'सचन्ताम्' "संसेव्यन्ताम्" ।—इत्येतदाशास्महे ॥

"अग्नायी" ‡, "अग्नेः पत्नीः" ॥

"तस्या एषा भवति"—॥ १२ (३३) ॥

इहेन्द्राणीमुपह्वये वरुणानीं स्वस्तये । अग्नायीं सोमपीतये । इति सा निगदव्याख्याता ॥ १३ (३४) ॥

॥ इति नवमाध्यायस्य तृतीयः पादः ॥ ९. ३.

"इहेन्द्राणीमुपह्वये"—इति § । "इति सा निगदव्याख्याता" । 'इह' कर्मणि 'अग्नायीम्' 'उपह्वये' ('सोमपीतये') सोमपानाय, आत्मनश्च 'स्वस्तये'; 'इन्द्राणीम्' अपि च 'वरुणानीम्' ॥

---

* ऋ० सं० ८, ५, १६, ६ । य० वा० सं० १०, ४४ । सा० सं० उ० आ० ९, ३, ५, १ । अथ० सं० ३, २, ५ ।

† "हे अप्वे ! पापाभिमानिनि ! देवते !"—इति ऋ० भा० सा० ।

‡ १भा० ४९५, ४०१ पृ० ५अ० ३ख० (१८) ।

§ ऋ० सं० १, २, ६, १ । "द्वादश्या इन्द्रवरुणाग्निपत्न्य इन्द्राणीवरुणान्यग्नाय्यो देवताः"—इति चात्र सा० भा० ।

असाधारणेनेन्द्राणीञ्च वरुणानीञ्च अग्नायीञ्च इह कर्मणि उपह्वये सोमपानाय स्वस्तये च ;—इत्येवं सति "तस्या एषा भवति"—इति भाष्यकारवचनं (५३ पृ०) नोपपद्यते ;—सोमपानसम्बन्धात् मध्यमा?* इति चेत्, नैतत्; अग्निरपि हि सोमपानसम्बन्धे उक्तः,—"सोमं पिब मन्दसानो गणश्रिभिः (ऋ० सं० ४, ३, २५, ८)"—इति†; तस्मादुपपद्यत इति‡ ॥ १३ (३४) ॥

॥ इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य (नवमाध्यायस्य) तृतीयः पादः ॥ ९ । ३ ॥

॥ चतुर्थः पादः ॥

अथातोऽष्टौ द्वन्द्वान्युलूखलमुसले उलूखलं व्याख्यातं§ मुसलं मुहुः सरन्तयोरेषा भवति ॥ १ (३५) ॥

"अथातोऽष्टौ द्वन्द्वानि"—इति,‖ अस्मादेः पूर्वस्माद् वर्गात् विलक्षणोऽय मपरो द्वन्द्ववर्ग इति पृथगधिकारवचनम्। अथातः-शब्दावुक्तार्थौ। अष्टावित्यनिर्देशतोऽपि सिद्धेऽष्टत्वनियमार्थ मष्ट-

---

* "यथाग्नेनं सोमपानेनं स्तौति" २भा० ४४०, ४४५पृ० द्र०।

† "यथो एतत् सोमपानेन"—इत्यादि २भा० ४४७, ४५१ पृ० द्र०।

‡ उक्तञ्च पुरस्तात् "वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे"—इति २भा० ११०पृ० १अ० ६पा० १ख०।

§ "द्वन्द्वान्युलूखलं व्याख्यातं" क, ख, ग।

‖ १भा० ४६५ पृ० ५अ० ३ख० (२९)—(३१)।

ग्रहणम्। "उषासानक्ता", "दैव्याहोतारा"—इति* द्वन्द्वदर्शनात् अयुक्त मिति चेत्? न; तयोराप्रीत्वसामान्येन तत्र प्रथमं समाम्नातत्वात्†; इह च पुनः समाम्नाने द्विरुक्ततादोषप्रसङ्गः। मित्रावरुणादीना मपि द्वन्द्वसामान्यादिह प्रसङ्गः इति चेत्?‡ न; तेषां पृथगपि स्तुत्युपपत्तेः§। एवं सति उलूखल-मुसलयोः द्यावापृथिव्योश्चेह समाम्नानस्याप्रसङ्गः, केवलयोः स्तुत्युपपत्तेः? मुसलस्य द्विवस्य पृथक्स्तुत्यभावात्; मित्रावरुणादीनान्तु सर्वेषां पृथक् स्तुतयः सन्ति, तस्मादसमाम्नानम्। अश्विनोरिह द्वन्द्वसामान्यात् प्राप्त मिति चेत्? न; उषःप्रभृतीना मुषसः कालमध्ये तेषाञ्च समाम्नानेनेहातिसङ्करप्रसङ्गात्‖। शुनासीरयोः स्थानान्यत्वात् इहासमाम्नानम् इति चेत्? न; द्वन्द्वसामान्यात्, पृथिव्यर्थत्वाच्च; सम्भोगाभिप्रायेण च तत्स्तुतेः—"तेनेमा मुपसिञ्चतम्" इति¶। द्यावापृथिव्योः प्रथमं समाम्नानं देवताभावादिह प्राप्त मिति चेत्? न; दिवः पृथिव्यायतनत्वाभावात्—द्वन्द्वप्रसङ्गेन चेह दिवः समाम्नानात्। "द्यावा-

---

* १भा० ४६१पृ० ५ख० २ख० (८), (९)। व्याख्याते चैते आचार्येण स्वय मेव पुरस्तात् ३भा० ४७३—४७८ पृ०।

† तयोरप्याप्रीत्वसिद्धये "अथात आप्रियः"—इत्यधिकारे (३भा० ४५६—४६५पृ०) समाम्नानस्यावश्यकर्तव्यता।

‡ "आ नो मित्रावरुणा"—इत्यादौ ३भा० २५७ पृ० द्र०।

§ "मित्रो जनान्यातयति"—इत्यादौ मित्रस्य, "नीचीनवारं वरुणः"—इत्यादौ वरुणस्य स्तुतिर्व्याख्यास्यते इहैव १० अ० २पा० ९ख०, १पा० ४ख०।

‖ वक्ष्यतीहैवाचार्यो द्वादशाध्यायारम्भे—"अथातो द्युस्थानदेवताः। तासा मश्विनौ प्रथमागामिनौ भवतः"—इत्यादि।

¶ अस्मिन्नेव पादे सप्तमे खण्डे व्याख्यास्यत्यमु माचार्यः स्वय मेव (६२ पृ०)।

पृथिव्यौ[२१]", "शुनासीरौ[२४]"—इति देवता मपेक्ष्य द्वन्द्वमध्ये प्रथमागामित्वस्यावचने उलूखल-मुसलयोर्द्रव्यत्वात् प्रथमं समाम्नानम्; तयोः पृथिव्यायतनत्वस्य निरुपचारप्रसिद्धेः, प्रचुरत्वाच्च द्वन्द्वयोः। तयोः "उलूखलं व्याख्यातम्"; "उरुकरम् (२०पृ०)"—इत्येवमादिना; "मुसलं = मुहुःसरम्"। मुसलं कस्मात्? तद्धि मुहुर्मुहुः सरति व्रीह्यादिषु॥

"तयोः एषा भवति" स्तुतिः—॥ १ (२५)॥

आयजी वाजसातमा ता ह्यु१च्चा विजर्भृतः। हरी इवान्धांसि बप्सता॥ आयष्टव्ये अन्नानां सम्भक्ततमे ते ह्युच्चैर्विह्रियते हरी इवान्नानि भुञ्जाने हविर्धाने* हविषान्निधाने तयोरेषा भवति॥ २(२६)॥

"आयजी वाजसातमा"—इति†। आभिमुख्येन मर्यादया वा "यष्टव्ये" पूज्ये, 'वाजसातमे' "अन्नानां सम्भक्ततमे", 'उच्चा विजर्भृतः' "उच्चैर्विह्रियेते" उलूखल मुत्क्षीयते च, अवहननाय मुसल मुद्यम्यते, एतदुच्चैर्विहरणम्। ते एते नित्यम् अस्माकं गृहे 'हरी' अश्वौ 'इव'। नित्य मविच्छेदेन। ('अन्धांसि') "अन्नानि"‡ 'बप्सत' "भुञ्जाने" संस्कारकत्वेन स्याताम्।—इत्येतदाशास्महे॥

---

* "हविर्धाने" ङ, च।

† ऋ० सं० १, १, ११, २। पुरस्ताच्च २२पृ० द्र०।

‡ "चणकादीनि खाद्यानि"—इति सा० भा०।

("आयष्ट्व्ये अन्नानां सम्भक्तमे ते द्युचैर्विह्रियेते हरी इवा-न्नानि भुञ्जाने"। गतार्थ मेतत् ॥*)

"हविर्द्धाने"‡—"हविषां निधाने" सोमास्तयोर्निधीयन्ते† ॥

"तयोः एषा भवति"—॥ २ (२६) ॥

आ वां मुपस्थ मद्रुहा देवाः सीदन्तु यज्ञियाः। इहाद्य सोमपीतये ॥ आसीदन्तु वा मुपस्थ उपस्थानं यज्ञियाः§ देवा यज्ञसम्पादिन इहाद्य सोमपानाय द्यावापृथिव्यौ व्याख्याते तयोरेषा भवति॥ ३(२७)॥

"आ वां मुपस्थं मद्रुहा"—इति‖। गृत्समदस्यार्षम्। "द्यावा नः पृथिवी"—इति च (५८ पृ०)। हविर्द्धानप्रवर्त्तने विनियोगः। हे 'हविर्द्धाने!' 'अद्रुहा' अद्रोग्धव्ये युवा मुच्येथे। यत्र युवा मुपगम्य स्थिते तत् वाम् उपस्थानं 'यज्ञियाः' "यज्ञसम्पादिनः" 'देवाः' 'इह' एतस्मिन् कर्म्मणि 'अद्य' उपगम्य 'सीदन्तु' निषीदन्तु ('सोमपीतये') "सोमपानाय" ।—इत्येतदाशास्महे ॥

---

* क-नामहस्तिपुस्तके लेष पाठो न दृश्यते।

† १भा० ४९५, ४७२ पृ० ५ख० १ख० (२०)।

‡ "हविर्द्धानाभ्यां प्रोह्यमाणाभ्या मनुब्रूहीत्याहाध्वर्युः"—इत्यैतरेयकं ब्राह्मणम् १, ५, २। सोमवाहिशकटयोः सञ्ज्ञा हविर्द्धान मिति। यथाह—"प्राचीनशालाया पुरतो दक्षिणोत्तरभागयोः हविर्द्धानसञ्ज्ञके द्वे शकटे स्थापिते स्तः"—इति य० वा० सं० ५, १४. व्याख्यायां महीधरः।

§ "मुपस्थ मुपस्थान मद्रोग्धव्ये इति वा यज्ञिया"—इति क, च।

‖ ऋ० सं० २, ८, १०, ६। द्यावापृथिव्यौ हविर्द्धाने वाच्या देवते (ब्रा० ८, ९)।

("आसीदन्तु वा सुपस्य उपस्थाने यज्ञिया देवा यज्ञसम्पादिन इडाद्य सोमपानाय"। वर्णित मेतत् ॥*)

"द्यावापृथिव्यौ"†, "व्याख्याते"। द्यौश्च पृथिवी च इत्येते पदे व्याख्याते‡ ॥

"तयोः" "एषा" स्तुतिः "भवति"—॥ ३ (३७) ॥

द्यावा नः पृथिवी इमं सिध्र मद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम्॥ द्यावापृथिव्यौ न इमं साधन मद्य दिविस्पृशं यज्ञं देवेषु नियच्छतां विपाट्च्छुतुद्रौ व्याख्याते तयोरेषा भवति ॥ ४ (३८) ॥

"द्यावा नः पृथिवी"—इति§। ('द्यावापृथिवी') "द्यावापृथिव्यौ" ('नः') अस्माकम् 'सिध्रम्' "साधनम्"॥ 'इमं' 'यज्ञं' सोऽय मस्मान् साधयति, 'अद्य' एतस्मिन् अहनि वर्त्तमानं 'दिविस्पृशं' द्यां यः स्पृशति पूरयति, त मेवङ्गुणं यज्ञं देवेषु ('यच्छतां') "नियच्छताम्" देवेभ्यो दत्तम्।—इत्येतदाशास्महे ॥

("द्यावापृथिव्यौ न इमं साधन मद्य दिविस्पृशं यज्ञं देवेषु नियच्छताम्"। गतार्थ मेतत् ॥¶)

---

* नास्त्येष पाठः क-मासङ्कितपुस्तके।

† १अ० ४६५, ४७१ पृ० ५ख० ३ख० (३१)।

‡ २अ० १ख० ४पा० १, ३ख० (८९, ९४ पृ०)—२ख० ४पा० ३ख० (२१०पृ०)—३ख० ४पा० ५ख० (३९९पृ०) द्र०।

§ ऋ० सं० १, ८, १०, ५।

‖ "सिध्रम् स्वर्गादेः साधकम्"—इति सा० भा०।

¶ नास्त्येष पाठः क-मासङ्कितपुस्तके।

"विपाट्-छुतुद्र्यौ"*, "व्याख्याते" "विपाट् विपाटनाद्वा"—इत्यत्र (४० पृ०) विपाट् व्याख्याता, "शुतुद्री=शुद्राविणी"—इत्यत्र (२९ पृ०) शुतुद्री ; "तद् यद् द्विवदुपरिष्टात् तद् व्याख्यास्यामः"—इति एतत्†॥

"तयोः" "एषा" स्तुतिः "भवति"——॥ ४ (२८) ॥

प्र पर्वताना मुशती उपस्थादश्वे इव विषिते हासमाने। गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥ पर्वतानां मुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासति स्पर्द्धायां हर्षमाणे वा गावाविव (शुभ्रे‡) शोभने मातरौ संरिहाणे§ विपाट्छुतुद्र्यौ॥ पयसा प्रजवेते आर्त्तौ अर्त्तन्यौ वारण्यौ वारिषण्यौ वा तयोरेषा भवति॥ ५ (२९)॥

"प्र पर्वतानाम्"—इति¶। विश्वामित्रो ब्रवीति**। ये चैते

* १भा० ४९५, ४७१ पृ० ५ख० २ख० (२२)।

† १भा० २२७ पृ० २अ० ७पा० १ख०।

‡ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

§ "सम्मातरौ रिहाणे" क, ख, ग।

|| "विपाटच्छुतुद्री" क, ख, ग।

¶ ऋ० सं० ३, ३, ११, १। "इन्द्रो देवता"—इति सा० भा०।

** "पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स च पौरोहित्येन लब्धधनः सर्वं धन मादाय विपाट्छुतुद्र्योः सम्भेद माययावनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रोऽगाधजले ते नद्यौ दृष्ट्वोत्तरणार्थं माध्याभिरिमाभिस्तुष्टाव"—इति सा० भा०।

"विपाट्-छुतुद्र्यौ" 'पयसा' उदकेन पूर्णे 'प्र जवेते' प्रकृष्टेन जवेन गच्छतः 'पर्वतानाम्' 'उपस्थात्' "उपस्थानात्" निर्झरात्; मेघानां वा। 'उशती' "उशत्यौ" "कामयमाने" परस्परं समागमम्, समुद्रं वा। कथं प्रजवेते? 'अश्वे इव' 'विषिते' "विमुक्ते" मन्दुरातः, "विषण्णे इति वा" विभागेनैकस्मिन् मुक्ते, कस्मिंश्चिद् युक्ते युगादौ वा। 'हासमाने' स्पर्द्धमाने, परस्परेण हर्षमाणे वा हृष्यमाणे वा* विपाट्-छुतुद्र्यौ। ('गावाइव') "गावौ इव" 'शुभ्रे' "शोभने" कल्याण्यौ। ('मातरा) "मातरौ" "सं"-'रिहाणे' वत्स मेकं प्रलेढु मिच्छन्त्यौ। य एव मेते प्रजवेते, ते अस्माकं गाधे भवत। —इत्येतदाशास्महे ॥

("पर्वताना मुपस्था॰——॰पयसा प्रजवेते"। उक्तोऽस्यार्थः ॥†)

"आर्त्नी"‡ धनुःप्रान्ते। ते कस्मात्? "अर्त्तन्यौ वा" ऋतेर्धातोर्गत्यर्थस्य, गमयतस्ते इषून्; "अरण्यौ वा" अरणार्हे; "अरिषण्यौ वा" हन्त्र्यौ वा ॥

"तयोः एषा भवति"—॥ ५ (२९) ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृता मुपस्थे। अप शत्रून् विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान्॥ ते आचरन्त्यौ समनसाविव

---

* यदुक्तं परस्तात् "उपरिष्टाद् व्याख्यास्यामः" इति (१भा॰ १९४॰ १पं॰), तदिदं। उक्तं "हासति स्पर्द्धायाम्" इति। एतस्मादेवोक्तेर्हासतिरयं नैरुक्तधातुरिति च।

† नास्त्येष पाठः क-नामहस्तिपुस्तके।

‡ १भा॰ ४९५, ४०२पृ॰ ५ख॰ ६ख॰ (२२)।

योषे मातेव पुत्रं बिभृता मुपस्थ उपस्थानेऽपविध्यतां शत्रून्त्संविदाने* आर्त्न्याविमे विघ्नत्यावमित्राञ्छुनासीरौ शुनो वायुः शु एत्यन्तरिक्षे सीर आदित्यः सरणात्तयोरेषा भवति ॥ ६ (४०) ॥

"ते आचरन्ती समनेव"—इति†। आर्त्नेर्योरेवानुमन्त्रण मश्वमेधे अनेन क्रियते‡। 'समना इव योषा' "समनसौ इव" एकभर्तृके योषिते यथैकं भर्त्तारं प्रत्याचरन्तौ भवतः परिष्वङ्क्तुम्, एव माक्रष्टारम् प्रति नित्य माचरन्त्यौ भवतः आनमन्त्यौ। "मातेव पुत्रं बिभृता मुपस्थे" रक्षणाय ये बिभृता माक्रष्टारम्। अमुना प्रकारेण ये विस्फुरन्त्यो नित्य ममित्रान् भवतः। ययोरेषः स्वभावः। ते 'आर्त्नी' नित्यम् अस्माकम् अमुना प्रकारेण 'संविदाने' संवाद मिव कुर्वाणे। परस्परतः आकर्षणाभिप्राय मेतत्; आकृष्यमाणयोस्तयोः संवाद इव परस्परतो भवति§। 'शत्रून्' 'अप विध्यताम्'।— इत्येतदाशास्महे ॥

"शुनासीरौ"‖। "शुनः = वायुः, शु एति अन्तरिक्षे" शुना-

---

* "ऽपशत्रून विध्यतां सम्विदाने" क, ख, ग।

† ऋ० सं० ५, १, १९, ४। य० वा० सं० २९, ४१।

‡ "अत्र धनुष्कोट्योः स्तुतिः"—इति सा० भा०।

§ "संविदाने, सञ्जानाने, विसंवादरहिते"—इति सा० भा०। "दधिक्रावा संविदान उषसा सूर्येण"—इति च ऋ० सं० ७, ३, ११, ४. द्र०।

‖ १भा० ४९५, ४७२पृ० ५अ० ३ख० (२४)। "शुनम्"—इति पु० (१भा०) ३, ९।

सीरावित्यत्र ; स हि क्षिप्र मेत्यप्रतिवध्यमानोऽन्तरिक्षे । "सीरः = आदित्यः, सरणात्" ; स हि नित्यं सरति गच्छति * ॥

"तयोः एषा भवति"—॥ ६ (४०) ॥

शुनासीराविमां वाचंजुषेथां यद्दिवि चक्रथुः पयः। तेनेमा मुप सिञ्चतम्॥ इति सा निगदव्याख्याता देवी जोष्ट्री देव्यौ जोषयित्र्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा सस्यञ्च समा चेति कात्थक्यस्तयोरेष सम्प्रैषो भवति ॥ ७ (४१) ॥

"शुनासीराविमाम्"—इति †। "इति सा निगदव्याख्याता"। वामदेवस्यार्षम् । शुनासीर्ये विनियोगः‡। हे 'शुनासीरौ!' युवां 'वाचम् इमां' स्तुतिलक्षणं 'जुषेथाम्' सेवेयाम्। कथं च पुनरासेवितेयं युवाभ्यां स्यात्? "यद् दिवि चक्रथुः पयः"। 'यद्' 'दिवि' द्युलोके 'चक्रथुः' संभरथः युवाम् 'पयः' उदकम् । 'तेन' 'इमां' पृथिवीम् 'उप सिञ्चतम्'। एव मनेनास्मदागासेविता युवाभ्यां भविष्यतीति ॥

"देवी जोष्ट्री"§—"देव्यौ जोषयित्र्यौ" सर्वस्य तर्पयित्र्यौ। के पुनस्ते? इति। "द्यावापृथिव्यौ," "अहोरात्रे वा"; "सस्यं च समा च इति कात्थक्यः" सस्यं व्रीह्यादि, समेति संवत्सरः॥

---

* "शुदेवः शुनदेवदेति शौनकः। अतः शुन इन्द्रः सीरो वायुः"—इति सा॰ भा॰।

† ऋ॰ सं॰ ३, ८, ९, ५। य॰ वा॰ सं॰ १२, ६९। अथ॰ सं॰ ३, १७, ७।

‡ "शुनासीरीयायां विनियोगः"—इति ख-नामहस्तलिपुस्तकपाठः। "शुनासीरीये पर्वणि शुनासीरदेवताकस्य हविषोऽनुवाक्यैषा"—इति च सा॰ भा॰।

§ १भा॰ ४६५, ४७४पृ॰ ५ख॰ २पं॰ (२५)।

"तयोः एषः सम्प्रैषो भवति"—॥ ८ (४१) ॥

देवी जोष्ट्री वसुधिती ययोरन्याघा द्वेषांसि* यूयवदान्या† वक्षद्वसु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥ देवी जोष्ट्री देव्यौ जोषयित्र्यौ (वसुधिती‡) वसुधान्यौ ययोरन्याघानि द्वेषांस्यऽवयावयत्यावहत्यन्या वसूनि वननीयानि यजमानाय वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेतां वा यजेति सम्प्रैषो देवी ऊर्ज्जाहुती देव्या ऊर्ज्जाह्वान्यौ द्यावापृथिव्याविति वाऽहोरात्रे इति वा सस्यञ्च समा चेति कात्यक्यस्तयोरेष सम्प्रैषो भवति ॥ ९ (४२) ॥

"देवी जोष्ट्री"—इति॥ । ('देवी जोष्ट्री') "देव्यौ जोषयित्र्यौ", ("वसुधीती=वसुधान्यौ") वसूनां निधानभूते, 'ययोः' देव्योः अन्या एका ('अघा') "अघानि" 'द्वेषांसि' हन्ति यान्यप्रियाण्यस्माकं तानि "यूयवत्" "अवयावयति" अवमिश्रयति नाशयत्यस्मत्तः ।

---

* द्वेषांसि"—इति, § 'द्वेषांस्य"—इति च क, ख, ग ।

† "अयूयवद्दान्या"—इति क, ख, ग ।

‡ नास्त्येतत् पदं क-ख-ग-पुस्तकेषु ।

|| य० वा० सं० २८, १५ । एकाधिकातिजगती । परमस्ति तत्र पाठे भेदः । किन्त्वेतद्व्याख्यानावसरेऽमु मेव निरुक्तग्रन्थ मुद्धृत्योदाजहार महीधरः ।

'अन्या' पुनः 'आवक्षत्' "आवहति"। 'वसु वार्याणि' "यजमानाय वननीयानि (वरणीयानि) बहूनि"। 'वसुवने वसुधेयस्य' "वसुवननाय" च सम्भजनाय, "वसुधानाय" वसुविशिष्टस्य निधानाय च। ते देव्यौ जोषयित्र्यौ 'अस्य' पृषदाज्यस्य स्व मंशं 'वीताम्' "पिबेतां, कामयेतां वा"। (मैत्रावरुणो ब्रवीति,—हे होतः! त्वम् एते[*]) 'यज'—"इति सम्प्रैषः" ॥

("दैव्यौ जोषयित्र्यौ०—०यजेति सम्प्रैषः"। एतस्यार्थः उक्तः॥[†])

"देवी ऊर्जाहुती"[‡]="देव्यौ ऊर्जाहुत्यौ"। "द्यावापृथिव्यौ इति वा, अहोरात्रे इति वा[§], सस्यं च समा च इति कात्थक्यः" ॥

"तयोः एषः सम्प्रैषः भवति"—॥ ९ (४२) ॥

देवी ऊर्जाहुती इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्जं मूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥ देवी ऊर्जाहुती देव्या ऊर्जाहुत्यावन्नञ्च रसं चावहत्यावहत्यन्या[||] सहग्धिञ्च[¶] सहपीतिञ्चान्या[**]

---

*,† न दृश्येते चेमौ पाठौ ख-नामहस्तिपुस्तके ।

‡ १भा० ४९५, ४०४पृ० ५अ० ९ख० (२९) ।

§ "अनयोरनु सर्वाग मिमाः सर्वाः प्रजा अनु सम्भुञ्जत इति श्रुतेः"—इत्याह महीधरः य० वा० सं० २८, १६ ।

|| "चावहत्यन्या"—इत्येव क ख ग-पुस्तकेषु ।

¶ "सहसग्धिञ्च" क, ख, ग ।

** "सहसपीतिञ्चान्या" क, ख, ग ।

नवेन पूर्वं दयमानाः स्याम पुराणेन नवं ता मूर्ज्जं मूर्ज्जाहुती ऊर्ज्जयमाने अधातां वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेतां वा यजेति सम्प्रैषो यजेति सम्प्रैषः ॥ १० (४३) ॥

॥ इति नवमाध्यायस्य चतुर्थः पादः ॥ ९. ४.

"देवी ऊर्जाहुती"—इति*। "देव्यौ ऊर्जाह्वान्यौ" ऊर्जस्य अन्नस्य निष्पादयित्र्यौ"; द्यावापृथिव्यौ ऊर्जाह्वान्यावुच्येते। 'इषम् ऊर्जम् आवचत्'; "अन्नं च" अन्नादि-"रसं च" ओद्यापसेचनं क्षीरादिकञ्च; ('सग्धिं') एका उपनामितस्यान्नस्य "सहपीतिम्", अन्या "सहजग्धिम्" सहभोजनं† बन्धुभिरिति 'आवचत्' "आवहति" आभिमुख्येन यथा बन्धुभिः सह भुञ्जीमहि तथा करोतु। तथा च तत् बह्वन्न मस्तु, यथा 'नवेन' 'पूर्वम्' पुराणं "दयमानाः" रक्षन्तः 'स्याम'; 'पुराणेन नवम्' पुराणेन नवं धान्यं दयमानाः स्याम। ता मेवंलक्षणम् 'ऊर्जम्' 'ऊर्जाहुती', "ऊर्जयमाने" बलवती ऊर्जतां च कुर्वाणे 'अधाताम्' दत्ताम्। 'वसुवने' "वसुवननाय च", 'वसुधेयस्य' "वसुधानाय च" 'वीताम्' "पिबेतां कामयेतां वा"॥

---

* य० वा० सं० २८, १९। विकृतिः। पर मत्राधि पाठभेदः।

† "सग्धिः स्त्री, सहभोजनम्"—इत्यमरः।

'यज'—"इति सम्प्रैषः" इति ॥ १० (४३) ॥

॥ इति निरुक्तवृत्तौ चतुर्दशाध्यायस्य* चतुर्थः पादः ॥ ९ । ४ ॥

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ

चतुर्दशोऽध्यायः† (नवमोऽध्यायः) समाप्तः ॥ ९ ॥

१ २ ३ ४ ५ ६
(अथयान्यश्वोवोल्हामानोमिचोकनिक्रदद्भद्रंवदसंव-
७ ८ ९ १० ११ १२
त्सरमुपप्रवदग्रावेपामाप्रैतेवदन्वमन्दान् यज्ञसंयोगाद्व-
१३ १४ १५ १६ १७ १८
नस्पतउपश्वासयबह्वीनामहिरिवरथेतिष्ठन् धन्वनागाव-
१९ २० २१ २२ २३ २४
स्यन्तीवेदासुपर्णमाजङ्घन्तियच्चिद्धिदृषभोन्यक्रन्दयन्निम-
२५ २६ २७ २८ २९ ३० ३१
न्तंपितुन्विमंमआपोहिष्ठायाओषधीरारात्यरण्याण्यश्र-
३२ ३३ ३४ ३५ ३६ ३७ ३८
द्धयाग्निःस्योनामीषाञ्चित्तमिहेन्द्राण्यथातआयज्यावांद्या-
३९ ४० ४१ ४२ ४३
वानःप्रपर्वतानान्तेआचरन्तीशुनासीरौदेवीजोष्ट्रीदेवी-
ऊर्जाहुती त्रिचत्वारिंशत् ॥ ‡)

॥ इति निरुक्ते (उत्तरषट्के) नवमोऽध्यायः ॥ ९ ॥

---

*,† २भा १४६पृ० "¶" द्रष्टव्यम्।

‡ २भा० १४६पृ० "* *" द्रष्टव्यम्।

॥ अथ दशमाध्यायः ॥

तत्र,

॥ प्रथमः पादः ॥

॥ ॐ ॥ अथातो मध्यस्थाना देवतास्तासां वायुः प्रथमागामी भवति वायुर्वातेर्वेतेर्वा स्याद्गतिकर्म्मण एतेरिति स्थौलाष्ठीविरनर्थको वकारस्तस्यैषा भवति ॥ १ ॥

व्याख्यातानि पृथिवीस्थानदेवतापदानि*; अधुना समाम्नायानुक्रमेणैव मध्यमस्थानदेवतापदानि† निर्वक्तव्यानि, तदर्थ मिद मारभ्यते,—"अथातो मध्यस्थाना देवताः"—इति। अथ-शब्दो विशेषाधिकारार्थः। अतः-शब्द आनन्तर्यार्थः। मध्यं स्थान मेतासा मिति मध्यस्थानाः देवताः, वाय्वाद्याः 'वक्ष्यन्ते'—इति वाक्यशेषः। देवता इति बहुवचनं भेदपक्षे‡; एकैव§; नैरुक्तानां देवताचिन्ता-

---

* "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानः"—इत्यारभ्य "यजेति सम्प्रैषः"—इत्यन्तेन ३भा० ३७८पृ०—४भा० ६६पृ०।

† १भा० ४०५—४६०पृ० ५अ० ४, ५ख० ३२—३६=६८।

‡ यावदभिधानं देवतापक्षवादिनां याज्ञिकानां मते इत्यर्थः। २भा० ३१०पृ० १५ पं० द्रष्टव्यम्।

§ वस्तुत इति शेषः। एतच्च मत मात्मवादिनाम्। २भा० ११२पृ० द्रष्टव्यम्।

भ्युपगमात् * एतस्यैव मध्यमस्य पर्यायवचनान्येतानि वाय्वादीनि रोदस्यन्तानि गुणविशेषतो भवन्ति, यथैवोत्तमस्य ज्योतिषो दृश्यन्ते भगप्रभृतीनि† ॥

"तासां वायुः प्रथमागामी भवति"। नन्विन्द्र इति मध्यमस्य स्थानस्य मुख्य मभिधानम्, तत् प्रथम समाम्नातव्य मासीत्? न; मध्यमस्य वर्षकर्मोपलक्षणत्वात्, वर्षकर्मणि च वायोरधिकारः प्रथमः स्यात्। कथम्? इति। वाय्वात्मनैव हि मध्यमः, ऊर्जान्मासात् परतः सार्वदिक मुदक मुपसंहरन्नोषधिवनस्पतिजलाशयेभ्यः उदक मन्तरिक्षलोकस्य गर्भ मुपचिनोति; स मासाष्टकेन सम्भृतोदकगर्भो विपक्वः प्रावृषं प्राप्य प्रसवाय प्रकल्पते। तदुक्तम्—"वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे। ततः पर्णरुहो वान्ति ततो देवः प्रवर्षति॥"—इति। तदेवं वर्षकर्मप्रारम्भे वाय्वात्मनैव मध्यमो व्याप्रियत इति युक्तं वाय्वभिधान मिह प्रथमं समाम्नात मिति‡। । इतश्च युक्तं यदुच्यते "तासां वायुः प्रथमागामी भवति"—इति; स एष सम्भृतोदकगर्भो वायुर्विवृण्वन् मेघजालेन नभः, मध्यमो वरुणः सम्पद्यते, ततो रुदत् रुद्रः, तत इरां दरत् इन्द्रः, ततो रसान् प्रार्जयत् पर्ज्जन्यः। एवमादिर्मध्यमस्य जगदनुग्रहाय वर्षप्रदानसिद्धये गुणोपजननक्रमः। अनयैव गुणोपजननक्रमानुपूर्व्या वायुः[१], वरुणः[२],

---

* "तिस्र एव देवता इति नैरुक्ताः"—इति १भा० ३१०पृ०।

† १भा० ४९०पृ० पूर्ण० ६खं० ८—१८। वस्तुतस्तु त्वष्टादीन्येव (१भा० ४९० पृ० ९—१८) द्वादश सूर्यनामानि, तत्र केचिन इति तु ज्योतिषां साधारणं नाम।

‡ १भा० ४७५पृ० पूर्ण० ४खं० (१)।

रुद्रः[३], पर्जन्यः[४]—इत्येवमाद्या समाम्नाये देवताना मानुपूर्वी। तदेतत् स्फुटं द्युस्थाने गुणान्तरोपजनानुपूर्व्यं ज्योतिर्मण्डलस्य सवितृप्रभृतिषु* ॥

"वायुः" कस्मात्? "वातेः" "वा गतिगन्धनयोः (अदा० प०)"—इत्यस्य; सतत मसौ वाति गच्छति। "वेतेः वा स्याद् गति-कर्मणः" अनेकार्थो वेतिः†, तस्य वा गत्यर्थस्य। "एतेः—इति स्थौलाष्ठीविः"। अस्मिन् पक्षे "अनर्थकः वकारः", उपजनमात्रम्; एत्यसौ इति वायुः ॥

"तस्य एषा भवति"—॥ १ ॥

वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवम्॥ वायवायाहि दर्शनीयेमे सोमा अरङ्कृता अलङ्कृतास्तेषां‡ पिब शृणु नो ह्वान मिति क मन्यं मध्यमादेव मवक्ष्यत्तस्यैषा§ परा भवति॥ २ ॥

---

* सवितुरुदयादुत्तरो भगोदय इति सवितृसमाम्नानात्पर मेव भगसमाम्नान मित्येव-मादि (१२अ० २पा०) वस्तुतोऽत्र त्वष्टृ-प्रभृतिष्वित्येव वाच्यम्, त्वष्टुरुदयस्यैव प्राथम्यात्।

† "वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु"—इति धा० अदा० प० ३८। निघ० १भा० २००पृ० (इच्छति), २१२पृ० (अत्ति), २५९पृ० (गच्छति), "व्यन्तः" (गच्छन्तः) ३९९पृ०। "व्यन्तः—इत्येषोऽनेककर्मा"—इति चोक्त मिहैव पुरस्तात् २भा० ४४५पृ०। २ भा० ६१पृ० "वेति", ४४५पृ० "वीहि", "वीतम्"। इह च भागे पुरस्तात् ६४, ६५ पृ० "वीतास्"। परस्ताच्चोदाहरिष्यति "पत्नी व्यन्तु=इच्छः कामयन्ताम्"—इति १२अ० ४पा० १२ख०।

‡ "सोमा अरङ्कृतास्तेषां" क, ख, ग।

§ "मवक्षत्तस्यैषा" क, ख, ग।

"वायवायाहि दर्शत"—इति*। मधुच्छन्दस आर्षम्। आध्वर्यवे वायव्योपस्थाने विनियोगः; बाह्वृच्ये प्रउगे शस्त्रे शस्यते†। हे 'वायो!' 'दर्शत' "दर्शनीय!" दर्शनार्ह! त्वदर्थम् 'इमे' 'सोमाः' अस्माभिः 'अरङ्कृताः' "अलङ्कृताः" पर्याप्ताः पातुं संस्कृताः। स त्व मस्माक मिदम् ('हवम्') "आह्वानम्" 'श्रुधि' "शृणु"। श्रुत्वा च तत् 'आ याहि'। एत्य च 'तेषाम्' एतेषां सोमानां यः स्तोऽग्रस्तव तं 'पाहि' "पिब"।—इत्येतदाशास्महे॥

वायोः सर्वस्थानता मपेक्ष्य विचार मागूर्य ततोऽवधारयति,—सर्वस्थानत्वेऽपि सति "क मन्यम्" इन्द्रात् "मध्यमात्" "एवम् अवक्ष्यत्" मन्त्रदृक्‡। सोमा अरङ्कृताः, तेषां पिब—इति§ प्रसिद्धं हि इन्द्रस्य मध्यमस्य सोमपानम्, तदर्थत्वात् सोमसंस्कारस्य; अप्रसाध्य मन्यस्य||। तस्मादिन्द्र एव वायुः¶॥

"तस्य" इन्द्रस्य वायोः ऐन्द्रे एव सूक्ते यस्या मिन्द्रस्य विशेषणत्वेन वायुशब्दः, तथा "एषा" "अपरा" ऋक् "भवति"—॥ २॥

---

* ऋ० सं० १, १, ३, १। एतच्च नवमं सूक्तम्; तत्राद्यस्तृचो वायुदेवताकः; तत्र चेयं प्रथमा "ग्रहस्यैन्द्रवायवस्यैका पुरोऽनुवाक्या"—इति सा० भा०।

† अग्निष्टोमे सुत्या-दिने सूर्योदयात् पूर्वं प्रेषितो होता प्रातरनुवाक मनुब्रूयात्। तस्मिंश्च प्रातरनुवाके अग्निमीडे इति (ऋ० सं० १मं) सूक्तम्। अतः प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं प्रउगशस्त्रं होत्रा शंसनीयम्। तत्रेदं सूक्तं (ऋ० सं० २यं) प्रथमम्।

‡ "मन्त्रदृक्"—इति क, ग।

§ उदाहृते एव मन्त्रे द्रष्टव्योऽसौ निष्पन्नार्थः।

|| पुरस्ताद् द्रष्टव्य मेतत् ७अ० १पा० २ख० ३भा० ४४०—४४६ पृ०।

¶ एतच्च पुरस्ताद् हत्वी द्रष्टव्यम् ७अ० २पा० १ख० ३भा० २१२—२१६पृ०।

आसस्राणासः शवसान मच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः । अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ आससृवाँसो* ऽभिबलायमान मिन्द्रं कल्याणचक्रे रथे योगाय रथ्या अश्वा रथस्य वोढार † ऋज्यन्त ऋजुगामिनोऽन्न मभिवहेयुर्नवञ्च पुराणञ्च श्रव इत्यन्ननाम श्रूयत इति सतो वायोश्चास्य भक्षो यथा न विदस्येदितीन्द्रप्रधानेत्येके नैघण्टुकं वायुकर्मो-भयप्रधानेत्यपरं वरुणो वृणोतीति सतस्तस्यैषा भवति ॥ ३ ॥

"आसस्राणासः"—इति‡ । भरद्वाजस्यार्षम् । महाव्रते मरुद्वत्ये शस्यते उत्तरे पक्षे§ । ("रथ्यासः") "रथ्याः" 'अश्वाः' 'सुचक्रे' "कल्याणचक्रे" "रथे" योगार्थम् 'इन्द्रं शवसानम् अच्छ' इन्द्र मभि-बलायमान मधिकबल मात्मानं मन्यमानम्, 'आसस्राणासः' "आस-सृवांसः" नित्य मासर्पन्ति ये, तान् युक्त्वा|| रथेऽस्माकम्, आयाहि सोमपानाय यज्ञ मिति । किं मस्माकं ते कुर्वन्तु? इति । "अभि श्रव ऋज्यन्तो वहेयुः" । "ऋजुगामिनः" भूत्वा 'श्रवः' "अन्नम्" सोमाख्य मेतदस्मद्यज्ञे यत् । 'नूचित्' "नवं च पुराणं च" तत्-

---

* "आससृवां सो" क, ख, ग ।

† "वोळ्हार" क, ख, ग ।

‡ ऋ० सं० ४, ७, ९, १=६, ३, १४ सूक्त मैन्द्रम् ; तत्रेयं प्रथमा ।

§ निष्केवल्य इति यावत् ।

|| "नित्य मासर्पन्ति, एतान् युक्त्वा"—इति क, ख ।

पानाय एव मिन्द्र मभिवहेयुः। 'नु' क्षिप्रम्। यथा "अस्य" 'वायोः' इन्द्रस्य इदम् 'अमृतम्' एष सोमभक्षः न* 'विदस्येत्'! अविदस्ते-ऽनुपक्षीणे एतस्मिन् सोमभक्षे ऽभिवहेयुः†।—इत्येतदाशास्महे॥

"अवः"—"इति", एतत् "अन्ननाम"; तद्धि सर्वत्र "श्रूयते"। "नू चित्"—इति नव-पुराणाभिधायकौ निपातौ‡। नवम्, यः सोमो गृहीत्वा तत्काल मेव हूयते। पुराणं पुनः, यः, प्रातःसवने गृहीत्वा माध्यन्दिने सवने हूयते, तृतीयसवने वा; तद्यथा—अतिग्राह्या ध्रुवश्च§॥

एव मेतस्मिन् मन्त्रे ऐन्द्रसूक्तमध्यपातित्वात् इन्द्रप्रधाने यद् वाय्वभिधानम्, तत् "नैघण्टुकम्" इन्द्रस्यैव विशेषणार्थं व्यञ्जन-मात्रम्।—"इति एके"। "अपरे" पुनः "उभयप्रधाना" इय मृक् "इति" मन्यन्ते भेदपक्षवादिनः; तत्पुनरयुक्तम्, निष्केवल्ये विनि-योगात्॥

"वरुणः"‖ कस्मात्? "वृणोतीति सतः"; स हि वियद् वृणोति मेघजालेन¶॥

---

* दुर्गाचार्यमते 'नूचित्'—इत्यस्यैव व्याख्यानं "नवं च पुराणं च"—इति, तथा च इदं 'न'—इति कुत आगतः? चिन्त्यम्; सायणमते तु 'नूचित्'—इत्यस्यैव व्याख्यानं 'न'—इति।

† "पात्रे गृहीतः सोमो वायुना शुष्यति, ततः पुरैव तत्पानार्थं मश्वा इन्द्र मभि-वहेयुरित्यर्थः"—इति सा॰ भा॰।

‡ "नूचित् इति निपातौ निषेधेऽत्र वर्त्तेते"—इति सा॰ भा॰।

§ प्रातःसवने ये पञ्चविंशति ग्रहा गृह्यन्ते तेषु ध्रुव इति दशमः, हूयते च स मध्यन्दिने। "इष्ट्याः षड़हस्तचातिग्राह्यग्रहणम्"—इत्यादि का॰ श्रौ॰ सू॰ ११, ३,१-२।

‖ १भा॰ ४७५पृ॰ ५अ॰ ४ख॰ (२)।

¶ द्युस्थानोऽप्यस्ति वरुणः; प॰ ११अ॰ ३पा॰ १ख॰।

"तस्य एषा भवति"—॥ ३ ॥

नीचीनबारं वरुणः कवन्धं* प्र ससर्ज रोदसी अन्तरिक्षम्। तेन विश्वस्य भुवनस्य राजा यवन्न वृष्टिर्व्युनत्ति भूम॥ नीचीनद्वारं वरुणः कवन्धं† मेघं कवन मुदकं भवति तदस्मिन्धीयत‡ उदक मपि कवन्ध मुच्यते§ बन्धिरनिभृतत्वे क मनिभृतञ्च प्रसृजति द्यावापृथिव्यौ चान्तरिक्षञ्च महत्त्वेन तेन सर्वस्य भुवनस्य राजा यव मिव वृष्टिर्व्युनत्ति भूमिं तस्यैषापरा भवति॥ ४ ॥

"नीचीनबारम्"—इति॥। अत्रेरार्षम्। न्यक् अञ्चते द्वारं यस्य, स भवति नीचीनद्वारः, अधोद्वारः, तं 'नीचीनद्वारम्' अधोबिलं कृत्वा 'कवन्धं' "मेघं" 'वरुणः' मध्यमः। अतएव मेघसम्बन्धात् "कवनम् उदकम्" 'प्रससर्ज' "प्रसृजति" महत्त्वेन; न ह्यमहाने-तच्छक्नुयात् कर्त्तुम्। 'रोदसी अन्तरिक्षम्' "द्यावापृथिव्यौ च अन्त-रिक्षं च"। "महत्त्वेन" सर्व मापूरयिष्यन्निव। ततः तेन अतिप्रभू-तोदकेन विसृष्टेन 'विश्वस्य भुवनस्य' भूतजातस्योदकस्य वा 'राजा' ईश्वरः 'यवं न' यव मिव; कश्चित् सत्कर्षी स्वल्पं 'वृष्ट्या' 'व्युनत्ति'

---

*, † "कबन्धं" क, ख, ग।

‡ "क मस्मिन्धीयत" क, ख, ग।

§ "कबन्ध उच्यते" क, ख, ग।

|| ऋ० सं० ४, ४, २, ३=५, ६, १३ अष्टर्चसूक्त मिदं वारुणम्।

विविध मुनत्ति क्लेदयति ('भूम') "भूमिम्" कृत्स्नाम् यः। सोऽस्माक मिदं नाम करोतु॥

अथ चैव मन्यथा योज्यम्।—प्रसृजति द्यावापृथिव्यौ च अन्तरिक्षं च प्रकर्षेण सृजति उत्पादयति महत्त्वेन। यस्माच्चोत्पादयति, तस्मात् स एव भुवनस्य राजा विश्वस्य भुवनस्य भूतजातस्य, तेन हेतुना तदनुग्रहाय नीचीनद्वारम् अधोविलं मेघं कृत्वा यव मिव वृष्टिर्व्युनत्ति भुमि मिति समानं पूर्वेण* ॥

कवन्ध इति मेघ उच्यते। कस्मात्? "कवनम्=उदकम्" कवतेर्गत्यर्थस्य† "तदस्मिन् धीयते" इति कवन्धो मेघः। "उदक मपि कवन्ध मुच्यते"‡। तत् कस्मात्? अत्रोत्तरं पदं प्रथमं निराह,— "बन्धिः" धातुः "अनिभृतत्वे"; निभृतस्तावदचपलः, तद्विपरीतार्थवाची बन्धिः; कं च तच्चपलं चेति कवन्धम्, सुखं चानवस्थायि चेत्यर्थः§ ॥

"तस्य" वरुणस्य मध्यमत्वे "एषा" "अपरा" ऋक् "भवति"। सा पुनः किमर्थम्? वर्षकर्म वरुणाभिधानं च सूर्ये ऽपि दृष्टम्॥;

---

* 'ध्रुवं हि राजा वरुणश्चकार"—इत्यादि च द्रष्टव्यम् ऋ० सं० १, १, १४, २।

† १भा० २२१पृ० २ख० १४ख० (२०)।

‡ १भा० ९९,९९पृ० १ख० १ख० (९)।

§ "वन्धिः"—इति, "कवन्धम्"—इति च पवर्गीयमध्य एव पाठः क-खयोः।

‖ पुरस्तात् ७अ० ७पा० १ख० (२भा० ४११पृ०) सूर्यस्य च वर्षकर्म प्रदर्शितम्। "त्व मग्ने वरुणो जायसे (ऋ० सं० ३, ८, ११, १)"—इत्यादि-श्रवणात्, "यो वा अग्निः स वरुणः (९, ४, १०)" इत्यैतरेयकाच्चाग्निवरुणयोरभेद एव; "सोमेन हि दिवि (२भा० ४२९ पृ०)" इति खण्डे चाग्निसूर्ययोरभेदश्च प्रतिपादित आचार्येणैव।

उत्तरस्यान्तु शब्दत एव "मध्यमः"—वरुणः इति विशेषहेतुनोपपादयति—॥ ४ ॥

त मू षु समना गिरा पितॄणाञ्च मन्मभिः। नाभाकस्य प्रशस्तिभिर्यः सिन्धूना मुपोदये सप्तस्वसा स मध्यमो नभन्ता मन्यके समे॥ तं स्वभिष्टौमि समानया* गिरा गीत्या स्तुत्या पितॄणाञ्च मननीयै स्तोमैर्नाभाकस्य प्रशस्तिभिर्ऋषिर्नाभाको बभूव यः स्यन्दमानाना† मासा मपा मुपोदये सप्तास्वसार मेन माह वाग्भिः स मध्यम इति निरुच्यते ऽथैष एव भवति। नभन्ता मन्यके समे। मा भूवन्नन्यके सर्वे ये नो द्विषन्ति दुर्धियः पापधियः पापसङ्कल्पा रुद्रो रौतीति सतो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य रुद्रत्व मिति काठकं यदरोदीत्तद्रुद्रस्य रुद्रत्व मिति हारिद्रविकं तस्यैषा भवति॥ ५॥

"त मू षु समना"—इति ‡। नाभाकस्यार्षम्। सु-इत्येतस्योपसर्गस्य सम्बन्धि क्रियापदं नास्तीति "तं स्वभिष्टौमि"—इत्यभिपूर्वं क्रियापद मध्याह्रियते,—सुष्टुत मभिष्टौमि। केन? "समना" तत्-

---

* "समान्या" क, ख, ग।

† "स्यन्दमाना" क, ख, ग।

‡ ऋ० सं० ६, ३, ११, १। वारुणसूक्तमेतत्।

"समानया" तद्योग्यया, 'गिरा' "गीत्या=स्तुत्या", "पितॄणां च मन्मभिः" ये च पितॄणां मननीयाः मननार्हाः बहुमानाः स्तोमाः, तैश्चाह मभिष्टौमि। 'नाभाकस्य प्रशस्तिभिः' याश्च मम नाभाकस्य प्रशस्तयः स्तुतयः योग्याः तं वरुणं प्रति, ताभिरभिष्टौमि। किंलक्षणः? 'यः' वरुणः 'सिन्धूनाम् उपोदये' "स्यन्दमानानाम्" "अपाम्" 'उपोदये' उपोद्गमे। अन्तरिक्षलोके वर्षस्य 'सप्तस्वसा' सम्पद्यते। मध्यमाभिः अस्याद्याभिः सप्तभिः "वाग्भिः" 'स मध्यमः'—"इति" वरुणः "निरुच्यते" शब्दत एवैतस्मिन्मन्त्रे*। तदनुग्रहादस्माकं 'नभन्ता मन्यके समे' "माभूवन्नन्यके सर्वे" अन्य एव अन्यके शत्रवः, ते माभूवन्नस्माक मिति॥

"रुद्रः"† कस्मात्? "रौतीति सतः" स हि स्तनयित्नुशब्दं करोति; "रोरूयमाणो द्रवति इति वा" शब्दं कुर्वाणो मेघोदरस्थो द्रवतीति; "रोदयतेः वा" शत्रूनसौ रोदयति दुःखयति। ब्राह्मण मपि चैतस्मिन्नर्थे भवति,—"यदरुदत् तद्रुद्रस्य रुद्रत्वम्"—"इति", "काठकम्" कठानां प्रवचनम्। ऐतिहासिकैरेतत् समवैति,—"स किल पितरं प्रजापति मिषुणा विध्यन्त मनुशोचन्नरुदत् तद्रुद्रस्य रुद्रत्वम्। यदरोदीत् तद्रुद्रस्य रुद्रत्वम्"—"इति, हारिद्राविकम्" स एवार्थः, केवलन्तु शाखान्तर मन्यत्। एवं शाखान्तरेभ्योऽपि

---

* अत्रैव सूक्ते एतत्पूर्वस्मिन्नेव मन्त्रे "वरुणाय"—इति वरुणश्रुतेरत्र च "मध्यमः"—इति स एव निरुक्त इति भावः।

† १भा० ४०५, ४०६ पृ० ५अ० ४ख० (२)।

देवताभिधाननिर्वचनान्तराण्युपेक्ष्याणीत्युपप्रदर्शनार्थम्। हारिद्रवो नाम मैत्रायणीयानां शाखाभेदः* ॥

"तस्य एषा भवति"—॥ ५॥

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने। अषाळ्हाय† सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः। इमा रुद्राय दृढधन्वने‡ गिरः क्षिप्रेषवे देवायान्नवतेऽषाढायान्नैः§ सहमानाय विधात्रे तिग्मायुधाय भरत शृणोतु नस्तिग्मन्तेजतेरुत्साहकर्म्मण आयुध मायोधनात्तस्यैषापरा भवति ॥ ६॥

"इमा रुद्राय"—इति॥। वसिष्ठस्यार्षम्; उत्तरा (७८ पृ०) च। शूलगवे विनियोगः¶। हे स्तोतारः! यूय मुच्यध्वे,—'इमाः गिरः' स्तुतीः 'भरत' 'रुद्राय'। किंलक्षणाय? 'स्थिरधन्वने' "दृढधन्वने" दृढधनुषे, 'क्षिप्रेषवे' शीघ्रेषवे, 'देवाय' दानादिगुणयुक्ताय, 'स्वधाव्ने' स्वधावते "अन्नवते", 'अषाळ्हाय' "अषाढाय" अनभिभूताय केन

---

* "कतमे रुद्रा इति दशम पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति तद्यद्रोदयन्ति तस्माद्रुद्रा इति"—इति च द्रष्टव्यम्।

† "अषाल्हाय" क, ख, ग।

‡ "दृल्हधन्वने" क, ख, ग।

§ 'ऽषाल्हायान्नैः" क, ख, ग।

|| ऋ० सं० ५, ४, १२, १.=७म० ३अनु० १४सू० चतुर्थर्चम्, तत्रेयं प्रथमा।

¶ शूलगवादिषु रौद्रयज्ञेषु अनेन सूक्तेन उदीची दिगुपस्थेया। आ० सू० ४, ९।

चित् "सहमानाय" नित्य मभिभवते शत्रून्, 'वेधसे' "विधात्रे", 'तिग्मायुधाय' तीक्ष्णायुधाय, स च इमा गिर उच्यमानाः 'शृणोतु' ('नः') अस्माकम्।—इत्येतदाशास्महे ॥

"सहमानाय"—इति बलकृतेः मध्यमः* ॥

"तस्य एषा अपरा भवति"—सा पुनः किमर्थम्? "विधात्रे"—इत्युक्तं पूर्वस्या मृचि (७७पृ० ७पं), तत्रैतद् भवति—किं मसौ विधत्ते? इति, अतः परया निर्ब्रवीति—रक्षःपिशाचानिति ॥ ६ ॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः। सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ या ते दिद्युदवसृष्टा दिवस्परि दिवोऽधि दिद्युद् द्यतेर्वा द्युतेर्वा (द्योततेर्वा†) क्ष्मया चरति क्ष्मा पृथिवी तस्यां चरति तया चरति विक्षापयन्ती‡ चरतीति वा परिवृणक्तु नः सा सहस्रन्ते स्वाप्तवचन भैषज्यानि मा नस्त्वं पुत्रेषु (च§) पौत्रेषु च रीरिषस्तोकं तुद्यतेस्तनयं तनोतेरग्निरपि रुद्र उच्यते तस्यैषा भवति ॥ ७ ॥

---

* उक्तं हि पुरस्तात् "या च का च बलकृतिरिन्द्रकर्मैव तत्"—इति (७अ० ३पा ३ख० १भा० २५,१पृ०) "तस्य च सर्वा बलकृतिः"—इति च (८अ० १पा० १ख०, १भा० ४४०पृ०)।

†, § क-ख-ग-पुस्तकेषु तु इमे पदे न दृश्येते।

‡ "विक्षापयति" क, ख, ग।

"या ते दिद्युदवसृष्टा"—इति*। हे भगवन्! रुद्र! 'या' 'ते' तव† 'दिद्युत्' आयुधम्‡, ज्वरातीसारादिरोगाख्यम्, येन प्राणिनो हंसि। 'दिवस्परि' द्युलोकादधि त्वया 'अवसृष्टा' 'चरति'। सर्वैव हि देवता द्युस्थाना इति गम्यते, दिवस्परीति लिङ्गात्; कर्माधिकारस्थानानि तु विशिष्टानि—इति तिसृणां त्रीणि कर्माधिकारस्थानानि नियतानि भवन्ति§; (अत एवोक्तं मग्न्यधिकारे द्युस्थानो भवति—इति||)। कथम्? या चरति दिद्युत्? 'क्ष्मया' पृथिव्या ब्रीह्यादिभाव मुपगतया, "तस्यां" ब्रीह्यादिभाव मुपगतायां पृथिव्यां मनु प्रविश्य चरति अन्नपानसमुद्भूता, तत्प्रभवत्वात् सर्वरोगाणाम्; तदुक्तम्, —"नमोऽस्तु रुद्रेभ्यो ये के च पृथिव्यां येषा मन्नं वातो वर्ष मिषवः"—इति¶। तस्याः किम्? दिद्युतः सा घ्नती प्राणिनोऽस्मान् 'परिवृणक्तु' परिवर्त्तयतु 'नः'। किं मन्यदस्तु त्वत्तोऽस्माकम्? "सहस्रं ते स्वपिवात भेषजा"। हे 'स्वपिवात' "स्वाप्तवचन!" कस्य चिदपि अनतिक्रमणीयाज्ञ! यानि तव 'सहस्रं' ('भेषजा') "भेषज्यानि" यैर्बहुभिः बहुप्रकारम् भेषजं करोषि भक्तानाम्, तान्यस्मान् प्रति

* ऋ० सं० ५, ४, १२, ३. = ७, ३, १४ सू० तृतीया।

† "हे रुद्र! ते वैद्युतात्मकस्तव"—इति सा० भा०।

‡ "दिद्युत् अशनिरूपा हेतिः"—इति सा० भा०।

§ "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानः"—इत्यादिग्रन्थोऽग्न्यधिकारः। ७अ० ४पा० १—५ख०, ३भा० २७८—२९१ पृ०।

|| नास्त्ययं पाठः क-ख-पुस्तकयोः।

¶ य० वा० सं० १६, ६६. परं मस्ति तत्र किञ्चित् पाठभेदः।

मन्तु* । किञ्च; 'मा नः' मा अस्माकम् 'तोकेषु' "पुत्रेषु", 'तनयेषु' "पौत्रेषु च" 'रीरिषः'। हिंसां नो मा प्रयुङ्क्ष्व ।—इत्येतदाशास्महे ॥

"दिद्युत्",—"द्यतेः वा" अवखण्डनार्थस्य (दि० प०), "द्युतेः वा" दीप्त्यर्थस्य (भ्वा० प०)। "विध्मापयन्ती चरतीति वा" हिंसन्ती चरतीति वा†। "तोकम्",—इति पुत्रः; स हि नित्यं पित्रा विनयता तुद्यते इदं कुर्विदं मा कार्षीरिति‡। "तनयम्",—"तनोतेः" पौत्रम्; तद्ध्यतितरां पितुः सकाशात् ततं भवति। सत्यप्ययत्यनामत्वा-विशेषे§ इहाजामितेव विशेषः। एव मन्यत्रापि समानार्थाना मेक-वाक्ये विशेष उपेक्ष्य इति दर्शयति॥

"अग्निः अपि रुद्रः उच्यते"—इति। विचारानुस्मृतये|| सङ्क-रोपप्रदर्शनम्॥

"तस्य" "एषा" "भवति" अग्नेः रुद्रस्य—॥ ७॥

जराबोध तद्विविड्ढि विशेविशे यज्ञियाय। स्तोमं रुद्राय दृशीकम्॥ जरा स्तुतिर्ज्जरतेस्तुतिकर्मणस्तां बोध तया बोधयितरिति वा तद्विविड्ढि तत् कुरु मनु-

---

* ऐतरेयकादौ अपा मेव साक्षाद् भेषजत्वम्। तथाहि—"इमा आपः शिवतमा इमाः सर्वस्य भेषजीः"—इत्यादि ८, १, २।

† १भा० २८९ पृ० २अ० २०ख० (१)।

‡ पुरस्तात् २भा० ४४, ४७ पृ० ५अ० १पा० १ख०।

§ १भा० १७१पृ० २अ० २ख० (२), (२)। २भा० "तोकम्" २९७ पृ०। परस्ताच्च १२अ० १पा० ९ ख०।

|| पुरस्तादेष विचार उक्तः (१अ० ५पा० १५ख०) "एक एव रुद्रः"—इति।

ष्यस्यमनुष्यस्य यजनाय स्तोमं रुद्राय दर्शनीय मिन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वेरां धारयत इति वेन्दवे द्रवतीति* वेन्दौ रमत इति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वं† मिति विज्ञायत इदं करणा-दित्याग्रयण इदं दर्शनादित्यौपमन्यव इन्दतेर्वैश्वर्य-कर्मण इन्छत्रूणां दारयिता वा द्रावयिता वादरयिता च यज्वनां तस्यैषा भवति ॥ ८ ॥

"जरा बोध"—इति‡। शुनःशेपस्यार्षम्§। "अश्वं न त्वा वार-न्तम्"—इत्येतस्मिन् सूक्ते|| प्रातरनुवाके विनियोगः। येयं मया तव 'जरा' स्तुतिरुच्यत, भगवन्नग्ने! रुद्र! तां त्वं 'बोध' बुध्यस्व। अथ वा हे जराबोधयितः! स हि जरया स्तुत्या होहत्वे वर्त्तमानो-ऽभिमत मर्थं यजमानानां सम्पादयन् देवान् बोधयति। 'तद् विविड्ढि' "तत् कुरु" 'विशेविशे' मनुष्याय, 'यज्ञियाय' यज्ञसम्पादिने जनाय,

* "द्रवत इति" क, ख, ग।

† "समैन्धत तदिन्द्रस्येन्द्रत्व" क, ख, ग।

‡ ऋ० सं० १, २, २२, ५; सा० सं० छ० आ० १, १, २, ५।

§ "अग्निः स्तूयमानः शुनःशेप मुवाच रुद्रं स्तुहि रौद्रा हि पशव इति स तं प्रत्यु वाच नाहं जानामि स्तोतुं त्व मेवैतं स्तुहीति। तदिद मुच्यते"—इति सा० स० सा० भा०। इतिहासस्त्वैष ऐतरेयके (७, ३, १—६) द्रष्टव्यम्।

|| ऋ० सं० १म० १२अनु० ४सू०। अत्रैव जराबोधेति दशमी।

यत् त्वया यज्ञे कर्त्तव्यम्, ततः तुभ्यं रुद्राय देवानां स्तोत्रे स मनुष्यः 'दृशीकम्' "दर्शनीयम्" श्रवणीयम्, श्रवणार्हम् व्यपगतदोषं स्तोत्र मुच्चारयिष्यति*॥

"इन्द्रः"† कस्मात्? "इरां दृणाति—इति वा" इराम् अन्नं व्रीह्यादि, दृणाति विदारयति; इरा-शब्दात् पूर्वपदम्, दृणातेरुत्तर-पदम्; वर्षक्लेदित मङ्कुरं वीजं भिनत्ति, त मिन्द्रकारितम्; सोऽयम् "इरादारः सन् इन्द्रः"—इति परोक्षेणोच्यते, यथा "अग्रणीः सन्नग्निः"—इति‡। विज्ञायते हि "परोक्षप्रिया इव हि देवाः प्रत्यक्ष-द्विषः"—इति§। सर्वत्रैवं देवताभिधेयेष्वभिधानत एव हि देवता आत्मनस्तत्त्व मन्तर्णीय व्यवधाय आत्मान मविदुषां परोक्षीकृत्य नित्यं वर्त्तते, तां तु विद्वांसस्तदभिधानव्युत्पत्तिद्वारेण विहृत्य दैवेन चक्षुषा मनसोपजातदिव्यदृष्टयो दृष्ट्वा ताद्भाव्यं प्रतिपद्यन्ते इति तदभिधान-व्युत्पत्तौ कृत्स्नः पुरुषार्थ आहितः। इन्द्रस्य भूयिष्ठभाग् प्राणदेवतानां मुभयोरध्यात्माधिदैवतयोरिति तदभिधान माचार्योऽतितरां निर-वोचत्। । "इरां ददाति—इति वा"। तदेव पूर्वपदम्, ददातिरुत्तरपदम्। यो वर्षद्वारेणासौ इरा मन्नं ददाति। सोऽयम् इरादः = इरा-दाता = इन्द्रः। ।"इरां दधाति—इति वा"। तदेव

---

* "यो अ॒ग्नौ रु॒द्रो यो अ॒प्स्व१॒॑न्तर्य ओष॑धीर्वी॒रुध॑ आ वि॒वेश॑। य इ॒मा विश्वा॒ भुव॑नानि चाक्लृ॒पे तस्मै॑ रु॒द्राय॒ नमो॑ अस्त्व॒ग्नये॑॥"—इति अथ० सं० ७, ८७, १।

† १भा० ४७५, ४७६ पृ० ५अ० ४ख० (४)।

‡ पुरस्तादुक्त मेतत् ७अ० ४पा० १ख० १भा० ३७८ पृ० द्र०।

§ "तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तदिदन्द्रं सन्त मिन्द्र मित्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः (प्रत्यक्षद्विषः)"—इति ऐ० आ० २, ४, १४।

पूर्वपदम्, दधातेर्दानार्थस्य धारणार्थस्य वा उत्तरपदम्। सोऽयम् इराधः=इरा-धारयिता=इन्द्रः। ।"इरां दारयति—इति वा"। तदेव पूर्वपदम्, दारयतेरुत्तरपदम्। सोऽयम् इरा-दारयिता=इन्द्रः*। । "इन्दवे द्रवति—इति वा"। इन्दुशब्दात् पूर्वपदम्, द्रवतेरुत्तरपदम्। इन्दुः सोमः, तं पातु मसौ द्रवति; द्रवतिर्गत्यर्थः, सोमपानार्थं मसौ द्रवतीति। सोऽयम् इन्दुद्रवः=इन्द्रः। । "इन्दौ रमते—इति वा"। क्रीडत्ययं सोमे इतीन्द्रः। । "इन्धे भूतानि—इति वा"। "ञि इन्धी दीप्तौ"—इत्यस्य। भूतानि ह्यसावन्नोत्पत्त्याधिदेवस्थोऽध्यात्मस्थो वाऽभ्यवहारयन् विभजमानस्य दीपयति द्युतिमन्ति करोति। सोऽयम् इन्धः=इन्द्रः। । "तत्" इद मपर मिन्द्रस्य इन्द्रत्वं ब्राह्मणे उच्यते। "यदेनं" मध्यतोऽवस्थितं शरीरस्य ("प्राणैः") प्राणभावेन विष्टभ्येतरान् प्राणान् वागादीनितरप्राणवृत्तिमाहाभाग्यसम्प्रदानेन यदहं विशिष्टोऽस्मि त्वं तद्विशिष्टोऽसीत्येवमादिना प्राणाधिदेवताः "समैन्धन्" समदीपयन् सन्मानार्थं "तदिन्द्रस्येन्द्रत्व मिति विज्ञायते"। इन्धे भूतानीति कर्त्तरि; प्राणैरेनं समैन्धतेति कर्मणि। । "इदङ्करणात्—इति आग्रयणः"। इदं-शब्दात् पूर्वपदम्, करोतेरुत्तरपदम्; इद मसौ सर्व मकरोदिति। सोऽयम् "इदङ्करः=इन्द्रः"। । "इदं दर्शनात्—इति औपमन्यवः"। इदं पूर्वपदम्, दृशिरुत्तरपदम्; इद मसावद्राक्षीत् सर्व मिति। सोऽयम् "इदन्दर्शी=इन्द्रः"। ।

* "कतम इन्द्रः?"—इत्यादि बृहदारण्यके ३, ९, ४ द्रष्टव्यम्।

“इन्दतेः वा ऐश्वर्यकर्मणः”। इन्देः पूर्वपदम्, द्रवतेः द्रावयतेः वा उत्तरपदम्। किं असौ द्रवति, दारयति वा? इति। “शत्रूणां दारयिता वा, द्रावयिता वा”। किं मुक्तं भवति? ईश्वरश्चासौ द्रावयिता शत्रूणाम्; अथ वा ईश्वरश्चासौ दारयिता च शत्रूणाम्; अथ वा ईश्वरश्चासौ “आदरयिता च यज्वनाम्” आदरकर्त्ता यज्वनामुपरि* ॥

“तस्य एषा भवति”—॥ ८ ॥

अदर्दरुत्स मसृजो वि खानि त्व मर्णवान् बद्बधानाँ अरम्णाः। महान्त मिन्द्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्। अदृणा उत्स मुत्स उत्सरणाद्वोत्सदनाद्वोत्स्यन्दनाद्वोनत्तेर्वा† व्यसृजोऽस्य खानि त्व मर्णवानर्णस्वत एतान्माध्यमकान्त्संस्त्यायान्‡ बाबध्यमानानरम्णाः§ रम्णातिः संयमनकर्मा विसर्जनकर्मा वा महान्त मिन्द्र पर्वतं मेघं यद्व्यवृणोर्व्यसृजोऽस्य धारा अवाहन्नेनं (दानवं||) दानकर्माणं तस्यैषापरा भवति ॥ ९ ॥

---

* “इन्द्रो व्यौनिभुवो व्योनिरिन्द्रः”—इत्यादि ऐ० ब्रा० २, ४, ७-८। “इन्द्रो इव महं स्तावेन मघूताम्”—इत्यादिका, “इन्द्रो वै वृत्रं हनिष्यन्त्सर्वा देवता अब्रवीत्”—इत्यादिका, “सेना वा इन्द्रस्य प्रिया जाया”—इत्यादिका, “तुराषाडिव हेन्द्रो-नामान्यग्राः—इत्यादिका च आख्यायिकाः द्रष्टव्याः। ऐ० ब्रा० १, १, २; ३, १, ९; १०; ११। “यथेन्द्रो वै देवतया यशियो भवति”—इत्यादि च ऐ० ब्रा० ७, ४, ५।

† “उत्सदनाद्वोत्स्यन्दनाद्वोन्दयनाद्वा”—इति क, ख, ग।

‡ “एतान्माध्यमिकान्त्संस्त्यायान्”—इति क, ख, ग।

§ “बाबध्यमानानरम्णा” क, ख, ग।

|| नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

"अदर्दरुत्सम्"—इति*। गातोरात्रेयस्यार्षम्। "उत्सः" मेघः। सः कस्मात्? "उत्सदनाद् वा" उत्पूर्वस्य सदेः; ऊर्द्धं सन्नो सन्न इत्युत्सः। उत्पूर्वस्य वा स्यन्दतेः; उपर्य्यवस्थितः स्यन्दतीत्युत्सः। "उनत्तेः वा", "उन्दी क्लेदने (रु० प०)"—इत्यस्य; क्लेदयत्यसौ। तम् "उत्सम्" मेघं हे भगवन्! 'इन्द्र'! त्वम् 'अदर्दः', दारितवानसि त्वम्। दारयित्वा च जर्जरीकृत्य तस्य उत्सस्य 'असृजः' 'विखानि' विलानि विवृतानि त्वमकरोः। उदकनिर्गमनद्वाराणि स त्वममुना प्रकारेण 'अर्णवान्' "अर्णस्वतः" अर्णसा उदकेन तद्वतः, "एतान् माध्यमिकान्" "संस्त्यायान्" मेघसङ्घातान्, उदकभारेणातिगुरुणा "वाध्यमानान्" यथाकालम् 'अरम्णाः' विसृष्टवानसि। "रम्णातिर्द्धातुः" "संयमनकर्म्मा" अन्यत्र, तद्यथा—"सविता यन्त्रैः पृथिवीमरम्णात्" इत्यत्र†; इह पुनर्मेघविदारणसम्बन्धात् "विसर्जनकर्म्मा"। किञ्च; 'महान्तम्' योऽप्यतिमहान् पर्व्वतो मेघः, केनचिदप्यन्येनाशक्यो विवृतद्वारः कर्त्तुम्, तमपि 'वि षट् वः' "षट् व्यवृणोः" विवृतम् अपावृतोदकनिर्गमनद्वारमकरोः। विवृत्य च 'सृजः वि धाराः' "व्यसृजः धाराः" त्वम् उदकधाराः पुनः पुनः 'अवहन्' अवघ्नन् 'दानवम्' उदकदातारं मेघम्। य एतदकार्षीः त्वं स इदं नामास्माकं कुरुष्वेति॥

---

* "ऋ० सं० ४, १, २२, १। सा० सं० उ० आ० ४, १, ३, २।

† ऋ० सं० ८, ८, ७, १। "यन्त्रैः यमनसाधनैर्दृष्टिप्रदानादिभिरुपायैर्नियमीयैः प्राणैर्वा 'पृथिवीं' प्रथितां भूमिम् 'अरम्णात्' अरमयत्, सुखेनावस्थापयति"—इति च तत्र सा० भा०।

"तस्य" "एषा" अपरा "भवति"—। सा पुनः किमर्थम्? उक्तं हि "अथास्य कर्म—रसानुप्रदानम्, वृत्रवधो, या च का च बलकृतिः" इति*, तदेतदिह रसानुप्रदानं वृत्रवधश्च दर्शितम्; बलकृत्युपप्रदर्शनार्थ मपरोदाह्रियते—॥ ९ ॥

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः। यो जायमान एव† प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा पर्यभवत् पर्यगृह्णात् पर्यरक्षदत्यक्रामदिति वा यस्य बलाद् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्राज्जयिता वा रसानां तस्यैषा भवति ॥ १० ॥

"यो जात एव प्रथमः"—इति‡। गृत्समदस्यार्षम्। इन्द्राय नमस्वते पुरोडाशः, तस्य याज्या। गृत्समद मिन्द्रवरप्रदानादैन्द्रं रूपं

* ७अ० ३पा० ३ख० ३भा० २५१, २५२ पृ० द्र०।

† "यो जात एव" क, ख, ग।

‡ ऋ० सं० २, ६, ७, १। "यो जात एवेति निष्केवल्यं" आ० सू० ६, ६। "यो जात एव प्रथमो मनस्वानिति सूक्तं सामानोदर्कं तृतीयेऽहनि तृतीयस्याह्नो रूपम्"—इत्यादि च ऐ० ब्रा० ५, १, १।

बिभ्रत मिन्द्रोऽय मिति मन्यमाना जिघांसवो ऽसुराः किल मरुद्गणैः विनाकृतोऽय मिदानी मेकः शक्यो हन्तु मिति परिवव्रिरे, स किल भीतोऽनेन सूक्तेनेन्द्रं तुष्टाव,—आत्मानञ्च ब्राह्मणं परेभ्यः प्रतिवेदयाञ्चकार* ।—

'यः' 'जातः एव' जातमात्र एव 'प्रथमः' मुख्यः सर्वभूतानां प्रति मुख्यतां सम्पेदे। "मनस्वी" च मेधावी; अन्ये हि कालेन मुख्याः सम्पद्यन्ते मेधाविनश्च। "देवो देवान् क्रतुना पर्यभूषत्"। सत्यपि देवत्वाविशेषे इतरान् 'देवान्' 'क्रतुना' "कर्मणा" 'पर्यभूषत्' "पर्यगृह्णात्" परिगृहीतवान् स्वामित्वेन; "पर्यरक्षद्वा" मुख्यत्वात्; "अत्यक्रामद् वा" प्रभावेन। 'यस्य' च 'शुष्मात्' (शारीराद्†) "बलाद्" 'रोदसी' "द्यावापृथिव्यौ अपि" 'अभ्यसेताम्' "अबिभीताम्"‡। 'नृम्णस्य मह्ना' "बलस्य" सेनालक्षणस्य "महत्त्वेन"; अतिमहदस्य मस्य बल मवश्य मय मावां सादयिष्यतीत्येव मतिमहत्यावेते द्यावापृथिव्यावबिभीतां यस्य शुष्मात्। ('जनासः!') हे

---

* अत्रेतिहासो बृहद्देवतायाम्।—"संयुज्य तपसात्मान मैन्द्रं बिभ्रन् महद् वपुः। अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च। त मिन्द्र इति मत्वा तु दैत्यौ भीमपराक्रमौ। धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः। विदित्वा स तयोर्भाव मृषिः पापं चिकीर्षतोः। यो जात स्सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत्॥"—इति। "अन्ये त्वन्यथा वर्णयन्ति"—इत्यादि, "अपरे त्वेवं कथयन्ति"—इत्यादि च ऋग्भाष्ये सायणेन महाभारते च प्रपञ्चितं द्रष्टव्यम्।

† नास्त्येतत् पदं क-ख-पुस्तकयोः।

‡ "भ्यसते रेजत इति भयवेपनयोः"—इत्युक्तं पुरस्तात् ३अ० ४पा० ४ख० २भा० ३५१ पृ०।

असुरजनाः ! 'सः इन्द्रः' नाह मिन्द्रः ; ब्राह्मणोऽहम्, तत्प्रसादा-
द्देवाप्ततद्रूप इति ॥

"ऋषेः दृष्टार्थस्य" अनुभूतेन्द्रमैत्रस्येन्द्रवयस्यस्य गृत्समदस्य इन्द्रं प्रति "प्रीतिः" स्तुतिः "भवति" ("आख्यानसंयुक्ता") आख्यानसम्बन्धात्। अतश्च दर्शयति मन्त्राणा मैतिहासिकोऽप्यर्थ उपेक्षितव्योऽसावपि तेषां विषय इति। अथ वा "दृष्टार्थस्य"—इति देवतार्थम्; स तत्ततो (दृष्टवता*) भावितान्तःकरणस्य "प्रीतेः" अतिहर्षात् "आख्यानसंयुक्ता" अन्येभ्यः कथनसंयुक्तेत्यर्थः ॥

"पर्जन्यः"†, "तृपेराद्यन्तविपरीतस्य"। "तृप तृप्तौ (दि॰ प॰)" —इत्यस्य धातोः। स कथं भवति? आद्यन्तविपर्ययेण। अतस्त माद्यन्तविपर्ययं स्वय मेव दर्शयति;—"तर्पयिता" स एव भवति। किम् एकदेशिकः। न-इत्युच्यते,—"अन्यः" सर्वजनपदतर्पयिता। अथ वव मन्यथा स्यात्,—"परो जेता वा" परः प्रकृष्टो जेता पर्जन्यः; परशब्दात् पूर्वपदम्, जयतेरुत्तरपदम्। "परो जनयिता वा" प्रकृष्टो जनयिता; तदेव पूर्वपदम्, जनयतेरुत्तरपदम्। "प्रार्जयिता वा"; कस्य? "रसानाम्" प्रपूर्वस्यार्जयतेः पर्जन्यः; स हि रसान् प्रकटीकरोति‡।

"तस्य एषा भवति"—॥ १० ॥

---

* नास्त्येतत् पदम् म-पुस्तके।

† १भा॰ ४७५, ४७७ पृ॰ ५अ॰ ४स॰ (५)।

‡ "तत्र पिता दुहितुर्गर्भं दधाति, पर्जन्यः पृथिव्याः"—इति चोक्तं पुरस्तात् ४अ॰ २पा॰ ५स॰ २भा॰ ४९१ पृ॰। नवमे च उदाहृतम्—"पर्जन्यजिन्वितम्" इति प॰ ८ पृ॰।

वि वृक्षान् हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात्। उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यस्तनयन् हन्ति दुष्कृतः॥ विहन्ति वृक्षान् विहन्ति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधान् महान् ह्यस्य वधो ऽप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृतो वृहस्पतिर्वृहतः पाता वा पालयिता* वा तस्यैषा भवति॥ ११॥

"वि वृक्षान् हन्ति"—इति†। अत्रेरार्षम्। कारीर्यां द्विगुपस्थाने विनियोगः। 'वि वृक्षान् हन्ति' "विहन्ति वृक्षान्" 'पर्जन्यः' अशनिपातैः। कदा? यदा तस्करादीन् अनाकालप्रभवान् ('दुष्कृतः') "पापकृतः" वर्षेण ओषधीरभिनिष्पादयन् 'स्तनयन्' 'हन्ति' उपशमयति, सुभिक्षं कुर्वन्, तदा। "विहन्ति च रक्षांसि" विविधं हन्ति क्रूरकर्मणः। 'विश्वं बिभाय' "सर्वाणि चास्माद्भूतानि बिभ्यति 'महावधात्' पर्जन्यात्। कथम्? "उत अनागा ईषते" एवं नाम महावधात् अस्मात् सर्वाणि भूतानि बिभ्यति, येन 'अनागाः अपि' "अनपराधोऽपि" सन् सर्व एव "अस्माद्" "वर्षकर्मवतः" स्तनयित्नु-

* "पालयिता" ख, ग।

† ऋ० सं० ४, ४, २७, २। "अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः, तदेवात्र लिख्यते"—इति इह सा० भा०।

शब्दैरशनिं मुञ्चतः 'ईषते' "पलायते", मा मयं 'स्तनयन् हन्ति'— इति मन्यमानः। सोऽय मेव मतिमहानुभावो भगवान् पर्जन्यः, स वर्षत्वस्माक मिति* ॥

"बृहस्पतिः"† कस्मात्? "बृहतः पाता वा पालयिता वा" 'बृहतः' महतोऽस्य जगतः उदकस्य वा 'पाता' रक्षिता, 'पालयिता' अपि रक्षितैव; धात्वन्यत्व मर्थैकत्वम्‡ ॥

"तस्य एषा भवति"—॥ ११ ॥

अश्नापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम्। निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य॥ अशनवता मेघेनापिनद्धं मधु पर्यपश्यन् मत्स्य मिव दीन उदके निवसन्तं निर्जहार तच्चमस मिव वृक्षाच्चमसः कस्माच्चमन्त्यस्मिन्निति बृहस्पतिर्विरवेण शब्देन विकृत्य ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता§ वा तस्यैषा भवति ॥ १२ ॥

---

* "यज्ञात् सञ्जायते धूमः, धूमाद् पर्जन्योऽभिजायते। पर्जन्यात् सञ्जायते वृष्टिः, वृष्टेरन्नं ततः प्रजाः"—इति, २भा० ४१४पृ० ७अ० ७पा० १ख० च द्रष्टव्यम्।

† १भा० ४०५, ४०७ पृ० ५अ० ४ख० (१)।

‡ "बृहस्पतिर्ब्रह्मासीत्"—इत्याद्युक्तं पुरस्तात् २अ०३पा०१ख० २भा०२०१ पृ०। "येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद् बृहस्पतिरभवत्"—इति च ऐ० ब्रा० ६, ३, १०।

§ "पालयिता" ख, ग।

"अश्नापिनद्धम्"—इति*। अथास्याङ्गिरसस्यार्षम्। ('अश्ना') "अशनवता" व्यापनवता "मेघेन", 'अपिनद्धम्' आत्मनो मध्य मतिनीय नद्धं बद्धं विवृतं व्यवहित मदृश्य मन्यैः, 'बृहस्पतिः' 'मधु' उदकम् "पर्यपश्यत्" सर्वतोऽपश्यत्†। कथम्? "मत्स्यं न दीन उदनि क्षियन्तम्"। 'मत्स्यम्' ('न') "इव" 'दीने उदके' उपक्षीयमाणप्राये 'क्षियन्तं' "निवसन्तम्"; यथा मत्स्यबन्धोऽल्पउदके जिघृक्षुर्मत्स्यं परिपश्येच्छक्यो गृहीतु मय मिति, एवं पर्यपश्यत्। "निष्टज्जभार चमसं न वृक्षात्"। तच्च मधु दृष्ट्वा 'निजभार' "निर्जहार" निर्हृतवान्; कथम् 'चमसं न वृक्षात्' यथा कश्चित् कुशलः शिल्पी वृक्षमध्यात् 'चमसं' यज्ञपात्रम्‡ निर्हरेत् निष्पादयेत्, एवं निर्जहार बृहस्पतिः। अतएवोदकनिर्हरणात् मध्यमः। कथ मसौ निर्जहार? 'विरवेण विकृत्य' भीषणेन अतिमहता रवेण "शब्देन" सङ्क्षोभ्य मेघम्; स्रस्तसर्वाङ्गसन्धिबन्धनं कृत्वा विक्लवम्, तत एवं विक्लवीभूतं विकृत्य समन्ततो विशकलीकृत्य। एवं निर्जहार मधु यो बृहस्पतिः, सोऽस्माक मपीदं करोत्विति॥

"चमसः कस्मात्?" चमेर्भक्षणार्थस्य; तत्र हि सोमश्चम्यते‡॥

---

* ऋ० सं० ८, २,१८, २। उक्थे ब्राह्मणाच्छंसिन एतत् सूक्तम्। षा० सू०९, १।

† "बृहस्पतिः 'अश्ना' अश्मना व्याप्तया शिखया पिनद्धं पिहितं 'मधु' गोलक्षणं 'पर्यपश्यत्' परितोऽद्राक्षीत्"—इत्यैतिहासिकं व्याख्यानम् सा० भा० द्र०। इतिहासस्तैष ऋ० सं० ८, २, १५, १ ऋग्व्याख्यानारम्भे सा० भा० द्र०।

‡ चमसश्च सोमरसादिपानपात्रम्। तथा हि—"चमसेन ह वा एतेन भूतेन देवा भक्षयन्ति"—इति श० ब्रा० १, ४, २, १४; "चमसो देवपानः"—इति चाह महीधरः य० वा० सं० ७, २४ व्याख्यायाम्।

"ब्रह्मणस्पतिः"* कस्मात्? "ब्रह्मणः पाता वा पालयिता वा" ब्रह्म=अन्नम्, ऋगादि वा† (तस्योभयस्याप्यसौ वर्षेणौषधीरभिनिष्पादयिता सम्पद्यते; वर्षाभावे ह्येतदुभय मुत्सीदति‡) ॥

"तस्य एषा भवति"—॥ १२ ॥

अश्मास्य मवतं ब्रह्मणस्पतिर्मधुधार मभि य मोजसातृणत्। त मेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्स मुद्रिणम्॥ अशनवन्त मास्यन्दनवन्त मवातितं ब्रह्मणस्पतिर्मधुधार मभि य मोजसा बलेनाभ्यतृणत् तमेव सर्वे पिबन्ति रश्मयः सूर्यदृशो बहुलं सह सिञ्चन्त्युत्स मुद्रिण मुदकवन्तम् ॥ १३ ॥

॥ इति निरुक्तौ दशमस्याध्यायस्य प्रथमः पादः ॥ १०.१.

"अश्मास्य मवतम्"—इति§। गृत्समदस्यार्षम्। अश्म-शब्दात् "अशनवन्तम्"—इति, आस्य-शब्दात् "आस्यन्दनवन्तम्"—इति, भाष्यकारश्चकार; तथा सामर्थ्य मपेक्ष्य। किं मुक्तं भवति? उदकव्यापनक्रियया तद्वन्तम्, आस्यन्दनक्रियया चोदकप्रक्षरणक्रियया

* १भा० ४७५, ४७८ पृ० ५अ० ४ख० (७)।

† १भा० ९९, २११, २२८ पृ०; २भा० १७२,१९९,२९४ पृ०; ३भा० ७० पृ०द्र०।

‡ नास्त्येषपाठो ग-पुस्तके।

§ ऋ० सं० २, ७, १, ४। "ब्रह्मणस्पतिर्ब्रह्मणो मन्त्रस्य पतिः पालयिता"—इति तत्रैव सा० भा०।

तदन्नम्। 'अश्मास्यम्' मेघम् 'मधुधारम्' उदकं धारयितारं 'यम्' 'ओजसा' "बलेन" 'अभ्यतृणत्" अभ्यहनद् 'ब्रह्मणस्पतिः', 'तम्' 'अवतम्' "अपातितम्" अवाङ्गतितम्* भूमिम् उदकभावेन गतम्, पुनरादानकाल मुकदस्य प्राप्य 'तम् एव' 'विश्वे' "सर्वे" 'पपिरे' "पिबन्ति", तदुदक माददते†। के पुनस्ते? 'स्वर्दृशः' सूर्यस्य "रश्मयः" स्वरिव ये दृश्यन्ते, ते सूर्यसमानदर्शनाः; स्वर्भावेन वा सूर्यभावेन ये मण्डलीभूता दृश्यन्ते, ते पिबन्ति; पुनश्च प्राप्य तदुत्सर्गकालं 'बहु साकम्' 'बहु' तत् उदकम्, 'साकम्' सहभूताः मण्डलात् अवाञ्चः आवृत्य "एनम्" अन्तरिक्षे, 'उत्सं' मेघम् 'उद्रिणम्' "उदकवन्तम्" कुर्वन्तः 'सिञ्चति'। तच्च पुनरेवं मेघं यो ब्रह्मणस्पतिः लोकानुग्रहाय प्रतिसंवत्सरं तृणेढि, सोऽस्माक मिदं नाम करोत्विति ॥ १३ ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशाध्यायस्य (दशमाध्यायस्य) प्रथमः पादः ॥ १०।१ ॥

॥ द्वितीयः पादः ॥

क्षेत्रस्य पतिः क्षेत्रं क्षियतेर्निवासकर्मणस्तस्य पाता वा पालयिता‡ वा तस्यैषा भवति ॥ १ (१४) ॥

---

* "अवागतितम्" क।

† "घर्मकाले यत् पीतं ततोऽपि बहुतरं सहस्रगुणितं सिञ्चतीत्यर्थः"—इति सा० भा०। "सहस्रगुण मुत्स्रष्टु मादत्ते हि रसं रविः"—इति च रघुः १, १८।

‡ "पालयिता" ख, ग।

"क्षेत्रस्य पतिः"* कस्मात्? "क्षेत्रम्" तावत् "क्षियतेः निवासकर्मणः"; तदाश्रयेण हि ग्रामे क्षियन्ति निवसन्ति कुटुम्बिनः। "तस्य पाता वा पालयिता वा" मध्यमः; तत्कर्मोपपत्तौ हि क्षेत्रस्य क्षेत्रत्वसाफल्यम्; यदा हि मध्यमेन दृष्टं भवति, अथ क्षेत्रं सफलं भवति। विगृहीत मेव समाम्नातम्; निगमे तथा दृष्टत्वात्॥

"तस्य एषा भवति"—॥१(१४)॥

क्षेत्रस्य पतिना वयं हितेनेव जयामसि। गा मश्वं पोषयित्न्वा स नो मृळातीदृशे†॥ क्षेत्रस्य पतिना वयं सुहितेनेव जयामो गा मश्वं पुष्टं पोषयितृ चाहरेति। स नो मृळातीदृशे। बलेन वा धनेन वा मृळतिर्दानकर्मा‡ (पूजाकर्मा वा§) तस्यैषापरा भवति॥२(१५)॥

"क्षेत्रस्य पतिना वयम्"—इति‖। वामदेवस्यार्षम्। क्षेत्रस्य पतये चरोः पुरोऽनुवाक्या। 'क्षेत्रस्य पतिना' सुष्ठु 'हितेन' केन चिदाप्तेन मित्रेण इव संयुक्ताः सन्तो 'वयम्' "जयामः" गवाश्वादीनि धनानि पुष्टानि बलवन्ति पोषयितॄणि पोषणाय समर्थानि उपनामितद्रव्याणां चास्माकं क्षेत्रस्य पतिना त्वत्प्रसादादेव तानि भोक्तुं शक्ति-

---

* १भा० ४७५, ४७८पृ० ५प० ४प० (न)।

† "मृळातीदृशे" क, ख, ग।

‡ "मृळतिरुपदयाकर्मा" क, ख, ग।

§ नास्त्येतत् ङ-च-पुस्तकयोः।

‖ ऋ० सं० ३, ८, ९, १। "क्षेत्रस्य कर्षणेऽनेन सूक्तेन प्रत्यृचं जुहुयाज्जमेद्वा"—इत्यादि सा० भा०; ऋ० सू० २, १०; आ० सू० ९, ११. द्र०।

रस्तु। कथम्? इति। 'आ'—इत्यस्योपसर्गस्य सम्बन्धि क्रियापद मध्याजहार भाष्यकारः "आहर"—इति। कोऽर्थः? उपजातशक्तयो वय मेव माज्ञापयन्तः परिचारकानिद माहरतेति सर्वद्रव्याणि यथाब्रुवीमहि, तथा क्षेत्रस्य पतिरस्मान् मृडयतु। "मृळतिः दानकर्मा"। "ईदृशे" धनलाभाय भोगाय चास्मान् ददातु, धारयतु, नित्यं स्थिरान् करोतु।—इत्येतदाशास्महे॥

"तस्य एषा अपरा भवति"—। सा पुनः किमर्थम्? यस्य चरोः एषा पुरोऽनुवाक्या, तत्र ब्राह्मणं भवति,—"इयं वै क्षेत्रं पृथिव्यस्या मदीनायां प्रतितिष्ठति"—इति, यतः परया वर्षलिङ्गयोपपादयति मध्यस्थानः क्षेत्रस्य पतिरिति; भक्तिमात्रं ब्राह्मण मिति*॥ २ (९५)॥

क्षेत्रस्य पते मधुमन्त मूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व। मधुश्चुतं घृत मिव सुपूत मृतस्य नः पतयो मृळयन्तु†॥ क्षेत्रस्य पते मधुमन्त मूर्मिं धेनुरिव पयोऽस्मासु‡ धुक्ष्वेति मधुश्चुतं घृत मिवोदकं सुपूत मृतस्य नः पातारो वा पालयितारो वा मृळयन्तु मृळयतिरुपदयाकर्मा§ (पूजाकर्मा वा ||) तद्यत्समान्या

---

* "भक्तिमात्र मितरत्"—इति चोक्तम्। ऋ०२पा०७अ०३मा०४९७४०१२पं०।

† "मृळयन्तु" क, ख, ग।

‡ "पयो अस्मासु" क, ख, ग।

§ "मृळतिर्दानकर्मा" क, ख, ग; सायणसम्मतश्च।

|| नास्त्येतत् क-ख-ग-पुस्तकेषु।

ऋचि समानाभिव्याहारं भवति तज्जामि भवतीत्येकं मधुमन्तं मधुश्चुत मिति यथा यदेव समाने पादे समानाभिव्याहारं भवति तज्जामि भवतीत्यपरं हिरण्यरूपः स हिरण्यसंदृगिति यथा यथा कथा च विशेषोऽजामि भवतीत्यपरं मण्डूका इवोदकान् मण्डूका उदकादिवेति यथा। वास्तोष्पतिर्वास्तुर्वसते* र्निवासकर्मणस्तस्य पाता वा पालयिता† वा तस्यैषा भवति॥ ३ (१६)॥

"क्षेत्रस्य पते"—इति‡। आर्षं यदेव पूर्वस्याः। विनियोगो महाव्रते; आदित्ये चतुरूपस्तुतः स्तनग्रहः, तस्य तृतीय मनयर्चा गृह्यते§। हे 'क्षेत्रस्य पते!' 'मधुमन्तम् ऊर्मिम्' मधुरं स्वादु उदकसङ्घातम्, 'धेनुः' यथा 'पयः' दोग्धि, एवम् 'अस्मासु' 'धुक्ष्व' प्रक्षर। किञ्च "मधुश्चुतं घृत मिव सुपूतम्"। मधु इव यत् मुहुर्मुहुः स्रोतति, 'घृत मिव सुपूतम्' उदक मकलुषम्, तस्य दानेन "ऋतस्य नः पतयो मृडयन्तु"। 'ऋतस्य' उदकस्य 'पतयः' "पातारः"

---

* "वास्तु वसते" क, ख, ग।

† "पालयिता" ख, ग।

‡ ऋ० सं० ३, ८, ९, १। आप्तोर्यामे मैत्रावरुणस्यातिरिक्तोक्थे एषा किल परिधानीया। आ० सू० ९, ११. द्रष्टव्यम्।

§ "अदित्यै चतुरूपस्तुतस्तनस्य ग्रहस्य तृतीय मनयर्चा गृह्यते"—इति ख०, "आदित्यै चतुरूपस्तुतः स्तनग्रहः, तस्य तृतीय मनयर्चा गृह्यते"—इति ग। तृतीयसवने च आदित्यग्रहाणां ग्रहणं विहितम्। तद्यच "आदित्यग्रहं गृह्णाति"—इत्यादि का० श्रौ० सू० १०, ४, ४. द्र०।

माध्यमिका देवाः क्षेत्रस्पतिप्रमुखाः 'मृळयन्तु' नित्य मस्मान् रक्षन्तु, पूजयन्तु वा ॥

अतएव मन्त्रात् प्रसक्त मतःपरं सर्वमन्त्रेषु जाम्यजामिता पदानां चिन्त्यते।—जामीति पुनरुक्तस्य सञ्ज्ञा, सा पुनरियं निगमत एव। विज्ञायते हि—"जामि वा एतद् यज्ञे क्रियते, यन्मरुत्वतीयो ग्रहो गृह्यते मरुत्वतीयं शस्यते"—इति*। तदेतत् पुनरुक्तं द्विविधम्।—समानशब्दार्थम्, असमानशब्दार्थञ्च। तत्र समानशब्दार्थं नाम, यदेक मेव पद मेकार्थ मेकस्मिन्नेव वाक्याधिकारे पुनरुच्यते। तद्यथा—"मन्म रेजति रक्षोहा मन्म रेजति"—इति†। तदधिकृत्यान्यार्थाप्रति-समाधानाशक्तौ वक्ष्यति—"अभ्यासे भूयांस मर्थं मन्यन्ते"—इति‡। यत् पुनरसमानार्थं पद मभ्यस्यते, तदपुनरुक्त मेव। यदसमानशब्दं समानार्थञ्च तदसुखप्रतिसमाधान मिति तदर्थ मिदोपोद्धन्ति—

"तद्यत् समान्या मृचि"—इति। तदिति वाक्योपादाने। "यत्" "समान्या मृचि" एकस्या मृचि "समानाभिव्याहारं" पदं "भवति" समान मर्थं मभिव्याहरति पदान्तरेण; यः कश्चित् पूर्वेऽर्द्धर्चेऽभि-हितोऽर्थः, त मेव उत्तरेऽर्द्धर्चेऽभिदधत् जामि भवति। तद् "यथा—'मधुमन्तं, मधुश्चुतम्'—इति"§; यो हि मधुश्चुत् अवश्य मसौ मधुमान्। "एकं" तावत् आचार्यमतम् ॥

---

* "जामि वा एतद् यज्ञे क्रियते यत्र समानीभ्या मृग्भ्यां समानेऽहन् यजतीति" —इति च ऐ० ब्रा० ३, ५, ३।

† ऋ० सं० २, १, १०, १। इयत्रोपरिष्टादिहैव चतुर्थे पादे प्रदर्शयिष्यति (५)।

‡ इहैवाध्याये चतुर्थे पादे पञ्चमखण्डव्याख्यानावसरे।

§ प्रदर्शिताया मिहैवर्चि द्रष्टव्यम्। पृ० ९५ इ० ११ प०।

"यदेव समाने पादे समानाभिव्याहारं भवति, तज्जामि भवतीत्यपरम्"। नानार्द्धर्चगतयोः समानार्थयोरपि पदयोरसमानपदान्तरव्यवधानात् प्रकृतार्थानुस्मृतये पुनरनुकीर्त्तनं मजाम्येव; किन्तु यदेव समाने पदे एकस्मिन् पदान्तरेण व्यवहितं पदं समानार्थं पुनरुच्यते, अविच्छिन्नप्रसक्तानुस्मृति, तदेव जामीत्यपरम्। "हिरण्यरूपः स हिरण्यसन्दृक्—इति यथा"*। यो हिरण्यरूपः सोऽवश्यं हिरण्यसन्दृक्॥

तत् किं पौनरुक्तेन योज्यं पदम्, तत्संयोगाद्वा तदसाधु मन्त्रवाक्यम्? न—इति, उच्यते—"यथा कथा च विशेषोऽजामि भवतीत्यपरम्"। यथा कथञ्चित् यः कश्चित् स्वल्पोऽपि हि तत्र विशेषो वक्तव्यः, दृष्टानुविधानाच्छन्दसः; अर्थानुविधाने यतेतैवम्। येन केन चित् स्वल्पेनापि विशेषेण तदजामि भवतीत्यपरम्। अपरे पुनः कृतवाक्यार्थपरिसमाप्तितिरिक्तं पदं पुनरभ्यस्यमानं निपातवत् पादपूरणत्वेनार्थवदिति प्रतिसमादधते। तदेतदवगतं भवति; इदमेव त्वभीष्ट माचार्यस्य—"यथा कथा च विशेषः" इति; तदर्थमुदाहरति—"मण्डूका इवोदकान् मण्डूका उदकादिव"—इति यथा"†। एवमादिषु यथा समानशब्देषु असमानशब्देषु च पुनरुक्तेषु यः कश्चिद् विशेषो वक्तव्यः॥

स कथम्? इति मन्त्रमेव तं व्याचक्ष्महे। यत्रैष पादः—"योगक्षेमं व आदाय"—इति‡। ऋषभस्यार्षम्। कामतो देवता कल्प्याः।

* ऋ० सं० १, ७, १२, ५। "सः=अपान्नपात्"—इति तत्र सा० भा०।
† ऋ० सं० ८, ८, १४, ५। व्याख्यास्यम् मनुपद मेव दर्शितम्।
‡ ऋ० सं० ८, ८, १४, ५। "सपत्ननाशनरूपोऽर्थो देवता"—इति सा० भा०।

विद्विष उच्यन्ते—"योगक्षेमं व आदाय"* । योगो नाम लिप्सितार्थस्य प्राप्तिः, क्षेमो नाम तत्परिपालनम् । हे विद्विषः ! एतत् उभयं भवद्भ्य आदाय मदधीनसर्वयोगक्षेमान् युष्मान् कृत्वा सर्वार्थेऽपि 'अहं भूयासम्' 'उत्तमः' उत्कृष्टः युष्माकम् । 'आ वो मूर्द्धानं मक्रमीम्" । उपरि युष्मानधितिष्ठेयम् । ते यूय माक्रान्तमूर्द्धानो मया । ('मे') मम 'अधस्पदात्' पादयोरधो वर्त्तमानाः मन्मुखप्रेक्षाः अस्वाधीनसर्वार्थवृत्तयो भूत्वा नित्य मा'वदत' । कथम् ? 'मण्डूका इवोदकात्' यथा मण्डूकाः उदकात् ऋते नित्य मस्वाधीनवृत्तयो निर्वचनाः सम्पद्यन्ते, एवं मदृते यूयं मा भूत । एव मत्रैकत्र विद्विषां निर्वाक्ते मण्डूका उपमानम् ; अन्यत्र उदकाभावे मण्डूका यथा न भवन्ति, एवं मदभावे यूय मित्युदक मुपमानम् † ॥

एष विशेषः पूर्वयोरपि मन्त्रयोर्भवति ‡ ;—कश्चित् मधुमान् न तु मधु अविरतं मुहुर्मुहुश्च्योततीति ; यथा हिरण्यरूपः स हिरण्यसन्दृक् इति ; अत्र भवति कश्चिद्धिरण्यरूपः न तु हिरण्य मिव दृश्यमानः प्रिय इति विशेषः ॥

"वास्तोष्पतिः" § वक्तव्यः । स च पुनरेष रुद्रात्मना मध्यमो वास्तोष्पतिः । विज्ञायते हि वास्तोष्पतीये याथावर्थप्रतिपत्तौ

---

* "योगक्षेमं व आदायाहं भूयास मुत्तम आ वो मूर्द्धान मक्रमीम् । अधस्पदान्म उद्वदत मण्डूका इवोदकान् मण्डूका उदकादिव ॥"

† "एवं मदृते यूयं भूयात्—मण्डूका उदकादिव । यथा चोदकादृते मण्डूकाः सर्वात्मनैव न भवन्ति, एवं मदभावे यूय मित्युदक मुपमानम् ।"—इति क ।

‡ पुरस्तात् प्रदर्शितयोरित्यर्थः । ९७, ९८ पृ० द्र० ।

§ १ भा० ४७५, ४७८ पृ० ५ अ० ४ ख० (९) ।

गृहगमन मधिकृत्य—"न हीन मन्वाहरेयू रुद्राय हि तद्धीयते यद्धीन मन्वाहरेयुः रुद्रं भूत मन्वाहरेयुः"—इति। स एष गृहाधि-देवता रुद्रो वास्तोष्पतिः। स पुनः "अमीवहा"—इति बलकृति-लिङ्गात् * मध्यमः॥

तस्य पूर्वपदं विगृह्य निराह—"वास्तुः, वसतेः निवासकर्मणः"। "वास्तु"—इति गृह मुच्यते, उष्यते हि तस्मिन् †। "तस्य" "पाता" रक्षिता, तदधिदेवताभावेन रुद्रात्मना च तत्कृतेनोपकारेण रक्षिता मध्यमः; इतरथा ह्युत्सीदेयुर्गृहाः ‡॥

"तस्य एषा भवति"—॥ ३ (१६)॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः॥ अभ्यमनहा वास्तोष्पते सर्वाणि रूपाण्याविशन्सखा नः सुसुखो भव शेव इति§ सुख-नाम शिष्यतेर्वकारो नामकरणोऽन्तस्थान्तरोपलिङ्गी विभाषितगुणः शिव मित्यप्यस्य भवति यद्यद्रूपं काम-यते तत्तद्देवता भवति। रूपंरूपं मघवा बोभवीती-त्यपि निगमो भवति। वाचस्पतिर्वाचः पाता वा पालयिता वा तस्यैषा भवति॥ ४ (१७)॥

---

* इहैवोत्तरस्मिन्नेव खण्डे व्याख्यास्यत्यमुम् (१०पं०)।

† "वास्तूनि"—इति पुरस्ताद् गतम्। १ भा० १८५ पृ०; २, १, ३ ख०।

‡ "ब्रह्मवास्तोष्पतिभ्याञ्च वास्तुमध्ये बलिं हरेत्"—इति म० सं०३अ० ८९श्लो०।

§ "शेव मिति" क, ख, ग।

“अमीवहा वास्तोष्पते”—इति *। वसिष्ठस्यार्षम्। गृहद्वारिका-स्थालीपाके यायावर्यप्रतिपत्तौ च वास्तोष्पतीयहोमे विनियोगः। हे भगवन्! ‘वास्तोष्पते!’ त्वम् अस्माकम् ‘अमीवहा’ भव। अमीवा रोगः, तस्य हन्ता। कथम्? (‘विश्वा’) “सर्वाणि” ‘रूपाणि’ ‘आविशन्’। यस्य अस्मदुःखहेतोर्यः प्रतिपक्षः, सर्पादेर्नकुलादिः, तस्य रूप माविशन् तं त मस्माक ममीवानं जहि। अमुना प्रकारेण ‘घ्नन्’ अस्मदुपद्रवान्, ‘सखा’ मित्रम्, ‘सुशेवः’ सुष्ठु सुखो ‘भव’। “शेव इति सुखनाम” †। तत् कस्मात्? “शिष्यतेः वकारो नामकरणः” शिषिधातुः ‡, वकारः प्रत्ययः। शिष इत्यस्य स पुनः “अन्तस्थान्तरोपलिङ्गी” अन्ते तिष्ठति धातोर्यो वर्णः सोऽन्तस्थः; न सञ्ज्ञा; यथा अन्तस्था यरलवाः। कस्य पुनरसौ? षकारः। तस्यान्तर मवकाशस्थानम् उपलिङ्गयति उपगच्छति यः, स भवत्यन्तस्थान्त-

---

* ऋ० सं० ५, ४, २२, १। षष्ठमिदं सूक्तम्। “वरुणस्य गृहान् रात्रौ वसिष्ठः स्वप्न माचरन्। प्रविवेशाथ तं तत्र श्वा नदन्नभ्यवर्त्तत। अन्दन्तं सारमेयं स भावन्तं दष्टु मुद्यतम्। यदर्जुनेति च द्वाभ्यां (१, २) सान्त्वयित्वा ह्यसूषुपत्। एवं प्रस्वापयामास जन मन्यच्च वारुणम्।”—इति बृहद्देवतायाम्। “अत्र के चित् पुनरेव माहुः—आसां प्रस्वापिनित्वं तु कथासु परिकल्प्यते। वसिष्ठस्तृषितोऽन्नार्थी त्रिरात्रालब्धभोजनः। चतुर्थरात्रौ चौर्यार्थं वारुणं गृह मेत्यन्। कोष्ठागारे प्रवेशाय पालकश्वादिसुप्तये। यदर्जुनेति सप्तैवं ददर्श च जजाप च।”—इति सा० भा०।

† १ भा० ३१४ पृ० ३ अ० ६ ख० “शेवम्” (१०), “शिवम्” (१८)।

‡ एकः शिषिः हिंसार्थः भ्वादी ६८८, अपरस्तु ‘शिषॢ विशेषणे’ रुधादिः १४। “शेषति हिनस्ति क्लेशं, शेषयति विशेषयति वा स्वाश्रयम्”—इति च निघण्टुव्याख्यायां देवराजः (१भा० ३१८पृ० ५पं०)।

रोपलिङ्गी। कश्च पुनरसौ? षकारः। स षकारस्य स्थान-मुपगच्छति। ततो गुणे कृते शेव इति भवति। स च पुनरेष धातुः "विभाषितगुणः" इति "शिवम् इति अपि अस्य भवति" अगुणपक्षे॥

"सर्वाणि रूपाण्याविशन्"—इत्यतः प्रसक्तमुच्यते; शक्नोति पुन-र्वास्तोष्पतिः सर्वाणि रूपाण्यावेष्टु मित्युच्यते—"यद् यद् रूपं कामयते तत्तद्देवता भवति"। अस्त्येतदैश्वर्यं देवतायाः यद्यदिच्छति रूपं तत्तत् करोति; निगमोऽपि हि भवत्यैश्वर्यप्रख्यापकः।—"रूपं-रूपं मघवा बोभवीति"—इति *। विश्वामित्रस्यार्षम्। यावन्ति कानि चिद्रूपाणि 'मघवा' इन्द्रो भवितु मिच्छति, तानि सर्वाण्यप्रतिबन्धेन 'बोभवीति' पुनःपुनर्भवतीति। कथम्? 'मायाः कृण्वानः' इदमश्वाभीदश्ववामीत्येवम् 'तन्वं परि स्वां' तनुं तत्तदाकृत्यानेकविधां विकुर्वाणः। "त्रिर्यद्दिवः परि मुहूर्त्तं मागात्"। 'दिवः परि' दिवः अधि द्युलोकात्, 'मुहूर्त्तं' मुहूर्त्तकालं प्रति 'यत्' यः 'त्रिः' 'आगात्' आगच्छति। 'स्वैर्मन्त्रैः' हूयमानो वा स्तूयमानो वा युगपद्यजमानानां यज्ञेषु। 'अनृतुपाः' अनियतसोमपानकालः, सर्वदा यागोत्पत्तेः। 'ऋतावा' ऋतवान् यज्ञवान्। येनासावेव मात्मानं विकरोत्येवं च दिवो मुहूर्त्तं त्रिरागच्छति। तेनासावचिन्त्यप्रभावत्वाच्छक्नोति तत्तद्रूप मावेष्टुम्॥

* "रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वाम्। त्रिर्यद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा॥"—इति ऋ० सं० ३, ३, १० ३।

एवञ्च सुष्ठु यदेतदुच्यते *—सर्वाणि रूपाण्याविशन्नमीवहा भवास्माकं त्व मिति† ॥

"वाचस्पतिः" ‡ वक्तव्यः। स पुनरेषः "वाचः पाता वा पालयिता वा" प्राणात्मनेन्द्रः ॥

"तस्य एषा भवति"—॥ ४ (१७)॥

पुनरेहि वाचस्पते देवेन मनसा सह। वसोष्पते नि रामय मय्येव तन्वं१ मम॥ इति सा निगदव्याख्यातापान्नपात्तनूनपा व्याख्यातस्तस्यैषा भवति ॥ ५ (१८) ॥

"पुनरेहि वाचस्पते"—इति §। अपगतप्राण मिवात्मानं मन्यमानः पापकृत् पापसम्बन्धात् कुतश्चित् कृतानिर्णेजनः सन् प्राणं ब्रवीति।—हे प्राण! 'पुनरेहि' त्वं मां प्रतीति। किम्पुनरेकाकी? न—इति, उच्यते;—'देवेन मनसा सह' सर्वेन्द्रियवृत्तिदीपकेन मनसा सह। एत्य च हे 'वसोष्पते' ‖ हे धनस्य अन्नस्य च पते! 'नि

* अत्रैव अमीवहेत्यस्य मन्त्रस्य व्याख्यानावसरे (१००पृ० ११पं०) यास्केनेति।

† "इन्द्रो मायाभिः पुरुरूपः"—इत्यादि च द्रष्टव्यम्। ऋ० सं० ६, ४७,१८सू०।

‡ १भा० ४७५, ४७८पृ० ५ख० ४ख० (१०)।

§ अथ० स० १, १, २। ऋ० सं १०, ६, १२, ७.—१२, १५, ३. ९, ६, २, ६. ५, ५. वा० सं० ९, १. एषु मन्त्रेषु च वाचस्पतिर्द्रष्टव्यः।

‖ "वसोस्पते!"—इति क-ख-पाठः परं मूलादिविरुद्धः।

रामथ' नियमेन रयम। 'मयि एव' एतां 'तन्वं' 'मम' मा यासीर्मत्त इति। प्राणात् पृथग्भूत मात्मानं पश्यन् स्तोता ब्रवीति ॥

"अपान्नपात्" *, "तनूनप्त्रा व्याख्यातः" शब्दनिर्वचनतः †; अभिधेयतस्तु मध्यमः। अद्भ्य आदित्यः, ततो मध्यमः; एव मपां पौत्रः ‡ ॥

"तस्य एषा भवति"—॥ ५ (१८) ॥

यो अनिध्मो दीदयदप्स्वन्तर्यं विप्रास ईळते§ अध्वरेषु। अपान्नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय॥ योऽनिध्मो (दीदयत्||) दीप्यतेऽभ्यन्तर मप्सु, यं मेधाविन स्तुवन्ति यज्ञेषु सोऽपान्नपान्मधुमतीरपो देह्यभिषवाय याभिरिन्द्रो वर्द्धते वीर्याय वीरकर्मणे यमो यच्छतीति सतस्तस्यैषा भवति ॥ ६ (१९)॥

---

* १मा० ४७५, ४७८ पृ० ५ख० ४ख० (११)।

† "नपादित्यमनन्तरायाः प्रजाया नामधेयम्, निर्णततमा भवति"—इति ८, १, १। २ मा० ४५९ पृ०।

‡ "अद्भ्य ओषधयः, ओषधिभ्योऽग्निरित्यग्नेर्नप्तृत्वम्। अथ वा अपां न पातयिता वैद्युताग्निरूपेण प्रवर्षकत्वादिति भावः।"—इति सा० भा० (ऋ० सं० २, २, ११, २)।

§ "ईलते" क, ख, ग।

|| नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

"यो अनिध्मो दीदयत्"—इति *। कवषस्यार्षम्। सर्व एव प्रत्यक्षकृतत्वेन गम्यते। हे 'अपान्नपात्' 'यः' त्वम् 'अनिध्मः' अनिन्धनोऽपि ('दीदयत्') "दीप्यसे", ('अन्तः') "अभ्यन्तरं प्रदेशं प्रति 'अप्सु' वर्त्तमानः। 'यम्' च त्वाम् 'अध्वरेषु' "यज्ञेषु" 'विप्राः' "मेधाविनः" 'ईलते' "स्तुवन्ति"। "सः" त्व मपान्नपात् 'मधुमतीः' मधुररसाः मधुरस्वादाः 'अपः' ('दाः') "देहि" "अभिषवाय"। 'याभिः' त्व मेव 'इन्द्रः' ईश्वरः सोमपानद्वारेण ('वावृधे') वर्द्धयाः 'वीर्याय' "वीरकर्मणे"। इत्येतत् प्रार्थयामहे ॥

"यमः" † वक्तव्यः। स पुनरेषः "यच्छति" उपरमयति ‡ जीवितात् सर्वं भूतग्राम मिति यमः। अतएव बलवान् इति मध्यमः॥

"तस्य एषा भवति"—॥ ६ (१८) ॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्था मनुपस्पशानम्। वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य ॥ परेयिवांसं पर्यागतवन्तं प्रवत उद्वतो निवत इत्यवतिर्गतिकर्मा बहुभ्यः पन्थान मनुपस्पाशयमानं § वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्ये-

---

* ऋ० सं० ७, ७, १४, ४। "इलूषपुत्त्रस्य कवषस्यार्षम्।

† १ भा० ४७५, ४७८ पृ० ५ अ० ४ ख० (१९)।

‡ "यम उपरमे" भ्वा० ८०। उपरमो निवृत्तिः।

§ "पन्था मनुपस्पाशयमानं" क, ख ग।

ति दुवस्यती राध्नोतिकर्माग्निरपि* यम उच्यते त मेता ऋचोऽनुप्रवदन्ति ॥ ७ (२०) ॥

"परेयिवांसम्"—इति[†]। यमस्यार्षम्[‡]। याम्ये पशौ वपायां विनियोगः। 'परेयिवांसम्' "पर्य्यागतवन्तम्" सर्व्वतः प्राप्तवन्तम्। कान् पुनः? 'प्रवतः', "उद्वतः", "निवतः" च भूतसङ्घातान्। 'प्रवतः'—इति मन्त्रे, "उद्वतो निवतः"—इति भाष्यकारोऽध्याजहार, तथा सामर्थ्यात्; 'प्रवतः'= मनुष्याः, "उद्वतः"= देवाः, "निवतः"= तिर्य्यञ्चः; तथा गत्युपपत्तेः। त मेत मेवं 'मही:' महती: भूतजाती:, परेयिवांसम्। 'बहुभ्यः' पुण्यकृद्भ्यः पापकृद्भ्यश्च ('पन्थाम्') "पन्थानम्" ('अनुपस्पशानम्') "अनुपस्पाशयमानम्[§]" अमुना मार्गेण अयं प्राणी जीवनादुत्सर्पति, त मेत मेवङ्कर्म्माणम् 'वैवस्वतम्' विवस्वतः पुत्रम्, 'सङ्गमनं जनानाम्' यम मेव चक्षुः कृत्वा योऽस्माल्लोकादमुं लोकं यथाकृतकर्म्मफलोपभोगवशेन जनान् गमयति। त मेवं 'यमम्', 'राजानम्' ईश्वरम् सर्व्वप्राणभृताम्, हे यजमान! 'हविषा' अनेन पशुलक्षणेन 'दुवस्य' राध्नुहि परिचरस्वेत्यर्थः ॥

"अवतिर्गतिकर्म्मा"—इत्येतदत्र निर्व्वचनं कथं सम्बध्यत इति विशा-

---

* "दुवस्यतिराध्नोतिकर्म्माग्निरपि" क, ख, ग।

† ऋ० सं० ८,६,१४,१। "विवस्वतः पुत्रस्य यमस्यार्षम्"—इति, "यमदेवत्या"—इति च सा० भा०। य एव ऋषिः, स एवास्याः देवता। "यो ममार॑ प्रथमो मर्त्यानां यः प्रेयाय॑ प्रथमो लोक मेतम्। वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा सपर्यत ॥"—इति च अथ० सं० १८, ३, १३।

‡ "हविर्द्धामस्यार्षम्"—इति क, ख।

§ "पस्पशे—'स्पश बाधनस्पर्शनयोः (भ्वा० उ०)' लिट्"—इत्यादि सा० भा०; ऋ० सं० १, १, ७, ४. द्रष्टव्यम्।

तव्यम्; अथवा प्रवत इत्यवतिरेवाय माङ्गिलुप्तः प्रपूर्व इति भाष्यकाराभिप्रायः* ॥

तत्प्रसङ्गाद्वा शब्दसाहूप्याद्वा निराह—"अग्निरपि यम उच्यते" इति विचारोपप्रदर्शनाय॥

"तम् एताः ऋचः अनुप्रवदन्ति"—इति प्रतिज्ञातार्थोपपादनाय; यथाग्निरपि यमशब्देन उच्यते, तथा इमा ऋचः अनुप्रवदन्ति—॥ ७ (२०)॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत् त्वेषप्रतीका। यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम्। तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम्॥ इति द्विपदाः सेनेव† सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत् त्वेषप्रतीका भयप्रतीका (बलप्रतीका‡) महाप्रतीका दीप्तप्रतीका वा। यमो ह जात इन्द्रेण सह सङ्गतः। यमाविहेह मातरेत्यपि निगमो भवति॥ यम इव जातो यमो जनिष्यमाणो जारः कनीनां जरयिता कन्यानां पतिर्जनीनां पालयिता जायानां तत्प्रधाना हि यज्ञसंयोगेन भवन्ति॥

---

* "याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः।"—इत्यस्याः व्याख्यानावसरे "प्रवतः प्रवणदेशे गच्छन्त्यः", 'निवतः निम्नदेशे गच्छन्त्यः", "उद्वतः उन्नतदेशे गच्छन्त्यः" –इति सायण आह। ऋ० सं० ५, ४, १७, ४ इ०।

† "द्विपदास्सेनेव" क, ख, ग।

‡ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

तृतीयो अग्निष्टे पतिरित्यपि निगमो भवति ॥ तं वस्त्राथा चरन्त्या पश्वाहुत्या वसत्या च निवसन्त्यौषधाहुत्यास्तं यथा गाव आप्नुवन्ति तथाप्नुयामेद्धं समिद्धं* भोगैर्मिचः प्रमीतेस्त्रायते† सम्मिन्वानो द्रवतीति वा मेदयतेर्वा तस्यैषा भवति ॥ ८ (२१) ॥

"सेनेव सृष्टा"—इत्येवमाद्याः‡। पराशरस्यार्षम्। एताः "द्विपदाः" विराजः§। प्रातरनुवाकाश्विनयोः विनियोगः। 'सेना इव सृष्टा' निसृता; अथ वा सेनापतिना विसृष्टा प्रेरिता। 'अमं दधाति' "भयं वा बलं वा दधाति"; भयं परेभ्यः; बलं स्वेभ्यः; अथ वा अतर्किता भयं दधाति, अतर्किता बलं दधाति प्रणेतुः। 'अस्तुः न दिद्युत्' "अस्तुः इव" क्षेप्तुर्यथा 'दिद्युत्' आयुधम् ('त्वेषप्रतीका') "महाप्रतीका" महती या दृश्यते प्रतीकं दर्शनम्, "भयप्रतीका" दर्शनादेव भयानका, "दीप्तप्रतीका वा" दीप्तदर्शना। भयं वा बलं वा ददाति स्वेभ्यः परेभ्यश्चेति वर्त्तते। का पुनरसौ? इति, अग्नेः अर्चिः। रक्षोभ्यो भयं ददाति, स्वेभ्यो बलम्॥

---

* "समृद्धं" क, ग, च।

† "प्रमीयतेस्त्रायतेः" क, ख, ग।

‡ ऋ० सं० १, ५, १०, ७, वा ४ पूर्वार्द्धं एषः। सन्ति ऋक्संहितायां प्रथममण्डले द्वादशोऽनुवाके नव सूक्तानि। तत्राद्यानि षट् सूक्तानि द्वैपदानि। तेषु अध्ययनसमये द्विपदे द्वे द्वे ऋचौ चतुःपदा मेकैक मृचं कृत्वा समाम्नायते; अयुक्संख्यासु तु या अन्त्या अतिरिच्यते, सा तथैवाम्नायते। प्रायेणार्थोऽपि द्वयोर्द्विपदोरेक एव; प्रयोगे तु ताः पृथक् पृथक् शंसनीया भवन्ति।

§ "विराजो द्विपदाः केचित् सर्व्वा आद्यश्चतुष्पदाः। कृत्वा पञ्चाक्षरान् पादांस्तांस्तथाक्षरपङ्क्तयः"—इति ऋक्प्राति० १७, २०।

"यमो ह जातो यमो जनित्वम्"*। यस्य इदम् एवंलक्षण मर्चिः, स एव 'यमः' अग्निः, सर्वं मिदं जातं जनिष्यमाणञ्च। [कथ मेतद् गम्यते पार्थिवोऽग्निर्यमशब्देनोच्यते; न मध्यमो नोत्तमो वा? इति। तावपि हि यमावुच्यते, यतो निगमान्तरेण विभज्य दर्शयति—"यमाविह मातरा (ऋ० सं० ४, ८, २५, १)—इत्यपि निगमो भवति"—इति। यत्रैष पादः, तस्मिन् मन्त्रे प्रकथते यमशब्देन अग्निरुच्यत इति विभावयितुं व्यपदेशः। तद्यथा—"बळि-त्था महिमा वाम्"—इति†। भरद्वाजस्यार्षम्। बृहती। "बट्"—इति सत्यनाम‡। हे 'इन्द्राग्नी!' 'इत्था' सत्यम्, अमुना प्रकारेण यः सूक्ते महाभाग्यप्रकारोऽधिकृतः, त मित्थेत्यभिनयेनोपदिशन् ब्रवीति। 'महिमा' माहाभाग्यम् 'वां' युवयोः 'आपनिष्ठः' सर्वतोऽतिशयेन स्तुत्यः। यौ युवा मेव मतिमहानुभावौ, तयोः 'समानः' 'वां' 'जनिता' जनयिता सूर्यः। तौ युवा मेवङ्कुलैकपितृकौ एकजन्मानौ 'यमौ भ्रातरौ'§। 'इह इह मातरौ' इह च पृथिवीलोके इह च अन्तरिक्षलोके अवस्थितौ मातारौ सर्वस्य लोकस्य निर्मातारौ। एव मिह मन्त्रे पितृत्वेन सूर्यो व्यपदिष्टः, इन्द्राग्नी यमौ इति यमशब्दो मध्यमस्थान-पृथिवीस्थानयोरग्न्यापि द्वयोर्यमयोरिह चेह च निर्माता-

---

* ऋ० सं० १, ५, १०, ८. वा ४ उत्तरार्द्धे एषः १०८पृ० "‡" टीप्पनी द्रष्टव्या।

† "बळि॒त्था म॑हि॒मा वा॑मि॒न्द्रा॑ग्नी॒ पनि॑ष्ठ॒ आ। स॒मा॒नो वां॑ ज॒नि॒ता भ्रात॑रा यु॒वं य॒मावि॒हेह॑ मातरौ॥"—इति ऋ० सं० ४, ८, २५, १।

‡ ३ अ० १० ख० (१); १भा० ३२९पृ०।

§ "यमौ यमलौ यमोत्पन्नौ"—इति तत्र सा० भा० विवेचनीयम्।

राविति प्रथमेन 'इह'-शब्देन अग्निर्यम इति लक्ष्यते; तस्मादिहापि "यमो ह जातो यमो जनित्वम्"—इति युक्तं यदग्निरेवोच्यते।]

"जारः कनीनां पतिर्जनीनाम्"। स एवाग्निः 'जारः' "जरयिता" ('कनीनाम्' "कन्यानाम्") कन्याभावस्य; यदा ह्यग्निसन्निधावूढा भवन्ति, अथ तासां कन्याभावो जीर्णो भवति 'पतिः जनीनाम्' "पालयिता जायानाम्"। कथम्? "तत्प्रधानाः" सम्पद्यन्ते, अग्नौ व्रतोपगमनात्; आ-व्रतविमोकात् अग्निपारतन्त्र्यात् ॥

यथा वैतासां यथाधिकृतो यमो ह जातो यमो जनित्व मिति अग्निरेव यमो ह जातः, पतित्वेन कन्याभावस्य जरयिता, तथाय मपरो निगमः स्फुटतरः—"तृतीयो अग्निष्टे पतिः (ऋ० सं० ८, ३, २७, ५)—इत्यपि निगमो भवति"। "सोमः प्रथमो विविदे"—इति*। सूर्याया आर्षम्। विवाहे विनियोगः। हे कन्ये! त्व मुच्यसे। 'सोमः' त्वां 'प्रथमो' 'विविदे' विन्नवान् प्राप्तवान् सौम्ये प्रथमकौमारके। "गन्धर्वो विविद उत्तरः" उपजायमानचारुताङ्गप्रविभागस्वरसौष्ठवा मीषदनङ्गाङ्गसमाहृतहृदयां 'गन्धर्वो' विश्वावसुः त्वां 'विविदे' विन्नवान्। अथ पुनरिदानीं वैवाहिके उपगतायाः कर्मणि "तृतीयो अग्निष्टे पतिः" तृतीयस्तवायं मग्निः। अत उद्वहनात् परम् 'तुरीयः' चतुर्थः ('ते') तवायं 'मनुष्यजाः' पतिः। इत्येव मनेनापि मन्त्रेण समवैति जारत्वं पतित्वं चाग्नेः। एवञ्चेद् "यमो ह जातो यमो जनित्वम्"—इति यदभिहितं सोऽग्निरेवेति सिद्धम् ॥

---

* "सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥"—इति ऋ० सं० ८, ३, २७, ५।

"अग्निर्मह्यं मथो इमाम् (ऋ० सं० ८, ३, २८, १)"—इति च केचिदधीयते निगमम्, उपपत्यर्थमित्यर्थम्। स निरुच्यते—"सोमो ददद् गन्धर्वाय" इति*। स एव विनियोगः, आर्षञ्च। 'सोमः' एतां प्रथमं कौमारादभ्युह्य 'गन्धर्वाय' 'ददत्' अदात्। अथ 'गन्धर्वः' अप्येना मभ्युह्य स्वयौवनाधिकारात् 'अग्नये ददत्'। अथ 'अग्निः' अपि एनाम् अस्मिन् विवाहे संस्कृत्य 'रयिं' धनं 'च', 'पुत्रान्' 'च' 'मह्यम्', 'अदात्' ददाति। 'अथो' अपि च धनेन च पुत्रैश्च सह मह्य मदात् मह्यं ददाविति॥

"तं वेसराथा वयम्"†। 'तम्' अग्निं यमम्। 'वः'—इति अनर्थकः। अथ वा यजमाना ऋत्विग्भिरुच्यन्ते। 'चराथा' "चरन्त्या" जङ्गमया "पश्वाहुत्या", 'वसत्या' "च" "निवसन्त्या" "औषधाहुत्या" जङ्गमेन स्थावरेण च हविषा "अस्तं न गावो नक्षन्ते"। 'अस्तं' गृहम्, यथा 'गावः' अवश्यं 'नक्षन्ते' आप्नुवन्ति, स्वेनोपकारेण सायंवासाय; तथेम मग्नि मुभयलक्षणेन हविषा वय माप्नुयामः। 'इद्धं' "समिद्धम् भोगैः" सर्वभोगाना मीश्वरं प्रदातार मिति॥

"मित्रः"‡ कस्मात्? स हि "प्रमीतेः त्रायते"। प्रमितिः प्रमरणम्, ततः सर्वलोकं त्रायते वर्षद्वारेण। "संमिन्वानो द्रवति

---

* सोमो ददद् गन्धर्वाय गन्धर्वो ददद्ग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्य मथो इमाम्॥"—इति ऋ० सं० ८, ३, २८, १।

† ऋ० सं० १, ५, १०, ८. वा ५ पूर्वार्द्धे एषः; १०८ पृ० "‡" टीप्पनी द्रष्टव्या।

‡ १ भा० ४७५, ४७९ पृ० ५ ख० ४ ऋ० (११)।

इति वा" सम्नतो मिन्वानः* उदकेन द्रवति अन्तरिक्षलोके। "मेदयतेः वा" स्नेहनार्थस्य†; सर्वं ह्यसावुदकेन स्नेहति॥

"तस्य एषा भवति"—॥ ८ (१७)॥

मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत॥ मित्रो जनानायातयति (प्र‡) ब्रुवाणः शब्दं कुर्वन् मित्र एव धारयति पृथिवीञ्च दिवञ्च मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातं जुहोतिर्दानकर्मा कः कमनो वा क्रमणो वा सुखो वा तस्यैषा भवति॥ ९ (२२)॥

"मित्रो जनान्यातयति"—इति§। विश्वामित्रस्यार्षम्। अवदृष्टहोमे प्रायश्चित्तम्। अग्निहोत्रे पूर्वस्या माहुतौ विनियोगः। "मित्रो जनान्यातयति ब्रुवाणः"। 'आयातयति' कृष्यादिषु प्रवर्त्तयति, तत्कर्मपूर्वकत्वात् कृष्यादिकर्मणाम्; न ह्यवृष्टे कृष्यादीनि आयात्यन्ते। आयातन मारम्भः। तद्यथा—भोजन मायातित

---

* "पिवि मिवि सेचने" भ्वा॰ प॰।

† "ञि मिदा स्नेहने" भ्वा॰ आ॰।

‡ नास्त्येतत् पदम् ख-प्रश्नविषु।

§ ऋ॰ सं॰ ३, ४, ५, १। इह च "मित्रः—सूर्यः"—इति सा॰ भा॰।

मनेनेति। कथ मायातयति प्रब्रुवाणः? स्तनयिन्नु "शब्दं कुर्वन्"। एवं प्रवर्त्तयन् कर्मसु ओषधीरुत्पादयन् वृष्टिद्वारेण। स एव 'मित्रः' 'दाधार' "धारयति" 'पृथिवीम्' पृथिवीलोकनिवासिनः सर्वान्। 'उत' 'द्याम्' धारयति; अमुना प्रकारेण अनुगृह्णन्। सः 'मित्रः' 'कृष्टीः' मनुष्यान् 'अनिमिषाभिचष्टे' "अनिमिषन्नभिविपश्यति" उपकारद्वारेण; यो हि अस्मा उपकरोति, स तेन सम्यग् दृष्टो भवति। योऽय मेव मुपकारप्रवृत्तः कृत्स्नस्य लोकस्य, तस्मै 'मित्राय' 'हव्यम्' 'घृतवत्' घृतोन्मिश्रम् * 'जुहोत' जुहुत हे मनुष्याः॥

"कृष्टयः"—इति मनुष्यनाम†। तत् कस्मात्? नित्यं हि ते कर्मवन्तो भवन्ति; आरम्भशीलत्वात्। "विकृष्टदेहाः वा" संसृष्टदेहाः अन्ये पशवः, गवादयः; ते हि न कामकारतोऽङ्गानि प्रसारयितुं शक्नुवन्ति स तेषां संकर्षः; मनुष्यास्तु कामतः प्रसारयन्त्यङ्गानि, स तेषां विकर्षो देहस्य‡॥

"कः"—इति§ वक्तव्यम्। स पुनरेष महानात्मा, सर्वात्मा प्राणबुद्धिसत्त्वः। उदाहरिष्यति च "अथैनं महान्त मात्मानम्"

---

* उपस्तरणाभिघारणयुक्त मित्यर्थः।

† १ भा० १७९, १७८ पृ० १ ख० २ ख० (७)।

‡ "कर्षन्ति प्राणं पद्भ्याम्"—इति माधवः। "कर्षन्ति वशीकुर्वन्ति"—इति भट्टभास्करमिश्रः। वस्तुतो जन्तुषु मनुष्या एव भूमिकर्षणेन जीवन्ति, अतस्ते कृष्टय इत्युच्यन्ते—इत्यस्माकम्।

§ १ भा० ४७५, ४७६ पृ० ५ ख० ४ ख० (१४)।

—इत्यधिकृत्य*—"क ईषते तुज्यते (ऋ० सं० १, ६, ८, २)" इति†। स कथं मध्यमो भवति? भवति हि तस्मिन् सूक्ते "आपो ह यद् बृहतीर्विश्व मायन् गर्भं दधानाः"—इति‡। विज्ञायते च "प्रजापतिर्वै कः"—इति§; प्रजापतिश्च मध्यमः||। तथा च मन्त्रवर्णो भवति राज्ञोऽभिषेक मधिकृत्याश्वमेधे—"प्रजापतिश्चरति गर्भे अन्तः"—इति¶ सप्तानां प्रथमा, तयोपविष्टादभिषेकस्य जुहुयादिति। तस्माद् भवति मध्यमः॥

स कस्मात् कः? "कमनः वा" कामिनां काम्येष्वर्थेषु साधनम्**। "क्रमणो वा" क्रमणसाधनम्; स्वय मेव वा क्रामति। "सुखः वा" काम मेव वा; कः सुख इत्यर्थः††॥

"तस्य एषा भवति"——॥ ९ (२२)॥

---

* प० १२ ख० २ पा० १ ख० पुनरपि तत्रैव ११ ख० द्र०।

† प० १२ ख० ३ पा० ७ ख० द्र०। तत्सायणभाष्ये तु क इति सर्व्वनामपद मित्येव मुख्योऽर्थः।

‡ ऋ० सं० ८, ७, ४, १; हैरण्यगर्भसूक्ते चैषा सप्तमी; उत्तरखण्डे एव च दर्शयिष्यति तत्सूक्त-प्रथमा ऋच मिहैव (११५पृ०)।

§ "प्रजापतिर्वै कः। प्रजापतिः प्रजनयिष्यतीत्येव तदाह"—इति ऐ० ब्रा० २, ५, ६। "को नाम प्रजापतिरभवत् (ऐ० ब्रा० ३, १, ९)"—इत्यादिकं च ब्राह्मण मत्रानुसन्धेयम्।

|| य० वा० सं० ११, १९. इत उत्तरस्य मन्त्रस्य व्याख्यानारम्भे "यः प्रजापतिरादित्यरूपः"—इति च महीधरः।

¶ दर्शयिष्यतीहैवोपरिष्टात्—"प्रजापतिः प्रजानां पाता"—इत्यादि ४ पा० ५, ६ ख०।

** "स्वस्यार्थं कामयत इति कः"—इति ऋ० सं० ८, ७, ३, १. सा० भा०।

†† "कं सुखम्, तद्रूपत्वात् क इत्युच्यते"—इति च ऋ० सं०८,७,३,१. सा० भा०।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ हिरण्यगर्भो हिरण्मयो गर्भो-ऽस्येति वा गर्भो गृभेर्गृणात्यर्थे गिरत्यनर्थानिति वा यदा हि स्त्री गुणान् गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति स समभवदग्रे भूतस्य जातः पतिरेको बभूव स धारयति पृथिवीञ्च दिवञ्च कस्मै देवाय हविषा विधेमेति व्याख्यातं विधतिर्दानकर्मा सरस्वान् व्याख्या-तस्तस्यैषा भवति॥ १० (२३)॥

"हिरण्यगर्भः"—इति *। हिरण्यगर्भस्यैवार्षम् †। सर्वात्मकत्वा-त्तदार्षत्वेऽपि मन्त्रस्य प्रथमपुरुषयोगो अविप्रतिषिद्धः; अथ वा परस्य ब्रह्मणो या हिरण्यगर्भावस्था प्रतिकल्प माविर्भाव तिरोभाव-धर्मिणी बुद्धिपूर्विका नित्या, तस्यां च नित्यो मन्त्रो विवक्षिताभि-धानाभिधायक आश्रयमात्रेणाभिधातार मुपादाय प्रवर्त्तमानोऽनु-वक्तीत्यविवक्षितः पुरुषयोगः; इतरत्वे हि नियमत एवोत्तम-पुरुषयोगो मन्त्रस्याभविष्यत्। 'भूतस्य' अस्य उत्पन्नस्य स्थावर-जङ्ग-

---

* ऋ० सं० ८, ७, ३ व०, १; १०, १०, ६ सू० १।

† "प्रजापतिपुत्रस्य हिरण्यगर्भस्यार्षम्, त्रिष्टुभम्"—इति सा० भा०। "हिरण्य-गर्भः समवर्त्तताग्रे इति षट् प्राजापत्याः"—इति षा० सू० ३, ८।

मस्य जगतो "हिरण्यगर्भः" * एव 'अग्रे' 'समवर्त्तत' समभवत् उदपद्यत। त मुत्पन्न मन्विदं सर्वं मुत्पेदे स च पुनरग्रे जातः सन् तस्य पश्चाद्भूतस्य 'एकः' असपत्नः अद्वितीयः 'पतिः' पाता रक्षिता ईश्वरः स्वतन्त्रः 'आसीत्'। कथम्? इति, 'स दाधार' यतः पतिः, अतः स एव दाधार, स एव धारयति; अद्यत्वेऽपि। किम्? इति "पृथिवीम् उत द्याम्"। 'पृथिवीम्' अन्तरिक्षम्, अपि च 'द्यां' द्युलोकम्। अपि च 'इमां' भूमिम्, अन्तर मनुप्रविष्टो वहिश्च वर्षाद्युपकारेण। योऽय मेवं भाव अतिमहानुभावः कः, तस्मात् अस्मै 'कस्मै' काय † 'देवाय' 'हविषा विधेम' हविर्दद्मः। अथ वा अनेन चरुलक्षणेन आज्यलक्षणेन वा 'हविषा' तं वयं परिचरेम॥

"विधतिर्दानकर्मा"—इति। तस्माद्धविःशब्दगतिरेव ज्यायसी। शतकृष्णलस्य पुरोऽनुवाक्या, आघारस्य प्राजापत्ये पश्वावनेन मन्त्रेण।

। अथ "हिरण्यगर्भः" कस्मात्? स हि "हिरण्मयः" विज्ञानमयः "गर्भः"; सर्वभूतानां तच्छतत्वादन्तःप्रकाशस्य। हिरण्मयश्चासौ गर्भश्चेति समानाधिकरणः। "हिरण्मयः गर्भः अस्य इति वा" शरीरेन्द्रियमनोबुद्धिभावेनैत मपेक्ष्य परमात्मानं च विज्ञानप्रकाशमात्रसतत्वं सर्वविशेषहारित्वाद्धिरण्यगर्भ मपेक्ष्य [illegible]-

* "हिरण्यगर्भो हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः। श्रूयते च तैत्तिरीयकम्। "प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय"—इति। यद्वा हिरण्मयोऽण्डो यस्योदरे वर्त्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते।"—इति सा० भा०।

† "यदासौ किं शब्दः, तदा सर्वनामत्वात् स्मै-भावः सिद्धः; यदा तु यौगिकः, तदा व्यत्ययेनेति द्रष्टव्यम्"—सा० भा०।

कृतित्वस्य चेतनस्यापेक्ष्य योऽस्य हिरण्मयो हिरण्यप्रकृतिगर्भ इति हिरण्यगर्भः। । अथ "गर्भः" कस्मात्? "गृभेः" धातोः गृणात्यर्थे वर्त्तमानस्य; सर्वस्य स्तुत्यो हि गर्भः। "गिरत्यनर्थान् इति वा" सर्वाननर्थानसौ गिरति नाशयति। । अथ पुनः स्त्रीगर्भः कस्मात्? इत्यत आह—"यदा हि स्त्री गुणान् गृह्णाति, गुणाश्चास्या गृह्यन्ते, अथ गर्भो भवति"। स्त्र्यवयवः स्त्री = रक्तम्, तद् यदा असौ पुरुषात् शुक्रावस्थान् गुणान् गृह्णाति आत्मानं सम्पृणक्ति अस्थि-स्नायु-मज्जानः; गुणाश्चास्याः रक्तावस्था, त्वङ्-मांस-शोणितानि पौरुषेण शुक्रेण गृह्यन्ते। तथैव मितरेतरकोशग्रहणव्यतिषङ्गे रक्त-शुक्रयोः स्त्रीगर्भो भवति*। अथ वा यदा हि स्त्री गुणान् गृह्णाति पुरुषस्य प्रेम्णा, गुणाश्चास्याः प्रेम्णा पुरुषेण गृह्यन्ते, तदितरेतरानुरागात् प्रमोदः, प्रमुदितयोः सम्पर्काद् गर्भग्रहणञ्च। तदेवं गर्भग्रहणहेतुकोऽय मिति यद्गर्भः॥

"सरस्वान्"†, "व्याख्यातः" सरस्वत्या; केवलं लिङ्गकृतो विशेषः‡॥

"तस्य एषा भवति"—॥१० (२३)॥

---

* वक्ष्यति ह्युपरिष्टात्—"शुक्रातिरेके पुमान् भवति, शोणितातिरेके स्त्री भवति, द्वाभ्यां समेन नपुंसको भवति, शुक्रभिन्नेन यमौ भवति; शुक्रशोणितसंयोगान्मातृ-पितृसंयोगाच्च"—इत्येतत्प्रभृति १४ अ० २ पा० ६ ख०।

† १भा० ४७५, ४७९ पृ० ५अ० ४ख० (१५)।

‡ "सरस्वती, सर इत्युदकनाम; तद्वती"—इति २भा० २६, ४१पृ०।

ये ते॑ सरस्व ऊ॒र्मयो॒ मधु॑मन्तो घृत॒श्चुत॑ः। तेभि॑र्नोऽवि॒ता भ॑व॥ इति सा निगदव्याख्याता॥ ११ (२४)॥

॥ इति दशमाध्यायस्य द्वितीयः पादः॥ १०. २.

"ये ते सरस्व"—इति*। वसिष्ठस्यार्षम्। सारस्वते हविषि विनियोगः। हे भगवन्! 'सरस्वन्!' 'ये' 'ते' तव 'ऊर्मयः' येऽर्णांसि, नभो मेघैश्छादयसि, 'मधुमन्तः' उदकवन्तः, 'घृतश्चुतः' घृतवन्तः उदकप्रस्रवाः; 'तेभिः' तैः त्वम् अस्माकम् 'अविता' तर्पयिता 'भव'।—इत्येतदाशास्महे॥ ११ (२४)॥

॥ इति ऋज्वर्थायां निरुक्तवृत्तौ पञ्चदशस्य (दशमस्य) अध्यायस्य द्वितीयः पादः॥ १०। २॥

॥ तृतीयः पादः॥

विश्वकर्मा सर्वस्य कर्त्ता तस्यैषा भवति॥ १ (२५)॥

"विश्वकर्मा"† वक्तव्यः। स कस्मात्? "सर्वस्य कर्त्ता" यावदिदं किञ्चिद् भूतं भविष्यमाणं क्रियमाणञ्च तस्य‡ सर्वस्य कर्त्ता; वाय्वा-

---

* ऋ० सं० ५, ६, २०, ५। ऋक्संहितायां सप्तममण्डले षष्ठेऽनुवाके सप्तमसूक्ते षट् ऋचो दृश्यन्ते; तत्र आद्यतृचः सरस्वतीदेवताकोऽन्यस्तु सरस्वद्देवताकः; तत्रेयं द्वितीया।

† १भा० ४७५, ४७६ पृ० ५ख० ४स० (१९)।

‡ "यावदिदं किञ्चिद् भूतं करिष्यमाणञ्च तस्य"—इति क, ख।

त्मकत्वात् सर्वचेष्टानां मध्यमः *। स कथं सर्वं करोति? पार्थिवाप्यौ धातू तेजसा परिपच्यमानौ वायुव्यूहेन विचरन् सर्वभावानुप्रवेशी सर्व मिद मत्यद्भुत मचिन्त्य मकृतात्मभिर्जगत् करोतीति स मध्यमः; विश्वकरणाद् विश्वकर्मा। विज्ञायते हि वैश्वकर्मणं हविरधिकृत्य साकमेधेषु—"अथैष वैश्वकर्मणो विश्वानि मे कर्माणि कृतान्यासन्निति विश्वकर्मा हि सोऽभवत्"—इति †। भवति चोदकसम्बद्ध मस्य मध्यमलिङ्गं विश्वकर्माण मधिकृत्य वैश्वकर्मणे सूक्ते;—"त मिद् गर्भं प्रथमं दध्र आपः"—इति ‡। विषुवति § च वैश्वकर्मणं ग्रह मधिकृत्य विज्ञायते हि—"इन्द्रो वै वृत्र महन्स इमं लोक मभ्यजयदसुं तु लोकं नाभ्यजयत् तं विश्वकर्मा भूत्वाभ्यजयत्"—इति। तस्यैव ग्रहस्य पुरोरुच मधिकृत्य विज्ञायते हि—"यदैन्द्रीं वैश्वकर्मणीं विद्यात्, तयैव गृह्णीयात्"—इति। स एष एवमादिभ्यो लक्षणेभ्यः सर्वस्थानानुभावित्वेऽपि सति विशेषतो मध्यम इति मध्यमस्थाने समाम्नातः॥

"तस्य एषा भवति"—॥ १ (२५) ॥

---

* "प्रजापतिर्विश्वकर्मा"—इति च य० वा० सं० १२, ६१। "विश्वं सृष्टिरूपं कर्म यस्यासौ विश्वकर्मा"—इति च तत्र महीधरव्याख्यानम्। "प्रजापतिर्वायुरादित्यः पर्जन्यो वा"—इत्यादि मी० द० ६अ० ग्र० भा०।

† "इन्द्रो वे वृत्रं हत्वा विश्वकर्माभवत् प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माभवत्" —इत्यादि च ऐ० ब्रा० ४, २, ८।

‡ ऋ० सं० ८, ३, १७, ६। अनया पूर्वमन्त्रोक्तस्य प्रश्नस्योत्तर मभिधीयते"—इत्यादि च तत्र सा० भा० द्र०।

§ विषुवान् नाम संवत्सरसाध्यस्य गवामयनादिसत्त्रस्य मध्यमाहः। ता० ब्रा० ४प्र० १ख० इत्यादि द्र०। अतएव "यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणोऽर्द्ध एवं पूर्वोऽर्द्धो विषुवतो यथोत्तरोऽर्द्ध एव मुत्तरोऽर्द्धो विषुवतस्तस्मादुत्तर इत्याचक्षते" —इत्यादि ऐ० ब्रा० ४, २, ८।

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक्। तेषा मिष्टानि स मिषा मदन्ति यत्रा सप्तऋषीन् पर एक माहुः ॥ विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्द्रष्टा भूतानां तेषा मिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वाद्भिः सह सम्मोदन्ते यत्रैतानि सप्तऋषीणानि * ज्योतींषि तेभ्यः पर आदित्यस्तान्येतस्मिन्नेकं भवन्तीत्यधिदैवत मथाध्यात्मं विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च सन्दर्शयितेन्द्रियाणा मेषा मिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वान्नेन सह सम्मोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः † पर आत्मा तान्येतस्मिन्नेकं भवन्तीत्यात्मगति माचष्टे तत्रेतिहास माचक्षते विश्वकर्मा भौवनः सर्वमेधे सर्वाणि भूतानि जुहवाञ्चकार स आत्मान मप्यन्ततो जुहवाञ्चकार तदभिवादिन्येषर्ग् भवति। य इमा विश्वा भुवनानि जुह्वदिति तस्योत्तरा भूयसे निर्वचनाय ॥ ॥ २ (२६) ॥

* "सप्तर्षीणामि" क, ख, ग।

† "सप्तर्षीणानीन्द्रियाण्येभ्यः" क, ख, ग।

विश्वकर्मा विमना"—इति *। भौवनस्य विश्वकर्मणः प्रजापतेरार्षम्। अग्नौ वैश्वकर्मणाभ्यां सूक्ताभ्यां षोड़श-गृहीतं हूयते †, तत्र विनियोगः। 'विश्वकर्मा', 'विमनाः' "विभूतमनाः" विभूतप्रज्ञानः, सर्वत्राप्रतिहत मस्य प्रज्ञानम्। किं प्रज्ञान मेव केवलम्? न—इति, उच्यते—'आद्विहायाः' अप्यसावात्मनाविहायाः, आत्मनापि सर्वप्रकारं महान्, महत्त्वाच्च "व्याप्ता"। एवं सर्वप्रकारं सर्वस्य जगतः यत एव महान्, अतएव 'धाता' उत्पादयिता, सर्वभूतानाम्, उत्पाद्य च 'विधाता' जीवनस्य, जीवताच्च साध्वसाधुषु कर्मसु प्रवर्त्तमानानां 'परमोतसन्दृक्' परमः प्रकृष्टः अवधानेन "संद्रष्टा"; सम्यक् प्रविभागेन द्रष्टा। साध्वसाधुप्रविभागदृष्टानां 'तेषाम्' च भूतानां यानियानि 'इष्टानि' प्रियाणि, तस्य विश्वकर्मणो दैवीं सम्पद मभिसम्पन्नानि। कान्त्यर्थो वा इषिः। यान्यभीप्सितानि तस्य विश्वकर्मणः। "मतानि वा" अभिमतानि वा। तस्य विश्वकर्मणो "नतानि वा" प्रह्वीभूतानि; तं विश्वकर्माणं प्रति तत्परिज्ञानश्रद्धोपासनाभावनाप्रचयितदुरितानि, तेन सह एकीभूतानि विश्वकर्मणा, आधिदैविक मात्मान मभिसम्पन्नानि। "स मिषा मदन्ति" 'इषा' उदकेन "अद्भिः" परियुताभिः सुसूक्ष्माभिः "सह" तेन कर्मणा समानम् अविशेषेण मोदन्ते। क्व? "यत्रा सप्तऋषीन् पर एक माहुः"। "यत्र एतानि सप्तर्षीणानि" रसाना

---

* ऋ० सं० ८, ३, १७, १। "अयं मन्त्रोऽधियज्ञाध्यात्मयोर्भेदेन द्विधा व्याख्येयः" —इति चात्र सा० भा०।

† "षोड़शगृहीताज्जे मनुवाकशेषेण"—इति का० सू० १८, ३, १२।

माकर्षणानि, द्रष्टॄणि वा (रश्मीन्*,) "ज्योतींषि" 'एकं' भवन्ति, अविभाग मुपगच्छन्ति; मण्डले ह्येतेषा मविभागः। किं तत्रैव? न—इति, उच्यते—"यत्र पर एक माङ्गः"। क्व च पुनः पर एक माङ्गः? मण्डलाधिष्ठातरि। योऽसौ यज्ञदानतपसां भोक्ता, हिरण्यश्मश्रुः, हिरण्यकेशः; आ प्रणखात् सर्व एव सुवर्ण इति विज्ञायते 'एकम्' एत्र य माङ्गर्दैवतासतत्त्वविदः।—"इत्यधिदैवतम्" देवता मधिकृत्य मन्त्रस्य व्याख्यान मधिदैवतम् †॥

"अथाध्यात्मम्" आत्मान मधिकृत्य विश्वकर्मणो व्याख्यानम् अध्यात्मम्। कः पुनरय मात्मा? विज्ञानसतत्त्वमात्रं सर्वविशेष-विज्ञानप्रसवबीजम्; यदेकदेशाः प्रच्युता इव सन्तस्ततः कथ मप्यविद्याव्यवधानादन्यत्व मिव बिभ्रतः प्रतिशरीरं शास्त्रेण तावज्ज्ञाप्यं यावच्छिद्यते, सोऽय मात्मा प्रतिशरीरं क्षेत्रज्ञत्वेन स्वविशेषेण विज्ञानशक्त्याधिकार मनुभवन् हिरण्यगर्भावस्था मधिदैव मित्युच्यते। अथ पुनरन्यः शरीरावस्थासु वर्त्तमानः तदधिदैवत मनपेक्ष्य प्रतिशरीरं क्षेत्रज्ञत्वेन यद्विश्वकर्मभाव मनुभवन् मन्त्रेण व्याख्यायते, तदध्यात्म मस्य ‡॥

---

* नास्त्येतत् पदम् क-ख-पुस्तकयोः।

† ऋ॰ वा॰ सं॰ १०, ८१.। अत्रैव १०—८१. षोडशानां मन्त्राणां मस्नीधरकृतं व्याख्यानञ्च द्रष्टव्यम्।

‡ वक्ष्यति चैवैवोपरिष्टात् "न तं विदाथ य इमा जजान"—इत्यस्या ऋचो व्याख्यायाम् "अविद्वांसः क्षेत्रज्ञ मनु प्रवदन्ति, अथाद्धो विद्वांसः क्षेत्रज्ञोऽनु कल्पते"—इति, "आत्मा शक्नोति स शक्तिभूतो भवति साक्षिमात्रो व्यवतिष्ठतेऽबन्धो ज्ञानकृतः"—इति च। परि॰ १२, १, १०।

'विश्वकर्मा' "सर्वस्य कर्त्ता" परमात्मा, प्रतिशरीरं क्षेत्रज्ञत्वेन वर्त्तमानः ; तत्कर्तृत्वाद् वायोः क्रियापरिस्पन्दस्य। न केवलं सर्वक्रियाशक्तिमान्; किं तर्हि? 'विमनाः' च "विभूतमनाः" सर्वप्रज्ञानः। सर्वतो मुखाभिः विशेषविज्ञानशक्तिभिः 'आद्विहायाः' अपि च विहायाः, महान्; विज्ञायते हि—"स वा एष महानात्मा अन्नादो वसुदानः"—इति। न केवलं महान्; किन्तर्हि? 'धाता' स्रष्टा, स्वशक्तिविशेषस्य। 'विधाता' च तद्योग्यानां विषयाणां विविधविहितानाञ्च। तेषां 'परमः' उत्कृष्टः "इन्द्रियाणां संदर्शयिता", तत्कर्तृत्वाद् विषयविषयिसम्बन्धस्य; इन्द्रियाणाञ्च तदधिष्ठितानां प्रतिविषय मालोकसामर्थ्योपजननात् तस्य विश्वकर्मणः परमात्मनः। 'तेषां' स्वशक्तिविक्षेपात् क्षेत्रज्ञविभूतीनां यानि 'इष्टानि' (पूर्ववत्)* परमात्मज्ञानश्रद्धोपासनाभावनाप्रचयितदुरितानि तानि। 'इषा' "अन्नेन" सह "सम्मोदन्ते" हृष्यन्ति †। क्व? 'यत्रा सप्तऋषीन्' "यत्र इमानि सप्तऋषीणानि इन्द्रियाणि" द्रष्टृणि; इन्द्रियाणि "ज्योतींषि" एक माहुः। क्व? बुद्धौ। तस्या मपि ह्येतेषा मेकत्व मस्तीति। किं तत्रैव? न—इति, उच्यते—"पर एक माहुः"। न यतः परतर मस्ति, तस्मिन् परतरे विश्वकर्मणि यदक्तं शक्तिमात्रं यदुपविष्टं भात् परमात्मा नित्यतृप्तः, तेनान्नेन परमात्मनि तद्विज्ञानोपासनात् ताद्रात्म्य मुपगतास्तेन सहभूता मोदन्ते निरशना-

---

* नास्त्येतत् पदम् क-ख-पुस्तकयोः।

† एतदेवाभिप्रेत्य कठैराम्नायते—"यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनम्"—इत्यादि २, २५।

पिपासः नित्यतृप्ताः*, अतीतशोकमोहजरामृत्यव आत्मविद इत्येव माहुः सततदृशो ब्राह्मणाः†। यथा चानुपक्षीणस्वधाशक्तिनित्यतृप्तं सर्वभावपरं तत्परम्ब्रह्म यदात्मविदः प्रतिपद्यन्ते, तथा पुराणसूक्तेऽपि‡ परमेष्ठिन आर्षम्। मन्त्रो दर्शयति;—"स्वधया तदेकं तस्माद्धान्यं न परः किञ्चनास" इति§॥

एवं सर्वत्र सम्भवो यावद्विषयो मन्त्राणां योज्यः।—इत्युपप्रदर्शनायोभयथा मन्त्रो वर्णितः॥

"इत्यात्मगति माचष्टे"॥ अमुना प्रकारेण वर्ण्यमान एष मन्त्र आत्मगति माचष्टे प्रख्यापयति। यथा चेय मात्मगतिवाचिका ऋक्, "तत्र" एतस्मिन्नर्थे "इतिहास माचक्षते" आत्मविदः¶। इतिवृत्तं परकृत्यर्थवादरूपेण। यः कश्चित् आध्यात्मिक आधिदैविक आधिभौतिको वार्थ आख्यायते दिश्युदितार्थावभासनार्थं स इतिहास इत्युच्यते। स पुनरय मितिहासः सर्वप्रकारो हि नित्य मविवक्षितस्वार्थः, तदर्थप्रतिपत्तॄणा मुपदेशपरत्वात्। "विश्वकर्मा ह भौवनः" यथोदित मिदं वैदिकं कर्म सम्बन्धदर्शनेन यः सर्वं करोति, सर्वात्मकत्वात् सर्वस्य वैश्वकर्मणी मवस्था मात्मन्युन्नीय स यजमानो

* वक्ष्यति चैतत् "द्वासुपर्णा"—इत्यादिका ऋच मेव। परि० १३, ४, २।

† "तथा हि श्रुतयः"—इत्यादि सायणोक्तं चेह द्रष्टव्यम् (ऋ०सं०८, ३, १९, १)।

‡ तच्च सूक्तम्, दशममण्डलस्यैकादशानुवाके प्रथमम्—"नासदासीत्" इत्यादि।

§ ऋ० सं० ८, ७, १७, २। एतत्प्रभृतीनां मन्त्राणां सायणकृतं बृहद् व्याख्यानं सोपपत्तिकं विशेषतो द्रष्टव्य मेव।

|| तृतीयेऽप्युक्त मास्तीत्यात्मगति माचष्ट इति। १भा० ३०२पृ० ६ख०।

¶ इतिहासश्चैषः श० ब्रा० १३, ७, १. द्रष्टव्यम्।

विश्वकर्मा भुवनानां भूताना मात्मनि होता भूतेषु चात्मानम्। तथाहि विज्ञायते—"हन्ताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनि"—इति *। तथा च विदुषो दर्शनकृतः सर्वमेधसम्पत्सर्व-कर्मसु। विज्ञायते ह्यग्निहोत्र मधिकृत्य—"स यत् सायं जुहोत्यग्नि मेव तद्नेन सर्वेणादित्ये जुहोत्यग्नि मेवेदं सर्व मनु सर्वं तद्यथाऽनेन सकृत् सर्वं तेनेष्ट्वा लोकं जयेत, तावद् ह प्रातराहुत्या लोकं जयते, यस्यैते आहुती न बह्वं यावज्जीव माप्नोति, स हि बह्वनि च न बह्वानि, एतयोर्देवतयोरन्यतरा मनु"—इति †। न बह्व मित्यनन्त मुच्यते। तदेवं यस्मिन् कस्मिंश्चिन्मेधे कर्मणि अग्निहोत्रादौ सर्वः सर्वेण सर्वस्मिन् सर्वस्मै सर्वार्थं हुत्वात्मानं सर्व मेवं भवतीति समासार्थः। स एषः सर्वस्य विदुषः सर्वः सर्वहुद् यज्ञः सर्वभावाय सम्पद्यते दर्शनतः। यो ह्येतरः सर्वमेधो निरूढसञ्ज्ञोऽहीनः। तद्यथा—त्रीण्याश्वमेधिकानि, पञ्च पौरुषमेधिकानि, वाजपेयाप्तोर्यामौ चेति, तत्र "स आत्मान मपि अन्ततो जुहवाञ्चकार"—इति। स एतदा-त्महोमस्य विधानान्नोपपद्यते; दर्शनतस्तु सर्व मुपपद्यते ‡। सर्व-भूतानि विशेषान् सामान्यात्मनि जुहाव पश्यन्, सामान्यं चात्मानं विशेषे जुहाव पश्यन्, सर्वकर्मसु स्वय मेवाय मात्मयाजीत्युच्यते।

---

* यदुक्त मितिहास इति, स एवैषः। "ब्रह्मा वै स्वयम्भूस्तपोऽतप्यत। तदैक्षत न वै तपस्यानन्त्य मस्ति,—हन्ताहं०——० चात्मनीति तत् सर्वेषु भूतेष्वात्मानं हुत्वा"—इति श० ब्रा० १३, ७, १।

† ऐ० ब्रा० ५पं० ५ख० १—९ख० द्र०।

‡ "आप्तोर्यामः सप्तम महर्भवति"—इत्युपक्रम्य "सर्वं जुहोति सर्वस्याप्त्यै सर्व-स्यावरुद्धै"—इति श० ब्रा० १३, ७, १, ९. द्र०।

य मधिकृत्य पृष्टं तदाङ्गरात्मयाजी श्रेयान् देवयाजीति। यथा चैतदेव मधिदैवविद् आत्मवित् श्रेयान्॥

य मधिकृत्य "विश्वकर्मा विमना आद्विहाया:"—इतीय मृक् आत्मगत्या निरुक्ता, ("तदभिवादिनी") तस्यैवार्थस्य इतिहासोक्तस्याभिवादिनी आभिमुख्येन वादिनी "एषा ऋक् भवति" यथा—"य इमा विश्वा भुवनानि जुह्वत्"—इति *। अनेकेषां समानप्रयोगदर्शनाधिकारवतां 'योः' नाम कश्चित् किं मित्येवं (न्यसीददेवं†) कर्मण्यङ्गभाव मुपजगाम। कथम्? ऋषित्वेन; 'होता' द्रव्यगुणकर्मदेवताथायात्म्यद्रष्टृत्वेन 'विश्वा भुवनानि जुह्वत्' सर्वभूतान्यमुना सर्वमेधसम्प्रदर्शनप्रक्रमेण जुह्वत् अहावयत्‡। तस्य किम्? इति। 'सः आशिषा' आशीः—प्रार्थना, कामः, प्रयोगदर्शनहेतुः, सर्वं मिदं महं स्या मिति; येन प्रेर्यमाणः सर्वकर्मसु सर्वमेधं सर्वप्राप्त्यै प्रायुङ्क्त। 'द्रविण मिच्छमानः' प्रयोगजनितापूर्वफलं सर्वभाव मिच्छन्। तत् किं नाप? न—इति, उच्यते—आप। कथम्? इति। 'प्रथमच्छत्' प्रथमोऽप्रजत्वात्, प्रजापतिभावेन मुख्यस्य छादयिता। यतः सम्पदे तथा सन् 'अवरान्' पश्चादुत्पन्नान् अस्मदादीन् विशेषान् 'आविवेश' व्याप्तवान् व्याप यस्यैवं प्रयोगफलयोर्व्यक्तिः 'स नः पिता' "जनिता" सोऽस्माकं पिता पाता जनयिता रक्षिता चेत्येवं विजानीमः, अतः ताङ्गात्म मभ्रुवीमहीति §॥

---

* ऋ० सं० ८, ३, १९, १। अस्यार्थद्वयं सायणकृतं द्रष्टव्यम्।

† नैषोंऽशः क-ख-पुस्तकयोः।

‡ "पशुर्वै मेधो यजमानो मेधपतिः"—इत्यादि ऐ० ब्रा० २, १, ९।

§ "प्रजापतिः स्वां वषा मुदखिदत्"—इत्यादिश्रुतयः, द्वादशलक्षणाः शबरभाष्ये चैतद्भावार्थाः सर्वालोच्याः।

यथा चैतदेवं नान्यथेति तथेयम् "उत्तरा ऋक्" "भूयसे" बहुतराय "निर्वचनाय"—॥ २ (२६)॥

विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवी मुत द्याम्। मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु। विश्वकर्मन् हविषा वर्द्धयमानः स्वयं यजस्व पृथिवीञ्च दिवञ्च मुह्यन्त्वन्ये अभितो* जनाः† सपत्ना इहास्माकं मघवा सूरिरस्तु प्रज्ञाता तार्क्ष्यस्त्वष्ट्रा व्याख्यातस्तीर्णे अन्तरिक्षे‡ क्षियति तूर्णमर्थं रक्षत्यश्नोतेर्वा तस्यैषा भवति॥ ३ (२७)॥

"विश्वकर्मन् हविषा"—इति§। प्रयोगावस्थां फलावस्थां च विश्वकर्मणः प्रतीत्योच्यते।—हे 'विश्वकर्मन्' प्रयोगावस्थित! त्व मुच्यसे। अनेन 'हविषा' सर्वमेधद्रव्यसम्पदादियुक्तेन त्वं वर्द्धमानः विश्वकर्मत्व मापद्यमानः तत्फलविपरिणामकाले 'स्वयं यजस्व' स्वयं सङ्गच्छस्व व्याप्नुहि। ('पृथिवीम् उत द्याम्') "पृथिवीं च दिवं च" सर्वव्यापी

---

* "मुह्यन्त्वन्येऽभितो" क, ख, ग।

† "जनासः" क, ख, ग।

‡ "॰स्तीर्णेऽन्तरिक्षे" क, ख, ग।

§ ऋ॰ सं॰ ८, ३, १९, ६; य॰ वा॰ सं॰ १७, २२। साकमेधेषु वैश्वकर्मणपशौ वपापुरोडाशयोः एषा उत्तरा च क्रमेण अनुवाक्ये। आ॰ श्रौ॰ ३, ८. इ॰।

१ २　२ १ २　२ २ ३१ २　२ २　१　१र　१ २ ३ २
"विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तन्वां३ स्वा हि ते। मुह्यन्त्वन्ये
२ २ ३ १ २　३ १　२र ३ १ २ ३ १ २
अभितो जनास इहास्माकं मघवा सूरिरस्तु॥"—इति सा॰सं॰उ॰आ॰७, ३,९, १।

भव। अपि च तत्रैतस्मिन् दर्शनकृते महिम्नि "मुह्यन्त्वन्ये अभितो जनासः" मोह मुपगच्छन्तु 'अभितः' सर्वतः ते "जनाः" ये त्वदुपासनापराङ्मुखाः सन्तः तव "सपत्नाः" समानं पतित्व मिच्छन्ति। अथ पुनः 'इह' त्वद्दर्शनोपासनाकर्मणि वर्त्तमानानाम् 'अस्माकम्' 'मघवा' सर्वधनेशानः, 'सूरिः' मेधावी, सर्वत्राप्रतिहतप्रज्ञानः, "प्रज्ञाता" विशेषतोऽस्माकम् 'अस्तु'।—इत्येतदाशास्महे॥

त्वष्टा, विश्वकर्मा,—इत्यधिभूतप्रधानाः पुराणविदः*, तथापि कलाकौशलादिसर्वज्ञानहेतुको नामप्रतिलम्भ इत्यविप्रतिषिद्धम्। एवं सर्वासु देवतासु॥

"तार्क्ष्यः"—इति† वक्तव्यम्। स पुनरेष "त्वष्टा व्याख्यातः"‡। तद्यथा—"तूर्ण मश्नुते"—इत्येवमादि; अथवा "तीर्णे अन्तरिक्षे" सर्वतो गते "क्षियति" निवसति। अथ वा "तूर्णम्" उदकाख्यं "रक्षत्यश्नुते वा" अर्थविकल्पेन तूर्णशब्दात् पूर्वपदम्, रक्षतेरश्नोतेर्वोत्तरपदम्§॥

"तस्य एषा भवति"—॥ ३ (२७)॥

---

* विश्वकर्माकैसुरशिल्पिनोः"—इत्यमरः ३, ३, १०८। "विश्वकर्मा प्रभासस्य पुत्रः शिल्पप्रजापतिः। प्रासादभवनोद्यानप्रतिमाभूषणादिषु। तडागारामकूपेषु स्मृतः सोऽमरवर्द्धकिः।"—इति मात्स्ये ५ अध्यायः। गारुडे च ६अ०। विष्णु पु० १, १५। "द्वौ प्रोक्तौ विश्वकर्माणौ मयस्त्वष्टा च योगवित्। द्वौ धाता च विधाता च पौराणौ जगतः पती"—इति वह्निपुराणे गणभेदो नामाध्यायः। शूद्रागर्भे विश्वकर्मणः औरसेन जातः सूत्रधरः सूत्रधारो वा इत्याह ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०अ०।

† १भा० ४७५, ४८० पृ० ५अ० ४ख० (१७)।

‡ २भा० ४७९—४८१पृ० ८अ० २पा० १०, ११ख०। परस्ताच द्रक्ष्यति—इहैव पादे नवमखण्डे तथा द्वादशैकादशखण्डे चेति।

§ १भा० १४९पृ० १अ० १४ख० (१४) च द्रष्टव्यम्।

त्य मू षु वाजिनन्देवजूतं सहावानन्तरुतारं रथानाम्। अरिष्टनेमिं पृतनाजं माशुं स्वस्तयं तार्क्ष्यं मिहा हुवेम। तं भृश मन्नवन्तं जूतिर्गतिः प्रीतिर्वा देवजूतं (देवगतं *) देवप्रीतं वा सहस्वन्तं तारयितारं रथाना मरिष्टनेमिं पृतनाजित माशुं स्वस्तये तार्क्ष्यं मिह ह्वये- मेति क मन्यं मध्यमादेव मवक्ष्यत्तस्यैषापरा भवति ॥ ४ (२८) ॥

"त्यमुषु वाजिनम्"—इति† । अरिष्टनेमेरार्षम्। विषुवति निष्के- वल्ये शस्यते ; "सुधस्थित्"—इति च (१३० १०)। यः 'तार्क्ष्यः' 'वाजी' वेजनवान्, भयदाता परेभ्यः ; बलवान् वा। 'त्यं' तं 'देवजूतं' देवैर्गतम्, परत्वेन ज्ञातं वा परोऽय मस्माक मिति। "देवप्रीतम्" देवैर्वा समान- प्रीतम्। 'सहावानम्' सहो बलम्, तेन तद्वन्तम्; एतदेव मध्यम- लिङ्गम्। 'तरुतारम्' "तारयितारम्" ('रथानाम्') रंहित्वणां भूता- नाम्, गतिमतां गमयितार मित्यर्थः; बलहेतुकत्वाद् गमनस्य। एव- मादिगुणयुक्तम् 'अरिष्टनेमिम्' केनचिदप्यप्रतिहतवज्रप्रहरणम्। नेमि- रिति वज्रनाम। ('पृतनाजम्') पृतनानां जेतारम्। 'आशुम्' शीघ्रम्। 'स्वस्तये' आत्मनः स्वस्त्ययनाय। सुष्ठु वयम् ('इह') एत- स्मिन् कर्मणि ('हुवेम') आह्वयामहे ॥

"तस्य एषा अपरा भवति" । सा पुनः किमर्थम् ? बलकृतिरूप-

* नास्त्येतत् पदम् क-ग-पुस्तकयोः।

† ऋ० सं० ८, ८, २९, १ ; सा० सं० उ० आ० ४, १, ५, १।

प्रदर्शिता, वर्षकर्मापप्रदर्श्यतेऽनया ; तस्या मपि हि बलकृतौ पक्षि-राजे गरुत्मनि सन्देहोऽसावपि बलवांश्च तार्क्ष्यनामा च*, वर्षकर्म त्वसमानं तेनास्य। अतस्तोक मेतदेव विचारास्पद मपेक्ष्य "कम् अन्यम् मध्यमात् एवम् अवक्ष्यत्"—इति ॥ ४ (२८) ॥

सद्यश्चित्यः शवसा पञ्च कृष्टीः सूर्यं इव ज्योतिषापस्ततान। सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम् ॥ सद्योऽपि यः शवसा बलेन तनोत्यपः सूर्य इव ज्योतिषा पञ्च मनुष्यजातानि सहस्रसानिनी शत-सानिन्यस्य सा गतिर्न स्मैनां वारयन्ति प्रयुवती मिव शरमयी मिषुं मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो (वधकर्मणो †) वा मन्युं त्वस्मा ‡ दिषवस्तस्यैषा भवति ॥ ५ (२९) ॥

"सद्यश्चित्यः शवसा पञ्चकृष्टीः"—इति§। "सद्योऽपि" 'यः' तार्क्ष्यः, "बलेन तनोति अपः" वर्षभावेन। 'सद्यः'-शब्दो सद्य-

---

* "तुरङ्गगरुडौ तार्क्ष्यौ"—इति अम० को० ३, ३, १४५। "तृक्षस्यापत्यं तार्क्ष्यः, गर्गादित्वात्"—इति च तत्र क्षीरस्वामी।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

‡ "मन्युं तस्मा" ख ; "मन्युं त्वस्मा" च।

§ ऋ० सं० ८, ८, ११, ३। इय मपि च तार्क्ष्यं चत्वारिंशमेवेव नैष्टुभम्, तार्क्ष्य-दैवताकञ्च। ऋग्वेदेषु द्वितीयादिष्वष्टसु निरुक्तोक्तसूक्तानां यदादिमं सूक्तम्, तत्र चैषा तृतीया।

णार्थः;— अद्य, श्वः, परश्वः, परुत्, परारि चेति*। 'चित्'—इति अप्यर्थे; न कदाचिदप्यन्यः; सर्वदा तार्क्ष्य एवेति। किं प्रति अपः तनोति? 'पञ्चकृष्टीः' पञ्च मनुष्यजातानि प्रति, ब्राह्मणप्रमुखान् निषादपञ्चमान् वर्णान् प्रति†; तदनुग्रहपूर्वकत्वात् सर्वलोकानुग्रहस्य; वृष्टिग्रहणेन तद्विवचा। कथम्? 'सूर्यः इव ज्योतिषा' यथा सूर्यो ज्योतिःप्रकाशं लोकानुग्रहाय तनोति, तथा तार्क्ष्यः अपः तनोति। यथा हविषा विधेमेति गम्यते, तत्र कस्मै देवायेति सम्प्रदानश्रुतेः सम्प्रदानावैधुर्याय; एव मिहाप्युपमानोपमेयकारकसम्बन्धावैधुर्याय ज्योतिरिति गम्यते। कस्मात् पुनरयं मपस्तनान? इति। इतः— यस्मात् "सहस्रसाः शतसा अस्य रंहिः" बहूंश्च बहुतरांश्च प्रकारान् मेघविदारणाय भजते 'अस्य' तार्क्ष्यस्य 'रंहिः' गतिः। अपि चैव मसह्यास्य गतिः, तस्माद् वरं तेनैव "एताम्" अस्य "वारयन्ति", न प्रतिवद्धुं शक्नुवन्ति के चन; अति वेगवत्त्वात्। कथम्? 'युवतिं न शर्याम्' अतिबलवता धनुष्मता मुक्तां "शरमयीम् इषुम्" अन्येन वान्येन वाकाशप्रदेशेन प्रतिमिश्रयन्ती मात्मानम्‡। स एवमादिगुणयुक्तः तार्क्ष्यः, स इदं नामास्माकं करोत्विति॥

"मन्युः"§, "मन्यतेः" क्रोधार्थस्य, दीप्त्यर्थस्य, वा; उभय मप्युपपद्यते; बलवत्वात् मध्यमस्य‖॥

* "सद्यः=शीघ्रम्"—इति सा० भा०।

† पुरस्तात् "पञ्चजनाः"—इत्यस्य व्याख्यानं द्रष्टव्यम्। २भा० २७८पृ०।

‡ "शर्या शरकाण्डमयी मिषु" धनुषो मुक्ता 'युवतिं न' खण्डेण मिश्रीभवन्ती मिव"—इति सा० भा०।

§ १भा० ४७५, ४८०पृ० ५अ० ४ख० (१८)। तत्रैव २१५ पृ० च द्रष्टव्यम्।

‖ "बलवान् मध्यमश्च"—इति ग।

"तस्य एषा भवति"— ॥ ५ (२९) ॥

त्वया मन्यो सरथं मारुजन्तो हर्षमाणासोऽधृषिता मरुत्वः। तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ॥ त्वया मन्यो सरथ मारुह्य रुजन्तो हर्षमाणासोऽधृषिता मरुत्वस्तिग्मेषव आयुधानि संशिश्यमाना अभिप्रयन्तु नरो अग्निरूपा अग्निकर्माणः सन्नद्धाः कवचिन इति वा दधिक्रा व्याख्यातस्तस्यैषा भवति ॥ ६ (३०) ॥

"त्वया मन्यो"—इति*। तपसः पुत्रो मन्युर्नाम, तस्यार्षम्। श्येनाजिरादिषु निष्केवल्ये विनियोगः। हे भगवन्! 'मन्यो!' त्वया 'सरथम्' एक मेव त्वया सह रथं समारुह्य 'रुजन्तः' अभिभवन्तः†, 'हर्षमाणासः' तवाश्रयादविकलाः हृष्यन्तः, 'अधृषिताः' अनाधर्षिताः परैः, अपि च हे 'मरुत्वः!' तिग्मेषवः! एते अस्मद्योधाः ('आयुधा') "आयुधानि" ('संशिशानाः') संशिश्यमानाः; तीक्ष्णना मिषूणा मायुधानाञ्च योऽर्थः त मनुतिष्ठन्तः, भिन्दन्तः इषुभिः, छिन्दन्तः आयुधैः, अमुना प्रकारेण एते ('नरः') नराः अस्मन्मनुष्याः योधाः, अग्निरूपाः "अग्निकर्माणः" अग्नय इवैते सेनाम् 'अभि' भवन्तो 'यन्तु' इति ॥

---

* ऋ० सं० ८, २, १९, १। अथ० सं० ४, ३१ १।

† "परान् रुजन्तः" क, ख।

'दधिक्राः"—इति* वक्तव्यम्। स "व्याख्यातः"—"दधत् क्रामति" इत्येवमादि†। सर्वं मध्यमे योज्यम्।

"तस्य एषा भवति"—॥ ६ (३०)॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि॥ आतनोति दधिक्राः (शवसा‡) बलेनापः सूर्य इव ज्योतिषा पञ्च मनुष्यजातानि सहस्रसाः शतसा वाजी वेजनवानर्वेरणवान्सम्पृणक्तु नो मधुनोदकेन वचनानीमानीति मधु धमतेर्विपरीतस्य सविता सर्वस्य प्रसविता तस्यैषा भवति॥ ७ (३१)॥

"आ दधिक्राः शवसा"—इति§। वामदेवस्यार्षम्। ('आततान') "आतनोति" सर्वतस्तनोति। कोऽसौ? इति, 'दधिक्राः'। केन? 'शवसा' "बलेन"। किमातनोति? 'अपः'। क? 'पञ्च कृष्टीः' "पञ्च मनुष्यजातानि" प्रति। कथम्? 'सूर्यः इव ज्योतिषा' 'सहस्रसाः शतसाः' बहूनां बहुतराणाञ्च उदकानां सम्भक्ता, 'वाजी' "वेजनवान्" 'अर्वा' "ईरणवान्" उदकेरणक्रियायोगी। य एवमादिगुणयुक्तो दधिक्राः, सोऽस्माकम् ('इमा') "इमानि" स्तुतिवाक्यानि स्तुतिलक्षणानि 'वचांसि' 'सम्पृणक्तु' ('मध्वा') "मधुना, उदकेन"॥

---

* १भा० ४७५, ४८० पृ० ५ख० ४ख (१९)। तत्रैव १४९ पृ० च द्र०।

† १भा २४९ पृ० २अ० ७पा० ५ख० द्रपं०।

‡ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

§ ऋ० सं० ३, ७, १२, ५। अश्वरूपस्यैवाग्नेर्दधिक्राव्णेत्याह सायणः; एतत्पूर्ववर्गस्य द्वितीयाया ऋचो व्याख्यानं तदीयं द्रष्टव्यम्।

"मधु"—"धमतेः" आद्यन्त-"वीपरीतस्य", उदकं स्तुत्यनन्तर मेव ददात्वित्यर्थः* ॥

बलकृतिः, वर्षकर्म चोभय मप्यस्ति, तस्मात् मध्यमः॥

"सविता"—इति† वक्तव्यम्। स "व्याख्यातः" "इम मेवाग्निं सवितार माह"—इत्यत्र‡। स पुनरिह वर्षकर्मयोगात् मध्यमः§ ॥

"तस्य एषा भवति"—॥७(३१)॥

सविता यन्त्रैः पृथिवी मरम्णादस्कम्भने सविता द्या मदृंहत्। अश्व मिवाधुक्षद्धुनि मन्तरिक्ष मतूर्त्तं बद्धं सविता समुद्रम्॥ सविता यन्त्रैः पृथिवी मरमयदनारम्भणे‖ऽन्तरिक्षे सविता द्या मदृंहदश्व मिवाधुक्षद्धुनि मन्तरिक्षे मेघं बद्ध मतूर्त्ते बद्ध मतूर्ण इति वात्वरमाण इति वा सविता समुदितार मिति क मन्यं मध्यमा देव¶ मवक्ष्यदादित्योऽपि सवितोच्यते तथा च हैरण्यस्तूपे स्तुतोऽर्चन् हिरण्यस्तूप ऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग्भवति॥८(३२)॥

---

* १भा १०१पृ० १ख० १२ख० (११)। धमतिर्गतिकर्मेति तत्रैव देवराजः।

† १भा० ४७५, ४८०पृ० ५ख० ४ख० (१०)।

‡ २भा० ३३४, ४३६पृ० ७ख० ७पा० ९ख०।

§ यदुक्तं पुरस्तात् "सवितुः"—इत्यस्य व्याख्यानम् "आदित्यस्य"—इति (१भा० १२५पृ० १ख०) तद् द्युस्थानाभिप्रायेण; अस्ति चैको द्युस्थानोऽपि सविता, वक्ष्यति च यथास्थानं तन्निर्वचनादिक मुपरिष्टात् (१२अ० २पा० १ख०)।

‖ "अनालम्भने" क; "अनालम्बने" ख, ग।

¶ "क मन्य मादित्याद्देव" क, ख, ग।

“स॒वि॒ता य॒न्त्रैः”—इति*। अर्चन्नामा हैरण्यस्तूपऋषिः, उत्तराद्यास्य (१ ३ ६ पृ०)। ‘सविता’ मध्यमः, सर्वबलेशानः†। किम्? इति,—‘यन्त्रैः पृथिवीम् अरम्णात्’; यावत् किञ्चित् यन्त्र्यते तत् सर्वं बलेनैव, यन्त्रिता च इयं पृथिवी निश्चला; न चान्य इन्द्राद् बलवान् यन्त्रयितास्ति, तस्मात् इन्द्र एवैमां संयच्छन् स्थिरा मकरोत्। “रम्णातिः संयमनकर्मा”—इति उक्तम्। अथ वा वर्षणोपकारेण पृथिवीलोकनिवासिनो धारयति, तदस्याः संयमनम्। कि मेतावदेव? न-इति, उच्यते—“अस्कम्भने सवि॒ता द्या मदृंहत्”। एव मप्येतस्मिन् ‘अस्कम्भने’ “अनारम्भणे” अमूर्त्तेऽन्तरिक्षे; यत्र पर्ण मपि नाल मवस्थानाय, तत्रैव मप्यतिगुर्वीं सौपर्णीं ‘द्यां’ ‘सविता’ एव ‘अदृंहत्’ स्थिरा मकरोत्—आभूतसंप्लवात्। को हि नाम मध्यमात् सवितुरन्य एतदतिदुष्करं कुर्यात्? अपि च ‘अश्वम् इव अधुक्षत्’ यथा अश्ववन्धो अश्वं धूनुयात्, उपावृत्तम् अनायासेन रजः तस्मादपनेष्यन्। एवं ‘धुनिं समुद्रम्’ उदकवन्धितारम् “मेघम्” ‘अधुक्षत्’ ‘सविता’ अधूनोत् अकम्पयत् उदकप्रक्षरणाय। क्व? ‘बद्धम् अतूर्त्ते’ एतस्मिन्नन्तरिक्षे अहिंसिते अत्वरमाणे वा, सर्वगतत्वादाकाशे, गमनायोग्ये वा। वाय्वात्मनैव विष्टभ्य निश्चेष्टं बद्ध मिवाधुक्षत् यः सविता, सोऽस्माक मिदं नाम करोतु इति। “समुदिता”=‘समुद्रः’=“मेघः”॥

“कम् अन्यम् मध्यमात् एवम् अवक्ष्यत्”—‘मेघ मधुनोत्’ इति?

---

* ऋ० सं० ८, ८, ७, १। “सविता सर्वस्य प्रसविता प्रेरको मध्यमस्थानो देवः”—इति चात्र सा० भा०।

† “सविता वै प्रसवाना मीशे”—इत्यादि ऐ० ब्रा० १, ३ ५।

कुतः संशयः? अन्योऽपि यस्मात् मध्यमात् सवितोच्यते; यत आह—"आदित्यः अपि सविता उच्यते" इति*॥

यथा च एतत् एवम्, "तथा" एतस्मिन्नेव "हैरण्यस्तूपे" सूक्ते स्तवः हैरण्यस्तूप मिदं सूक्त मिति। कुत एतत्? अत आह—"अर्चन् हिरण्यस्तूप ऋषिः इदं सूक्तं प्रोवाच" इति। अर्चन्-नाम्ना हिरण्यस्तूपः, तद्रूपः तद्गतो वा, स यथा एतत् सूक्तं प्रोवाच†॥

"तदभिवादिनी एषा ऋक् भवति" अस्मिन्नेव सूक्ते‡—॥ ८ (३२)॥

हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन्। एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम्॥ हिरण्यस्तूपो हिरण्मयस्तूपो§ हिरण्मयस्तूपोऽस्येति वा स्तूपः स्त्यायतेः सङ्घातः सवितर्यथा त्वाङ्गिरसो॥ जुह्वे वाजे अन्ने अस्मिन्नेवं¶ त्वार्चन्नवनाय वन्दमानः सोमस्येवांशुं प्रतिजागर्म्यहं त्वष्टा व्याख्यातस्तस्यैषा भवति॥ ९ (३३)॥

---

* विशेषतस्तु वस्त्वत्युपरिष्टाद् यथास्थानम् १२अ० २पा० १ख०।

† आङ्गिरोवंशीयः कश्चित् हिरण्यस्तूपः, तेन ऋक्संहितायां सप्त सूक्तानि दृष्टानि (१, ३१—३५; ९, ४; ९, ६९.), हिरण्यस्तूपवंशधरोऽसौ ऋचेन्नामर्षिरेक मेवामुं (१०, १४९.) सूक्तं ददर्शेति।

‡ हैरण्यस्तूपे इत्यर्थः। इदञ्च सूक्तं "हिरण्यस्तूपपुत्रस्य अर्चत आर्षम्"—इति सा०।

§ "हिरण्मयस्तूपो" क, ख, ग।

॥ "आङ्गिरसो" क, ख, ग।

¶ "वाजेऽन्नेऽस्मिन्नेवं"—इति च-प्रभृतिषु।

"हिरण्यस्तूपः सवितर्यथा"—इति*। हे 'सवितः!' 'यथा' अन्यकालीनः 'हिरण्यस्तूपः'† ('त्वा') त्वाम् ('आजुह्वे') आजुहाव, कर्मण्याकृतवान्; एवम् 'अहम्' अप्येतस्मिन् काले हिरण्यस्तूपता मापन्नः 'अर्चन्' नामा ('अवसे') अवनाय 'वाजे अस्मिन्' "अन्ने" संस्कृते हविषि त्वा माहूय 'वन्दमानः' स्तुवन् 'सोमस्य इव अंशुम्' सोम मिव क्रीत्वा आदृतः 'प्रति' ('जागर') "जागर्मि" अनन्य-मनाः त्वा मायामादुपासे इति ॥

"स्तूपः स्त्यायतेः"। "स्त्यै सङ्घाते (भ्वा० प०)" तस्य स्तूपः— "सङ्घातः"‡ इति ॥

"त्वष्टा"—इति§ वक्तव्यम्। स "व्याख्यातः"‖ ॥

"तस्य एषा भवति"— ॥ ९ (२२) ॥

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान। इमा च विश्वा भुवनान्यस्य महद्देवाना मसुरत्व मेकम्॥ देवस्त्वष्टा सविता सर्वरूपः पोषति प्रजा रसानुप्रदानेन बहुधा चेमा¶ जनयतीमानि च सर्वाणि

---

* ऋ० सं० ८, ८, ७, ५। एषा हि ऋक् तत्र हैरण्यस्तूपे सूक्ते पञ्चमी।

† "आङ्गिरसः—अङ्गिरसः पुत्रो हिरण्यस्तूपो मम पिता"—इति सा० भा०।

‡ "स्त्रियः स्त्यायतेरपत्रपणकर्मणः"—इति चोक्तम् १भा० २५६पृ०।

§ १भा० ४०५, ४८०पृ० ५अ० ४ख० (२१)।

‖ "त्वष्टा तूर्णं मश्नुते इति नैरुक्ताः"—इत्यादिना। १भा० ४७९ पृ०।

¶ "चेमां" क, ख, ग; "चैनाः"—इति वृत्तिसम्मतः।

भूतान्युदकान्यस्य महच्चास्मै देवाना मसुरत्व मेकं* प्रज्ञावत्त्वं वानवत्वं वापि वासुरिति प्रज्ञानामास्यत्यनर्थानस्ताश्चास्या मर्था † असुरत्व ‡ मादिलुमं वाते वातीति सतस्तस्यैषा भवति ॥ १० (३४) ॥

"देवस्त्वष्टा"—इति§। वैश्वामित्रस्य प्रजापतेरार्षम्। वैश्वदेवे विनियोगः। 'त्वष्टा' देवो मध्यमः, 'सविता' सर्वस्य भूतग्रामस्य प्रसविता उत्पादयिता उदकसम्प्रदानद्वारेण। किं मुत्पादयिता एव? न—इति, उच्यते—'पुपोष प्रजाः' पुष्णाति चासामुत्पाद्य। न केवलं पुष्णाति; किन्तर्हि? 'पुरुधा जजान' इति, "बहुधा चैनाः जनयति", वर्द्धयति। केन पुनरसौ जनयति, पुष्णाति, वर्द्धयति च? यत आह—"इमा च विश्वा भुवनान्यस्य"। इमानि विश्वानि भुवनानि "उदकानि" अस्य यतः स्वतायां वर्त्तन्ते, तस्मात् जनयति पुष्णाति वर्द्धयति च। अतश्च सर्व मिदं शक्तः कर्त्तुम्, यतः—"महद्देवानां मसुरत्व मेकम्"। 'महत्' 'असुरत्वम्' "प्रज्ञावत्त्वम्"; "असुरिति प्रज्ञानाम", तया तद्वत्त्वम्। तया महत्या प्रज्ञया उदकेन साधनेन सर्व मिदं जनयति, पुष्णाति, वर्द्धयति च; अप्रज्ञो हि साधनसम्पत्तावपि किं कुर्यात्। अथवा "अनवत्वम्" असुः=प्राणः, तेन तद्वत्त्वम्। एव

---

* "मसुरत्व मेकत्वं" क, ख, ग।

† "मनर्था" क, ख, ग।

‡ "वसुरत्व" ख, ग; इतिसम्मतस्य।

§ ऋ० सं० ३, ३, २१, ४। "बहुधो वर्धत इन्द्रस्य; केचिदग्नेस्त्वष्टुश्चेति मन्यन्ते" —इति चात्र सा० भा०।

मपि सति प्राणेनैव शक्यते एतत् सर्वं कर्त्तुम्; अप्राणो हि किं कुर्यात्। "अन्नवत्त्वम्"—इति केचित्। तेषा मन्नहेतुनोदकेन तद्वत्त्वम्, तथापि योज्यम्॥

"असुरिति प्रज्ञानाम"। तत् कस्मात्? "अस्यति अनर्थान्" प्रज्ञैव हि प्रज्ञावतोऽस्यति क्षिपत्यनर्थान्, नाशयति। "अस्ताश्च अस्याम् अर्थाः" न हि तदस्ति व्यक्तेऽर्थं सर्वं प्रज्ञावतां प्रज्ञायां नास्ति; एतावांस्तु विशेषोऽभिव्यक्त मनभिव्यक्त मिति। अथवा यदेतदसुरत्वं वसुमतो भावः "वसुरत्वम्" एतत्; रो मत्वर्थे वकारलोपश्च; वसुना उदकेन तद्वान् असौ लष्टा*॥

"वातः"† कस्मात्? "वातीति सतः"। "वा गतिगन्धनयोः (अदा० प०)"—इत्यस्य। सत इति धातुकारकावधारणम्। वायु-शब्दो हि त्रयाणां धातूनां विकल्पेन‡; अयन्तु वातेरेवेति विशेषः॥

"तस्य एषा भवति"—॥१० (३४)॥

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र ण आयूंषि तारिषत्॥ वात आवातु भेषज्यानि शम्भु

---

* प्रज्ञानामसु "असुः"—इति षष्ठं पदम् (१भा० ३१४, ३१५पृ० ३ख० ९ख०)। "असुरिति प्राणनाम"—इत्याद्युक्तं च समालोच्यम् (२भा० १०८पृ० ३अ० २पा० १ख०); असुरशब्दोऽप्यस्ति तत्र।

† १भा० ४७५, ४८१पृ० ५अ० ४ख० (२१)।

‡ पुरस्तादिहैवोक्तम् १पा० १ख० ९७—९९पृ०।

मयोभु च नो हृदयाय प्रवर्द्धयतु* च न आयुरग्नि-र्व्याख्यातस्तस्यैषा भवति ॥ ११ (३५) ॥

"वात आवातु"—इति†। उलस्य वातायनस्यार्षम्। 'वातः' अस्मान् आभिमुख्येन 'भेषजम्' यद् यत् पथ्यम् अस्माकम्, तत्तत् गृहीत्वा 'आवातु'। तच्च अस्माकं 'शम्भु' अस्तु। 'शम्'—इति सुख-नाम; तद्भावक मस्तु। तदात्वे च आयतौ परिणामे 'मयोभु' अस्तु। 'मयः'—इति सुखनाम; हृदयाय सुख मस्तु। स्तूयमानः प्रत्यक्षी-भूत इव मनसि, यतः प्रत्यक्ष मुच्यते—"प्रण आयूंषि तारिषत्"। हे भगवन्! वायो! प्रवर्द्धय त्व मस्माक मायूंषि स-पुत्र-पौत्रादि-वर्गानाम्, भैषज्यञ्च त्व मस्माकं नित्य मावह।—इत्येतदाशास्महे ॥

"अग्निः"‡—"व्याख्यातः"§।

"तस्य एषा भवति"—॥ ११ (३५) ॥

प्रति त्यं चारु मध्वरं गोपीथाय प्र हूयसे। मरुद्भि-रग्न आ गहि ॥ तं प्रति चारु मध्वरं सोमपानाय प्र-हूयसे सोऽग्ने मरुद्भिः सहागच्छेति क मन्यं मध्यमा-देवं मवक्ष्यत्तस्यैषापरा भवति ॥ १२ (३६) ॥

---

* "प्रवर्द्धय" क; इतिसम्मतस्य।

† ऋ॰ सं॰ ८, ८, ४४, १। सा॰ सं॰ उ॰ आ॰ २, २, ४, १०।

‡ १भा॰ ४७५, ४८१पृ॰ ५ख॰ ५ख॰ (२२)।

§ ३भा॰ २७८—८१पृ॰ ७ख॰ ४पा॰ १—५ख॰।

"प्रति त्यं चारुम्"—इति*। मेधातिथिः पश्यति। 'त्यं' तम् अङ्गवैकल्यरहितम् 'अध्वरम् प्रति' हे भगवन् 'अग्ने!' त्व मस्माभिः 'गोपीथाय' "सोमपानाय" 'प्रहूयसे' आह्वयसे। स त्व मेतद् ज्ञात्वा 'मरुद्भिः' सह 'आगहि' "आगच्छ" एतस्मिन्नस्य कर्मणि सोमं पातुम्।—इत्येतदाशास्महे॥

"गोपीथाय", "मरुद्भिः" सहेति प्रथमं लिङ्गम्॥

"तस्य एषा अपरा भवति"—सा पुनः किमर्थम्? गोपीथायेत्यव्यक्तं सोमपानम्; व्यक्तसोमपानलिङ्गा उत्तरा। तद्यथा—॥ १२ (३६)॥

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु। मरुद्भिरग्न आ गहि॥ अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति॥ १३ (३७)॥

॥ इति दशमाध्यायस्य तृतीयः पादः॥ १०. ३.

"अभि त्वा पूर्वपीतये"—इति†। हे भगवन्! 'अग्ने!' ('पूर्वपीतये' "पूर्वपानाय") पूर्वकाले प्रवृत्ताय पानाय‡ ('त्वा') त्वाम् 'अभि सृजामि' वदे। किम्? इति—इदं 'सोम्यं मधु' "सोममयं"

---

* ऋ० सं० १, १, ३६, १। सा० सं० उ० आ० १, १, २, ६। वर्षकामेष्टिः कारीरी, तस्या मेषा धाय्या। श्रा० सू० १, १२।

† ऋ० सं० १, १, ३७, ४। सा० सं० उ० आ० १, १, १, ४।

‡ "पूर्वकाले प्रवृत्तपानाय" क, ख।

तत् मधु। स त्व मागच्छ एतस्मिन् कर्मणि एतत् पातुम्।—इत्येत-दाशास्महे॥ १३ (३७)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ पञ्चदशस्य (दशमस्य) अध्यायस्य तृतीयः पादः॥ १०। ३॥

॥ चतुर्थः पादः॥

वेनो वेनतेः कान्तिकर्मणस्तस्यैषा भवति॥ १ (३८)॥

"वेनः"—इति* वक्तव्यम्। स एष "वेननेः कान्तिकर्मणः"; सर्वलोककान्तो हि मध्यमः, सर्वलोपकारित्वात्॥

"तस्य एषा भवति"—॥ १ (३८)॥

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इम मपां संङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥ अयं वेनश्चोदयत् पृश्निगर्भाः प्राष्ट-वर्णगर्भा† आप इति वा ज्योतिर्जरायुर्ज्योतिरस्य

---

* १भा० ४७५, ४८१९० पूष० ४ख० (१४)।

† "प्राष्टवर्णगर्भा" ख, ग।

जरायुस्थानीयं भवति जरायुर्जरया गर्भस्य जरया यूयत इति वेम मपां च सङ्गमने सूर्यस्य च शिशु मिव विप्रा मतिभी रिहन्ति (रिहन्ति*) लिहन्ति (स्तुवन्ति†) वर्द्धयन्ति पूजयन्तीति वा शिशुः शंसनीयो भवति शिशीतेर्वा स्याद्दानकर्मणश्चिरलब्धो गर्भ इत्यसुनीति‡रसून्नयति तस्यैषा भवति ॥ २ (३८) ॥

"अयं वेनः"—इति§। भार्गवस्य वेनस्यार्षम्। शुक्रोऽनया स्तूयते॥। अन्तर्भावितप्रज्ञानः तस्मिन्मनसि प्रत्यक्षीभूत मभिनयेन दर्शयन्निव कस्मै चिद् ब्रवीति—'अयं वेनः' इति। किं करोति? चोदयति—'पृश्निगर्भाः'। पृश्निः=आदित्यः; प्रकृष्टो ह्यनेन वर्णः प्राष्टः प्राप्तः, यास्तस्य गर्भत्व मुपगताः रश्म्यन्तर्गताः परिपक्वाः आपो मासाष्टकेन सम्भृताः, ताः वेनश्चोदयति प्रावृषि वर्षभावेन प्रेरयति। किंलक्षणः? 'ज्योतिः जरायुः' "ज्योतिः अस्य" विद्युदाख्यं कर्मात्मलक्षणम्, "जरायुस्थानीयं" प्रज्ञावतः। तदधिष्ठातुः मध्यमस्य गर्भस्येव परिवेष्टनं भवति। क्वावस्थितस्योदयति? 'रजसो विमाने'

---

* नास्त्येतत् पदम् च-प्रभृतिषु।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

‡ "गर्भा भवति। असुनीति"—इति च-प्रभृतिषु।

§ ऋ० सं० ८, ७, ७, १। य० वा० सं० ७, १६। "अनया अधिदैव मधियज्ञं चावस्थितः सोमः स्तूयते। अधिदैवं चन्द्रात्मना स्तूयते। * * *। अधियज्ञं लतात्मा सोमः स्तूयते।"—इति तत्र महीधरः।

॥ कात्यायनसूत्रे तु "मन्थिन मयं वेनः (८, ९, १२)"—इत्युक्तया मन्थिग्रहोऽनया स्तूयते; न तु शुक्रग्रह इति केचित्।

रजः उदकम्, तद्यत्र निमीयते, तत्रावस्थितः; अन्तरिक्षलोके इत्यर्थः। योऽय मेवमादिगुणयुक्तो वेनः, तम् 'इमं' वेनम् 'अपां' "च" 'सङ्गमे', 'सूर्यस्य' "च" 'सङ्गमे' समागमनस्थाने; यत्र सूर्यस्य रश्मिभिः आपः सङ्गच्छन्ते, तत्र वर्त्तमानम्; मध्यस्थाने। 'विप्राः' मेधाविनः स्तोतारः 'मतिभिः' स्तुतिभिः प्रज्ञापूर्विकाभिः 'शिशुम्' ('न') "इव" 'रिहन्ति'; यथा हि शिशुर्नित्यं स्तूयते एवं स्तूयते। यदेतत् "रिहन्ति"—इति, एतत् "लिहन्ति" लिहेः (अदा० उ०) धातोः, वर्द्धयन्ति, पूजयन्ति वेत्यर्थः॥

"जरायु" कस्मात्? तद्धि "जरया गर्भस्य" भवति; यथायथा गर्भो भवति तथातथा तदुत्पद्यते। "जरया यूयते इति वा" यच्चैतत् जरेति प्रसिद्धम्, प्रसूताया गोः स्त्रिया वा, पश्चात् पतति, सा जरेत्युच्यते, तया च यूयते मिश्रयते तज्जरायुरित्युच्यते*।—। "शिशुः" कस्मात्? स हि "शंसनीयो भवति" प्रयोजनेऽप्रयोजने वा अर्चन्ति, किञ्चन प्रलापेषु। "शिशीतेः वा स्यात्" धातोः दानार्थस्य†; दीयते हि स पुरुषेण स्त्रियै धारणाय;—भवति च वादः स्त्रीणा मभिनवगृहीतगर्भाणाम् 'अचिरात् लब्धो मे गर्भः' इति‡॥

"असुनीतिः"—इति§। एतद् देवतापदम्। स पुनरय मिन्द्रः, मध्यमः, प्राणः। स पुनर्यदैतस्मात् शरीरादुत्क्रामति, अथेतरान्

---

* "गर्भाशयो जरायुः स्यादुल्बं च कललोऽस्त्रियाम्"—इति अम० को० २, ६, ३८। उल्बशब्दनिर्वचनं तन्निगमव्याख्यानञ्च द्रष्टव्यं पुरस्तात्। २भा० २७८पृ० ७ख०।

† "शिशीतिर्दानकर्मा"—इत्युक्तं पुरस्तात्। २भा० ११०पृ० ५ख० ४पा० ५ख०।

‡ मूले तु "चिरलब्धो गर्भ इति"—इति द्रष्टव्यम्।

§ १भा० ४७५, ४८१पृ० ५ख० ४ख० (२५)।

प्राणान्* "असून्" अन्यत्र "नयति"; विज्ञायते हि—"प्राण मनुत्क्रामन्तं सर्वे प्राणा अनुक्रामन्तीति ॥

"तस्य एषा भवति"—॥ २ (३९)॥

असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः। रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्द्धयस्व ॥ असुनीते मनो अस्मासु† धारय चिरं जीवनाय प्रवर्द्धय च न आयू रन्धय च नः सूर्यस्य सन्दर्शनाय रध्यतिर्वशगमनेऽपि दृश्यते। मा रधाम द्विषते सोम राजन्नित्यपि निगमो भवति। घृतेन त्व मात्मानं तन्वं वर्द्धयस्वेत्यो व्याख्यातस्तस्यैषा भवति ॥ ३ (४०) ॥

"असुनीते मनो अस्मासु—इति‡। शुतवन्धोरार्षम्। हे 'असुनीते' प्राण! § 'मनः अस्मासु धारय' मनःप्रभृतीनेतान् प्राणान् आत्मनोऽवस्थानेनास्मच्छरीर एव धारय; मा त्व मुत्क्रमीः; त्वदनुत्क्रमेण अवस्थास्यन्ते इति। 'जीवातवे' "चिरम्" अस्माकं "जीवनाय"

---

* "असुरिति प्राणनाम"—इत्याद्युक्तम्। १भा० २७८पृ० ३अ० १पा० २ख०।

† "मनोऽस्मासु"—इति च-प्रभृतिषु।

‡ ऋ० सं० ८, १,२२,५। "स्त्योरपगमनायोत्तराभ्यां देवीमसुनीतिम्" इति अनु०।

§ "असुः प्रज्ञाः तया नीयत इत्यसुनीतिः स्तुतिः"—इति (ऋ० सं० ७, ६, ११, ४), "असुनीतिम्—प्राणानां विषयेषु नेतार मस्मत्पिचन्तरात्मानम्"—इति (ऋ० सं० ७,६,१९, ४), "असुनीतिम्—प्राणस्य नयनम्, प्राणप्रेरणम्"—इति (ऋ०सं० ७, ६, २०, २), "असुनीते!—मनुष्याणा मसूनां नेत्रि देवि!"—इति (ऋ० सं० ८, १, २२, ५), "असुनीते!—प्राणदायिनि देवि!"—इति (ऋ० सं० ८, १, २२, १) पश्चमोक्तम् सा० भा०।

मनो धारय। "सु प्र तिरा न आयुः"। अमुना प्रकारेण सुष्ठु प्रतिर प्रकर्षेण वर्द्धयास्माक मायुः। किञ्च 'रारन्धि नः' संसाधयास्माकम्। तथा अनुगृहाण, यथा 'सूर्यस्य' 'सन्दृशि' "सन्दर्शनाय" सम्यग् दर्शनाय अलं स्याम; दिव्यं नः चक्षुरुत्पादय, येन सम्यक् सूर्यं पश्येम। सर्वं चैतदन्नप्राचुर्ये सति भवति, यतो ब्रूमः—"घृतेन त्वं तन्वं वर्द्धयस्व"। घृतेन उदकेन, त्व मात्मानं यथाकालं वर्द्धयस्व; त्वय्युदकं ददति सर्व मिदं भवति। अहविर्भावात्वादसुनीतेर्घृत मित्युदकनामेत्यचोपपद्यते॥

"रध्यतिः वशगमने अपि दृश्यते"। तद्यथा—"मा रधाम द्विषते: (ऋ० सं० ८, ७, १, ५)"—इत्यत्र। "देवीः षडुर्वीरुरु नः कृणोत"—इति*। वैश्वदेवी। विश्वस्यार्षम्। वैश्वं सूक्तम्। तत्रैषा दर्शपूर्णमासादिषु हविषा मभिमर्शने विनियुज्यते। 'देवीः' 'षट्' द्यौश्च पृथिवी च अहश्च रात्रिश्च आपश्च ओषधयश्चेति†। ता उच्यध्वे—हे देव्यः! उर्व्यः षट्, सर्व मिदम् ऊर्णुवत्यः यूय मुच्यध्वे। 'उरु' बहु यद् यद् वयं युष्माभिः बहुक्रियमाण मिच्छामः, तत्तत् उरु बहु कुरुध्वे। हे 'विश्वे देवाः' यूय मपि 'इह' एतस्मिन् कर्मणि अस्माक मङ्गभाव मुपगताः सन्तः 'वीरयध्वम्' वीरान् पुत्रान् इच्छत दातुम्। अपि च जातपुत्राः सन्तो 'मा हास्महि प्रजया' मा अस्मान्

---

* "देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम्। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्॥"—इति ऋ० सं० ८, ७, १५, ५। अथ० सं० ५, ३, ६-७. इ०।

† "षडुर्वीः। षट्सङ्ख्याका उर्व्यः। एताश्चान्यत्राम्नायन्ते—'षण्मोर्वीरंहसः पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च'—इति। ईदृश्यः।"—इति सा० भा०।

प्रजा कदाचित् अपि हासीत्; कष्टं हि पुत्रमरणम्। 'मा तनूभिः वयं स्वाभिः हास्महि' मास्माक मायुषश्छेदोऽभूत्, युष्मदनुध्यानात्। अपि च "मा रधाम द्विषते सोम राजन्" हे भगवन्! 'सोम!' 'राजन!' विशेषतः त्वं मुच्यसे; सर्वस्या अस्या आशिषः त्वदनुध्यानात् 'मा रधाम' मा वशं गच्छेम। 'द्विषते', द्विषन्त एवास्माक मर्थसम्प्रदानादिना वश्यता मुपयान्तु; यतः अनिष्टं हि द्विषतो विधेयत्व मिति। सामर्थ्यादिह "रध्यतिर्वशगमने"॥

"ऋतः"—इति*, एतत् पदम्। तद् "व्याख्यातम्" निर्वचनतः; —"ऋत मित्युदकनाम प्रत्यृतं भवति"—इति†। इह त्वभिधेयो मध्यमः॥

"तस्य एषा भवति"—॥ ३ (४०)॥

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति। ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः॥ ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य प्रज्ञा वर्जनीयानि हन्त्यृतस्य श्लोको बधिरस्यापि कर्णावातृणत्ति बधिरो बद्धश्रोत्रः कर्णौ बोधयन् दीप्यमानस्यायोरयनस्य‡ मनुष्यस्य ज्योतिषो वोदकस्य वेन्दुरित्थेरनत्तेर्वा तस्यैषा भवति॥ ४ (४१)॥

* १भा० ४७५, ४८१पृ० ५अ० ३ख० (२१)।

† २भा० २४१, २४२पृ० २अ० ७पा० ३ख०।

‡ "दीप्यमानस्यायनस्य" क, ग; "दीप्यमानस्यायमानस्य" ख।

"ऋतस्य हि शुरुधः"—इति*। वामदेवस्यार्षम्। सम्पातसूक्ते निष्केवल्ये पृष्ठ्याभिप्लवयोः शस्यते। 'ऋतस्य' मध्यमस्य। किम्? इति—'शुरुधः' आपः 'सन्ति' विद्यन्ते। किंलक्षणाः? 'पूर्वीः' अनेककालसम्भूताः। यतश्चाशाविद्धोऽङ्गिरतस्तस्य 'ऋतस्य' उदकसम्प्रदानद्वारेणानाकालं नाशयन्ती, 'धीतिः' "प्रज्ञा" सर्वलोकस्य, 'वृजिनानि' "वर्जनीयानि" अयशांसि 'हन्ति' नाशयति; अकाले† हि क्षुत्परिगृहीताना मयशस्करेषु जिह्मादिषु प्रवृत्तिर्भवति। इदतश्चोदकं सर्वलोकवृजिनाय वाताय। तस्य 'ऋतस्य' एव मतिमहान् 'श्लोकः' शब्दः स्तनयित्नुलक्षणो भवति, यः "बधिरस्यापि" वद्धश्रोत्रस्य, विधाचापि निघर्णतः अपिहितश्रोत्रस्य, 'आयोः' "अयनस्य" "मनुष्यस्य" बोधयत्यस्तत इति। 'कर्णा' अतिदुर्भेदौ ('आततर्द') "आतृणत्ति" आभिनत्ति। 'शुचमानः' "दीप्यमानः" "ज्योतिषः" च "उदकस्य" च श्लोकः। एवं सतत्वो ह्यपावृत इति॥

"इन्दुः"—इति‡, एतत् पदम्। स कस्मात्? "इन्धेः" दीप्त्यर्थस्य, "उनत्तेः वा" क्लेदनार्थस्य; उभय मपीन्दौ उपपद्यते चन्द्रमसि॥

"तस्य एषा भवति"—॥ ४ (४१॥

प्र तद्वो॑चेयं॒ भव्या॒येन्द॑वे॒ हव्यो॒ न य इ॒षवा॒न्मन्म॒ रेज॑ति र॒क्षोहा॒ मन्म॒ रेज॑ति। स्व॒यं सो अ॒स्मदा

---

* ऋ० सं० ३, ६, १०, २। "अत्र ऋतशब्देनेन्द्रो वादित्यो वा सत्यं वा यज्ञो वेत्युच्यते"—इति सा० भा०।

† "अनाकाले" ग; अर्थस्त्वेक एव।

‡ १भा० ४७५, ४८१ पृ० ५ख० ४ख० (२७)।

निदो वधैरजेत दुर्मतिम्। अव स्रवेदघशंसोऽवतर मवं क्षुद्र मिव स्रवेत्॥ प्रब्रवीमि तद्भव्यायेन्दवे हवनार्ह इव य इषवानन्नवान् कामवान् वा मननानि च नो रेजयति रक्षोहा च बलेन रेजयति स्वयं सो अस्मदभिनिन्दितारम्। वधैरजेत दुर्मतिम्। अवस्रवेदघशंसः। ततश्चावतरं क्षुद्र मिवावस्रवेदभ्यासे भूयांस मर्थं मन्यन्ते यथाहो दर्शनीयाहो दर्शनीयेति तत्परुच्छेपस्य शीलं परुच्छेप ऋषिः (पर्ववच्छेपः*) परुषिपरुषि शेपोऽस्येति वेतीमानि सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि सूक्तभाञ्जि हविर्भाञ्जि तेषा मेतान्यहविर्भाञ्जि वेनोऽसुनीतिर्ऋत इन्दुः प्रजापतिः प्रजानां पाता वा पालयिता वा तस्यैषा भवति॥ ५ (४२)॥

"प्र तद्वोचेयम्"—इति*। अतिच्छन्दाः‡ पारुच्छेपी। षष्ठेऽहनि मरुत्वतीये शस्यते। यद्यदिष्टं तस्येन्दोः तत्तदहं प्रब्रवीमि, अस्मै 'इन्दवे' प्रीत्यर्थम्। किंलक्षणः? 'यः' इन्दुः 'भव्यः' भवनार्हः,

* नास्त्येषोंऽशः क-ख-ग-पुस्तकेषु।

† ऋ० सं० २, १, १७, १। अतिच्छन्दःसु अत्यष्टिरेषा।

‡ उत्कृत्यभिकृतिसङ्कृतिविकृत्याकृतिप्रकृतिकृत्यतिधृतिधृत्यत्यष्ट्यष्टिषु चतुःश-ताक्षर मारभ्य चतुर्णां परित्यागेनैकैकं छन्दो जायते। तदेतत् सर्वं छन्दोग्रन्थे "चतुःशत मुत्कृतिः (पि० ४, १)"—इत्यादिसूत्रैः प्रतिपादितं द्रष्टव्यम्।

आत्मवान् अभिप्रेतानां पात्रभूत इत्यर्थः* । भव्यो भावनार्ह इव; यो हविषा भावन मर्हति, न च भाव्यते, अहविर्भाक्त्वात् । 'हव्यो न' "हवनार्ह इव" यो यज्ञेन च पुनराहूयते; अहविर्भाक्त्वादेव । 'इषवान्' नित्यम् "अन्नवान्", "कामवान् वा" कामिनां सोढॄणां नित्य मभिमतफलसम्प्रदानोन्मुखः । तत्सम्प्रदानोन्मुखतया च नित्य मस्माकं 'मन्म रेजति' "मननानि" प्रज्ञानानि "रेजयति" आकम्पयति; आकम्पितहृदयानुपकारितया नित्य मस्मान् करोति† । कथं नाम एतं नित्यं स्तुयामेति । अपि च 'रक्षोहा' रक्षांसि "बलेन" घ्नन् सुतरा मस्माकं 'मन्म रेजति' । किञ्च "स्वयं सो अस्मदा निदः" । 'स्वयम्' आदरवान् भूत्वा 'सः' इन्द्रः 'अस्मदानिदः' "अस्मदभिनिन्दितारम्" 'वधैः' वज्रप्रहारैरतिदुःसहैः 'अजेत' जयेत्, क्षिपेद्वा 'दुर्मतिं' पापमतिं योऽस्मान् प्रति । तेन वातिबलवतेन्द्रेणा हन्यमानोऽस्मद् 'अघशंसः' अस्माकं यः पापानां शंसिता, कथयिता, स्वल्पाना मपि स्फीतिकर्त्ता जनपदे । असौ 'अवस्रवेत्' अधोगतिः स्यात् । "अवतर मवक्षुद्र मिव स्रवेत्" यावच्च प्रथमं स्रुतः अधोगतः, ततोऽवतरम्, ततोऽप्यवतर मिति, तावत् स्रवेत्; क्षुद्र मिव द्रव्यं किञ्चित् यावदामूलतो नष्टम् ।—इत्येतदाशास्महे ॥

बलकृतेर्मध्यम इति ॥

---

* "भव्याय भवनशीलाय प्रतिदिनं कलाभिर्वृद्ध्या वर्द्धनशीलायेन्दवे"—इति सा० भा० ।

† "भ्यसते रेजते इति भयवेपनयोः (२भा० ३५७ पृ० ४पं०)"—इत्युक्तेरिति भावः । "रेजतिर्गत्यर्थः । रेजति इयतीति तन्नामसु पाठात्"—इति सा० भा० । १भा० ३२७ पृ० ७पं "रेजति (९०) । इयति (९१)"—इति ।

इहाभ्यासबाहुल्यं दृष्ट्वा 'रेजति'-'रेजति', 'स्रवेत्'-'स्रवेत्'—इति, प्रतिसमाधत्ते—"अभ्यासे भूयांसम् अर्थं मन्यन्ते"—इति। (शब्दाभ्यासे यत्रान्यो विशेषो नास्ति, तत्रैवं विशेष माचार्याः मन्त्रार्थसतत्त्वविदो मन्यन्ते,—यदुतार्थभूयस्त्व मिति;*) न ह्यकस्मात् स एव शब्दः पुनरभ्यस्यते। लोकेऽपि चैतद् दृष्टम्—शब्दाभ्यासेऽर्थभूयस्त्वमिति;—"यथा—अहो दर्शनीय! अहो दर्शनीय! इति" गुणातिशये हि क्रियाः शब्दाभ्यासः, तस्मान्मन्त्रेष्वपि तद्वदेवेति न्याय्यम्†। "तत्" च पुनरेतत् "परुच्छेपस्य" मन्त्रदृशः "शीलम्"; स हि नित्य मभ्यस्तैः शब्दैः स्तौति‡। मन्त्रदृशोऽपि स्वभाव उपेक्ष्य इत्युपप्रदर्शनायेद मुक्तम्। अथ पुनः "परुच्छेपः" कस्मात्? परुच्छेप ऋषिः; तस्य हि "पर्ववन्" महान् "शेपः" प्रजननम्। "परुषिपरुषि शेपोऽस्येति वा" सर्वाङ्गसन्धिषु शेपकृतो योगः सुखात् किल। तस्य शेपोऽस्येति वा§॥

"इति इमानि सप्तविंशतिः देवतानामधेयानि अनुक्रान्तानि"। इतिकरणः प्रकारवचनः। एव मेतानि यथा समाम्नातानि 'सप्तविंशतिः' सप्ताधिका विंशतिः 'देवतानामधेयानि' "वायुः"—इत्यत

---

* नास्त्येषोंऽशः क-ख-पुस्तकयोः।

† पुरस्तादुक्तो जाम्यजामिविचारोऽप्यालोचनीयः (२पा० ३ख० ९५—९८पृ०)।

‡ परुच्छेपस्य ऋषेः ऋक्संहितायां प्रथममण्डले एकोनविंशो विंशश्चेति द्वावनुवाकौ विद्येते। तत्र प्रथमानुवाके सप्त सूक्तानि, द्वितीयेऽनुवाके षट् सूक्तानि। तदेषु त्रयोदशेषु सूक्तेषु या ऋचो विद्यन्ते, तत्र सर्वत्रैवैव मभ्यासः श्रूयते; एषा च ऋक् तदन्तर्गतैवेति (१म० १९अनु० ६ऋक्)।

§ "अङ्गारेष्वङ्गिराः"—इत्युक्तं पुरस्तात् (२भा० ३३२पृ० ३अ० ३पा० ५ख०), तद्वंशीयः कश्चिदुचथ्यो नाम, ततो जातो दिवोदासः, तद्वंशधर एवासौ परुच्छेप इति।

आरभ्य यावत् "इन्दुः" इति। तेषां पुनः किमर्थ मनुकीर्त्तनम्? विशेषविवक्षया*। कः पुनरसौ? इति,—तेषां कानिचित् "सूक्तभाञ्जि हविर्भाञ्जि" च, सूक्तं च हविश्चोभयं भजन्ते; कानिचित् सूक्त मेव न हविः—"तेषाम् एतानि अहविर्भाञ्जि", तद्यथा—"वेनः, असुनीतिः, ऋतः, इन्दुः" इति। इभ्यो यान्यन्यानि चयोविंशतिः, तान्युभयं भजन्ते सूक्तं हविश्च। देवतास्वभावोपप्रदर्शनार्थ मिदं सूक्तम्। 'घृतेन' —"उदकेन" त्व मात्मानं वर्द्धयस्वेत्येवमाद्यभिधानार्थं विशेषप्रविभागप्रश्नप्रत्ये अहविर्भाक्त्वादुदक मत्र घृत मित्येवमादि तद्गतेषु मन्त्रेषु विशेष उपेक्ष्य इति॥

"प्रजापतिः"†—"प्रजानां पाता वा पालयिता वा"‡। "तस्य एषा भवति"—॥ ५ (४२)॥

---

* वाय्वादीन्द्वन्ताः सप्तदश यथा देवताः, परस्ताद् वक्ष्यमाणाः प्रजापत्यादयस्व तथैव देवता एव, पर मासु देवतासु कश्चिदस्ति विशेषो वक्तव्यः;—वेन इत्यादय चतस्रः सूक्तभाज एवेति।

† १भा० ४७५, ४८२पृ० ५अ० ४ख० (१८)।

‡ 'प्रजापतिर्वा इद मेक एवाग्र आस, सोऽकामयत प्रजायेय भूयान्स्यामिति'—इति ऐ० ब्रा० २, ५, १। "संवत्सरः प्रजापतिर्यं प्रजायमानं विश्वं रूप मिदं मनुप्रजायते"—इत्यादि च ऐ० ब्रा० ३, २, ७। "संवत्सरः प्रजापतिः, सोऽस्य सर्वस्य प्रजनयिता"—इत्यादि च तत्रैव २, ५, ७। "प्रजापतिर्वै स्वां दुहितर मभ्यध्यायत्-दिव मित्यन्य आहुरुषस मित्यन्ये"—इत्याद्याख्यायिका च ऐ० ब्रा० ३, ३, ९। प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्"—इत्याद्याख्यायिका च तत्रैव ४, २, १। "प्रजापतिश्चरति गर्भे अन्तः (य० वा० सं० ३१, १९.)"—इति व्याख्यानावसरे "यः सर्वात्मा प्रजापतिः"—इति, "यो देवेभ्य आतपति (य० वा० सं० ३१, २०)"—इति व्याख्यानावसरे "यः प्रजापतिरादित्यरूपः"—इति चाह महीधरः। "प्रजापतिः स्वां वपा मुदखिदत्"—इत्यस्य भावार्थकथनावसरे द्वादशलक्षणीभाष्ये शावरे "प्रजापतिः वायुरादित्यः पर्जन्यो वा"—इति च।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ प्रजापते न हि त्वदेतान्यन्यः सर्वाणि जातानि तानि परिबभूव* यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणा मित्याशी † रहिंव्याख्यातस्तस्यैषा भवति ॥ ६ (४३) ॥

"प्रजापते न"—इति ‡ । प्राजापत्यस्य हिरण्यगर्भस्यार्षम् । पितृयज्ञउपस्थाने विनियुक्ता; राजसूये च विनियोगो होमे । हे 'प्रजापते!' 'न त्वत् अन्यः' न कश्चिदपि ('एता') "एतानि" सर्वदेवतारूपाणि 'परिबभूव' परिगृह्य भवति; त्व मेवैतानि सर्वाणि सर्वतः परिगृह्य सर्वतो भवसि । यत एवं त्वां वयं सर्वतो विभूतं पश्यामः सर्वस्येशानम्, अतो ब्रूमः—'यत्कामाः ते' येन येन युक्ताः सन्तो वयं तुभ्यं 'जुहुमः', 'तत् नः अस्तु' स कामोऽस्माकं त्वदनुध्यानात् समृद्ध्यताम् नित्य मेव च । "वयं स्याम पतयो रयीणाम्" । 'रयीणां' धनानां 'पतयः' ।—"इति" इयम् अपरा "आशीः" द्वितीया; यत्कामा इति प्रथमा । अथ वा "आशीः"—इति आचार्यो दर्शयति इयं मन्त्रगतैव; यत्रापि न स्यात् तत्राप्यध्याहार्येति, स्तुत्याशिषोर्नित्यसम्बन्धादिति ॥

---

* "परि तानि बभूव" क, ख, ग ।

† "मित्याशि" च-प्रभृतिषु ।

‡ ऋ० सं० ८, ७, ४, ५ । य० वा० सं० १०, २०; २३, ६५ ।

"अहिः" *, "व्याख्यातः" निर्वचनतः—"अहिरयनात्" इति † । इह त्वभिधेयो मध्यमः ॥

"तस्य एषा भवति"—॥ ६ (४३) ॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु‡ षीदन् ॥ अप्सुज§ मुक्थैरहिङ्गृणीषे बुध्ने नदीनां रजःसु॥ (उदकेषु¶) षीदन् बुध्न मन्तरिक्षं बद्धा अस्मिन् धृता आप (इति वा ††) इद मपीतरद् बुध्न मेतस्मादेव बद्धा‡‡ अस्मिन् धृताः प्राणा इति योऽहिः स बुध्न्यो बुध्न मन्तरिक्षं तन्निवासात्तस्यैषा भवति ॥ ७ (४४) ॥**

"अब्जा मुक्थैः"—इति §§ । वशिष्ठस्यार्षम् । दशरात्रस्य चतुर्थेऽहनि वैश्वदेवे विनियोगः । हे स्तोतः ! त्व मेतम् 'अहिम्' ("अब्जाम्") "अप्सुजम्" उदकजन्मानम् 'उक्थैः' 'गृणीषे' स्तौषि । 'बुध्ने' 'नदीनां' "नदनानाम्" अपां बन्धने एतस्मिन्नन्तरिक्षे, वर्त्तमानं 'रजस्सु षीदन्' उदकेषु लभ्यस्थेषु निमित्तभूतेषु एतस्मिन् कर्मणि अङ्गभाव मुपगच्छन् ॥

---

* १भा० ४७५, ४८२पृ० ५ख० ४ख० (२९) ।

† २भा० २२१पृ० २ख० ५पा० ३ख० । विविधं तत्र व्याख्यानं द्रष्टव्यम् ।

‡, ॥ "रजस्सु" क, ख, ग ।

§ "अप्सुजा" क, ख, ग ।

¶, †† नास्त्येते पदे क-ख-ग-पुस्तकेषु ।

**, ‡‡ "बुद्धा" क, ख, ग ।

§§ ऋ० सं० ५, ३, २९, ६ । वैश्वदेवशस्त्रे यत् सूक्तं निविद्धानं तस्येयं षोडशी ।

"बुध्नम् = अन्तरिक्षम्; बद्धा अस्मिन् धृता आपः"—इति। इदम् अपि इतरत्" शरीरं बुध्न मित्युच्यते; "बद्धा अस्मिन् धृताः प्राणाः" —इति। "यः अहिः, सः बुध्न्यः"; एतावांस्तु विशेषः "बुध्नम् = अन्तरिक्षम्, तन्निवासात्" अहिः = बुध्न्यः * ॥

"तस्य एषा भवति"—॥ ७(४४)॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः॥ मा च नोऽहिर्बुध्न्यो रेषणाय धान्मास्य यज्ञोऽस्य च स्रिधद्यज्ञकामस्य सुपर्णो व्याख्यातस्तस्यैषा भवति॥८(४५)॥

"मानोऽहिर्बुध्न्यः"—इति †। पूर्ववत् समानं सर्व मिति। 'मा' अस्मान् 'अहिर्बुध्न्यः' 'रिषे' 'धात्' मा रेषणाय हिंसनाय कस्मैचित् धात्। किञ्च "मा यज्ञो अस्य स्रिधदृतायोः"। मा यज्ञोऽस्य ऋतायोः; अस्य यजमानस्य यज्ञकामस्य मा स्रिधत् मा सुस्रवत्; नित्य मविनाशेन वर्त्तता मिति‡॥

---

* १भा० ४७५, ४८१पृ० ५ख० ४ख० (१०)। तन्निवासादित्युक्त्या "सोऽस्य निवासः"—इत्यस्य (पा० सू० ४, ३, ८९) विषयोऽय मिति बुध्यते; सायणभाष्ये तु "बुध्नेऽन्तरिक्षे भवो बुध्न्यः"—इति, "तत्र भवः (पा० सू० ४, ३, ५३)"—इत्यस्य विषय उक्तो दृश्यते।

† ऋ० सं० ५, ३, १९, ७। "अहिरासौ बुध्न्यश्चेत्यहिर्बुध्न्योऽग्निः"—इति सा०।

‡ "एष ह वा अहिर्बुध्न्यो यदग्निर्गार्हपत्यः"—इत्यादि च ऐ० ब्रा० ३, ६, ११।

"सुपर्णः"*, "व्याख्यातः"; "सुपतनः"—इति†; इह त्वभिधेयो मध्यमः॥

"तस्य एषा भवति"—॥ ८ (४५)॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे। तं पाकेन मनसा पश्यमन्तितस्तं माता रेळ्हि‡ स उ रेळ्हि§ मातरम्॥ एकः सुपर्णः स समुद्रमाविशति स इमानि सर्वाणि भूतान्यभिविपश्यति तं पाकेन मनसापश्यमन्तित इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता तं माता रेढि‖ वागेषा माध्यमिका स उ मातरं रेढि¶ पुरूरवा बहुधा रोरूयते तस्यैषा भवति॥ ९ (४६)॥

"एकः सुपर्णः"—इति**। अग्नेः घर्मस्य वेय मार्षम्। 'एकः' एव अद्वितीयः, यस्य पतने गमने प्रतिमायामम् अन्यं द्वितीयं नास्ति। 'सः' 'सुपर्णः' सुपतनो वायुः 'समुद्रम्' अन्तरिक्षम् नित्यम् ('आविवेश') "आविशति" न कदाचिदप्यनाविष्टस्तत्र। 'स' च पुनः सर्वभूतानुप्रवेशी, तदा विपश्य 'विश्वं' 'भुवनं' "सर्वाणि इमानि

---

* १भा० ४७५, ४८२ पृ० ५अ० ४ख० (३१)।

† १भा० ३०२पृ० ६ख० ३पं०; ३७८पृ० २ख० ३पं०। उपरिष्टाच्च वक्ष्यति—"द्वा सुपर्णा"—इत्यादि परि० १३, ४, २।

‡,§,‖,¶ अत्र सर्वत्रैव "रेळ्हि"—इति क, ख, ग।

** ऋ० सं० ८, ६, १६, ४। एतस्य च मन्त्रस्य सायणीयं व्याख्यानं द्रष्टव्यम्।

भूतानि" ('विचष्टे') "अभिविपश्यति"। यथा द्रष्टव्यानि 'तम्' एवं वर्त्तमानं अहं 'पाकेन मनसा' विपक्वप्रज्ञानेन * सर्वगत मपि सन्तम् अन्तिकम् इव 'अपश्यम्'। ऋषिर्दृष्टदेवतास्तत्वः, कस्मैचिदाचचाणो ब्रवीति—"तं माता रेरिह स उ रेरिह मातरम्"। 'माता'="माध्यमिका" वाक्, 'तम्' उपजीवति; परस्पराश्रयत्वात्तयोर्वृत्तेरध्यात्मवदिति ॥

"पुरूरवाः" † मध्यमः। विज्ञायते हि—"प्राण एव हि पुरूरवाः" इति। स "बहुधा रोरूयते" स्तनयति, तेन पुरूरवाः ॥

"तस्य एषा भवति"—॥ ९ (४६) ॥

समस्मिञ्जायमान आसत ग्ना उतेमवर्धन्नद्यः१ स्वगूर्त्ताः। महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥ समासतास्मिञ्जायमाने ग्ना गमनादापो देवपत्न्यो वापि चैन मवर्धयन्नद्यः (स्वगूर्त्ताः ‡) स्वयङ्गामिन्यो महते च यत्त्वा पुरूरवो रणाय रमणीयाय सङ्ग्रामायावर्धयन् दस्युहत्याय च देवादेवाः § ॥ १० ॥ (४७) ॥

॥ इति दशमाध्यायस्य चतुर्थः पादः ॥ १० । ४ ॥

---

* "पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मा"—इत्याद्युक्तं पुरस्तात् द्रष्टव्यम् १भा० ३०२पृ० ६ख०।

† १भा० ४७५, ४८२पृ० ५अ० ४ख० (२१)।

‡ नैतत् पदं मस्ति क-ख-ग-पुस्तकेषु।

§ "देवाः"—इत्येक मेव च-प्रभृतिषु।

"समस्मिन् जायमानः"—इति *। उर्वश्या आर्षम् †। ('अस्मिन्') एतस्मिन् पुरूरवसि 'जायमाने' वर्षकर्मणि आत्मानं प्रति लभमाने प्रावृट्काले; "कर्मजन्मानः"—इति दुर्गम् ‡। 'समासत ग्नाः' "आपः" समागम्य तं परिवार्य, तद्विधेयता मुपगम्य 'आसते' तिष्ठन्ति। 'उत' अपि च यथायथैव ऋतुवशात् वर्षासु नद आरोहति, तथातथैनं ताः 'नद्यो' नदना आपः, 'स्वगूर्त्ताः' "स्वयं गामिन्यः" भूत्वा सुतरां तद्विधेयता मुपगच्छन्त्यः, तदधिकारोद्भवेन ('ईम्') "एनम्" ('अवर्द्धन्') वर्द्धयन्ति। अतः परं स्तूयमानः (प्रत्यक्षीभूतः §) प्रत्यचक्षत उत्तरोऽर्द्धर्चः। हे 'पुरूरवः!' 'यत् त्वा महे रणाय' यस्मात् त्वां "महते रणाय" मेघेन सह "रमणीयाय" सङ्ग्रामाय 'अवर्द्धयन्' वर्द्धयन्ति माध्यमिका "देवाः"। 'दस्युहत्याय' मेघवधाय चेति। तस्मात् त्वा मवश्यं ग्नाः समागम्यासते, वर्द्धयन्ति च नद्यः; सर्वथापि महानुभावः त्वं सर्व मेव त्वय्युपपद्यते इति॥

"देवपत्न्यः ग्ना"—इति ‖। पृथक्त्वेन दर्शयति, तथापि योज्यते। समागम्यैतस्मिन्नीडे पुरूरवसि 'आसत ग्नाः' सर्वा देवपत्न्यः ¶; स हि

---

* "ऋ॰ सं॰ ८, ५, २, १। अत्र च "उर्वशी हाप्सराः पुरूरवस मैडं चकमे"—इत्यादि वाजसनेयकाख्यानं द्रष्टव्यम्। श॰ ब्रा॰ ११, ५, १।

† "अनयैताभिः सह संसर्गस्त्वयानुभूत इत्युर्वशी वदति"—इत्यादि सायणीयं भाष्य मत्र द्रष्टव्यम्।

‡ २भा॰ ३१२, ३१८पृ॰ ७अ॰ १पा॰ ५ख॰।

§ नास्त्येषोंऽशः क-ख-पुस्तकयोः।

‖ उपरिष्टाच्च ग्रन्थान्तिमे वक्ष्यति—"तुग्र ग्ना"—इत्यस्य व्याख्यानाय निर्वचनावसरे "देवपत्न्यः"—इत्यादि।

¶ "ग्नाः अप्सरसो देववेश्याः"—इति सा॰ भा॰। उक्तं पुरस्तात् 'मेना ग्ना इति स्त्रीणाम्"—इत्यादि। २भा॰ २५६पृ॰ ३अ॰ ४पा॰ ५ख॰।

स्त्रीणां स्वभावो यत् प्रजायमानां स्त्रियं परिवार्यासते। 'उत ईम् अवर्द्धन्' अपि चैत मवर्द्धयन्। मदना ग्नाः स्तुतिपराः, तस्य 'स्वगूर्त्ताः' "स्वयं गामिन्यः" अपरप्रणेयाः ईश्वराः। अपि च सर्वं मेतदुपपद्यते; पुरूरवस्त्वयि, यस्मात् "महते" 'रणाय' "रमणीयाय" "सङ्ग्रामाय" असुरैः सह, 'दस्युहत्याय' शत्रुवधाय अवर्द्धयन् स्वैर्महिमभिः त्वम् नः असुरान् जेष्यसीति पुरस्कुर्द्देवा इति॥

द्विरभ्यासोऽध्यायपरिसमाप्तौ; यस्मात्स्यते समाप्तम्॥१०(४७)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ पञ्चदशस्य* (दशमस्य) अध्यायस्य चतुर्थः पादः॥१०।४॥

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ पञ्चदशोऽध्यायः† (दशमोऽध्यायः) परिसमाप्तः॥१०॥

---

*,† १भा० १४१पृ० "¶" द्रष्टव्यम्।

((१)अथातोमध्यस्थाना(२)वायवा(३)सस्त्राणा(४)सोनीचीनबा(५)रन्त-
(६)मूर्ध्नि(७)मारुद्राय(८)यातेदिद्यु(९)ज्जराबो(१०)धादर्हन्धोजात(११)एवविष्ट-
(१२)ष्टानश्चापि(१३)नद्धमश्मास्य(१४)ङ्क्षेत्रस्यपतिः(१५)क्षेत्रस्यपतिना(१६)क्षेत्र-
स्यते(१७)पऽमीवहा(१८)पुनरेहि(१९)योअग्नि(२०)धोपरेयिवांसं(२१)सेनेव(२२)मि-
(२३)चोहिरण्यगर्भा(२४)येते(२५)विश्वकर्मासर्व(२६)स्यविश्वकर्मा(२७)विमनावि-
श्वकर्म(२८)न्त्य(२९)मूषुसद्य(३०)श्चिद्यस्त्वया(३१)मन्यवाद(३२)धिक्राःसविताय-
(३३)न्त्रैहिरण्य(३४)स्तूपोदेव(३५)स्त्वष्टावात(३६)आवातु(३७)प्रतित्य(३८)मभित्वावे-
नो(३९)वेनते(४०)रयंवेनो(४१)ऽसुनीत(४२)ऋतस्यहि(४३)प्रतद्वोचेयं(४४)प्रजापतेऽ-
ज्ञामुक्(४५)थैमानो(४६)हिरेकः(४७)सुपर्णःसमस्मिन् सप्तचत्वारिं-
शत् ॥ *)

॥ इति निरुक्ते (उत्तरषट्के) दशमोऽध्यायः

समाप्तः ॥ १० ॥

---

* १भा० १४६पृ० "**" द्रष्टव्यम् ।

॥ अथ एकादशाध्यायः ॥

तत्र,

॥ प्रथमः पादः ॥

ॐ३म् । श्येनो व्याख्यातस्तस्यैषा भवति ॥ १ ॥

॥ श्रीः ॥ "श्येनः"* व्याख्यातः,—"श्येनः शंसनीयं गच्छति" —इति†; इह त्वभिधेयो मध्यमः ॥

"तस्य एषा भवति"—॥ १ ॥

आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतञ्च साकम् । अत्रा पुरन्धिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥ आदाय श्येनोऽहरत्सोमं सहस्रं सवानयुतञ्च सह सहस्रं सहस्रसाव्य मभिप्रेत्य तत्रायुतं सोमभक्षास्तत्सम्बन्धेनायुतं दक्षिणा इति वा तत्र पुरन्धिरजहादमित्रानदानानिति वा‡ । मदे सोमस्य मूरा अमूरः§ । ऐन्द्रे च सूक्ते सोमपानेन च स्तुतस्तस्मादिन्द्रं मन्यन्त ओषधिः सोमः सुनोतेर्यदेन मभिषुण्वन्ति बहुल

* १भा० ४८०पृ० ५ख० ५ख० (१) ।

† २भा० ४७१, ४७२पृ० ४ख० ४पा० २ख० ।

‡ "दानानीति वा" क, ख, म ।

§ "अमूर इति" च-प्रभृतिषु ।

मस्य नैघण्टुकं वृत्त माश्चर्य मिव प्राधान्येन तस्य पावमानीषु निदर्शनायोदाहरिष्यामः ॥ २ ॥

"आदाय श्येनः"—इति*। वामदेवस्यार्षम्। श्येनाजिरादिषु मरुत्वतीये शस्यते, ऋत्विग्भिर्विधानतः†। अत्तं 'श्येनः' इन्द्रः‡ 'सोमम्' 'आदाय' 'अभरत्' अपिबत्। क? 'सहस्रं सवान्' सहस्रं सुत्यानां यत्र कुर्वन्ति, 'अयुतं च' दक्षिणाः प्राप्नुवन्ति; न तु दीयन्ते, सत्रत्वात्; पृष्ठ्यशमनाभिप्रायं वा§ दक्षिणादानं स्यात्, सहस्रसाव्ये सत्रे तेषां तत्सम्बन्धात्। 'अत्रा पुरन्धिः' अत्र अस्मिन् सहस्रसाव्ये सत्रे सः श्येनः 'पुरन्धिः' बहुनो धनस्य दाता। 'मदे' 'सोमस्य' हृष्टौ, सोमस्य प्राप्तायाम् 'अजहात् अरातीः'‖ असुरानमित्रान् पृथक्त्वपक्षे अभ्यजयत्; प्राणैर्मूढान् अप्रतिपत्तिकान् कृत्वा विषादमुपनीय अमूढो निःसाध्वसः। चित्वपक्षे तु "अदानान्"—"इति वा"। रातिर्दानार्थः, तत्प्रतिषेधेनारातिः; प्राक् सोमपानमदप्राप्तेः। अदानानिति न दास्यामीत्येवन्धियो ('मूराः') मूढमतयः, कार्पण्यसंयुक्ताः ये आसन्, तान् प्रति 'सोमस्य मदे' प्राप्ते ('अमूरः') अमूढः अकृपणो भूत्वा 'अजहात्' अत्यजत्, दाता सम्पेदे ॥

---

* ऋ० सं० ३, ६, १५, ७। "सुपर्णात्मना अस्य स्तूयते चतस्त्रासां परमस्य देवता"—इति सा० भा०।

† "श्येनाजिराभ्या मभिचरन् यजेताहं मनुर्गर्भे नु सन्"—इति श्रा० सू० ९,७।

‡ "गायत्री श्येनो भूत्वा दिवः सोममाहरत्" इत्यादि च श० ब्रा० ३, ९, ४, १०।

§ "पृष्ठ्यशमनीयाभिप्रायेण वा"—इति क, ख।

‖ "अरातीः शत्रून्। * * *। अरातिशब्दः स्त्रीलिङ्गः"—इति सा० भा०।

सहस्रसाव्य मभिप्रेत्य तत्सम्बन्धेनायुतं दक्षिणा इति वा। "इति वा"-शब्देन किं विकल्प्यते;—सहस्रसाव्यं वा सत्रम्? यत् पठन्ति याज्ञिकाः। तद्यथा—(अतिरात्रयोर्मध्ये सहस्र महानि शतक्कत्वो दशरात्रस्यावृत्तिरग्नेः सहस्रसाव्य मिति।*) तदह्नां सहस्रं दशभिस्र-मसैर्गुणितं चमसपरिसङ्ख्ययोपलक्ष्यमाण† मयुतं सोमभक्षाणां सम्पद्यते। सोमभक्षनिष्क्रयणश्रुतिश्च दक्षिणाना मस्ति;—"यां सदस्येभ्यो ददाति सोमपीथं तया निष्क्रीणीत" इति; न चासति प्रसङ्गे रूढिबाधो न्याय्य इति। असत्यपि ऋत्विग्दक्षिणादानसम्बन्धे सहस्रसाव्य मेव सत्राणां प्रायपंक्ताभिप्रायं वा अयुतम्। अथ वा सहस्र मिति बहुनाम। 'सहस्रं सवान्' अभिषवा बहवः, प्रति-सवन मभिषव मभिप्रेत्य यस्मिन् कस्मिंश्चिद्दक्षिणावति सोमे अयुतं च दक्षिणाः, बह्व्य इत्यर्थः; अस्ति हि प्राप्तिः विशेषशब्दाः सामा-न्येषु भवन्तीति। तद्यथा—हिमेनोदकेनेति। अदक्षिणत्वात् सत्राणा मेवं वेत्यभिप्रेत्य वा शब्दं चकार॥

"सोमः"—इति‡ वक्तव्यम्। स पुनरेषः "ओषधिः" सोमः, हैमवतो मौजवतो वा। स कस्मात्? "सुनोतेः", "षुञ् अभिषवे (स्वा० उ०)"—इत्यस्य; अभिषूयते ह्यसौ यज्ञे। "यदेन मभि-षुण्वन्ति"—इति कर्मकारकं दर्शयति। स कथम्? मध्यमस्थानो

* रोथ्स-हस्तेषु हस्तिपुस्तकेषु नैषोंऽशोऽस्ति।

† "चमसपरिसङ्ख्ययोपलक्षणम्"—इति रोथ्स-हस्तम्।

‡ १भा० ४८२पृ० ५ख० ५ख० (२)।

भवति हि त मधिकृत्य—"यत्ते सोम! दिवि ज्योतिः (य० वा० सं० ६, ३३)"—इति, "सोमो वै राजस्तस्य चन्द्रमास्तृतीय मयं यः पवते स तृतीय मिति स तनूकरणे तं सर्वं स्वतनूभूत माप्याययति (श० ब्रा० ३, ९, ४, १२)"—इति। तस्मादस्यैव स्वा तनूर्यच्चन्द्रमाः, रसात्मकत्वात्। वायुर्वा सोऽय मेव मात्मान मापाय्याभिषूयत इति भवति स मध्यमः* ॥

"बहुल मस्य नैघण्टुकं वृत्तम्" अस्यार्था स्तुतिः परार्था। तद्यथा—प्रायः पावमानं मण्डलम् "आश्चर्य मिव प्राधान्येन"। स्वप्रधाना स्तुतिः; क्वचिदाश्चर्यं चिचतः स्तुतिः स्यात्। "तस्य पावमानीषु" खलु† "निदर्शनाय" उभयम् "उदाहरिष्यामः";—परार्थत्वं स्तुतेः स्वार्थत्वञ्च। परार्थं तावदुदाह्रियते, तद्यथा— ॥ २॥

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥ इति सा निगद्व्याख्यातार्थैषापरा भवति चन्द्रमसो वैतस्य वा॥ ३॥

"स्वादिष्ठया मदिष्ठया"—इति‡ मधुच्छन्दस आर्षम्। पावस्तोत्रे विनियोगः। हे 'सोम!' 'स्वादिष्ठया' स्वादुतमया, 'मदिष्ठया' मादयितृतमया च त्वं 'धारया' 'पवस्व' प्रक्षर। किमर्थम्?

---

* "दिवि सोमो अधि श्रितः (ऋ० सं० ८, २, १०, १)"—एष च मन्त्रांशो विशेषेण विचार्यः।

† ऋक्संहिताया नवमं मण्डलं सर्व मेव पावमानम्, अतस्तत्र सूक्ताः सर्वा एव ऋचः पावमान्य इति। पवमानः सोमो देवता यासां ता एव पावमान्यः, "स्वादिष्ठया"—इत्याद्याः; पवमानवेदीषु व्यवहार्याश्च।

‡ ऋ० सं० ६, ७, १९, १। सा० सं० छ० आ० ५, २, ४, २।

'इन्द्राय' इन्द्रार्थम्, 'पातवे' पानाय 'सुतः' अभिषुतः । इन्द्रार्थं पचस्वेत्यस्यार्थता लक्ष्यते ॥

"अथ एषा अपरा भवति, चन्द्रमसो वा एतस्य वा"—इति । अथ-शब्देन विशेषाधिकारवाचिना स्वप्रधानता स्तुतेरधिकरोति । चन्द्रमसो वेति चन्द्रत्व मापन्नस्याप्योषधिसोमस्य वा, यथोक्तम्—"स तनूकरणे" (१६४ पृ० ३पं०); इतरथा ह्यप्राकृतप्रक्रिया स्यादनधिकारादस्मिन् प्रक्रमे चन्द्रमसः । चन्द्रमसो वाधिदैव मापन्नस्य । ओषधिसोमस्य वाधियज्ञ मापन्नस्य । तदेतदुभयथा प्रदर्शयति— ॥ ३ ॥

सोमं मन्यते पपिवान्यत्सम्पिंषन्त्योषधिम् । सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ सोमं मन्यते पपिवान्यत्सम्पिषन्त्योषधि मिति वृथासुत मसोम माह सोमं यं ब्रह्माणो विदुरिति न तस्याश्नाति कश्चनाय-ज्वेत्यधियज्ञ मथाधिदैवतं सोमं मन्यते पपिवान्यत्सम्पि-षन्त्योषधि मिति यजुः सुत मसोम माह सोमं यं ब्रह्माणो विदुश्चन्द्रमसं न तस्याश्नाति कश्चनादेव इत्यथैषापरा भवति चन्द्रमसो वैतस्य वा ॥ ४ ॥

"सोमं मन्यते"—इति * । सूर्याया आर्षम्; विवाहे विनि-

---

* ऋ० सं० ८, ३, २०, ३ । "स्वपतिं सोमं सूर्या स्तौति"—इति सा० भा० (१) । सूर्या च सवितृसुता ।

योगः * । 'यत्' 'सम्पिषन्ति' सञ्चूर्णयन्ति अभिषुत्य पिबन्ति सोमम् ओषधिम् केचिद्रासायनिकाः । ते मन्यन्ते सोमं पपिवांसः सोम मपास्य मिति †, न च पुनस्ते सोमपाः; वृथा सोमः स इति । अनेन तावदर्द्धर्चेनायं मन्त्र एवं "वृथा सुत मसोम माह" पाहंश्च । अथ कः सोमः ? के च सोमपाः ? यतो ब्रवीति—"सोमं०—०कश्चन" । 'यं' ब्राह्मणाः 'सोमं विदुः' अधियज्ञे अङ्गभूतम्, 'न तस्य अश्नाति' 'कश्चन' "अयज्वा" अनधिकृतो यजमानत्वेन । "इति अधियज्ञम्" इति विषय मुपप्रदर्शयति ॥

"अथाधिदैवतम्"—इति विषयान्तर मधिकरोति । उक्तं हि "चन्द्रमसो वा"—इति, तदुपप्रदर्शनार्थ माह—"सोमं०—०षधिम्" —"इति" "यजुः" । "सुतम्" अधियज्ञं चन्द्रमस मपेक्ष्य "असोम माह"; यथा पूर्वस्मिन् रासायनिकसोमस्यासोमत्व मधियज्ञ मपेक्ष्य, एव मिहाप्यधियज्ञसोमस्यासोमत्व मधिदैवसोमं चन्द्रमस मपेक्ष्य । एवं कृत्वा 'सोमं' 'यं' 'ब्राह्मणाः' 'विदुः' "चन्द्रमसम्", 'न तस्य अश्नाति' 'कश्चन' "अदेवः इति"; देवानां हि भक्ष्यत्वेन विपरिणतश्चन्द्रमाः; "सोमो नून मेष तद्देवाना मन्नम्"—इति ह विज्ञायते ‡ । एव मस्य स्वप्रधाना सोमस्य स्तुतिः § ॥

* "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्"—इत्याद्याख्यायिका चात्र द्रष्टव्या । ऐ॰ ब्रा॰ ४, १, ७ ।

† "सोम मपास्म इति"—इति क, ख ।

‡ तथा च देवीपुराणे ग्रहणविवेकनामाध्याये—"पितेव सूर्यो देवानां सोमो मातेव लक्ष्यते । यथा मातुः स्तनं पीत्वा जीवन्ते सर्वजन्तवः । पीत्वामृतं तथा सोमात् तृप्यन्ते सर्वदेवताः ॥"—इत्यादि ।

§ मन्त्रस्यैतस्य सायणीयव्याख्या च यत्नतो द्रष्टव्या ।

"अथ एषा अपरा भवति चन्द्रमसो वा एतस्य वा"। सा किमर्थम्? "आश्चर्य मिव प्राधान्येन" इत्युक्तम् (१६२पृ०, १पं०)। तथा चेयम् 'अपरा' अन्या स्वार्थप्राधान्या स्तुतिरप्यस्ति सोमस्ये-त्युपप्रदर्शनार्थमाह—॥ ४ ॥

यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः। वायुः सोमस्य रक्षिता समानां मास आकृतिः॥ यत्त्वा देव प्रपिबन्ति तत आप्यायसे पुनरिति नाराशंसानभिप्रेत्य पूर्वपक्षापरपक्षाविति वा वायुः सोमस्य रक्षिता वायु मस्य रक्षितार माह साहचर्याद्रसहरणाद्वा समानां संवत्सराणां मास आकृतिः सोमो रूपविशेषैरोषधि-श्चन्द्रमा वा चन्द्रमाश्चायन् द्रमति चन्द्रो माता चान्द्रं मान मस्येति वा चन्द्रश्चन्दतेः कान्तिकर्मणश्चन्दन मित्यप्यस्य भवति चारु द्रमति* चिरं द्रमति चमेर्वा पूर्वं चारु रुचेर्विपरीतस्य तस्यैषा भवति॥ ५॥

"यत्त्वा देव"—इति†। यदा त्वां हे 'देव!' सोम! 'प्रपि-बन्ति' प्रारभन्ते सोमं पातु मृत्विग्-यजमानाः, त्रिषु सवनमुख्येषु। तदा किम्? इति—"तत आप्यायसे पुनः"। 'ततः' अनन्तरम्

---

* "द्रवति" क, ख, ग।
† ऋ० सं० ८, ६, १०, ५।

'पुनः आप्यायसे'। तदुक्त मधियज्ञे—"आप्यायन माप्यायस्व 'सं ते पयांसि'—इति* भक्ष्यशेषान्"—इति†। "वायुः सोमस्य रक्षिता"—इति, वायव्येष्वसौ पात्रेषु गृहीतो रक्ष्यत इति "वायु मस्य रक्षितार माह" मन्त्रदृक्; "साहचर्याद् रसहरणाद् वा" वायुसहचरितो ह्यसौ; तेन नित्यं सहचरणादविनाभावात्कर्मणः, रसहरणाद् वा सर्वरसापहारी वायुः समर्थः सन् यत्र शोषयति सोमम्, तेन सोमो रक्षितो भवति‡। "समानां मास आकृतिः"। 'मासः' "माता" निर्माता सोम ओषधिः; सर्वस्य किलौषधिः। 'सोमस्य' चन्द्रमसः कलोपचय मनु प्रत्यह मेकैकस्येनकला इव चन्द्रमसः पर्णान्युपचीयन्ते, स पौर्णमास्यां पञ्चदशपर्णः सम्पद्यते, पौर्णमास्याः पुनः परतः कलाहानौ चन्द्रमस इव एकैकं पर्ण मपचीयते इति ओषधेः सोमस्य चन्द्रमसः सम्पद्यते। तदायुर्वेदविदः सोमलक्षणं रसायनतन्त्रे स्मरन्ति। अमुना प्रकारेणोपचयापचयाभ्यां पर्णानां सोमलक्षणद्वारेण 'समानां' "संवत्सराणाम्" 'आकृतिः' आकर्त्ता भवति "सोमः रूपविशेषैः"। तदेवं पर्णाना मुपचयापचयाभ्या मन्यदन्यद्रूपं प्रतिपद्यते एव मधियज्ञेऽपि स एव ओषधिः सोमः॥

अथाधिदैवे—"यत्त्वा देव प्रपिबन्ति"—इति। अपरपक्षेषु पीयते रश्मिभिः§। तदुक्तम्—"य मक्षिति मक्षितयः पिबन्ति"

---

* ऋ० सं० १, ६, २२, ३; य० वा० सं० १२, ११३; सा० सं० आ० ३, १।

† आ० सू० २, १०.—५, ६; का० सू० १०, ३, १९. च द्रष्टव्यम्।

‡ "वायुगोपा वनस्पतयः इति श्रुतेः। एवं वल्लीरूपसोमपक्षे योजना" इति सा०।

§ "चन्द्रमा वै सोमो देवाना मन्नम्"—इत्यादि वाजसनेयकम्।

इति *। "तत् आ प्यायस्व पुनः" तं पूर्वपक्ष माप्याययन्तीति। तदप्युक्तम्—"यथा देवा अंशु माप्याययन्ति" इति †। वायुं सोमस्य चन्द्रमसो रक्षितार माह; एष ह्येनं सूक्ष्मया रश्मिनाड्या सुषुम्नाख्यया पुनर्यथाकाल मापूरयति ‡। 'समानां' "संवत्सराणाम्" 'मासः' चन्द्रमाः=सोमः, लक्षणत्वात् मासः द्वादशकृत्वो मासभूत मात्मान मावर्त्तयन् संवत्सराणां कर्त्ता भवति। "रूपविशेषैः"—इति। कलाना मुपचयापचयविशेषाभ्यां रूपविशेषाश्चन्द्रमसः प्रति तिथि भवन्ति §॥

"स्वादिष्ठया मदिष्ठया"—इत्यस्या मपि केचित् अधिदैव मर्थं व्याचक्षते ‖। तन्मतेनोच्यते— हे 'भगवन्!' 'सोम!' चन्द्र! 'स्वादिष्ठया' अतिशयेन स्वादुतमया, 'मदिष्ठया' अतिशयेन मदयितृतमया 'पवस्व' प्रक्षर 'धारया' प्रत्यह मेकैककलया; 'इन्द्राय' सूर्याय 'पातवे' 'सुतः' आपूरितः सुषुम्नेन रश्मिना॥

"चन्द्रमाः" ¶ कस्मात्? स हि "चायन्" य एयन् सर्वभूतानि उपर्यवस्थितो "द्रमति" गच्छति; चायतेः पूर्वपदम्, द्रमतेरुत्तरपदम्। अथ वा "चन्द्रो माता" चन्द्रश्चासौ माता च निर्माता सर्वस्येति चन्द्रमाः; चन्द्रः पूर्वपदम्, मातोत्तरपदम्। "चान्द्रं मान

*,† ५अ० १पा० ६ख०; १भा० ५७, ५९पृ०।

‡ "वायुश्च सोमस्य तव रक्षिता, वाय्वधीनत्वाच्चन्द्रगतेः"—इति सा० भा०।

§ सप्तचत्वारिंशदृचं सोमसूक्तं सर्व मेव पर्यालोच्यम्(ऋ०सं०१०म०७अनु०१सू०)।

‖ अधियज्ञोऽर्थस्तु पूर्वमेवोक्तः (१९४पृ० २ख०)।

¶ १भा० ४८६पृ० ५अ० ५ख० (३)।

मस्य—इति वा" चन्द्रमाः; चन्द्रः पूर्वपदम्, तदेवोत्तरपदम्; केवलं तु समानाधिकरणः पूर्वः, बहुव्रीहिरुत्तरः॥

अथ "चन्द्रः" कस्मात्? "चन्दतेः कान्तिकर्मणः"; नित्यकान्तो ह्यसौ।——। "चन्दनम्"—इत्यप्यस्यैव चन्दतेर्भवति; तदपि हि कान्तम्। अथ वा "चारु द्रमति" चारुशब्दात् पूर्वपदम्, द्रमतेः (१भा० २५६पृ०) उत्तरपदम्, चार्विति द्रमतिक्रियाविशेषणम्। अथ वा "चिरं द्रमति"; तदेवोत्तरपदम्, चिरशब्दात् पूर्वपदम्। "चमेः (भ्वा० प०) वा पूर्वम्" द्रमतेरेवोत्तरपदम्; कोऽर्थः; चम्यमानो भक्ष्यमाणो देवैरसौ द्रमतीति चन्द्रमाः*॥

अथ "चारु" कस्मात्? "रुचेः (भ्वा० आ०)" आद्यन्त-"विपरीतस्य" दीप्तिकर्मणः॥

"तस्य† एषा भवति"—॥ ५॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्। भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः॥ नवोनवो भवति जायमान इति पूर्वप-

---

* "एकया प्रतिधा पिबत् (ऋ० सं० ६, ५, १९, ४)"—इति चात्र मन्त्रलिङ्गम्; "न ते अश्नाति पार्थिवः (ऋ० सं० ८, २, १०, ४)"—इति श्रुतेश्च मानवाकं तत्पानशक्तिरिति च ज्ञायते।

† नात्र तच्छब्दः पूर्वपरामर्शी, चारुपदस्य नैघण्टुकसमाम्नायेऽदर्शनात्; अपि तु बुद्धिस्थपरामर्शी। अतः "तस्य"—इत्यस्य नैघण्टुकपाठप्रक्रान्तस्य चन्द्रमसः इत्यर्थो बोद्धव्यः।

क्षादि मभिप्रेत्याह्नां केतुरुषसा मेत्यग्र मित्यपरपक्षान्त मभिप्रेत्यादित्यदैवतो द्वितीयः पाद इत्येके भागं देवेभ्यो विदधात्यायन्नित्यर्द्धमासेज्या मभिप्रेत्य प्रवर्द्धयते चन्द्रमा दीर्घ मायुर्मृत्युर्मारयतीति सतो मृतं च्यावयतीति (वा*) शतबलाक्षो मौद्गल्यस्तस्यैषा भवति ॥ ६ ॥

"नवोनवो भवति"—इति [†]। सूर्याया आर्षम्। दूणाशे चान्द्रमसे चरौ विनियोगो राजयक्ष्मगृहीतेष्टौ च। "नवोनवो भवति जायमानः" चन्द्रमाः, प्रतीच्यां दिशि पूर्वपक्षादुपक्रम्य, उपक्रान्तवृद्धिः; अस्तं गते आदित्ये पश्चादादित्यस्य प्रतिमासं जायमानो नवोनवो भवति। "अह्नां केतुरुषसा मेत्यग्रम्"—"इति अपरपक्षान्त मभिप्रेत्य" अपरपक्षान्तेषु प्राच्यां दिशि प्रक्षीणः कलामात्रावशेषः 'अह्नां केतुः' लक्षणम्; तत्कलोपचयापचयाभ्यां हि प्रतिपत्प्रभृतीन्यहानि लक्ष्यन्ते; अथ वा 'अह्नां केतुः' कर्त्ता स्वगतिविशेषैः 'उषसा मेत्यग्रम्' इति। उषसो यः प्रकाशः, तस्य प्रान्ते पुरस्तात् उद्यतः सूर्यस्य दृश्यते। स पुनरेष एवं पर्यायेण प्रतीचीप्राच्यौ दिशौ 'आयन्' पूर्वपक्षापरपक्ष एकैकशोऽपि पूर्णमास्यमावास्ययोः आगत्य कालौ भिन्दन् (हविर्भागं वा[‡]) विभागेन यथाविभागं 'देवेभ्यो भागं' 'विदधाति' एककर्मेऽपि पूर्वपक्षात् पौर्णमास्यमावा-

---

* नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

† ऋ० सं० ८, ३, १९, ४। इय मपि तत्रैव सोमसूक्ते एकोनविंशी।

‡ नैषोऽंशः क-पुस्तके।

स्ययोः स्वगत्या काले तिथिं विभज्य देवेभ्यो ददाति विभागदाने हेतुर्भवति, पूर्णे चन्द्रमसि उपचये पौर्णमास्यदर्शनेऽमावास्याया मिति ह विज्ञायते। य एवं करोति 'चन्द्रमाः', सः 'प्र तिरते'—प्रवर्द्धयते ईजानानां 'दीर्घम् आयुः'। वय मपि च यजामहे, त मनेन हविषा। अतः सोऽस्माक मप्येतत् करोतु।—इत्येतदाशास्महे॥

"आदित्यदैवतो द्वितीयः पाद इत्येके"। "पूर्वापरं चरतो माययैतौ"*—इत्यतोऽनन्तर मेवेयम्, मैत्रावरुणीये समाने हविषि विनियोग इत्यपेक्ष्येय मपि सौर्याचन्द्रमसीति अह्नां केतुरित्यतो विशेषलिङ्गाद् ब्रवीति—"आदित्यदैवतो द्वितीयः पादः" इति। तदर्थयोजना—यः 'चन्द्रमाः' "नवोनवो भवति जायमानः", यश्च "भागं देवेभ्यो विदधात्यायन्", यश्च 'प्रतिरते दीर्घ मायुः', सोऽस्माक मप्येतत् करोतु। अयं यश्च सूर्यः 'अह्नां' ('केतुः') कर्त्ता, उदयास्तमयाभ्याम्; 'उषसां' च 'अग्रम्' 'एति' मुख्यत्व मागच्छति, तत्कृतत्वादुषसो जन्मनः; तद्रश्मिप्रान्तप्रोत्सार्यमाणे हि तमस्युषसो जायन्तेऽतः स तासां जनयितेति मुख्यः। अतः सोऽस्माक मेतदेवं करोतु।—इत्येतदाशास्महे॥

इह कथं चन्द्रमा मध्यस्थानः?—ननु सूर्यात् परतः शतसहस्रे योजनानां चन्द्रमसः स्थान मिति पौराणिकाः स्मरन्ति। सत्यं स्मरन्ति; कर्मसंयोगेन तु द्युस्थानत्वे सति सर्वदेवतानां विशेषतः स्थान-

* ऋ० सं० ८, ३, १२, २। इयं खलु तत्र सोमसूक्तेऽष्टादशी। अत्र हि सूर्याचन्द्रमसोरुभयोरपि वर्णनं स्फुट मिति अतोऽनन्तरायाः "नवो नवो भवति"—इत्यस्या द्वितीयः पादो आदित्यदैवत इति नाचष्टत इति भावः।

नियमो विवक्षितः; तदेतदैन्द्रं कर्म रसानुप्रदानं वृत्रवधो बलकृति रिति; तथा बाहुल्येनैन्द्रेषु दृष्टत्वात्, बलकृतिश्च चन्द्रे दृष्टा, यथा —"वृधेरजेत दुर्मतिम्" *; प्रसिद्धं चेदम् इन्दुः = चन्द्रः इति; रसात्मकत्वाच्चन्द्रमसो रसानुप्रदानसम्बन्धः। एवञ्चेदिन्द्रश्चन्द्रमाः, तस्य मेघवधाधिकारसम्बन्धः, कर्त्तृत्वेन सूर्यादर्वागिति युक्तं मध्यस्थान-श्चन्द्रमाः। अपि च ओषधिसोमश्चन्द्रमा भवति अधियज्ञ मापन्नः, स चेन्द्रस्यान्नम्, अन्नं चान्नादस्यात्मसाद्भवति, अद्यमानस्यानन्यत्वेनाव-स्थानादित्यतो युक्तं मध्यस्थान इति। यथा च सर्वगतो वायुर्विशेषतो मध्यस्थान इत्येव मित्यतोऽदोषः † ॥

"मृत्युः"—इति ‡ वक्तव्यम्। स कस्मात्? "मारयतीति सतः" मध्यमो हि प्राणो मृत्युः, उत्क्रामन् शरीरादितरैः प्राणैः प्राणिनो वियोजयति; एवं मारयति। विज्ञायते हि— "प्राण मनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति"—इति। अथ वा "मृतं च्याव-यति" य एवोपक्षीणायुर्भवति, उपक्षीणकर्मा, त मेवासावपगमनेन

---

* इन्दुपदनिर्वचनावसरे प्रदर्शितोऽसौ मन्त्रः पुरस्तात् (१४९पृ० १ख०)।

† एष सिद्धान्तो नास्माकं मनोहरति; इन्द्रस्य वायोर्वा स्थान मन्तरिक्षम्, चन्द्र-मसोऽपि तदेवेति स्थानैक्यात् इन्द्रवायुभक्तित्वेऽपि न तु इन्द्रत्वं नापि वायुत्वम्; न हि पृथिव्यादीना मग्निभक्तित्वेनाग्नित्व मपि केऽपि स्वीकुर्वन्ति। वस्तुतः "चन्द्रमा अप्स्वन्तरा (ऋ० सं० १, ७, २०, १)"—इत्यादिश्रुतेश्चन्द्रमसो द्युस्थाद् सूर्यादधो-देशस्थायित्व मेव; पौराणिकवचनानि तु श्रुतिविरोधाच्चिन्त्यान्येव। "दिवि सोमो अधिश्रितः (ऋ० सं० ८, २, २०, १)"—इत्यादिश्रुतयस्तु तस्य द्युस्थसूर्यरश्मिभिः सम्ब-न्धबाहुल्यबोधका एव। क्वचित् सायणीयव्याख्याविरोध इति चेत्? किं कुर्मो वयं सत्यव्रताः, न शक्य मस्माभिः सायणानुरोधात् सत्य मपलपितुम्। चन्द्रमसः अन्तरिक्षस्थत्वादेव निघण्टौ मध्यमस्थाने एव "चन्द्रमाः", "अनुमतिः", "राका", "सिनीवाली", "कुहूः"—इति पञ्च पदानि समाम्नातानीति दिक्।

‡ १अ० ४८३, ४८४पृ० १ख० १ख० (४)।

प्रच्यावयति। "शतबलाक्षः" "मौद्गल्यः" आचार्यो मन्यते। बहुबलानि अक्षाणि इन्द्रियाणि यस्य स शतबलाक्षः बह्विन्द्रियः, मुद्गलस्यापत्यं मौद्गल्यः * ॥

"तस्य" मृत्योः "एषा भवति"— ॥ ६ ॥

परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥ (परं मृत्यो ध्रुवं मृत्यो ध्रुवं परेहि मृत्यो कथितं तेन मृत्यो मृतं च्यावयते भवति मृत्यो मदेवो मुदेवो तेषा मेषा भवति †) ॥ ७ ॥

(त्वेष मित्था समरणं शिमीवतो रिन्द्राविष्णू सुतपा वा मुरुष्यति। या मर्त्याय प्रतिधीयमान मित् कृशानोरस्तु रसना मुरुष्यथः ॥ ‡) इति सा निगदव्याख्याता। विश्वानरो व्याख्यातस्तस्यैषा भवति॥ ८§ ॥

"परं मृत्यो अनुपरेहि"—इति ||। सङ्कुसुको नाम, तस्यार्षम्।

---

* मुद्गलस्तु भर्म्यश्वपुत्रः, ऋक्संहितायां तस्यैकं सूक्तञ्च दृश्यते (१०म० ९अ० ९सू०)। तच्चूर्णीया पञ्चमी ऋक् चेहैव पुरस्तान्निबद्धा। ९अ० २पा० १ख० ३४पृ०।

† बन्धनीचिह्नान्तर्गत एषोऽंशो वृत्तिकृता न व्याख्यातः।

‡ बन्धनीचिह्नान्तर्गत एषोंऽशोऽपि वृत्तिकृता न व्याख्यातः। मन्त्रस्त्वेषः ऋ० सं० १, २, १५, १। सोमातिरेके तृतीयसवने एषा वैकल्पिकी याज्या (आ० सू० ६, ७.)। अस्यार्थस्तु ऋग्भाष्यत एवावगन्तव्यः।

§ वृत्तिकृन्मते खण्डः सप्तम एव; एव मिहोत्तरत्रापि बोध्य मापादसमाप्तेः।

|| ऋ० सं० ७, ६, १९, १। य० वा० सं० ३५, ७। आ० सू० ४, ६।

आज्यहोमे पुत्रकामके कर्मणि स्थालीपाकविधाने षडाहुतिः। हे 'मृत्यो!' 'परम्' अन्यम् 'अनुपरेहि' अनुपरागच्छ त्वं ('पन्थाम्') पन्थानम्। 'यः ते स्वः'। कतमः सः? 'इतरो देवयानात्' यस्मात् देवयाने पथि वयं स्थिताः अनाधृष्याः तव पितृयानं पन्थानम् अनुपरेहि त्वम्। अपि च 'चक्षुष्मते शृण्वते' च ('ते') तुभ्यं 'ब्रवीमि'—'मा' त्वम् ('नः') अस्माकं 'प्रजां' पुत्रान् पौत्रांश्च 'रीरिषः' हिंसीः; 'मा उत वीरान्' अन्यानपि, येऽस्मदाश्रयाः पुरुषास्तानपि मा हिंसीरिति॥

"विश्वानरः"* व्याख्यातः†, अभिधानतोऽभिधेयतश्च‡॥

"तस्य एषा भवति"—॥ ७, ८॥

प्र वो॑ म॒हे मन्द॑माना॒यान्ध॒सोऽर्चा॑ वि॒श्वान॑राय वि॒श्वा॒भुवे॑। इन्द्र॑स्य॒ यस्य॒ सुम॑खं॒ सहो॒ महि॒ श्रवो॑ नृ॒म्णं च॒ रोद॑सी सप॒र्यतः॑॥ प्रार्चत (यूयं§) स्तुतिं महतेऽन्धसोऽन्नस्य दात्रे मन्दमानाय मोदमानाय स्तूयमानाय शब्दायमानायेति वा विश्वानराय सर्वं

---

* १भा० ४८२, ४८४पृ० ५ष० ५ख० (५)।

† "वैश्वानरः कस्मात् विश्वान् नरान् नयति"—इत्यादि। ७अ०१पा० १–६ख० २९८—४११पृ० द्रष्टव्यम्।

‡ "वैश्वानरो वा एतद्रेतः सिक्तं प्राच्यावयत्"—इत्यादि च मध्यमस्थितं ब्राह्मणं द्रष्टव्यम्। ऐ० ब्रा० ३, २, ११।

§ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

विभूतायेन्द्रस्य यस्य प्रीतौ सुमहद्बलं महच्च श्रवणीयं यशो नृम्णञ्च बलं नृन्नतं द्यावापृथिव्यौ वः परिचरत इति क मन्यं मध्यमादेवं मवक्ष्यत्तस्यैषापरा भवति ॥ ९ ॥

"प्र वो महे"—इति*। वैकुण्ठस्यार्षम्†। जगती। महाव्रते विनियोगः‡। हे स्तोतारः! ('प्र अर्च') "प्रार्चत" प्रोच्चारयत स्तुतिम्, उच्चार्यमाणं चान्यैः प्रपूजयत। कस्मै? 'विश्वानराय' किंलक्षणाय विश्वानराय? 'महे' "महते", 'अन्धसः' "अन्नस्य" दात्रे, 'मन्दमानाय' हृष्यमाणाय; अथ वा शब्दायमानाय स्तोतृभिः, 'विश्वाभुवे' सर्वप्रकारविभूतियुक्ताय। 'इन्द्रस्य' ईश्वरस्य 'यस्य' विश्वानरस्य, 'सुमखं सहः' "सुमहद् बलम्", 'महि श्रवः' "महच्च श्रवणीयं यशः", (बलमायतिर्महती§) 'नृम्णं च' "नृन्" मनुष्यान् प्रति यद् विशेषतो "नतम्" "बलम्" तच्च यस्य; महदपि चैतौ "वः" स्तुतिं यस्य विश्वानरस्य प्रोच्यमानां "द्यावापृथिव्यौ" "परिचरतः" पूजयतः अभिनन्दतः; सर्व्वभूताना मिव मभिमता स्तुतिरस्त्वित्यभिप्रायः॥

---

* ऋ० सं० ८, १, ६, १। य० वा० सं० ३३, ३५।

† "वैकुण्ठस्येन्द्रस्य वाक्यत्वात् 'यस्य वाक्यं स ऋषिः'—इति परिभाषयेन्द्र ऋषिः; वैकुण्ठस्येन्द्रस्य च स्तूयमानत्वाद् 'या तेनोच्यते सा देवता'—इति परिभाषयेन्द्र एव देवता"—इति सा० भा०।

‡ "प्रवोमहे मन्दमानायान्धस इति निविद्धानम्"—इति ऐ० ब्रा० ५, १, २।

§ नास्त्येषोंऽशः ग-पुस्तके।

"तस्य एषा अपरा भवति"। सा पुनः किमर्थम्? द्युस्थानोऽपि हि विश्वानरः समाम्नातः*; अस्यां तु परस्यां व्यपदेशादुत्तमेन ज्योतिषा विश्वानरस्यासंशयं मध्यमत्व मित्येव मुदाह्रियते— ॥ ९ ॥

उद् ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत् ॥ उदशिश्रिय† ज्ज्योतिरमृतं सर्वजन्यं विश्वानरः सविता देव इति धाता सर्वस्य विधाता तस्यैषा भवति ॥ १० ॥

"उद् ज्योतिः"—इति‡। वसिष्ठस्यार्षम्। प्रातरनुवाके विनियोगः। 'उत् अश्रेत्' उच्छ्रयति, ऊर्ध्वम् उपनयति 'विश्वानरः' मध्यमो वायुः, 'सविता'। किम्? एतत् 'ज्योतिः' "अमृतं" सूर्याख्यम्; सर्वगन्तॄणां वायुपूर्वकत्वाद् गमनस्योपपद्यते। 'विश्वजन्यं' सर्वलोकहितम् ॥

एव मत्र विश्वानरो ज्योतिरुच्छ्रयतीति व्यपदेशान्मध्यमो§ विश्वानरः। एवञ्चाभिप्रेत्योक्तम्—"क मन्यं मध्यमादेव मवक्ष्यत्" इति ॥

ओषध्योऽर्द्धर्च उत्तर इति|| भाष्यकारो नाधिजगे; प्रसङ्गतस्तु

---

* १भा० ५अ० ६ख० (१२); उपरिष्टाचेहैव ११अ० २पा० १ख०।

† "उदशिश्रय०" क, ख, ग।

‡ ऋ० सं० ५, ५, १२, १। "उपस्थम्"—इति सा० भा०। इतिहासमते तु पूर्वोऽर्द्धर्च एष वैश्वानरीयः; उत्तरोऽर्द्धर्च एव ओषध्य इति। अतएवानुपदं वक्ष्यति (१५ पं०) ओषध्योऽर्द्धर्च उत्तर इत्यादि।

§ "व्यपदेशान्मध्यन्दिनो" क, ख।

|| तत्पाठस्त्वेषः "क्रत्वा देवानां मजनिष्ट चक्षुराविरकर्भुवन विश्वमुषाः" इति।

निर्धूमः।—यदा तत् ज्योतिः द्युस्थान मुपनीयते विश्वानरेणाथ तदा 'कृत्वा' तत्कर्म्मणा 'देवानां' रश्मीनां 'चक्षुः' ख्यानं प्रकाशः 'अजनिष्ट' जायते 'उषाः'। सा च पुनः जाता 'आविरकः भुवनं विश्वं' सर्व्वं माविःकरोति भूतजात मित्यर्थः॥

"धाता"* कस्मात्? स हि "सर्व्वस्य विधाता" स्रष्टा; उदक-पूर्व्वकत्वात् सर्व्वविधानस्य मध्यमः॥

"तस्य एषा भवति"—॥१०॥

धाता ददातु दाशुषे प्राचीञ्जीवातु मक्षिताम्†। वयं देवस्य धीमहि सुमतिं सत्यधर्म्मणः॥ धाता ददातु दत्तवते प्रवृद्धां जीविका‡ मनुपक्षीणां वयं देवस्य धीमहि सुमतिं कल्याणीं मतिं सत्यधर्म्मणो विधाता धात्रा व्याख्यातस्तस्यैष निपातो भवति बहुदेवतायामृचि॥११॥

"धाता ददातु"—इति§। वामदेवस्यार्षम्। देविकासु धात्रे हविषि विनियोगः। य एकः‖ कश्चित् धात्रे दत्तवान् हविर्भवति, तस्मै 'दाशुषे' स 'ददाति'। किं ददाति? "प्राचीं जीवातु मक्षिताम्"। 'प्राचीं' "प्रवृद्धां" महतीं 'जीवातुं' "जीविकाम्" 'अक्षिताम्'

---

* १भा० ४८३, ४८४१० ५अ० ५ख० (६)।

† "मक्षितिम्" क, ख, ग।

‡ "जीविताम्" क. ख, ग।

§ अथ० सं० ७, १७, २ आद्यसूक्ते द्वितीयेषा।

‖ "य एव" क, ख।

"अनुपत्नीणाम्"। यत एव मतो ब्रूमः—'वयं' 'देवस्य' धातुः 'धीमहि' धारयामहे, 'सुमतिम्' "कल्याणीं मतिम्" नित्यं हविर्दानयुक्ता 'सत्यधर्मणः' नित्य मवितथार्थकारिणः॥

"विधाता"*, "धाता व्याख्यातः"†; धातैव विधाता॥

"तस्य एष निपातो भवति" स्तुतिसाधारण्येन "बहुदेवतायामृचि"‡—॥११॥

सोमस्य राज्ञो वरुणस्य धर्म्मणि बृहस्पते रनुमत्या उ शर्म्मणि। तवाह मद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम्॥ इत्येताभिर्द्देवताभिरभिप्रसूतः सोमकलशानभक्षय मिति कलशः (कस्मात्§) कला अस्मिञ्छेरते मात्राः कलिश्च कलाश्च किरतेर्विकीर्ण-मात्राः‖॥१२॥

॥ इत्येकादशाध्यायस्य प्रथमः पादः॥११।१॥

"सोमस्य राज्ञः"—इति¶। विश्वामित्रस्यार्षम्। 'सोमस्य' 'राज्ञः'

---

* १भा० ४८३, ४८४पृ० ५ख० (७)।

† इतः पूर्वस्मिन्नेव खण्डे द्रष्टव्यम् (१७७ पृ० ६ पं०)।

‡ केवल-विधातृ-देवताकी दशतय्यां न कश्चिन्मन्त्रोऽस्ति, बहुदेवताकमन्त्रे क्वचित् क्वचित् विधातुरपि निपातो दृश्यत इति भावः।

§ नास्त्येतत् पदम क-ख-ग-पुस्तकेषु।

‖ "किरतेर्विकीर्णा मात्राः" क, ख, ग।

¶ ऋ० ८, ८, २५, ३। "सोमस्य राज्ञ इत्येषा तृतीया वरुणविधात्रनुमतिधातृ-सोमबृहस्पतीति लिङ्गोक्तदेवताका। * * *। पक्षे इन्द्र एव देवता अन्ये तु निपात-भाजः"—इति सा० भा०।

'धर्मणि' कर्मणि, यत्र सोमं हूयते तस्योपस्तुतौ प्रवर्त्तमानः, तेन "प्रसूतः", ('कलशान्') "सोमकलशान्" 'अभक्षयम्'। 'वरुणस्य' च एव सेव। 'बृहस्पतेः' च, 'अनुमत्याः' च 'शर्मणि' शरणे आश्रये वर्त्तमानः, ताभ्याम् "अभिप्रसूतः"। 'तव' 'अहम्' हे 'मघवन्!' 'अद्य' 'उपस्तुतौ' युवयोश्च हे 'धातः!' हे 'विधातः!' सर्वैर्भवद्भिरनुज्ञातः एतान् "सोमकलशान्"* 'अभक्षयम्' इति॥

"कलशः कस्मात्"? "कलाः अस्मिन् शेरते मात्राः"। 'कलाः' अवयवाः सोमसमुदायात् केचित् पृथक्-कृताः, ते 'शेरते' आसते 'अस्मिन्'; कलाशब्दात् पूर्वपदम्, शीङः (भा० आ०) उत्तरपदम्। —। अथ कलाः कस्मात्? अत आह कलानिर्वचनानिर्वचनप्रसङ्गेन— "कलिश्च कलाश्च किरतेर्विकीर्णमात्राः"। "कॄ विक्षेपे (तु० प०)" —इत्यस्य; कलौ वर्चांसि परस्परं विक्षिप्यन्ते†, कला अपि विक्षिप्ता भवन्ति कुतश्चित् समुदायादिति‡ ॥१२॥

इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य प्रथमः पादः॥११।१॥

---

* "कलशान् कलशस्थान् छतमिश्रान् सोमान्"—इति सा० भा०।

† "कृतैरचणुत् युवद्वयः (ऋ० सं० ७, ८, ११, ३)"—इति व्याख्यानावसरे सायण आह—"कलिनामधेयस्यर्षेः"—इति। अङ्गारात् अङ्गिराः, ततः घोरः, ततः कण्वः, ततः प्रगाथ, ततः कलिरिति वंशानुक्रमः। कलेस्तु दृशतय्या मेकं सूक्तं दृश्यते (८म० ७अनु० ७सू०), तच पञ्चदशर्चम्। ऐतरेयके तु युगवाच्यपि कलिशब्दो दृश्यते। तथाहि—"त मिन्द्रः पुरुषरूपेण पर्येत्योवाच। कलिः शयानो भवति, सञ्जिहानस्तु द्वापरः, उत्तिष्ठंस्त्रेता भवति, कृतं सम्पद्यते चरन्"—इति ७, ३, ३।

‡ "प्रकलविद् वणिग् भवति"—इत्याद्युक्तं पुरस्तात्। ६अ० २पा० ३ख०; ३भा० १५५पृ०। प० सं० ६का० ५प० ५ख० ३म० इ०।

॥ द्वितीयः पादः ॥

अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवन्ति मरुतो मितराविणो वा मितरोचिनो वा महद् द्रवन्तीति* वा तेषामेषा भवति ॥ ॥ १ (१३) ॥

"अथातो मध्यस्थाना देवगणाः"। अथातः-शब्दावुक्तार्थौ, तयोः पुनरुपन्यासो बहुवचनविशिष्टोऽय मपरोऽधिकारः इति; मध्यस्थाना देवगणा इतीद मपि प्रसिद्ध मेव † ॥

"तेषां" "मरुतः" "प्रथमागामिनः भवन्ति"। कस्मात्? वायुरेव हि भेदेनापेक्ष्यमाणो ‡ मरुदभिधानो बहुवचनभाग् भवति। तेषां प्राथम्यं वायुना व्याख्यातम्; एतावांस्तु विशेषः— बहुसाध्ये कर्मणि बहुधा मध्यमो भवति, पृथक्त्वेन तु विज्ञाता मरुतः शुक्रज्योतिश्च चित्रज्योतिश्चेत्येवमादयः, सप्तसप्तका देवगणाः मारुतेषु गणेषु सप्तकपालेषु§; अग्नौ पुराणे चैत एव प्रसिद्धाः; सप्तधा पुत्रलविचारिणः|| मारीचात् कश्यपाददित्यां ये जज्ञिरे ¶। नैरुक्तसमयस्तु

* "मरुद्द्रवन्तीति" ख० ग० घ०।

† ३भा० २५१पृ० ६पं०, २५२पृ० १पं० "†" द्र०।

‡ "मन्दमापेक्षमाणो" ग।

§ ऋक्संहितायामपि—"आरोदसी अपृणादोत मध्यं पञ्चदेवा ऋतुशः सप्तसप्त (८, १, १९, २)"—इति सप्तसप्तकानां श्रुतिरित्यपि केचित्।

|| "सप्तस्कन्धवायुविचारिणः" क, ख।

¶ श्रीभागवतेऽप्येव मेव "कश्यपाद्गर्भ माधत्त"—इत्यारभ्य "सजूरिन्द्रेण पञ्चाशत् देवास्ते मरुतोऽभवन्"—इत्यन्तो ग्रन्थो द्रष्टव्यः (६ स्क० ८ अ०)।

सर्व एव गणा मरुतः; उक्तं च वार्त्तिके—"मध्यमा वाक् स्त्रियः सर्वाः, पुमान् सर्वश्च मध्यमः। गणाश्च सर्वे मरुतो गणभेदाः पृथक्कृतेः॥"—इति * ॥

अथ "मरुतः" † कस्मात्? "मितराविणो वा" मितं नाम सुश्लिष्टम्, यथा तेषां योग्यं रवितुं तथा रुवन्ति स्तनयन्ति। अथवा "मितरोचिनः" तथैव सुश्लिष्टं रोचन्ते। "अमितराविणः"—इति केचिदिच्छन्ति,—"मरुतोऽमितराविणः"—इति समानसंहितत्वात् भाष्यस्य; तेषां बहुप्रकारं च ते रुवन्तीत्यर्थः। "अमितरोचिनः"—इत्यत्राप्येव मेव। "महद् द्रवन्ति—इति वा"। इह शब्दमहत्त्वाभिप्रेता, पूर्वत्र बाहुल्यं बहुप्रकारता च ॥

"तेषाम् एषा भवति"—॥ १ (१३) ॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः। आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः॥ विद्युन्मद्भिर्मरुतः स्वर्कैः स्वञ्चनैरिति वा स्वर्चनैरिति वा स्वर्चिभिरिति वा रथैरायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेन च नोऽन्नेन वय इवापतत सुमायाः कल्याणकर्म्माणो वा कल्याणप्रज्ञा वा रुद्रा व्याख्यातास्तेषा मेषा भवति॥ २ (१४) ॥

---

* "ये मध्यमस्थाने देवगणाः समाम्नातास्ते सर्वेऽपि मरुत आख्यायन्ते। तथा चाहुः—'सर्वा स्त्री मध्यमस्थाना पुमान् वायुश्च सर्वमः। गणाश्च सर्वे मरुत इति इद्धानुशासनम्'—इति"—इति सा० भा०।

† १भा० ४८१, ४८५पृ० ५ख० ५ख० (८)।

"आविद्युन्मद्भिः"—इति *। गोतमस्यार्षम्। आस्तारपङ्क्तिः। हे 'मरुतः! 'आयात' यूयम्। केन? कीदृशेन वा? 'विद्युन्मद्भिः' विद्योतनं विद्युत्, विशिष्टदीप्तियुक्तैः। 'स्वर्कैः रथेभिः' रंहणैः मेघैः "स्वश्वैः" सुगमनैः; यद्वा "स्वर्चनैः" शोभन मर्चनं येषां तैः, सुष्ठु पूजितैः; अथ वा "स्वर्चिभिः" अनुपरतविद्युत्सम्पातैः। 'ऋष्टि-मद्भिः' रेषणवद्भिः, अनाकाशस्य नाशनैः। पृथक्—विद्युन्मद्भिरिव ऋष्टिमद्भिः आयुधोपेतैः अशनपतनैः आप्लुवन्तो ये अन्तरिक्षे मेघाः पतन्ति, पृथक् समं समेता अश्वयुग्भिरिति। अपि च किं मेवमेव यथाकथञ्चिदागच्छतेत्यागमनमात्रे वय मर्थिनः? न—इत्युच्यते—"आ वर्षिष्ठया०——०सुमायाः"। हे 'सुमायाः' सुकर्माणः! सुप्रज्ञाः! वा 'आपप्तत' "आपतत" आगच्छतेत्यर्थः। कथम्? 'वर्षिष्ठया' 'इषा' "अन्नेन" अस्मत्प्रदेयेन संयुक्ताः। किं शनकैः आपतत? न-इत्युच्यते—'वयः न' "वय इव" पक्षिण इव शीघ्र मापतत।—इत्येतदाशास्महे।

"रुद्राः"†, "व्याख्याताः"‡। "तेषाम् एषा भवति"—॥ २(१४)॥

आ रुद्रास इन्द्रवन्तः सजोषसो हिरण्यरथाः सुवि-ताय गन्तन। इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न

---

* ऋ० सं० १, ६, १४, १। आद्यौ पादौ जागतौ तृतीयचतुर्थौ गायत्रौ यस्याः सा प्रस्तारपङ्क्तिरिति नियमादियं प्रस्तारपङ्क्तिरित्येव।

† १भा० ४८२, ४८५पृ० ५अ० ५ख० (९)।

‡ १०अ० १पा० ५ख० २भा० (७५—७७पृ०) पुरस्ताच्च १अ० ५पा०१ख० (२भा० १०२—११२पृ०) द्रष्टव्यम्।

दिव उत्सा उदन्यवे ॥ आगच्छत रुद्रा इन्द्रेण सजोषसः सुविताय कर्मण इयं वो अस्मदपि* प्रतिकामयते मतिस्तृष्णज इव दिव उत्सा उदन्यवे (इति†) तृष्णक् तृष्यतेरुदन्युरुदन्यतेर्ऋभव उरु भान्तीति वर्त्तेन भान्तीति वर्त्तेन भवन्तीति वा तेषा मेषा भवति ॥ ३ (१५) ॥

"आरुद्रास इन्द्रवन्तः"—इति‡। श्यावाश्वस्यार्षम्। जगती। आग्निमारुते शस्यते। हे 'रुद्राः!' आगच्छत यूयम्§। 'इन्द्रवन्तः' "इदि परमैश्वर्ये (भ्वा० प०)"||। 'सजोषसः' परमैश्वर्येण नित्य मासेविताः; पृथक्त्वकपक्षे तूपपद्यत एव इन्द्रेण सह प्रीयमाणा इति। 'हिरण्यरथाः' उदकहरणार्थे रंहणाः; पृथक्त्वपक्षे तु हिरण्यविकृतरथाः। 'सुविताये' तस्मै "कर्मणे" सुष्ठु सगुणाय¶, यथाशास्त्रं क्रियमाणाय प्राप्य-

---

* "वोऽस्मदपि" च-प्रभृतिषु; "वो असंदभि" ख।

† नास्त्येतत् पदम् ख-पुस्तकादन्यत्र।

‡ ऋ० सं० ४,२,२१, १। यच्चैषा ऋक् तत् सूक्तम् "मारुतम्"—इत्याह सायणः।

§ "रुद्रासः=रुद्रपुत्राः" सा० भा०। "इदं पित्रे मरुता मुच्यते वचः (ऋ० सं० १, ८, ९, १)"—इत्यस्या ऋचो व्याख्यानावसरे च मरुता मेव रुद्रपुत्रत्व माह। तथाहि—"'इदम्' स्तुतिलक्षणं 'वचः' 'मरुताम्' एकोनपञ्चाशत्संख्यानां देवविशेषाणाम् 'पित्रे' जनकाय 'रुद्राय' ईश्वराय 'उच्यते' उच्चार्यते"—इत्यादि। "रुद्रस्य च मरुतां पितृत्व मेव माम्नायते"—इत्युपक्रम्य "अतः सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति सूयन्ते, रौद्रेषु च मरुतां पिता रुद्र इति"—इत्यन्तेन च ग्रन्थसन्दर्भेण मरुतां रुद्रपुत्रत्वे विनिगमकत्वोक्तत्वमेव तेनेति।

|| "इन्द्रवन्तः इन्द्रेण युष्मत्स्वामिना तद्वन्तः"—इति सा० भा०।

¶ "सुष्ठु सगणाय" ग।

र्थम्। कि मिति आगच्छत? ('वः') युष्मान् 'इयम्' 'अस्मत्'-मतिः 'प्रतिहर्यते' "प्रतिकामयते" युष्मद्विनाकृत मिदं कर्म गुणवदप्येतैरङ्गैर्मा-भूद् विगुण मित्येव मर्थं प्रतिहर्यते। अपि च हविः पूर्वं देवताः प्रेप्सन्ति ब्राह्मणा इवोपनिमन्त्रणम्, ततो यजमानः संस्कृते हविषि तदर्थापत्तये यागकालानतिक्रमणाय चान्नपतिरिवान्ने संस्कृते तद-व्यापत्तये भोजनकालानतिक्रमणाय च देवताः [illegible]; विज्ञायते हि—"देवता वै सर्वा आशंसन्ति यं [illegible] गृह्णाति"—इति *; अत इद मुक्तम्—"इयं वो [illegible]" इति। कथं पुनः प्रतिहर्यते? 'तृष्णजे [illegible] तृडुप-जायते यस्मिन् विशेषतः काले, स [illegible], तस्मिन् यथा। 'दिवः उत्साः' द्युलोकात् [illegible]; उत्सप्रभवा मेघा आपः। 'उदन्यवे' उदक मिच्छते लोकाय [illegible] प्रावृषि तथास्मन्[illegible] प्रतिहर्यमाणा आगच्छतेति। उदन्यु[illegible]चित्। तस्य प्रे[illegible] यथा दिव उत्सा मेघा आगच्छन्ति, [illegible] मागच्छते[illegible] एवं तेषां योजना॥

"ऋभवः" कस्मात्[†]? "उरु भान्ति[illegible] हि बहु भान्ति दीप्यन्ते; उरुशब्दात् पूर्वपदम्, भा[illegible]। "[illegible]न भान्ति—इति वा" यज्ञेन सत्येन वा भान्ति[illegible] पूर्वपदे विकल्पः। "ऋतेन भवन्ति—इति वा" भव[illegible]

* य० वा० सं० सप्तमाष्टमाध्यायौ ग्रहप्रकरणौ द्रष्टव्यौ।

† १भा० ४८३, ४८५पृ० ५ख० ५ख० (१०)।

ते हि ऋतेन सत्येन वा भवन्ति, यज्ञेन वा भवन्ति, भूत्वा देवत्वेन सर्वे युज्यन्ते * ॥

"तेषाम् एषा भवति"—॥ ३ (१५)॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्त्तासः सन्तो अमृतत्व मानशुः। सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः॥ कृत्वा कर्माणि क्षिप्रत्वेन वोढारो† मेधाविनो वा मर्त्तासः सन्तो अमृतत्व‡ मानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त (धीतिभिः §) कर्मभिर्ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुस्तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्त्यादित्यरश्मयोऽप्यृभव उच्यन्ते। अगोह्यस्य यदसस्तना गृहे तदद्येद मृभवो नानु

---

* "आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत्। वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत (ऋ० सं० १, २, ५, ४)"—इत्यस्या व्याख्यानान्ते आह सायणः—"इद मेव ऋतमवदन मपेक्ष्य ऋभुशब्दं व्याचक्षाणो यास्कः 'ऋभवः०—०भवन्तीति वा'—इत्युक्तवान्"—इति।

† "वोल्हारो" क, ख, ग।

‡ "सन्तोऽमृतत्व" घ-प्रभृतिषु।

§ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

गच्छथ॥ अगोह्य आदित्योऽगूहनीयस्तस्य यदस्वपथ* गृहे यावत्तत्र भवथ न तावदिह भवथेत्यङ्गिरसो व्याख्यातास्तेषां मेषा भवति॥ ४ (१६)॥

"वि॒ष्ट्वी शमी॑"—इति†। कुत्सस्येय मार्षम्। आर्भवे विनियोगः। 'विष्ट्वी'-'शमी'—इति द्वे अपि कर्मनामनी। यतोऽज्ञामिताये भाष्यकारः पूर्वं तावत् निराह—"कृत्वा" इति। किं कृत्वा? 'शमी' "कर्माणि" कथम्? 'तरणित्वेन' "क्षिप्रत्वेन" क्षिप्रकारित्वेन, सर्वयज्ञसम्प्रदर्शनेन। 'वाघतः' "वोढारः" यज्ञस्यानुष्ठातारः, मेधाविनो (वा‡); न ह्यमेधाविनः संवत्सरेण सकलं कर्म समापयितुं शक्ताः; ते तु संवत्सरेऽखिलं कृत्वा 'मर्त्तासः' मनुष्याः 'सन्तः' 'अमृतत्वम्' अमृतभावं देवत्वम् 'आनशुः' "आनशिरे" प्राप्तवन्तः§। के पुनस्ते? 'सौधन्वनाः' सुधन्वनः पुत्राः, 'ऋभवः' 'सूरचक्षसः' "सूरख्यानाः" सूर्यविख्याताः, सूर्यसमानदर्शनाः, सूर्यसमानप्रज्ञाः वा।

---

* "यदस्वपत" ख, ग।

† ऋ० सं० १, ७, ३०, ४। यद्यैषा ऋक् तत्सूक्त आर्भव सूच्यते ऋभुशब्देनैव ऋभुः, विभ्वा वाज इति त्रयाणां ग्रहण मिच्छन्ति वैदिकाः। तदाह—"ऋभुर्विभ्वा वाज इति त्रयोऽप्यृभुशब्देन"—इति सा० भा० (१, ७, ३१, ४)।

‡ नास्त्येतत् पदं ग-पुस्तके।

§ अतएवाह यजुर्व्याख्यायां महीधरः— "द्विविधा देवाः, कर्मदेवा आजानदेवाश्च। कर्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः, सृष्ट्यादावुत्पन्ना आजानदेवाः"—इति (य० वा० सं० ३१, १७)। अस्ति चैतयोरानन्दे विशेषः "ये शतं कर्मदेवाना मानन्दाः, स एक आजानदेवाना मानन्दः"—इति बृहदारण्यकश्रुतेः (४, १, ३५)।

यत इन्द्रशास्ते अतः 'संवत्सरे' संवत्सरावयवे वसन्तादिकाले 'सम-पृच्यन्त' समयुज्यन्त, 'धीतिभिः' "कर्मभिः" अतश्च देवा अभवन्निति ॥

"ऋभुः, विभ्वा, वाजः—इति सुधन्वन आङ्गिरसस्य त्रयः पुत्राः बभूवुः"—इति*। आर्भवाणां मन्त्राणां स्वभावोपप्रदर्शनार्थं माह—"तेषां प्रथमोत्तमाभ्याम्" ऋभुणा वाजेन च "बहुवन्निगमाः भवन्ति"; "न मध्यमेन" विभ्वा; स हि आर्भवाणां मन्त्राणां स्वभावः। "तदेतत्" उच्यते—"ऋभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्तानि भवन्ति"। तद्यथा—

"इदं तृतीयं सवनं कवीनामृतेन ये चमसमैरयन्त"—इति† ॥

---

* "ऋभुर्विभ्वावाज इन्द्रो नो अच्छेत्यार्भवम्"—इदमादिकमालोच्यम् (ऐ० ब्रा० ५, १, ३।

† एतच्च ब्राह्मणवाक्यम्। 'ये' मनुष्याः 'ऋतेन' सत्येन यज्ञेन वा 'चमसम्' 'ऐरयन्त' प्रणीतवन्तः, तेषां 'कवीनाम्' क्रान्तप्रज्ञानां कारूणाम् ऋभूणाम् 'इदं तृतीयं सवनम्' भवति। इति चैतदर्थः। ऋभूणां चमसनिर्माणत्वञ्च श्रूयते—"उत त्यम् (ऋ० सं० १, २, २, १)"—इत्यादिमन्त्रे। "चमसं तं सोमधारणचमसं काष्ठ-पात्रविशेषं निष्कृतं निःशेषेण सम्पादित मकरोत्। तच्चण्व्यापारकुशलस्य त्वष्टुः शिष्याः ऋभवः, तेन निर्मितं त मेकं चमसं पुनरपि चतुरोऽकर्त्त, चतुर्धा विभक्तां चमसान् कृतवन्तः"—इत्यादि च तद्व्याख्यानम् (सा० भा०) द्रष्टव्यम्। "एकं चमसं चतुरः कृणोतन"—इति मन्त्रे च ऋभुभिः चमसस्य चतुर्धाकरणं श्रूयते। ऋभूणा मृत्विक्त्व मपि दर्शितं सायणेन। तथा च—"श्रोषा मेकम् (ऋ० सं० ३, ३, ५, ५)"—इत्यस्य "अत्र ऋभव एव ऋत्विग्रूपेण स्थित्वा सर्वत्र यज्ञं निर्वहन्तीत्याह"—इत्यादिकं व्याख्यानं द्रष्टव्यम्। चमसपरिचयस्त्वथर्वसंहितायाम्—"इम मग्ने चमसं मा वि जिह्वरः प्रियो देवाना मुत सोम्यानाम्। अयं यश्चमसो देवपानस्तस्मिन् देवा अमृता मादयन्ताम् ॥"—इति १८, ३, १८, ३।

"आदित्यरश्मयोऽप्यृभव उच्यन्ते"—इति। अभिधेयव्यभिचार मुपप्रदर्शयति। क्व च पुनस्ते उच्यन्ते? यतः पठति—"अगोह्यस्य यदसस्तना"—इति*। "उद्वत् स्वस्मा अकृणोतन"—इति†। दीर्घतमस आर्षम्। जगती। 'उद्वत्सु' ये उन्नताः प्रदेशाः भुवः अद्भिरनाक्रान्ताः, तेषु 'अस्मै' लोकाय उपकरिष्यन्तो यूयम् ऋभवः 'अकृणोतन' प्रति संवत्सरं कुरुध्वे। तृणकुशादिवर्षेणादित्यमण्डलादावर्त्तमानाः। 'निवत्सु' पुनर्निम्नेषु भुवः प्रदेशेषु 'अपः' उदकं कुरुध्वे। 'स्वपस्यया' लोकानुग्रहप्रवृत्तया वर्षक्रियया हे 'नरः!'। किञ्च; 'अगोह्यस्य' योऽयम् "अगोह्यः=आदित्यः, अगूहनीयः" न गूहितुं शक्यः केन चिदपि, "यस्य" 'यदसस्तना गृहे' यावदस्य मण्डले सुप्ता इव निगूढा भवथ। "तदद्येद मृभवो नानुगच्छथ"। हे ऋभवः! "यावत् तत्र" निगूढा "भवथ" रात्रौ, "न तावदिह भवथ" ततश्च युष्मद्विनाभावे निरालोकोऽयं लोकः सम्पद्यते। एतद् वो माहाभाग्य मह मनुकीर्त्तयामि; ते यूय मिदं नामास्माकं कुरुतेति॥

"अङ्गिरसः"‡, "व्याख्याताः" एकवचनेन; "अङ्गारेष्वङ्गिराः" —इति§॥

---

* एष हि उत्तरोऽर्द्धर्चः; पूर्वार्द्धर्चपाठस्त्वेषः—"उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः॥"—इति ऋ० सं० १, २, ९, १।

† एतद्व्याख्यानारम्भे चाह सायणः—"पुराणप्रसिद्धान् सुधन्वनः पुत्रान् कर्म्मणा देवत्वं प्राप्तवत ऋभून् स्तुत्वा वेदप्रसिद्धा सूर्यरश्मीरूपानृभूनिदानीं स्तौति। तथा च यास्कः"—इत्यादि।

‡ १भा० ४८२, ४८५पृ० ५ख० ५ख० (११)।

§ ३अ० २पा० ५ख० १भा० ३२१, ३२२पृ० द्र०। "आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोके अस्पर्धन्त"—इत्यादि, "ते हादित्यानङ्गिरसो याजयंस्तेभ्यो याजयद्भ्य इमां पृथिवीं पूर्णां दक्षिणा मददुः"—इति च ऐ० ब्रा० ६, ५, ८, ९. द्र०।

"तेषाम् एषा भवति"—॥ ४ (१६) ॥

विरू॑पास॒ इदृष॑य॒स्त इद्ग॑म्भी॒रवे॑पसः। ते अङ्गि॑रसः सू॒नव॒स्ते अ॒ग्नेः परि॑ जज्ञिरे॥ बहुरूपा ऋषयस्ते गम्भीरकर्माणो वा गम्भीरप्रज्ञा वा ते अङ्गिरसः* पुत्रास्ते अग्ने॑†रधिजज्ञिर इत्यग्निजन्म पितरो॑ व्याख्या-ता॒स्तेषा॑ मे॒षा भव॑ति॥ ५ (१७) ॥

"विरू॑पास॒:—इति‡। नाभानेदिष्ठस्यार्षम्§। अनुष्टुप्। पाष्ठिके षष्ठेऽहनि विनियोगः। 'विरूपाः' नानारूपाः||। के पुनस्ते? इति—'ऋषयः' अवितथस्य ब्रह्मणो द्रष्टारः। न केवलं पश्यन्ति; अपि च 'गम्भीरवेपसः' अप्रमेयकर्माणः, अप्रमेयबुद्धयो वा। ऋष्यनेकत्वे कतमास्ते? इति—"ते अङ्गिरसः सूनवः" येऽङ्गिरसः सुनवस्त एते विवक्षिताः। कदा पुनस्ते अङ्गिरसो जज्ञिरे? अत आह—"ते अग्नेः

* "तेऽङ्गिरसः" च-प्रभृतिषु।

† "पुत्रास्तेऽग्ने" च-प्रभृतिषु।

‡ ऋ० सं० ८, २, १, ५। "विश्वेदेवा अङ्गिरसो वा देवताः"—इति सा० भा०।

§ अत्र चैतरेयकम्:—"नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभ-जन्त्सोऽब्रवीदेत्य किं मह्यमभाक्तेत्येत मेव निष्ठावमववदितार मित्यब्रुवन्"—इत्यादि ऐ० ब्रा० ५, २, ९। तथाश्वयुब्राह्मणेऽपि "मनुः पुत्रेभ्यो दायं व्यभजत् स नाभानेदिष्ठं वै मानवम्"—इत्याद्युक्तं नाभानेदिष्ठोपाख्यानंद्रष्टव्यम्।

|| १ख० १पा० ५ख० १भा० २२२, २२२पृ० द्र०।

परि जज्ञिरे"—इति*। अग्नित्व मापन्नस्याङ्गिरसोऽधि सकाशात् ये जज्ञिरे। ते एते विरूपाः गम्भीरवेपसश्च ममेदं नाम कुर्वन्त्विति॥

"पितरः"†, "व्याख्याताः"; "द्यौर्मे पिता"—इत्यत्र‡॥

"तेषाम् एषा भवति"—॥ ५ (१७)॥

उदीरता मवर् उत्परास उन्मध्यमाः पितरः सोम्यासः। असुं य ईयु§ रवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥ उदीरता मवर उदीरतां पर उदीरतां मध्यमाः पितरः सोम्याः सोमसम्पादिनस्तेऽसुं ये प्राण मन्वीयुरवृका‖ अनमित्राः सत्यज्ञा वा यज्ञज्ञा वा¶ ते न आगच्छन्तु पितरो ह्वानेषु माध्यमिको** यम इत्याहुस्तस्मान्माध्यमिकान्†† पितॄन्मन्यन्तेऽङ्गिरसो व्याख्याताः पितरो व्याख्याता भृगवो व्याख्याता अथर्वाणोऽथन-

---

* "येऽङ्गारा आसन् तेऽङ्गिरसोऽभवन्"—इति च ऐ० ब्रा० ३, ३, १०।

† १भा० ४८३, ४८६पृ० ५अ० ५ख० (११)।

‡ ४अ० ३पा० ५ख० २भा० ४९२पृ०। "पिता यत् स्वां दुहितरं मधिष्कन् (ऋ० सं० ८, १, २७, २)"—इत्यत्र "पिता प्रजापतिः"—इत्याह सायणः। "प्रजापतिर्वै स्वां दुहितर मभ्यध्यायत्"—इत्यादैतरेयकञ्च तत्र मानम्। ऐ० ब्रा० ३, ९, ९॥

§ "य ईयु" क, ख, ग।

‖ "मुन्नीयुरवृका" ख, ग।

¶ "सत्यंज्ञा वा यज्ञंज्ञा वा"—इति च रोथसृष्टः पाठः।

** "माध्यमको" क, ख, ग।

†† "०माध्यमिकान्" क, ख, ग।

वन्तस्थवेतिश्वरतिकर्म्मा तत्प्रतिषेधस्तेषा मेषा साधारणा भवति ॥ ६ (१८) ॥

"उदीरता मवरे—इति*। शङ्खस्यार्षम्। पितृमेधे विनियोगः। ये तावत् 'अवरे' 'पितरः' पृथिवी माश्रिताः, ते तावत् 'उदीरताम्' ऊर्द्धं गच्छन्तु। अथ पुनर्ये ('परासः') "परे" द्युलोक माश्रिताः, तेऽप्युदीरताम्; तेषा मप्यप्रच्युतिरस्तु; मुच्यन्तां वा तदधिकारप्रचये। 'उन्मध्यमाः' पितरो येऽपि 'मध्यमाः' मध्यस्थानाश्रयाः, तेऽप्युदीरताम् उत्तमं लोक माश्रयताम्†। 'सोम्यासः' "सोमसम्पादिनः" कर्मण्यङ्गभाव मुपगच्छन्तो ये सोमं सम्पादयन्ति। किम्प्रकाराः? 'असुं य ईयुः' प्राणमात्रमूर्त्तयः, अस्थूलविग्रहाः। 'अवृकाः' "अनमित्राः" परं साम्य मुपगताः। 'ऋतज्ञाः' यथावत् सत्यवेदितारः; यज्ञस्य वा। य एवमादिगुणयुक्ताः 'पितरः', ते ('नः') अस्माकम् 'अवन्तु' नित्यम् "आगच्छन्तु" 'हवेषु' आ-"ह्वानेषु"।—इत्येतदाशास्महे ॥

"माध्यमिको यम इत्याहुः" नैरुक्ताः। "तस्मात् पितॄन् माध्यमिकान् मन्यन्ते"; स हि तेषां राजेति‡। अत उत्तरे "अथ-

---

* ऋ० सं० ७, ६, १७, १। य० वा० सं० १९, ४९।

† "त्रिविधाः पितरः;—उत्तमा मध्यमा अधमाश्चेति। यथाविधं श्रौतं कर्मानुष्ठाय पितृत्वं प्राप्ताः उत्तमाः, स्मार्तकर्ममात्रपराः मध्यमाः, यत्रापि केचित् संस्कारैर्विकला अधमाः।"—इत्यादिका सायणीयव्याख्या च द्रष्टव्या।

‡ "वैवस्वतं सङ्गमनं जनानां "यमं राजानं हविषा दुवस्य (ऋ० सं० ७, ६, १४, १)"—इत्यादि श्रुतेश्च यमस्य पितृराजत्वम्।

र्वाण: (१३)", "भृगव: (१४)"—इत्येते पदे समा[illegible] पृ०), न चैतयो: समस्तयो: प्रत्येकं वा स्तुति[illegible]; [illegible] तु पित्रङ्गिरोभृगुभिः साधारण-स्तुतिः। यतस्तद्वङ्निर्वचनाय प्रसङ्गमाणानभिप्रेत्याथर्वशब्दनिर्वचनप्रसङ्गाद् ब्रवीति—"अङ्गिरस:", "व्याख्याता:" (१८९ पृ०); येऽस्या मृचि वक्ष्यमाणायाम् ;—"पितर:", "व्याख्याता:" (१९० पृ०) ;—"भृगव:"*, "व्याख्याता:"† ॥

"अथर्वाण:"‡ कस्मात् ? ते ह्येते "अथनवन्त:"। कि मिद मथनम्, येन ते तद्वन्त: ? अत आह—"थर्वति: चरतिकर्मा" गच्छत्यर्थ: । तत: किम् ? "तत्प्रतिषेध:" पुरस्तादकार: ;— न थर्वन्ति—इति अथर्वाण: ; स्थिरप्रकृतयो हि ते § ॥

"तेषाम् एषा साधारणा भवति"—अङ्गिर:प्रभृतीनाम् ॥ ६ (१८) ॥

---

* १भा० ४८३, ४८६पृ० ५अ० ५ख० (१४)। समाम्नायक्रमविपरीतोऽयम् ।

† "अर्चिषि भृगु: सम्बभूव"—इत्यादिना । ३, २, ५ख० (१भा० ३३१पृ०)। "यद् द्वितीय मासीत्, तद् भृगुरभवत् । तं वरुणो न्यगृह्णीत । तस्मात् स भृगुर्वारुणि:"—इति ऐ० ब्रा० ३, ३, १० ।

‡ १भा० ४८३, ४८६पृ० ५अ० ५ख० (१३)। सामाम्नायक्रमविपरीतोऽयम् ।

§ अथर्वा एव यज्ञकाण्डस्य प्रथमप्रवर्तक:। तदाहाथर्वसंहितायाम्—"यज्ञैरथर्वा प्रथम: पथस्तते"—इति १०, ३, ८, ५। "य इमं यज्ञं मनसा चिकेत"—इति च

                १ २३ १ २ ३ १ २३१ १ २

७, १, २, १। ऋक्सामसंहितयोरपि—"त्वा मग्ने पुष्करादध्यथर्वा निरमन्थत"—इति सा० सं० ष्ट० आ० १, १, १, ९। "अग्नये मथ्यमानायानुब्रूहीत्याचार्य: *** अथर्वा निरमन्थत"—इत्यादि च ऐ० ब्रा० १, ३, ५। "इध्यङ् ह मे जनुष्—"—एतस्य च सायणीयं व्याख्यानं द्रष्टव्यम् (ऋ० सं० २, १, ४, ४) ।

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ अङ्गिरसो नः पितरो नवगतयो नवनीतगतयो वाथर्वाणो भृगवः सोम्याः सोमसम्पादिनस्तेषां वयं सुमतौ कल्याण्यां मतौ* यज्ञियानामपि चैषां भद्रे भन्दनीये भाजनवति वा कल्याणे मनसि स्यामेति माध्यमिको† देवगण इति नैरुक्ताः पितर इत्याख्यानमथाप्यृषयः स्तूयन्ते॥ ७ (१९)॥

"अङ्गिरसो † नः पितरः"—इति‡। यमस्यार्षम्। त्रिष्टुप्। 'अङ्गिरसः' ('नः') अस्माकम् ('सोम्यासः') "सोमसम्पादिनः", नित्यं ('सुमतौ' "कल्याण्यां मतौ" वर्त्तन्ते। 'पितरः' च 'नवग्वाः' "नवगतयः" पितृयज्ञानागन्तुं येषां प्रतिमासं नवा गतिर्भवति, "नवनीतगतयो वा" नवनीतं प्रति येषां मनसो गतिरिदमस्माकमिति, ते नवग्वाः§! विज्ञायते हि—"स्वयं विलीनं पितॄणाम्"

---

* "कल्याण्यां मतौ सुमतौ"—इति पाठव्यतिक्रमः क, ख, ग।

† "माध्यमको" क, ख, ग।

‡ ऋ० सं० ७, ६, १५, १। य० वा० सं० १९. ५०।

§ "नवग्वाः नवनीतगतयः स्तोतव्यचरित्राः। यद्वा अङ्गिरसां सत्र मासीनानां मध्ये ये नवभिर्मासैरवाप्तफला उत्थितास्तेषां नवग्वा इति सञ्ज्ञा। नवग्वासः सुतसोमास इन्द्र मित्यादिषु तथाभिहितत्वात्।"—इति चाह सायणः। ऋ० सं० १, ३, २, १. भा० द्र०।

इति*। पितरश्चैवंलक्षणाः,—‘अथर्वाणः’ च ‘भृगवः’ च, य एते “सोमसम्पादिनः” अस्माकं “कल्याण्यां मतौ”, “वयम्” अपि तेषां ‘सुमतौ’ “कल्याण्यां मतौ” उपकारप्रवृत्तायाम्, ‘यज्ञियानाम्’ यज्ञसम्पादिनाम् ‘स्याम’। अपि च तेषां ‘भद्रे’ “भन्दनीये” स्तुत्ये ‘सौमनसे’ “कल्याणे मनसि” ‘स्याम’। “भाजनवति” वा; येन मनसा भाजयन्ति अभिमतैरर्थैः स्तोतॄंस्तस्मिन् शोभने च सङ्कल्पे शोभने वा अध्यवसाये स्याम इत्यर्थः॥

“माध्यमिको देवगणः-इति नैरुक्ताः”। ऋभवः, अङ्गिरसः, भृगवः, अथर्वाणः—इति, स्तुत्युपपत्तेः; देवतापदमध्ये समाम्नाना-देकैकश एषां देवगण इति नैरुक्ता मन्यन्ते†। “पितर इत्या-ख्यानम्”‡। को विशेषः? अग्न्यादिदेवतापदविपर्ययस्तद्धर्म-देवताप्रकार एवायं§ य एते पितरो नामत एव ऋभुसनत्कुमारादयः इत्याख्यानविदः स्मरन्ति। असावपि मन्त्राणां विषय इत्युपेक्ष्यः। अपि च देवगणा एते उत पितरः? इति। कुतो विचारः? ऋभवः, अङ्गिरसः, भृगवः—इत्येवमादीना‖मभिधानाना मृषिषु

* “नवनीतेनाभ्यञ्जन्ति आज्यं देवानां सुरभि घृतं मनुष्याणा मायुतं पितृणां नवनीतं गर्भाणाम्”—इत्यादि ऐ॰ ब्रा॰ १, १, २।

† अत एवाह “मनीषाः”—इति (मु॰ व्या॰) सूत्रव्याख्यायां दुर्गादासः—“इत्यादिबहुवनाम्नाः गणस्य सूचकाः”—इति।

‡ पितर इत्युक्ते ऋभ्वङ्गिरसभृग्वथर्वाणो बुध्यन्ते इत्यर्थः।

§ “अग्न्यादिदेवताविपर्ययधर्मदेवताप्रकार एवायं”—इति क।

‖ पृ॰ १८४—१९२ पृ॰ द्र॰।

प्रसिद्धेः । "अथापि" इद मपरं कारण मृषय एवैत इति,—यतो-ऽन्येऽपि "ऋषयः स्तूयन्ते" । तद्यथा—वसिष्ठाः* ॥ ७ (१९) ॥

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः । वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ इति यथा आम्ना† आम्नातेस्तेषा मेष निपातो भवत्यैन्द्र्या मृचि‡ ॥ ८ (२०) ॥

"सूर्यस्येव वक्षथः"—इति । इन्द्रस्यार्षम् । ('सूर्यस्येव ज्योतिः') यथा सूर्यस्य दीप्तिरवभासिकार्थानाम्, एवम् 'एषाम्' वसिष्ठानां

---

* ऐक्ष्वाकस्य हरिश्चन्द्रस्य राज्ञो राजसूये क्रतौ वसिष्ठो ब्रह्मनामत्विगासीत् इत्याख्यान मैतरेयके द्रष्टव्यम् (ऐ० ब्रा० ७, ३, ४) । वसिष्ठोत्पत्तिविवरणन्तु ऋक्संहितायां ५, ३, पञ्चविंशवर्गात्मकस्य ऋक्चतुष्टयस्य पर्यालोचनेनावगन्तव्यम् । "अदितेर्मित्रावरुणौ जज्ञाते (ऋ०सं०८,३,२,२ ?)"—इति प्रकृत्य पठ्यते चैतत् ।—"तयोरादित्ययोः सत्रे दृष्ट्वाप्सरस मुर्वशीम् । रेतश्चस्कन्द तत्कुम्भे न्यपतद् वासतीवरे । तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ । अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः । बहुधा पतितं रेतः कलशे च जले स्थले । स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तमः । कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः । उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः । मानेन सम्मितो यस्मात् तस्मान्मान्य इहोच्यते । यद्वा कुम्भादृषिर्जातः कुम्भेनापि हि मीयते । कुम्भ इत्यभिधानञ्च परिमाणस्य लक्ष्यते । ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः । सर्वतः पुष्करे तं हि विश्वेदेवा अधारयन् ॥"—इति ऋ० सं० ५, ३, २४, १.सा० ।

† "इति यथाम्ना" ग ।

‡ ऋ० सं० ५, २, २२, २ । अत्राह सायणः—"आदितो मवानां वसिष्ठ ऋषिः । वसिष्ठपुत्राणां स्तूयमानत्वात् त एव देवताः"—इत्यादि ।

'वक्षयः' वचनस्य दीप्तिः, अधिदेवादिगताना मर्थाना मसन्देहेनावभासिका वाच्येऽर्थे । अपि च न केवल मेषा मसन्दिग्धार्थानि वचांसि;—गम्भीराणि च; महार्थवन्ति गम्भीरार्थतया दुरवगाहानि । यत आह—"समुद्रस्येव महिमा गभीरः" । यथा उदक मपरिमेयं समुद्रे, एव मपरिमेयार्थानि । सत्यपि च महार्थत्वे नैते विलम्बितस्तुतयः ; किन्तर्हि ? "वातस्येव प्रजवः" । प्रकृष्टो जव आशुप्रतिपत्तिः तुष्टूषतां वर्णपदवाक्येषु निर्मलमनोवाग्वृत्ती शब्दार्थावसङ्गेन प्रतिपद्येते । अपिचैव मतिमहानुभावा एते, नैतेषा मन्यस्तोता वचनपदवी मनुगन्तुं शक्तः । यतो ब्रवीमि—'नान्येन' केन चित् स्तोत्रा हे 'वसिष्ठाः !' । प्रत्यक्षोक्त्योत्तरेण पादेन ब्रवीति—एष 'स्तोमः' इयं स्तुतिः, भावत्की ; असन्दिग्धार्था, गम्भीरा, अविलम्बिता च । 'न अन्येन अन्वेतवे' नानुगन्तु मन्येन शक्या; क एना मनुकरिष्यतीति स्तुतिपरितुष्ट इन्द्रो वसिष्ठानस्तौत् ॥

एव मृषयोऽपि स्तूयन्ते इति प्रदर्शन मप्यस्तीति* मन्त्राणां विषय इति ॥

अपरे पुनः—"सूर्यस्येव वक्षथः" । सूर्यतेजःसमानदीप्तोरस एते वसिष्ठाः तेजस्विनः, समुद्रोपमगम्भीरस्वभावाश्च, शीघ्रगतयश्च, सर्वत्राप्रतिहतजवाः ; नैतेषां मन्येन गतिरनुगन्तुं शक्येति वर्णयन्ति ॥

"आप्त्याः"† अपीन्द्रसहचारिण ऋषयः ; एकत-द्वित-त्रिताः‡;

---

* "प्रदर्शयत्यय मप्यस्तीति"—इति क ।

† १भा० ४८३, ४८६पृ० ५अ० ५ख० (१५) ।

‡ २भा० ३९४—३९८पृ० ३भा० १९, २५पृ० ; इह च पुरस्तात् ३८ पृ० द्र० ।

ते इन्द्रेण सह चेरुरिति विज्ञायते । ऋभवादयोऽप्येतस्मादेव दर्शनाद्दृषिपक्षे मध्यस्थाना: । ते कस्मात् ? "आप्नोतेः" आप्नुवन्ति हि ते स्तुतिभिः स्तुत्यान् ॥

"तेषाम् एषः निपातः भवति ऐन्द्र्याम् ऋचि" इन्द्रो यस्यां स्तूयन्ते, तस्या ऋचि—॥ ८ (२०) ॥

स्तुषेय्यं पुरुवर्पस मृभ्व मिनतम माप्त्य माप्त्यानाम् । आ दर्षते शवसा सप्त दानून् प्र साक्षते प्रतिमानानि भूरि ॥ स्तोतव्यं बहुरूप मुरुभूत मीश्वरतम माप्तव्य माप्तव्याना मादृणाति यः शवसा बलेन सप्त दातृनिति वा सप्त दानवानिति वा प्रसाक्षते प्रतिमानानि बहूनि साक्षतिराप्नोतिकर्मा ॥ ९ (२१) ॥

॥ इति एकादशाध्यायस्य द्वितीयः पादः ॥ ११ । २ ॥

"स्तुषेय्यं पुरुवर्पसम्"—इति * । बृहद्दिवस्यार्षम् । महाव्रते विनियोगः । 'स्तुषेय्यम्'† "स्तोतव्यम्" अहं स्तौमि इन्द्रम् । किंलक्षणम् ? 'पुरुवर्पसम्' "बहुरूपम्", 'ऋभ्वम्' "उरुभूतम्", 'इनतमम्' "ईश्वरतमम्", 'आप्त्यम् आप्त्यानाम्' ऋषीणां स्तुतिभिः अतिशयेन "आप्तव्यम्" । 'आ दर्षते' "आदृणाति" यः 'शवसा'

---

* ऋ० सं० ८, ७, १, १ । अथेय ऋक्, तत्सूक्तं माथर्वणं बृहद्दिवस्य ।

† "स्तुवः कसेय्यश्छन्दसि (१, ९९.)"—इत्यौणादिकः कसेय्यप्रत्यये रूपम् ।

"बलेन" आदारयति। किम्? 'सप्त दानून्' "सप्त दातृन्" मेघान्, असुरान् वा "दानवान्" नमुचिप्रभृतीन्। पृथक्पक्षे—केन? 'शवसा' बलेन आदारयति। 'प्रसाक्षते' च, य आप्नोति अभिभवति च 'प्रतिमानानि' 'भूरि' "बहूनि" अपि। तदुक्तम्—यैरेनं प्रतिमिमते, नैनं तानि दध्नुवन्तीति * ॥

"साक्षतिः आप्नोतिकर्मा" † ॥ ६ (२१) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य द्वितीयः पादः ॥ ११ । २ ॥

॥ तृतीयः पादः ॥

अथातो मध्यस्थाना स्त्रियस्तासा मदितिः प्रथमागामिनी भवत्यदितिर्व्याख्याता तस्या एषा भवति ॥ १ (२२) ॥

"अथ अतः मध्यस्थानाः स्त्रियः"। बहुवचनविशिष्टस्य मध्यमस्य गणशोऽवस्थितस्य विभवो व्याख्याताः। लिङ्गविशिष्टस्येदानीं यथासमाम्नाय मेव व्याख्यातव्यः, तदर्थं पुनर्विशेषतोऽधिकारवचनम् 'अथातः'—इति। मध्य मासां स्थान मिति 'मध्यस्थानाः'—इति। काः पुनः ताः? 'स्त्रियः' इति; वक्ष्यन्ते इति शेषः।

---

* "न त्वा केता आ दध्नुवन्ति भूर्णयः"—इति च ऋ० सं० १, ४, १०, १. इ० ।

† "प्रसाक्षते य इन्द्रः प्रसहते। * * *। षह अभिभवे, लेट्यडागमः, सिब्बहुल मिति सिप्, ढल-कत्व-षत्वानि, छान्दसो दीर्घः।"—इति चाह सायणः; अस्मन्मते तु साक्षतिर्धात्वन्तर मेव नैरुक्तानाम्।

"तासाम् अदितिः * प्रथमागामिनी भवति" । सा कस्मात् ? उक्तं हि—"अदीना देवमाता"—इति† ॥

"तस्या एषा भवति"—॥ १ (२२) ॥

दक्ष॑स्य वादिते जन्म॑नि व्र॒ते राजा॑ना मि॒त्रावरु॑णा वि॑वाससि । अतू॑र्त्तपन्थाः पुरु॒रथो॑ अर्य॒मा स॒प्तहो॑ता विषु॑रूपेषु जन्म॑सु ॥ दक्षस्य वादिते जन्मनि व्रते कर्मणि‡ राजानौ मित्रावरुणौ परिचरसि विवासतिः परिचर्यायां हविष्माँ आविवासतीत्याशास्तेर्वातूर्त्त-पन्था§ अत्वरमाणपन्था बहुरथो अर्यमादित्यो॥ ऽरीन्नियच्छति सप्तहोता सप्तास्मै रश्मयो रसानभिसन्नामयन्ति सप्तैन मृषय स्तुवन्तीति वा विषमरूपेषु जन्मसु कर्मस्वुदयेष्वादित्यो दक्ष इत्याहुरादित्यमध्ये च स्तुतोऽदितिर्द्दाक्षायणी । अदि॑तेर्द॒क्षो अ॑जायत॒ द॒क्षाद्दि॑ति॒ः परी॑ति च॑ ॥ तत्कथ मुपपद्येत समानजन्मानौ स्याता मित्यपि वा देवधर्म्मेणेतरेतरजन्मानौ स्याता मितरेतर-प्रकृती अग्निरप्यदितिरुच्यते तस्यैषा भवति ॥२(२३)॥

---

* १भा० १३, ९१, १३०, २७५, ४०१पृ० ; ४८३, ४८६पृ० ५अ० ५ख० (१९) ।

† पु० ४अ० ४पा० १, १ख० (१भा० ४६८ पृ०) द्र० ।

‡ "जन्मनि कर्मणि व्रते" क, ख, ग ।

§ "हविष्मानाविवासतीत्याशास्तेर्वा । अतूर्त्तपन्था"—इति ङ-प्रभृतिषु ।

|| "बहुरथोऽर्यमादित्यो" घ ।

"दक्षस्य वादिते"—इति*। गयस्यार्षम्। वैश्वदेवे शस्यते। अहोरात्रे मित्रावरुणौ†, तयोर्या सन्धिवेला, तस्यां प्रथम मवस्थाय-रसानुप्रदानसम्बन्धात्तां मध्यमा मदिति मभिप्रेत्योच्यते‡।—"दक्षस्य वादिते"—इति। 'वा'-शब्दः किमर्थः? यदा दक्ष आदित्यः, त्वत्तो जातः; त्वं वा आदित्यात्; सन्धिवेलानन्तरं ह्यादित्यस्योदयो जन्म, तदेवास्य व्रतङ्कर्म§। तदुक्तम्—"कर्मजन्मानः" इति‖। अथ तदेवं 'दक्षस्य' 'जन्मनि' उदये पार्श्ववर्त्तिन्यादित्ये; यतो वा त्वव्यात्मिकालम्। अप्यहोरात्रे उभे 'विवासमि' परिचरसि, सर्वतो व्याप्नोषि; अर्धेनाह्व्याप्नोषि मित्रम्; अर्द्धेन च रात्रिं वरुणम्। 'राजानौ' सर्वलोकेश्वरौ¶, स्वाधिकारयुक्तास्वितिकर्त्तव्यतासु; तदधीनत्वात् प्रवृत्तेरिति। किंलक्षणो यो दक्षः तस्य जन्मनि? इति, यत आह—'अतूर्त्तपन्थाः' योऽय मादित्यः "अत्वरमाणपन्थाः", अत्वरमाणः पथि वर्त्तते; नियतगतिः प्रतिमुहूर्त्तं प्रत्यहञ्च। 'पुरुरथः' बहुरंहणः। 'अर्यमा' अरीणान्तमसान्नियन्ता। 'सप्तहोता' "सप्तास्मै रश्मयः रसानभिसन्नामयन्ति" तदस्य सप्तहोतृत्वम्; "सप्तैन मृषय

---

* ऋ० सं० ८, ९, ५, ९। "प्लातस्य गयस्यार्षम्" सा० भा०।

† "अहर्वै मित्रो रात्रिर्वरुण इति (ऐ० ब्रा० ४, १, ४) श्रुतेरहोरात्रौ मित्रावरुणावुच्येते"—इति सा० भा०।

‡ "हे अदिते! पृथिवि! * * * यद्वा हे अदिते! प्रातस्तनि सन्ध्ये!"—इति चात्रैव सा० भा०।

§ निघ० २अ० १ख० (७)=१भा० १९३, १९५पृ० (७)।

‖ पु० ७अ० १पा० ५ख० (३भा० ११३पृ०)।

¶ "राजानौ—दीप्यमानौ"—इति सा० भा०।

आङ्क्यन्ति" नमन्ति,—स्तुवन्ति वसिष्ठाद्याः; तदास्य सप्तहोतृत्वम्*। 'विपुरूपेषु जन्मसु' "विषमरूपेषु" अन्यस्मिंश्चान्यस्मिंश्च नभसः प्रदेशे अय मुदेति; मण्डलान्तरं मण्डलान्तरं हित्वा दक्षिणोत्तरायणयोस्त-दस्य विषमरूपत्वं विषमजन्मता†; ततो लब्धात्मिका तं वा जनयन्ती। या त्व मेतौ मित्रावरुणौ परिचरसि, सा त्व मिदं नामास्माकं कुरुष्वेत्येतदाशास्महे।—इति समस्तार्थः॥

अथ वा 'दक्षस्य वा' यदा दक्षस्त्वं जातः, 'व्रते' च 'कर्मणि' प्रवृत्तः। स्वाधिकारयुक्तोऽयम् 'ऋतुर्त्तपन्थाः "पुरुरूपा०——०जन्मसु"। य एष वर्त्तते भगवानादित्यः। अथ तदा मित्रा-वरुणौ विवासस्याशास्से।—ममैतावपि पुत्रत्वे लोकोपकारित्वेन सम्यग्वर्त्तेयातां यथैव दक्ष इत्येतिहासिकपक्षे योजना॥

"विवासतिः परिचर्यायाम्"—इत्यत्र निगमः।——"हविष्माँ आ विवासति"—इति‡॥

"यो अग्निं०——०स्तऊय"§। मेधातिथेरार्षम्। गार्हपत्यानु-

---

* "सप्तहोता—सप्तरश्मयो यस्मिन् रसान् जुह्वति प्रक्षिपन्ति, स एतादृशो भवति। * * * यद्वा * * *। सप्तहोता—ऋग्वेदस्यैतिकमेण (१भा० २२२४०) इदं रूपम्। सप्तर्षयो भरद्वाजाद्यो होतारः स्तोतारः सन्तीति। अथ वा सप्तहोता—मखिस्रुचाद्रसप्तिसहिताः सप्तर्त्विजो यस्य होतारो भवन्ति तादृशः"—इति सा० भा०।

† "विपुरूपेषु नानारूपेषु, जन्मसु कर्मसु"—इति सा० भा०।

‡ ऋ० सं० १, १, १२, २—इति ऋचोऽन्त्यपादः।

§ "यो अग्निं देववीतये हविष्माँ आविवासति। तस्मै पावक मृळय॥" ऋ० सं० १, १, १२, २।

गमने पूर्णाहुतिरनया हूयते। हे 'पावक!' अग्ने! 'देववीतये' देव-भोजनाय 'हविष्मान्' हविःसम्प्रयुक्तो यस्त्वाम् 'आविवासति' परिचरति, तस्मै 'मृडय' उपदयां रक्षां कुर्वित्येतदाशास्महे॥

"आदित्यो दक्ष इत्याहुः" देवतासतत्त्वविदः। केन दर्शनेन? "आदित्यमध्ये च स्तुतः"। च शब्दो हेत्वर्थः; यस्मादादित्यमध्ये स्तुतः; स्तुतिप्रामाणिका हि ते देवतासतत्त्वचिन्तां प्रति। कथ मादित्यमध्ये स्तुतः? इति "इमा गिरः"—इत्युपक्रम्य ब्रवीति*—"तुविजातो वरुणो दक्षो अंशः"—इति† आदित्यमध्ये स्तुतेः आदित्य एवासौ इति॥

यद्येवं नन्विद मपरं विरुध्यते—यदैतिहासिका आहुः "अदितिर्दाक्षायणी"—इति। उभय मपि चैतस्मिन्निगमे श्रूयते—आदित्यो दक्षो दाक्षायण्यदितिरिति। तद्यथा—"अदितेर्दक्षो अजायत दक्षाद्वदितिः परि। भूजज्ञ उत्तानपदो भुव आशा अजायन्त"‡। अदितेर्दाक्षायण्या आर्षम्। उत्तानपाद्राजा कश्चिद् यः पुराणेऽपि स्मर्यते§, ततस्तावद्भूर्नाम कश्चिज्जज्ञे। ततोऽपि 'भुवः' 'आशाः' दिशोः 'अजायन्त'; दिक्प्रजननभाव मसौ कथ मपि बिभर्त्ति; देवताजन्म-

---

* ऋ० सं० २, ७, ९, १। आदित्यदेवताके पशौ पुरोडाशस्येमागिर इत्येषानुवाक्या। आ० स्र० ३, ८. श्रौ०।

† तस्या एव इमागिर ऋचश्चतुर्थपादोऽयम्।

‡ ऋ० सं० ८, ३, १, ४। परं तत्र पूर्वोत्तरार्द्धर्चयोर्व्यत्ययेन पाठः।

§ तथा हि विष्णुपुराणीयैकादशाध्याये—"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु। द्वौ पुत्रौ सुमहावीर्यौ धर्मज्ञौ कथितौ तव॥"—इत्येवमादि। सायणस्तु "उत्तानपदः—वृक्षात्"—इत्याह। वस्तुतोऽयमुत्तानपाच्छब्दो चिन्तनीय एव।

प्रतिक्रियया वा। 'अदितेर्दक्षो' 'अजायत' प्रादुर्बभूव। 'दक्षात्' 'उ' च 'परि' अधि सकाशात् 'अदितिः' प्रादुर्बभूव* ॥

"तत्" इतरेतरविरुद्धं "कथ मुपपद्येत"? यतः प्रतिसमाधानं ब्रवीति—"समानजन्मानौ स्याता मिति"। समनन्तरजन्मानौ समानजन्मानौ यथोपवर्णितं मन्त्रे "दक्षस्य वादिते"—इत्यत्र। "अपि वा देवधर्मेण" महदात्मना अदिति मपेक्ष्य तस्याः कारणत्वं च कार्यत्वं च दक्षस्य; अथ वा महदात्मना दक्ष मपेक्ष्यादितेः कार्यत्वम्। एवं श्लोकम्—"इतरेतरजन्मानौ"—"इतरेतरप्रकृती" इति॥

अधुना व्यभिचारं दर्शयति—"अग्निरप्यदितिरुच्यते"—इति। "तस्य" अग्नेरदितिशब्दवाच्यत्वे "एषा भवति"—॥ २ (२३)॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्व मदिते सर्वताता। यम्भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम॥ यस्मै त्वं सुद्रविणो ददास्यनागास्त्व† मनपराधत्व‡मदिते सर्वासु कर्मततिषाग आङ्पूर्वाद्गमेरेन एतेः किल्बिषं किल्भिदं सुकृतकर्मणो भयं

* अदितिपरिचयज्ञानाय ऋ० सं० १० म० ६ अ० ४ सू० १—९ ऋ०, ऐ० ब्रा० १प० ३अ० ७ख०, तै० सं० ६ का० ५ प्र० ६ अनु १ क० द्रष्टव्याः। अध्वर्युब्राह्मणे चादितेरष्टौ पुत्राः परिगणिताः। तथाहि—"तानमुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्चेति।

† "ददाशोऽनागास्त्व०" क, ख, ग।

‡ "मनपराधित्व" क, ख, ग।

कीर्त्तिं मस्य भिनत्तीति वायं भद्रेण श्रवसा बलेन चोदयसि प्रजावता च राधसा (धनेन*) ते वय मिह स्यामेति सरमा सरणात्तस्या एषा भवति ॥३(२४)॥

"यस्मै त्वं सुद्रविणः"—इति[†]। कुत्सस्यार्षम्। प्रातरनुवाके विनियोगः। हे 'सुद्रविणः' सुधन! 'अदिते!' अग्ने! 'यस्मै' 'त्वं' 'ददाशः' 'ददासि'। किम्? इति—'अनागास्त्वं' "अनपराध! त्वं" 'सर्वताता' "सर्वासु कर्मततिषु" इष्टिपशुसोमलक्षणासु[‡] अवैगुण्यं करोषि। 'यं' च 'भद्रेण' 'श्रवसा' 'बलेन' स्वजात्यविरोधिना, 'प्रजावता' च 'राधसा' प्रजासंयुक्तेन च धनेन त्वं ('चोदयासि') "चोदयसि" अनुगृह्णासि। ते वय मेवानुगृह्यास्तव 'स्याम'।—इत्येतदाशास्महे॥

"आगः आङ्पूर्वाद्गमेः" अवश्य मेवैतदागच्छति कर्त्तार मित्यागः। प्रसङ्गादाह—"एनः एतेः"। तदप्येवं मेवावश्य मेवैति। यदेतत् "किल्बिषम्" एतत् "कीर्त्तिं भिनत्ति"§॥

"सरमा"‖ देवशुनीत्यैतिहासिकपक्षेण¶; माध्यमिका वाक्

---

* नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

† ऋ० सं० १, ९, ३१, ५। आग्नेयसूक्ते चैषा पञ्चदशी।

‡ महीधरेण तु यजुर्व्याख्यानारम्भे होत्र मिष्टिः सोमश्चेति प्रकृतियागस्य त्रैविध्यं स्वीकृतम्।

§ मूले व्यतिरिक्त मस्ति तत् तत्रैव [२०४ पृ० १५ पं०] द्रष्टव्यम्।

‖ १भा० ४८२, ४८४ पृ० ५ अ० ५ ख० (१०)।

¶ तथा च शाट्यायनकम्—"अस्माद्दिनीमिे सरमे प्रजां करोमि या नो गा अन्व-

नैरुक्तपक्षेण, सा कस्मात्? "सरणात्" गमनात्। "तस्या एषा भवति"—॥ ३ (२४)॥

किमिच्छन्ती सरमा प्रेद मानड् दूरे ह्यध्वा* जगुरिः पराचैः। कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि॥ किमिच्छन्ती सरमेदं प्रानड्† दूरे ह्यध्वा जगुरिर्जङ्गम्यतेः पराञ्चनैरञ्चितः का तेऽस्मास्वर्थहितिरासीत्किं परितकनं परितक्म्या रात्रिः परित एनां तक्म तक्मेत्युष्णनाम तकत इति सतः कथं रसाया अतरः पयांसीति‡ रसा नदी रसतेः शब्दकर्मणः कथं

विन्द:"—इत्यादि। "अत्रेद माख्यानम्। सरमा नाम देवशुनी। पणिभिर्गोष्वपहृतासु तदन्वेषणाय तां सरमामिन्द्रः प्राहैषीत्। यथा लोके व्याधो वनान्तर्गत-मृगान्वेषणाय श्वानं विसृजति, तद्वत्। सा च सरमैव मवोचत्। हे इन्द्र! अस्मदीयाय शिशवे तद्गोसम्बन्धि क्षीराद्यन्नं यदि प्रयच्छसि तर्हि गमिष्यामीति। स तथेत्यब्रवीत्। ततो गत्वा गवां स्थान मज्ञासीत्। ज्ञात्वा चास्मै न्यवेदयत्। तथा निवेदितासु गोषु त मसुरं हत्वा ता गाः स इन्द्रोऽलभतेति॥"—इति ऋ० सं० १म० ११अनु० ५सू० ३ऋ० सा० भा०। ऐन्द्रपुरोहितस्य बृहस्पतेर्गोषु वलनाम्नो ऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेन्द्रेण गवा मन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं नदी मुत्तीर्य वलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श। अथ तस्मिन्नन्तरे पणय इदं दृष्ट्वा नवगच्छन्त एनां मित्रीकर्तुं संवाद मकुर्वन्॥"—इति च ऋ० सं० १०म० ९अनु० ९सू० १ऋ० सा० भा०।

* "मानड्भिरेद्यध्वा" ख।

† "प्रापद्" क, ख, ग।

‡ "पर्यांसीति" च।

रसानि तान्युदकानीति वा देवशुनीन्द्रेण प्रहिता पणिभिरसुरैः समूद* इत्याख्यानं सरस्वती व्याख्याता तस्या एषा भवति ॥ ४ (२५) ॥

"किं मिच्छन्ती"—इति† । देवपणयः किलासुराः देवगवीरपजह्नुः । ततः किलेन्द्रस्तदन्वेषणाय तदालयं सरमां प्राहिणोत् । ते च देवपणयः तां दृष्ट्वा पप्रच्छुरनयर्चा—"किं मिच्छन्ती सरमा" —इति । 'इदम्' अस्मन्निवासस्थानं सरमा 'किं मिच्छन्ती' किमस्मत्तः प्रार्थयन्ती 'प्रानट्' प्राप्तवती? कदाचिदप्यनागतपूर्वेति । अपि च 'दूरे ह्यध्वा' महदेतदध्वानं न यदृच्छया शक्य मागन्तुम्; य एव 'जगुरिः' स्यात् भृशङ्गन्ता, स एव शक्त आगन्तुम् । 'पराचैः' "पराञ्चनैरचितः" पराङ्मुखैः अञ्चनैर्गमनैः अचितो गतः, विप्रकृष्टो देवनिवासात् । यतो ब्रूमः—हे सरमे ! 'कास्मेहितिः' "का तव अस्मास्वर्थहितिः" अर्थस्याभिधानम्? कोऽस्मत्तोऽर्थस्तव प्राप्तव्योऽभिप्रेत आसीद्? येनाय मतिमहानध्वा व्यवसित आगन्तुम् । अपि च 'का परितक्म्यासीत्' "किं परितकनम्"? अपि नाम सुखा रात्रिः अनन्तरा तवासीत् "परितक्म्या रात्रिः" । "तक्मेत्यु-

---

* "समुद्र" क, ख, ग ।

† ऋ० सं ८, ६, ५, १ । "प्रथमात्तृतीयाद्या अयुजोऽन्त्यावर्जिताः पणीनां वाक्यानि । अत्र त एव ऋषयः । सरमा देवता ।"—इति सा० भा० ।

ष्णनाम"* । तकतेर्गत्यर्थस्य†; सर्वतो हि तद् गतं भवति । तदेनामुभयतः परिगृह्य वर्त्तते इति परितक्म्या रात्रिः‡ । अपि च "कथं रसाया अतरः पयांसि" । "रसा" नाम "नदी" अध्यर्धयोजनविस्तारा§, तस्याः पयांस्यतिदुस्तराणि कथ मतरः कथमुत्तीर्णवत्यसि? । अथ वा "कथं रसानि तान्युदकानि"‖ अपि नाम स्वादूनि, अपि आन्तायास्तवान्तरावासाः केष्वासन्निति ॥

"देवशुनीन्द्रेण प्रहिता"—इति निदानप्रख्यापनं मन्त्रार्थाभिव्यक्तये । "समूदे" संवादं कृतवतीत्यर्थः । इत्याख्यानविदः एवं मन्यन्ते ॥

वाक्पक्षे तु चिरकालीनवृष्टिव्युपरमे कदाचिदभिनवमेघसंप्लवे सहसैव स्तनयित्नु मुपश्रुत्य कुत इयं माध्यमिका वाक् चिरेणागतेति स्मितस्ता मस्तुयन्निव ब्रवीति—"किमिच्छन्ती सरमा"—इति¶ । इद मस्मच्छ्रोत्रं चिर मनागम्य 'सरमा' माध्यमिका वाक् 'किमिच्छन्ती' 'प्रानट्' प्राप्तवती ? अपि च 'दूरे हि अध्वा' चिरकालश्रुतेय मस्माभिः 'जगुरिः' भृशं यो गन्ता स्यात्, स चिर-

---

* अपत्यनामस्वपि दृष्टं तक्मेति १भा० १०१, १०२ पृ० (५) ।

† १भा० २३८, २४९ पृ० (१८) ।

‡ यदुक्तं पुरस्तात् "परितक्मेत्युपरिष्टाद् व्याख्यास्यामः ४ अ० १ पा० ८ख० (१भा० ४२४, ४२९ पृ०)"—इति, तदिह व्याख्यातम् ।

§ "धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः ॥"—इति छन्दोगपरिशिष्टम् ।

‖ निघ० १अ० १२ख० (१भा० ९९,११०पृ०) द्रष्टव्य मेव ।

¶ व्याख्याताया एवास्या ऋचो वाक्पक्षे व्याख्यान्तरं दर्श्यते ।

विच्छिन्न मेतद्दर्षवर्त्म पुनरागच्छेत्मन्ननुयात् 'पराचैः' पराङ्मुखैः ;—एतदचिन्त्यं चिरनष्ट मित्यर्थः। अपि च 'कास्मेहितिः' किमस्मा-स्वर्थाभिधान मासीत्? पूर्वन्तव हे सरमे! येनागमः, किं वा न जातं येनापुनरागमः। अपि च चिरप्रोषितायास्तव किं परितकन मासीत्? अन्तरिक्षनद्या अपि महत्या 'रसायाः' 'कथ मतरः पयांसि' कथ मतिबह्वन्युदकानि सङ्क्षोभ्यात्मानं प्रतिलब्धवत्यसि? इति वा; "वाग्वै सरमा"—इति हि विज्ञायते* ॥

"सरस्वती"†, "व्याख्याता";—"नदीवत्"—इति,—"तद्यद्देव-तावत्"—इत्युक्त मिदन्तत्‡। "तस्या एषा भवति"—॥ ४ (२५)॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥ पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्मवसुस्तस्या एषापरा भवति॥५ (२६)॥

---

* पैतृमेधिके च कर्मणि "हृक्षावुद्धृत्य पाण्योरादध्यादतिद्रव सारमेयौ श्वानौ"—इत्याहाश्वलायनः (गृ० ४, ३.)। "अतिद्रव सारमेयौ श्वानौ"—इति च ऋ० सं० ७, ६, १५, ५। अत्र च सारमेयौ—"सरमा नाम का चित् प्रसिद्धा देवशुनी, तस्याः पुत्रौ"—इत्याह सायणः। ऋ० सं० ७, ६, १६, १; २;—५, ४, २१, १; २. च ऋक्षु सारमेयशब्दो द्रष्टव्यः। देवशुन्या नाम सरमेति, असुरशुन्या नाम दीर्घ-जीकीति चैतिहासिकाः। "आसुरी वै दीर्घजिह्वी देवानां प्रातःसवन मवालेट्"—इत्याद्याख्यानश्च द्रष्टव्यम्। ऐ० ब्रा० २ प० ३ अ० ४ ख०।

† १भा ४८२, ४८७पृ० ५अ० ५ख० (१८)।

‡ पु० २अ० ७पा० १ख० (२भा० २९५ पृ०)।

"पावका नः सरस्वती"—इति*। मधुच्छन्दस आर्षम्। प्रउगे विनियोगः; सारस्वते च हविषि। 'पावका' प्रचारयन्त्युदकेन। का पुनरसौ? इति—'सरस्वती' माध्यमिका वाक्†। "वाजेभिर्वाजिनीवती"। अन्नेन, हविषोदकेन वा, तद्वती। 'यज्ञम्' एत मस्माकम्, 'वाजेभिः' "अन्नैः" युक्तं 'वष्टु' कामयताम्। अथ वा ऋगादिभाव मापन्ना देवान् प्रति वहतु; वक्ष्यति हि‡ "तां विश्वरूपाः पशवो वदन्ति"—इति। 'धियावसुः' कर्मधना॥

"तस्या एषा अपरा भवति"—स्फुटतरोदकलिङ्गा॥ ५ (२६)॥

महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति॥ महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभि§ विराजति वागर्थेषु विधीयते तस्मान्माध्यमिकां वाचं मन्यन्ते वाग्व्याख्याता तस्या एषा भवति॥ ६ (२७)॥

---

* ऋ० सं० १, १, ६, ४। य० वा० सं० २०, ८४। ऐतरेयारण्यके चेयं व्याख्याता।

† "सारस्वतं शंसति। तस्मात् कुमारं जातं जघन्या वागाविशति। वाग्घि सरस्वती। यत् सारस्वतं शंसति, वाच मेवास्य तत् संस्करोति॥"—इति ऐ० आ० २प० १अ० २ख०।

‡ इतश्चतुर्थखण्डे एव (२१२पृ० ६पं०)।

§ "सर्वाणि भूतान्यभि" क, ख, ग।

"मुहो अर्णः सरस्वती"—इति* । पूर्ववदार्षं विनियोगश्च । 'महो अर्णः' महदुदकं 'सरस्वती' माध्यमिका वाक्, किङ्करोति ? 'प्र चेतयति' "प्रज्ञापयति" आविःकरोति वर्षभावेन । केन पुनराविःकरोति ? 'केतुना' स्वेन "कर्मणा, प्रज्ञया वा" ; न ह्यप्रज्ञानवत्यबलिष्ठा चैतच्छक्ता कर्त्तुम् । एवं चोदक माविःकुर्वती "धियो विश्वा वि राजति" । "सर्वाणि प्रज्ञानान्यभिविराजति" । कथम् ? उदकादन्नम्, अन्नात्प्रज्ञान मित्येवं सर्वप्रज्ञानाना मधावीष्ट इति ॥

"वाक् अर्थेषु विधीयते"—इत्युपपत्तिवचनम्† । के पुनर्वाचोऽर्थाः ? "चतस्र ऊर्जन्दुदुहे पयांसि"—इत्येवमादयः‡, उदकाधिकारलक्षणाः । तेष्विय मपि सरस्वती विधीयते "मुहो अर्णः"—इत्येवमादिषु । "तस्मान्माध्यमिकां वाचं मन्यन्ते" नैरुक्ताः ॥

"वाग्"§ वक्तव्या । सा पुनः "व्याख्याता" ;—"वचेः" इति|| ॥

"तस्या एषा भवति"—॥ ६ (२७) ॥

---

* ऋ० सं० १, १, ६, ६ । अत्राह सायणाचार्यः—"द्विविधा हि सरस्वती ; विग्रहवद्देवता नदीरूपा च । तत्र पूर्वाभ्या मृग्भ्यां ("पावकानः सरस्वती"—"चोदयित्री सूनृतानाम्"—इत्येताभ्याम्) विग्रहवती प्रतिपादिता ; अनया तु नदीरूपा प्रतिपाद्यते ॥"—इति । य० वा० सं० १०, ८६ ।

† अत एवोक्तं व्याकरणमहाभाष्ये पस्पशायां पतञ्जलिः—"सिद्धे शब्दार्थसम्बन्धे" —इत्यादि । "वागर्थाविव सम्पृक्तौ"—इति च रघुवंशकृत् कवि-कालिदासः ।

‡ इत उत्तरस्मिन्नेव खण्डे द्रष्टव्यम् (२१२ पृ० २ पं०) ।

§ १भा० ४८६, ४८७ पृ० ५अ० ५ख० (१९) ।

|| पुरस्तात् २अ० ७पा० १ख० (२भा० २२५, २२९ पृ०) ।

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं दुदुहे पयांसि* क्व स्विदस्याः परमं जगाम॥ यद्वाग्वदन्त्यविचेतनान्यविज्ञातानि राष्ट्री देवानां निषसाद (मन्द्रा †) मदना चतस्रोऽनु दिश ऊर्जं दुदुहे पयांसि ‡ क्व स्विदस्याः परमं जगामेति यत् पृथिवीं गच्छतीति वा यदादित्यरश्मयो हरन्तीति वा तस्या एषापरा भवति॥७ (२८)॥

"यद्वाग्वदन्ति"—इति§। नेमस्यार्षम्। सारस्वते पशौ विनियोगः। यदा माध्यमिका 'वाग्वदन्ती' निर्वचयन्ती। कानि? 'अविचेतनानि' "अविज्ञातार्थानि" शब्दरूपाणि स्तनयित्नुलक्षणानि। 'राष्ट्री' ईश्वरा, माध्यमिकानां देवतानाम्। 'निषसाद' निषीदति, व्याप्नोति आत्मानं वर्षकर्मणि। 'मन्द्रा' "मदना" हर्षकरी, तर्पयित्री वा लोकस्य। अथ तदा किम्? इति— "चतस्र ऊर्जं दुदुहे पयांसि। 'चतस्रः' दिशः प्रत्यनुदिशश्च 'दुदुहे' दुग्धे, प्रक्षरति,—'ऊर्जम्' अन्नं 'पयांसि' उदकानि। तेषां च पयसां "क्व स्विदस्याः परमं जगाम"। क्वैतानि निष्पाद्यौषधीर्गच्छन्ति? कुतो वा प्रतिसंवत्सरं पुनरागच्छन्तीति? कस्तत्वं 'जगाम'

---

*, ‡ 'पयाँसि" च।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

§ ऋ० सं० ६, ७, ५, ४। वाग्देवत्येयम्।

जगाम। यानि पृथिव्या मवतिष्ठन्ते, यानि चादित्यरश्मयो हरन्तीति। एव मनुपक्षीणपयस्कैव मिति श्रूयते ॥

"तस्या एषा अपरा भवति"—। सा पुनः किमर्थम्? इय मेव वाक् सर्वप्राण्यन्तर्गता माध्यमिकी सर्वार्थाभिवादिनी भवतीति विभूत्युपप्रदर्शनार्थम् ॥ ७ (२८) ॥

देवीं वाच मजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेष मूर्ज्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥ देवीं वाच मजनयन्त देवास्तां सर्वरूपाः पशवो वदन्ति व्यक्तवाचश्चाव्यक्तवाचश्च सा नो मद-नान्नञ्च * रसञ्च दुहाना धेनुर्वागस्मानुपैतु सुष्टुतानु-मती राकेति देवपत्न्याविति नैरुक्ताः पौर्णमास्या-विति याज्ञिका या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति विज्ञायतेऽनुमतिरनुमननात्तस्या एषा भवति॥८(२९)॥

"देवीं वाच मजनयन्त"—इति[†]। तदेवार्षम्। 'देवीं' दात्री मुदकानाम्, यां 'वाचम्' 'अजनयन्त' माध्यमिकाः 'देवाः', 'ताम्' एवैतां यथाभिमतार्थाभिधायिकां 'विश्वरूपाः' "सर्वरूपाः" 'पशवो

---

* "मदनमान्नञ्च" क, ख, ग।

† ऋ० सं० ६, ७, ५, ५। इय मपि वाग्देवत्या।

वदन्ति' तत्पूर्वकत्वाद्वाक्प्रवृत्तेः; "व्यक्तवाचश्चाव्यक्तवाचश्च" व्यक्तवाचो मनुष्यादयः, अव्यक्तवाचो गवादयः* । येवं सर्वपशुभिरुच्यते, 'सा नः' अस्माकं 'मन्द्रा' "मदना" 'इषम्' "अन्नं" पयोघृतादिरूपम्, "रसञ्च" 'ऊर्जञ्च' 'दुहाना' प्रक्षरन्ती। 'धेनुः' तर्पयित्री 'वाग्' 'अस्मानुपैतु' ('सुष्टुता') सुष्टु स्तुता ।—इत्येतदाशास्महे ॥

"अनुमतिः", "राका"—"इति† देवपत्न्यौ इति नैरुक्ताः"। सहपदयोरुपन्यासस्तुल्योऽनयोरभिधेयविचार इति। मध्यस्थाने देवपत्न्याविति निर्ज्ञाते तदभिधाने इति नैरुक्ताः। "पौर्णमास्यौ—इति याज्ञिकाः"। ते च ब्राह्मणमुदाहरन्ति—"या पूर्वा पौर्णमासी"—इत्येवमादि‡। कालाधिदेवते चन्द्रसहचारिण्याविति मध्यस्थाने। पौर्णमास्यमावास्ययोर्नक्षत्रेष्टकामध्यउपधानाच्चचल मतस्य दर्शनात् सर्व एवायं ज्योतिर्गणो ग्रहनक्षत्रतारकारूपो रसप्रायो मूर्त्ति मापुत्र मध्यस्थान एवेति लक्ष्यते॥

"अनुमतिः"§, "अनुमननात्"। अनुमता किलेयमृषिभिर्देवैश्च चतुर्दशके पक्षे अस्त्वियं पौर्णमासीति ॥

---

* अत्रैव च परिशिष्टे "चत्वारि वाक्"—इत्यादिखण्डस्य व्याख्यानं द्रष्टव्यम् (१३ अ० १पा० ९ख०)।

† १भा० ४८६, ४८७ पृ० ५अ० ५ख० (२०), (२१)।

‡ "तद्वाऊर्यद्दर्शपूर्णमासयोरुपवसति न ह वा अव्रतस्य देवा हविरश्नन्ति, तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति। पूर्वां पौर्णमासी मुपवसेदिति पैङ्ग्य मुत्तरा मिति कौषीतकम्। या पूर्वा पौर्णमासी सानुमति र्योत्तरा सा राका।"—इति ऐ० ब्रा० ७पं० २अ० १० ख०।

§ १भा० ४८६, ४८७ पृ० ५अ० ५ख० (२०)।

"तस्या एषा भवति"— ॥ ८ (२९) ॥

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि । क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषः ॥ अनुमन्यस्वानुमते त्वं सुखञ्च नः कुर्वन्नन्नञ्च* नोऽपत्याय धेहि प्रवर्द्धय च न आयू राका रातेर्दानकर्म्मणस्तस्या एषा भवति ॥ ९ (३०) ॥

"अन्विदनुमते"—इति† । वामदेवस्यार्षम् । देविकासु विनियोगः । हे 'अनुमते' 'त्वम्' 'अनुमन्यासै' "अनुमन्यस्व" अस्माकम् यदनुमन्तव्यं त्वया । 'शञ्च नस्कृधि' "सुखञ्च" अस्माकं "कुरु" । इयम् "अन्नञ्च" अस्माकं 'तोकाय' "अपत्याय" 'धेहि' । 'आयूंषि' च 'नः' 'प्रतारिषः' प्रतीर्णानि कुरु "प्रवर्द्धय" ।—इत्येतदाशास्महे ॥

सैव पौर्णमासी पञ्चदशके पक्षे "राका"‡—इत्युच्यते । सा पुनः कस्मात्? "रातेः दानकर्मणः" हविर्दानिनिमित्तं हि सा भवति§ ॥

"तस्या एषा भवति"— ॥ ९ (३०) ॥

राका मह सुहवां सुष्टुती हुवे शृणोतु नः सुभगा

* "कुर्वन्नाद्य" क, ख, ग ।

† य० वा० सं० ३४, ८ ।

‡ १भा० ४८२, ४८७पृ० ५अ० ५ख० (२१) ।

§ "अनुमत्यै चरुम्, यानुमतिः सा गायत्री ; राकायै चरुम्, या राका सा त्रिष्टुप्" —इति ऐ० ब्रा० ३प० ५अ० ३ख० ।

बोधतु त्मना। सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदाय मुक्थ्यम्॥ राका महं सुहवानां सुष्टुत्या। हुवे शृणोतु नः सुभगा बोधत्वात्मना सीव्यत्वपः प्रजननकर्म्म सूच्याच्छिद्यमानया सूची सीव्यतेर्ददातु वीरं शतप्रद मुक्थ्यं वक्तव्यप्रशंसं सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ता अमावास्ये इति याज्ञिका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते सिनीवाली सिन मन्नं भवति सिनाति भूतानि वालं पर्व वृणोतेस्तस्मिन्नन्नवती वालिनी वा वालेनेवास्या* मणुत्वाच्चन्द्रमाः सेवितव्यो† भवतीति वा तस्या एषा भवति॥ १० (३१)॥

राका महं सुहवाम्"—इति‡। गृत्समदस्यार्षम्। देविकासु विनियोगः। 'राकाम्' 'अहं' 'सुहवां' "स्वाह्वानां" यस्याः शोभनमाह्वानं तां ('सुष्टुती') "सुष्टुत्या" शोभनया स्तुत्या ('ह्वे') "आह्वये"। सा च पुनः 'सुभगा' सुधनाऽस्माभिराहूयमाना 'शृणोतु'। श्रुत्वा च 'बोधतु' कर्त्तव्यतया तदवगच्छतु; यदपि च न ब्रूमहे तदपि 'त्मना' "आत्मना" एव बुध्यताम्। अपि चेद सुच्यते-

* "वालेनैवास्या" च।

† "सेतव्यो" क, ख, ग।

‡ ऋ० सं० २, ३, १०, ४।

एवं 'सीव्यतु अपः' सन्तनोतु "प्रजननकर्म" अस्माकं "सूच्या-ऽच्छिद्यमानया" अविच्छिन्नेन प्रजासन्तानेन*। न च पुनः प्रजामात्र मर्थयामहे; किं तर्हि? 'ददातु' 'वीरं' पुत्रम्। किंलक्षणम्? 'शत-दायं' "बहुप्रदम्", 'उक्थ्यम्' "वक्तव्यप्रशंसम्" अपरिमाणस्तुतिम् ॥

"सिनीवाली", "कुहूः"—इति† पूर्ववदुपन्यासः‡। "अमावास्ये—इति याज्ञिकाः"। तथैव ब्राह्मण मपि चोदाहरन्ति।—तथैव पूर्वा सिनीवाली उत्तरा कुहूः§ ॥

"सिनीवाली" कस्मात्? "सिन मन्नं भवति"। तत् कस्मात्? "सिनाति" बध्नाति "भूतानि" रसादिभिः (धातुभिः||)। "वालम्" कि मुच्यते? "पर्व"। तत्कस्मात्? "वृणोतेः"; वृण्वन्ति देवास्तत्र हवींषि। "तस्मिन्" पर्वणि, असौ सिनिनी "अन्नवती" इति सिनीवाली। अथ वोत्तरपदे विकल्पः।—"वालिनी" वालैस्तद्वती, सिनिनी च सा वालिनी चेति सिनीवाली। औपमिकं वा। कथम्? इति—"वालेनेवास्या मण्डलाचन्द्रमाः" "सेवितव्यः" बोद्धव्यो "भवति"। एव मण्डरसौ चन्द्रमा भवत्यस्यां येन ज्ञायते; वालेनाप्ययं सीयेत बोध्येतेति ॥

---

* "प्रजा वै सन्तः प्रजा मेवास्मा एतत् सन्तनोति"—इति, "तद्यथा सूच्या वासः"—इति च ऐ० ब्रा० ३प० १ख० ११ख०, १ख० ७ख०।

† १भा० ४८३, ४८७ पृ० ५अ० ५ख० (२१), (२२)।

‡ "अनुमती राकेति देवपत्न्यौ"—इत्यादिवदिति भावः। (पृ०२१२५०११प०)।

§ ऐ० ब्रा० ७प० २ख० १०ख० द्र०। "सिनीवाल्यै चरुं या सिनीवाली सा जगती, कुह्वै चरुं या कुहूः सानुष्टुप्"—इति च ऐ० ब्रा० ३प० ५ख० ३ख०।

|| नास्त्येतत्पदं क-पुस्तके।

"तस्या एषा भवति"—॥१० (३१)॥

सिनीवालि पृथुष्टुके या देवाना मसि स्वसा। जुषस्व हव्य माहुतं प्रजां देवि दिदिड्ढि नः॥ सिनीवालि पृथुजघने स्तुक स्त्यायतेः सङ्घातः पृथुकेशस्तुके पृथुष्टुते वा* या (त्वं†) देवाना मसि स्वसा। स्वसा सु असा स्वेषु सीदतीति वा जुषस्व हव्य मदनं‡ प्रजाञ्च देवि दिश नः कुहूर्गूहतेः क्वाभूदिति वा क्व सती हूयत इति वा क्वाहुतं हविर्जुहोतीति वा तस्या एषा भवति॥ ११ (३२)॥

"सिनीवालि पृथुष्टुके"—इति§। गृत्समदस्यार्षम्। देविकासु विनियोगः। हे 'सिनीवालि' 'पृथुष्टुके' विस्तीर्णजघने; अथ वा 'पृथुष्टुके' "पृथुकेशस्तुके" पृथुकेशकलापे; अथवा "पृथुष्टुते"। 'या' "त्वं" 'देवानां' 'स्वसा' भगिनी माध्यमकानाम्। सा त्वम् आसेवस्व एतत् 'हव्यम्' 'आहुतम्' मर्यादया विधानतो हुत मस्माभिः। आसेव्य च "प्रजां देवि दिदिड्ढि नः" प्रजा मस्माकं "दिश" अतिसृज, देहि।—इत्याशास्महे‖॥

---

* "पृथुकेशस्तुका पृथुष्टुतिर्वा" क, ख, ग। "पृथुकेशस्तुके पृथुस्तुके वा" च-प्रभृतिषु।

† नास्त्येतत् पदं क-ख-ग-पुस्तकेषु।

‡ "हव्य माहुतं" क, ख, ग।

§ ऋ० सं० २, ७, १५, ६; य० वा० सं० ३४, १०; अथ० सं० ७, १०, २।

‖ १भा० ४८३, ४८८ पृ० ५ख० ५ख० (२१) द्र०।

"कुहूः"*, "गूहतेः"; निगूहत्यसौ चन्द्रमसम्†। "काभूत्? इति वा" तस्या मप्रत्यक्षत्वात् वितर्कश्चन्द्रमा भवति कासावभूद-स्येति। "क्व सती हूयते?—इति वा" सैवात्मना देवताभावाद-प्रत्यक्षान् ज्ञायते; क्वापि सत्याहूयते इति अतो वितर्क्या भवति॥

"तस्या एषा भवति"—॥ ११ (३२)॥

कुहू मुहं सुवृतं विद्मनापस मस्मिन्यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम॥ कुहू महं सुकृतं‡ विदितकर्माण मस्मिन् यज्ञे सुह्वाना माह्वये सा नो ददातु श्रवणं पितॄणां पित्र्यं धन मिति वा पित्र्यं यश इति वा तस्यै ते देवि हविषा विधेमेति व्याख्यातं यमी व्याख्याता तस्या एषा भवति॥ १२ (३३)॥

"कुहू मुहं सुवृतम्"—इति§। देविकासु विनियोगः। 'कुहूम्' 'अहं' ('सुवृतं') "सुकृतं" शोभनानां कर्मणां कर्त्रीं, 'विद्मनापसं' सर्वप्रत्यक्षकर्माणम्, 'अस्मिन् यज्ञे' 'सुहवां' "स्वाह्वानां" शोभन माह्वानं यस्याः तां 'जोहविमि' ("आह्वये") आह्वयामि। 'सा'

* १भा॰ ४८३, ४८७पृ॰ ५अ॰ ५ख॰ (२३)।

† ऋ॰ वा॰ सं॰ ११अ॰ ५५, ५६ख॰; वृ॰ आ॰ ६, ४, २१ इ॰।

‡ "सुवृतं" च-प्रभृतिषु, ख-पुस्तके च।

§ तै॰ ब्रा॰ ३अष्ट॰ ३प्र॰ ११अनु॰; अथ॰ सं॰ ७, १०, ५; आ॰ श्रौ॰ ६, १०।

अस्माभिराहूतास्मिन्यज्ञे एत्य हविर्भुक्त्वा ('नः') अस्माकं 'ददातु' 'श्रवणं' 'पितॄणाम्'; "पित्र्यन्न मिति वा", "पित्र्यं वा यशः" कुलोचित मित्यर्थः। प्रत्यक्षीकृत्योत्तरेण पादेनास्तौत्।—या त्व मस्माक मेतत् करोषि, 'तस्यै' ('ते') तुभ्यं हे 'देवि!' कुहु! 'हविषा विधेम' हविर्दद्म इत्यर्थः; अथ वा तान्त्वां हविषा परिचरेम इति* ॥

"यमी"† "व्याख्याता" यमेन‡; लिङ्गमात्रविशेषः ॥

"तस्या एषा भवति"— ॥१२ (३३) ॥

अन्य मू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम्। तस्य वा त्वं मन इच्छा§ स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥ अन्य मेव हि त्वं यम्यन्यस्त्वां परिष्वङ्क्ष्यते लिबुजेव वृक्षं तस्य वा त्वं मन इच्छ ॥ स वा तवाधानेन कुरुष्व संविदं सुभद्रां (कल्याणभद्रां ¶) यमी यमं चकमे तां प्रत्याचचक्षेत्याख्यानम् ** ॥१३ (३४) ॥

॥ इत्येकादशे तृतीयः पादः ॥ ११ । ३ ॥

---

* पु० १०अ० २पा० १०ख० (११५, ११६पृ०); १भा० ३११पृ० ५ख० ।

† १भा० ४८३, ४८८ पृ० ५अ० ५ख० (२४)।

‡ पु० १०अ० २पा० ६ख० १०४पृ० द्र० । १भा० ४७८पृ० (१२) ।‡

§, ‖ "-इच्छा", "इह" च ।

¶ नास्त्येतत् पदम् ख-पुस्तके ।

** "प्रत्याचख्य इत्याख्यानम्" क; "प्रत्याचचक्ष इत्याख्यानम" च ।

"अन्य मू षु त्वं यम्यन्यः"—इति* । यमी किल यमस्वकमे भ्रातरम्, तां किल यमोऽनयर्चा प्रत्याचष्टे । कथम् ? हे 'यमि !' 'अन्यम् ऊ षु' 'त्वं' "अन्य मेव हि त्वम्" परिष्वजस्व मैथुनाभिप्रायेण । 'लिबुजेव वृक्षम्'† वल्लीव कांचिद्गाढं समीपजं वृक्षम्; अन्य एव त्वां परिष्वजताम्; यस्य योग्या त्व मनेनाभिप्रायेण परिष्वक्तुम् । "तस्य वा त्वं मन इच्छा" तस्य च त्वं मनः प्रवेष्टु मिच्छ; 'स वा तव' । ('अधा') अथैव मेकचित्त्य मुपगम्यमानेन (समानेन‡) सह 'कृणुष्व' 'संविदम्' सञ्ज्ञत्यादि मैथुनकार्यम् । 'सुभद्रां' "कल्याणभद्राम्" । संविद मुभयलोकविरोधिनी मित्यभिप्रायः ॥

त्रिलपक्षे तु माध्यमिको यमो माध्यमिकां वाच मुपस मात्मनः प्रविभक्ता मिव कृत्वोभयस्थानां तां ब्रवीति ।— हे यमि! अतीतस्तेऽस्मत्परिष्वङ्गसमयः; प्रभात मिदानीम् । लिबुजेव वृक्षं द्युस्थानं परिष्वक्तु मिच्छ । तस्य च त्वं मनः प्रकाश मनुप्रवेष्टु मिच्छ; स च तव प्रकाश मनु प्रविशतु । अथैव मितरेतरसम्पर्कात् तेन सहैकीभूता लोकोपकाराय कुरुष्व परस्परं संविदं संविज्ञाधर्मं प्रकाश मिति ॥ १३ (३४) ॥

॥ इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य तृतीयः पादः ॥ ११ । ३ ॥

---

* ऋ॰ सं॰ ७, ६, ७८, ४ ।

† ऋभा॰ ९अ॰ ५पा॰ ५ख॰ २५५, २५६पृ॰ ।

‡ नास्त्येतत्पदं क-पुस्तके ।

॥ चतुर्थः पादः ॥

उर्वशी व्याख्याता तस्या एषा भवति ॥ १ (३५) ॥

"उर्वशी"* वक्तव्या ; सा पुनः "व्याख्याता", तदिहापि देवतायां योज्यम् ;—"उर्वभ्यश्नुते" बहूदकं व्याप्नोति ; "उरुर्वा वशोऽस्याः" महानस्याः काम उदके† ॥

"तस्या एषा भवति"—॥ १ (३५) ॥

विद्युन्न या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि । जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः ॥ विद्युदिव या पतन्त्यद्योतत हरन्ती मे अप्या काम्यान्युदकान्यन्तरिक्षलोकस्य यदा नूनमयं जायेताद्भ्योऽध्यप इति नर्यो मनुष्यो नृभ्यो हितो नरापत्यमिति वा सुजातः सुजाततरोऽथोर्वशी प्रवर्द्धयते दीर्घमायुः पृथिवी व्याख्याता तस्या एषा भवति ॥ २ (३६) ॥

"विद्युन्न या पतन्ती"—इति‡ । मध्यमः पुरूरवाः स्वपक्षे ब्रवीति ।—आत्मनो ज्योतिषः शब्दस्य च विभागमिव कृत्वा

---

* १भा० ४८३, ४८८पृ० ५अ० ५ख० (२५) ।

† २भा० ५अ० ३पा० १, २ख० ७३—७९पृ० ।

‡ ऋ० सं० ८, ५, १, ५ । "अनयोर्वशीं स्तौति (पुरूरवाः)"—इति सा० भा० ।

"विद्युन्न" "विद्युदिव"। सम्प्रत्यर्थे वा नकारः। किम्? इति—'या' 'पतन्ती' गच्छन्त्यन्तरिक्षे मेघोदरेषु 'दविद्योत्' पुनःपुनर्द्योतिते पुनःपुनरात्मानं प्रति लभते। कथम्? 'भरन्ती' "हरन्ती" 'मे' मम स्वभूतानि ('अप्या') आप्यानि, 'काम्यानि' "उदकानि" अक्षरमाणानि "अन्तरिक्षलोकस्य" अधिपत्नी या उर्वशी, सा यदैव मुदकानि हरन्ती मेघेभ्यः पतन्ती भृशं स्वयं विद्योतते, "नूनं" निश्चयेन तदा "जनिष्ठः" 'अपः' "अध्यपः" अधिक उदकोर्मि-र्जायते, यः सर्व मिद माच्छादयति। 'नर्यः' "नृभ्यो हितः" सस्यसम्पत्करः; "नरापत्य मिति वा" इत्यैतिहासिकपक्षं द्योतयति*। 'सुजातः' "सुजाततरः" शोभनादपि शोभनतरः उदकोर्मिः। अथ तेन महतोदकोर्मिणा सस्य मभिनिष्पाद्य लोकस्यान्नसम्प्रदान-द्वारेण 'प्रोर्वशी तिरते' प्रतिरते "प्रवर्द्धयते" 'दीर्घ मायुः'.॥

---

* "ऐलोर्वशीतिहासोऽत्र वैशद्याय प्रवर्ण्यते। मित्रश्च वरुणश्चोभौ दीक्षितौ प्रेक्ष्य चोर्वशीम्। १। रेतः सिषिचतुः सद्यस्तत् कुम्भे न्यदधुस्तदा। तां शप्तवन्तौ मनुज-भोग्या भूम्यां भवेति तौ। २। अथान्तर इलो राजा मनोः पुत्रैश्च संयुतः। मृगयां मच्चरन साम्बो देवो क्रीड़ा विवेश ह। ३। यत्र देवं गिरिसुता सर्वैर्भावैरतोषयत्। अत्राविशन् पुमान् स्त्री स्यादित्युक्ता तत्र प्राविशत्। ४। स्त्री भूत्वा व्रीडितः सोऽगा-च्छरणं शिव मञ्जसा : इयं प्रसाद्यतां राजन्नित्युक्तः शम्भुना नृपः। ५। जगाम शरणं देवी मात्मनः पुंस्त्वसिद्धये। अकरोत् सा नृपं देवी षण्मासात् प्राप्तपुंस्त्वकम्। ६। ततः कदाचित् स्त्रीकाले बुधः सौन्दर्यमोहितः। अप्सरोभ्यो विशिष्टां ता मिलां सङ्गतवान् मुदा। ७। तदिलायां सोमसुताज्जातो राजा पुरूरवाः। त मुर्वशी तु चकमे प्रति-ष्ठानपुरे स्थितम्। ८। तल्पादन्यत्र नग्नं त्वां दृष्ट्वा यामि यथागतम्। सुतावुरणकौ त्वत्र समीपं कुरु मे द्रुतम्। ९। इति सा समयं कृत्वा रमयामास तं नृपम्। चतुरब्दे

ऐतिहासिकपक्षे त्वैलः पुरूरवाः उर्वश्या अप्सरसा वायुक्तो ब्रवीति ।—विद्युदिव या पतन्ती अद्योतत भृशं वपुस्तया भरन्ती धारयन्ती अनेकानि स्वर्गतानि* हावभावादीनि काम्यानि वस्तूनि मे मम अप्या नित्य माप्तव्या प्रिया । सा च पुनराहितगर्भा यतः, अतो ब्रवीमि ।—जनिष्ठो अपः निश्चयेन जनिष्यते । अप्यपः अधिककर्मा । नर्यः नृभ्यो हितः सम्यक् परिपालयिता नराणाम् । अथवा मम नरस्यापत्य मायुर्नाम राजायं पुराणविदः कथयन्ति† । सुजातो मच्छुक्रात् वीर्यवतो जातः, विशेषत उर्वश्याः क्षेत्रगुणात् सुजाततरः । तस्य चावश्य मुर्वशी अस्मदसान्निध्येऽपि प्रवर्द्धयते तद्योग्यैः कर्मभिर्दीर्घमायुरिति ॥

"पृथिवी"‡, "व्याख्याता"; "अथ वै दर्शनेन पृथुः"—इत्यत्र§; इह तु माध्यमिका ॥

"तस्या एषा भवति"— ॥ २ (२६) ॥

गते रात्रौ देवैर्हरणकद्वयम् । १० । हृतं तस्य ध्वनिं श्रुत्वा नग्न एव स भूपतिः । उत्थाय जित्वा तौ मामच्छेत्येवं जल्पकोऽन्यतः । ११ । विद्युता दर्शितोऽस्थ्यै स नग्न एव पुरूरवाः । अथ सा नष्टसमया त्वुर्वशी तु दिवं ययौ । १२ । तत उन्मत्तवद्राजा दिद्दृक्षुस्ता मितस्ततः । कुर्वन्नन्वेषणं तीरे सरसी मानसस्य ताम् । १३ । विहरन्ती मप्सरोभिः सहापश्यत् पुरूरवाः । पुनः स चकमे भोक्तु मुर्वशीं च पुरूरवाः । १४ । सायं सापश्यदुक्त्वा च प्रत्याचष्टे व्रजेति तम् । इत्युर्वश्यैलसंवाद मिम मेषोऽप्यसूचयत् । १५ ।"—इति बृ० दे० ।

* "स्त्रीगतानि" क ।

† मत्स्य-वायुहड़ाद्यस्तस्यैव राज्ञः पुत्रा इति भागवतम् ।

‡ १भा० ४८३, ४८८पृ० ५ख० ५सू० (२६) ।

§ २भा० १ख० ४पा० २ख० ९४पृ० १८पं० द्र० ।

बळित्था* पर्वतानां खिद्रम्बिभर्षि पृथिवि। प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि॥ सत्यं त्वं पर्वतानां मेघानां खेदनञ्छेदनं (भेदनं †) बल ममुच धारयसि पृथिवि प्रजिन्वसि या भूमिं प्रवणवति महत्त्वेन महतीत्युदकवतीति वेन्द्राणीन्द्रस्य पत्नी तस्या एषा भवति॥३(३७)॥

"बळित्था पर्वतानाम्"—इति‡। अत्रेरार्षम्। 'बट्'—इति सत्यनाम। 'इत्था'—इति अमुत्रेत्यर्थः। हे 'पृथिवि' माध्यमिके! "सत्यं" यथाभूतम्, "अमुच" अमुष्मिन्नन्तरिक्षलोके वर्त्तमाना, 'खिद्रं' "खेदनं" "छेदनम्"; येन पर्वताः मेघांश्छेत्तुं शक्यन्ते, तद् "बलं" 'बिभर्षि' "धारयसि"। हे 'प्रवत्वति' "प्रवणवति" गमनवति! 'या' त्वं 'भूमिं' ('प्रजिनोषि') "प्रजिन्वसि" वर्ष मुत्सृजन्ती, 'मह्ना' "महत्त्वेन" हे 'महिनि' "महति!" अथ वा "उदकवति!"। या त्व मेवं भूमिं प्रजिन्वसि, सा कथं न "मेघानां" पर्वतानां, छेदनसमर्थम्बलं धारयिष्यसि? अवश्यं धारयसीत्यभिप्रायः॥

पृथिवि! त्वं भूमिं प्रजिन्वसीति व्यपदेशान्मध्यस्थाना। हिरण्य-

---

* "बळित्था" क, ख, ग।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

‡ ऋ० सं० ४, ४ २६, १। "द्विरूपा पृथिवी चैषा प्रत्यक्षदेवतापि च। मध्यस्थाना देवतोक्ता साच सम्बोध्य वर्ण्यते।"—इति सा० भा०।

नाशेष्वां भौमस्यैककपालस्येयं याज्या। तत्र विज्ञायते—"अथ यद्भौमोऽस्यां हि स तदविन्दत्"—इति*। तेन तत्रेयं भूमिरिज्यते; न च भूमिरस्या ऋचि प्रधानत्वेन वर्त्तते; यथा चाय माचार्यो निराह। तदत्र मन्त्रोदाहरणाभिप्रायः, स च विनियोगः,—इत्यविरोधोऽनयोर्मेधाविना समनुगन्तव्यते ॥

"इन्द्राणी" †, "इन्द्रस्य पत्नी" ‡ इन्द्रस्य विभूतिः। पृथक्त्वेन निर्ज्ञाता पौराणिकैः§ ॥

"तस्याः एषा भवति"—॥३(२७)॥

इन्द्राणी मासु नारिषु सुभगा मह मश्रवम्। न ह्यस्या अपरञ्चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः॥ इन्द्राणी मासु नारिषु † सुभगा मह मश्रृणवं न ह्यस्या अपरा मपि समां जरया म्रियते पतिः सर्वस्माद्य इन्द्र उत्तरस्त मेतद् ब्रूमस्तस्या एषापरा भवति ॥ ४ (३८) ॥

* "यदि हिरण्यं नश्येत् का तत्र प्रायश्चित्तिः"—इत्यादि ऐ० ब्रा० ७, १, ८।

† १भा० ४८३, ४८८ पृ० ५ख० ५ख० (२७)।

‡ शची इति तस्या एव नामान्तरम्। "प्रासहा"—इति च नामैतस्या दृश्यते ऐतरेयके। तथाहि—"सेना वा इन्द्रस्य प्रिया जाया वा वाता प्रासहा नाम"—इति ऐ० ब्रा० ३प० २ख० १ख० ११ख०।

§ "ऐश्वर्यं परमं यस्या वशे चैव सुरासुराः। इदि परमैश्वर्ये च इन्द्राणी तेन सा शिवा॥"—इति देवीपुराणे ४५ख०।

† "नारीषु" क, ग।

"इन्द्राणी मासु नारिषु"—इति* । वृषाकपेरार्षम् । पङ्क्तिः । पृष्ठ्यस्य षष्ठेऽहनि ब्राह्मणाच्छंसिनः शस्त्रे विनियोगो निर्धार्य ब्रवीति ।— सर्वास्वेव 'आसु नारिषु' 'इन्द्राणीम्' एव 'अहं' 'सुभगां' सौभाग्ययुक्तां लक्षणवतीम् 'अश्रवम्' "अशृणवम्" । केन हेतुना? यत आह— "न ह्यस्या अपरञ्चन" हि-शब्दो हेत्वर्थः, चनेत्यप्यर्थे । यस्मादस्याः अपरा मपि "समां" सम्वत्सरं प्रति न कदाचिदपि 'पतिः' "म्रियते"; नापि जीर्यते यथाऽन्यासां प्राकृतानां नारीणाम् । कतमः पतिः? 'विश्वस्मात्' "सर्वस्मात्" जगतो यः 'इन्द्रः' 'उत्तरः' योऽय मिन्द्र उद्गततरः, "त मेतम्" इन्द्र मधिकृत्य "ब्रूमः"—इत्याचार्यो ब्रवीति ॥

"तस्याः एषा अपरा भवति"—। सा पुनः किमर्थम्? ऋषिः एव वृषाकपिः† प्रसिद्धः‡; स पुनरादित्योऽभिप्रेतो नैरुक्तानाम्§; तदुपप्रदर्शनायापरा माह ॥ ४ (३८) ॥

नाह मिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते। यस्येद मप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥

---

* ऋ० सं० ८, ४, २, १ । इन्द्रसंवादसूक्तस्यैषैकादशी ।

† "वृषाकपिः नाम इन्द्रस्य पुत्रः"—इति सा० भा० १०, ७, १ सू० ।

‡ "ऋषिः स एव"— इत्येव च ।

§ वक्ष्यत्युपरिष्टात्—"अथ यद्रश्मिभिरभिप्रकम्पयन्नेति तद् वृषाकपिर्भवति, वृषाकम्पनः" इति १२, ३, ८ । पुरस्ताच्च निघण्टुव्याख्यायां द्रष्टव्यम् ४९९पृ० ।

नाह मिन्द्राणि रमे सख्युर्वृषाकपेर्ऋते यस्येद मप्यं हविरप्सु शृत* मद्भिः संस्कृत मिति वा प्रियं देवेषु निगच्छति सर्वस्माद्य इन्द्र उत्तरस्त मेतद् ब्रूमो गौरी रोचतेर्ज्वलतिकर्मणोऽय मपीतरो गौरो वर्ण एतस्मादेव प्रशस्यो भवति तस्या एषा भवति ॥ ५ (३९) ॥

"नाह मिन्द्राणि"—इति†। समानो विनियोगः पूर्वया; आर्षञ्च। इन्द्रो ब्रवीति।—विभक्ता मिवेन्द्राणी मात्मनः कृत्वाह। "नाह मिन्द्राणि! रारण" "न रमे" अहं "सख्युर्वृषाकपेर्ऋते" य एष मम सखा वृषाकपिः, तस्मादृते। किं योऽय मृषिर्मनुष्येषु प्रसिद्धः? नेत्युच्यते—"यस्येद मप्यं हविः"। "अप्सु शृतम्" चरुपुरोडाशादि वा "अद्भिः संस्कृत मिति वा"। सोऽस्य मे प्रिय इष्टः सर्वेष्वपि 'देवेषु' निर्द्धार्योच्यते। यस्य विशेषतो 'गच्छति'। 'विश्वस्मात्' "सर्वस्मात्" अपि जगतो योऽहम् 'इन्द्रः' 'उत्तरः' उद्गततरः, सोऽप्यह मेवं ब्रवीमीति‡॥

"गौरी"§, "रोचतेः" ज्वलत्यर्थस्य। माध्यमिका वाक्; सा पुनः दीप्तिमती। "अय मपीतरः" यो "गौरो वर्णः" सोऽपि "एत-

---

* "श्रित" क, ग।

† ऋ० सं० ८, ४, ६, २। तस्यैव इन्द्रसंवादसूक्तस्य द्वादश्येषा।

‡ "वृषाकपिर्नामेन्द्रस्य पुत्रः, स चेन्द्राणीन्द्रश्चैते त्रयः संहिताः संविवादं कृतवन्तः"—इत्यादि चास्य सूक्तस्यारम्भे एवाह सायणः (ऋ० सं० १०, ७, २)।

§ १भा० ४८१, ४८८पृ० ५ख० ५खं० (१८)।

स्मादेव" रोचते: ; स हि दीप्तिरूपत्वात् कृष्णादीनपेक्ष्य "प्रशस्यो भवति"* ॥

"तस्याः एषा भवति"—॥ ५ (३९) ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्॥ गौरीर्निर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन † द्विपदी मध्यमेन ‡ चादित्येन च चतुष्पदी दिग्भिरष्टापदी दिग्भिश्चावान्तरदिग्भिश्च नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च सहस्राक्षरा बहूदका परमे व्यवने तस्या एषापरा भवति॥ ६ (४०)॥

"गौरीर्मिमाय"—इति§। अस्यवामीये दीर्घतमस आर्षम्। 'गौरी' सर्व मिदं निर्मिमीते। कथम्? 'सलिलानि तक्षती' "कुर्वती"; उदकपूर्वकत्वात् सर्वनिर्माणस्य। कथ मुदकानि कुर्वती? 'एकपदी' 'बभूवुषी' एकपदी भवती, "मध्यमेन" सहैकत्व मापन्ना ;—'द्विपदी' "मध्यमेन चादित्येन च";—'चतुष्पदी' "दिग्भिः" अनपेक्ष्येन्द्रादित्यौ ;—'अष्टापदी' "दिग्भिश्चावान्तरदिग्भिश्च" ;—'नवपदी'

---

* "सोमो गौरी अधि श्रितः" (ऋ० सं० ९, ७, २८, २)—इत्यादि द्रष्टव्यम्।

†, ‡ "मध्येन" क, ग।

§ ऋ० सं० २, ३, २२, १; अथ० सं० ९, १९, २१।

"दिग्भिश्चावान्तरदिग्भिश्च" सह आदित्येन च"। 'सहस्राक्षरा' "बहूदका"। 'परमे' ("व्योमन्") "व्यवने" विभक्तानां भूतानां यत्परम मवन मेकम्, सर्वभावाना मविभक्त एक आत्मा, यस्तदात्मनैव भूतानां सलिलनिर्माणद्वारेण सर्व मिदं निर्मिमीते* ॥

"तस्याः एषा अपरा भवति"—। सा पुनः किमर्थम्? इति—गौरीति गुणाभिधान मप्रसिद्धाभिधेयं छन्दसि देवतायाम्, यतः परया समर्थयति ॥ ६ (४०)॥

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः। ततः क्षरत्यक्षरं तद्विश्व मुप जीवति ॥ तस्याः समुद्रा अधिविक्षरन्ति वर्षन्ति मेघास्तेन जीवन्ति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षर मुदकं तत्सर्वाणि भूतान्युपजीवन्ति गौर्व्याख्याता तस्या एषा भवति ॥ ७ (४१) ॥

---

* "केचिदेव माहुः।—'गौरीः' गरणशीला, शब्दब्रह्मात्मिका वाक्। 'मिमाय' मिमति। प्रतिष्ठार्थे धातुः, प्रतिष्ठितानि घटादिद्रव्याणि 'तक्षती' तद्वाचकत्वेन निष्पादयन्ती। 'एकपदी' अव्याहतत्वेनैकप्रतिष्ठानैकरूपा वात्मना। 'द्विपदी' सुप्तिङ्भेदेन पादद्वयवती। 'चतुष्पदी' नामाख्यातोपसर्गनिपातभेदेन। 'अष्टापदी' आमन्त्रितसहिताष्टभेदेनाष्टपदी। 'नवपदी बभूवुषी' साव्ययैरुक्तैरष्टभिर्नवपदी॥ अथवा सनाभिकेषूरःकण्ठादिषु नवसु पदेषु भवन्ती पश्चाद् बहुविधाभिव्यक्ति मुपेयुषी। 'परमे व्योमन्' उत्कृष्टे हृदयाकाशे, मूलाधारे। 'सहस्राक्षरा' अनेकाकारेण व्याप्ता, अनकध्वनिप्रकारा भवतीत्यर्थः॥"—इति चाहाच सायणः।

"तस्याः समुद्रा अधि वि क्षरन्ति"—इति*। अलिङ्गो मन्त्र इति चेत्? तस्या इत्येतदेव लिङ्ग मन्वादिश्यते सम्बन्धादृचोः, तस्मान्नालिङ्गः†। 'तस्याः' गौर्याः 'अधि' सकाशात् 'समुद्राः' मेघाः 'अधि विक्षरन्ति' "वर्षन्ति"। 'तेन' उदकेन 'जीवन्ति' 'प्रदिशस्तस्याः' दिक्प्रतिदिङ्निवासीनि "भूतानि" तेन जीवन्ति। 'ततः क्षरत्यक्षरम्' पुनःपुनः प्रतिसंवत्सरम्; तत एव क्षरत्युदकं मेघद्वारेण। 'तत्' 'विश्वं' भूतजातं 'उप जीवति'॥

एवं सैव सर्वोदकेशाना गौरीत्यभिप्रायः॥

"उदकम्", "अक्षरम्"—इत्युच्यते। तत्कस्मात्? तद्धि सर्व मिद मभिव्यञ्जयत् "क्षरति"। सर्व मिदं सचराचरं सञ्चरति‡॥

"गौः"§, "व्याख्याता"‖।

"तस्याः एषा भवति"—॥ ७ (४१)॥

गौरमीमेदनु वत्सं मिषन्तं मूर्धानं¶ हिङ्ङकृणोन्मातु-

---

* ऋ० सं० १, ३, २१, २।

† अत्र देवतापदश्रुत्यभावादयं मन्त्रोऽलिङ्ग इति पूर्वपक्षः; "तस्याः"—इति श्रुतेः पूर्वोक्तगौरीरेवात्र स्तूयते इति समाधानम्।

‡ निघण्टावुदकनामसु "अक्षरम्"—इति दृश्यते १, १२, (३२)। १भा० ६६पृ०।

§ १भा० ४८३, ४८८पृ० ५अ० ५ख० (२९)।

‖ "गौरिति पृथिव्या नामधेयम्"—इत्यादिना। पु० २अ० २पा० १ख० (१भा० १७५पृ०)। निघ० १, १; ४; ५; ११; ३, १६; ४, १; ५, ५। अत्र च परस्तात् १, ५; १४; ४, २४; ६, २; उपरिष्टाच्च ११, ७. द्र०।

¶ "मूर्धानम्" च।

वा उ । सृक्वाणं घर्म मभि वावशाना मिमाति मायुं पयते पयोभिः ॥ गौरन्वमीमेद्वत्सं निमिषन्त मनिमिषन्त मादित्य मिति वा मूर्द्धान* मस्याभिहिङ्ङ्करो-न्मननाय सृक्वाणं सरणं घर्मं हरण मभिवावशाना मिमाति मायुं प्रप्यायते पयोभिर्मायु मिवादित्य मिति वा वागेषा माध्यमिका† घर्मधुगिति याज्ञिका धेनुर्द्ध-यतेर्वा धिनोतेर्वा तस्या एषा भवति ॥ ८ (४२) ॥

"गौरमीमेत्"—इति‡ । दीर्घतमस आर्षम् । महाव्रते विनियोगः ।'गौः' "माध्यमिका वाक्", ('वत्सम्') पुत्रम् 'अन्वमीमेत्' अनुशब्दयति ; महद्भिः स्तनयित्नुशब्दैः "आदित्यम् ;" स हि तस्या रसहरणाद् वत्सः । 'मिषन्तम्' "अनिमिषन्तम्" अव्यवहितदर्शनं सर्वदा । अपि च 'मूर्द्धानम्' शिरो रश्मीन् "अस्य" मध्यस्थान-प्राप्तं प्राप्य । 'हिङ्ङकृणोत्' हिङ्कारेणोपशब्दयति । 'मातवै' सर्वलोकज्ञानाय । उदकानां 'सृक्वाणं' "सरणम्" अनवस्थायिन§ मादित्यम् । 'घर्मं' "हरणं" रसानाम् । 'अभिवावशाना' पुनःपुनः वाश्यमाना, वाशन्ती प्रतिसंवत्सर मेव 'मिमाति मायुं' शब्दं करोति । ('पयते') "प्रप्यायते" च प्रकर्षेण वर्द्धते "पयोभिः" उदकैः ॥

---

* "मूर्धान" च ।

† "माध्यमका" च-प्रभृतिषु ।

‡ ऋ० सं० १, २, १९, २ ; अथ० सं० ९, १०, ६ ।

§ "अनुस्थायिन"—इति क ।

घर्मधुक्पक्षे— गौरेव 'गौः' 'अन्वमीमेत्' अनुशब्दयति, वत्स मेव 'वत्सं' 'मिषन्तम्' त मेवोन्मुखं पश्यन्तम् । अपि च प्राप्य 'मूर्द्धानम्' अस्य उपघ्राय हिङ्कित्येवं शब्दं करोति । स हि गोः स्वभावः । 'मातवै' कथं नामायं मां जानीयात् माता ममेय मिति* । 'सृक्काणम्' ता मेव प्रत्यभिमुखं "सरणं"†, 'घर्मं' "हरणं" पयसाम्‡ । 'अभिवावशाना' पुनःपुनर्वाश्यमाना, प्रत्यङ्ग मेव शब्दं करोति, 'प्याययते' च 'पयोभिः' वत्स मस्मांश्च या वर्द्धयति, सा नित्य मेव मखिति ॥

"धेनुः"§, "धयतेः वा" । धयतेऽसौ वत्सेनेति ‖; "धिनोतेः वा" तर्पयत्यसौ उदकेन पयसा वा¶ ॥

"तस्याः एषा भवति"— ॥ ८ (४२) ॥

उप ह्वये सुदुघां धेनु मेतां सुहस्तो गोधुगुत दोह- देनाम् । श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचम् ॥ उपह्वये सुदोहनां धेनु मेतां कल्याणहस्तो**

* "मातवै मातुं निर्मातुं शब्देन शोषयितुम्"—इति सा० भा० ।

† "सृक्काणं वत्सस्य शब्दवदनप्रान्तं फेनस्य वहारम्"—इति सा० भा० ।

‡ "घर्मं क्षीरस्य क्षरणशीलम्"—इति सा० भा० । "घृ क्षरणे" भ्वा० प० ९१८ ।

§ १भा० ४८६, ६८८ पृ० ५ख० ५ख० (२०) ।

‖ "धेट् पाने" भ्वा० प० ९०२ । १भा० ९४ पृ० २पं० द्र० ।

¶ "धिवि, हिवि, धिवि, जिवि प्रीणनार्थाः" भ्वा० प० ५९१—५९४ ।

** "सुदुघां" क, ख, म ।

गोधुगपि च दोग्ध्येनां श्रेष्ठं सवं सविता सुनोतु न इत्येष हि श्रेष्ठः सर्वेषां सवानां यदुदकं यद्वा पयो यजुष्मदभीद्धो घर्मस्तं सु प्रब्रवीमि वागेषा माध्यमिका घर्मधुगिति याज्ञिका अघ्न्याहन्तव्या भवत्यघघ्नीति वा तस्या एषा भवति ॥ ९ (४३) ॥

"उप ह्वये सुदुघाम्"—इति*। पूर्वयेव समानार्थं विनियोगस्य। 'उप'गम्य मनसा ('ह्वये') आह्वयेऽहं स्तुतिभिः। 'सुदुघां' कल्याण मुदकं या दुग्धे, ताम्, 'धेनुं' तर्पयित्रीं सर्वलोकस्य, 'एताम्' माध्यमिकां वाचम्। ('उत') "अपि च" मयैता मुपहूतां 'सुहस्तः' "कल्याणहस्तः" 'गोधुक्' इन्द्रः दोग्धुं प्रचारयतूदकानि। अमुना प्रकारेण 'श्रेष्ठम्' अतिशयेन प्रशस्य मेतम्, 'सवम्' उदकं 'सविता' योऽयम् 'अभीद्धः' 'घर्मः' मध्यस्थानः विद्युदाख्यः†, सः 'साविषत्' स "सनोतु" नित्यं ददात्विति तं सुष्ठु प्रब्रूमः॥

घर्मधुक्पक्षे—धेनुरेव धेनुः, ता मुपह्वये। 'सुदुघां' सुदोहां 'धेनु मेताम्' अस्मिन् कर्मणि अङ्गभाव मुपगताम्। होता ब्रवीति।—मया चैव मुपहूतां 'सुहस्तः' 'गोधुक्' अध्वर्युः अपि च दोग्ध्वेनां 'श्रेष्ठम्' अतिशयेन प्रशस्यम्, एतं 'सवम्' एतत् "यजुष्मत्पयः"‡

---

* ऋ० सं० २, ३, १९, १। प्रवर्ग्ये घर्मधुगाह्वानकाले ह्येषा प्रयुज्यते।

† "घर्मः=ग्रीष्मः, ग्रवर्षणजनितः सन्तापः"—इति सा० भा०।

‡ "एतद्यजुष्मत्सरः" इति क।

'साविषत्' "सुनोतु" अभ्यनुजानातु 'सविता'। यद्धि सविता प्रसूतं क्रियते, तदेव साधु भवति। 'अभीद्धः' एष "घर्मः" सूचितो महावीरः*। त मधिकृत्य प्रश्नमः—"आदरैतस्मिन् पय आसेचनाय" इति[†] ॥

"अघ्न्या"[‡] कस्मात्? सा हि सर्वस्यैव "अहन्तव्या भवति"; "अघघ्नीति वा" सा हि पापं हन्ति ॥

यदि वाग् यदि गौः, "तस्याः एषा भवति"—॥ ९(४३)॥

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम। अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्ध मुदक माचरन्ती॥ सुयवसादिनी भगवती हि भवायेदानीं वयं भगवन्तः स्यामाद्धि तृण मघ्न्ये सर्वदा पिब च शुद्ध मुदक माचरन्ती तस्या एषापरा भवति॥ १०(४४)॥

"सूयवसात्"—इति§। पूर्ववदार्षम्। माध्यमिका वागुच्यते।

---

* "घर्मः=प्रवर्ग्यः, 'यद् घर्मं इत्यतपत् तद् घर्मस्य घर्मत्वम्'—इति तैत्तिरीयकम्"—इति च सा० भा०।

† य० मा० सं० ३७—३९ अ०; श० ब्रा० ब्रा० १४, १, २—२, २; का० श्री० सू० २९, १—७. सर्व मेव महावीरप्रकरणम्।

‡ १भा० ४-२, ४-१सू० ५पा० ५ख० (२१); ११९ पृ०।

§ ऋ० सं० १, १, २१, ५.। "अग्निहोत्राथा धेनुर्यदि कुत्सितं शब्दं कुर्यात्, तदानीं तस्या यवसादिकं प्रयच्छेत्। आ० सू० ३, ११. इ०।

शोभनं यवस मुदक मध्यात्मीकृत्य स्याः, तेन 'भगवती' धनवती, उदकेन उदकवती भव । ("अथ") पुनः "इदानीम्" एव त्वयि भगवत्यां वय मपि त्वदुत्सृष्टेनोदकेन 'भगवन्तः' धनवन्तः 'स्याम'। सा च पुनरेवं प्रतिसंवत्सरम् 'अद्धि तृणं' मेघम्; तृद्यतेऽसाविति तृणः, तम्, अद्धि सञ्चूर्णय । 'विश्वदानीं' "सर्वदा" यथाकालम् 'पिब' "च" सूर्यरश्म्युपहृतम् 'उदकम्' 'आचरन्ती' आसेवन्ती; 'शुद्धम्' अकलुषं सर्वतो मध्यस्थाने चरन्ती ॥

घर्मधुक्पक्षे*— यवस मेव यवसम्, तज्जग्ध्वा पयस्विनी भव । वय मपि च ततः त्वत्प्रत्तेन पयसा धनवन्तः स्याम । या त्व मस्माक मेव मुपकारिणी, सा त्वं नित्य मद्धि तृण मघ्न्ये ! 'विश्वदानीं' नित्यकालम्; पिब च शुद्ध मकलुष मुदक माचरन्ती आसेवन्ती आ सर्वतो यथाकाम मरण्ये चरन्ती ॥

"तस्याः एषा अपरा भवति"— सा पुनः किमर्थम् ? रूपतो हि पूर्वस्मिन्मन्त्रे घर्मधुक् सुतरा मुपपद्यते, अतः परया वसुभिर्देवैः सम्बन्धात् माध्यमिकैव देवतेत्युपपादयति † ॥ १० (४४) ॥

---

* सायणभाष्ये तु घर्मधुक्पक्षे एव व्याख्यानं दृश्यते; न तु व्याख्यान्तरम् । तथो-क्तस्यैव निरुक्तग्रन्थः समग्रः, परं वाक्पक्षे व्याख्यानप्रसङ्गोऽपि न ज्ञातः ।

† वसुसाहचर्य्यात्तस्या औत्तमिकत्व मेव स्यात्, वसूनां देवगणानां तत्रैव समा-म्नानात् [१भा० ४९० पृ० ५अ० ६ख० (२९)]; रश्मिनामस्तु "वसवः"—इति दर्शनाच्च (१भा० २९४पृ०)। पर मिह वसुशब्देन उदकग्रहण मभिप्रेत्यैव सूक्तं अम्बू-मार्गाश्मवासिनेति ध्येयम् । वस्तुतो वसुशब्दसाहचर्य्यन्तु माध्यमिकत्वे कथमपि न प्रमाणं भवितु मर्हति, वसूनां त्रिस्थानत्व मेव वक्ष्यत्यय माचार्यो यतः (१२, ४, ७)।

हिङ्कृण्वती वसुपत्नी वसूनां वत्स मिच्छन्ती मनसा-भ्यागात्। दुहा मश्विभ्यां पयो अघ्न्येयं सा वर्द्धतां महते सौभगाय॥ इति सा निगदव्याख्याता पथ्या स्वस्तिः पन्था अन्तरिक्षं तन्निवासात्तस्या एषा भवति॥ ११ (४५)॥

"हिङ्कृण्वती"—इति *। पूर्ववदार्षादि। 'हिङ्'—इत्येवं प्रकारं शब्दं स्तनयित्नुं कुर्वती 'वसुपत्नी' वसूना मुदकाना मीश्वरा। 'वसूनां' वा आदित्यरश्मीनां मरुतां वा। ('वत्सं') वत्स आदित्यो मध्यस्थानो वा रसहरणाद् वत्सः तम्, 'इच्छन्ती' 'मनसा' या माध्यमिका वाक् नित्यम् 'अभ्यागात्'। 'सेयम्' 'अश्विभ्याम्' द्यावा-पृथिवीभ्यां सूर्याचन्द्राभ्यां वा वर्षाय 'दुहां' दुग्धां प्रचरताम् ('पयः') उदकम्। अमुना प्रकारेण प्रतिसंवत्सरं 'वर्द्धताम्' उदके-नास्माकं 'महते सौभगाय' यथा महत्सौभाग्यं धनवत्त्वं स्यात् तथा वर्द्धता मिति †॥

"पथ्या स्वस्तिः"‡— इति वक्तव्यम्। अत्र पूर्वपदं "पन्था अन्त-

* ऋ० सं० २, ३, १९, २। अथ. १९, २६, ५।

† सायणेन त्वस्या अपि प्रधानतो घर्मधुक्पक्ष एव व्याख्यानं कृतम्;—"यद्यपि वृष्टिपरत्वेन यथायोगं योज्यम्"—इत्युपक्रम्य माध्यमिकपक्षेऽपि।

‡ १भा० ४८३, ३८९ पृ० ५अ० ५ख० (२१), (२२)।

रिक्षम्", "तन्निवासात्" पथ्या स्वस्तिः इत्युक्तं निर्वचनम् *। यथा प्रायणीयायां यजति-प्रयोगो दृष्टः, तथा समाम्नातः—"पथ्यां स्वस्तिं पूर्वां यजति"—इति †॥

"तस्याः एषा भवति"—॥ ११ (४५)॥

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि ‡ या वाममेति। सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा॥ स्वस्तिरेव हि प्रपथे श्रेष्ठा रेक्णस्वती § धनवत्यभ्येति या वसूनि वननीयानि सा नोऽमा गृहे सा निरमणे सा निर्गमने पातु स्वावेशा भवतु देवी गोप्त्री देवान् गोपायत्विति देवा एनां गोपायन्त्विति वोभा व्याख्याता तस्या एषा भवति॥ १२ (४६)॥

---

* "सोऽस्य निवासः (पा० सू० ४, ३, ८९)"—इत्यधिकारे पथिन्शब्दात् यद्विधानन्तस्मादेवाचार्यवचनादुररीकार्यम्। निघण्टुटीकाकारो देवराजस्तु "भवे छन्दसि (पा० सू० ४, ४, ११०)"—इति भवार्थे यदाह। भवार्थे तु "दिगादिभ्यो यत् (पा० सू० ४, ३, ५४)"—इति यत् सुलभमेव; दिगादिषु पथिन्शब्दस्यापि पाठदर्शनात्। तथाहि—"दिक्, वर्ग, पूग, गण, पक्ष, धाय्य, मित्र, मेधा, अन्तर, पथिन्, रहस्, अलीक, उखा, साक्षिन्, देश, आदि, अन्त, मुख, जघन, मेघ, यूथ, उदकात् सञ्ज्ञायाम्, न्याय (न्याय), वंश, वेश, काल, आकाश—इति दिगादिः"—इति ग० पा० ४, ३, ५८। "पथ्या अन्तरिक्ष्याः"—इति ऋ० सं० ४, २, १५, ४. इ०।

† ऐ० ब्रा० १, १, १—५।

‡ "रेक्नस्वत्यभि" क, ख।

§ "रेक्नस्वती" क, ख।

"स्वस्तिरिद्धि:"— इति*। वसुकर्णस्यार्षम्। 'इत्'— इत्यवधारणार्थे। 'स्वस्तिः' "एव हि" 'प्रपथे' अन्तरिक्षे 'श्रेष्ठा' प्रशस्या सर्वदेवताभ्यः। 'रेक्णस्वती' "धनवती" उदकेन "अभि या वाम मेति" या "वननीयानि" तदुदकानि नित्यम् "अभ्येति"। तस्याः किम्? इति —'सा नः' सा अस्मान् 'अमा' (अमेति गृहनाम) "गृहे" वसतः 'अरणे' अरण्ये च 'निर्गमने' च बहिर्गृहात् 'पातु' रक्षतु। 'स्वावेशा' सूपचरणा 'भवतु' अस्माकम्। 'देवगोपा' "देवी" चासौ "गोप्त्री" चेति देवगोपा; "देवान् गोपायत्विति, देवा एनां गोपायन्त्विति वा"। दातॄनस्मान् किं सर्वस्मात् हविषो गोपायतु, अथ वा देवा माध्यमिका द्युस्थाना वा रश्मयः एनां गोपायन्त्विति वा॥

"उषा" †, "व्याख्याता" ‡॥

"तस्याः एषा भवति"—॥ १२ (४६)॥

अपोषा अनसः सरत्सम्पिष्टादह बिभ्युषी। नि यत्सीं शिश्नथद्वृषा॥ अपासरदुषा अनसः सम्पिष्टान्मेघात्§

---

* ऋ० सं० ८, १, ५, ९। "स्वस्ति नः पथ्यासु धन्वसु—स्वस्तिरिद्धि प्रपथे श्रेष्ठेति (ऋ० सं० ८, १, ५, ५; ९) पथ्याया स्वस्तेस्त्रिष्टुभौ"—इति ऐ० ब्रा० १, १, २। "प्रायणीयेष्टौ पथ्यास्वस्तेर्यागस्य स्वस्ति नः पथ्यास्वित्येषानुवाक्या उत्तरा याज्या"—इति सा० भा०।

† १भा० ४८३, ४८९ पृ० ५अ० ५ख० (३४)।

‡ पु० २अ० ६पा० १ख० २भा० २२२, २२५ पृ०। उपरिष्टाच्च वक्ष्यति—"उषा वष्टेः"—इत्यादि १२अ० १पा० ५—७ख०।

§ "सम्पिष्टान्मेघात्" ख।

विभ्युष्यनो वायुरनितेरपि वोपमार्थे स्यादनस इव शकटादिवानः शकट मानद्ध मस्मिंश्चीवर मनितेर्वा स्याज्जीवनकर्म्मण उपजीवन्त्येनन्मेघो*ऽप्यन एतस्मादेव यन्निरशिश्नथद्वृषा वर्षिता मध्यमस्तस्या एषापरा भवति ॥ १३ (४७) ॥

"अपोषा अनसः सरत्"—इति †। वामदेवस्यार्षम्, परा च। 'अपासरत्' 'उषाः' अपासर्पत्। कुतः ? 'अनसः' वायोः ; यदा सम्पिनष्टि वायुर्मेघान्‡ तदा तन्निवासिन्युषाः मामयं हनिष्यतीति बिभ्यत्यपसरति। 'नियती' 'शिश्नथत्' यदा "निरशिश्नथत्" निजघान निर्हन्ति 'वृषा' वर्षिता वायुः, तदा अपासरदुषाः ॥

"अनो वायुः" "अनितेः" धातोः प्राणनार्थस्य§। "अपि वोपमार्थे स्यात्"— "अनस इव" "शकटात्"‖; यथा शाकटिकः शकटात् केनचित् सम्पिष्यमाणादपसर्पेत्, एवं वायुना सम्पिष्यमाणान्मेघादपासरदुषाः। इति द्वितीयाकल्पना¶ ॥

"तस्याः एषा अपरा भवति"—। सा पुनः किमर्थम् ? उक्तमपि

---

* "उपजीवन्त्येनं मेघो" क, ख, ग ।

† ऋ० सं० ३, ६, २० ५ ।

‡ "वायुर्मेघं"—इति क ।

§ "अण प्राणने"—इति दि० धा० ६९। "दन्त्यान्तोऽयमित्येके" इति सि० कौ०।

‖ पुरस्ताच्च "अनसा रथेन"—इत्यस्य व्याख्यानं द्रष्टव्यम्। १भा० १४६ पृ०।

¶ "शकटं निरशिश्नथत् न्यवधीत्"—इत्यादि सायणव्याख्यानन्वितिंदाविकपक्षेण बोध्यम् ।

सुषाः, आदित्यसंश्रयाद्भवति; इयं तु मध्यमा मेघसंश्रया वायोरेव संस्तवादिति मध्यमा-स्वभावप्रायोवृत्त्युपप्रदर्शनार्थम्* ॥ १३ (४७) ॥

एतदस्या अनः शये† सुसम्पिष्टं विपाश्या। ससार सीं परावतः। एतदस्या अन आशेते सुसम्पिष्ट मितरदिव विपाशि विमुक्तपाशि‡ ससारोषाः परावतः प्रेरितवतः परागताद्वेला व्याख्याना तस्या एषा भवति ॥ १४ (४८) ॥

"एतदस्या अनः शये"—इति §। विशीर्णमुदकभावेन पृथिवीं सङ्क्षेपावस्थितं दर्शयन् ब्रवीति मेघम्।—'एतत्' 'अस्याः' उषसः 'अनः' मेघाख्य माश्रयभूतं 'सुसम्पिष्टं' सुष्ठु सञ्चूर्णितं वायुना "इतरदिव" शकटानः। 'विपाशि' छिन्नसर्वपाशबन्धनम्॥। ('आ शये') "आशेते" आतत्य पृथिवीं शेते आस्ते। यतः सम्पिष्यमाणात् 'ससार' माध्यमिका "उषाः" 'परावतः' दूराद्दूरतरं नभाश्रेति॥

"इला"¶, "व्याख्याता"; "ईट्टेः स्तुतिकर्मणः"—इति ** ॥

---

* सा चोपरिष्टान्निर्वक्ष्यतीत्येव (११, १, ५—७)। १भा० ४६०, ४६१ पृ० (२)।

† "अन शये" च।

‡ "विपाशि मुक्तं पाशि" क।

§ ऋ० सं० ३, ६, २१, १।

|| "विपाशि विपाडाख्या नदी, तस्याम्"—इति सा० भा०।

¶ १भा० ४८३, ४६० पृ० ५अ० ५ख० (३५)।

** ८अ० १पा० ४ख० ३भा० ४६६, ४६८ पृ०।

"तस्याः एषा भवति"—॥ १४ (४८) ॥

अभि न इळा* यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु । उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः । सिषक्तु न ऊर्ज्जव्यस्य पुष्टेः ॥ अभि-गृणातु न इला यूथस्य (माता सर्वस्य†) माता स्मदभि नदीभिरुर्वशी वा गृणातूर्वशी वा बृहद्दिवा महद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्य प्रभृतस्यायोरयनस्य (मनुष्यस्य‡) ज्योतिषो वोदकस्य वा सेवतां नोऽन्नस्य पुष्टे रोदसी रुद्रस्य पत्नी तस्या एषा भवति ॥ १५ (४९) ॥

"अभि न इळा"—इति§ । अत्रेरार्षम् । शक्वरी‖ । 'अभि गृणातु' अभिशब्दयत्वस्मान् । कासौ ? 'इळा' । किंलक्षणा ? 'यूथस्य माता' मेघयूथस्य निर्मात्री मध्यमा । केनाभिगृणातु ? 'नदीभिः'

---

* "इला" क, ख, ग ।

† क-ख-ग-पुस्तकेष्वेते पदे न दृश्येते ।

‡ एतच्च पदं न दृश्यते क-ख-ग-पुस्तकेषु ।

§ ऋ० सं० ४, १, १६, ६-७. अथवा ५, ३, ९, १९-२० ।

‖ सायणमते तु "अभि न इळा०——०प्रभृथस्यायोः"—इत्येका ऋक् त्रिष्टुप्, "सिषक्तु"—इत्याद्यापरा विराडिति । तथा च भाष्यम्—"विंशेकपदा विराट्, शिष्टाः सप्तदश त्रिष्टुभः"—इति । अत्रास्ति चानुक्रमणीसम्मतिः । परं "तस्या एषा भवति"—इति (२४१पृ०९पं०) यास्कवचनस्वारस्यादेकैवैषा ऋगिति शक्वरीत्युच्यतेऽत्र इत्यिच्छतेति ध्येयम् ।

नदनाभिरद्भिः। 'उर्वशी वा' उर्वशीति वा योच्यते, इडेति वा, सा * 'गृणातु' ('नः') अस्मानिति अभिस्तनयतु †। "उर्वशी वा बृहद्दिवा गृणाना"। उपमार्थे वा वा-शब्दः भेदापेक्षया; उर्वशीव 'बृहत्' महत् गृणातु, 'दिवा' द्योतनवता विद्युत्सहितेनोदकसमूहेन, 'गृणाना' शब्दयन्ती। 'अभ्यूर्ण्वाना' सर्व मिद मभिप्रच्छादयन्ती, ('प्रभृथस्य') "प्रभृतस्य" प्रकर्षेण सम्भृतस्य, 'आयोः' "अयनस्य" गमनशीलस्य "उदकस्य" समूहेन 'सिषक्तु' "सेवताम्" 'नः' अस्मान् 'ऊर्जव्यस्य पुष्टेः' यवादेः "अन्नस्य" पोषणाय ‡॥

"रोदसी"§, "रुद्रस्य पत्नी" रुद्रस्य विभूतिः‖॥

"तस्याः एषा भवति"—॥ १५ (४९)॥

---

* "इळा भूमिः, यूथस्य गोसङ्घस्य माता निर्मात्री। यद्वा; इळा गोरूपधरा मनोः पुत्रीत्याहुः। यद्वा; यूथस्य मरुद्गणस्य निर्मात्री इळा माध्यमिकी वाक्। अथोर्वशी माध्यमिकी वाक्।"—इति सा० भा०।

† मन्त्रे श्रुतस्य स्मच्छब्दस्य व्याख्यान मिह टीकाकृता न कृतम् परं सायणेनतूक्तम् "स्मच्छब्दः प्रशस्तवचन इत्युक्तम्, प्राशस्त्यं गृणातु"—इति। "स्मदिति निपातः सु-शब्दार्थः"—इति चोक्तं तत्पुरस्तात् (ऋ० सं० १, ४, ११, ५.)।

‡ "ऊर्जव्यस्य एतन्नामकस्य राज्ञः पुष्टेः पोषकस्य सम्बन्धिनो नोऽस्मान् सिषक्तु सेवताम्। सामर्थ्याद्देवसङ्घ इति गम्यते, अथवोर्वशी मरुद्गणो वा स्तूयते प्रकृतत्वादिति।"—इति सा० भा०।

§ १भा० ४८३, ४९० पृ० ५अ० ५ख० (३१)।

‖ "अत्र पुंयोगलक्षणो ङीष् (४, १, ४८), रुद्रस्य मध्यमस्थानस्य पत्नी, माध्यमिका वाक्"—इत्युक्तं देवराजयज्वना नि० भा० १भा० ४९० पृ०।

रथन्नु मारुतं वयं श्रवस्यु मा हुवामहे । आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥

रथं क्षिप्रं मारुतं (मेघं*) वयं श्रवणीय माह्वयामहे† आ यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसीरोदसी‡ ॥ १६ (५०) ॥

॥ इत्येकादशाध्यायस्य चतुर्थः पादः ॥११. ४.

"रथं नु मारुतम्"—इति§ । श्यावाश्वस्यार्षम् । आग्निमारुते विनियोगः । स्तोता ब्रवीति ।— ('नु') "क्षिप्रम्" 'वयं'‖ 'रथम्' 'आहुवामहे' "आह्वयामहे" । 'मारुतं' मरुत्संयुक्तम्, 'श्रवस्युम्' "श्रवणीयं" यशस्विनम् । यस्मिन् किम् ? इति—"आ यस्मिन् तस्थौ" यस्मिन्नातस्थौ, यस्मिन्नातिष्ठति, रंहणे गमने 'रोदसी'¶ 'सचा' सह ('मरुत्सु') "मरुद्भिः" सहिता मरुद्भिः रोदसी । किम् ? इति—'सुरणानि' "सुष्ठु रमणीयानि" "उदकानि" 'बिभ्रती'

---

* नास्त्येतत् पदं क-ख-ग-पुस्तकेषु ।

† "माह्वयाम"—इत्येव क, ख, ग ।

‡ अध्यायसमाप्तिसूचकं "रोदसी-रोदसी"—इति द्विर्वचनं नास्ति च-प्रभृतिषु ।

§ ऋ० सं० ४, २, २०, २ । बृहती ।

‖ "वयम् आत्रेयाः"—इति सा० भा० ।

¶ "रोदसी,—रुद्रस्य पत्नी, मरुतां माता ; यद्वा रुद्रो वायुः, तत्पत्नी माध्यमिका देवी ।"—इति सा० भा० ।

धारयन्त्या तिष्ठति* । तं वयं मेघं रथ माक्वयामहे वर्षार्थ मिति ॥ १६ (५०) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ षोडशस्य (एकादशस्य) अध्यायस्य चतुर्थः पादः ॥ ११ । ४ ॥

इति श्रीजम्बूमार्गनिवासिनो भगवद्दुर्गाचार्यस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ षोडशोऽध्यायः (एकादशोऽध्यायः) समाप्तः ॥ ११ ॥

---

* "कल्याणीर्जाया सुरणं गृहे ते" (ऋ० सं० ३, ३, १०, १)—इत्यादौ च सुरणशब्दार्थो विचार्यः ।

(१) (२) (३) (४) (५) (६) (७)
(श्येनआदायस्वादिष्ठयासोमंयत्त्वानवोनवोपरंमृत्यो-
(८) (९) (१०) (११) (१२)
त्वेषमित्थाप्रवोमहेउदुज्योतिर्धातासोमस्यायातेमध्य-
(१३) (१४) (१५) (१६)
स्थानादेवगणाआविद्युन्मद्भिरारुद्रासविष्ठीशमीविरू-
(१७) (१८) (१९) (२०) (२१)
पासउदीरतामङ्गिरसःसूर्यस्येववत्तुषेय्यमयातेमध्यस्था-
(२२) (२३) (२४) (२५) (२६)
नाःस्त्रियोदक्षस्यवायस्मैत्वंकिमिच्छन्तोपावकानोमहो-
(२७) (२८) (२९) (३०) (३१)
अर्णोयद्वाग्वदन्तीदेवींवाचमन्विदनुमतेराकामहंसिनी-
(३२) (३३) (३४) (३५) (३६) (३७) (३८)
वालिकुहूमहमन्यमूषूर्वशीविद्युन्नवठित्येन्द्राणींनाहमि
(३९) (४०) (४१) (४२) (४३) (४४)
न्द्राणिगौरीर्मिमायतस्यागौरमीमेदुपह्वयेसूयवसाद्धि-
(४५) (४६) (४७) (४८) (४९) (५०)
ङ्कृण्वतीस्वस्तिरिद्ध्यपोषाएतदस्याअभिनोरथन्नुमारुत-
मिति पञ्चाशत् ॥*)

॥ इति निरुक्ते (उत्तरषट्के) एकादशोऽध्यायः समाप्तः ॥ ११ ॥

---

* १भा० १४६ पृ० "**" द्रष्टव्यम्।

॥ अथ द्वादशाध्यायः ॥

तत्र,

॥ प्रथमः पादः ॥

व्याख्याता मध्यस्थाना देवताः, सवचनलिङ्गविशेषाः *; अधुना एतेनैव समाम्नायानुक्रमेण द्युस्थाना व्याख्येयाः †; तदर्थं विशेषतः पुनरधिकारवचनम् ॥

॥ॐ॥ अथातो द्युस्थाना देवतास्तासामश्विनौ प्रथमागामिनौ भवतोऽश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकास्तयोः काल ऊर्द्ध्व‡मर्द्धरात्रात्प्रकाशीभावस्यानुविष्टम्भमनुतमो§ भागो हि मध्यमो ज्योतिर्भाग आदित्यस्तयोरेषा भवति ॥ १ ॥

"अथातो द्युस्थाना देवताः"—इति। बहुवचनं पक्षेऽर्थवत्‖।

---

* दशमैकादशाध्याययोः (६७—२४६ पृ०)।

† ताश्च निघण्टौ पञ्चमाध्यायस्य षष्ठे खण्डे आम्नाताः (१भा० ४६०—४६७पृ०)।

‡ "ऊर्द्धं" क, ख, ग।

§ "मनुषमो" क, ग।

‖ "देवताः"—इति बहुवचनं भेदपक्षे सफलमित्यर्थः; यावदभिधानं देवतापक्षवादिनां याज्ञिकानां मते इति यावत् (२भा० ३१० पृ० १५ पं० द्र०)।

द्यौस्तेषां स्थान मिति द्युस्थानाः, देवता व्याख्यायन्त इति शेषः ॥

"तासा मश्विनौ प्रथमागामिनौ* भवतः"। तौ कस्मात्? कालतो हि द्युस्थानानां देवतानां विशेषो विवक्षितः, आश्विने च स्तुतशस्त्रके कर्मणि प्रथम मश्विनोः कालः सन्धौ। एकस्त्वाश्वी मध्यस्थानः एको द्युस्थानो नैरुक्तानाम्†; अतो द्युस्थान-मध्यस्थानत्वा त्तयोरश्विनोरुपन्यासः। यद्येव मेकस्य मध्यस्थाने एकस्य द्युस्थाने उपदेशः प्राप्नोति? न; एकैकस्य (तयोः‡) अश्विशब्दस्य पृथग्-भावेन स्तुत्यभावादश्विद्वन्द्वस्य चात्यन्त मवियोगात्; नासत्याविति च पृथक्-स्तुत्यभावात्§। सत्यप्यवियोगे प्राथम्यात् प्रथमस्य समाम्नानं युक्तम्? इति चेत्, न; तत्कालेन मध्यस्थानस्य हीयमान-रूपत्वात्; द्युस्थानस्य च वर्धमानरूपत्वात्; अतोऽनन्तरञ्च द्युस्थान-देवतारूपान्तरसंस्थानादिति ॥

"अश्विनौ‖ कस्मात्? "यद्व्यश्नुवाते सर्वम्"¶। केन? "रसेनान्यः" रसेनोदकेन** सर्वं व्यश्नुते व्याप्नोति। ("ज्योतिषान्यः") ज्योतिषैकः।

---

* प्रथमागामित्वे गुणोपजनक्रम एव हेतुः (पुरस्तात् द्रष्टव्यः ६८ पृ०)।

† इहैवोपरिष्टात् (२४७पृ० ९पं०)"रसेनान्यो ज्योतिषान्यः"—इति वक्ष्यमाणत्वात्।

‡ नास्त्येतत् पदं क-नामहस्तिपुस्तके।

§ न क्वचिदप्यश्विनः, अश्विवाचि-नासत्यादेर्वा एकस्य वियुक्तस्य श्रुतिरस्तीत्यतः समाम्नानानुरोधादवियुक्तयोरनयोर्भिन्नदेशस्थयोरप्येकत्रैव पाठ इति भावः।

‖ निघ० ५अ० ६ ख० १भा० ४९०, ४९१ पृ० (१)।

¶ "यदश्वि उदजयता मश्विनावाश्नुवातां तस्मादेतदाश्विन मित्याचक्षतेऽश्नुते यद्यत् कामयते य एवं वेद"—इति ऐ० ब्रा० ४, ९, २। "देवा वै सोमस्य राज्ञः" इत्याद्याख्यायिका च द्रष्टव्या। ऐ० ब्रा० २, ४, १।

** "अवश्यायरसेन"—इति देवराजः (१भा० ४९१ पृ०)।

"अश्वैः अश्विनौ इत्यौर्णवाभः"। अश्वैस्तद्वन्तौ ताविल्यौर्णवाभ आचार्यो मन्यते* ।

"तत् कौ अश्विनौ"? इति विचारः। तदिति वाक्योपादाने। कावेतावश्विनाविति विचारार्थः प्रश्नः। "द्यावापृथिव्यौ इत्येके"। विज्ञायते हि—"तौ यौ प्रत्यक्षदैवत मश्विनाविमे एव ते द्यावा-पृथिव्यौ"—इति द्यौर्ज्योतिषा व्याप्नोति, पृथिव्यन्नेन।—। "अहोरात्रौ इत्येके"। अहर्ज्योतिषा व्यश्नुते, रात्रिरवश्यायैः।—। "सूर्याचन्द्रमसौ इत्येके"। सूर्यो ज्योतिषा व्यश्नुते, रसेन चन्द्रमाः।—। "राजानौ पुण्यकृतौ इत्यैतिहासिकाः"†; अश्वैरश्विनावित्येतन्निर्वचनं (१पं) अथास्मिन् पक्षे इतिहासे समवैति॥

"तयोः कालः ऊर्द्ध मर्द्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम्"। ज्योतिषा व्यतिभिद्यमान मूर्द्ध मर्द्धरात्रात् तमो यदा ज्योति-रनुविष्टभ्नाति, सोऽश्विनोः कालः‡। ततः प्रभृति सन्धिस्तोत्रं पुरोदयादाश्विनम्§; उदिते सौर्याणि। तत्र यत्तमोऽनुप्रविष्टं ज्योतिषि, तद्भागो "मध्यमः" तन्मध्यमस्य रूपम्। यद् "ज्योतिः"

* ऐतिहासिकपक्षेऽपीषोऽर्थो योज्यः (२४७पृ० १२ पं० द्र०)।

† "गर्दभरथेनाश्विना उदजयताम्"—इत्यादि ऐ० ब्रा० ४, ९, २ द्र०।

‡ "सन्धिस्तोत्राख्या देवता उपास्ते"—इति दे० रा० (१भा० ४९१ पृ०)।

§ "तदेषाभियज्ञगाथा गीयते—यथा ह वा स्थूरियैकेन यायादकृत्वा न्यदुपयोजनायैवं यन्ति ते बहवो जनासः पुरोदयाज्जुह्वति येऽग्निहोत्रम् —इति"—इति ऐ० ब्रा० ५, ५, ५।

तमसि अनु प्रविष्टं तद्भागं तद्रूपम् "आदित्यः"। तावेतौ मध्यमोत्तमाविति स्वमत माचार्यस्य ॥

यतः समर्थनायोदाहरति "तयोः एषा भवति"— ॥ १ ॥

वसातिषु स्म* चरथोऽसितौ पेत्वाविव। कदेद मश्विना युव मभि देवाँ अगच्छतम् ॥ इति सा निगदव्याख्याता† तयोः समानकालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोऽर्द्धर्चो भवति। वासात्यो अन्य उच्यत उषः पुत्रस्तवान्य इति तयोरेषापरा भवति ॥ २ ॥

"वसातिषु स्म"—इति। उपजातदेवतादर्शनचक्षुः अतीतेषु रात्रिपर्यायेषु सन्ध्यौ प्राप्ते सहसैवाश्विनौ दृष्ट्वा मन्त्रदृक् ब्रवीति।— 'वसातिषु' रात्रिषु; तासु हि प्राणिनो निवसन्ति‡। किं तासु? इति— 'चरथः' युवाम्। कथम्। 'असिताविव पेत्वौ' कृष्णाविव मेषौ§

* "वसातिषु स्म" क, ख, ग।

† रोथ्स-मुद्रित-डीप्पन्या मेषा व्याख्या दृश्यते।— "वसातिषु स्म चरथो वसानयो रातयो वसन्ते स्मा इतरेतरातयो वक्षेवा वहतेर्वासितौ पेत्वाविव। अपेत्वा इवचरणं सुरातयोः।"—इति।

‡ "वस निवासे (भ्वा॰ प॰ १००५)"—इत्यस्य रूपं वसातीति भावः।

§ ऋक्संहितायां मेकत्रैव पेत्व-शब्दो दृश्यते। तथाहि—"पेत्वेनाजघान" इति (५, २, २७, १)। अत्र "पेत्वेन=छागेन"—इति सा॰ भा॰।

समानरूपौ। उषसि कथ मपि मया लक्षितौ। यतो ब्रवीति ;—"कुहेद मश्विना युवम्"। कुहेद मस्मत्कर्म प्रति ये देवा आगताः, तान् प्रति हे युवा मश्विनौ! 'आगच्छतम्' आगतवन्तौ स्थः॥

"तयोः" अश्विनोः "समानकालयोः" उभयोरपि हि तयोरूर्द्ध मर्द्धरात्रात् काल इति समानकालः। "समानकर्मणोः" उभयोरपि तयोरेकं कर्म, तिरो अह्न्याः सोमा आश्विनस्य दिक्पालः। "संस्तुतप्राययोः" प्रायेण हि तयोः बाहुल्येन संस्तव एव*॥

तयोः पुनः "असंस्तवेनैषोऽर्द्धर्चो भवति"॥

ननु अस्या मृचि वसातिषु स्म चरथ इति वसातयो हि जनपदा अपि प्रसिद्धाः, तदधिपती पुण्यकृतौ राजानौ अश्विस्तुन्ताविति शक्यते कल्पयितुम्? तद्यथा—वासात्यौ तद्देशाधिपती कौ चिद्राजानौ वक्तव्यौ पुण्यकृतौ यज्ञकर्मणि देवान् प्रति गतौ केन चिदुच्येते।—यौ युवां वसातिषु जनपदेषु नित्य मसिताविव पेत्वौ समानवेषौ चरथः, तौ युवा मिदं देवस्थानं प्रतिपेदे वावर्त्तेन्ते, तान् प्रति कदा हे अश्विनौ युवा मागतवन्ताविति। माभूदेषा मन्त्रार्थयोजनेत्यत आह ;—

"वासात्योऽन्य उच्यते, उषः पुत्रः तवान्यः इति"। एको

---

* "स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इति (ऋ० सं० १, २९, १) चैतेन सूक्तेनोत्तरस्य पञ्चदशभिः (७, १—१५) तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ। त मेतया प्रतीयाय यच्चिदिन्द्र इति। त मिन्द्र उवाचाश्विनौ नु स्तुहि त्वोपश्याम इति सोऽश्विनौ तुष्टावात उत्तरेण तृचेन (७, १६-१७-१८)।"—इत्यादि ऐ० ब्रा०७, ३, ४।

वासात्य उच्यते, एकस्य उषसः पुत्र इति। एव मेतस्मिन् भिन्नस्तुता वर्द्धूर्षं उषसः पुत्रेण सूर्येण सह समानव्याख्यानादसंशयं मध्यमो वासात्यो रात्रेः पुत्र इति* ॥

"तयोः एषा अपरा भवति"। सा पुनः किमर्थम्? मध्यमोत्तमावश्विनावित्यस्यैवार्थस्य दृढतायै स्फुटं यदेतस्या मेतत्परस्या ऋचि—॥ २ ॥

इहेह जाता समवावशीतामरेपसा तन्वा३ नामभिः† स्वैः। जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे॥ इह चेह च जातौ संस्तूयेते पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वां मन्यः सुमहतो बलस्येरयिता मध्यमो दिवो अन्यः‡ सुभगः पुत्र ऊह्यते§ आदित्यस्तयोरेषापरा भवति ॥३॥

"इहेह जाता"—इति‖। अगस्त्यस्यार्षम्। प्रातरनुवाकाश्विनयोः विनियोगः। हे अश्विनौ? युवां मुच्येथे।—'इहेह जाता' "इह च" मध्यस्थाने "इह च" द्युस्थाने "जातौ"¶ 'समवावशीतां'

---

* "प्रजापतिर्वै स्वां दुहितर मभ्यध्यायद् दिव मित्यन्य आहुरुषस मित्यन्ये" (ऐ॰ ब्रा॰ ३, ३, ९)—इत्यादिब्राह्मणवचनादुषसः सूर्य्यपुत्रीत्व मपि।

† "नामभि" क, ख, ग।

‡ "दिवोऽन्यः" च-प्रभृतिषु।

§ "ऊह्यत" क, ख, ग।

‖ ऋ॰ सं॰ १, ४, १५, ४। त्रिष्टुप्।

¶ "इहेह जाता। उभाभ्या मिहशब्दाभ्यां मध्यमोत्तमस्थाने उच्येते, तयोः सम्भूतौ; चन्द्रसूर्य्यौवेति यावत्।"—इति सा॰ भा॰।

"संस्तुयेथे"। केन? 'अरेपसा तन्वा' "अपापया तन्वा"। यथासङ्ख्यतया*। 'नामभिः स्वैः' पर मनाश्रित्य यानि स्वस्तुतिनिमित्तानि तैः। किञ्च 'जिष्णुर्वा मन्यः' नित्य मेव जेता युवयोरन्यः। 'सुमखस्य सूरिः' "सुमहतो बलस्येरयिता" अन्तषु; स च नान्यो मध्यस्थानात्† इति ("मध्यमः") मध्यस्थानः। "दिवो अन्यः" "सुभगः पुत्रः" सुभगः सुधनः, ऊहे "ऊह्यते" वायुना नित्यम्; स च नान्यः सूर्यादित्येव मत्रापि मध्यमोत्तमाविति‡॥

"तयोः एषा अपरा भवति"—। सा पुनः किमर्थम्? संस्तुतप्रायावेतौ समानकालौ समानकर्माणौ इत्युक्तं तदुपप्रदर्शनार्थम्॥३॥

---

* "अरेपसा अपापौ। आथर्वणस्य गुरोः शिरश्छेदनादिना पापलेपरहिताविति भावः। आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयत मित्यादिमन्त्रवर्णात्। केन हेतुना? इत्युच्यते,—तन्वा शरीरेण। शरीरसौन्दर्येण निमित्तेन। स्वैर्नामभिः स्वीयैर्माहात्म्यविशिष्टैरश्विनौ नासत्यावित्यादिभिरपि। रमणीयशरीरत्वात्मविशेषोपेतनामवत्त्वाच्च देवौ संस्तूयेथे इत्यर्थः। यद्वा अरेपसा तन्वेति योज्यम्। उक्तप्रकारेण गुरुशिरश्छेदादप्यपापेन शीर्षेण, तादृगश्वत्वस्थापनेनेति यावत्।"— इति सा० भा०।

† "मध्यमस्थानात्" ख।

‡ "वां युवयोः अन्यः एकः मध्यमस्थानरिचस्य पुत्रस्थानीयः सोमः, जिष्णुः जयशीलः, सुमखस्य शोभनयज्ञस्य सूरिः प्रेरयिता सन् ऊहे वहति विश्वं जगद्धारयति; चन्द्रात्मनस्तस्योदये सति ह्योषधिवनस्पत्यादयो वर्धन्ते। अन्योऽपर उत्तमस्थानः, दिवो द्युलोकस्य पुत्रः पुत्रस्थानीय आदित्यः, सुभगः शोभनरश्मिरूपधनः ऊहे वहति। इत्थ मेवं पृथक् जगन्निर्वाहकौ महानुभावौ युवां सह स्तूयेथे।"— इति सा० भा०।

प्रातर्युजा वि बोधयाश्विनावेह गच्छताम्। अस्य सोमस्य पीतये ॥ प्रातर्योगिनौ विबोधयाश्विनाविहागच्छता मस्य सोमस्य पानाय तयोरेषापरा भवति ॥ ४ ॥

"प्रातर्युजा"—इति *। मेधातिथेरार्षम्। प्रातरनुवाके विनियोगः। हे स्तोतः! † यावेतौ प्रातर्युज्येते हविषा स्तुत्या च ‡। तावेतौ 'अश्विनौ' विस्पष्टाभिः स्तुतिभिः अस्मदर्थं 'विबोधय'। विबोधितौ च त्वया 'इह' कर्मणि 'आगच्छताम्' अस्माकम् 'अस्य सोमस्य' 'पीतये' "पानाय" ॥

"तयोः एषा अपरा भवति"। सा पुनः किमर्थम्? नैवानयोः अन्यस्मिन् काले इज्यास्ति; यद्यपि क्रियेत, अनिज्यैव सेति सुतरां परया संस्तवकालश्चोपप्रदर्शयति—॥ ४ ॥

प्रातर्यजध्व मश्विना हिनोत न साय मस्ति देवया अजुष्टम्। उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान्॥ प्रातर्यजध्व मश्विनौ प्रहिणुत न

---

* ऋ० सं० १, २, ४, १। आश्विनग्रहस्य पुरोनुवाक्यैषा (आ० सू० ५. ५.)।

† "अत्र होता अध्वर्यु मुद्दिश्य ब्रूते—हे अध्वर्यो!"—इत्यादि सा० भा०।

‡ "प्रातर्युज्ञाते गृह्यमाणेन ग्रहेण सहेति प्रातर्युजा। सत्सुद्विषेत्यादिना क्विप्, सुपां सुलुगित्याकारः।"—इति सा० भा०। "आश्विनं गृह्णात्यन्वारब्धे वा यावा निति"—इति च आश्विनग्रहग्रहणविधायकं कात्यायनवचनम् (९, ७, ८)।

साय मस्ति देवेज्या अजुष्ट मेतदप्यन्यो अस्मद्यजते* वि चावः पूर्वःपूर्वो यजमानो वनीयान्वनयितृतमस्तयोः कालः सूर्योदयपर्यन्तस्तस्मिन्नन्या देवता ओप्यन्त उषा† वृष्टेः कान्तिकर्मण उच्छतेरितरा माध्यमिका तस्या एषा भवति ॥ ५ ॥

"प्रातर्यजध्वम्"—इति‡। ऋचेरार्षम्। प्रातरनुवाके विनियोगः; आश्विने च। हे स्तोतारो यूय सुच्यध्वे।—तौ "अश्विनौ" 'प्रातः' एव 'यजध्वम्'। कथम्? इति, यतो ब्रवीमि;—'प्रहिणोत' प्रकर्षेण तौ प्रति स्तुतीर्हवींषि च गमयतेति। किं मित्येवं ब्रवीमि।—प्रातर्यजध्व मिति। इतः;—यस्मात् 'न साय मस्ति देवयाः' अनयोर्देवयोः न साय मस्ति "इज्या"। यद्यपि कथञ्चित्स्यात्, 'अजुष्टम्' अनासेवितं तदश्विभ्यां कर्म§। "उतान्यो अस्मद्यजते"। "अपि" च अनादृते

* "मेतदप्यन्योऽस्मद्यजते" च-प्रभृतिषु।

† "ओप्यन्ते उषा" ख।

‡ ऋ० सं० ४, ४, १८, २। त्रिष्टुप्।

§ "सायं सायंकाले हविः देवया देवगामि नास्ति न विद्यते, देवा न स्वीकुर्वन्तीत्यर्थः, अजुष्ट मसेव्यं तत् भवति; पूर्वाह्णो वै देवाना मिति हि श्रुतिः।"—इति सा० भा०। एवञ्च सर्वदेवाना मेव साय मिज्या निषिध्यत इति भाष्यकाराभिप्रायः। वस्तुतो निरुक्तकाराभिप्रायोऽश्विनोरिज्यामात्रे एव ध्वन्यते, अत्रैव तयोक्तेः; अश्विनोरेव 'प्रातर्युजौ'-'प्रातर्यावाणौ'—इत्येवमादि-नामश्रुतेश्च। एतत्पूर्वस्या मप्यृचि (४, ४, १८, १) "प्रातर्हि यज्ञ मश्विना दधाते"—इति स्पष्टतोऽश्विनोरेवोल्लेखश्चास्मन्मतपोषक इति ध्येयम्।

त्वयि 'अन्यः' अस्मत्तः एतावश्विनौ 'यजते'; 'वि च अवः' व्यावयति च, तर्पयति हविर्भिः। 'पूर्वःपूर्वः' 'यजमानः' प्रथमः-प्रथमो यजमानो 'वनीयान्' ("वनयितृतमः") सम्भक्तृतमः, आहृतत्वात्; तस्यैव हविरासेवेते अश्विनौ; नेतरस्येति ॥

"तयोः कालः सूर्योदयपर्यन्तः" प्रकाशीभावस्यानुविष्टम्भ मित्यतः कालात्प्रभृति सूर्योदयपर्यन्तस्तयोः कालः *, ततः परं यागकालः। ततः किम्? "तस्मिन् अन्याः देवताः" तस्मिन् स्तुतिकाले अन्याः देवताः आश्विने शस्त्रे याः स्तुतिं लभन्ते, ताः "ओप्यन्ते" तासा मावापः तत्कालस्तुतिप्रतिलम्भो इति। तत्र तावदुषाः प्रथम मोप्यते †; तद्दैवतानि सूक्तानि शस्यन्ते ॥

"उषाः" ‡, "वष्टेः कान्तिकर्मणः"। "वश कान्तौ (अ० प०

---

* अश्विनोः परिचयस्तु बहुत्र बहुधा श्रूयते। ऋक्संहितायाम् १म० १९अनु० पञ्चविंशत्यृचं सप्तमं सूक्तं समग्र मेव अश्विनोः कार्यजातस्य परिचायकम्। इह हि बहूना मृष्यादीना मपकारकथाः श्रूयन्ते। तत्रैव २२ अनु० षडृचे द्वितीये च सूक्ते दीर्घतमःप्रभृतीना मश्विभ्यां कृतं रक्षणं वर्णितम्। पुनरपि २४ अनु० अष्टर्चे तृतीये सूक्ते तीग्र्यरक्षणादिक मुपवर्णितम्। "अश्विनौ वै देवानां भिषजौ"—इति, "अश्विनौ अध्वर्यू"—इति च ऐ० ब्रा० १, ४, १। मधुविद्याध्येतृत्व मप्यनयोः शतपथे श्रूयते। तथाहि—"दध्यङ् ह वा आभ्या माथर्वणो मधुनाम ब्राह्मण मुवाच"—इति श० ब्रा० ४, १, ५, १८।

† अश्विस्तुत्यनन्तर मुषसः स्तुतिरैतरेयके च दृश्यते। तथाहि—"सोऽश्विनौ तुष्टावात उत्तरेण तृचेन। त मश्विना उषस्तुरुषसं स्तुह्यथ त्वोत्स्रक्ष्याम इति। स उषसं तुष्टावात उत्तरेण तृचेन।"—इति ऐ० ब्रा० ७ प० २ अ० ४ ख०।

‡ निघ० ५अ० ६ ख० (२); १ भा० ४९०, ४९१ पृ०।

७०)"—इत्यस्य। यच्चोक्तम् "उच्छतीति सत्याः"—इति *, तदा इदं विकल्पेन द्युस्थानायाः; या पुनः "इतरा माध्यमिका" उषाः †, न तस्या विकल्पः; किं तर्हि? उच्छतेरेव सा विवासनार्थस्य;— उदकानि विवासयति, विवास्यते वा मेघान्मध्यमेनेति ॥

"तस्याः एषा भवति"— ॥ ५ ॥

उषस्तच्चित्र मा भरास्मभ्यं वाजिनीवति। येन तोकञ्च तनयञ्च धामहे ॥ उषस्तच् (चित्रं ‡) चायनीयं (मंहनीयं§) धन माहरास्मभ्य मन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि तस्या एषापरा भवति ॥ ६ ॥

"उषस्तच्चित्र मा भरा"—इति ‖। गोतमस्यार्षम्। प्रातरनुवाके आश्विने च विनियोगः। हे 'उषः!' 'वाजिनीवति!' तदस्माकं 'चित्रं' "चायनीयं धनम्" ('आभर') "आहर" त्वम्। 'येन' त्वत्प्रत्तेन वयं "पुत्रांश्च पौत्रांश्च" अविच्छेदेन तन्तान् ('धामहे') "दधीमहि" ॥

"तस्याः एषा अपरा भवति"। सा पुनः किमर्थम्? पूर्वस्या

---

* पु० २ अ० ६ पा० १ ख० २ भा० २२३, २२५ पृ०।

† इहैव पु० ३१ अ० ४ पा० १२ ख० २२८, २२९ पृ० द्र०।

‡, § क-ख-ग-पुस्तकेष्विमे पदे न दृश्येते।

‖ ऋ० सं० १, ९, २९, २; य० वा० सं० ३४, ३३। सा० सं० उ० आ० ८, ३, ८, १। "उषस्तच्चित्र मामरेति तिस्र औष्णिहम्"—इति आ० श्रौ० सू० ४, १४।

ऋचि चित्रं धन माहरेत्युक्तम्, तच्च पुनरुभयोरप्युषसोरविशिष्टम्; विशिष्टन्तु परस्या मुत्तमलिङ्गम्—"पूर्वे अर्द्धे रजसो भानु मञ्जते" —इति *, अतः परा उदाह्रियते— ॥ ६ ॥

एता उ त्या उषसः केतु मक्रत पूर्वे अर्द्धे रजसो भानु मञ्जते ॥ निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावो ऽरुषीर्यन्ति मातरः ॥ एतास्ता उषसः केतु मकृषत प्रज्ञान मेकस्या एव पूजनार्थे बहुवचनं स्यात्पूर्वे अर्द्धे † अन्तरिक्षलोकस्य‡ समञ्जते भानुना निष्कृण्वाना आयुधानीव धृष्णवः । निरित्येष स मित्येतस्य स्थाने । एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति । प्रति यन्ति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः सूर्या§ सूर्यस्य पत्न्येषैवाभिसृष्टकालतमा‖ तस्या एषा भवति ॥ ७ ॥

"एता उ त्याः"—इति ¶ । पूर्ववदार्षं विनियोगश्च । याः 'पूर्वे

* परस्मादिहैव द्रष्टव्यम् (४प०) ।

† "स्यात्पूर्वेऽर्द्धे" च प्रभृतिषु ।

‡ "ऽन्तरिक्षलोकस्य" च-प्रभृतिषु ।

§ "निर्मात्र्यसूर्या" ख ।

‖ "पत्न्येषैवाभिसृष्टकालतमा" क, ग ।

¶ ऋ० सं० १, ९, २४, १; सा० सं० उ० आ० ८, ३, १९, १ । "एता उत्या इति षलवो जागतम्"—इति आ० श्रौ० सू० ४, १४ ।

अर्द्धे' ('रजसः') "अन्तरिक्षलोकस्य" * 'समञ्जते' "भानुना" भासा आत्मान मभि व्यञ्जयति। 'एताः' ('त्याः') "ताः" 'उषसः'। किमिति? 'केतुम् अक्रत' "अकृषत" कुर्वन्ति लोकस्य "प्रज्ञानम्"। कथम्ताः प्रज्ञानं लोकस्य कुर्वन्ति? अत आह ;—"निष्कृण्वाना आयुधानीव धृष्णवः"। "निरित्येष स मित्येतस्य स्थाने"। यथा—संस्कुर्वाणाः नित्यन्निर्मृजन्तः आयुधानि निर्मलानि कुर्वन्ति धृष्णवः धर्षयितारः ते आयुधिनस्तजीवनाः, एवं भानुना स्वेन भासा तमोमल मपनीय निर्मलानि प्रज्ञानानि लोकस्योषसः संस्कुर्वन्ति। ततश्च "प्रति गावोऽरुषीर्यन्ति मातरः"। यत एवोदितास्त मेव सूर्यम्प्रति यन्ति तत्रैवान्तर्लीयन्ते; सूर्यस्यैव हि रश्मिप्रान्तप्रोत्सार्यमाणे तमस्यपरराचे जाते प्रकाश उपजायते, ता उषस इत्याचक्षते, स एष परमार्थतः सूर्य एव स्त्रीलिङ्गविशिष्टो भवति; सूर्यकार्यत्वात् प्रकाशस्य † ॥

"एकस्या एव पूजनार्थे बहुवचनम्"—इति वचनभेदप्रतिसमाधानम् ॥

निरित्येष स मित्येतस्य स्थाने सामर्थ्याद् व्यत्ययः; संस्क्रियमाणानि ह्यायुधानि अतिनिर्मलानि भवन्ति ॥

यथा चोपपद्यते उपसर्गव्यत्ययः, तथा निगम मुदाजहार।—"एमीदेषाम्"—इति ‡। "यदादीध्ये न दविषाण्येभिः"—इति।

---

* "रजसः अन्तरिक्षलोकस्य पूर्वेऽर्द्धे प्राचीनदिग्भागे"—इति सा० भा०।

† "उषसः=प्रभातकालाभिमानिन्यो देवताः"—इति सा० भा०।

‡ "यदादीध्ये न दविषाण्येभिः परायद्भ्योऽवहीये सखिभ्यः। न्युप्ताश्च बभ्रवो

कवषस्य वा अक्षस्य वा आर्षम् । कृतनिवृत्तिर्देवनादशक्नुवन्नात्मान धारयितुं ब्रवीति ।—'यदा दीध्ये' भृश मभिध्यायामि निश्चयेन 'न दविषाणि' न देविष्यामि 'एभिः' अक्षैरिति * । अथ तदा 'सखिभ्यः' समानख्यानेभ्यः कितवेभ्यः 'परायद्भ्यः' परागच्छद्भ्यः देवनस्थान मद्द मेभ्यः 'अवहीये' भृशं हीनोऽस्मीति । यदा च पुनस्ते प्राप्य आस्फारं निवपन्ति अक्षान्†, अथ पुनस्तदा तैर्न्युप्तास्ते 'बभ्रवः' बभ्रुवर्णा अक्षाः 'वाच मक्रत' शब्द मकुर्वत, अथ तदा निवृत्ति मविगणय्य 'एमि इत्' आगच्छाम्येव 'एषाम्' अप्येषां अप्येवं 'निष्कृतं' संस्कृतम् अवस्थानम् आस्फारं संस्कृतं 'जारिणीव' व्यभिचारिणीव काचि-दुःस्त्रीचारित्र मात्मनोऽविगणय्येति ॥

"सूर्या"—इति‡ वक्तव्यम् । सा पुनरियं "सूर्यस्य पत्नी"; "एषैव" उषाः, "अभिसृष्टकालतमा" यथा सूर्यस्योदयकालं प्रत्यभिसृष्टतमा भवति, गततमा भवति, तथातया सैषा उषाः§ सूर्या सम्पद्यते‖ । "तस्याः एषा भवति"—॥ ७ ॥

वाचु मक्रत एमीदेषां निष्कृतं जारिणीव ॥"—इति ऋ० सं० ७, ८, २, ५ । अक्षसूक्तीयैषा । त्रिष्टुप् ।

* "न दविषाणि, न दूषये, न परितपामि । यद्वा न दविषाणि न देविष्यामी-त्यर्थः"—इति सा० भा० ।

† "प्राप्यास्फारन्ति वपन्ति अक्षान्"—इति क० ह० ।

‡ निघ० ५ अ० ६ ख० (२) ; १ भा० ४९०, ४९१ पृ० ।

§ उषसो लक्षणं त्वेवं बुध्यते—"पुरा शकुनिवादादनुब्रूयान्निर्ऋतेर्वा एतन्मुखं यद् वयांसि यच्छकुनयस्तस्मात्पुरा शकुनिवादादनुब्रूयात्"—इत्यादि ऐ० ब्रा० २, १, ५ ।

‖ इय मेव च सावित्रीत्यप्युच्यते ऐ० ब्रा० ४, २, १. इ. ।

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ॥ आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ सुकाशनं* शल्मलं† सर्वरूप मपि वोपमार्थे स्यात्सुकिंशुक मिव शल्मलि मिति किंशुकं क्रंशतेः (प्र‡)काशयतिकर्मणः शल्मलिः सुशरो भवति शरवान्वारोह सूर्ये अमृतस्य लोक मुदकस्य सुखं पत्ये वहतुं कुरुष्व सविता सूर्यां प्रायच्छत् सोमाय§ राज्ञे प्रजापतये वेति च ब्राह्मणं वृषाकपायी वृषाकपेः पत्न्येषैवाभिसृष्टकालतमा तस्या एषा भवति ॥ ८ ॥

"सुकिंशुकं शल्मलिम्"—इति||। सूर्याया आर्षम् । विवाहे विनियोगः । त्रिले तावदुच्यते प्रभा मात्मनो विभज्य तदधिदेवतां ब्रवीति ।—'सुकिंशुकं' सुष्ठु काशनं दीपनं लोकानाम्, 'शल्मलिं' "शल्मलं" व्यपगतमलम्, 'विश्वरूपं' "सर्वरूपम्", 'हिरण्यवर्णं' हिरण्योपमवर्णं हिरण्य मिव वरणीयम्, 'सुवृतं' सुवर्त्तनं शोभनैर्वा रश्मिभिर्वृतम्, 'सुचक्रं' सुचकनं सुदीप्तम् । एत मेवंलक्षणं मण्डलं

* "सुकासनं" क, ख, ग ।

† "सन्नमलं" क, ख, ग ।

‡ नास्त्येतत् पदम् क-ग-पुस्तकयोः ।

§ "प्रायच्छासोमाय" क, ख, ग ।

|| ऋ० सं० ८, ३, १३, ५ । "सुकिंशुक मित्याद्या नवर्चो विवाहमन्त्रा आशिषः प्रतिपादकाः—इति सा० भा० ।

रथम् 'आरोह' त्वं हे 'सूर्ये'! 'अमृतस्य' उदकस्य 'लोकं' स्थानम्। तत एव मधिरुह्य 'स्योनं' सुख मेतस्मै 'पत्ये' मण्डलाधिष्ठात्रे 'वहतुं' 'कृणुष्व' कुरुष्व ॥

पृथक्तपक्षे तु—रथ एव रथः, सूर्य उद्वोढा, कन्या सूर्योच्यते। एवंलक्षणं रथ मारोहेति* ॥

"अपि वोपमार्थे स्यात्—"सुकिंशुक मिव शल्मलि मिति"। किंशुक मिति पलाशपुष्पे प्रसिद्धिः; इह तु रक्तपुष्पत्वसामान्यात् सुपुष्पित मिव शल्मलि मिति सामर्थ्यात् तेनोपमानयोग आदित्यस्य पुष्टतर इति किंशुकशब्दः पुष्पिते शल्मलौ गौण इति भाष्यकाराभिप्रायः ॥

"किंशुकं क्रंशतेः" धातोः प्रकाशनार्थस्य†; तद्धि दीप्तिमद्भवति।—। "शल्मलिः सुशरो भवति"। "शृ हिंसायाम्"—इत्यस्य धातोः; स हि मृदुत्वात् सुहिंस्यो भवति। "शरवान् वा"। हिंसावान्; कण्टकैरसौ हिनस्ति हि। "सविता सूर्यां प्रायच्छत् सोमाय राज्ञे प्रजापतये वेति च ब्राह्मणम्"‡। निरुक्तपक्षे ज्योत्स्नां

---

* "सुकिंशुकं शोभनकिंशुकवृक्षनिर्मितं तथा शल्मलिवृक्षनिर्मितं विश्वरूपं नानारूपं हिरण्यवर्णं हितरमणीयवर्णं हिरण्यालङ्कारयुक्तं वा सुवृतं सुष्ठु वर्त्तनं सुचक्रं शोभनचक्रोपेतं रथं हे सूर्ये! आरोह। अमृतस्य लोकं स्थानं स्योनं सुखकरं पत्ये सोमाय वहतुं वहन मात्मनः प्रापणं कृणुष्व कुरुष्व। अत्र निरुक्तं द्रष्टव्यम्।"—इति सा० भा०।

† पुरस्तादप्युक्त मिदम् (२भा०२४१पृ० ६पं०), एष च नैरुक्तो धातुः।

‡ "प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्"—इत्यादि ऐ० ब्रा० ४, १, १।

सोमाय ददाति; यदुक्तम्— "आदित्यतोऽस्य दीप्तिर्भवति"—इति*। "प्रजापतये वेति" उषसं वा मध्यस्थानाय प्रजापतये ददाति, के चित्त्वैतिहासिकपक्षे इच्छन्ति ॥

तेषा मितिहासं शृणु। कथ मेतत्? इति—"वृषाकपायी"†, "वृषाकपेः पत्नी"। वृषाकपि रादित्यः‡, तस्य पत्नी, तद्विभूतिः; उषःकाले यदवश्यायान् वर्षति कम्पयति च तद्गुणयोगात्। सा पुनः "एषैव" सूर्या, "अभिसृष्टकालतमा" वृषाकपायीत्युच्यते ॥

"तस्याः एषा भवति"—॥८॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे। घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः॥

वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा स्नुषा साधुसादिनीति वा§ साधुसानिनीति वा|| स्वपत्यं तत्सनोतीति वा। प्राश्नातु त इन्द्र उक्षण एतान्माध्यमिकान्संस्त्यायानुक्षण उक्षतेर्वृद्धिकर्मण उक्षन्त्युदकेनेति वा प्रियं कुरुष्व सुखाचयकरं हविः

---

* १भा० १८१पृ० (१, १, १); ४७४पृ० (४, ४, ४)।

† निघ० ५अ० ६ख० (४); १भा० ४९०, ४९१पृ०।

‡ पुरस्ताद् द्रष्टव्यम् ११७पृ० ११पं०, तट्टीप्पन्याञ्च; किञ्च ११८पृ० १पं०, तद्व्याख्यायां तट्टीप्पन्याञ्चेति।

§ "साधुसादिनी वा" क, ख, ग।

|| "साधुसातिनी वा" क, ख, ग।

(सुखकरं हविः*) सर्वस्माद्य इन्द्र उत्तरस्त मेतद् ब्रूम आदित्यं सरण्यूः सरणात्तस्या एषा भवति ॥ ९ ॥

"वृषाकपायि रेवति"—इति† । इन्द्रस्यार्षम् । षष्ठे पृष्ठ्याहनि वृषाकपौ विनियोगः । हे 'वृषाकपायि!', 'रेवति' धनवति! रयिमति!, 'सुपुत्रे!' मध्यमेनेन्द्रेण रसहरणसामान्यात्—सहस्थान-सामान्यात्, 'सुस्नुषे' "माध्यमिकया वाचा" मिथुनसामान्यात् । किम्? इति—'घसत्त इन्द्र उक्षणः' प्राश्नातु ते इन्द्रः तव स्वभूतानेतान्माध्यमिकानुक्षणोऽवश्यायसंस्त्यायान् एष इन्द्र आदित्यः; स हि तानुद्यन् पिबति । 'प्रियम्' इष्टम्, एतत् 'काचित्करं हविः' । क मिति सुखनाम‡, तस्य यदाचित माचयनं करोति, तद्भवति काचित्करम् । किं पुनस्तत्? 'हविः' उदकम्; तत्कुरुष्वावश्याय-लक्षणं हविः अन्न मवश्यायैरभिनिष्पादय । किमर्थम्? 'विश्वस्मात्' सर्वस्मात् य एष इन्द्र आदित्यः 'उत्तरः', तदर्थं मिति ॥

"स्नुषा" "साधुसादिनीति वा साधुसानिनीति वा" । शोभने अर्थे श्वसुरस्य सन्तानलक्षणे सौदत्यङ्गभाव मुपैतीति स्नुषा; साधु सनोति सन्ततिं सम्भजतीति वा स्नुषा; "सु अपत्यम्, तत्सनोतीति वा" । सु—इत्यपत्यनाम§; प्रसूयते हि तदिति, तदियं

---

* क-ख-ग-पुस्तकेषु एते पदे न दृश्येते ।

† ऋ० सं० ८, ४, २, १ ।

‡ कम्=उदकम् १भा० ९०पृ०, कम्=सुखम् १भा० २१८पृ० ।

§ एतस्मादेव यास्कवचनादिति बोध्यम् ।

श्वशुरस्य सनोति सम्भजतीति वा स्नुषा* ।—। "उक्षणः", "उक्षतेः" वृद्ध्यर्थस्य†; वर्द्धयन्ति हि ते ओषधीरवश्यायाः; त एव वा बलत्वाद् वृद्धा भवन्ति। उक्षतेर्वा सेचनार्थस्य‡; "उदकेन" हि अवश्यायाः सर्व मिदं सिञ्चन्ति॥

"सरण्यूः"—इति§ वक्तव्यम्। सैव यदा सूर्यं प्रत्यविभागेन सृता प्रसृता भवति, तदा "सरणात्" सरण्यूरित्युच्यते॥

"तस्याः एषा भवति"—॥ ९॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णा मदधुर्विवस्वते। उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः॥ अप्यगूहन्नमृतां|| मर्त्येभ्यः कृत्वी सवर्णा मदधुर्विवस्वतेऽप्यश्विनावभरद्यत्तदासीदजहाद् द्वौ¶ मिथुनौ सरण्यूर्मध्यमं च माध्यमिकाञ्च वाच मिति नैरुक्ता यमञ्च यमीञ्चेत्यैतिहासिकास्तत्रेतिहास माच-

---

* "तद्यथैवादः स्नुषा श्वशुराल्लज्जमाना निलीयमानैत्येव मेव"—इत्यादि ऐ० ब्रा० ३, ३, ११।

† निघण्टौ महन्नामसु उक्षः, उक्षितः, उक्षा इति च (१भा० १९९ पृ०)। 'उक्षति वृद्ध्यर्थः—इति स्कन्दस्वामी"—इति देवराजः। १भा० ३०१ पृ० (५)।

‡ "उक्ष सेचने"—इति धा० पा० भ्वा० प० ६५७।

§ निघ० ५अ० ६ख० (५) १भा० ४९१ पृ०।

|| "अपागूहन्नमृतां" ग, रोथसदृश्येष्वपि केषुचित्।

¶ "०दजहाद्वौ" क, ख, ग।

स्मृते त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद्यमौ मिथुनौ जनयाञ्चकार सा सवर्णा मन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव स विवस्वानादित्य आश्व मेव रूपं कृत्वा ता मनुसृत्य सम्बभूव ततोऽश्विनौ जज्ञाते सवर्णायां मनुस्तदभिवादिन्येषर्ग् भवति ॥ १० ॥

"अपागूहन्"—इति*। देवश्रवस आर्षम्। 'अपागूहन्' 'अमृताम्' एता मुषसं वृषाकपाय्यवस्थायां 'मर्त्येभ्यः' मनुष्येभ्यः। के ते? रश्मयः। "कृत्वी सवर्णा मददुर्विवस्वते"। तत्सवर्णा मेतां कृत्वा सरण्युम् अददुर्विवस्वते आदित्याय। 'उत अश्विनौ भरत्' स्तुतिभिः सोषाः; स ह्यश्विनोः स्तुतिकालः। अथवा सरण्यूरभरत् हविषा; स ह्यश्विनोर्यागकालः। 'यत् तत् आसीत्' उषसो रूपं सरण्वा वा 'अजहात्' अत्यजत्। 'द्वा' "द्वौ" 'मिथुनः' "मिथुनौ" सरण्यूः, "मध्यमञ्च माध्यमिकाञ्च वाच मिति नैरुक्ताः" यदा हि सरण्यूरादित्यस्य सकाशं मण्डल मनु प्रविष्टा भवत्यविभागेन, तदोदिते आदित्ये विच्छिद्यते मध्यमस्य माध्यमिकायाश्च वाचः काल इति, एष तयोस्त्यागः॥

"यमञ्च यमीञ्चेत्यैतिहासिकाः"† । तन्मतेन मन्त्रार्थस्य योजना।

---

* ऋ० सं० ७, ६, १२, २। अस्याः खलु यमपुत्रो देवश्रवा नामर्षिः।

† "अत्रेतिहास माचक्षते। त्वष्टृनामकस्य देवस्य सरण्युस्त्रिशिराश्चेति स्त्रीपुंसात्मक मपत्यद्वय मभूत्। ततस्त्वष्टा सरण्यूनामिकां पुत्रीं विवस्वते प्रायच्छत्। ततस्तस्यां विवस्वतः सकाशाद् यमयम्यौ विजज्ञाते। ततः कदाचिदात्मसदृशीं देवजनितायाः

त एव रश्मयः प्राणाधिदेवताभाव मापन्नाः, तेष्वन्यत्तद्रूपं चेत्यैतिहासिको व्यवहारः। तान्त्वाष्ट्रीं सरण्यू मश्वाकृत्वा, तथासत्यश्विनोर्जन्म भविष्यत् पश्यन्तो लोकहिताय अमृतां अमरणधर्मिणीन्देवीम् अपागूहन्नन्तर्हिताञ्चक्रुः। मर्त्येभ्यो मनुष्येभ्यः उत्तरान् कुरून् प्रति निन्युः*। ततश्चान्यां तत्सवर्णाञ्छायाप्रभवां कृत्वा ता मददुर्विवस्वते। उताश्विनावभरत् यत् आश्वं तदा रूप मासीत्तेन सा सरण्यूरश्विनावभरत् अजनयत् वा अपुष्णात् उत्तरेषु कुरुषु। अजहादु द्वा मिथुना सरण्यूः द्वावन्यौ मिथुनौ यमश्च यमीचेति विवस्वतः सकाशादजहात् हित्वा ननाशेति॥

"तत्रेतिहास माचक्षते"। ऋजुरितिहासार्थः। यथा त्वाष्ट्री सरण्यूः विवस्वतोढा, सा च तस्मात् ननाश। "तदभिवादिन्येषर्गभवति"—॥ १० ॥

स्त्रियः समीपे तदपत्यद्वयं निधाय स्वय माश्वं रूपं कृत्वोत्तरान् कुरून् प्रति जगाम। अथ विवस्वानेतां स्त्रियं सरण्यू मिति मत्वा ता मरंसीत्। तस्यां मनुर्नाम राजर्षिरजायत। ततो विवस्वानेषा सरण्यूर्न भवतीति स्वय मश्वो भूत्वा ता मश्वरूपिणीं प्रायासीत्। ततः सङ्क्रीडमानयोस्तयोः स्खलितं रेतः पृथिव्यां पपात। अथ सा गर्भकामतया तत् पतितं रेत आजघ्रौ। ततस्तस्याः सकाशात् नासत्यो दस्रश्चेत्युभावश्विनावजायेताम्"—इति १म० २अ० १सूक्तारम्भे सा० भा०। त्रिशिरःपरिचयस्तु ऋ० सं० ७, ६, ४, ३. द्र० ("त्रिशीर्षाणं ०———० त्रितो गाः")।

* "ये के च परेण हिमवन्तं जनपदा उत्तरकुरवः उत्तरमद्राः इति"—इति ऐ० ब्रा० ८ प० ३ अ० ३ख०।

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति। यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश॥ त्वष्टा दुहितुर्वहनं करोतीदं विश्वं भुवनं समेतीमानि* च सर्वाणि भूतान्यभिसमागच्छन्ति यमस्य माता पर्युह्यमाना महतो जाया विवस्वतो ननाश रात्रिरादित्यस्यादित्योदयेऽन्तर्धीयते†॥११॥

॥इति निरुक्तौ द्वादशाध्यायस्य प्रथमः पादः॥१२.१.

त्वष्टा दुहित्रे इति‡। पूर्ववैव समानार्षं विनियोगश्च। 'त्वष्टा' देवो विश्वकर्मा यं पुराणविदो वदन्ति, स ('दुहित्रे') "दुहितुः" 'वहतुं' "वहनं" विवाहं "करोतीति" 'इदं विश्वं' 'भुवनं' भूतजातं विवाहदर्शनप्रेप्सया 'समेति'; स हि विवाहानां स्वभावः। 'यमस्य माता' भविष्यता योगेनोच्यते 'पर्युह्यमाना' पर्यूढा, यमञ्च यमीञ्च जनयित्वा, ततो 'महः' "महतः" 'जाया' 'विवस्वतः' देवस्य जाया भार्या हित्वा अपत्ये मिथुनावाश्वं रूपं कृत्वा 'ननाश' इति§॥

---

* "करोतीमानि"—इत्येव क, ख, ग।

† "ऽन्तर्धीयते" क, ख, ग।

‡ ऋ॰ सं॰ ८, ६, १२, १। उक्तायाः प्रथमैषा।

§ "ननाश, उत्तरान् कुरून प्रति गता अगच्छदित्यर्थः"—इति सा॰ भा॰।

नैरुक्तपक्षे तु 'त्वष्टा' मध्यमः, तमोभागस्य उषसो ('दुहित्रे') दुहितुः दूरे स्थितायाः प्रकाशरूपायाः 'वहतुं' "वहनं" विवस्वतः "करोति"। 'इदं विश्वं भुवनं समेति' प्रभात मिति मत्वा "सर्वाणि भूतानि" स्वासुस्वास्वितिकर्त्तव्यतासु अभिसमागच्छन्ति। 'यमस्य माता पर्युह्यमाना' यमस्य मध्यमस्य माता देवधर्मेण अथवा द्युस्थानस्य यैव जाया सा मातेति। जायतेऽस्यां पुत्रत्वेन पतिः 'जाया' भार्या*, "महतो विवस्वतः" प्रकाशेन प्रोह्यमाणा 'ननाश' नश्यति। सङ्क्षेपतो भाष्यकारोऽर्थं निराह।—"रात्रिरादित्यस्य" उषा जाया, सा "आदित्यस्योदयेऽन्तर्धीयते"—इति† ॥ ११ ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ सप्तदशाध्यायस्य (द्वादशाध्यायस्य) प्रथमः पादः ॥ १२ । १ ॥

॥ द्वितीयः पादः ॥

सविता व्याख्यातस्तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति तस्यैषा भवति ॥ १ (१२) ॥

---

* तथा हि—"पतिर्भार्यां सम्प्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥"—इति म० सं० ९अ० ८ श्लो०।

† अत एव च रात्रेरपरं नाम "अहल्या"—इति, एतन्मूलकश्च अहल्याहरणाख्यान महल्याजारस्य सूर्य एवेति मौ० द० इ०।

"सविता"—इति* वक्तव्यम्। स पुनरेष "व्याख्यातः" अभिधानतः; इह पुनरादित्यः। "तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति" यदा यस्मिन् काले द्यौरेव अपहततमस्का भवति, न पृथिवी; पृथिव्यां तमो भवति; दिव्यपहते तमसि विक्षिप्ता अस्यां रश्मयो भवन्ति, स सावित्रः कालः, तस्मिन् काले आदित्यः सवितोच्यते†। "तस्य" सवितुः तत्कालोपलक्षितस्य "एषा" ऋक् प्राधान्यस्तुतिः "भवति" ॥ १ (१२) ॥

विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे। वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ सर्वाणि प्रज्ञानानि प्रति मुञ्चते मेधावी कविः क्रान्तदर्शनो भवति कवतेर्वा प्रसुवति भद्रं द्विपाद्भ्यश्च चतुष्पाद्भ्यश्च व्यचिख्यपन्नाकं सविता वरणीयः प्रयाणमनूषसो विराजत्यधोरामः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादित्यधस्तात्तद्वेलायां‡ तमो भवत्येतस्मात्सामान्यादधस्ताद्रामोऽधस्तात् कृष्णः कस्मात्सामान्यादित्यग्निं

* निघ० ५अ० ६ख० (७); १भा ४९०, ४९२पृ०।

† "त्रयस्त्रिंशद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादश आदित्याः प्रजापतिश्च वषट्कारश्च (ऐ० ब्रा० १प० २अ० ४ख०)"—इत्येवमादिषु श्रुतानां द्वादशानामादित्यानामेष प्रथमः, सवितेति; दिनाद्ययामाद्यतृतीयांशकालोऽस्याधिकृतः।

‡ "०द्वेलायां" क, ख, ग।

चित्वा न रामा मुपेयाद्रामा रमणायोपेयते न धर्माय कृष्णजातीयैतस्मात् सामान्यात्कृकवाकुः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्या दिति कालानुवादं परीत्य कृकवाकोः पूर्वं शब्दानुकरणं वचेरुत्तरं भगो व्याख्यातस्तस्य कालः प्रागुत्सर्पणात्तस्यैषा भवति ॥ २ (१३) ॥

"विश्वा रूपाणि प्रति मुञ्चते कवि"—इति* । श्यावाश्वस्यार्षम् । आभिप्लविके प्रथमेऽहनि विनियोगः; शिक्यपाशप्रतिमोके च यजमानस्याग्नौ । 'विश्वानि' "सर्वाणि" 'रूपाणि' रूपवत्स्वर्थेषु 'प्रतिमुञ्चते' आबध्नाति । तमोऽपघ्नन् रूपाण्याविःकुर्वन् । 'कविः' "क्रान्तदर्शनः" अथवा "कवतेः" धातोः गत्यर्थस्य कविः, कवति गच्छत्यसौ नित्यम् † । किञ्च कवित्वादेव 'प्रासावीत्' "प्रसुवति" जनयति । अभ्यनुजानाति च 'भद्रं द्विपदे चतुष्पदे' "द्विपाद्भ्यः" मनुष्यादिभ्यः "चतुष्पाद्भ्यः" गवादिभ्यः, यद्यत्तेषां भद्रं कल्याणं तत्तत्प्रसुवति । किञ्च । 'वि नाकम् अख्यत्' विख्यापयति नाकं द्याञ्च विदर्शयति; तदाहि तस्यां विकीर्णरश्मयो भवन्ति । किञ्च 'अनु-प्रयाणम्, उषसः वि राजति' उषसः प्रयाण मनु विराजति प्रकाशते । सोऽस्माकं नामेदं करोत्वित्याशिषा स्तुतिर्निराकाङ्क्षा ॥

---

* ऋ० सं० ४, ४, १४, २ । य० वा० सं० १२, ३ ।

† "कवते" निघ० २अ० १४ख० (२७); १भा० २२९, २४२पं० । "कविः" निघ० ३अ० १५ख० (१०); १भा० २६८, २४१ । "अतीतानागतविप्रकृष्टविषयं युगपत् ज्ञानं यस्य स क्रान्तदर्शनः"—इत्युवटः ।

"त्रि नाक मख्यत्"—इति सवितुः कालोपलक्षणकं मन्त्रलिङ्गम्, तत्पशुगुणसामान्येन समर्थयन्नाह।—"अधोरामः सावित्र इति पशुसमाम्नाये विज्ञायते"*। "कस्माद्गुणसामान्यात्"? इति—"अधस्तात्तद्वेळायान्तमो भवति" उपरिष्टाच्च ज्योतिः†। शुक्लं तदा दिवि भवति, कीर्णरश्मित्वात्तस्याः; अधस्तात्तु भूम्यां तदा तमो भवति। एतस्मात् कालदेवतागुणसामान्यात् पशुरपि तथारूप एव भवति सावित्रः॥

आह;—"अधोरामः" इति किमुक्तं भवति? उच्यते,—"अधस्तात्कृष्णः"—इति यदुक्तं स्यात् तदुक्तं भवत्यधोराम इति॥

आह;—"कृष्णः कस्मात् सामान्यात्" राम इत्युच्यते? शृणु,—विज्ञायते हि "अग्निञ्चित्वा" प्रथमं चित्वा "न रामा मुपेयात्"—इति‡। "रामा"—इति शूद्रोच्यते; सा हि "रमणाय" एव

---

* अश्वमेधाह्वे हि एकविंशत्यादयो यूपा भवन्ति, तेषु तदन्तरेषु च ग्राम्या आरण्याश्च बहवः पशवो बद्धा भवन्ति, तेषां स्तुत्यर्थाश्च ये मन्त्रा आम्नायन्ते, त एव पशुसमाम्नाया उच्यन्ते (य० वा० सं० २४अ० १—४०; २९अ० ५८, ५९ क० इत्यादयः द्र०)। तत्र च पशुसमाम्नाये "अधोरामः सावित्रः"—इति श्रूयते (य० वा० सं० २९अ० ५८क०), अधोरामः अधस्तात्कृष्णः पशुः सावित्रः सवितृदेवताक इति च तदर्थः।

† एवञ्च सवितृनामकादित्यस्य=प्रथमोदितस्य सूर्यस्य,अधोभागे तमसा भारकः, उपरिष्टाच्च ज्योतिषा मिति फलितार्थः; इडायाम्=पृथिव्याम्, सर्वदैव एकतः सूर्योऽस्तं याति एकत्र उदेति चेति तमोज्योतिषोः अवजर्दभावाभ्यां सदैव स्थितिरिति भावः।

‡ एवञ्चान्यत्र शूद्राया उपयमो न दोषावह इति सुतराम्। तथा च "शूद्रावेदी पतत्यत्रेः"—इति (३अ० १६श्लो०) मनुवचन मज्ञातसवर्णोद्वाहपर मिति स्थितम्।

"उपेयते"—"न धर्माय" रमणार्थ मेव सा । "कृष्णजातीया"—इत्येकार्थौ. शब्दावधुना उत्सृज्य रामां. स्त्रियं प्रवीणादिशब्दवत् पश्चादयं रामशब्दो वृत्तः कृष्णसामान्यमात्रेण* ॥

"कृकवाकुः सावित्र इति पशुसमाम्नाये विज्ञायते"†, सः "कस्मात्सामान्यात्"? इति, उच्यते,— "कालानुवादं परीत्य" सवितुः काल मसौ वक्तीति‡ एवं परीत्य परिज्ञाय समाम्नाये तस्य सावित्रत्वं कृकवाकुशब्द मधुना निर्वक्ति । "कृकवाकोः पूर्वं शब्दानुकरणम्" कृकवाकु-शब्दस्य पूर्वपदं शब्दानुकरणं कृकः—इत्येव मसौ शब्दङ्करोति ; "वचेरुत्तरम्" वाकुरित्येतत् ; कृकः—इत्येवं वक्तीति कृकवाकुः ॥

"भगः" वक्तव्यः§ । स पुनरेषः "व्याख्यातः" स्त्रीभगेन शब्दव्युत्पत्तितः‖ । ("तस्य कालः प्रागुत्सर्पणात्") तस्मात्सावित्रात्कालात् परत एतदुत्तमं ज्योतिर्भगाख्यं भवति¶ ॥

"तस्य एषा भवति"—॥ २ (१३) ॥

---

* एवञ्च कृष्णत्वं शूद्राणां प्राकृत मार्याणान्त्वप्राकृत मासीत्तदानी मित्यपि सुवचम् । अत एव "कृष्णां अवधैधामभिगात् (ऋ० सं० २, १, ८, ६)"—इति व्याख्यानावसरे "कृष्णान्, कर्मविघ्नकारिणोऽसुरान्"—इति सा०भा० । एवं मङ्गच ।

† य० वा० सं० २४अ० ३५कं० ।

‡ 'कृकवाकुः' ताम्रचूडः, कुक्कुट इति यावत् ; स च पशुः 'सावित्रः' सवितृदेवताक इत्यर्थः । सवितुरुदयकाले एव तेषां रुतश्रुतेः । कृकवाकु-शब्देन मयूर-करण्डावपि गृह्येते ।

§ निघ० ५अ० ६ख० (८) ; १भा० ४६०, ४६२पृ० ।

‖ ३अ० ३पा० ४ख० ; २भा० ३११पृ० ३पं० ।

¶ द्वादशस्वादित्येष्वयं द्वितीयः ; दिनाद्ययाममध्यवर्तीयांशकालोऽस्याधिकृतः ।

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्त्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता सर्वस्याध्रश्चिद्यं मन्यमान आढ्यालु*रिद्रस्तुरश्चित्तुर इति यमनाम तरतेर्वा त्वरतेर्वा त्वरया तूर्णगतिर्यमो राजा चिद्यं भगं भक्षीत्याहान्धो भग इत्याहुरनुत्सृप्तो न दृश्यते प्राशित्रमस्याक्षिणी निर्जघानेति च ब्राह्मणं जनं भगो गच्छतीति (वा†) (विज्ञायते‡) जनं गच्छत्यादित्य उदयेन सूर्यः सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा तस्यैषा भवति ॥ ३ (१४) ॥

"प्रातर्जितं भगम्"—इति§। वसिष्ठस्यार्षम्। प्रातः प्रातस्तमांसि यो जयति, स भवति प्रातर्जित्, तम् 'प्रातर्जितं', 'भगं' सूर्यम्, 'उग्रम्' उद्गूर्णम् मभ्युद्यत मुदयाय 'हुवेम' आह्वयामहे 'वयम्'। 'पुत्र मदितेः, यो विधर्त्ता' "विधारयिता" "सर्वस्य" जगतः स्वेनानुग्रहेण। किञ्च 'आध्रश्चिद्यं मन्यमानः' "आढ्यालुः" आढ्यानां

---

* "आढ्याडु" घ-प्रभृतिषु।

† नास्त्येतत् क-ख-ग-पुस्तकेषु।

‡ नास्त्येतत् घ-प्रभृतिषु।

§ ऋ० सं० ५, ४, ८, २। भगसूक्ते द्वितीयैषा। "निवेष्टुकामो रोगार्त्तो भगसूक्तं जपेत् सदा। निवेशं विशति क्षिप्रं रोगैश्च परिमुच्यते॥"—इति ऋ० वि० १. १५।

स्तुहयिता "दरिद्रः", स यं मन्यमानः आकाङ्क्षन्नहन्यहनि पूजयन्नास्ते; अपि नामोदियात् भगवतो वान्नार्थं पर्यटेय मिति। 'तुरश्चित्' तुरोऽपि "यमः तूर्णगतिः" सर्वान् प्राणिन आभिमुख्येनोपसंहाराय तूर्णगतिस्त्वरितगतिः यं मन्यमान आस्ते प्रेताधिपतिः; तदुदयाद्धि कालातिक्रमेणासावुपसंहरति प्राणिनः। 'राजा चित्' राजापि चार्थिनां कार्यचिकीर्षया 'यं भगं भक्षि' तम् उदयं भजति इत्येव माह। तं वयं भग माह्वयामहे॥

आह;—"अन्धः भगः इत्याहुः"*, तस्य कोऽर्थः? इति, उच्यते—स हि सूर्यभावम्, "अनुत्सृप्तो न दृश्यते" नास्मिन् द्रष्टॄणां ध्यानं दर्शन मस्तीत्यन्धः। न पुन रसावेव न पश्यति;—"प्राशित्र मस्याक्षिणी निर्जघानेति च"—इति। ऐतिहासिकपक्षाभिप्रायोऽय मर्थवादः प्राशित्रभागस्यानन्वीक्षणस्तुत्यर्थम्†। "जनं भगो गच्छतीति"। तदेतत् प्रसिद्ध मेव, यदा तदात्मना जन मादित्यो गच्छति॥

"सूर्यः"—इति‡ वक्तव्यम्। स पुनरयं भगकालात्सृतः सूर्यो भवति§। "सर्त्तेः वा" सूर्यः। "सुवतेर्वा" प्रसवार्थस्य; स एव हि इदं सर्वं प्रसुवति जनयतीत्यर्थः। "स्वीर्यतेर्वा" सु-पूर्वस्य

---

* "अन्धः" ५अ० १पा० १ख०; (१भा० १,१४०); ८अ० ४पा० २ख० (पृ० ५१३०); ११अ० १पा० ८ख० (पृ० १७५० ।

† "प्राशित्र०"—इति ख-नाम पु०-पाठः। "इत्यैः प्राशित्रप्रहारेण छिन्नौ सवितुः पाणी देवैर्हिरण्मयौ कृताविति सवितुर्हिरण्यपाणित्व मिति मकृचश्रुतौ कथा"—इति महीधरः (य० वा० सं० १, १६)।

‡ निघ० ५अ० ६ख० (८); १भा० ४६०, ४६२४० ।

§ द्वादशस्वादित्येष्वयं तृतीयः; दिनाद्ययामान्यस्तृतीयांशोऽस्याधिकृतः।

वा ईरयतेः गत्यर्थस्य; वायुना ह्ययं सुष्ठु ईर्यते प्रेर्यत इत्यर्थः॥

"तस्य एषा भवति" प्राधान्यस्तुतिः— ॥ ३ (१४) ॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ उद्वहन्ति तं जातवेदसं रश्मयः केतवः सर्वेषां भूतानां दर्शनाय सूर्यमिति (क मन्य मादित्यादेव मवक्ष्यत[†]) तस्यैषापरा भवति ॥ ४(१५) ॥

"उदु त्यं जातवेदसम्"—इति[‡]। प्रस्कण्वस्यार्षम् । आश्विने विनियोगः। यम् 'उद्वहन्ति' उदय मुपनयन्ति 'जातवेदसम्' इति 'सूर्यं' 'केतवः' "रश्मयः" अश्वा वा य मुद्वहन्ति, "सर्वेषां भूतानां" 'दृशे' "दर्शनाय" सूर्यम्, तं वय मभिप्रेतार्थसिद्धयेऽभिष्टुमः ॥

"तस्य एषा अपरा भवति"—। सा पुनः किमर्थम्? जातवेदसं सूर्य मिति श्रवणात्संदेहः,—किं मियं जातवेदस्युत सौरीति? परा त्वसंशय मेव सौरीति परां निजगाद[§] ॥ ४ (१५) ॥

---

* न हि तेजसां स्वाधीनगतिरस्ति; अपि वायुसहायैवेति सूर्यकराणां यद्-स्थान् प्रति आगमनं तद्वायुप्रेरित मेवेति भावः।

† नास्त्येतत् क-ख-ग-पुस्तकेषु ।

‡ ऋ० सं० १, ४, ७, १ । य० वा० सं० ७,४१ । सा० सं० छ० आ० १,१,२,१०

§ जातवेदसशब्दस्याग्नावपि दृष्टेः। तथा च द्रष्टव्यम् पुरस्तात् (२भा० ३९३ – ३९८ पृ०) ७अ० ५पा० १—२ख० ।

चित्रं देवाना मुदगादनीकं चक्षुर्मित्रस्य वरुण-
स्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च॥ चायनीयं देवाना मुदगमदनीकं
ख्यानं मित्रस्य वरुणस्याग्नेश्चापूपुरद् द्यावापृथिव्यौ
चान्तरिक्षञ्च महत्त्वेन (तेन*) सूर्य आत्मा जङ्गमस्य
च स्थावरस्य चाथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति†
तस्यैषा भवति॥ ५ (१६)॥

"चित्रं देवानाम्"—इति ‡। कुत्सस्यार्षम्। आश्विने विनि-
योगः। 'चित्रं' "चायनीयं" पूजनीयम्। किं पुनस्तत्? 'देवानां'
रश्मीनां यदेतत् 'उदगात्' 'अनीकं' समूहः। किमस्य? 'चक्षु-
र्मित्रस्य वरुणस्याग्नेः' एतस्मिन् मित्रस्य वरुणस्य अग्नेश्च चक्षुः
"ख्यानम्" इत्यर्थः। य एषः सूर्यः 'आत्मा' "जङ्गमस्य च
स्थावरस्य च" सर्वभूतानुप्रवेशी 'आप्राः' "आपूपुरत्" आपूरयति
"द्यावापृथिव्यौ" च "अन्तरिक्षञ्च" महत्त्वेन सूर्य आत्मा। एत-
स्मिन् मित्रवरुणाग्न्यादीनां देवतानां ख्यान मनेन सूर्यात्मना; य
एतान् मित्रप्रभृतीन् पश्यति, स साधु पश्यतीत्यभिप्रायः। विज्ञायते

---

* नास्त्येतत् क-ख-ग-पुस्तकेषु।

† "पूषा भवति" क।

‡ ऋ० सं० १, ८, ७१। य० वा० सं० ७, ४२।

हि रहस्यब्राह्मणे—"य एष सूर्य आत्मा जगतस्तस्थुषश्चेति एतद्धि-
ह्वैवोपेक्ष्यम्"—इति* ॥

भेदपक्षे तु मित्रप्रभृतीनां एतच्चक्षुरिति याज्ञिकपक्षे चक्षुषा ते पश्यन्तीति। तत्रापि विज्ञायते हि—"एष वै विश्वेषां देवानां चक्षुः"—इति † ॥

"अथ" "यद्" यदा "रश्मिपोषम्" आपूर्णस्तेजसा रश्मीन् सूर्यः "पुष्यति" विभर्त्ति, "तत्" तदैव "पूषा भवति" ‡ ॥

"तस्य एषा भवति"—॥ ५ (१६) ॥

शुक्रन्ते अन्यद्यजतन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ शुक्रन्ते अन्यल्लोहितन्ते अन्यद्यजतन्ते अन्यद्यज्ञियन्ते अन्यद्विषमरूपे§ ते अहनी कर्म द्यौरिव चासि सर्वाणि प्रज्ञानान्यवस्यन्नवन् भाजनवती|| ते पूषन्निह दत्तिरस्तु तस्यैषापरा भवति ॥ ६(१७)॥

---

* "य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः॥"—इति बृ० आ० ३, ७, ९।

† "तच्चक्षुर्देवहितम्"—इति (य० वा० सं० ३६, २४) च मन्त्रो द्रष्टव्यः।

‡ द्वादशस्वादित्येष्वसौ चतुर्थः ; दिनद्वितीययामाद्यतृतीयांशकालोऽस्याधिकृतः।

§ "शुक्रन्तेऽन्यल्लोहितन्तेऽन्यद्यजतन्तेऽन्यद्यज्ञियन्तेऽन्यद्विषमरूपे"—इति ख।

|| "प्रज्ञानान्यवस्यं सर्वं भाजनवती"—इति क।

"शुक्रन्ते अन्यत्"—इति*। भरद्वाजस्यार्षम्। चातुर्मास्येषु विनियोगः, पौष्णे हविषि। हे 'पूषन्!' 'शुक्रम्' 'अन्यत्' 'ते' तव रूपं यल्लोहितम्, अन्यत्तव रूपं शुक्लेन व्यपदेशात्सामर्थ्याल्लोहितादि। 'यजतं' "यज्ञियं" यज्ञार्हम्, अन्यत् अयज्ञिय मयज्ञार्ह मन्यत्। भगांशरूपेण हि नाय मिज्यते; विज्ञायते हि—"तस्मादेतौ भगांशौ यज्ञेन यजन्ते"—इति। किञ्च 'विषुरूपे' भवतः, एते शुक्लकृष्णे रूपे 'अहनी' अहोरात्रे; कर्मणा—उदयेन शुक्लमहः करोषि, अस्तमयेन कृष्णम्। 'द्यौरिवासि' यथा द्यौरावृत्य सर्वं वर्त्तते, एवं त्व मपि†। किञ्च 'विश्वाः हि मायाः' सर्वाः प्रज्ञाः प्रज्ञावतां त्वम् 'अवसि' पालयितृत्वात्पालयसि। उद्यन् अनुगच्छसि हे 'स्वधावः' "अन्नवन्"! पूषन्! यन्त्वा मेवमादिगुणयुक्त मद्राक्ष्म, तव तस्य 'भद्रा' भन्दनीया स्तुत्या 'रातिः' दानम् 'इह' अस्मिन् कर्मणि अस्मान् प्रति 'अस्तु'।—इत्येतदाशास्महे॥

"तस्य एषा अपरा भवति"। सा पुनः किमर्थम्? इति,—पथिरचितृत्वे पूष्णोऽधिकारः, तत्परिप्रख्यापनार्थम्। अथ वा "इयं वै पूषा"—इति‡ विज्ञायते, तद्व्युदासार्थम्॥ ६ (१७)॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम्। स नो रासच्छुरुधश्चन्द्राग्रा धियन्धियं सीष-

---

* ऋ० सं० ४, ८, २४, १। सा० सं० उ० आ० १, २, २, २।

† एवञ्च पृथिव्याः सर्वत एव सूर्यज्योतिः सदैव विद्यत इति सिद्धम्।

‡ निघ० १अ० १ख० (१०); १भा० ४९०, ४९१पृ०।

धाति प्र पूषा॥ पथस्पथोऽधिपतिं वचनेन कामेन कृतोऽभ्यानडर्क* मभ्यापन्नोऽर्क मिति वा स नो ददातु चायनीयाग्राणि धनानि कर्मकर्म च नः प्रसाधयतु पूषेत्यथ यद्विषितो भवति तद्विष्णुर्भवति विष्णुर्विशतेर्वा व्यश्नोतेर्वा तस्यैषा भवति॥७(१८)॥

"पथस्पथः परिपतिम्"—इति[†]। ऋजिश्वन आर्षम्। पौष्णे हविषि पञ्चमेऽहनि व्यूढे विनियोगः। 'पथस्पथः' सर्वमार्गाणामित्यर्थः। किम्? इति—'परिपतिम्' "अधिपतिं" 'वचस्या' "वचनेन" स्तुत्या 'कामेन' स्वेन; पूषणं कामेनैव प्रत्यभिमुखीकृत्य 'अर्कम्' अहम् 'अभ्यानट्' स्तुत्या कामप्राप्त्यर्थ मभिव्याप्नोति। सोऽभिव्याप्तः सन् नोऽस्मभ्यं 'रासत्' "ददातु"। किम्? 'शुरुधश्चन्द्राग्राः' शुचं संरुन्धन्ति यानि धनानि, "चायनीयाग्राणि" अभिपूजितागमानि धर्म्य आगमो येषाम्। किञ्च तैर्द्धनैर्द्धनैर्लब्धैः 'धियंधियं सीषधाति' साधयति 'प्रपूषा' "कर्मकर्म" अस्माकं इष्टि-पशु-सोमादिलक्षणं[‡] प्रसाधयतु पूषा, यागायाविघ्नेनोपनामयतु इत्यर्थः॥

"अथ" "यद्" यदा "विषिः" व्याप्तोऽय मेव सूर्यो रश्मिभिः "भवति", "तत्" "तदा" विष्णुर्भवति। "विशतेर्वा" यदाविष्ट

---

* "कृतोऽभ्यानलर्के" क, ख, ग।

† ऋ० सं० ७, १, ८, ८। य० वा० सं० ३४, ४१।

‡ प्रकृतिस्त्रिविधः, होत्र मिष्टिः सोमश्चेति"—इत्युक्तं महीधरेण (य० वा० सं० १, १)। इष्टिसोमयोरेकत्व मेव; इह तु तक्रकौण्डिन्य-न्यायो द्रष्टव्यः।

प्रविष्टः, सर्वतो रश्मिभिर्भवति* तदा विष्णुर्भवति। "व्यश्नोतेर्वाः" विपूर्वस्य वाश्नोतेः; यदा रश्मिभिरतिशयेनायं व्याप्तो भवति, व्याप्नोति वा रश्मिभिरयं सर्वम्, तदा विष्णुरादित्योभवति† ॥

"तस्य एषा भवति"—॥ ७ (१८) ॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूळ्ह‡ मस्य पांसुरे§ ॥ यदिदं किञ्च तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं (त्रेधाभावाय||) पृथिव्या मन्तरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसी-त्यौर्णवाभः समूळ्ह¶ मस्य (पांसुरे**) प्यायनेऽन्तरिक्षे पदं न दृश्यते ऽपि†† वोपमार्थे स्यात्समूळ्ह‡‡ मस्य पांसुल§§ इव पदं न दृश्यत इति पांसवः|||| पादैः सूयन्त

* "सर्वतो रश्मिर्भवति"—इति क।

† द्वादशस्यादित्येष्वयं पञ्चमः; दिनद्वितीययाममध्यवर्तीयांशकालोऽस्याधिकृतः।

‡ "समूळ्ह" क। "समूढ" ख।

§ पांसुरे" क, ख, ग।

|| नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

¶ "समूढ" च-प्रभृतिषु।

** नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

†† "दृश्यते। अपि" च-प्रभृतिषु।

‡‡ "स्यात्समूढ" च-प्रभृतिषु।

§§ "पाँसुल" च-प्रभृतिषु।

|||| "पाँसवः" च-प्रभृतिषु।

इति वा पन्नाः शेरत इति वा पिंशनीया* भवन्तीति वा ॥ ८ (१९) ॥

॥ इति निरुक्तौ द्वादशाध्यायस्य द्वितीयः पादः ॥१२.२.

"इदं विष्णुः"—इति †। मेधातिथेरार्षम्। प्रायश्चित्ते आज्यासादने च विनियोगः। यदिदं किञ्चिद्विभागेनावस्थितं तद्विक्रमते विष्णुरादित्यः। कथ मिति? यत आह—'त्रेधा नि दधे पदम्' "निधत्ते पदम्" निधानं पदैः। क्व? तत्र तावत्—"पृथिव्या मन्तरिक्षे दिवीति शाकपूणिः"। पार्थिवोऽग्निर्भूत्वा पृथिव्यां यत्किञ्चिदस्ति तद्विक्रमते, तदधितिष्ठति; अन्तरिक्षे विद्युतात्मना; दिवि सूर्यात्मना। यदुक्तम्—"त मू अकृण्वन् त्रेधा भुवे कम्"—इति ‡। "समारोहणे" उदयगिरावुद्यन् पद मेकं निधत्ते; "विष्णुपदे" मध्यन्दिनेऽन्तरिक्षे; "गयशिरसि" अस्तङ्गिरौ।—"इत्यौर्णवाभः" आचार्यो मन्यते एवम्§। "समूळ्ह मस्य पांसुरे"। अस्मिन्

* "पंसनीया" च-प्रभृतिषु।

† ऋ० सं० १, २, ७, २; य० वा० सं० ५, १५; सा० सं० उ० आ० ८, २, ५, २; अथ० सं० ७, २६, ४। वैष्णवोपांशुयाजस्येदं विष्णुरित्येषानुवाक्या (आ० श्रौ० सू० १, ६.), गार्हपत्याहवनीययोर्मध्ये आतिक्रमणेऽनयैव अपदेषु भस्म प्रक्षिपेत् (आ० श्रौ० सू० २, १०); आतिथ्यायां प्रधानस्य हविषः एषैवानुवाक्या (आ० श्रौ० सू० ४, ५.); उपसत्सु वैष्णवस्यैषैवानुवाक्या (आ० श्रौ० सू० ४, ८.)।

‡ ऋ० सं० ८, ४, ११, ५। पुरस्तात् ७अ० ७पा० ६ख० (२भा० ४२९पृ०) द्र०।

§ समारोहणादिपदानामुदयगिर्य्यादि व्याख्यानं न वैदिकाना मभिमतम्; वेदेषु, वेदाङ्गादिषु वा क्वचिदपि तथानुपलब्धेः; न हि क्वापि उदयगिर्यादि-शब्दा अप्युपलभ्यन्ते।

"प्यायने" एतस्मिन् "अन्तरिक्षे" सर्वभूतवृद्धिहेतौ यन्मध्यन्दिनं "पदम्" विद्युदाख्यम्, तत् 'समूल्हम्' अन्तर्हितं "न" नित्यं "दृश्यते"। तदुक्तम्—"स्वप्न मेतन्मध्यमं ज्योतिरनित्यदर्शनम्"—इति *। "अपि वोपमार्थे स्यात्,—समूल्ह मिव पांसुले पदं न दृश्यत इति" यथा पांसुले प्रदेशे पदं न्यस्त मुत्क्षेपणसमनन्तर मेव पांसुभिराकीर्णत्वात् न दृश्यते, एव मस्य मध्यमं विद्युदात्मकं पद माविष्कृतिसमकाल मेव व्यवधीयते, नावतिष्ठत इत्यर्थः ॥

"पांसुरे"—इति रो मत्वर्थः।—। अथ "पांसवः" कस्मात्? ते हि "पादैः सूयन्ते" अन्यन्त इत्यर्थः; अथ वा "पन्नाः शेरत इति"; अथ वा "पिंशनीयाः" ध्वंसनीयाः ध्वंसनार्हाः ते "भवन्ति" तदाकीर्णस्य दुर्दृशीकत्वात् † ॥ ८ (१८) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ सप्तदशस्य (द्वादशस्य) अध्यायस्य द्वितीयः पादः ॥ १२ । २ ॥

---

* पुरस्तात् ४अ० १पा० ३ख० (३भा० १८पृ०) द्रष्टव्यः। तत्र टीप्पन्यां प्रकाशितः पाठ एवात्र उद्धृतः († द्र०)।

† "विष्णुस्त्रिविक्रमावतारधारी 'इदं' प्रतीयमानं सर्वं जगत् उद्दिश्य 'विचक्रमे' विशेषेण क्रमणं कृतवान्। तदा 'त्रेधा' त्रिभिः प्रकारैः 'पदं निदधे' स्वकीयं पादं क्षिप्तवान्। 'अस्य' विष्णोः 'पांसुरे' धूलियुक्ते पादस्थाने 'समूढम्' इदं सर्वं जगत् सम्यगन्तर्भूतम्"—इति पुराणसम्मतं सायणीयव्याख्यानञ्च वैदिकानां नादरणीयम्; यास्कानुक्तेः; अवतारशब्दस्यापि वेदेऽदर्शनाच्च।

॥ तृतीयः पादः ॥

विश्वानरो व्याख्यातस्तस्यैष निपातो भवत्यैन्द्र्यामृचि ॥ १ (२०) ॥

"विश्वानरः" वक्तव्यः *। स पुनरेषः "व्याख्यातः" अभिधानव्युत्पत्तितः,—"प्रत्यृतः सर्वाणि भूतानि"—इति †; इह तु नियमतो द्युस्थानः ‡ ॥

"तस्यैष निपातो भवत्यैन्द्र्यामृचि"—॥ १ (२०) ॥

विश्वानरस्य वस्पतिमनानतस्य शवसः। एवैश्च चर्षणीनामूती हुवे रथानाम् ॥ विश्वानरस्यादित्यस्यानानतस्य शवसो महतो बलस्यैवैश्च कामैरयनैरवनैर्वा चर्षणीनां मनुष्याणामूत्या च पथा§ रथानामिन्द्रमस्मिन् यज्ञे ह्वयामि वरुणो व्याख्यातस्तस्यैषा भवति ॥ २(२१) ॥

"विश्वानरस्य वस्पतिम्"—इति ‖। "आ त्वा रथं यथोतये"—इत्येस्मिन्नैन्द्रे सूक्ते प्रियमेधेन दृष्टे निष्केवल्ये विनियोगः। 'विश्वान-

---

* निघ० ५अ० ६ख० (१२); १भा० ४९०, ४९२पृ०।

† पुरस्तात् ७अ० ६पा० १ख० (३भा० २९८पृ०)।

‡ द्वादशस्वादित्येष्वयं षष्ठः; द्वितीययामान्त्यतृतीयांशः कालोऽस्याधिकृतः।

§ "यथा" च।

‖ ऋ० सं० ६, ५, १, ४; सा० सं० क० आ० ४, १, ३, ५।

रस्य' "आदित्यस्य", "अनानतस्य", 'शवसः' अनानतज्योतिर्बलस्य अनभिभूतप्रकाशस्यान्यैर्ज्योतिर्भिः बलपतिं पातारं रक्षितार मिन्द्रम् अस्मिन् यज्ञे 'वः' युष्माक मर्थसिद्धये आह्वयामः । केन ? इति— "एवैश्च" "कामैरयनैः" 'चर्षणीनां' "मनुष्याणाम्" "अवनैः" गमनैः तं प्रति निमित्तभूतैः। (ऊती) 'ऊत्या च' "पथा" येन मार्गेण रंहणा रश्मय इमं लोक मागच्छन्ति, तेन पथा भवता मह मिन्द्र माह्वयामि ॥

"विश्वानरस्य वस्पतिम्"—इति पतिशब्देनेन्द्रवाचिना व्यपदेशात् षष्ठ्यन्तस्य विश्वानरशब्दस्य द्युस्थानवाचित्वे* सामर्थ्य मुपपद्यते† ॥

"वरुणः"‡, "व्याख्यातः" निर्वचनात्§ ; इत्यादित्यः|| ॥

"तस्य एषा भवति"— ॥ २ (२१) ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि ॥ भुरण्युरिति क्षिप्रनाम भुरण्युः शकुनिर्भूरि मध्वानं नयति स्वर्गस्य लोकस्यापि वोढा¶ तत्सम्पाती भुरण्युरनेन पावक ख्यानेन । भुरण्यन्तं

---

* "द्युस्थानवाचित्वेन"—इति क।

† विश्वानरविवरणं तु सप्तमस्य षष्ठे पादे (१—९ख०) सवैस्त एवोक्तम् द्रष्टव्यम्।

‡ निघ० ५अ० ६ख० (१२); १भा० ४९०, ४९३पृ० ।

§ पुरस्तात् १०अ० १पा० ३ख० (७१पृ०)।

|| द्वादशस्वादित्येष्वयं सप्तमः; तृतीययामस्याद्यतृतीयांशोऽस्याभिव्यक्तः कालः।

¶ "वोल्हा" क, ख, ग।

जनाँ अनु*। त्वं वरुण पश्यसि। तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्याम्॥ ३ (२२)॥

"येना पावक चक्षसा"—इति†। प्रस्कण्वस्यैता: सर्वा आर्षम्। आश्विने विनियोग:। "भुरण्युरिति क्षिप्रनाम"‡। 'भुरण्यु:' क्षिप्रगामी "शकुनि:"। स पुनरय मेव योऽधियज्ञे अग्निश्चीयते स सुपर्ण:। विज्ञायते हि—"स्वर्गाय वै लोकायाग्निश्चीयते"—इति§। "तत्स्यातौ" तेन युक्तोऽग्निचिदुपात्तापूर्वसम्भार:। स्वर्गं लोकं प्रति तदेव शीघ्रं य: पतति, गन्तु मिच्छति, स भुरण्यति। हे भगवन्! 'वरुण'! 'पावक' पावयित:! 'येन' "ख्यानेन" दर्शनेन अनुग्राहकेण 'त्वं' पुण्यकृतो 'जनाननु भुरण्यन्तं' पूर्वेषां पुण्यकृतां मार्गेण देवयानेन क्षिप्रं गच्छन्त मनु पश्यसि। किं तस्य दर्शनस्येति अपरिसमाप्तं वाक्य मिति यद्वृत्त मपेक्ष्य तद्वृत्त मध्याजहार||। "तत्ते" दर्शन मनुग्राहकं "वयं स्तुम:"—इति वाक्यशेष:॥

"अपि वोत्तरस्याम्"। अपि चैवं यथोक्त मपि चैव मन्यथा स्यात्। कथ मिति? यथोत्तरा ऋक्, तथापि सहैकवाक्यतोपेक्ष्या। कथम्? इति, यत: पुन: पठति—॥ ३ (२२)॥

---

* "जनां अनु" क, ख, ग।

† ऋ० सं० १, ४, ७, ५; सा० सं० आर० आ० ५द० ११।

‡ निघ० २अ० १५ख० (१४); १भा० २५७, २११पृ०।

§ अग्निचयनप्रकरणम् (य० वा० सं० ११—१७, १७), तद्व्याख्यानपरं शतपथब्राह्मणञ्च (६—११) द्रष्टव्यम्। सुपर्णबोधाय तु "सुपर्णोऽसि"—इति (य० वा० सं० १२, ४), एतद्व्याख्यानञ्च महीधरीयं द्रष्टव्यम्।

|| अतएव "यत्तदोर्नित्यसम्बन्ध:"—इति सिद्धान्तवाक्यम्।

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि ॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः । पश्यञ्जन्मानि सूर्य ॥ व्येषि द्यां रजश्च* पृथु महान्तंल्लोक† महानि च मिमानो अक्तुभो‡ रात्रिभिः सह पश्यञ्जन्मानि§ जातानि सूर्यापि वा पूर्वस्याम् ॥ ४ (२३) ॥

"येना पावक"—इति‖ । 'येन' हे 'पावक' ! 'वरुण' ! ('चक्षसा') "ख्यानेन" 'जनां अनु भुरण्यन्तं पश्यसि',—तेनैव ख्यानेन तयैव ख्यात्या प्रज्ञया युक्तस्त्वं 'वि द्यां मेषि' विविध मेषि अतिशयेन वा एषि । किं मेषि ? द्युलोकम् । 'रजः' "च" 'पृथु' "महान्तं लोकम्" अन्तरिक्षम् । किं कुर्वाणः ? ('अहा') "अहानि" च 'मिमानः' कुर्वन् 'अक्तुभिः' "रात्रिभिः" "सह" "पश्यन्" च 'जन्मानि' "जातानि" सर्वभूतान्यनुग्राहकत्वेन 'सूर्य!'¶ ॥

---

* "द्यां रजश्च" ख, ग ।

† "महान्तं लोकं" क, ख, ग ।

‡ "मिमानोऽक्तुभी" ख ।

§ "पश्यन् जन्मानि" क ।

‖ पूर्वैवैषा (२८५ पृ०), "विद्या मेषि (ऋ० सं० १, ४, ७, ९ ; सा० स० आर० आ० ५द० १२)"—इत्युत्तरया एकवाक्यतया व्याख्यानप्रदर्शनायेह पुनरुक्ता ।

¶ हे सूर्य! त्वं विस्तीर्णं रजो लोकम् । लोका रजांस्युच्यन्त इति यास्कः । कं लोकम् ? द्याम् अन्तरिक्षलोकम् । व्येषि विशेषेण गच्छसि । किं कुर्वन् ? अहानि अक्तुभिः रात्रिभिः सह मिमानः उत्पादयन् । आदित्यगत्यधीनत्वादहोरात्रविभागस्य । तथा जन्मानि जननवन्ति भूतजातानि पश्यन् प्रकाशयन् ॥"—इति सा० भा० ।

अपिवोत्तरस्या मेकवाक्यता स्यात्, "अपि" तर्हि "पूर्वस्याम्" अणुपेक्ष्या। कथम् ? इति, यतः पठति—॥ ४ (२३) ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि॥ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् प्रत्यङ् विश्वं स्वर्दृशे॥ (प्रत्यङ्ङिदं सर्व मुदेषि*) प्रत्यङ्ङिदं सर्व (मिदा) मभि विपश्यसीत्यपि वैतस्या मेव॥ ५ (२४)॥

"येना पावक"—इति। हे 'वरुण!' 'पावक!' 'येन' "ख्यानेन" यथैवानुग्रहबुध्या 'जनान् अनु भुरण्यन्तं पश्यसि',—तथैव ख्यात्या प्रज्ञया युक्तः 'प्रत्यङ् देवानां' या विशस्ताः कृत्वा पुरस्तात्तासाम् 'उदेषि' 'मानुषान्' चैव मेव प्रत्यङ् कृत्वा तेषा मपि पुरस्तादेव उदेषि। किं बहुना हे 'स्वः' आदित्य! 'प्रत्यङ्' "इदं सर्वम्" आत्मनः कृत्वा पुरस्तादुद्यन् "सर्व मभिविपश्यसि"§॥

---

* नास्त्येषोंऽशः क-ख-ग-पुस्तकेषु।

† नास्त्येतत् पदम् घ-प्रभृतिषु।

‡ एषापि सैव; एतत्पूर्वया "प्रत्यङ् देवानाम् (ऋ० सं० १, ४, ७, ५; सा० स० आर० आ० ५द० १०)"—इत्येतयैकवाक्यतया व्याख्यानप्रदर्शनायेदोक्ता।

§ "एतदुक्तं भवति।—लोकत्रयवर्त्तिनो जनाः सर्वेऽपि स्वस्वाभिमुख्येन सूर्यं पश्यन्तीति। तथा चाम्नायते,—'तस्मात् सर्व एव मन्यते मां प्रत्युदगात्'—इति।"—इति सा० भा०।

न चेत्पूर्वस्या मुत्तरस्यां वा एकवाक्यता स्यात् "अपि" तर्हि "एतस्या मेव"—॥ ५ (२४) ॥

येना॑ पावक॒ चक्ष॑सा भुर॒ण्यन्तं॒ जनाँ॒ अनु॑। त्वं व॑रु॒ण॒ पश्य॑सि॥ तेन नो जनानभिविपश्यसि केशी केशा रश्मयस्तैस्तद्वान् भवति का॑शनाद्वा (प्रकाशनाद्वा*) तस्यै॑षा भव॑ति ॥ ६ (२५) ॥

कथमिति? यतः पुनः पठति।— "येना॑ पावक॒"—इति†। हे "पावक" वरुण! येन ख्यानेन यथैवानुग्राहकप्रज्ञया 'जनाननु भुरण्यन्तं पश्यसि त्वम्' पुण्यकारिणः, तेनैव ख्यानेन तथैवानुग्रहकारकबुद्ध्या अस्माकं जनानभि विपश्यसि‡॥

को विशेषः प्रथमादध्याहारात्? प्रथमे हि तन्त्रे वयं स्तुम इति स्तुत्या परिसमापितम्; इह पुनराशिषा। "तेन नो जनानभिविपश्यसि"; स्तुत्याशिषोः सम्बन्धनित्यत्वाद्वाक्यस्य। एष साकाङ्क्षाणां मन्त्राणा मेकवाक्यताप्रकार उपप्रदर्शितः§॥

"केशी"—इति‖ वक्तव्यम्। अत्र "केशा रश्मयः, तैस्तद्वाना-

---

* नास्त्येतत् क-ख-ग-पुस्तकेषु।

† सा एवैषा (२८५, २८७. २८८ पृ०)।

‡ "जनानभिविपश्येति"—इति ख-ह०-पु०-पाठः।

§ "पावक! सर्वस्य शोधक! वरुण! अनिष्टनिवारक! सूर्य! त्वं जनान् जातान् प्राणिनः भुरण्यन्तं धारयन्तं पोषयन्तं वेमं लोकं येन चक्षसा प्रकाशेनानुपश्यसि अनुक्रमेण प्रकाशयसि। तं प्रकाशं स्तुम इति शेषः। यद्वा उत्तरस्या अपि सम्बन्धः—तेन चक्षसा व्येषीति।"—इति सा० भा०।

‖ निघ० ५ अ० ६ ख० १४ (१ भा० ४९०, ४९२ पृ०)।

दित्यः” यो मध्यन्दिने भवति । “काशनाद्वा” प्रकाशनादित्यर्थः । रश्मयोऽपि केशाः, काशनादेव ॥

“तस्य एषा भवति”—॥ ६ (२५) ॥

केश्य१ग्निं केशी विषं केशी बिभर्त्ति रोदसी । केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥ केश्यग्निं च विषञ्च विष मित्युदकनाम विष्णातेर्विपूर्वस्य (स्नातेः शुद्ध्यर्थस्य विपूर्वस्य*) वा सचतेर्द्यावापृथिव्यौ च धारयति केशीदं सर्व मिद मभिविपश्यति केशीदं ज्योतिरुच्यत इत्यादित्य माहाथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्नी रजसा च मध्यमस्तयोरेषा भवति† ॥ ७ (२६) ॥

“केश्य१ग्निम्”—इति ‡ । जूतेरार्षम् । ‘केश्यग्निं बिभर्त्ति’ वर्षणोदकेनौषधीरभिनिष्पादयन्नाहुतिद्वारेण ‘केशी विषं बिभर्त्ति’ । “विष मुदकम्” §; “विष्णातेर्विपूर्वस्य स्नातेः शुद्ध्यर्थस्य ||, विपूर्वस्य वा सचतेः” ¶; सर्वत्र ह्यतिशयेन यत्सक्त मिति, तदपि केशी

---

* नास्त्येषोंऽशः क-ख ग-पुस्तकेषु ।

† “मध्यमस्तेषां मेषा साधारणा भवति”—इति च-प्रभृतिषु ।

‡ ऋ० सं० ८, ७, २४, १ । अथानुक्रमणी—“केशी मुनयो वातरशना जूतिर्वातजूतिर्विप्रजूतिर्वृषाणकः करिक्रत एतश ऋष्यशृङ्गश्चैकर्चाः कैशिनम्”—इति ।

§ निघ० १ ख० १२ ख० १५ (१भा० ९६, १०२ पृ०) ।

|| “ष्णा शौचे”—इति धा० पा० अदा० प० ४१ ।

¶ “षच सेचने सेवने च”—इति धा० पा० भ्वा० आ० १६३ ।

बिभर्त्ति। 'रोदसी' अपि च केश्येव बिभर्त्ति तन्निवासीनि भूतानि अनुगृह्णाति। अपि चायं स्वरादित्यः 'केशी विश्व मिदम्' "सर्व मिदम् अभिविपश्यति" यथाभि द्रष्टव्यम्। कोऽयं केशीति? यत आह दर्शयन्नेवादित्यम्—"केशीदं ज्योतिरुच्यते"—इति * ॥

अतः परं विचारः।—"अथाप्येते इतरे ज्योतिषी" प्रथम-माध्यमिके "केशिनी उच्येते"। तत्र तावत् "धूमेनाग्निः" केशी; स हि तस्य प्रकाशनाय निरूढस्यापि भवति। "रजसा च मध्यमः"; असावप्यमूर्त्तत्वात् अप्रकाशः सन् रजसोद्भूतेन प्रकाशते—असौ वायु रागच्छतीति;— उदके न च वैद्युतः † ॥

"तेषां" त्रयाणा मपि केशिनाम् ‡ "एषा" साधारण्येन प्रधानस्तुतिः "भवति"—॥ ७ (२६) ॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम्। विश्व मेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम्॥ त्रयः केशिन ऋतुथा विचक्षते काले-

---

* द्वादशस्वादित्येष्वय मष्टमः; दिनतृतीययाममध्यतृतीयांशः कालोऽस्याधिकृतः।

† "केशाः केशस्थानीया रश्मयः, तद्वन्तः केशिनः, अग्निर्वायुः सूर्यश्च एते त्रयः।" —इति सा० भा०। अस्मन्मते तु अग्निर्विद्युत्सूर्यश्चेत्येत एव त्रयः केशिनः; एषा मेव रश्मियुक्तत्वात्। किन्त्वेव ज्योतिस्त्वं मुख्यम्। अग्निः पार्थिवः केशी, विद्युत् मध्यमः, सूर्य उत्तम इति।

‡ निघ० ५अ० ६ख० १५ "केशिनः" (१भा० ४९०, ४९२पृ०)।

कालेऽभिविपश्यन्ति संवत्सरे वपत एक एषा मित्यग्निः पृथिवीं दहति सर्व मेकोऽभिविपश्यति कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्याथ यद्रश्मिभिर-भिप्रकम्पयन्नेति तद्वृषाकपिर्भवति वृषाकम्पनस्तस्यैषा भवति ॥ ८ (२७) ॥

"त्रयः केशिनः"—इति *। दीर्घतमस आर्षम्। महाव्रते वैश्वदेवे शस्यते। य एते 'त्रयः' 'केशिनः' अग्निवायुसूर्याः 'ऋतुथा' कालेकाले 'विचक्षते' यथाकालम् "अभिविपश्यन्ति" स्वकर्माधि-कारयुक्तेनानुग्रहेण लोक मनुगृह्णन्ति, 'एषाम्' 'एकः' पृथिवी-स्थानः "अग्निः" 'संवत्सरे' "पृथिवीं" 'वपते' "दहति" इत्यर्थः। तथा हि सा कर्मणा सम्पद्यते। "विश्व मेको अभि चष्टे" स्वाधि-कारयुक्तैः "कर्मभिः" "अभिविपश्यति" अनुगृह्णाति "आदित्यः"। "ध्राजिरेकस्य ददृशे"। "गतिरेकस्य" रजसोद्धूतेन पार्थिवेन उद-केन वा "दृश्यते" 'न रूपम्' "मध्यमस्य" † ॥

"अथ यद्रश्मिभिरभिप्रकम्पयन्नेति"। 'अथ' 'यत्' यदा आदित्यः 'रश्मिभिः' उपसंहृतैरुपसम्पन्नैर्भूतानि 'अभिप्रकम्पयन् एति', "तत्"

---

* ऋ० सं० १, ३, ११, ४; अथ० सं० ९, १९, ६ ।

† वायोः विद्युतो वेति भाष्यटीकाकृतः। सायणस्त्वाह—"एकस्य वायोः ध्राजि-र्गतिर्ददृशे दृश्यते सर्वैः, न रूपम्, अप्रत्यक्षत्वात्; स्पर्शशब्दधृतिकम्पलिङ्गैर्गम्यत इति हि न्यायविदो वदन्ति।"—इति ।

तदा "वृषाकपिर्भवति" * वर्षिता चावश्यायानां कम्पनश्च भूतानाम् †; सर्वो हि भगवत्यदृश्ये तद्भयात् कम्पते ‡ ॥

"तस्य एषा भवति"—॥ ८ (२७) ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै । य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र§ उत्तरः ॥ पुनरेहि वृषाकपे सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नान्नाशयस्यादित्य|| उदयेन सोऽस्तमेषि पथा पुनः सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूम आदित्यं यमौ व्याख्यातस्तस्यैषा भवति ॥ ९ (२८)॥

"पुनरेहि वृषाकपे"—इति ¶ । वृषाकपेरार्षम् । पृष्ठ्यस्य षष्ठेऽहनि ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता । हे 'वृषाकपे' भगवन् ! 'यः एषः' त्वं ('स्वप्ननंशनः') स्वप्ननाशनः "स्वप्नान्" "उदयेन" "नाशयसि", "सोऽस्तमेषि पथा पुनः"। यश्च त्वं 'विश्वस्मात्' "सर्वस्मात्" जगतः 'इन्द्रः' ईश्वरः 'उत्तरः' उद्भूततरः, स त्वं 'पुनः'

---

* निरु० ५अ० ६ख० १९ (१भा० ४९०, ४९३पृ०) ।

† द्वादशस्वादित्येष्वयं नवमः; दिनतृतीययामान्त्यतृतीयांशः कालोऽस्याधिकृतः ।

‡ पु० ११अ० ४पा० ५ख० (११८पृ०) १२अ० १पा० ८ख० (२६१पृ०) च द्र० ।

§ "पुनः । विश्वस्मादिन्द्र"—इति च-प्रभृतिषु ।

|| "स्वप्नान्नाशयस्यादित्य" च-प्रभृतिषु ।

¶ ऋ० सं० ८, ४, ४, ६ ।

'एहि' आयाहि, उदयं प्राप्नुहि। तत आवां 'सुविता' ("सुप्रसूतानि") सुप्रवृत्तानि शोभन मर्थं मुद्दिश्य जगतोऽनुग्रह मेतानि शोभनानि "कर्म्माणि" प्रवृत्तानि 'कल्पयावहै' सगुणानि कुर्वः * ;— त्व मुद-येनाह मनुष्ठानेनेति ॥

"यमः" वक्तव्यः †, स पुनः "व्याख्यातः" निर्वचनतः ‡; इह त्वादित्योऽभिधेयः§ ॥

"तस्य एषा भवति"—॥ ९ (२८) ॥

यस्मिन् वृक्षे सुपलाशे देवैः सम्पिबते यमः । अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ यस्मिन् वृक्षे सुपलाशे स्थाने वृतक्षये‖ वापि वोपमार्थे स्याद्वृक्ष इव सुपलाश इति वृक्षो व्रश्चनात्पलाशं पलाशना-द्देवैः¶ सङ्गच्छते यमो रश्मिभिरादित्यस्तत्र नः सर्वस्य पाता वा पालयिता वा पुराणाननुकामयेताजएकपा-

* "इन्द्राणश्च चावा मुभौ पर्य्यालोच्य कुर्याव"—इति सा० भा० ।

† निघ० ५अ० ४ख० १७ (१भा० ४९०, ४९४पृ०) ।

‡ "यमो यच्छतीति सतः" १०अ० २पा० ४ख० (१'४पृ०) ।

§ द्वादशस्वादित्येष्वयं दशमः; दिनान्त्ययामाद्यष्टतीयांशोऽस्याधिकृतः । "सङ्ग-च्छते रश्मिभिरिति अस्तमयावस्थ आदित्य उच्यते"—इति निघण्टुव्याख्याया माह देवराजोऽपि (१भा० ४९४पृ० १पं०) ।

‖ "वृतः क्षये" क ।

¶ "पलासदनाद्देवैः" क; "पलाशदनाद्देवैः" ख, ग ।

इजन एकः पाद* एकेन पादेन पातीति वैकेन पादेन पिबतीति वैकोऽस्य पाद इति वा। एकं पादन्नोत्खिदतीत्यपि निगमो भवति तस्यैष निपातो भवति वैश्वदेव्या मृचि॥ १० (२९)॥

'यस्मिन् वृक्षे सुपलाशे"—इति†। कुमारस्य यामायनस्यार्षम्। 'यस्मिन् वृक्षे' आदित्ये; स हि स्वगत्या कालम् अतिक्रामयन् सर्वभूतानामायूंषि क्षपयति। "वृश्चतीति वृक्षः"। "वृतक्षये वा" पुण्यकृद्भिर्वृते निवासे इत्यर्थः। 'सुपलाशे' सुष्ठु पराशीर्णमले दीप्तिमति 'देवैः' सह "रश्मिभिः" 'सम्पिबते' "सङ्गच्छते" अस्तं गच्छन्नादित्यः। तत्र किमिति? 'अत्र' 'नः' अस्मान् पुण्येन कर्मणा विद्यया च तत्प्रापिकया गतात्मनः 'पुराणान्' इव तन्निवासिनः 'अनु' ('वेनति') वेनतु ("कामयेत") कामयतु सम्प्रीणयत्वित्यर्थः॥

"वृक्षे इव सुपलाशे"—इति, ऐतिहासिकपक्षे स्वर्गस्थ सुपागतानस्मान् सुपलाशवृक्षप्रख्यसुखनिवासे पितृराजो 'यमः' 'पुराणान्' इव तल्लोकनिवासिनः पितॄन् अनु कामयतु। अस्मिन् पक्षे देवैः सम्पिबत इति तदनुचारिणो गृह्यन्ते देवा इति‡॥

---

* "एकपाद" क, ख, ग।

† ऋ० सं० ८, ७, २३, १।

‡ "नचिकेता नाम कुमारो वाजश्रवसेन पित्रा यमलोकं प्रस्थापितः सन् यमं दृष्ट्वा प्रसाद्य पुनरपीमं लोकमाजगाम। अयमर्थ इदमादिकैर्मन्त्रैः प्रतिपाद्यते। यद्वा कुमारो नाम नचिकेतसोऽन्यः कश्चिदृषिः। यच्छतीति यम आदित्यः। तमनेन सूक्तेन तुष्टाव।"—इति सा० भा०।

"अजएकपात्"—इति वक्तव्यम् *। स पुनः अय मादित्यः † नित्यम्, "अजनः" गमनः "एकः" च "पादः" ब्रह्मणः; विज्ञायते हि—"अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः" इति ‡। "एकेन पादेन पातीति वा"। सर्व मिदं जगत् एकेनांशेनानुप्रविश्य पाति रक्षति स्वापकाले प्राणात्मना ऽन्नं पचन्नजनश्चेत्यज एकपात्। "एकेन पादेन पिबतीति वा"। एकेनांशेनोदकं सर्वस्माज्जगतः पिबत्यजनश्चेत्यजएकपात्। अथ "वा" अजनो गमनः, "एकोऽस्यपाद इति" अजएकपात्। जीवभूतोऽस्य कृत्स्ने जगति एकः पादोऽनुप्रविष्टः;

निगमोऽपि हि भवत्येवास्मिन्नर्थे—"एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्। स चेत्त मुद्धरेदङ्ग न मृत्युर्नामृतं भवेत्"। एक मात्मनः पाद मंशं नोत्खिदति नोद्धरति इति आदित्यो हंसः महतस्तमसो वाध्वनो वाहन्ता। कुतः पुनर्नोत्खिदति? 'सलिलात्' सन्मात्रे ब्रह्मणि लीनादेतस्माज्जगतः, 'उच्चरन्' अहन्यहनि उद्यन्नित्यर्थः। 'स चेत्' 'तं' जीवभूत मात्मनः पाद मेतस्मात् जगतः 'उद्धरेत्' ततस्तदुद्धरणसमकाल मेव 'अङ्ग' क्षिप्रं 'न मृत्युर्नामृतं भवेत्'; —सर्व मिद मव्यपदेश्यं सदेव स्यादित्यर्थः §॥

---

* निघ० ५ख० ६ख० १८ (१भा० ४९०, ४९४पृ०)।

† द्वादशस्वादित्येष्वय मेकादशः; दिनान्त्ययाममध्यवर्तीयांशः कालोऽस्याधिकृतः। "अस्तभावस्य आदित्य उच्यते"—इति चाहेह निघण्टुव्याख्यायां देवराजः।

‡ "तदेतच्चतुष्पाद् ब्रह्म वाक् पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवत मग्निः पादः"—इत्यादि छा० ग्रा० ५, १८।

§ द्वादशपाद आदित्यः, तत्र यस्योदये खल्वेकः पादोऽवशिष्येत स एवैकपादिति चाह कश्चित्।

"तस्य एष निपातो भवति" साधारणेन "वैश्वदेव्या मृचि"—॥ १० (२९) ॥

पावीरवी तन्यतुरेकपादजो दिवो धर्त्ता सिन्धुरापः समुद्रियः । विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरन्ध्या ॥ पविः शल्यो भवति यद्विपुनाति कायन्तद्वत्पवीर मायुधन्तद्वानिन्द्रः पवीरवान् । अतितस्थौ पवीरवानित्यपि निगमो भवति । तद्देवता वाक् पावीरवी पावीरवी च दिव्या वाक् तन्यतुस्तनित्री वाचोऽन्यस्या अजश्चैकपाद्दिवो धारयिता (च*) सिन्धुश्चापश्च समुद्रियाः (च†) सर्वे च देवाः सरस्वती च सह पुरन्ध्या स्तुत्या प्रयुक्तानि धीभिः कर्मभिर्युक्तानि शृण्वन्तु वचनानीमानीति पृथिवी व्याख्याता तस्या एष निपातो भवत्यैन्द्राग्न्या मृचि ॥ ११ (३०) ॥

"पावीरवी तन्यतुः"—इति ‡ । वसुकर्णस्यार्षम् । वैश्वदेवे शस्त्रे विनियोगः । "पविः शल्यो भवति" । कस्मात् ? "यद्" "विपुनाति" विदारयति "कायम्" तेन शल्येन "तद्वत् पवीर

---

* "चा"स्त्येतत् पदम् च-प्रभृतिषु ।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु ।

‡ ऋ० सं० ८, १, ११, २ ।

मायुधम्"। रो मत्वर्थे। तेन शल्यवता आयुधेन "तद्वानिन्द्रः पवीरवान्"॥

यथा चैतदेवं तथैव निगमः।—"अतितस्थौ पवीरवान्"—इति। "यो जनान् महिषाँ इव"[*]। विग्रवन्धोरार्षम्। 'यः' इन्द्रः 'महिषान्' अतिमहतोऽप्यसुरजनान् 'युधा' युद्धेन ('अति') अतीत्य 'तस्थौ' 'तिष्ठति' 'पवीरवान्' आयुधवान्। अपि च 'अपवीरवान्' अनायुध इत्यर्थः। सायुधो निरायुधश्च नित्य मसुरजनान् महतोऽपि अतितिष्ठति यः, स इदं मामास्माकं करोत्विति[†]॥

"तद्देवता वाक् पावीरवी" स इन्द्रो यस्या माध्यमिकाया वाचो देवता, सैन्द्री वाक् पावीरवी[‡], 'तन्यतुः' ("तनित्री") तनयित्री "वाचोऽन्यस्याः"। तदुक्तम्—"तां विश्वरूपाः पशवो वदन्ति"। सा च "दिव्या वाक्"; "अजस्यैकपात्[§] दिवो धारयिता"। एतदुच्च द्युस्थानत्वम् अजस्यैकपदः। "सिन्धुश्च" नदः, "आपश्च"

---

* "यो जनान् महिषाँ इवातितस्थौ पवीरवान्। उतापवीरवान् युधा॥"—इति ऋ० सं० ८, १, १४, २।

† "योऽसमातिः, जनान् स्वविरोधिभूतान्, अतितस्थौ अतिक्रम्य तिष्ठति पराभावयतीत्यर्थः। क इव? महिषान् सिंह इव। कीदृशः सन्? पवीरवान्। पवीरः पविः खड्गवान्। उत अपि च अपवीरवान् अपगतखड्गः सन्। शस्त्रसाहाय्य मपि कदाचिन्नापेक्षत इत्यर्थः। उत अपि च किं कुर्वन्? युधा योधनेन, युद्धा इत्यर्थः।"—इति सा० भा०।

‡ "पावीरवीं शंसति; वाग् वै सरस्वती पावीरवी, वाच्येव तद्वाचं दधाति"—इति ऐ० ब्रा० २प० ३ख० ११ख०।

§ "सुरुद्रोऽसि विश्वव्यचा अजोऽस्येकपात्"—इति य० वा० सं० ५, ३३।

समुद्रियाः, 'विश्वे च देवाः' "सर्वे च देवाः" 'शृण्वन्' "शृण्वन्तु" "इमानि वचनानि" स्तुतिलक्षणानि। किं वचनान्येव? किं तर्हि? 'सह धीभिः' "कर्मभिः" हविर्दानयुक्तैः सहितानि। 'सरस्वती' "च" शृणोतु 'पुरन्ध्या' "सह" बहुधाद्या, माध्यमिकया वाचा।— इत्येतदाशास्महे ॥

निर्वचनस्यास्या ऋच्युत्तरे पादे सम्यक् पाठो ऽन्वेष्यः* ॥ "पृथिवी"†, "व्याख्याता"‡। "तस्या एष निपातो भवति" दिवः पृथिव्याः "ऐन्द्राग्न्या ऋचि";— न स्तुत्यत्वेन; किं तर्हि? नैघण्टुकेन केवलम् ॥ ११ (३०) ॥

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ इति सा निगदव्याख्याता समुद्रो व्याख्यातस्तस्यैष निपातो भवति पावमान्यामृचि ॥ १२ (३१) ॥

"यदिन्द्राग्नी परमस्याम्"—इति§। कुत्सस्यार्षम्। हे 'इन्द्राग्नी!' 'वृषणौ' ('यद्') यदि युवां 'परमस्यां पृथिव्यां' द्युलक्षणायाम्,

---

* मदन्वेषणेन न किमपि फलं सम्पन्नम्।

† निघ० ५अ० ६ख० १९ (१भा० ४९०, ४९४पृ०)।

‡ १अ० ४पा० ३ख० २भा० ९४पृ० १८पं० (२भा० ११४पृ०)।

§ ऋ० सं० १, ७, १७, ३।

यदि ('मध्यमस्यां') मध्यमाया मन्तरिक्षे, यदि 'अवमस्याम्' अस्या मेव भूम्याम्, 'उत स्थः', तथापि 'परि आ यातम्' अस्मान् प्रति पर्येत्य । 'अथ सोमस्य पिब तम्' अभिषुतस्य स्व मंश मिति ॥

"समुद्रः"*, "व्याख्यातः"†; इह तु आदित्य इति विशेषः‡ । अत्रापि "समुद्रवन्त्यस्मादापः"—इत्येवमादि तदेव निर्वचनम्§ ॥

"तस्य एषः" समुद्रस्य "निपातो भवति, पावमान्या मृचि",—॥१२(३१)॥

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् । महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥ पवित्रवन्तो रश्मिवन्तो माध्यमिका‖ देवगणाः पर्यासते (माध्यमिकां वाचम्¶)

---

* निघ० ५अ० ६ख० २० (१भा० ४६०, ४६४पृ०) ।

† २भा० १९५पृ० २अ० ३पा० १ख० द्र० ।

‡ द्वादशस्वादित्येष्वय मेव द्वादशः; दिनान्त्ययामान्त्यांशः कालोऽस्याधिकृतः । अत्रेदं विचार्यम् । वृत्तिकृन्मते तु सवितृ-प्रभृतय एव आदित्यपर्यायाः ग्राह्याः; [illegible] समुद्र इति चादित्यस्यैव पर्याय एव । एतदनुसारेणैवेह टीप्पनी च कृता मया । केचित्तु सवितृ-प्रभृति परिगणन मेव कुर्वन्ति (६९पृ०"*" द्र०), तन्मते समुद्र इति तु रजन्यारम्भकालस्य, तदधिकारिणो रजन्यादित्यस्य वा नाम; किन्तु द्वादशाना मेवादित्याना मधिकृतकालानां साम्यं न ते स्वीकुर्वन्ति ।

§ १भा० १९५पृ० (२अ ३पा० १ख०) ।

‖ "माध्यमका" क, ख, ग ।

¶ क-ख-ग-पुस्तकेष्विमे पदे न दृश्येते ।

(मध्यमः*) पितैषां प्रत्नः पुराणोऽभिरक्षति व्रतं कर्म महः समुद्रं वरुणस्तिरोऽन्तर्दधात्यथ धीराः शक्नुवन्ति धरुणेषूदकेषु कर्मण आरभ मारब्धु मज एकपाद्याख्यातः पृथिवी व्याख्याता समुद्रो व्याख्यातस्तेषा मेष निपातो भवन्त्यपरस्यां बहुदेवतायामृचि॥ १३ (३२)॥

"पवित्रवन्तः परि वाचम्"—इति†। पवित्रस्यार्षम्। प्रवर्गे विनियोगः। रश्मयः पवित्रम्, तेऽमुष्मादादित्यमण्डलात् प्रसृताः मध्यस्थाने मरुत्प्रभृतिभिर्देवगणैः संयुज्यन्ते, तत्संयोगात् "माध्यमिका देवगणाः" 'पवित्रवन्तः' ("रश्मिवन्तः") भवन्ति‡। ते च "माध्यमिकां" 'वाचं' 'परि' वार्य 'आसते'। सः 'वरुणः' विद्युदाख्यो मध्यमः, 'पिता' पाता रक्षिता, 'एषां' मरुत्प्रभृतीनां 'प्रत्नः' "पुराणः" 'व्रतं' 'कर्म' तदधिकारयुक्तम् 'अभिरक्षति'। कथमिति? तदुच्यते,—'महः' महान् 'वरुणः' मध्यमः, महान्तं वा 'समुद्रम्' आदित्यं§ मेघजालेन यदा "तिरोदधाति", दुर्दिनं कृत्वा वर्षति ओषधीषु; अथ 'धीराः' धीमन्तः 'धरुणेषु' "उदकेषु"

* नास्त्येतत् पदम् च-प्रभृतिषु।

† ऋ० सं० ७, २, २९, ३।

‡ "पवित्रवन्तः पवित्रेण शोधकेन सामर्थ्येन युक्ताः सोमस्य रश्मयः"—इति सा० भा०।

§ द्वादशतमम्, दिवसाक्षकर मिति यावत्। सायणस्त्वाह—"महः महत्, समुद्रम् अन्तरिक्षनामैतत्; महदन्तरिक्षम्" —इति।

'अक्रुः' "अक्रुवन्ति" "कर्मणः" इत्यादेः, वैदिकस्य वा 'आरभम्' ("आरब्धुम्") प्रारब्धम् इत्येव मभिरचति । तेषां माध्यमिकानां अतं यदि ह्यसावावृणोति मेघैस्ततस्तेषा मधिकारप्रतिलम्भो भवति* ॥

"अजएकपाद्", "व्याख्यातः" † ; इह तूत्तमः‡ ॥

"पृथिवी", "व्याख्याता"§ ॥

"समुद्रः", "व्याख्यातः"|| ॥

"तेषा मेष निपातो भवति" स्तुतिसाधारण्येन "अपरस्यां बहुदेवतायां ऋचि":-॥ १३ (३२) ॥

उत नोऽहिर्बुध्न्यः शृणोत्वजएकपात् पृथिवी समुद्रः । विश्वेदेवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥ अपि च नोऽहिर्बुध्न्यः शृणोत्वजश्चैकपात् पृथिवी च समुद्रश्च सर्वे च देवाः सत्यवृधो वा यज्ञवृधो वा हूयमाना मन्त्रैः स्तुता मन्त्राः कविशस्ता अवन्तु मेधाविशस्ता दध्यङ् प्रत्यक्तो ध्यान मिति वा प्रत्यक्त मस्मिन् ध्यान मिति¶ वाथर्वा व्याख्यातो मनुर्मनना-त्तेषा मेष निपातो भवत्यैन्द्र्या ऋचि ॥ १४ (३३) ॥

---

* सायणमते लेषा सोमस्तुतिः, तद्भाष्यं द्रष्टव्यम् ।

† पुरस्तात् १९५पृ० १पं० ।

‡ एषोक्तिः प्रमादमूलिका, मध्यमस्याजएकपादित्यस्येह क्वाप्यनुपलम्भेः ।

§ पुरस्तात् १९७पृ० ११पं० ।

|| पुरस्तात् १९९पृ० १२पं० ।

¶ "मस्मिन् ध्यान मिति" क, ख, ग ।

"उत नोऽहिर्बुध्न्यः शृणोतु"—इति* । ऋजिश्वन आर्षम् । आग्निमारुते विनियोगः । ('उत नः') अप्यस्माकम् 'अहिर्बुध्न्यः'† 'शृणोतु' । अपि "अजएकपाद्," अपि च 'पृथिवी', अपि च 'समुद्रः', 'विश्वेदेवाः' सर्व एते; एवमादयो देवाः 'ऋतावृधः' "सत्यवृधः", "यज्ञवृधः" उदकवृधो वा 'हुवानाः' आह्वयमानाः मन्त्रैः यजुर्मयैः, 'स्तुताः' च स्तोत्रैः सामभिः, ('कविशस्ताः') कविभिश्च नैघण्टुकत्वेन मेधाविभिः शस्त्रैश्च शस्ताः स्तुतास्तेऽस्मानवन्तु ।—इत्येतदाशास्महे ‡ ॥

"दध्यङ्", "मनुः", "अथर्वा"—इति त्रितयपक्षे आदित्य एवैते तद्गुणयोगाद् भवन्ति§, द्युस्थाने समाम्नानात्; पृथक्त्वे पुनर्द्युस्थानाः तत्सहचारिण एते ऋषयः ॥

"दध्यङ्"||, "प्रत्यक्तो ध्यानम्" प्रतिगतो ध्यान मिति; ध्यानारम्भणे ह्येष उक्तः स मधिकार मनुतिष्ठति । अथ वा "प्रत्यक्त

---

* ऋ० सं० ४, ८, १०, ४ । य० वा० सं० ३४, ५३ ।

† "अहिर्बुध्नः"—इति ख-घ० पु०-पाठः । अहिर्बुध्न्य इति व्याख्यातं पुरस्तात् (१०अ० ४पा० ७ख० १५४पृ०) ।

‡ अस्यापि सायणकृतं व्याख्यान्तरं द्रष्टव्यम् ।

§ तथा च, यथा अहनि क्रमात् द्वादशानां सवित्रादीनां मुदयो वर्णितः; एवं रात्रावपि क्रमात् दध्यङ् (१), अथर्वा(२), मनुः(३), सप्तऋषयः(४), वसवः(५), अश्विनौ (६, ७), उषाः(८), सूर्या(९), वृषाकपायी(१), सरण्युः(११), त्वष्टा(१२);—इति द्वादशाना मिति केषाञ्चित् । त्वष्टुः प्रथमादित्यत्वे इहापि समुद्रादयः सरण्य्वन्ता एव द्वादश रात्रिदेवता इति च बोध्यम् ।

|| निघ० ५अ० ६ख० २१ (१भा० ४९०, ४९४पृ०) ।

मस्मिन् ध्यान मिति वा" अधिकरणं कारकम्; तथा हि तस्मिन् ध्यानकार्यं सफलं लभ्यत इति ॥

"अथर्वा"*, "व्याख्यातः" निर्वचनतः†; न ह्ययं स्वस्मा-दधिकारात् थर्वति; न कदाचित् स्व मधिकारं मुञ्चति ॥

"मनुः"‡, अयं "मननात्"; न हि तदस्ति यदयं न मनुते ॥

"तेषा मेष निपातो भवति ऐन्द्र्या मृचि"—॥ १४ (३३)॥

या मथर्वा मनुष्पिता दध्यङ् धिय मत्नत। तस्मिन् ब्रह्माणि पूर्वथेन्द्र उक्थास मग्मताचन्ननु स्वराज्यम्॥ या मथर्वा च मनुश्च पिता मानवानां दध्यङ् च धिय मतनिषत तस्मिन् ब्रह्माणि कर्माणि पूर्वेन्द्र उक्थानि§ च सङ्गच्छन्ता मर्चन्योऽनूपास्ते स्वाराज्यम् ॥ १५ (३४)॥

॥ इति निरुक्तौ द्वादशाध्यायस्य तृतीयः पादः॥ १२.३.

"या मथर्वा"—इति‖। गोतमस्यार्षम्। षाष्ठिके पञ्चमेऽहनि विनियोग ऐन्द्रे सूक्ते। 'याम्' 'अथर्वा', 'मनुः' "च" 'पिता'

---

* निघ० ५अ० ६ख० ११ (१भा० ४९०, ४९४पृ०)।

† पुरस्तात् ११अ० २पा० ६ख० (१९२पृ०)।

‡ निघ० ५अ० ६ख० २२ (१भा० ४९०, ४९४पृ०)।

§ "तस्मिन् कर्माणि ब्रह्माणीन्द्र उकथानि"—इत्येवं क, ख, ग।

‖ ऋ० सं० १, ५, ११, ६।

"मानवानाम्", 'दध्यङ्' "च" धियम् ('अत्नत') "अतनिषत"। एतद्गुणविशिष्टोऽय मादित्यः, यत्तत्कर्माद्योनिर्वृत्यादिलक्षणं तनोति, 'तस्मिन्' सति 'ब्रह्माणि' "अन्नानि", "उक्थानि" च शस्त्राणि, 'पूर्वथा' पूर्ववत्, 'इन्द्रे'* 'समग्मत' ("सङ्गच्छन्ताम्") समागच्छन्तु यज्ञेषु। किंलक्षणे इन्द्रे? इति, यत आह—'अर्चन्' "यः" इन्द्रः अभिपूजयते "स्वाराज्यम्" "अनु"-"उपास्ते" यथाशास्त्र मनुतिष्ठतीत्यर्थः॥

पृथक्पक्षे आदित्यसहचारिण एते ऋषयः। तदा योज्यम्—य ऋषयः एते कर्म अतनिषत याज्ञम्, तस्मिन् ब्रह्माणि अन्नानि इन्द्रे पूर्ववत् समग्मत समागच्छन्तीति। शेषं समान मेवेति† ॥१५(३४)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ सप्तदशस्याध्यायस्य (द्वादशाध्यायस्य) तृतीयः पादः॥ १२।३॥

॥ चतुर्थः पादः ॥

अथातो द्युस्थाना देवगणास्तेषा मादित्याः प्रथमागामिनो भवन्त्यादित्या व्याख्यातास्तेषा मेषा भवति ॥ १ (३५) ॥

---

* "इन्द्रो"—इति ख-ष्ट०-पु० पाठः।

† सायणेन लेखनपक्षाश्रयेणैव मन्त्रो व्याख्यातः।

"अथातो द्युस्थाना देवगणाः"—इति। एवमादि वक्तव्यम्। अतः पर मेतद्देवोत्तमं ज्योतिर्गणशब्दाभिधेयत्वेन निर्वाच्यम्; एतदेव हि गुणविकारोपजनापेक्षया भेदाभेदाभ्यां मन्त्रदृशः पश्यन्तः स्तुवते, तदर्थं विशेषतः पुनरधिकारवचनम्—"अथातो द्युस्थाना देवगणाः" इति*। द्यौरेषां स्थानं त इमे द्युस्थाना इति। के पुनस्ते? देवगणाः इति,—देवानां मित्रप्रभृतीनां गणाः; पृथक्त्वापेक्षे गणा इति बहुवचन मर्थवत्॥

"तेषा मादित्याः प्रथमागामिनो भवन्ति"। ते कस्मात्? प्रत्यक्षत्वाच्छब्दस्य; 'सप्तऋषयः' इत्येवमादीनाञ्च परोक्षत्वात्। ("आदित्याः"†) ते पुनरभिधाननिर्वचनतो "व्याख्याताः";—"आदत्ते रसान्"—इत्यत्र‡; केवलन्त्वत्र बहुवचन मिति विशेषः॥

"तेषाम्" आदित्यानाम् "एषा" प्राधान्यस्तुतिः "भवति"; यां दृष्ट्वेह द्युस्थाने गणाभिधानेन समाम्नाताः॥१ (३५)॥

इ॒मा गिर॑ आ॒दि॒त्येभ्यो॑ घृ॒तस्नू॑: स॒नाद्राज॑भ्यो जु॒ह्वा॑ जुहोमि। शृ॒णोतु॑ मि॒त्रो अ॑र्य॒मा भगो॑ नस्तुविजा॒तो वरु॑णो॒ दक्षो॒ अंश॑:॥ घृतस्नूघृतप्रस्राविन्यो घृतप्रस्राविण्यो घृतसारिण्यो घृतसानिन्य इति§ वाहुती-

---

* निघ० ५अ० ६ख० १४—२९ (४९०पृ०)।

† निघ० ५अ० ६ख० २९ (१भा० ४९०, ४९५ पृ०)।

‡ पुरस्तात् २अ० ४पा० १३ख० (२भा० २०४पृ०)।

§ "घृतसानिन्यो घृतसारिण्य इति"—इत्येवं च-प्रभृतिषु।

रादित्येभ्यश्चिरञ्जुह्वा जुहोमि (चिरञ्जीवनाय*) चिरं राजभ्य इति वा शृणोतु न इमा गिरो मित्रश्चार्यमा च भगश्च बहुजातश्च धाता दक्षो वरुणोऽंशश्चांशोऽंशुना व्याख्यातस्सप्तऋषयो व्याख्यातास्तेषा मेषा भवति ॥ २ (३६) ॥

"इमा गिर आदित्येभ्यः"—इति†। कूर्मस्य गार्त्समदस्य गृत्समदस्य वेय मार्षम्। 'इमा गिरः' 'घृतस्नूः' घृत माहुतिलक्षणं याः प्रस्नुवन्ति प्रक्षरन्ति ता घृतस्नूः। अथवा "घृतप्रस्राविण्यः" धात्वन्यत्व मर्थैकत्वम्। "घृतसानिन्यः" वा; घृतम् देवान् प्रति सानयन्ति सम्भाजयन्तीति तथा; सनोतेः सम्भजनार्थस्य। "घृतसारिण्यः" वा; "सृ गतौ"—इत्यस्य; देवान् प्रति घृतं याः सारयन्ति गमयन्तीति। ताभिः गीर्भिः, तैर्मन्त्रैः‡। 'सनाद्राजभ्यः' ("चिरं राजभ्यः") चिरन्तनेभ्यः सर्वलोकराजभ्यः; अथवा सनादिति यावदायुष मनुत्सर्गेण 'जुह्वा' जुहूसञ्ज्ञकेन पात्रेण 'जुहोमि'। ताः पुनर्गिरोऽस्मदाशीर्युक्ताः, तत्समर्द्धनाय 'शृणोतु' ('नः') अस्माकं 'मित्रः', 'अर्यमा', 'भगः' "च", 'तुविजातः' "बहुजातश्च" "धाता", 'दक्षः', 'वरुणः', 'अंशः' "च" § ॥

* नास्त्येतत् पदं च-प्रभृतिषु।

† ऋ० सं० २, ७, ६, १। य० वा० सं० ३४, ५४।

‡ "मन्त्राणां पयोघृतादिक्षरणहेतुत्वं च 'य ऋचोऽधीते पयसः कुल्या अस्य'—इत्यादिना तैत्तिरीये स्पष्ट माम्नातम्।"—इति सा० भा०।

§ "ते (आदित्याः) च तैत्तिरीयेऽष्टौ पुत्रासो अदितेरित्युपक्रम्य स्पष्ट मनुक्रान्ताः;

तुवीति बहुनाम*। सर्वविधातृत्वाद्बहुजन्मा धाता; यावदधिकारं अन्वेति । "अंशः अंशुना व्याख्यातः" † ॥

प्रत्येक मप्येते मित्रादयो द्युस्थानत्वेनोपेक्ष्याः; शास्त्रातिगौरवभयात्तु न पृथक् पृथक् द्युस्थानत्वेन समाम्नाताः । ते त्वादित्यलिङ्गलिङ्गितेषु मन्त्रेषु पृथक् पृथक् उपेक्ष्याः; तत्स्तुतीनां पृथगपि विद्यमानत्वात् ‡ ॥

"सप्तऋषयः" § वक्तव्याः। ते पुनरमी "व्याख्याताः" ‖ निर्वचनतः; इह त्वभिधेया रश्मयः इन्द्रियाणि वा;—"सप्त सृप्ता संख्या"¶, "ऋषिर्दर्शनात्"—इति**, सप्त च ते ऋषयश्च सप्तर्षयः ॥

"तेषा मेषा" प्राधान्यस्तुतिः "भवति"—॥ २(२६) ॥

—'मित्रश्च वरुणश्च धाता चार्यमा च अंशश्च भगश्च इन्द्रश्च विवस्वांश्चत्येते"—इति । मित्रः प्रमीतेस्त्रायकः; यद्वा सर्वेषां स्निग्धः। अरीन् यच्छति नियच्छतीत्यर्यमा । भगो भजनीयो देवः । तुवीति बहुनाम, बहुष देशेष्वनुग्रहार्थं प्रादुर्भूतम्; वरुणविशेषण मेतत्; पापस्य निवारणात् वरुणः। दक्षः समर्थः; एतच्चांशस्य विशेषणम् ।"—इति सा० भा० । "दितिर्द्यौरदिति मन्तरिक्षम्"—इत्याद्यैतरेयकथाचामुसन्धेयम् । ऐ० ब्रा० ३प० ६अ० ७ख० ।

* निघ० ३अ० १ख० २ (२९४पृ० १भा०) द्रष्टव्यम् ।

† पुरस्तात् २अ० २पा० १ख० (२भा० १७५पृ०) ।

‡ पुरस्ताच्चैतद्द्यंश उद्धृतः (२अ० ४पा० १ख० २भा० २०४, २०७ पृ०) ।

§ निघ० ५अ० ६ख० २५ (१भा० ४९०, ४९५पृ०) ।

‖ पुरस्तात् १०अ० ३पा० २ख० (४भा० ११०पृ०) ।

¶ "सप्त सृप्ता सङ्ख्या, सप्तादित्यरश्मयः"—इत्यादि ४, ४, ५ (२भा० ४८९पृ०) ।

** परस्तात् २अ० ३पा० २ख० (२भा० १९९पृ०) ।

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सद मप्रमादम्। सप्तापः स्वपतो लोक मीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ॥ सप्त ऋषयः प्रतिहिताः शरीरे रश्मय आदित्ये सप्त रक्षन्ति सद मप्रमादं संवत्सर मप्रमाद्यन्तः सप्तापनास्त एव स्वपतो लोक मस्तमित मादित्यं यन्त्यत्र* जागृतो अस्वप्नजौ† सत्रसदौ च देवौ वाय्वादित्यावित्यधिदैवत मथाध्यात्मं सप्त ऋषयः प्रतिहिताः शरीरे षडिन्द्रियाणि‡ विद्यासप्तम्यात्मनि सप्त रक्षन्ति सद मप्रमादं शरीर मप्रमाद्यन्ति सप्तापनानीमान्येव स्वपतो लोक मस्तमित मात्मानं यन्त्यत्र§ जागृतो अस्वप्नजौ‖ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्चेत्यात्मगति माचष्टे तेषा मेषापरा भवति ॥ ३ (३७) ॥

"सप्त ऋषयः प्रतिहिताः"—इति¶ । हिरण्यगर्भस्यार्षम् । आथर्वणे आत्मस्तुतौ विनियोगः ; उत्तरा च । शृणाति सर्व मिद मिति

---

*,§ "यन्ति तत्र" ख-प्रभृतिषु ।

†,‖ "जागृतोऽस्वप्नजौ" ख-प्रभृतिषु ।

‡ "षडिन्द्रियाणि" क, "षळिन्द्रियाणि" ग ।

¶ य० वा० सं० ३४, ५५ । "अध्यात्मवादिनी जगती"—इति च तत्र महीधरः।

शरीर मादित्यः; आश्रयणाद्वा सर्व मिद मस्मिन्नाश्रित मिति। तस्मिन् 'सप्त ऋषयः' "रश्मयः" 'प्रतिहिताः' प्रत्येकं हिताः निहिताः । ते पुनः सप्तैव अन्यूनाधिकाः सन्तः, सार्वदिक मुदक मुपनयन्तः, तेनेद्धास्त मादित्यं 'सदं' सदैव ('अप्रमादम्') "अप्रमाद्यन्तः" अनुत्सर्गेण स्वस्य कर्मणः 'रक्षन्ति'; निरिन्धनः पार्थिवोऽपि ह्यग्निः इन्धनक्षयान्निर्वाप्येत, "त एव" सप्त ऋषयः "आपनाः" सर्वस्य लोकस्य व्यापनाः, 'स्वपतः' अस्त मुपगच्छतः, अस्यादित्यस्यैव तं 'लोकम्' आत्मानं गच्छन्ति, बाह्यं मण्डलं प्रविशन्ति। तेष्वनुप्रविष्टेषु 'तत्र' सुप्तेषु उपरतप्रकाशवृत्तिषु तत्रान्तर्गतौ 'जाग्रतः' तन्मण्डलान्तरपुरुषः, तदधिष्ठाता, यो ऽसौ हिरण्मश्रुः हिरण्यकेश इति विज्ञायते*, वायुश्च ।—"इत्यधिदैवतम्" ॥

"अथाध्यात्मम्" ।— मण्डलवदस्मच्छरीरे रश्मिवदिन्द्रियाणि प्रतिहितानि निहितानि†; तच्छरीरं नित्यं रूपाद्यालोकनाद्युपकारेण रक्षन्ति अप्रमाद्यन्ति, सप्तापनानि व्यापनानि विषयाणां शरीरस्य वा। तान्येव स्वपतोऽस्य जीवस्य सुखदुःखभोक्तुः लोकं शरीर मेव प्रत्यस्तमित मीयुः;—बुद्धिद्वारेण भोक्तर्येव भावनानुरूपेण लीयते। यद्भावनोपपादकः स्वप्नभोक्तुः स्वप्नो भवति, तत्र जाग्रतः शरीरपरिपालनार्थम्; प्राज्ञश्चात्मा परमात्मा चिन्मात्रेण यः शरीरं व्याप्य वर्त्तते;

---

* "हिरण्यकेशः" ऋ० सं० १, ७९, १ ; "हिरण्यशृङ्गः" ऋ० सं० १, १६३,९ ।

† "सप्त ऋषयः प्राणाः, त्वक्चक्षुःश्रवणरसनाघ्राणमनोबुद्धिलक्षणाः, शरीरे प्रतिहिता व्यवस्थिताः ।"—इति मही० ।

तैजसस्य प्राणोऽन्नं पानं पचनव्यूहंश्च रसान्तर्भूतं तेजोवायुवृत्तिः * ॥

"तेषा मेषा अपरा भवति"—। सा पुनः किमर्थम्? रश्मय एवेति स्फुटतार्थे ॥ २ (२७) ॥

तिर्यग्बिलश्चमस † ऊर्ध्वबुध्नो यस्मिन्यशो निहितं विश्वरूपम्। अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः ॥ तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा यस्मिन्यशो निहितं सर्वरूप मत्रासत ऋषयः सप्त सहादित्यरश्मयो ये अस्य गोपा महतो बभूवुरित्यधिदैवत मथाध्यात्मं तिर्यग्बिलश्चमस ऊर्ध्वबन्धन ऊर्ध्वबोधनो वा यस्मिन्यशो निहितं सर्वरूप मत्रासत ऋषयः सप्त सहेन्द्रियाणि यान्यस्य गोप्तॄणि ‡ महतो

---

* "सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् । २ । जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग् वैश्वानरः प्रथमः पादः । ३ । स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः । ४ । यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः । ५ ।"—इति मा० उ० । यथाह च गौडपादाचार्यः——"बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः । घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ।"—इति ।

† "ति॒र्य॑ग्बिल॑श्चम॒स"—इति ख (सर्वत्रैवात्र); "ति॒र्यग्बिल॑श्चम॒स"—इति घ।

‡ "गोप्त्रीणि" क, ख, ग ।

बभूवुरित्यात्मगति माचष्टे देवा व्याख्यातास्तेषा मेषा भवति ॥ ४ (३८) ॥

"तिर्यग्बिलश्चमस:"—इति* । तिर्यग्बिलोऽस्य मण्डलस्य मधुपूर्णस्येव रश्मिच्छिद्राणि । चमनं चोदक मेव सनोतीति चमसः। ऊर्द्धं चैतद्बद्धं माभूतसम्प्लवान्न निपद्यत इति 'ऊर्ध्वबुध्नः'; ऊर्ध्वं वावस्थितः प्रकाशेन बोधयतीति ऊर्ध्वबुध्नः; तस्मिन् 'चमसे' मण्डले 'यशः' उदकं 'निहितं' नियमेन अधिकं वा हित मवस्थापितम्, 'विश्वरूपम्' अनेकप्रकार मनेकरूपम्। कैः पुनस्तन्निहितम्? इति—'ये' 'अस्य' 'महतः' जगतः, आत्मनो वा 'गोपाः' गोप्तारः, एते रश्मयः 'बभूवुः' भवन्ति। 'ये' च 'अत्र' एतस्मिन् मण्डले 'साकम्' एकीभूतास्तदधिष्ठात्रा सह 'आसते'। तैर्हि चतसृषु दिक्षु ऊर्ध्वं मधो मण्डलं चोत्सृष्टानि यानि ज्योतींषि अस्य ते रश्मयः, सप्त सर्पणाः; ऋषणाद्दर्शनादस्य धर्मस्य ऋषय उच्यन्ते।—"इत्यधिदैवतम्" ॥

"अथाध्यात्मम्"—इति । तिर्यक्छिद्र मिद मेव शिरश्चमसः; चम्यन्ते ह्यनेन रसा इति। "ऊर्ध्वबन्धनश्च" उपरि ह्यवस्थित मेतद्बन्धन मस्य शरीरस्य; एतद्वियोगे हि विस्रंस्यते शरीरम्। यस्मिन् यशो निहितं विश्वरूपं नानाप्रकार मिन्द्रियत्वेन भूतं रसाख्यं ज्ञानाख्यं वा। तस्य चमसस्य ये विधातारः, तद्द्वारेण अस्य शरीरस्य महतो गोप्तारः, तत्रैव चमसान्तर मनुप्रविष्टाः 'साकं' "सह" तद्यश उपजीवन्त आसते—"इत्यात्मगति माचष्टे" † ॥

---

* अथ० सं० १०, ८, ९।

† अथ बृ० आर० २, २, ३. द्रष्टव्यम्।

"देवाः" * वक्तव्याः। ते पुनः "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा"—इत्यत्र † निर्वचनतो "व्याख्याताः"; इह तु रश्मयो बहुवचनेनोच्यन्त इति विशेषः ‡ ॥

"तेषा मेषा" प्राधान्यस्तुतिः "भवति"—॥ ४ (३८) ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्त्तताम्। देवानां सख्य मुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥ देवानां वयं (सुमतौ §) कल्याण्यां मतावृजुगामिना मृतुगामिना मिति वा देवानां दान मभि नो निवर्त्ततां देवानां सख्य मुपसीदेम वयं देवा न आयुः प्रवर्द्धयन्तु चिरञ्जीवनाय विश्वे देवाः सर्वे देवास्तेषा मेषा भवति ॥ ५ (३९) ॥

"देवानां भद्रा"—इति ‖। गोतमस्यार्षम् ¶। देवेभ्यो वशा मालभेतेति विनियोगः। अस्य पशोर्वपायाः पुरोऽनुवाक्या। य

* निघ० ५अ० ६ख० २९ (१भा० ४९०, ४९१पृ०)।

† पुरस्तात् ७अ० ४पा० २ख० (३भा० ३८१पृ०)।

‡ पुरस्तादुक्तं "देवगोपाः"—इत्यस्य व्याख्यानं द्रष्टव्यम् (२११पृ० ८प०)।

§ नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु।

¶ ऋ० सं० १,६,५,२। 'वैश्वदेवम्"—इति सा० भा०।

‖ "गोतमस्य दीर्घतमस आर्षम्"—इति क० ङ० पाठः; "गोतमस्यार्षम्"—इत्येव सा० भा०।

एते 'देवाः' रश्मयः नित्यं ऋज्वेव मण्डलादनावरणत्वादन्तरिक्षस्य * सर्वतो यन्ति। अथवा 'ऋजूयताम्' "ऋतुगामिनाम्" ऋतावृतौ यथाकाल मस्मात् मण्डलात् गच्छताम् †। 'सुमतिः' शोभना मतिः, प्रसादाभिमुखी मतिः। सा ("नः") अस्मान् प्रति 'निवर्त्त-ताम्' नियमेन वर्त्तताम्; तत्पूर्विका च 'रातिः' धनलाभोऽस्मान् प्रति नियमेन वर्त्तताम्। ततश्च तेन धनलाभेन उपजनितसामर्थ्याः सन्तो 'वयम्' तेषा मेव 'देवानां' 'सख्यं' समानतां याज्ञे कर्मणि समान मङ्गभावम् 'उपसेदिम' ("उपसीदेम") उपगच्छेम वयम्। ततश्च तथाभूताना मस्माकम् 'आयुः' ते देवाः 'प्र तिरन्तु' "प्रव-र्द्धयन्तु" 'जीवसे' "चिरं जीवनाय"।—इत्येतदाशास्महे॥

"विश्वे देवाः" ‡ वक्तव्याः। "सर्वे देवाः" त एव रश्मयः, उपहित-विश्वविशेषणाः सन्तो विश्वे देवा भवन्ति॥

"तेषां" तदभिधानविशिष्टानाम् "एषा" प्राधान्यस्तुतिः "भवति"—॥ ५ (३९)॥

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वांसो दाशुषः सुतम्॥ अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवन्तो दत्तवतः सुत मिति

---

* "मण्डलादशनावरणत्वादन्तरिक्षस्य"—इति क० ख० पाठः।

† "ऋजूयताम्—ऋजु मार्जवयुक्तं सम्यगनुष्ठातारं यजमान मात्मन इच्छताम्" —इति सा० भा०।

‡ निघ० ५ख० ६ख० १७ (१भा० ४६०, ४६९ पृ०)।

तदेतदेक मेव* वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव-विश्वलिङ्ग मिति शाकपूणिरनत्यन्तगतस्त्वेष उद्देशो भवति बभ्रुरेक इति दश द्विपदा अलिङ्गाः† भूतांशः काश्यप आश्विन मेकलिङ्ग मभितष्टीयं सूक्त मेकलिङ्गं साध्या देवाः साधनात्तेषा मेषा भवति ॥ ६ (४०) ॥

"ओमासश्चर्षणीधृतः"—इति‡। मधुच्छन्दसा दृष्टा। प्रउगे ग्रहे विनियोगः। वैश्वदेवस्थानेन प्रातःसवने ग्रहो गृह्यते। हे 'विश्वे देवाः!'§ ये यूयम् 'ओमासः' "अवितारः" रक्षितारः, 'चर्षणीनां' मनुष्याणां क्षेमोपकारेण; "अवनीया वा" तर्पणार्हाः। ('धृतः') धारयितारश्च स्थितिकर्त्तारः। ते यूयं 'दाश्वांसः' "दत्तवन्तः" मनसा कृतसङ्कल्पा भूत्वा इदं नामास्माभिरस्मै देय मिति। ततः अस्य 'दाशुषः' "दत्तवतः" हवींषि यजमानस्यैतं 'सुतम्' अभिषुतं सोमं पातुम् "आगत"।—इत्येतदाशास्महे॥

अधुना विश्वान् देवानधिकृत्य तद्गत मेवाधियज्ञे विचारयिष्यन्नु-

---

* "तदेतदेक मिव" क, ख, ग।

† "बभ्रुरेक इति दश द्विपदा अलिङ्गाः"—इत्येषोऽंशस्तु "सूक्त मेकलिङ्गम्"—इत्यतः परस्तात् दृश्यते क-ख-ग-पुस्तकेषु।

‡ ऋ० सं० १,१,६,१ ; य० वा० सं० ७,३३।

§ "एतन्नामका देवविशेषाः"—इति सा० भा०। वस्तुतो बहुदेवताभिप्रायिक मेवैतत् सर्वत्र प्रयुज्यते ; न तु विशेषदेवगणाभिप्रायिकम्।

पोद्धन्ति।—"तदेतदेक मेव * वैश्वदेवं गायत्रं तृचम्"—इत्येवमादि। 'तत्'—इति समाम्नायस्यानुस्मृतये। 'एतत्'—इति वक्ष्यमाणार्थ-सन्निधीकरणाय। 'एकं' 'तृचं' 'सूक्तं' 'वैश्वदेवं' 'गायत्रं' गायत्रेण छन्दसा युक्तं 'दशतयीषु' सर्वास्वपि बह्वृषु शाखासु † 'विद्यते';—नान्यदस्त्येवास्मिञ्छन्दसि; प्रयोजनं च गायत्रच्छन्दोयुक्तैरन्यैरपि बहुभिर्वैश्वदेवैर्मन्त्रैरधियज्ञे। तत्र किं कर्त्तव्यम्?—इति, यत आह;—"यत्तु किञ्चिद्बहुदैवतं" मन्त्रजातं गायत्रेण छन्दसा युक्तम्, "तद्वैश्व-देवानां स्थाने युज्यते"। न्याय्य मित्यतो "यदेव" ("विश्वलिङ्गम्") विश्वशब्दोपेतं मन्त्रजातं सूक्तं वा, तदेव वैश्वदेवानां स्थाने विनि-युज्यते;— न बहुदेवतामात्रेण—"इति" "शाकपूणिः" मन्यते ‡। तत् किं मस्यापि यास्काचार्यस्यैतदेवाभिमत मुत न? इति, यत आह;—"अनत्यन्तगतस्त्वेष उद्देशो भवति" अनैकान्तिक एष उद्देशः। उद्देशः प्रतिज्ञा;—"यदेव विश्वलिङ्गोपेतं तदेव वैश्वदेवानां स्थाने विनियुज्यते"—इति। कथ मनैकान्तिकम्? इति; वैश्वदेवं हि मन्त्रजातं समाम्नाये क्रियार्थ मुत्पद्यमान माम्नायस्य क्रियार्थत्वाद्गायत्रे छन्दसि तावदेवोत्पत्तु मर्हति, विश्वयुक्तमन्त्रजातवद्यावत्कर्मसु सर्व-वैश्वदेवेषु तच्छन्दस्केषु अल मिति;— न च तत्सर्वास्वपि दश-

* "तदेतदेक मिव"—इति क० छ० पाठश्च। सायणधृतपाठस्तु तदेतदेक मेवेत्ये-वेति स एव समीचीनो मन्यतेऽस्माभिः।

† २भा० २४४पृ० ८पं०, ३९५पृ० ३पं द्र०।

‡ "अत्र विश्वशब्दः सर्वशब्दपर्यायः इति यास्कस्य मतम्; देवविशेषस्यैवासाधारणं लिङ्ग मिति शाकपूणेर्मतम्"—इति सायणेनोक्तो निष्कृष्टार्थः।

तयोश्वस्ति छन्दस्यलङ्कर्मोत्पादे ; प्रयोजनं च तच्छन्दोयुक्तैरपि विविधैर्मन्त्रैर्भवति ; न च ते तथाविधाः सन्तीति बहुदेवताश्च तस्मिन् छन्दसि सन्ति। तत्किं मस्तु तस्य कर्मणः प्रहाणम्, उत वा तत्स्थाने बहुदेवतानि सूक्तान्योप्यन्ताम्? इति उच्यते ;—युक्तं यद्बहु-देवतानि ओप्येरन्निति यास्काचार्यः पश्यन्नाह—"यत्तु किञ्चिद्बहु-दैवतं तद्वैश्वदेवानां स्थाने युज्यते"। सेय मनुत्पत्तिर्गायत्रे छन्दसि वैश्वदेवानां मन्त्राणां यावदलङ्कर्मणि गमयति। बहु-विश्वशब्दयो-रितरेतरार्थाभिधेयप्रत्यासत्त्या बहुदेवतान्यपि वैश्वदेवानां स्थाने युज्यन्त एवेति। अपि चैव मनत्यन्तगत इत्युद्देशः। येन "भूतांशः काश्यप आश्विन मेकलिङ्गम्"। भूतांशो नाम ऋषिः काश्यपः, स एकेनाश्वि-लिङ्गेन युक्त मनेकर्चं सूक्तं ददर्श, तत्र यास्वप्यश्विलिङ्ग मृचु नास्ति तासा मप्याश्विनीत्वं तेनैवैकेनाश्विलिङ्गेन ; यथैकेनापि छत्रिणा मध्यगतेन छत्रिणो भवन्ति,*—एव मेकेन विश्वलिङ्गत्वेन यावन्ति सूक्तानि कर्माणि संयुज्यन्ते बहुदेवतानि अविश्वलिङ्गान्यपि तानि तदर्थसाधकानीति ॥

ऋध्याम अश्विलिङ्गम्, येन पर्फरीसूक्तं सर्व माश्विनम् †।

---

* छत्रिणो यान्तीति लक्षणाया उदाहरणम्; वैयाकरणाना मालङ्कारिकाणां नैयायिकानां च लक्षणा-प्रकरण मेव द्रष्टव्यम्।

† ऋक्संहितायाः दशममण्डलीय-नवमाध्यायस्याद्यं सूक्त मेकादशर्चम्। तत्र प्रथमा ऋचि "पर्फरीका"-श्रुतेः तत् पर्फरीसूक्त मित्युच्यते। तस्य च सूक्तस्याग्निमाया मृच्येव "अश्विनोः"—इत्येकं पदं दृश्यते ; एतस्मात्तद्दर्शनेनैव स मन्त्रोऽश्विलिङ्गः सम्पद्यते, तथा अवह्रियते च सर्व मेवैकादशर्चं तत् पर्फरीसूक्त मश्विदेवताक मिति।

"ऋध्याम स्तोमं सनुयाम"—इति*। हे अश्विनौ! वयं 'स्तोमं' त्रिवृत्-पञ्चदशादिकम्† 'ऋध्याम' ऋध्यास्म, वर्द्धयेम। किञ्च; 'वाजं' हविर्लक्षणं मन्नं युवाभ्यां 'सनुयाम' प्रयच्छेम। तस्माद् युवां 'सरथा' सरथौ, समानरथौ, एक मेव रथ मारूढौ सन्तौ 'इह' अस्मिन् कर्मणि 'नः' अस्मदीयं 'मन्त्रं' मननीयं स्तोत्रम् 'उप यातम्' उपागच्छतम्। 'गोष्वन्तः' गोरूधस्यावस्थितं 'पक्वं' परिणतम्, तदेव ('मधु') मधुरं 'यशो न' यश इत्यन्ननाम, नस्यार्थे, चौराज्यादिलक्षणम्, महावीरपात्रे अवनीयमानम्, अन्नचापेक्ष्य आगच्छत मिति सम्बन्धः। एव मुक्तप्रकारेण 'भूतांशः' एतन्नामा ऋषिः 'अश्विनोः' 'कामम्' अभिलाष मात्मीयाभिः स्तुतिभिः 'अप्राः' आपूरयत्, सम्पूर्ण मकार्षीदित्यर्थः। "प्रा पूरणे" आदादिकः (प०), व्यत्ययेन मध्यमः‡॥

"अभितष्टीयं सूक्तम्" § चैन्द्रम्, तदपि "एकलिङ्गम्"—इति॥

---

* ऋ० सं० ८,१,२,९; १०,९,१,११। त्रिष्टुप्, आश्विनी। पाठस्त्वेवम्—"ऋध्याम स्तोमं सनयाम वाज मा नो मन्त्रं सरथेहोप यातम्। यशो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काम मप्राः॥"—इति।

† त्रिवृदादिस्तोमलक्षणानि तु "तिसृभ्यो हिङ्करोति"—इत्यादीनि ताण्ड्योक्तानि (२,१) द्रष्टव्यानि।

‡ सर्व मेतद् व्याख्यानं सायणभाष्यत उद्धृत मिव गम्यते; इत एव वा सायणेन उद्धृत मित्यपि सम्भाव्यतेव।

§ ऋक्संहितायास्तृतीयमण्डलतृतीयाध्यायस्य नवमं सूक्त मभितष्टीयं नाम। तस्य हि सूक्तस्याद्या ऋक् "अभितष्टेव"—इति, एतदेव तादृशे नामकरणे निदानम्। एतच्च सूक्तम् दशर्चम्। तत्र "शुनं हुवेम"—इत्यन्त्या; अचैवैका "इन्द्रम्"—इति

यथा—"शुनं हुवेम"—इति* । विजयाय 'समत्सु' संग्रामेषु नित्यं 'घ्नन्तं' 'वृत्राणि' वारकाणि शत्रुजातानि, 'सञ्जितं' समस्तानां वीराणां धनानाञ्च जेतारम्, 'शुनम्' शूनम्, उत्साहेन प्रवृद्धम्, 'नृतमम्' जगतः अतिशयेन नेतारम् 'ऊतये' रक्षणाय 'अस्मिन्' 'भरे' संग्रामे 'वाजसातौ' यस्मिन् शत्रून् जित्वान्नानि सम्भज्यन्ते तस्मिन्, 'हुवेम' वय माह्वयामहे, तम् 'इन्द्रम्' एवमादिगुणयुक्त मात्मनो विजयायेति† ॥

"साध्याः"‡ "देवाः" ; "साधनात्" ते हि सर्व मिदं साधयन्ति ;

श्रूयते ; अत एव सर्वञ्चैतत् सूक्त मैन्द्र मिति व्यवह्रियते । एतच्च सूक्तम् चातुर्विंशिके ऽहनि मध्यन्दिने सवनेऽच्छावाकस्य शस्त्रम् (आ० श्रौ० सू० ७,४) । ब्राह्मणञ्चात्र—"अभितष्टेव दीधया मनीषा मित्यच्छावाकोऽन्वहः शंसत्यभिवत्यै रूप मभि प्रियाणि मर्मृशत् पराणीति यान्येव पराण्यहानि तानि प्रियाणि तान्येव तदभिमर्मृशन्तो यन्त्य-भ्यारभमाणाः परो वा अस्माल्लोकात् स्वर्गो लोकस्त मेव तदभिवदति कवीँरिच्छामि सन्दृशे सुमेधा इति ये वै तेन ऋषयः पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति"—इति ऐ० ब्रा० ६,४,४ ।

* एषा च ऋक्, संहितायां बहुत्र दृश्यते । तथाहि—३,३०,२२ ; ३,३१,२२ ; ३,३२,१७ ; ३,३४,११ ; ३,३५,११ ; ३,३६,११ ; ३,३८,१० ; ३,३९,९ ; ३,४३,८ ; ३,४८,५ ; ३,४९,५ ; ३,५०,५ ; १०,८९,१८ ; १०,१०४,११ इति ; परं तृतीयमण्ड-लस्योनचत्वारिंशत्तमसूक्तीयैवैषा ; तस्या एव अभितष्टीयसूक्तान्त्यत्वात् । पाठस्त्वेषः—"शुनं हुवेम मघवान मिन्द्र मस्मिन् भरे नृतमं वाजसातौ । शृण्वन्त मुग्र मूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानाम् ॥"—इति ॥

† एतस्याः खलु सायणीयं व्याख्यानं द्रष्टव्यञ्चेत् १,२,४,७. द्रष्टव्यम् ।

‡ निघ० ५अ० ६ख० १८ (१भा० ४९०,४९९पृ०) ।

यदन्येन सर्वकर्मभिरसाधितं तत्साधयन्तीति साध्या उच्यन्ते। ते च पुनः प्राणाः विश्वसृज ऋषयः; ये सहस्रसंवत्सरसत्त्रेणेदं विश्व मसृजन्त, त एवैतेऽधिदैवं रश्मयः। विज्ञायते हि—"प्राणा वै सप्त-ऋषयः साध्या विश्वसृजः"—इति* ॥

"तेषा मेषा" प्राधान्यस्तुतिः "भवति"—॥ ६ (४०) ॥

यज्ञेन यज्ञ मयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥ यज्ञेन यज्ञ मयजन्त देवा अग्निनाग्नि मयजन्त देवा अग्निः पशुरासीत्त मालभन्त तेनायजन्तेति च ब्राह्मणं तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः स मसेवन्त† यत्र पूर्वे साध्याः सन्ति देवाः साधना द्युस्थानो देवगण इति नैरुक्ताः पूर्वन्देवयुग मित्याख्यानं वसवो यद्विवसते सर्व मग्नि-र्वसुभिर्वासव इति समाख्या तस्मात् पृथिवीस्थाना इन्द्रो वसुभिर्वासव इति समाख्या तस्मान्मध्यस्थाना वसव आदित्यरश्मयो विवासनात्तस्माद् द्युस्थानास्तेषा मेषा भवति ॥ ७ (४१) ॥

---

* "प्राणा वा ऋषयो दैव्यासः"—इत्यादयश्च द्रष्टव्याः ऐ० ब्रा० २, ४, ३।

† "संसेवन्त" क, ख, ग।

"यज्ञेन यज्ञ मयजन्त—इति* । दीर्घतमस आर्षम् । "अग्निनाग्नि मयजन्त देवाः" । उक्तञ्च—"त मुन्निन्यथुः सर्वगणं सर्वनामानम्"—इति †; 'तम्' अग्निं स्थावरजङ्गमभावेनेति । "तं वस्राथो वयं वसत्या"—इत्येतस्माद्दर्शनवतः‡ प्रयोक्तुः सर्व मिद मग्निरित्यभिप्रेत्य ब्रवीति ।—('यज्ञेन') "अग्निना" स्थावरजङ्गमभाव मापन्नेन हविर्भूतेन§ ('यज्ञम्') "अग्निम्" एव सर्वदेवताभूत मादित्यादिप्रनाडिकया महान्त मात्मानम् 'अयजन्त' 'देवाः' देवभाविनः, 'पूर्वे' ज्ञानकर्मसमुच्चयकारिणो यजमानभाव मापन्नाः, 'साध्याः' विश्वसृजः ऋषयः ; प्राणाः । 'तानि धर्माणि' तानि कर्माणि, तथाविधज्ञानयुक्तानि, 'प्रथमानि' मुख्यानि महदात्मभावापत्तये 'आसन्' ; तैरपि क्रियन्ते इत्यर्थः । 'ते' च तानि कृत्वा नियमेनैवानन्य-

---

* ऋ० सं० १,३,२२,४ ; ८,४,१९,९ । य० वा० सं० ३१,१६ । अग्निमन्थने यज्ञेन यज्ञ मित्येषा परिधानीया (आ० श्रौ० सू० २,१६.)। एषा च ऋक् अस्यवामीये सूक्ते पञ्चाशी । "स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः । सूक्तं जप्त्वास्यवामीयं क्षिपं मुच्येत किल्बिषात्"—इति ऋग्वि० १, २९ ।

† पुरस्तात् ६अ० ६पा० ८ख० (२भा० २८०पृ०)।

‡ पुरस्तात् १०अ० २पा० ८ख० (१०७—११२पृ०)।

§ "यज्ञो वै देवेभ्य उदक्रामत्, ते देवा न किञ्चनाशक्नुवन् कर्तुं न प्राजानंस्तेऽब्रुवन्नदितिं त्वयेमं यज्ञं प्रजानामेति। सा तथेत्यब्रवीत्। सा वै वो वरं वृणा इति। वृणीष्वेति सैत मेव वर मवृणीत—मत्प्रायणा यज्ञाः सन्तु—मदुदयना इति। तथेति। तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य उदयनीयो वरवृतो ह्यस्याः। अथो एतं वर मवृणीत—मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति।"—इत्यादि ऐ० ब्रा० १प० १अ० १ख०।

भावित्वात् तत्फलस्य 'महिमानः' तदानुपूर्व्येण जातमहदात्मभावाः सन्तः, त मेव 'नाकं' महान्त मात्मानम् एकान्तसुखं 'सचन्त' तद्भाव मेव ते आपेदिरे*। किं त एव? इति, नेत्युच्यते,—"यत्र पूर्वे

---

* "'देवाः' व्यवहर्तारो यजमानाः 'यज्ञेन' निर्मथ्याग्निना 'यज्ञं' होमसाधन माहवनीयम् 'अयजन्त' पूजितवन्तः, अनुष्ठानाय संयोजितवन्त इत्यर्थः। 'अग्निं मथित्वा प्रहरति तेनैवाग्निनातिथ्यं क्रियते'—इति हि तैत्तिरीयकम्। 'तानि धर्माणि' अग्निसाधनानि कर्माणि। 'प्रथमानि' प्रथम इति मुख्यनाम, प्रतमानि, प्रकृष्टतमानि, 'आसन्' फलप्रसवसमर्थान्यभवन्नित्यर्थः। 'ते ह' ते च यजमानाः 'नाकम्' नास्मिन्नक मस्तीति नाकः स्वर्गः तम्, 'महिमानः' माहात्म्ययुक्ताः 'सचन्त' सङ्गताः। कीदृशं नाकम्? 'यत्र' यस्मिन् नाके 'पूर्वे' पूर्वतनाः, 'साध्याः' साधनाः, यज्ञादिसाधनवन्तः कर्मदेवा इत्यर्थः(१)। ते 'सन्ति' निवसन्ति, तं सचन्त। तस्मादिदानी मपि मनुष्यैरेवं कर्त्तव्य मित्यर्थः।

यद्वा; 'देवाः' इदानीं देवभाव मापन्नाः, पूर्वं 'यज्ञेन' अग्निना पशुभूतेन 'यज्ञं' यष्टव्य मग्निम् 'अयजन्त' पूजितवन्तः। अग्नेरेव मूर्त्तिभेदेन देवत्वञ्च पशुत्वञ्च द्रष्टव्यम्। 'अग्निः पशुरासीत् त मालभन्त तेनायजन्त'—इति श्रुतेः(२)। शिष्टं पूर्ववत्।

---

(१) द्विविधा देवाः। कर्मदेवाः, आजानदेवाश्च। कर्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः; सृष्ट्याद्युत्पन्ना आजानदेवाः, ते कामदेवेभ्यः श्रेष्ठाः, 'ये शतं कर्मदेवाना मानन्दाः स एक आजानदेवाना मानन्दः (बृ० आ० ४, १, ३५)'—इति श्रुतेः। साध्यादयः कर्मदेवाः, सूर्यादय आजानदेवाः॥ "तन्मर्त्यस्य देवत्व माजान मग्रे"—इति (य०वा०सं० ३१, १७) अत्र मन्त्रलिङ्गं द्रष्टव्यम्।

(२) "यावन्तः खलु वै राजान मनुयन्ति, तेभ्यः सर्वेभ्य आतिथ्यं क्रियते; अग्निं मन्थन्ति सोमे राजन्यागते; तद्यथैवादो मनुष्यराजन्यागतेऽन्यस्मिन् वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमस्मा एतत् क्षदन्ते यदग्निं मन्थन्त्यग्निर्हि देवानां पशुः"—ऐ० ब्रा० १प० ३ख० ४ख०।

'यत्र' यस्मिन् स्वर्गे निमित्तभूते सति 'पूर्वे' पूर्वतनाः 'साध्याः' देवाः, साधना-श्छन्दोऽभिमानिनः; आदित्या अङ्गिरसश्च साध्या देवा उच्यन्ते । 'छन्दांसि०——० स्वर्गं लोक मायन्'—इति (ऐ० ब्रा० १, ३, ५) ब्राह्मणम् । एते 'देवाः' स्वर्गे 'सन्ति' भवन्ति, स्वर्गप्राप्ता इत्यर्थः ।

यद्वा ; 'यज्ञेन' ज्ञानादियज्ञेन 'यज्ञम्' विष्णुम्(१) 'अयजन्त' पूजयन्ति । ते 'नाकम्' विष्णुलोकम् महानुभावाः 'सचन्त' सङ्गच्छन्ते ।"—इति सा० भा० (ऋ० सं० १, २, १२, ४) ।

" 'देवाः' प्रजापतिप्राणरूपाः 'यज्ञेन' यथोक्तेन मानसेन सङ्कल्पेन 'यज्ञम्' यथोक्त-यज्ञस्वरूपं प्रजापतिम् 'अयजन्त' पूजितवन्तः । तस्मात् पूजनात् 'तानि' प्रसिद्धानि धर्माणि, जगद्रूपविकाराणां धारकाणि, 'प्रथमानि' मुख्यानि 'आसन्' । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः सङ्गृहीतः । अथोपासनतत्फलानुवादकभागार्थः सङ्गृह्यते । 'यत्र' यस्मिन् विराट्प्राप्तिरूपे नाके 'पूर्वे' 'साध्याः' पुरातनाः, विराडुपास्ति-साधका देवाः 'सन्ति' तिष्ठन्ति । तं 'नाकं' विराट्प्राप्तिरूपं स्वर्गम् 'ते महिमानः' तदुपासका महात्मानः 'सचन्त' समवयन्ति, प्राप्नुवन्ति ॥"—इति च सा० भा० (ऋ० सं० ८, ४, १९, ६) । एतदेव च व्याख्यानं महीधरेण यजुर्व्याख्याने गृहीतम् (य० वा० स० ३१, १६) ।

किञ्च तत्पूर्वीयसप्तम्या ऋचोऽपि व्याख्यानं सायणकृतं द्रष्टव्यम् । तथाहि—" 'यज्ञं' यज्ञसाधनभूतम्, 'तं' पुरुषम् पशुत्वभावनया यूपे* बद्धम् 'बर्हिषि' मानसे यज्ञे 'प्रौक्षन्' प्रोक्षितवन्तः । कीदृशम् ? इत्यत्राह—'अग्रतः' सर्वसृष्टेः पूर्वम् 'जातम्' पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तम्—"तस्माद् विराडजायत विराजो अधि पूरुषः" —इति । तेन पुरुषरूपेण पशुना 'देवाः' 'अयजन्त' मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवाः ? इत्यत्राह—'साध्याः' सृष्टिसाधनयोग्याः, प्रजापतिप्रभृतयः; तदनुकूला ऋषयो मन्त्रद्रष्टारश्च ये सन्ति ते सर्वेऽप्ययजन्तेत्यर्थः ॥"—इति च सा० भा० (ऋ० सं० ८, ४, १८, २) ।

(१) "विष्णुर्वै यज्ञः"—इत्यपि ऐ० ब्रा० १प० ३ख० ४ख० ।

साध्याः सन्ति देवाः”। शब्दार्थोपदेशनित्यत्वाद्यत्र पूर्वे च पूर्वतरे च ज्ञानकर्मसमुच्चयकारिण आसते सन्ति जज्ञुरित्यर्थः*। विज्ञायते हि—“विश्वसृजः प्रथमे सत्त्रमासत”—इति†॥

“यज्ञेन यज्ञमयजन्त देवा इत्युत्तमया परिदधाति। यज्ञेन वै तद्देवा यज्ञमयजन्त यदग्निनाग्निमयजन्त ते स्वर्गं लोकमायंस्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवा इति। छन्दांसि वै साध्या देवास्तेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्नादित्याश्चैवेहासन्नङ्गिरसश्च तेऽग्रेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन् सैषा स्वर्ग्याहुतिर्यदग्न्याहुतिः॥”—इति ऐतरेयब्राह्मणश्रुतव्याख्यानम् (ऐ० ब्रा० १, ३, ५)।

* ऋभ्वादीनामपि देवत्वमेवमेव। तथाचैतरेयकम्—“प्रजापतिर्वै पित ऋभून् मर्त्त्यांस्सतोऽमर्त्त्यान् कृत्वा तृतीयसवन आभजत् तस्मान्नार्भवीषु स्तुवतेऽथार्भवः पवमान इत्याचक्षते”—इति ऐ० ब्रा० ६प० ३ख० ४ख०।

† “आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः”—इति (ऋग्० सं० १०, ९२, ४.) “यज्ञैरथर्वा प्रथमः पथस्तते”—इति (ऋग्० सं० १०, ९२, ५), “विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त”—इति (ऋग्० १०, ६१, २.), “त्वामग्ने पुष्कराद्ध्यथर्वा निरमन्थत”—इति (ऋ० सं० ४, ५, १२, २.), “त्वा अग्ने पुष्कराद्धीत्याद पुष्करपर्णे होम मुपश्रुत मविन्दत्”—इति (तै० ब्रा०); “देवनीथं ग्रंसत्यादित्याश्च ह वा आङ्गिरसश्च स्वर्गे लोके स्पर्द्धन्त वयं पूर्वे मेष्यामो वय मिति”—इति (ऐ० ब्रा० ६प० ५ख० ८ख.), “ते हादित्यानङ्गिरसो याजयंस्तेभ्यो याजयद्भ्य इमां पृथिवीं पूर्णां दक्षिणा मददुः (ऐ० ब्रा० ६प० ५ख० ९ख.)”—इति च; एवमादि श्रुतेरङ्गिरसा मेव प्रथम-यज्ञ-प्रकाशकत्वं बुध्यते; ततश्च साध्या इति तेषा मेव समाख्यान्तरं भवितु मर्हति; अथर्वसंहितायाञ्च यचैषा ऋक् दृश्यते “यज्ञेन यज्ञमयजन्त देवाः”—इति, तत्रैवानुवाके (अथ० सं० ७, १) तत्पुरस्तात् “अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितुरसुं युवानम्। इमं यज्ञं मनसा चिकेत प्र णो वोचस्त मिहेह ब्रवः॥”—इत्येषा च दृश्यतेऽतो विचारणीयैषा।

शिरो ह्यध्यात्मं द्युस्थानभक्तिः ; अतः सप्त ऋषयः, देवाः, विश्वे देवाः, साध्या इति सर्वे एते प्राणाः*; रश्मयो वेत्युपपद्यते† ॥

ब्राह्मण मपि चैत मर्थ मेवानुविदधाति ।—"अग्निः पशुरासीत्"—इत्येवमादि‡ ॥

"वसवः"—इति§, वक्तव्यम्। ते पुनरमी त्रिस्थानाः। ते यस्मात् सर्वं मिदं विभागेनावस्थित माच्छादयन्ति। कथम्? इति,—"वासवो ऽग्निरिति समाख्या, तस्मात् पृथिवीस्थानाः"||; "इन्द्रो वसुभिर्वासव —इति समाख्या, तस्मात् मध्यस्थानाः"¶ ; "वसव आदित्यरश्मयो विवासनात्, तस्मात् द्युस्थानाः"** ॥

"तेषाम्" "एषा" प्राधान्यस्तुतिः "भवति"—॥ ७ (४१) ॥

---

* "प्राणा वा ऋषयो दैव्यासः"—इति (२प० ४अ० २ख०), "प्राणा वै वालखिल्याः"—इति (६, प० ५अ० २ख०) च ऐ० ब्रा० ।

† रश्मयः(४), सप्तऋषयः(१२), साध्याः(१४)—इमानि च निघण्टौ पर्यायपदानि १अ० ५ख० (१भा०२२पृ०)।

‡ "तस्मादाज्ञरायेयो वावं सर्वः पशुरग्नि र्हि सोऽनुप्राण्यवतेति तस्मादस्याग्निं पुरस्ताद्धरन्ति स्तृणीत बर्हिरित्योषध्यात्मा वै पशुः पशु मेव तत्सर्वात्मानं करोति"—इति च ऐ० ब्रा० २प० १अ० ६ख० ।

§ निघ० ५अ० ६ख० २९ (१भा० ४९०, ४९६पृ०)। तत्रैव च पुरस्तात् १अ० ५ख० १० (१भा० २१, २६पृ०)।*

|| "क्रुविन्नो अग्निः०——०वसुभिः कामं मावरत् ।"—इति ऋ०सं० १,१,११,६ ।

¶ "यं न इन्द्रो वसुभिः"—इति ऋ० सं० ५, २, २९, १ ।

** "वसवः"—इति आदित्यरश्मिनामस्तु पठित मेव द्रष्टव्यम् (१भा० २२पृ०)

सुगा वो देवाः सुपथा अकर्म* य आजग्मुः सवन मिदं जुषाणाः। जक्षिवांसः पपिवांसश्च विश्वेऽस्मे धत्त वसवो वसूनि॥ स्वागमनानि वो देवाः सुपथान्यकर्म य आगच्छत सवनानीमानि जुषाणाः खादितवन्तः पीतवन्तश्च सर्वेऽस्मासु धत्त वसवो वसूनि तेषां मेषापरा भवति॥८(४२)॥

"सुगा वो देवाः"—इति†। परमेष्ठिन आर्षम्। समिष्टयजुःषु विनियोगः। हे 'देवाः!' ये यूयम् 'आजग्मुः' नित्य मागच्छत 'इदं सवनम्' इमं यज्ञम्, अस्माभिः सह 'जुषाणाः' प्रीयमाणाः। तेषां 'वः' 'अनुगच्छताम्' (सुगाः) "स्वागमनानि" शोभनानि आगमनानि पुनःपुनरस्मद्यज्ञेषु। एव मेव "सुपथानि" सुमार्गाणि सन्तु। किञ्च एतस्मिन् यज्ञे 'जक्षिवांसः' "खादितवन्तः" हवींषि, ('पपिवांसश्च') "पीतवन्तश्च" सोमम्, तृप्ताः सन्तः, ('अस्मे') "अस्मासु" 'धत्त' निधत्त हे 'वसवः!' 'वसूनि'।—एतदाशास्महे॥

समिष्टयजुःषु तृतीयसवने विनियोगादत्र द्युस्थानाः वसवः‡॥

---

* "सदेन मकर्म"—इति च-प्रभृतिषु।

† य० वा० सं० ८, १८। "सदेमा अकर्म"—इति तत्र पाठः।

‡ समिष्टयजुरिति "समिन्द्र णः"—इत्यादीनां नवानां मन्त्राणां सञ्ज्ञा। तत्रायं मन्त्रश्चतुर्थः "सुगा वो देवाः"—इति। एषां प्रयोगस्य तृतीयसवने एव भवति; तत्रैव विधानात् (का० श्रौ० सू० १०, ८, ११. द्र०)। तृतीयसवनस्य च आदित्यभक्तित्वा-देषां द्युस्थानत्व मपि सुतरा मेव; तृतीयसवनस्य आदित्यभक्तित्वं च्युक्तं पुरस्तात् (७अ० ३पा० ४ख० ३भा० ३९०पृ०)।

"त्रिस्थानाः"—इत्युक्तम्, यत इतरयोरपि स्थानयोः प्रदर्शयति ;—"तेषाम्" एषा "अपरा भवति"—॥ ८ (४२)॥

ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः। अर्वाक् पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य॥ ज्मया अत्र वसवोऽरमन्त देवा ज्मा पृथिवी तस्यां भवा उरौ चान्तरिक्षे मर्जयन्त गमयन्त शुभ्राः शोभमाना अर्वाच एनान् पथो बहुजवाः कुरुध्वं शृणुत दूतस्य जग्मुषो नो अस्याग्नेर्वाजिनो* व्याख्यातास्तेषा मेषा भवति ॥ ९ (४३)॥

"ज्मया अत्र वसवः"—इति† । वसिष्ठस्यार्षम् । "ज्मा पृथिवी", "तस्यां" ("भवाः") ये नित्यं भवन्ति, ते 'ज्मयाः' । 'रन्त' "अरमन्त" । 'अत्र' एतस्मिन् कर्मणि, अस्मिन् वा लोके । 'देवाः' "वसवः" । ये "च" "उरौ" विस्तृते अन्तरिक्षे विस्तीर्णे 'मर्जयन्त' मार्ष्टिर्गत्यर्थः‡ ; "गमयन्त" यद्यत्तेषां गमयितव्यम् ; अथवा वर्त्तमानाः । 'शुभ्राः' "शोभमानाः" । एत मनयोः स्थानयोः वसून् विभज्याधुना द्युस्थानांस्तान् कृत्वा ब्रवीति ;—ये यूय मेवं त्रिस्थानाः, तान् वो ब्रवीमि ;— नित्यम् 'अस्य' "अग्नेः" 'नः' अस्मद्-

---

* "नोऽस्याग्नेर्वाजिनो"—इति च-प्रभृतिषु ।

† ऋ० सं० ५, ४, ९, २ । वैश्वदेवस्यार्यं मन्त्रः (सा० भा० द०) ।

‡ "मार्ष्टि"—इति निघ० २, १४, १५ (१भा० २२९, १४१९०) ।

"दूतस्य"* 'जग्मुषः' युष्मान् प्रति गतवतः "शृणुत" यदयं ब्रवीति, श्रुत्वा चास्मान् 'अर्वाग्' आभिमुख्येन 'उरुज्रयः' "बहुजवाः" बहुप्रकारं प्रतत्वरस्य मागमनेनैव ('पथः') मार्गान् प्रहृतान् "कृणुध्वम्" ।—इत्येतदाशास्महे ॥

"वाजिनः"†, "व्याख्याताः";—"अपि स वाजी वेजनवान्"—इत्यत्र‡ ; केवल मत्र बहुवचनकृतो विशेषः, रश्मयस्त्व अभिधेयाः । पृथक् देवाश्वाः§ ॥

"तेषाम् एषा भवति" प्राधान्यस्तुतिः—॥ ९(४ ३) ॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः। जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ सुखा नो भवन्तु वाजिनो ह्वानेषु देवतातौ यज्ञे मितद्रवः सुमितद्रवः स्वर्काः स्वञ्चना इति वा स्वर्चना इति वा स्वर्चिष इति वा जम्भयन्तोऽहिञ्च वृकञ्च रक्षांसि च क्षिप्र मस्मद्यावयन्त्वमीवा|| देवाश्वा

---

* "'नः' अस्मदीयस्य 'अस्य' 'दूतस्य' अग्नेः आह्वानं 'श्रोत' शृणुत ; अग्निर्हि यजमानानां दूतः सन् देवानाह्वयतीत्यर्थः"—इति सा० भा० ।

† निघ० १ख० ६ख० २० (१भा० ४९०, ४९७पृ०) ।

‡ २ख० ७पा० ६ख० (२भा० २४८, २४९पृ०) ।

§ वक्ष्यत्यनुपद मेव स्वय माचार्यः—"देवाश्वा इति वा" इति (१४पं०) ।

|| "यावयन्नमीवा" क, ख, ग।

इति वा देवपत्न्यो देवानां पत्न्यस्तासां मेषा भवति ॥ १० (४४) ॥

"शन्नो भवन्तु वाजिनः"—इति*। वसिष्ठस्यार्षम्। वाजिन-यागे विनियोगः। ("देवताता") एतस्मिन् "देवतातौ, यज्ञे" "हवेषु" 'आह्वानेषु' 'शम्' ('नः') अस्माकं "सुखाः" ('भवन्तु') सन्तु 'वाजिनः'। किंलक्षणाः? 'मितद्रवः' "सु" स्निष्टं शोभनं ये द्रवन्ति, 'स्वर्काः' ये "स्वचनाः" शोभनम् अञ्चन्ति, गच्छन्ति; ("स्वर्चनाः") शोभनं वा अर्चनं येषां स्तुतिः; "स्वर्चिषः वा" येषां शोभना अर्चिषो दीप्तयः त आगच्छन्तु। आह्वानेष्वस्माकं 'जम्भ-यन्तः'। किम्? इति,—'अहिम्' "च" 'वृकम्' "च" यश्चास्माना-हन्ति, यश्च वृकस्तस्करो मुष्णाति, 'रक्षांसि' "च" येऽस्मान् रहसि जिघ्नन्ति, तांश्चास्मत्तः 'जम्भयन्तः' हिंसन्तः 'सनेमि' "चिप्रं"। सामर्थ्यादिह सनेमि—इति चिप्रनाम। 'युयवन्' सामर्थ्यात् अपेत्यध्या-हृत्य अप-"यावयन्तु" अपमिश्रयन्त्वित्यर्थः; इष्टश्च रक्षसां नाशनं न मिश्रण मिति†॥

"देवपत्न्यः"‡ वक्तव्याः। ताः पुनः "देवानां पत्न्यः" पालयित्र्यः

---

* ऋ० सं० ४, १, २८, ७; य० वा० सं० ९, १९।

† "युयवन्"—इति यजुर्व्याख्यायां महीधरेण त्वन्यथैव व्याख्यातम्। तथाहि— "किञ्च तेऽस्मा अस्मत्सकाशात् सनेमि चिप्र मनीवा व्याधीन् युयवन् पृथक् कुर्वन्तु। यु पृथग्भावे; अस्य कादित्वे लङि रूपम्; गुणाड्भावावावौ। सनेमीति पुराणनाम (निघ० ३, २७, ४); इह तु चिप्रवाचकः।"—इति।

‡ निघ० ५अ० ६ख० ३१ (१भा० ४९०, ४९०पृ०)।

पात्नीया वा। पत्नीसंयाजेष्वेता इज्यन्त इत्यतस्तृतीयसवनभक्तित्वादादित्यं भजन्ते*। तदुक्तम्;—"अथैतान्यादित्यभक्तीन्यसौ लोकस्तृतीयसवनम्"—इति† ॥ १०(४४) ॥

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये। याः पार्थिवासो या अपा मपि व्रते ता नो देवीः सुहवाः शर्म यच्छत॥ देवानां पत्न्य उशत्योऽवन्तु नः प्रावन्तु नोऽपत्यजननाय‡ चान्नसंसननाय च याः पार्थिवासो या अपा मपि कर्मणि व्रते§ ता नो देव्यः सुहवाः शर्म यच्छन्तु शरणन्तासा मेषापरा भवति ॥ ११ (४५) ॥

---

* "देवानां पत्नीः शंसति"—इत्यादिकं विधायकं ब्राह्मणं द्रष्टव्यम् (ऐ॰ ब्रा॰ ३पं॰ ३अ॰ १३ख॰)। आश्वलायने च पत्नीसंयाजेषु देवपत्नीनां देवानां पत्नीरित्यादिके द्वे याज्यानुवाक्ये विधीयेते (आ॰ श्रौ॰ सू॰ १, १०.)। तत्र "देवानां पत्नीः"—इत्याद्या (३३०पृ॰ ४पं॰) याज्या; "उत ग्ना व्यन्तु"—इत्युत्तरा (३३१पृ॰ १२पं॰) अनुवाक्या। "ते हैके सप्त सप्तान्वाहुः। सप्त प्रातःसवने, सप्त माध्यन्दिने, सप्त तृतीयसवने। यावत्यो वै पुरोऽनुवाक्यास्तावत्यो याज्याः; सप्त प्राञ्चो यजन्ति, सप्त वषट्कुर्वन्ति।"—इत्यादि याज्यानुवाक्यानां विधायकं द्रष्टव्यम् (ऐ॰ ब्रा॰ ६प॰ २अ॰ १ख॰)। देवपत्नीनां वैश्वदेवत्वन्तु "यत्तु किञ्चिद् बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते"—इत्युक्तेः (पृ॰२१५पृ॰२पं॰); वैश्वदेवानाञ्च तृतीयसवनत्वम् "तस्माद् वैश्वदेवं तृतीयसवनम्"—इत्यादिब्राह्मणशासनात् (ऐ॰ ब्रा॰ ६प॰ २अ॰ १ख॰)।

† पुरस्तात् द्रष्टव्यम् (७अ॰ ३पा॰ ४ख॰ ३भा॰ ३१०पृ॰)।

‡ "प्रावन्तु नस्तुजयेऽपत्यजननाय"—इति च-प्रभृतिषु।

§ "अपा मपि व्रते कर्मणि"—इत्येवं च-प्रभृतिषु।

"देवानां पत्नीः"—इति* । प्रतिचत्रस्येथ मार्षम् । आग्निमारुते पत्नीसंयाजेषु च विनियोगः । या एता देवपत्न्यो नित्य मस्मत्तो हविरश्नन्ति कामयन्ते, ता अस्मत्तो हविरुपभुज्य ततोऽस्मानवन्तु प्रतितर्पयन्तु धनेन । किञ्च; "प्रावन्तु नस्तुजये" । प्रकर्षेण अवन्तु रक्षन्तु "अपत्यजननाय", 'वाजसातये' च "अन्नसंसननाय" अन्न-सम्भजनाय "च" । कतमास्ताः ? 'याः पार्थिवासः' पृथिव्यां भवाः, 'याः अपा मपि' 'व्रते' "कर्मणि" वर्षोत्सर्गे व्यापृताः, सर्वाः 'सुहवाः' स्वाह्वानाः अस्माकं ('यच्छत') "यच्छन्तु" ददतु ('शर्म') "शरणं" गृहं सुखं त्राणं वा ।—इत्येतदाशास्महे ॥

"तासाम् एषा अपरा भवति"—। सा पुनः किमर्थम्? सामा-न्यतः पूर्वस्या मुक्ताः, विशेषतः परस्या मुच्यन्ते; पूर्वयैव समानार्ष-विनियोगा ॥ ११(४५)॥

उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् । आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्ज-नीनाम् । अपि (च †) ग्ना व्यन्तु देवपत्न्य इन्द्राणीन्द्रस्य पत्न्यग्नाय्यग्नेः पत्न्यश्विन्यश्विनोः पत्नी राट् राजते रोद-सी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यन्तु देव्यः

---

* ऋ० सं० ४, २, २८,७ । "अन्त्यो द्वृचो देवपत्नीस्तवः"—इत्यनुक्रमणी । तत्रेयं प्रथमा ; "उत ग्ना व्यन्तु"—इति तु (१२पं०) द्वितीया । अथ० सं० ७, ४, ११,१ ।

† नास्त्येतत् पदम् क-ख-ग-पुस्तकेषु ।

कामयन्तां य ऋतुः कालो जायानां य ऋतुः कालो जायानाम्* ॥ १२ (४६) ॥

॥ इति द्वादशाध्यायस्य चतुर्थः पादः ॥ १२.४.

"उत ग्ना व्यन्तु देवपत्नीः"—इति† । पुरुषैः पीत मग्न्यादिभिः; ('उत') "अपि" 'ग्नाः' स्त्रियः‡ 'व्यन्तु' पिबन्तु एतदाज्यम् । कतमाः ? "इन्द्राण्यग्नाय्यश्विनी राट्" §। 'आ शृणोतु' च 'रोदसी', 'वरुणानी' च आभिमुख्येन च स्थित्वा शृणोतु । "रोदसी रुद्रस्य पत्नी" । आथर्वणे रोदसीत्यप्रगृह्यं पदम्, तदपेक्ष्यैकवचनेन भाष्यकारो निराह—"रोदसी रुद्रस्य पत्नी"—इति|| । "वरुणानी च वरुणस्य पत्नी" । सर्वाः अप्येताः 'व्यन्तु' पिबन्तु एतदाज्यम् । "य ऋतुर्जनीनाम्" । यः

---

* अध्यायसमाप्तिसूचकं द्विर्वचनम्; नास्त्येतत् च-प्रभृतिषु ।

† ऋ० सं ४, २, १८, ८ । अथ० सं० ७, ४, ११, २ ।

‡ "मेना ग्ना इति स्त्रीणाम्"—इत्यादि द्रष्टव्यम् (२भा० २५६पृ० ६पं०) । "ग्ना गमनादापो देवपत्न्यो वापि च"—इत्यादि च द्रष्टव्यम् (पु० १५७पृ० १२पं०) । "'ग्नाः' स्त्रियः; 'देवपत्नीः' देवपत्न्यः; देवाः पतयो यासां ताः; तादृश्यः"—इति इह सा० भा०; अन्यत्र त्वन्यथा व्याख्यान मपि दृश्यते । तथाहि—"आस्मा इदु (ऋ० सं० १, ४, १८, २)"—इति मन्त्रव्याख्यानावसरे 'ग्नाश्चित्' गमनस्वभावा अपि, 'देवपत्नीः' देवानां पालयित्र्यो गायत्र्याद्या देवताः"—इति च सा० भा० ।

§ "'इन्द्राणी' इन्द्रस्य पत्नी; 'अग्नायी' अग्नेः पत्नी; 'अश्विनी' अश्विनोः पत्नी; 'राट्' राजमाना"—इति सा० भा० ।

|| "रोदसी"—इति पदं यत्र अन्तोदात्तम्, पदकारेण अप्रगृह्यावगृहीतञ्च, तत्रैव एकवचनान्तं गम्यते; रुद्रपत्नी, मरुत्पत्नी, विद्युद्वेति च तदर्थो बुध्यते । यत्र तु "रोदसी"—इति आद्युदात्तम्, पदकारेण "रोदसी इति"—इत्येवं प्रदर्शित-प्रगृह्य मेवावगृहीतञ्च, तत्रैव द्विवचनान्तं गम्यते; द्यावापृथिव्यौ च तदर्थः । "ईदूदेद्द्विवचनं प्रगृह्यम् (१, १, ११)"—इति पाणिनिशासनात् द्विवचनान्तस्यैव हि

(“कालः”) भोजनकालो “जायानाम्”। तस्मिन् काले दीयमानम्। कस्यासौ? भुक्तवत्सु पुरुषेष्विति * ॥ १२(४६)॥

इति ऋज्वर्थायां निरुक्तवृत्तौ सप्तदशाध्यायस्य (द्वादशाध्यायस्य) तुरीयः पादः ॥ १२।४ ॥

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ

ऋज्वर्थायां निरुक्तवृत्तौ

सप्तदशोऽध्यायः (द्वादशोऽध्यायः) समाप्तः ॥ १२ ॥

प्रश्लिष्टस्वरश्रुता। ऋक्संहितायां तु ‘उत ग्ना व्यन्तु’—इत्यस्यामप्यृचि “रोदसी इति”—इत्येवावग्रहो दृश्यते, तथापि तत्र प्रश्लिष्टस्वरश्रवणादिदं पदं द्विवचनान्तं द्यावापृथिव्योर्वाचकमित्येव कथमत्र देवपत्नीनां निगमत्वेनोदाहृतं यास्केनेत्याशङ्कामपनोदयितुमाह वृत्तिकृत्—“आथर्वणे रोदसीत्यप्रश्लिष्टं पदम्”—इत्यादि। एवञ्चाथर्वणिक एवैष मन्त्र उद्धृत इति बोध्यम्; न तु बाह्वृचोऽयमिति। सायणाचार्यस्तु ऋक्संहितायां पदकारस्य हि शाकल्यस्यैवर्षेः प्रौढिमामूलक एवैष अवग्रहो वस्तुतोऽपाय इति समर्थयन्नाह—“किञ्च ‘रोदसी’ “रुद्रस्य पत्नी”—इति यास्केनोक्तम्। एवं सति “विषितस्तुका रोदसी (ऋ० सं० १, ४, ४, ५)”—इत्यत्र यथाद्युदात्तप्रश्लिष्टो न स्वरः, तद्वदत्रापि भाव्यम्; तथापि शाकल्येन महर्षिणैव मुक्तत्वाच्चैव द्रष्टव्यम्”—इति। अन्यथाप्येवं दृश्यते। तथाहि “परा शुभा (ऋ० सं० १, ४, ४, ४)”—इत्यस्यामपि ऋचो व्याख्यानावसरे—“द्यावापृथिवीवचनो रोदसीशब्दः सर्वत्राद्युदात्तः; अत्र तु व्यत्ययेनान्तोदात्तत्वमिति द्रष्टव्यम्। यद्वा रोदसा शब्देन रोदनस्वभावो रुद्रः, तस्य स्त्री रोदसीति केचिदाहुः; अपरे तु मरुतां स्त्रियो रोदसीति नामधेयमित्याहुः। अयमेव पक्षो युक्तः, उत्तरत्रैवं व्यवहारात्।”—इति सा० भा०। “अन्तोदात्तो रोदसीशब्दो रुद्रपत्नीवचनः”—इति चाह “विषितस्तुका रोदसी (ऋ० सं० १, ४, ४, ५)”—इत्यस्य व्याख्यानावसरे माधवः।

* “ये ‘अग्नीनां’ देवजायानाम् ‘ऋतुः’ कालः, तदभिमानी देवोऽपि गृह्णन्तु अस्तु च”—इति सा० भा०।

([1]अथातोद्युस्थाना[2]वसातिषुस्मे[3]हेहजाता[4]प्रातर्युजा-
[5]प्रातर्यजध्व[6]मुषस्तच्चित्र[7]मेताउत्याः[8]सुकिं[9]शुकं[10]हषाकपाय्य-
पागू[11]हन्[12]त्वष्टादु[13]हिवेसविता[14]विश्वारूपाणि[15]प्रातर्जितमुद्-
[16]त्यच्चित्रं[17]शुक्रन्ते[18]पयस्[19]पथइदं[20]विष्णुर्विश्वानरो[21]विश्वानरस्य-
[22—25]येनापावकेति चतुष्कं[26]केभ्य१ ग्निं[27]चयःकेशिनः[28]पुनरेहि[29]य-
[30]स्मिन्वृक्षे[31]पावीरवी[32]यदिन्द्राग्नी[33]पवित्रवन्त[34]उतनोहियमथ-
[35]वाथातोद्युस्थानादेवगणा[36]इमागिरः[37]सप्तऋषयस्[38]तिर्यग्बि-
[39]लोदेवाना[40]म्भद्रौ[41]मांसोयज्ञेन[42]सुगावो[43]ऽन्मया[44]श्वचशन्नोभ-
[45]वन्तुदेवानां[46]पत्नीरुतग्नाव्यन्त्विति षट्चत्वारिंशत् ॥*)

॥ इति निरुक्ते (उत्तरषट्के) द्वादशोऽध्यायः† ॥ १२ ॥

(दैवतं काण्डं समाप्तम् ‡)

॥ इति नैरुक्तोत्तरार्द्धः समाप्तः § ॥

---

* १भा० १४६पृ० "**" द्रष्टव्यम् ।

† " इति नैरुक्ते उत्तरषट्के षष्ठोऽध्यायः "—इति ज-पाठः ।

‡ निघण्टुव्याख्यान मिहैव समाप्तम् ।

§ क-ख-पुस्तकयोरेवैष पाठो नान्यत्र ।

॥ अधिकपाठाः ॥

ञ-नाम पुस्तके सर्वेषा मेवाध्यायाना मन्तेषु खण्डप्रतीकपाठेभ्यः पुर एवाग्रिमाध्याय प्रतीकपाठा अपि दृश्यन्ते; अध्यायान्ते च तथैवाध्यापकैरिदानी मपि, "सन्तापाठः" —इति च सन्नाम श्रुत मस्माभिः श्रीगुरुपादेभ्यः। सर्वेषा मेव वैदिकग्रन्थाना मध्यायान्तेषु, बहुच खण्डान्तेष्वपि सन्तापाठरीतिर्वैदिकानां सम्यगेव परं न तादृशपाठानां निवेशो दृश्यते सर्वेष्वेव पुस्तकेष्विति। अस्य खलु ञ-नामपुस्तकस्य पूर्वार्द्धः खण्डितः; उत्तरार्द्धे तु सर्वत्रैव तादृशाधिकपाठा राजन्त एव। तथाहि—

सप्तमाध्यायान्ते (२भा० ४२४पृ०) "एतेन नामधेयेन भजेते भजेते ॥ ९ (२१) ॥"—इत्यतोऽनन्तरमेव **"द्रविणोदाः कस्मादित्यादिः"**—इत्यधिकपाठः। एष एव चाष्टमाध्यायप्रतीकपाठः (२भा० ४२९पृ०) सन्तापाठ इति व्यपदिश्यते; एतदनन्तरं च "अथातः"—इत्यादिः (२भा० ४२८पृ०) खण्डप्रतीकपाठः।

अष्टमाध्यायान्ते (२भा० ४९०पृ०)—

"अथ यानि पृथिव्यायतनानीत्यादिः"—इत्यधिकपाठः।

नवमाध्यायान्ते (४भा० ६५पृ०)—

"अथातो मध्यस्थाना देवता इत्यादिः"—इत्यधिकपाठः।

दशमाध्यायान्ते (४भा० १५७पृ०)—

"श्येनो व्याख्यात इत्यादिः"—इत्यधिकपाठः।

एकादशाध्याये (४भा० १४४पृ०)—

"अथातो द्युस्थाना देवता इत्यादिः"—इत्यधिकपाठः।

द्वादशाध्यायान्ते (४भा० २२१पृ०)—

"अथेमा अतिस्तुतय इत्याचक्षत इत्यादिः"—इत्यधिकपाठश्च।

॥ एवमन्येऽपि ॥

(इति उत्तरषट्कम्)

(अथ परिशिष्टम्*)

॥ अथ त्रयोदशाध्यायः† ॥

तत्र,

प्रथमः पादः‡ ॥

अथेमा अतिस्तुतय इत्याचक्षतेऽपि वा सम्प्रत्यय एव स्यान्माहाभाग्याद्देवतायाः सोऽग्नि मेव प्रथम माह

---

* परिशिष्टग्रन्थस्तु सर्वेष्वेव पुस्तकेषु पञ्चाशत्खण्डात्मकः ; तत्र केषुचित् पुस्तकेषु अध्यायद्वयात्मः, केषु चिदेकाध्याय एवेति विशेषः। वृत्तिकृता खलु त्रयोदशखण्डात्मकस्याद्याध्यायस्यैव व्याख्यानं कृतम्, पादत्वञ्चास्याभिहितम्; पञ्चाध्यायात्मनिघण्टुसहितसपादसप्तदशाध्यायात्म एवासौ निरुक्तग्रन्थ इति तद्व्याख्यासमाप्तिलेखात् प्रतीयते च। तत्रापि पञ्चमादिखण्डचतुष्टयानां वृत्तिर्नोपलभ्यतेऽद्य। तथा च वृत्तिकृन्मते एकपादात्म एष चाध्यायो यास्कीय एव। सायणाचार्यमतेऽप्येव मेव; ऋग्भाष्यादौ "यदुदञ्चो वृषाकपे गृह मिन्द्राजगमत् (प० १३ ख० ३श०३४१९०)"—इत्यादीनां परिशिष्टग्रन्थाना मप्युद्धृतिदर्शनात् (ऋ०सं०८, ४, ४, १)। नव्यास्तु "समाम्नायः समाम्नातः स व्याख्यातव्यः"—इत्येव (१भा० ७पृ०) यास्कप्रतिज्ञादर्शनात् द्वादशैरेवाध्यायैस्तत्प्रतिज्ञापूर्त्तेन परिशिष्टकरण मिह सम्भवतीत्याहुः। विचार्यञ्चैतत्।

† क-प्रभृतिषु पुस्तकेषु एकाध्यायात्मक एवैष परिशिष्टग्रन्थः; अत्र पादाश्च चत्वारः। ख-प्रभृतिषु तु क-प्रभृति-पुस्तकानुयायि-प्रथमपादमात्रस्यैव त्रयोदशाध्यायत्वम्, तदुत्तराणान्तु द्वितीयादिपादानां चतुर्दशाध्यायत्वञ्चेति; नास्ति च तेषु पादविभागः क्वचिदपि।

‡ अस्यैव व्याख्यानं कृत मिह वृत्तिकृता भगवद्दुर्गाचार्येण; इत उत्तरग्रन्थाना मधुना मूलग्रन्थेषु सर्वेष्वेव दृश्यमानाना मपि द्वितीयादिपादानां विद्यमानतापि तेन

त्व मग्ने द्युभिस्त्व माशुशुक्षणिरिति यथैतस्मिन्सूक्ते* न हि त्वदारे निमिषश्च नेश इति वरुणस्यार्थैषेन्द्रस्य ॥ १ ॥

"अथेमा अतिस्तुतय इत्याचक्षते"—इत्येवमादिवक्तुं प्रकृतशेष मनुवर्त्तते। किञ्चात्र प्रकृतम्? स्तुतिलक्ष्या देवतेति—"यत्काम ऋषिर्यस्यां देवताया मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते"—इत्यत्र। ताः स्तुतयः कर्माधिकारनिरताः; स्वकर्माधिकारातिक्रमेण स्वगुणातिशयेन च याः, ता उपप्रदर्श्याः; तदर्थं विशेषतः पुनरधिकारवचनम्—"अथ"—इति। "इमाः" या वक्ष्यमाणास्ताः "अतिस्तुतयः—इत्याचक्षते" अन्येऽप्याचार्या एव मेवैताः 'आचक्षते' कथयन्ति शिष्येभ्यः अतिस्तुतय एता इति; प्रसिद्धा ह्येव मेतासु सञ्ज्ञेत्यभिप्रायः। ("अपि वा") अथवा नैवैतदतिस्तवनम्। किं तर्हि? "सम्प्रत्यय एव स्यात्" देवतासमान मेव। किं कारणम्? न ह्यतिशयो नाम देवतायाः स्तुतिरस्ति। कस्मात्? "माहाभाग्याद् देवतायाः"—इति†; न हि विभूतेरियत्तास्ति, या मतिरिच्य स्तूयेत। तदुक्तम्—"ऋचीषमः"—इति‡। तथा च "नार्वागिन्द्रं प्रतिमानानि देभुः"—इति§ ॥

ज्ञायते न ति सन्देहोऽस्माकम्; तद्दृष्टिविशेषे (२६१२पृ०) हि "सपादसप्तदशाध्यायी"—इत्युल्लेखात्।

* "यथैतस्मिन् सूक्ते" ग, भ.।

† ७अ० १पा० १ख० (२भा० १८५पृ०)।

‡ ७अ० २पा० १ख० (२भा० २१०पृ०)।

§ ६अ० ५पा० १ख० (२भा० २२९, २४१पृ०) तट्टीप्पनी च द्रष्टव्या।

|| ५अ० २पा० ८ख० (२भा० ९९, ९८पृ०)।

नैरुक्तसमयानुवृत्तये अतिस्तुतयः प्रदर्श्यन्ते—"सः" इति, स्तोता असावाचार्यः "अग्नि मेव" अधिकृत्य "प्रथम माह"। किं कारणम्? येनैव हि क्रमेण स्तुतयः उपप्रदर्शिताः, तेनैवात्र क्रमेणातिस्तुतयो न्याय्याः प्रदर्शयितुम्; न ह्यसति कारणे मुख्यातिक्रमो न्याय्य इति। क्व? यथा;—

"त्व मंग्ने द्युभिस्त्व माशुशुक्षणिः"—इति *। यथैतस्मिन् सूक्ते स्वकर्माधिकारव्यतिरेकेण, अतिशयेन वा स्तुतिः॥

मध्यस्थाने—"न हि त्वदारे निमिषश्च नेशे"—इति† "वरुणस्य"। "अपो सु म्यक्ष वरुण"—इति‡। हे भगवन्! 'वरुण!' 'सम्राट्!' 'ऋतवन्!' यदेतद् 'अपः' कर्म किञ्चित्, 'भियसम्' भयङ्कर मस्मासु 'अंहः' पापं यदात्मनः कायकृतम्, तदस्मत्तो 'दामेव वत्सात्' 'विमुमुग्धि' त्वं प्रमुञ्च। ततश्च तत्प्रमुच्य 'सुम्यक्ष' सुष्ठु गमय, नाशयेत्यर्थः। कस्मात्पुनरेवं ब्रूमहे? इतः;—यस्मात् "न हि त्वदारे निमिषश्च नेशे" त्वदन्तिकेऽपि वर्त्तमानस्य दूरेऽपि च यः कश्चित्तस्यापि त्वदन्यो नेशे; त्व मेव दूरे चान्तिके च ईशिषे इत्यभिप्रायः॥

---

* ६अ० १पा० १ख० (२भा० ११९,१२०पृ०)।

† ऋ० सं० २, ७, १०, १। अत्रैकादशर्चं वारुणं नाम सूक्तम्, तत्र या षष्ठी, तस्याश्चतुर्थपाद एषः। "इद मेकादशर्चन्तु वारुणं भयपापनुत्। ऋणदारिद्र्यदुःस्वप्न-नाशनं चेति शुश्रुम"॥—इति केचिदाहुः।

‡ पाठस्त्वेषः—"अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय। दामेव वत्साद्वि मुमुग्ध्यंहो न हि त्वदारे निमिषश्च नेशे॥"—इति ऋ० सं० २, ७, १०, १।

"अथ एषा इन्द्रस्य"—॥ १ ॥

यद् द्याव* इन्द्र ते शतं शतं भूमीरुत स्युः। न त्वा वज्रिन्त्सहस्रं† सूर्या अनु न जातमष्ट रोदसी॥ यदि त इन्द्र शतं दिवः शतं भूमयः प्रतिमानानि स्युर्न त्वा वज्रिन्त्सहस्र‡ मपि§ सूर्या न द्यावापृथिव्यावप्यभ्यश्नुवीता मित्यर्थैषादित्यस्य॥ २ ॥

"यद् द्याव इन्द्र ते शतम्"—इति‖। पुरुहन्मन आर्षम्। बृहती। वैरूपे स्तोत्रियानुरूपे। हे भगवन्! 'इन्द्र!' ('यद्') "यदि" ('ते') तव 'शतम्' ('द्यावः') "दिवः", 'शतं' च ("भूमीः") "भूमयः", 'सहस्रं' च 'सूर्याः', 'रोदसी' ('उत') "अपि" च समः ते "प्रतिमानानि" उपमानानि ('स्युः') भवेयुः, कथञ्चित्;—तथापि ('त्वा') त्वां ('जातम्') जातमात्र मपि सर्वाणि अपि तानि 'नाष्ट' "नैवाभ्यश्नुवीरन्"। किं तर्हि? त्व मेवैतानि सर्वाणि अभ्यश्नुवीथाः; अतिरिच्य वर्त्तथा इत्यर्थः¶ ॥

"अथ एषा आदित्यस्य"—॥ २ ॥

---

* "यद्याव" ख, ग, ङ, झ।

† "वज्रिन् सहस्र" ख, ग, ङ, झ।

‡ "वज्रिन् सहस्र" ख, ग, ङ, झ।

§ अपि शब्दो नास्ति ग-ङ-झ-पुस्तकेषु।

‖ ऋ० सं० ६, ५, ८, ५; सा० स० उ० आ० ३, २, ४, ९।

¶ "हे 'इन्द्र!' 'ते' तव प्रतिमानार्थं 'यद्' यदि 'शतं' 'द्यावः' द्युलोकाः 'स्युः',

यदुदञ्चो वृषाकपे गृह मिन्द्राजगन्तन। क्वा१स्य पुल्वघो मृगः क मगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः॥ यदुदञ्चो वृषाकपे गृह मिन्द्राजगमत क्व स्य पुल्वघो मृगः क्व स वह्लादी मृगो मृगो मार्ष्टेर्गतिकर्मणः क्व मगमद्देशं जनयोपनः सर्वस्माद्य इन्द्र उत्तरस्त मेतद् ब्रूम आदित्य मथैषादित्यरश्मीनाम्॥ ३॥

"यदुदञ्चो वृषाकपे"—इति*। पङ्क्तिः। इन्द्राण्या आर्षम्। पृष्ठ्यस्य षष्ठेऽहनि विनियोगः। हे भगवन्! 'वृषाकपे!' 'इन्द्र!' यदा त्वम् 'उदञ्चः' उदङ्ङेव वर्त्तमानः, प्रदक्षिणं भुवनानि परिगच्छन् 'गृहम्' 'अजगन्तन'; गृहानुप्रवेशे हि व्यवधीयते, व्यवधीयते च भगवानस्तं गच्छन्नादित्यः,—इत्येतस्मात् सामान्यादुच्यते "गृह मिन्द्राजगन्तन"—इति। तदा त्वयि गृह मुपगते, अदृश्ये निरालोको लोकः सहसैव विस्मितो ब्रवीति—"क्वा१ स्य पुल्वघो मृगः"। 'स्यः' "सः"। ('पुल्वघः') पुरुशब्दात् पूर्वपदम्, घसेरुत्तर-

---

तथापि नाश्नुवन्ति। 'उत' अपि च 'भूमीः' भूम्यः 'ते' तव मूर्त्तिप्रतिबिम्बाय 'शतं' स्युः, तथापि न अश्नुवन्ति। हे 'वज्रिन्!' 'ते' त्वां 'सहस्रं सूर्याः' अगणिता अपि सूर्याः न 'अनु' भवन्ति, न प्रकाशयन्तीत्यर्थः। "न तत्र सूर्यो भाति"—इति (क० उ० २, १५.) श्रुतेः। किं बहुना—'जातम्' पूर्व मुत्पन्नं किञ्चन 'नाष्ट' नाश्नुते। तथा 'रोदसी' द्यावापृथिव्यौ नाश्नुवाते; सर्वेभ्योऽतिरिच्यस इत्यर्थः। "ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः"—इति (छ० आ० ३, ८.) श्रुतेः॥"—इति सा० भा०।

* ऋ० सं० ८, ४, ४, २।

पदम्; क स "बह्वादी"*, 'मृगः' बह्वसावन्ति सर्वप्राणिष्ववस्थितः। तदुक्तम्—"सूर्य आत्मा जगतस्तस्थुषश्च—इति†। "मृगो मार्ष्टेर्ग-त्यर्थस्य"; न ह्यसाववतिष्ठते; मार्ष्ट्येव हि मृगः। ('क मगन्'‡) "कं देशं मगमत्" गतवान्?— येनास्माकं मदृश्यः, स देवो 'जनयोपनः' जनमोहनो बभूव; उदयास्तमयपरिगमनादादित्यस्य जना मुह्यन्ते; तत्त्वापरिज्ञानाद्। 'विश्वस्मात्' "सर्वस्माद्" जगतो 'यः' त्वम् 'इन्द्र!' 'उत्तरः', "त मेतन्त्वा मादित्यम्" एवं "ब्रूमः"—"यदुदञ्चो वृषा-कपे"—इति॥

"अथ एषा आदित्यरश्मीनाम्" अतिस्तुतिः—॥ ३॥

वि हि सोतोरसृक्षत नेन्द्रं देव ममंसत। यत्राम-दद् वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः॥ व्यसृक्षत हि प्रसवाय न चेन्द्रं देव ममंसत यत्रामाद्यद् वृषाकपिरर्य ईश्वरः पुष्टेषु पोषेषु मत्सखा मम सखा मदनसखा ये नः सखायस्तैः सहेति वा सर्वस्माच्च इन्द्र उत्तरस्त मेतद् ब्रूम आदित्य मथैषाश्विनोः॥ ४॥

"वि हि सोतोरसृक्षत"—इति§। पूर्वयैव समानार्थविनियोग-

---

* "पुत्त्वधः—बह्वनां भीमरसाना मशा"—इति सा० भा०।

† ऋ० सं० १, ८, ७, १; सा० सं० आर० आ०।

‡ "एकस्यापि बहुवचनम् पूजार्थम्"—इति सा० भा०।

§ ऋ० सं० ८, ३, १९, १।

च्छन्दस्का* । 'व्यसृजत' यदादित्यो रश्मीनसृज्यहनि 'सोतोः' सर्व-भूत-"प्रसवाय" अभ्यनुज्ञानाय; तत्प्रकाशितलोकस्य सर्वकर्मोपपत्तेः । तदा किम्? इति । तदा ते रश्मयः सर्वकर्मण्यनुगमनात् 'नेन्द्रं देव ममंसत' त मेवेन्द्र मादित्यं येन विसृष्टाः, त मेत मात्मनो दीपयितारं न मन्यन्ते; स्वमहिम्नैव वयं दीप्यामह इति मन्यन्ते । कदा? यदा रश्मिपोषं पुष्यति, 'पुष्टेषु' एकीभूतेषु मध्यन्दिने । 'मत्सखा' "मम सखा"—इति मन्त्रदृगाह । अथवा सर्व एव मन्यते 'ममायं सखा'-'ममायं सखा'—इति । अथवा "मदन-सखा" हर्षसखेत्यर्थः; अथवा "ये नः सखायः" रश्मयः "तैः सहेति" । 'विश्वस्मात्'—इति, उक्तार्थः† ॥

"अथैषा वाचः प्रवल्हिता इव"‡—॥ ४ ॥

सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु§ ॥

---

* सायणमते तस्या ऋचः इन्द्र ऋषिः; माधवभट्टमते तु इन्द्राणीति विस्तरतः सायणीये भाष्ये द्रष्टव्यम् ।

† इहैव पुरस्ताद् द्रष्टव्यः- ११अ० १पा० ९ख० (१९४पृ०) । उक्तशब्दार्थस्तु २अ० ३पा० २ख० (१भा० १९९पृ०) द्रष्टव्यः ।

‡ अस्य खण्डस्य शेषवाक्यम् "अथैषाश्विनोः"—इति, अष्टमखण्डशेषवाक्यञ्च "अथैषा वाचः प्रवह्लितेव"—इति, सर्वेष्वेव मूलपुस्तकेषु; परं वृत्तिग्रन्थे तु एतत्खण्डान्त एव "अथैषा वाचः प्रवल्हितेव"—इति दृश्यते; किञ्च उत्तराणाञ्च खण्डचतुष्टयानां (५, ६, ७, ८ख० ३४३पृ० ११पं० —— ३४७पृ०) व्याख्यानानि वृत्तौ नोपलभ्यन्ते ।

§ ऋ० सं० ८, ६, २, १ ।

सृण्येवेति द्विविधा सृणिर्भवति भर्त्ता च हन्ता च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुर्फरीतू हन्तारौ। नैतोशेव तुर्फरी पर्फरीका। नितोशस्यापत्यं नैतोशं नैतोशेव तुर्फरी क्षिप्रहन्तारौ। उदन्यजेव जेमना मदेरू। उदन्यजेवेत्युदकजे इव रत्ने सामुद्रे चान्द्रमसीति वा* जेमने जयमने। जेमना मदेरू। ता मे जराय्वजरं मरायु। एतज्जरायुजं शरीरं शरद मजीर्ण मथैषा सोमस्य ॥ ५† ॥

तरत्स मन्दी धावति धारा सुतस्यान्धसः। तरत्स

---

* "चान्द्रमसे वा" च, छ, ज।

† " 'सृण्येव' सृण्याविव। सृणिरङ्कुशः। तत्र साधुरिति यत्। अङ्कुशार्हौ मत्तगजाविव। 'जर्भरी' गात्रविनामं कुर्वन्तौ।०——०। यद्वा; 'सृण्येव' सृणिः द्विविधा; —मत्तगजस्यैकत्रावस्थापयित्र्येका, अपरा बाधयित्री।०—०। तादृश्यौ सृण्याविव 'जर्भरी' भर्त्तारौ, एकत्रैवावस्थापकौ। तथा 'तुर्फरी' तुर्फरीतारौ, शत्रूणां हन्तारौ।०——०। 'नैतोशेव' मितोशतिर्वधकर्मा। नितोशतीति नितोशः, तस्यापत्यं नैतोशः। ताविव 'तुर्फरी' शत्रूणां हन्तारौ।०—०। 'पर्फरीका' पर्फरीकौ, शत्रूणां विदारयितारौ। ०-०। यद्वा; स्तोतृजनानां धनादिदानेन पूजयितारौ। ०—०। 'उदन्यजेव' उदके भव मुदन्यम्। ०—०। तत्र जातौ इव निर्मलौ, कान्तियुक्तावित्यर्थः। 'जेमना' जेमनौ, जयशीलौ।०—०। 'मदेरू' बलातिशयेन मत्तौ स्तुत्यौ वा। 'ता' तौ पूर्वोक्तगुणावश्विनौ युवां 'मे' मदीयं 'जरायु' जरायुजम् अत एव 'मरायु' मरणशीलं शरीरम्। 'अजरम्' जरारहितं मरणधर्मरहितम्, कुरुतम्।० - ०।"—इति सा० ऋ० भा०।

मन्दी धावति*॥ तरति स पापं सर्वं मन्दी य स्तौति धावति गच्छत्यूर्द्ध्वाङ्गतिं धारा सुतस्यान्धसः। धारयाभिषुतस्य सोमस्य मन्त्रपूतस्य वाचा स्तुतस्यार्थैषा यज्ञस्य॥ ६[†]॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्याँ[‡] आ विवेश[§]॥ चत्वारि शृङ्गेति वेदा वा एत उक्तास्त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्तासः सप्त छन्दांसि त्रिधा बद्धस्त्रेधा बद्धो मन्त्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवण मस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेन मृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्त्याँ[||] आविवे-

---

* ऋ० सं० ७, १, १४, १।

† "'मन्दी' देवानां हर्षकरः, स सोमः, 'तरत्' स्तोतॄन् पाप्मनः सकाशात् तारयन् 'धावति' पवते। तदेव दर्शयति—'सुतस्य' अभिषुतस्य 'अन्धसः' देवानामन्नात्मकस्य सोमस्य 'धारा' धावतीति। पुनरपि तदेवाद्यात्यन्तादरार्थम्—"तरत् स मन्दी धावति"—इति। यद्वा; अस्या ऋचो यास्केनोक्तोऽर्थो द्रष्टव्यः। तद्यथा—"तरति०—०सुतस्य"—इति।"—इति सा० ऋ० भा०।

‡,|| "मर्त्त्यां" ख, ग, ङ, भा।

§ ऋ० सं० ३, ८, १०, ३।

शेत्येष हि मनुष्यानाविशति* यजनाय तस्योत्तरा-भूयसे निर्वचनाय ॥ ७† ॥

---

* "मनुष्याणाविशति" ख, भ ।

† "यद्यपि सूक्तस्य अग्नि सूर्यादिपक्षदैवताकत्वात् पक्षधायं मन्त्रो व्याख्येयः, तथापि निरुक्तायुक्तरीत्या यज्ञात्मकाग्नेः सूर्यस्य च प्रकाशकत्वेन तत्परया व्याख्यायते ।

अस्य यज्ञात्मकस्याग्नेः 'चत्वारि शृङ्गाः' चत्वारो वेदाः शृङ्गस्थानीयाः । यद्यप्यापस्तम्बेन "यज्ञं व्याख्यास्यामः, स त्रिभिर्वेदैर्विधीयते (परिभा० १, २.)"—इत्युक्तम्, तथाप्याथर्वणस्येतरानपेक्षयैवैकाग्निसाध्यानां क्रतूनाकर्मणा मभिधायकत्वात् तदपेक्षया चत्वारि शृङ्गेत्युक्तम् । 'त्रयो अस्य पादाः' सवनानि त्रीण्यस्य पादाः; प्रवृत्तिसाधनत्वात् पादा इत्युच्यन्ते । 'द्वे शीर्षे' ब्रह्मौदनम्, प्रवर्ग्यश्च । इष्टिसोमप्राधान्येनेदमुक्तम् । 'सप्त हस्तासः' सप्त छन्दांसि । हस्ता अनुष्ठानस्य मुख्यं साधनम्; छन्दांस्यपि देवताप्रीणनस्य मुख्यसाधन मिति हस्तव्यवहारः । 'त्रिधा बद्धः' मन्त्रकल्पब्राह्मणैः त्रिःप्रकारं बद्धः; बन्धन मस्य तन्निष्पाद्यत्वम् । 'वृषभः' फलानां वर्षिता । 'रोरवीति' भृशं शब्दायते; ऋग्यजुःसामोक्थैः शस्त्रयागस्तुतिरूपैः होत्राद्युत्पादितैः ध्वनिभिः असौ रौति । एवं 'महो देवः' 'मर्त्यान् आविवेश'; मर्त्यैर्यजमानैः निष्पाद्यत्वात् प्रवेश उपचर्यते । अथ यास्कः० ——— ० ।

अथ सूर्यपक्षे व्याख्यायते ।—'अस्य' आदित्यस्य 'चत्वारि शृङ्गाणि' चतस्रो दिशः; एताः श्रयणार्थत्वात् शृङ्गाणीत्युपचर्यन्ते । 'त्रयो अस्य पादाः' त्रयो वेदाः पादस्थानीयाः भवन्ति गमनसाधनत्वात्; तथाहि—"ऋग्भिः पूर्वाह्णे दिवि देव ईयते"—इत्युपक्रम्य "वेदैरशून्यस्त्रिभिरेति सूर्यः"— इति हि वेदत्रयेण गतिराम्नाता ; 'द्वे शीर्षे' अहश्च रात्रिश्चेति द्वे शिरसी । 'सप्त हस्तासो अस्य' सप्त रश्मयः, षट् विलक्षणा ऋतवः, एकः साधारणः इति वा सप्तहस्ता भवन्ति । 'त्रिधा बद्धः' त्रिषु स्थानेषु क्षित्यादिषु अग्न्याद्यात्मकत्वेन सम्बद्धः; ग्रीष्मवर्षाहेमन्ताख्यैः त्रिभिः त्रेधा बद्धो वा । 'वृषभः' वर्षिता । 'रोरवीति' शब्दं करोति वृष्ट्यादिद्वारा । सः 'महो' महान् 'देवः' 'मर्त्यान् आविवेश' तन्नियन्तृतया; "सूर्य आत्मा जगतस्तस्थुषश्च (ऋ० सं० १, ११५, १.)"—इति हि श्रुतम् ।

स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी। यज्ञं ये विश्वतोधारं सुविद्वांसो* वितेनिरे †॥ स्वर्गच्छन्त ईजाना वा नेक्षन्ते तेऽमु मेव लोकं गतवन्त मिक्षन्त मिति‡। आ द्यां रोहन्ति रोदसी। यज्ञं ये विश्वतोधारं सर्वतोधारं सुविद्वांसो§ वितेनिर इत्यथैषा वाचः प्रवल्हितेव ॥ ८‖ ॥

एवं त्वबादिपक्षेऽपि योज्यम्।

शाब्दिकास्तु शब्दब्रह्मपरतया 'चत्वारि शृङ्गा—इति, चत्वारिपदजातानि नामाख्याते चोपसर्गनिपाताश्च'—इत्यादिना व्याचक्षते।

अपरे त्वपरथा। तत्सर्वं मत्र द्रष्टव्यम्॥"—इति सा० ऋ० भा०।

शाब्दिकमते यथा—"'चत्वारि शृङ्गाणि' चत्वारिपदजातानि; नामाख्यातोपसर्गनिपाताश्च। 'त्रयो अस्य पादाः' त्रयः कालाः; भूतभविष्यद्वर्त्तमानाः। 'द्वे शीर्षे' द्वौ शब्दात्मानौ; नित्यः कार्यश्च। 'सप्तहस्तासो अस्य' सप्त विभक्तयः। 'त्रिधाबद्धः' त्रिषु स्थानेषु बद्धः; उरसि कण्ठे शिरसीति। 'वृषभः' वर्षणात्। 'रोरवीति' शब्दं करोति। कुत एतत्? रौतिः शब्दकर्मा। 'महो देवो मर्त्यान् आविवेश'—इति। महान् देवः शब्दः, मर्त्याः मरणधर्माणो मनुष्याः, तान् आविवेश। महता देवेन साम्यं यथा स्यादित्यध्येयं व्याकरणम्॥"—इति पा० म० भा० १अ० १पा० १आ०।

*,§ "सुविद्वाँसो" च।

† वा० सं० १७, ६८।

‡ "गतवन्त ईक्षन्त इति" ख, ग; "इच्छन्त इति" रोथस्य दृष्टे Z पुं०।

‖ "आग्नेयी अनुष्टुप्। सुष्ठु विदन्ति जानन्ति ते सुविद्वांसः ज्ञानकर्मसमुच्चयकारिणः। 'ये सुविद्वांसः यज्ञं वितेनिरे' वितन्वन्ति, अनुतिष्ठन्ति। कीदृशं यज्ञम्? 'विश्वतो धारम्' विश्वतो धाराः यस्य तम्, आहुतिदक्षिणान्नादि यज्ञस्य धाराः; वैश्वानरमाहुतपूर्णाहुतिवसोर्धारावाजप्रसवीयानि वा यज्ञस्य धाराः। यद्वा; विश्वस्य जगतो धारयितारम्। ते यज्ञकर्त्तारः 'स्वः' स्वर्गं 'यन्तः' गच्छन्तः 'नापेक्षन्ते' पुत्र-

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥ चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो गुहायां त्रीणि निहितानि नार्थं वेदयन्ते गुहा गूहतेस्तुरीयं त्वरतेः कतमानि तानि चत्वारि पदान्योङ्कारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिका ऋचो यजूंषि* सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी व्यावहारिकीत्येके पशुषु तूणवेषु† मृगेष्वात्मनि चेत्यात्मप्रवादा अथापि ब्राह्मणं भवति सा वै वाक् सृष्टा चतुर्द्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु

पश्चाद्यपेक्षां न कुर्वते कृतकृत्यत्वात्। 'द्याम्' स्वर्गं च 'आरोहन्ति'। कीदृशीं द्याम्? 'रोदसीम्'। रुणद्धि जरामृत्युशोकादीन्, सा रोदसी, ताम्। अस्य द्वादेशश्छान्दसः पूर्वसवर्णदीर्घः, दिवो विशेषणम्; न तु द्यावापृथिव्योरभिधानम्; दिव इत्युपादानात्। यद्वा; 'ये' यजमानाः 'सुविद्वांसः सुष्ठु कर्मप्रकारं जानन्तः 'विश्वतो धारं' जगद्धारणहेतुं यज्ञं 'वितन्वन्ति' विशेषेण कुर्वन्ति, ते यजमानाः 'द्याम्' अन्तरिक्षम् 'आरोहन्ति', तथा 'रोदसी' द्यावापृथिव्यौ आरोहन्ति। ततः 'स्वर्यन्तः' स्वर्गस्य मादित्यमण्डलं प्राप्नुवन्तोऽन्यत् किमपि स्थानं न अपेक्षन्ते।"—इति मही० भा०।

* "यजूँषि" च।

† "तूणवे" ख, ग, भ; ष्टत्तिसम्मतश्चैष पाठः (२५०पृ० ११पं० द्र०)।

तुरीयं या पृथिव्यां साग्नौ सा रथन्तरे यान्तरिक्षे सा वायौ सा वामदेव्ये या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद्* ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणा मित्यथैषाक्षरस्य ॥९॥

"चत्वारि वाक्परिमिता पदानि"—इति†। दीर्घतमस आर्षम्। वाग्देवते पश्नौ विनियोगः‡। प्रवल्हितेत्यनभिव्यक्तिविशिष्टो वाक्यार्थः§। 'चत्वारि' ('वाक्परिमिता') "वाचः परिमितानि" 'पदानि' न पञ्चमं पद मस्ति‖। 'तानि' पुनः 'ब्राह्मणा विदुः'। किं सर्वे? न;—'ये मनीषिणः' "मेधाविनः"। तेषाञ्च पुनः पदानां ('गुहा') "गुहायां" 'त्रीणि' ('निहिता') "निहितानि", 'नेङ्गयन्ति' "नार्थं वेदयन्ते" न प्रख्यापयन्ति; 'तुरीयं' चतुर्थम्भागम्, एकपदं 'मनुष्याः'¶ परिज्ञानार्थं 'वदन्ति'॥ "तुरीयन्त्वरतेः" तद्धि त्वरित

---

* "ब्राह्मणे न्यदधुस्तस्माद्" ख, ग, भ।

† ऋ० सं० २, ३, २२, ५; अथ० सं० ९, १५, २७; १९, १।

‡ तत्र ह्येषा हविषोऽनुवाक्या (आ० श्रौ० सू० ३. ८.)।

§ "प्रवल्हिकाः शंसति। प्रवल्हिकाभिर्वै देवाः असुरान् प्रवल्ह्याथैनानत्यायंस्तथैवैतद्यजमानाः प्रवल्हिकाभिरेवाप्रियं भ्रातृव्यं प्रवल्ह्याथैन मति यन्ति"—इति ऐ० ब्रा० ६पं० ५अ० ७ख०। "यत्र किञ्चित् प्रवल्हित मादित्यकर्मैव तत्"—इत्युक्तं च पुरस्तात् द्रष्टव्यम् (३भा० ३९पृ० ४ख०)।

‖ "लोके या वागस्ति, सा चतुर्विधा विभक्तेत्यर्थः"—इति सा० भा०।

¶ "मनुष्याः—अज्ञाश्चाज्ञाश्च"—इति सा० भा०।

मिव निर्गतं भवति चिभ्यः। "कतमानि तानि चत्वारि पदानि?" —इति* विचार्यः प्रश्नः। तत्र तावत्, "नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः" मन्यन्ते। तत्राऽप्रसिद्धार्थत्वादाख्यातोपसर्गनिपातपदानि अर्थं न वेदयन्ते; नामानि तु प्रसिद्धतरार्थत्वाद् गवाश्वादीन् वेदयन्त्यर्थान्†। एवं "मन्त्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिकाः"‡; अत्रापि व्यावहारिक्येव तु वेदयत्यर्थम्। "ऋचो यजूंषि सामानि, चतुर्थी व्यावहारिकीति नैरुक्ताः"§; अत्रापि व्यावहारिक्येव वेदयते। "सर्पाणां वाक्, वयसाम्, क्षुद्रस्य सरीसृपस्य, चतुर्थी व्यावहारिकीत्येके" सर्पादीना मित्यधिभूतविदः। अत्रापि व्यावहारिक्येव वेदयते; नेतराः। "पशुषु तूणवे मृगेष्वात्मनि चेत्यात्मप्रवादाः"। आत्मानं ये प्रव-

---

* "कानि तानि चत्वारीत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति। सर्ववैदिकवाग्जालस्य सङ्ग्रहरूपा भूराद्यस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात् तासां व्याहृतीना मेव सारसङ्ग्रहभूतत्वात् अकाराद्यात्मकस्य प्रणवस्येति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन वेदवादिनो वदन्ति। अपरे" —इत्यादि सा॰ भा॰।

† क्रियाप्रधान माख्यातम्, द्रव्यप्रधानं नाम, प्रागुपसृज्यत आख्यातपदस्येत्युपसर्गः प्रादिः, उच्चावचेष्वर्थेषु निपतनान्निपातः अपि तु च इत्यादिः। आख्यातादिपरिचयस्तु पुरस्तात्, विशेषतस्तत्रैव द्रष्टव्यम् (२भा॰ ७—१०१४०)।

‡ अनुष्ठेयार्थप्रकाशो वेदभागो मन्त्रः, मन्त्रविधानप्रतिपादको वेदभागः कल्पः, मन्त्रतात्पर्यार्थप्रकाशको वेदभागो ब्राह्मणम्, भोगविषया गामानयेत्यादिरूपा व्यावहारिकी।

§ ऋग्यजुःसामभिः = पद्यगद्यगीतिभिरेव सर्वे वेदाः श्रुताः; न हि ऋगादिभ्योऽन्यद् वाग्रचनाप्रकारो विद्यते इति सर्वे चतुर्वेदग्रन्था इहैवान्तर्भूताः।

दन्ति आचार्यास्ते आत्मप्रवादाः *। "ब्राह्मण मपि च भवति" एतस्मिन्नर्थे;—"सा वै वाक् सृष्टा चतुर्द्धा व्यभवत्"—इत्येवमादि। तदेतदभिव्यक्तार्थ मेव। "ततो या वागत्यरिच्यत, तां ब्राह्मणे न्यदधुः" निर्द्दिंतवन्तः, "तस्माद्ब्राह्मणा उभयीं वाचं वदन्ति,— या च देवानां, या च मनुष्याणाम्" लौकिकी वैदिकी चेत्यर्थः † ॥

"अथ" पुनः "एषा" ("अक्षरस्य") अक्षरस्तुतिः प्रवल्हितेव ‡ ॥९॥

---

* "अपरे मातृकाः प्रकारान्तरेण प्रतिपादयन्ति। परा, पश्यन्ती, मध्यमा, वैखरीति चत्वारीति। एकैव नादात्मिका वाक् मूलाधारादुत्थिता सती परेत्युच्यते; नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात्। सैव हृदयगामिनी पश्यन्तीत्युच्यते; योगिभिः द्रष्टुं शक्यत्वात्। सैव बर्द्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते; मध्ये हृदयाख्ये उदीयमानत्वान्मध्यमा। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण वहिर्निर्गच्छति, तदा वैखरीत्युच्यते। एवं चत्वारि वाचः पदानि परिमितानि। 'मनीषिणः' मनसः स्वामिनः, स्वाधीनमनस्का ब्राह्मणाः वाच्यस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः परादीनि 'चत्वारि' पदानि 'विदुः' जानन्ति। तेषु मध्ये 'त्रीणि' परादीनि 'गुहा निहितानि' हृदयान्तर्वर्त्तित्वात्; 'तुरीयं' तु पदं वैखरीसञ्ज्ञकं 'मनुष्याः' सर्वे 'वदन्ति'०—०व्यवहरन्ति, अर्थप्रकाशनाय प्रयुञ्जते॥"—इति सा० भा०।

† "अथ शब्दानुशासनम्। ०—०। केषां शब्दानाम्? लौकिकानां वैदिकानाञ्च।"—इत्यादि द्रष्टव्यम्। पा० म० भा० १ अ० १ पा० १ आ०।

‡ "न्यायविदः पठन्ति।— एते वाक्यार्था इषे त्वादिके मन्त्रगणे प्रायशो दृश्यन्ते। 'विध्यर्थवादयाच्ञाशीः स्तुतिः प्रैषः प्रवल्हिकाः। प्रश्नो व्याकरणं तर्कः पूर्ववृत्तानुकीर्त्तनम्। अवधारणञ्चोपनिषद् वाक्यार्थास्तु त्रयोदश। मन्त्रेषु ये प्रदृश्यन्ते व्याख्यातृश्रुतिचोदिताः।' अथ तेषा मुदाहरणानि। तत्र विधिः परमेष्ठ्यभिहितः—'अश्वस्तूपरो गोमृगस्ते (य० वा० सं० २४, १)'—इत्यादि। अर्थवादः—'देवा यज्ञ मतन्वत (य० वा० सं० १९, १२)'—इत्यनुवाकः। याच्ञा—'तनूपाग्नेऽसि तन्वं मे पाहि (य० वा० सं० ३, १७)'—इत्यादि। आशीः—'आ वो देवास ईमहे (य० वा० सं० ४, ५)'—

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ऋचो अक्षरे परमे व्यवने यस्मिन्देवा अधिनिषण्णाः* सर्वे यस्तन्न वेद किं स ऋचा करिष्यति य इत्तद्विदुस्त इमे समासत इति विदुष उपदिशति कतमत्तदेतदक्षर मो मित्येषा वागिति शाकपूणिर्ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेष्वेतद्ध वा एतदक्षरं यत्सर्वान्तर्यीं विद्यां प्रतिप्रतीति च ब्राह्मणम् ॥ १० ॥

"ऋचो अक्षरे परमे"—इति†। दीर्घतमस आर्षम् । अस्या निर्वचनत्रयं अधिदैवाधियज्ञाध्यात्मविकल्पेन ॐकार आदित्य

इत्यादि । स्तुतिः—'अग्निर्मूर्द्धा दिवः ककुत् (य० वा० सं० ३, १२)'—इत्यादि । प्रैषः—'होता यक्षत् समिधाग्निम्' (य० वा० सं० २१, २९)'—इत्यादि । प्रवल्हिका—'इन्द्राग्नी अपादियम् (य० वा० सं० ३३, ९३)'—इत्यादि । प्रश्नः—'कः स्विदेकाकी चरति (य० वा० सं० २३, ९ ; ४५)'—इत्यादि । व्याकरणम्—'सूर्य एकाकी चरति (य० वा० सं० २३, १० ; ४६)'—इत्यादि । तर्कः—'मा गृधः कस्य स्विद्धनम् (य० वा० सं० ४०, १)'—इत्यादि । पूर्वष्टानुकीर्त्तनम्—'ओषधयः समवदन्त (य० वा० सं० १२, ९६)'—इत्यादि । अवधारणम्—'त मेव विदित्वातिमृत्यु मेति (श्वेता० उ० ६, १५)'—इत्यादि । उपनिषत्—'ईशा वास्यम् (य० वा० सं० ४०, १)'—इत्यादि ॥"—इति मन्त्रभाष्यनामके यज्ञग्रन्थे उवटः ।

* "अधिनिषण्णः" ख, ह ।

† ऋ० सं० १, ३, २१, ४ ; अथ० सं० ९, १८, ८ ।

आत्मा चेति *। तत्र तावच्छाकपूणिपत्त माश्रित्याधियज्ञगत मुच्यते †।—

* एतस्मिन्नेव खण्डे ॐकारपरं निर्वचनम्; इत उत्तरस्मिन् खण्डे (एकादशे ३५५ पृ०) आदित्यपरं निर्वचनम्; तत्रैव तदनन्तरम् (३५६पृ० १पं०) आत्मपरञ्चेति।

† भगवता सायणाचार्येण तु ऋग्भाष्येऽस्या ऋचश्चतुर्धा व्याख्यानं प्रदर्शितम्, तत्रेद माद्यम्।—'पूर्वमन्त्रे देहात्मजीवात्मानावुक्तौ। तयोरन्यस्य जीवात्मनः पारमार्थिकं रूप मस्ति, तदत्रोच्यते।—"ऋचो अक्षरे"। अत्र ऋक्शब्देन ऋक्प्रधानभूताः साङ्गापरविद्यात्मकाश्चत्वारो वेदा उच्यन्ते। ऋगादीना मपरविद्यात्वं मुण्डके श्रूयते। "द्वे विद्ये वेदितव्ये"—इति (मु० उ० १, ४) प्रतिज्ञाय "तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः"—इत्यादिना (मु० उ० १, ५)। तस्याः सम्भिन्यक्षरेऽदृश्यादिगुणके क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि। अक्षरशब्दस्य ब्रह्मवाचकत्वम्—"एतद्वै तदक्षरस्य प्रशासने गार्गि" (बृ० आ० ३, ८, ८),—"यया तदक्षर मधिगम्यते" (मु० उ० १, ५),—"येनाक्षरं पुरुषं वेद सत्यम्" (मु० उ० १, १३)—इत्यादिश्रुतिषु प्रसिद्धम्। ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। सर्वैर्वेदैः खलु ब्रह्माधिगम्यते—"तं त्वौपनिषदं पुरुषं पृच्छामि"—इत्यादि (बृ० आ० ३, ८, २६) श्रुतेः। मनूपनिषद्भागानां तथास्तु; इतरेषान्तु कथं ब्रह्मविषयत्वम्? इति, उच्यते;—यद्यपीतरभागानां यागादिविषयत्वं तथापि बुद्धिः शुद्ध्युत्पादनद्वारा वेदसाधनत्वेन ब्रह्मविषया भविष्यति—"वेदानुवचनेन ब्राह्मणा विविदिषन्ति"—इत्यादिश्रुतेः। तदेव विशेष्यते,—'परमे' उत्कृष्टे निरतिशये, 'व्योमन्' व्योमनि व्योमसदृशे। अलेपत्वनीरूपत्वव्याप्तित्वादिसादृश्येन व्योमेत्युक्तम्। यद्वा; विशेषेण सर्वस्य रक्षके; तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात्। तादृशे तत्त्वे सर्वमध्यः, त स्थित्यर्थः। पुनस्तदेव विशेष्यते,—'यस्मिन्' परमात्मनि 'विश्वे' सर्वे 'देवाः' अधिनिषेदुः' निषीदन्ति, आश्रित्य तिष्ठन्ति, तस्मिन् यथोक्तलक्षणे वस्तुनि ऋगुपलक्षिताः सर्वे साङ्गा वेदाः पर्यवसिता इत्यर्थः। 'यः' यो मर्त्यः 'तत्' तादृशं देवादीनां स्वरूपलाभास्पदं श्रुत्यवेदैस्तात्पर्यं प्रतिपाद्यं 'यद्' वस्तु 'न वेद' न जानाति, स मर्त्यः 'ऋचा' पूर्वोक्तेन ऋगादिशब्दजालेन 'किं करिष्यति' वेदनसाधनेन वेदनवेद्य मविदित्वा किं साधयतीत्यर्थः। प्रयोजनाभावात् सर्वस्यापि वेदस्य

"कतमत् तदक्षरम्"? "ॐ"—"इत्येषा वाक्"—"इति शाकपूणिः" अभिप्रायः*; ॐकार मृते न ह्यर्चयन्ति†। तस्याः 'अक्षरे' 'परमे' ('व्योमन्') व्योम—विविध मस्मिन् शब्दजात मोत मिति व्योम तस्मिन्; तिसृषु मात्रासु अकारोकारमकारलक्षणासूपशान्तासु यदवशिष्यते, तदक्षरं परमं व्योम; शब्दसामान्य मभिव्यक्त मित्यभिप्रायः। "यस्मिन् देवा अधिनिषण्णाः सर्वे"। ऋगादिषु ये देवाः, ते मन्त्रद्वारेणाऽक्षरे निषण्णाः; तस्य शब्दकारणत्वात्। अथवा, प्रथमायां मात्रायां पृथिवी, अग्निः, ऋग्वेदः, पृथिवीलोकनिवासिन इत्येव; द्वितीयायां मात्रायाम् अन्तरिक्षम्, वायुः, यजूंषि, तल्लोकनिवासिनो जना इति, तृतीयायां मात्रायां द्यौः, आदित्यः, सामानि, तल्लोकनिवासिनो जना इति। विज्ञायते हि—"ॐकार

वैफल्यादिति भावः। अथवा योऽक्षर मविदित्वा कर्मणां कर्ता भवति, यागादीननुतिष्ठति, तेन किञ्चिदपि कर्म न भवतीत्यर्थः। 'य इत्' य एव 'तत्' तत्त्वं 'विदुः' जानन्ति, 'त इमे समासते' त एवेमे ज्ञातारः समासते, सम्यक् तिष्ठन्ति। अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनम्। यद्वा; 'ये विदुः इत्' ये जानन्त्येव नानुतिष्ठन्ति; इच्छब्दोऽवधारणे। 'त इमे' त एव 'समासते' गवामयनादिसहस्रसंवत्सरसत्रपर्यन्तानि सत्रोपयन्ति। सहार्थे सम्-शब्दः। सत्रादधिकानां यागाना मभावात्। तेषा मपि फल मेतज्ज्ञानेनैव प्राप्तं भवतीत्यर्थः। कर्मणां बहुत्वाद् बहुवचननिर्देशः॥"—इति सा० भा०। श्वेताश्वतरोपनिषद्यप्येषा व्याख्याता (४, ८)।

* "वाग्वै समुद्रो न वै वाक् क्षीयते न समुद्रः क्षीयते"—इति ऐ० ब्रा० ५, २, १।

† "ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।
स्रवत्यनोङ्कृतं पूर्वं परस्ताच्च विशीर्यति॥"—इति,

"एकाक्षरं परं ब्रह्म"—इति, "अक्षरं त्वक्षयं ज्ञेयं ब्रह्म चैव प्रजापतिः"—इत्यादि च म० स० २अ० ७४, ८३, ८४।

एवेदं सर्वम्”—इति*। ‘यस्तन्न वेद’ अनया विभूत्याक्षरम्, ‘किम्’ असौ (‘ऋचा’) ऋगादिभिर्मन्त्रैः ‘करिष्यति’? यस्तन्नाक्षरात्मना पश्यति। “य इत्तद्विदुस्त इमे समासते—इति विदुष उपदिशति”। ते हि तत्परिज्ञानात्ताद्भाव्य मुपगताः प्रणवविग्रह मात्मान मनुप्रविश्य समीकृता निर्वान्ति शान्तार्चिष इवानलाः॥—इति† ॥१०॥

आदित्य इति पुत्रः शाकपूणेरेषर्ग्भवति‡ यदेन मर्चन्ति प्रत्यृचः सर्वाणि भूतानि तस्य यदन्यन्मन्त्रेभ्य

---

* “ओमित्येतदक्षर मिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्व मोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव”—इति मा० उ० १, १।

† “अपरे प्रकारान्तरेण प्रतिपादयन्ति।—‘ऋचोऽक्षरे’ ऋगुपलक्षितसर्ववेदसम्बन्धिन्यक्षरे प्रणवरूपे ॐकारेऽविनाशिनि सर्ववेदेषु व्याप्ते वा। प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते,—“तान् वेदानभ्यतपत् तेभ्योऽभितप्तेभ्यः त्रयो वर्णा अजायन्ताकार उकारो मकार इति, तानेकधा समभरत् तदेतदोम्”—इति (ऐ० ब्रा० ५, ५, ७)। ‘परमे’ निरतिशये; न हि प्रणवादधिकं किञ्चिन्मन्त्रजात मस्ति, त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात्। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव ओमिति ब्रह्मेत्यादिश्रुतेः (तै० आ० ७, ८, १)। वेदानां प्रणवस्य स्थानप्रतिनिधिभावः सम्बन्धः “य ऋचोऽधीते”—इत्याद्युपक्रम्य “यः प्रणव मधीते स सर्व मधीते ओमिति प्रतिपाद्यते”—“एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत् परम मक्षरम्” —इत्यादिश्रुतेः। ‘यस्मिन्’ ‘विश्वे’ सर्वे ‘देवाः अधि निषेदुः’; प्रणवस्य सर्वमन्त्रात्मकत्वात्—मन्त्रेषु सर्वदेवानां निवासात् सर्वदेवनिवासत्वम् ब्रह्माधिष्ठानत्वाद्वा; ब्रह्मणि सर्वदेवानां निवासात् शिष्ट मविशिष्टम्॥”—इति च तृतीयं व्याख्यानं सा० भा०।

‡ “शाकपूणिरेषर्ग् भवति” ख, ग, झ।

स्तदक्षरं* भवति रश्मयोऽत्र देवा उच्यन्ते य एतस्मिन्नधिनिषण्णा इत्यधिदैवतमथाध्यात्मं शरीरमत्र ऋगुच्यते यदेनेनार्चन्ति प्रत्यृचः सर्वाणीन्द्रियाणि तस्य यदविनाशिधर्म तदक्षरं भवतीन्द्रियाण्यत्र देवा उच्यन्ते यान्यस्मिन्नधिनिषण्णानीत्यात्मप्रवादाः† ॥ ११ ॥

“आदित्य इति पुत्रः शाकपूणेः एष ऋग्भवति”—इति, मण्डलमभिप्रेतम्। “यदेनमर्चन्ति” यस्मादेनमर्चन्ति, तस्मादृक्। “तस्य” “यदन्यत्” (“मन्त्रेभ्यः”) मण्डलगतेभ्यो ऽवयवेभ्यः, “तत्” परम् “अक्षरं” व्यवनम्, तत्र सर्वमोतमिति; “य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते”—इति (तै॰आ॰१०,१३) श्रुतेः। “रश्मयोऽत्र देवा उच्यन्ते, य एतस्मिन्नधिनिषण्णा इति”। यस्तन्मण्डलमक्षरात्मना न वेद, किं स ऋचा आदित्येन मण्डलात्मना करिष्यति? नासौ यथावदादित्यं वेदेत्यर्थः। “य इत्तद्विदुस्त इमे समासत”—इति व्याख्यातम् (२५५पृ॰३पं॰)‡॥

* “यदन्यमात्रेभ्यस्तदक्षरं” ख, ग, झ।

† “यान्यस्मिन्नात्मन्येकं भवन्तीत्यात्मप्रवादाः” च, छ, ज।

‡ “अन्ये त्वन्यथा वर्णयन्ति।—‘ऋचः’ ऋगर्चनीयः ‘आदित्यः’; आदित्यमण्डलमृगादिमयं वा। “ऋग्भिः पूर्वाह्णे दिवि देव ईयते (प्र॰ उ॰ ५, ७)”—“आदित्यो वा एष एतन्मण्डलं तपति, तत्र ता ऋचः (तै॰ आ॰ १०, १, २)”—इत्यादिश्रुतेः। तस्य सम्बन्धिनि ‘अक्षरे’ ‘परमे व्योमन्’—इति, उक्तलक्षणे ब्रह्मणि “य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते”—इत्यादि (तै॰ आ॰ १०, १, ९) श्रुतप्रकाशरूपे; ‘यस्मिन्’ सर्वे ‘देवा’ द्योतमानाः रश्मयः ‘निषेदुः’ वर्त्तन्ते। ‘यः’

आत्मेत्यात्मप्रवादाः। अथ ऋग्भवति शरीर मिति। "इन्द्रियाण्यत्र देवा उच्यन्ते"; तानि हि विषयेषु द्योतयन्त इति देवाः। "तस्य यदविनाशिधर्म" चेतनासतत्वमात्रविज्ञानम्, "तत्" परमम् "अक्षरं" व्यवनम्। यस्तदक्षरं न वेद, किं मसौ ऋचा शरीरेण करिष्यति? न तस्य जीवितेनार्थः। "य इत्तद्विदुः"—इति व्याख्यातम् (३५५पृ० ३पं०) *॥११॥

अक्षरं न क्षरति न क्षीयते वाक्षयो भवति† वाचोऽक्ष इति वाक्षो यानस्या‡ञ्जनात्तत्प्रकृतीतरद्वर्त्तनसामान्यादित्ययम्मन्त्रार्थचिन्ताभ्यूहोऽभ्यूल्हो§ऽपि श्रुति-

एतत् 'न वेद' स केवलया 'ऋचा' 'किं करिष्यति'; ये जानन्ति भावयन्ति, त एव विद्वांसः 'समासते' भूम्नां सुखेन रोगादिरहिता भोगिनः सन्तश्चिरकालं जीवन्ति॥"—इति च द्वितीयं व्याख्यानम् सा० भा०।

* "अपरे त्वन्यथा वर्णयन्ति।—'ऋचः' ऋगर्थनीयो जीवः। तस्य सम्बन्धिनि 'अक्षरे' अविनाशे व्याप्ते वा परमात्मनीत्यर्थः। अतएव जीवापेक्षया 'परमे' उत्कृष्टे निरुपाधिके, 'व्योमन्' विशेषेण सर्वाधिष्ठानत्वेन रक्षके, व्योमसदृशे वा। 'यस्मिन्' परमात्मनि 'देवाः' गमनवन्तो व्यवहरन्तो वेन्द्रियसञ्ज्ञकाः 'विश्वे' सर्वेऽपि 'अधिनिषेदुः' निषीदन्ति, आश्रित्य वर्त्तन्ते। 'यः' 'तत्' 'न वेद' न जानाति, उपाध्यंशपरित्यागेन तदेव स्वरूप मिति न पश्यति स्थूली जनः, 'किं ऋचा करिष्यति' केवलेन जीवेन जीवभावेन किं फलं प्राप्स्यति? जननमरणादिक्लेशस्यात्यागादिति भावः। 'ये' तत् तत्त्वं 'विदुः', 'ते'—इत्यादि सिद्धम्॥"—इति च चतुर्थं व्याख्यानम् सा० भा०।

† "वाक्षरं भवति" च, छ, ज; "वाक्क्षयो भवति"—इति दु०(३५८पृ०१०पं०)।

‡ "वाचोपादानस्या०" ख, ग, झ।

§ "ऽभ्यूढो" च, छ, ज।

तोऽपि तर्कतो न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः प्रकरणश एव तु निर्वक्तव्या न ह्येषु प्रत्यक्ष मस्त्यनृषेरतपसो वा पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवतीत्युक्तं पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्क मृषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूह मभ्यूढं* तस्माद्यदेव किञ्चानूचानोऽभ्यूहत्यार्षन्तद्भवति ॥ १२ ॥

"अक्षरम्" कस्मात्? तद्धि "न क्षरति" नान्यथाभाव मापद्यते। अथवा "न क्षीयते" न कदाचिदप्यामूलतो विनश्यति। अथवा "वाक्क्षयो भवति" नादो हि वर्णलक्षणाया वाचो निवासः। "वाचोऽक्षः—इति वा" अक्षरो ह्यक्ष इवानुप्रविश्य व्यञ्जनानि धारयति† ॥

अथ "अक्षः" कस्मात्? उच्यते;—("यानस्य") यानाक्षः तावत् "समञ्जनात्" नित्य मसौ अज्यते तैलादिना; "तत्प्रकृतीतरत्" स्वराख्य मक्षरम्, "वर्त्तनसामान्यात्" स्वर मधिरूढानि व्यञ्जनानि वर्त्तन्ते। "इति" परिसमाप्त्यर्थ इतिकरणः; उपप्रदर्शनार्थो वाक्यस्य ॥

---

* "मभ्यूढं" ग, ङ, ञ।

† १भा० ८१ पृ० अक्षरम्=वाक्; ११०पृ० अक्षरम्=उदकम्। अत्र च पुरस्तात् १२०पृ० "क्षरत्यक्षर मुदकम्"—इत्यादि।

‡ अक्षाः १भा० ४०७, ४११पृ०; अत्र च पुरस्तात् १०पृ० द्र०।

एवमर्थं "मन्त्रार्थचिन्ताभ्यूहोऽभ्यूढः" मन्त्रार्थचिन्ताना मभ्यूहो मन्त्रार्थचिन्ताभ्यूहः, वितर्कितः; शक्यते एतावता मन्त्रार्थोऽभ्यूहितु मिति। पुनः अयम् "अपि श्रुतितः",—"अपि तर्कतः"; श्रुतिभ्यो ब्राह्मणेभ्यो निगमशेषेभ्यश्चोन्नीतार्थाभिधानसामर्थ्येभ्यो वाक्यार्थसामर्थ्यात् तस्योपरि पर्यायास्तर्कोऽभ्यूहो लक्षणन्याय इति। यद्यप्यय मभ्यूहः, तथापि "न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः"। कुतः पृथक्त्वेन? प्रकरणात्। किं तर्हि? "प्रकरणश एव तु निर्वक्तव्याः"। तान्येतानि प्रकरणानि मन्त्राणां याज्ञं दैवत मध्यात्म मितिहासानुप्रवेश इति। किं कारणम्? "न ह्येषु" मन्त्रेषु "प्रत्यक्षम्" अर्थदर्शनम् "अस्ति"। किं नास्त्येव? न नास्ति। किं तर्हि? "अनृषेः अतपसो वा"—इति; तस्येदानी मपि स्याद्य ऋषिस्तपस्वी च; निर्दग्धकल्मषयोस्तयोः प्रतिबन्धकाभावाद्यथावदर्थं मन्त्राणां पश्यतः। येऽन्ये पुनरौपदेशिकाः, तानधिकृत्योच्यते—"पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति—इत्युक्तं पुरस्तात्"—इति। य एतेषु उपदेशतः पारोवर्येण परोवरभावेन मन्त्रार्थान् प्रतिपद्यन्ते, ते पारोवर्यविदः, तेषु यः कश्चिद्भूयोविद्यः बहुश्रुतो भवति, स एव मन्त्रार्थपरिज्ञाने प्रशस्यो भवति। मन्त्रार्थ एव स्वयं विद्यावस्थानभावेन विश्वग्भूतो लोकव्यवहारभावेन च विप्रकीर्णो विजृम्भत इति त मबहुश्रुतो नाल मुत्प्रेक्षितु मिति,—युक्तं यत्तत्परिज्ञानप्रयोगे भूयोविद्यः प्रशस्यत इति। पुरस्तादपि चैतदुक्तम्*; इह तु प्रसङ्गादुच्यते॥

* १अ० ५पा० ३ख०—२भा० ११९, ११८ पृ० द्रष्टव्यम्।

अतः पर मागमविशुद्धये प्रस्तौति।—"मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्"—इति। पूर्व मपि हि "साक्षात्कृतधर्माण ऋषयो बभूवुः"—इत्युक्तम् *; इह तु मन्त्रार्थाभ्युपप्रदर्शनार्थ मिति विशिष्यते—"मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यति"—इति। एवमादि-पुराकल्परूपोऽर्थविदः शास्त्रावतारस्तुतये, तेभ्यः "एतं मन्त्रार्थचिन्ताभ्यूह मभ्यूढं प्रायच्छन्" ते देवाः "एतं समस्तार्थ मूह मपि भवन्तोऽनेन मन्त्रार्थान् शक्यन्तेऽभ्यूहितु† मिति। यस्मादेतदेवं "तस्मात्" अस्मिन् सूक्ते निरुक्तशास्त्रे यः "अनूचानः" विद्वान्, यदेव किञ्चिन्मन्त्रार्थेषु "अभ्यूहति", "आर्षं तत् भवति"; तथैव तदृषयोऽभ्यूहितवन्त इत्यभिप्रायः॥ १२॥

हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः। अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे॥ हृदा तष्टेषु मनसाम्प्रजवेषु यद् ब्राह्मणाः संयजन्ते समानख्याना ऋत्विजोऽत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभिः प्रवृत्तिभि‡ रोहब्रह्माण ऊहब्रह्माण ऊह एषां ब्रह्मेति वा सेयं विद्या श्रुतिमतिबुद्धिस्तस्यास्तपसा पार मीप्सितव्यं तदिद मायुरिच्छता

---

* १अ० ६पा० ५ख०—२भा० १२७पृ०।

† "मन्त्रार्थान् शक्यन्तेऽभूहितु"—इति क।

‡ "प्रवृत्तिभिः" ग, ङ।

न निर्वक्तव्यं तस्माच्छन्दःसु शेषा उपेक्षितव्या अथागमो यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति* ॥१३॥

न तत् स्वमनीषिकयोच्यते ; मन्त्रार्थोऽप्येतस्मिन् विषये बृहस्पतिना दृष्टो ब्रह्म वा स्वयं प्राह। तद्यथा ;—

"हृदा तष्टेषु"—इति†। ('हृदा') हृदयेन बुद्ध्या, 'तष्टेषु' सूक्ष्मतामापादितेषु अचिन्त्याध्यात्मादिषु विद्वद्भिः, 'मनसो जवेषु' "मनसां" ("प्रजवेषु") ये प्रजवाः प्रगमाः न साक्षात्ते दृश्यन्ते, तेष्वर्थेषु स्वर्गापूर्वदेवतादिषु‡ 'ब्राह्मणाः' अधिगतमन्त्रार्थतत्त्वाः विचारयन्तः,— किं

---

* अध्यायसमाप्तिसूचक मेतद् द्विर्वचनं चातिरिक्तसर्वेष्वेव पुस्तकेषु दृश्यते ; च-पुस्तके तु कस्याप्यध्यायस्यावसाने नास्ति, तदस्य विवदमानस्य का कथा। येषु खलु पुस्तकेष्वत्र नाध्यायसमाप्तिः प्रत्युत पादसमाप्तिरेवेष्टा, तत्रापि कथं द्विर्वचन मिति सुधीभिर्विवेच्यम्।

† ऋ० सं० ८, १, २४, २ ; १०, ६, ६, ८। अस्ति किल ऋक्संहिताया दशम-मण्डलीय-षष्ठानुवाकस्यैकादशर्चं तृतीयं सूक्तं बार्हस्पत्यम्, तेन वै बृहस्पतिर्ज्ञानं तुष्टाव। तदुक्तं बृहद्देवतायाम्—"यज्ज्योतिः परमं ब्रह्म तद्योगात् समुपाश्नुते। तज्-ज्ञान मभितुष्टाव सूक्तेनाथ बृहस्पतिः॥"—इति। तस्य सूक्तस्येय मष्टमी, त्रिष्टुप्। "अनेन सूक्तेनर्षिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान्, अतस्तद्देवत्य मिदम् (सूक्तम्, अत्रेय मृक्)।"—इति च सा० भा०। एतत्सूक्तं सर्व मेव वेदार्थजिज्ञासुभिः विशेषतः पर्यालोच्यम्।

‡ "स्वर्गो वै लोको दूरोहणम् (ऐ० ब्रा० ४प० ३अ० ९,३ख०)"—इत्यादि, "परो वा अस्माल्लोकात् स्वर्गो लोकः (ऐ० ब्रा० ६पं० ४अ० ४ख०)"—इत्यादि, इत्येवमादीनि च वाक्यानि स्वर्गपरिचायकानि। अपूर्वं कर्मजन्य मदृष्टम्। तच

मंत्र तत्त्वं किं वा अतत्त्वमिति *, प्रवचनेन ततः 'संयजन्ते' परस्परेण संपूजयन्ति†। कतमे ते? इति,—'सखायः' "समानख्यानाः ऋत्विजः"; ते हि प्रयोगे अभियुक्तत्वादतितरां विद्वांसः‡। तेषु किम्? इति,—"अत्राह त्वम्"—इति। ('अत्र') तत्र तेषु अर्थेषु सूक्ष्मेषु§

चतुर्विधम्—फलापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वम्, अङ्गापूर्वञ्चेत्यादिक मधिकरणमालादिषु मीमांसाग्रन्थेषु विस्तरशो विचारितम्। देवतापरिचयस्त्विहैव दैवते काण्डे "तिस्र एव देवताः (९भा० ३२०पृ०)"—इत्येवमादिभ्यः, "त्रयस्त्रिंशद्देवाः सोमपास्त्रयस्त्रिंशदसोमपाः। अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चैते देवाः सोमपाः। एकादश प्रयाजा एकादशानुयाजा एकादशोपयाजा एतेऽसोमपाः पशुभाजनाः (ऐ० ब्रा० २प० २अ० ८ख०)"—इत्येवमादिभ्यश्चावगन्तव्याः। ऋक्संहितायाञ्च—"यत्र ज्योतिरजस्रम्०—०मृतं लोके अक्षिते" —इत्याद्याश्च (९म०७अ०१०सू०७—११) ऋचः स्वर्गपरिचायका द्रष्टव्याः। "यजमानलोकोऽमृतलोकः स्वर्गोलोकः"—इति च (ऐ० ब्रा०३प० ५अ०२ख०) अतः स्वर्गोऽमृत इत्यभिन्न एव। "त्रयः स्वर्गा लोकाः (ऐ० ब्रा० ४प० ३अ० ४ख०)"—इत्यादि च श्रूयते। "घृतह्रदा मधुकूलाः सुरोदकाः क्षीरेण पूर्णा उदकेन दध्ना"—इत्यादि च स्वर्गवर्णन मथर्वसंहिताप्रभृतिषु (अथ० सं० ४, ३४, ६)। "अग्निर्वै स्वर्गस्य लोकस्याधिपतिः"—इत्यादि च ऐ० ब्रा० ३प० ४अ० ४ख०।

* अतएवाह मनुः—"यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति॥ (२अ० १५७श्लो०)"—इत्येवमादीन्।

† "'यद्' यदा 'सं यजन्ते' सङ्गच्छन्ते। यजिरत्र सङ्गतिकरणवाची"—इति सा० भा०। "यज देवपूजासङ्गतिकरणदानेषु"—इति धा० उ० १००२।

‡ अतएवाह मनुः—"भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः। बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः। ब्राह्मणेषु च विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः॥—इति १अ० ९६, ९७श्लो०।

§ "'अत्र' अस्मिन् ब्राह्मणसङ्घे"—इति, "'अह'—इति विनिग्रहे"—इति च सा० भा०। इत्थिञ्चाते त्वहेत्यनर्थकम्?।

'विजज्ञुः' तत्यजुः; 'त्वम्' एकम्* त्यक्तवन्तः। मन्त्रार्थव्याख्याने क मविद्वांसं के न तत्यजुः? 'वेद्याभिः' ("वेदितव्याभिः") "प्रवृत्तिभिः"†; न हि तासां मनोवृत्तीना मन्तोऽस्ति, यासु प्रतिभानवता मपि मनोवृत्तयो न प्रवर्त्तन्ते, अतस्ता वेदितव्या एव भवन्त्यविद्वद्भिः। ये पुनः 'श्रोहब्रह्माणः'। इदं निरुक्तशास्त्रम् ऊहब्रह्म, येषा मस्ति ते शब्दार्थसङ्कटेष्वप्रतिबध्यमाना अतिक्रम्य अविद्वांसं ('वि') विशेषतः सर्वत्रैव प्रतिपूज्यमानाः 'चरन्ति' 'त्वे' एके इत्यर्थः॥

एव मेतस्मिन्मन्त्रे अस्या उद्गाहितार्थानेवोद्दिश्य मन्त्रार्थचिन्ताभ्यूहस्य ब्रह्मत्वं श्रूयते। तस्मादिद मपि निरुक्तशास्त्रं ब्रह्मैव वेद इत्यर्थः॥

इदानी मुपसंहरति—"सेयं विद्या"—इति। श्रुतिमतीत्याद्यर्थ मेवैका विद्या बुद्धिं वर्षति, ज्यायसी सर्वाभ्यो विद्याभ्यो महानेष तर्कः। "तस्याः तपसा पार मीप्सितव्यम्" गन्तु मिति वाक्यशेषः। पदवाक्यप्रमाणविदा‡ ब्राह्मणेन यस्माद्वेदो विधिनिषेधप्रतिप्रसवनियमपरिसङ्ख्यापुनर्वचनपरार्थवादगहनः§, अर्थवादाश्च यथाश्रुतप्रमा-

---

* "उत त्वः"—इत्यस्य व्याख्यानम् "अप्येकः"—इति (२भा० ११२पृ०), "उत त्वम्"—इत्यस्य व्याख्यानम् "अप्येकम्"—इत्यादि (२भा० १२४पृ०) च बहु दृष्टं पुरस्तादिहैव।

† "वेद्याभिः वेदितव्याभिर्विद्याभिः प्रवृत्तिभिर्वा"—इति सा० भा०।

‡ पदशास्त्रं व्याकरणम्, वाक्यशास्त्रं मीमांसा, प्रमाणशास्त्रं साङ्ख्यादिकम्।

§ तत्र, विधिः—"अज्ञातार्थज्ञापको विधिः।०——०विधिश्चतुर्विधः;—उत्प-

ग्राहिणो विदुषोऽपि पर मभ्रान्तहेतवः ; तस्मात्परमदुर्विज्ञान-वेदनीयत्वात् वेदवाक्याना मिमां विद्या मन्तरेण सम्यगर्थावगमो न भवति। अतोऽस्या अखिलपुरुषार्थोपकारप्रवृत्ताया अन्तरेण तपःपारगमनं नास्तीत्यत इद मुक्त माचार्येण;—"तस्यास्तपसा पार मीप्सितव्यम्" इति* ; अथ मभ्युपायः तस्याः पारगमने। "तदि-दम्" अतपस्विना सर्वथापि "आयुरिच्छता" निरुक्तशास्त्रं "न निर्वक्तव्यम्" ; अतपस्वी ह्यागमवान् अपि मलिनान्तःकरणत्वान्न शक्नुयात्, ततोऽस्यायुश्छिद्येत ; तपस्विनापि च निर्ब्रुवता

त्तिविधिः, नियोगविधिः, अधिकारविधिः, प्रयोगविधिश्च"—इति। निषेधः—"पुरुषस्य निवर्तकं वाक्यं निषेधः। ०——० तच्च बाधकं द्विविधम्;—तस्य व्रत मित्युपक्रमो विकल्पप्रसक्तिश्च"—इति। नियमः—"पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः"—इति। परिसङ्ख्या—"उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसङ्ख्याविधिः। ०——०सा च द्विविधा। श्रौती लाक्षणिकी च"—इति। पुनर्वचन मनुवादः—"प्रमाणान्तरावगतार्थबोधकोऽनुवादः"—इति। अर्थवादः—"प्राशस्त्यनिन्दान्यतरपरं वाक्य मर्थवादः"—इति चार्थसङ्ग्रहे लौगाक्षिभास्करः। प्रतिप्रसवः—"निषिद्धस्य (स्थानविशेषेषु) पुनर्विधानम्"—इति प्रा० त०। तदेतत् सर्वं मुद्दाह-रक्षभेदादिभिः जैमिनीयन्यायमालादिषु सर्वेष्वेव मीमांसाग्रन्थेषु बहु पल्लवितम्।

* तथाच मनुः—"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः। वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना॥"—इति २अ० १६५श्लो०।

† अतएवोक्तं मनुसंहितायाम्—"धर्मेणाधिगतो यैस्तु वेदः स परिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥ दशावरा वा परिषद् यं धर्मं परिकल्पयेत्। त्र्यवरापि वृत्तस्था तं धर्मं न विचालयेत्॥ त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा॥ ऋग्वेदविद् यजुर्विच्च सामवेदविदेव च। त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये॥"—इति, "यं वदन्ति तमोभूता

"तस्मात्" "छन्दःसु" शाखान्तरेषु निगमोदाहरणाना माकाङ्क्षितनिराकाङ्क्षार्थे ("शेषाः") वाक्यशेषाः, पादार्द्धर्चादिलक्षणाः* उपेक्षितव्याः† ॥ १३ ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ अष्टादशाध्यायस्य (त्रयोदशाध्यायस्य) प्रथमः पादः ॥ १३ । १ ॥

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ

अष्टादशाध्यायः (त्रयोदशाध्यायः) समाप्तः ॥ १३ ॥

॥ इति सपादसप्तदशाध्यायी ऋज्वर्था नाम निरुक्तवृत्तिः समाप्ता ॥

(व्याख्यातं दैवतं यज्ञाङ्गञ्चेत्यादिः ॥‡)

मूर्द्धा धर्मं सतद्विदः। तत् पापं शतधा भूत्वा तद्वक्तॄननुगच्छति ॥"—इति च ११अ० १०९—११२, ११५ श्लो०।

* ३७४पृ० १पं० "अर्द्धर्चभाजोऽपि क्वचिदुपेक्षितव्याः"—इत्यादि द्रष्टव्यम्।

† पुरस्तादुक्तं "उतो त्वस्मै तन्वं१ विसस्रे (१अ०६पा० ३ख०—१भा० १३१पृ०)"—इत्यादिकम्; "बृहस्पते प्रथमं वाचो अग्रम् (ऐ० आ० १, १४.)"—इत्याद्यैतरेयकं चेह स्मर्त्तव्य मिति शम्।

‡ ज-पुस्तकमात्रे एवैष पाठोऽस्य; तत्र हि सर्वत्रैवाध्यायान्तेषु अग्रिमाध्यायप्रतीकपाठ एवमेवेति दर्शितं पुरस्तात् (२२५पृ०)।

१ २ ३ ४ ५ ६ ७
(अथेमायद्यावोयदुदघ्नोविहिसोतोःस्तुष्येवतरत्सच-
८ ९ १० ११ १२
त्वारिशृङ्गास्वर्यन्तश्चत्वारिवागृचोअक्षरआदित्यइत्यक्ष-
१३
रक्षरतिहृदातष्टेषु त्रयोदश ॥ *)

॥ इति निरुक्ते त्रयोऽदशाध्यायः समाप्तः † ॥ १३ ॥

(अतिस्तुति-प्रकरणं समाप्तम् ‡)

॥ इति नैरुक्ते प्रथमं परिशिष्टं समाप्तम् ॥ १ ॥

---

* खण्डप्रतीकपाठावलम्बिष्वेव पुस्तकेष्वेतेन पाठेन भवितव्यम्; तेष्वेवात्राध्याय-समाप्तिश्च दृश्यते । परं तादृशेऽपि ङ-पुस्तके नात्रैष पाठः, अपि तु परिशिष्टसमाप्तावेकत्रैव "अथेमा"—इत्यादीनां पञ्चामतृखण्डानां प्रतीकपाठः; तत्रैव त्रयोदशाध्यायसमाप्तिश्च ।

† च-पुस्तकसम्मत एष पाठः। क-पुस्तके परिशिष्टभागो नास्त्येव; ख-ग-भ-पुस्तकेषु इह नाध्यायसमाप्तिः; अपि त्रयोदशाध्यायस्य प्रथमपादसमाप्तिरेव; घ-ङ-पुस्तकौ खण्डितौ; ङ-पुस्तकेऽपि नात्राध्यायसमाप्तिः, पादविभागस्तु तत्र न दृश्यते क्वाप्यध्याये; ज-पुस्तके त्विह "इति नैरुक्ते उत्तरषट्के सप्तमोऽध्यायः"—इति; दुर्ग-वृत्तावपि त्विहैव परिशिष्टसमाप्तिः ग्रन्थसमाप्तिश्च परं नैषोऽध्यायः, अपि पाद एव; अतएव हि दुर्गो "सपादसप्तदशाध्यायी निरुक्तवृत्तिः समाप्ता"—इति (२६५पृ० ९पं०)। एवञ्चाध्यायसमाप्तौ च-ज-पुस्तकयोः इतरेषां सम्मतिरिति।

‡ नैतत् निघण्टुव्याख्यानम्; अपि तत्प्रासङ्गिक मिति भ्रम् ।

॥ अथ चतुर्दशाध्यायः* ॥

॥ अथवा त्रयोदशस्यैव द्वितीयादिस्त्रिपादी ॥

॥ तत्राद्यः, द्वितीयपादः† ॥

व्याख्यातं दैवतं‡ यज्ञाङ्गं§ चाथात ऊर्द्ध्वमार्गगतिं व्याख्यास्यामः सूर्य आत्मेत्युदितस्य हि कर्मद्रष्टा‖ ऽयै-

---

* च-ज-पुस्तकयोः; दुर्गसिंहमते त्वेषोऽध्यायो नास्त्येव, सायणमतेऽप्येव मेव; तेन हि ऋगादिभाष्ये न क्वापि एतदध्यायीयः कश्चिदपि खण्डः खण्डांशो वा उद्धृतः प्रत्युत "जातवेदसे सुनवाम (ऋ० सं० १, ७, ७, १)"—इत्यस्या ऋचो व्याख्यावसरे "जातवेदाः कस्मात्"—इत्यादिः (३भा० १९३पृ०) सप्तमाध्यायीय एव पाठ उद्धृतः, न तु "जातवेदस इति जात मिदं सर्वम्"—इत्यादिरिहत्यः (२२ख०)। एव मन्यत्रान्यच च।

† ख-ग-भ-पुस्तकेषु; ङ-पुस्तके तु पादविभागो नास्ति पर मेष त्रयोदशाध्याय एव। वस्तुतोऽत्र पादविभागो नास्त्येवेत्यस्माकम्; पादसन्धिषु पूर्वपूर्ववत् पादादावथादिशब्दव्यवहारादिदर्शनाभावात्, भ-पुस्तकातिरिक्तेषु पादीयखण्डाङ्कपार्थक्यादर्शनाच्च।

‡ "अथातो दैवतम्"— इत्यारभ्य "य ऋतुकालो जायानां य ऋतुकालो जायानाम्"—इत्यन्तेनाध्यायषट्केनेति (३भा० १८५पृ०—४भा० ३२९पृ०)।

§ "अथेमा अतिस्तुतयः"—इत्यारभ्य "ताह्वाय मनभवत्यनुभवति"—इत्यन्तेनाध्यायैकेन पादेनैकेन वा (३३७पृ०—३९१पृ०)।

‖ "कर्म द्रष्टा" ख, ग, भ।

तदनुप्रवदन्त्यथैतं महान्तमात्मानमेषर्गणः* प्रवदन्तीन्द्रं† मित्रं वरुणमग्निमाहु‡रित्यथैष महानात्मात्मजिज्ञासयात्मानं प्रोवाचाग्निरस्मि जन्मना जातवेदा अहमस्मि प्रजमजा इत्येताभ्याम्॥ १§ (१४||) ॥ १¶

अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतम्म आसन्। अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो** हविरस्मि नाम††॥ अहमस्मि प्रथमजा ऋतस्य पूर्वन्देवेभ्यो अमृतस्य नाम‡‡। यो मा ददाति स इदेव

---

* पुरस्तादोक्तम्—"महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति"—इति ७अ० ४पा० ५ख० (२भा० ३९०पृ०)।

† "प्रवदन्तीन्द्रं" ग, ज, झ।

‡ ऋ० सं० १, २, ११, ६; अथ० सं० २९, ८।

§ चतुर्दशाध्यायीयखण्डाङ्क एषः, च-ज-सम्मतः।

|| त्रयोदशाध्यायीयखण्डाङ्क एषः, ख-ग-छ-सम्मतः।

¶ त्रयोदशाध्यायस्यैव द्वितीयपादीयाङ्क एषः, झ-पुस्तकसम्मतः।

** 'धर्मो" च-मात्रे; मुद्राकरप्रमाद एषः? एव मन्यत्रान्यत्रान्यान्योऽप्यस्ति।

†† ऋ० सं० ३, १, २७, २; य० वा० सं० १८, ६६। "अग्निरस्मीति तृचस्य (३, १, २७, १-३) अग्निः परब्रह्म वा देवता"—इति, "साक्षात्कृतपरतत्त्वरूपोऽग्निः तृचेन (२,३) स्वात्मनः सर्वात्मकत्वानुभवमाविष्करोति। ०——०। भोक्तृभोग्यभावेन द्विविधं चेदं सर्वं जगत्"—इत्यादि, "तदनेन अग्नेः सर्वात्मकत्वप्रतिपादनेन परब्रह्मत्व मुक्तं भवति"—इति च ऋ० सं० सा० भा०।

‡‡ "अमृतस्य नाभिः" च-प्रभृतिषु; सामसंहितापाठविरुद्धश्चैषः।

मावद्रुह * मन्न मन्न मदन्त मग्नि † ॥ इति स ह ज्ञात्वा प्रादुर्बभूवैवं तं व्याजहारा यं त ‡ मात्मान मध्यात्मज मन्तिक मन्यस्मा आ चचक्षेति ॥ २ (१५) ॥ २.

अपश्यं गोपा मनिपद्यमान मा च परा च पथिभिश्चरन्तम्। स सध्रीचीः स विषूचीर्वसान § आ वरीवर्त्ति भुवनेष्वन्तः ‖ ॥ आवरीवर्त्ति भुवनेष्वन्तरित्यथैष महानात्मा सत्त्वलक्षणस्तत्परं तद् ब्रह्म तत् सत्यं तत् सलिलं तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगन्धं तद-

---

* "इदेव मावा अह" च-प्रभृतिषु; एष च सा॰-सं॰-पाठविरुद्धः।

† सा॰ सं॰ आर॰ आ॰ १, १, ९। "त्रिष्टुभा मन्त्रदेवता आत्मान मेवाह; आत्मा एव ऋषिः"—इति तत्र सा॰ भा॰। तै॰ आ॰ ९, १०।

‡ "व्याजहारायत" च-प्रभृतिषु।

§ "विषूचीर्वसान" ङ-प्रभृतिषु (स्वरे विशेषः)।

‖ ऋ॰ सं॰ २, ३, २०, १; य॰ वा॰ सं॰ ३७, १७; अथ॰ सं॰ १९, २१, ११। अस्यवामीये सूक्ते इय मेकत्रिंशी। अत्र शौनकः—"स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः। सूक्तं जपत्वास्यवामीयं क्षिप्रं मुच्येत किल्बिषात् ॥"—इति ऋग्वि॰ १, २१। "अस्य वामस्य पलितस्य होतुरिति सूक्तस्य दैर्घतमस एकपञ्चाशत्तम"—इति ऐ॰ आ॰ ५, १२। अस्मिन् सूक्ते प्रायेण संशयोत्थापनादयो बहवोऽर्थाः प्रतिपाद्यन्ते। अपश्यं गोपा मित्याद्यनया ब्रह्मसाक्षात्काररूपस्य प्रशंसा। प्रवर्ग्येऽभिष्टवे विनियुज्यतेऽसौ (आ॰ श्रौ॰ सू॰ ४, ६)। सूर्यस्य च गोपात्व मैतरेयके श्रूयते—"एष वै गोपा एष हीदं सर्वं गोपायति" इत्यादिः। तैत्तिरीयकेऽपि—"अपश्यं गोपा मित्याह असौ वा आदित्यो गोपा स हीमाः प्रजा गोपायति"—इत्यादिः।

मूर्तं तच्छुक्रं तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके तत् क्षेत्रं तज्ज्ञानात्* क्षेत्रज्ञ मनुप्राप्य† निरात्मक‡ मथैष महानात्मा त्रिविधो भवति सत्त्वं रजस्तम इति§ सत्त्वं तु मध्ये विशुद्धं तिष्ठत्यभितो रजस्तमसी (रजः ||) इति कामद्वेषस्तम इत्यविज्ञातस्य विशुध्यतो विभूतिं कुर्वतः क्षेत्रज्ञपृथक्त्वाय कल्पते प्रतिभातिलिङ्गो महानात्मा तमोलिङ्गो विद्या प्रकाशलिङ्गस्तमोऽपि निश्चयलिङ्ग आकाशः ॥ ३ (१६) ॥ ३.

आकाशगुणः शब्द आकाशाद्वायुर्द्विगुणः स्पर्शेन वायोर्ज्योतिस्त्रिगुणं रूपेण ज्योतिष आपश्चतुर्गुणा रसेनाद्भ्यः पृथिवी पञ्चगुणा गन्धेन पृथिव्या भूतग्रामस्थावरजङ्गमास्तदेतदहर्युगसहस्रं जागर्त्ति तस्यान्ते-

---

* "तद्ज्ञानात्" च-प्रभृतिषु ।

† "योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् । येन वेदयते सर्वं सुखं दुःखञ्च जन्मसु ॥"—इति म० स० १२अ० १२, १३ श्लो० ।

‡ "निरात्मज" च-प्रभृतिषु ।

§ "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ (तै० आ० १०, १०, १)"—इति, "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य (छा० ब्रा० ६, ४)"इत्याद्याश्चात्र विवेचनीयाः ।

|| नास्त्येतत् च-प्रभृतिषु ।

सुषुप्स्यतोऽङ्गानि प्रत्याहरति भूतग्रामाः पृथिवी मपि यन्ति पृथिव्यप आपो ज्योतिषं ज्योतिर्वायुं वायु-राकाश माकाशो मनो मनो विद्यां विद्या महान्त मात्मानं महानात्मा प्रतिभां प्रतिभा प्रकृतिं सा स्वपीति युगसहस्रं रात्रिस्तावेतावहोरात्रावजस्रं परिवर्त्तेते स कालस्तदेतदहर्भवति युगसहस्रपर्यन्त महर्यद् ब्रह्मणो विदू रात्रिं युगसहस्रान्तां तेऽहोरात्र-विदो जना इति* ॥ ४ (१७) ॥ ४.

तं परिवर्त्तमान मन्योऽनुप्रवर्त्तते स्रष्टा द्रष्टा विभ-क्तातिमात्रोऽह मिति गम्यते स मिथ्यादर्शनेदम्भावकं†

* मनुसंहितायां मपि—"आकाशं जायते तस्मात् तस्य शब्दं गुणं विदुः। आ-काशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः। बलवान् जायते वायुः स वै स्पर्शगुणो मतः। वायोरपि विकुर्वाणाद् विरोचिष्णु तमोनुदम्। ज्योतिरुत्पद्यते भास्वत्तद्रूपगुण मुच्यते। ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः। अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः।"—इति (१अ० ७५—७८ श्लो०), "आद्याद्यस्य गुणन्त्वेषा मवाप्नोति परःपरः। यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः (१अ०२०श्लो०)"—इति च। दैविकानां युगानान्तु सहस्रं परिसङ्ख्यया। ब्राह्म मेक महर्ज्ञेयं तावती रात्रिरेव च॥ तद्वै युगसहस्रान्तं ब्राह्मं पुण्य महर्विदुः। रात्रिञ्च तावती मेव तेऽहोरात्रविदो जनाः। तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते (१अ० ७२—७४ श्लो०)"—इति च। आकाशादीनां तद्गुणानाञ्च वर्णनं गौतमसूत्रादौ ब्रह्मसूत्रादौ च विस्तरतो द्रष्टव्यम्। भगवद्गीतायां मपि किञ्चिद् द्रष्टव्य मस्ति ८, १७।

† "स मिथ्या दर्शनेदम्भावकं" च।

महाभूतेषु चिरोत्खाकाशाद्वायोः प्राणं चक्षुश्च* वक्ता-रञ्च तेजसोऽद्भ्यः स्नेहं पृथिव्या मूर्त्तिः पार्थिवांस्त्वष्टौ† गुणान् विद्यात् चीन्मातृतस्त्रीन् पितृतोऽस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसशोणितानि मातृतोऽन्नं पान‡ मित्यष्टौ सोऽयं पुरुषः सर्वमयः सर्वज्ञानोऽपि क्लृप्तः§ ॥ ५ (१८) ॥ ५॰

स यद्यनुरुध्यते तद्भवति यदि धर्मोऽनुरुध्यते|| तद्देवो भवति यदि ज्ञान मनुरुध्यते तदमृतो भवति यदि काम मनुरुध्यते संच्यवत इमां योनिं सन्दध्यात्¶ तदिद मद्य मतं श्लेष्मा रेतसः सम्भवति श्लेष्मणो

---

* "प्राणश्चक्षुश्च" च, छ, ज।

† "पार्थिवाँस्त्वष्टौ" च।

‡ "ऽन्नपान" च, छ, ज।

§ "प्राणापानव्यानोदानसमानाः॰———॰वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसङ्कल्पाः ॰———॰ शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवः॰ ———॰ त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि ॰———॰ शब्दस्पर्शरूपरसगन्धाः ॰———॰ पृथिव्यप्तेजोवायुराकाशाः ॰———॰ अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्ध्यन्ताम् (तै॰ आ॰ १०, ५१—५७)"—इत्येवमाद्यत्राच पर्यालोच्याः।

|| "धर्मे मनुरुध्यते" च, छ, ज।

¶ "शुभाशुभफलं कर्म मनोवाग्देहसम्भवम्। कर्मजा गतयो नृणा मुत्तमाधममध्यमाः॥"—इत्यारभ्य "यादृशेन तु भावेन यद् यत् कर्म निषेवते। तादृशेन शरीरेण तत्तत् फल मुपाश्नुते॥"—इत्यन्तो (म॰ सं॰ १२अ॰३—८१ श्लो॰) ग्रन्थश्च इम मर्थमेव प्रस्तौते।

रसो रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसः स्नावा स्नाव्नो ऽस्थीन्यस्थिभ्यो मज्जा मज्जातो रेतस्त-दिदं योनौ रेतः सिक्तं पुरुषः सम्भवति* शुक्रातिरेके पुमान् भवति शोणितातिरेके स्त्री भवति द्वाभ्यां समेन नपुंसको भवति शुक्रेण भिन्नेन † यमो भवति ‡ शुक्रशोणितसंयोगान् मातृपितृसंयोगाच्च (तत् §) कथ मिदं शरीरं परं संयम्यते सौम्यो भवत्येकरात्रोषितं कललं भवति पञ्चरात्राद् बुद्बुदाः सप्तरात्रात् पेशी द्विसप्तरात्रादर्बुदः पञ्चविंशतिरात्रः स्वस्थितो घनो

---

* "तस्मात् पराञ्चौ भूत्वा चतुष्पादो रेतः सिञ्चति, सम्यङ् द्विपाद् भवति, तस्मात् सम्यञ्चो भूत्वा द्विपादो रेतः सिञ्चति (ऐ० आ० १, ५, ५)"—इत्यादिः, "एष ह वा पत्नीषु रेतो दधाति ० ——— ० पुरुषस्य सेवनी सीव्यति, यैषा शिश्नेऽधि पुमांसोऽस्य पुत्रा जायन्ते"—इति च (ऐ० आ० २, २, १२) द्रष्टव्यम्।

† "शुक्रभिन्नेन" च, छ, ज।

‡ "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः। समे पुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः॥"—इति च म० सं ३अ० ४८ श्लो०। "कारणानुविधायित्वात् कार्याणां तत्स्वभावता। नानायोन्याकृतीः सत्त्वो धत्तेऽतो द्रुतलोहवत्। अत-एव च शुक्रस्य बाहुल्याज्जायते पुमान्। रक्तस्य स्त्री, तयोः साम्ये क्लीवः शुक्रार्तवे पुनः। वायुना बहुशो भिन्ने यथास्वं बह्वपत्यता। वियोनिविकृताकारा जायन्ते विकृतैर्मलैः॥"—इत्यादि च (अ० हृ० शा० स्था० १अ० ५—७ श्लो०) वैद्यके बहु द्रष्टव्यम्।

§ नास्त्येतत् पदं ख-ग-भ-पुस्तकेषु।

भवति* माससमात्रात्कठिनो † भवति द्विमासाभ्यन्तरे शिरः सम्पद्यते मासत्रयेण ग्रीवाव्यादेशो मासचतुष्केण त्वग्व्यादेशः पञ्चमे मासे नखरोमव्यादेशः षष्ठे मुखनासिकाक्षिश्रोत्रं च सम्भवति सप्तमे चलनसमर्थो भवत्यष्टमे बुद्ध्याध्यवस्यति नवमे सर्वाङ्गसम्पूर्णो भवति ‡। मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः। नाना योनिसहस्राणि मयोषितानि यानि वै। आहारा विविधा भुक्ताः पीता नानाविधा स्तनाः। मातरो विविधा दृष्टाः पितरः सुहृदस्तथा। अवाङ्मुख पीड्यमानो जन्तुश्चैव समन्वितः। साङ्ख्यं

---

* "च्युतो भवति" ख, ग, भ।

† "माससमात्रात् कठिणो" च।

‡ "अयं द्यावापृथिवी० —०दाधार दशयन्त्रं मृत्सम् (ऋ० सं० ४,७, २०, ४)" —इत्यस्या व्याख्यानावसरे सायणः—"दशयन्त्रम्, उत्सस्य हेतुगर्भविशेषण मेतत्। उत्सरणहेतुभूतैः दशभिः चक्षुःश्रोत्रादिभिः यन्त्रैरुपायैर्युक्तम्। इदञ्च पदं खैलिकै-र्व्याख्यायते"—इत्यादि। ते च खैलिकमन्त्रा यथा—"चक्षुश्च श्रोत्रं च मनश्च वाक् च प्राणापानौ देह इदं शरीरम्। द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्र मुत्सम्॥ उरश्च पृष्ठञ्च करौ च बाहू जङ्घे चोरू उदरं शिरश्च। रोमाणि मांसं रुधिरोऽस्थिमज्ज मेतच्छरीरं जलबुद्बुदोपमम्॥ भ्रुवौ ललाटे च तथा च कर्णौ हनू कपोलौ चुबुकस्तथा च। ओष्ठौ च दन्ताश्च तथैव जिह्वा मेतच्छरीरं सुखरन्ध्रकोशम्॥"—इति। तत्रैव सायणभाष्ये दशयन्त्र मित्यस्य व्याख्यानान्तर मपि कृत मस्ति। खैलिकविवरणं त्वनुक्रमण्यां द्रष्टव्यम्।

योगं समभ्यस्येत् पुरुषं वा पञ्चविंशक मिति * ततश्च दशमे मासे प्रजायते † जातश्च वायुना स्पृष्टो न स्मरति ‡ जन्ममरणेऽन्ते § च शुभाशुभं कर्मैतच्छरीरस्य प्रामाण्यम् ॥ ६ (१९) ॥ ६.

अष्टोत्तरं सन्धिशत मष्टाकपालं शिरः सम्पद्यते षोडश वपापलानि नव स्नायुशतानि सप्तशतं पुरुषस्य मर्म्मणा मर्द्धचतस्रो रोमाणि कोट्यो हृदयं ह्यष्टकपालानि द्वादशकपालानि जिह्वा वृषणौ ह्यष्टसुपर्णौ तथोपस्थगुदपाय्वेतन्मूत्रपुरीषं कस्मादाहारपान‖सिक्तत्वानुपचित ¶ कर्म्माणावन्योन्यं ** जयेते †† इति ‡‡ तं विद्याकर्म्मणी समन्वारभेते पूर्वप्रज्ञा च महत्यज्ञानतम-

---

* म० भा० iv. s. १८९. v. ४३९।

† "अथैतयोः पथोर्न कतरेण चन तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व-म्रियस्वेति"—इति च छा० श्रा० ७प्र० १०ख०। पथोः = देवयान-पितृयानयोरिति यावत्।

‡ "स्पृष्टस्तु स्मरति" च, छ, ज।

§ "जन्ममरण मन्ते" च, छ, ज।

‖ "कस्मादाहारापान" ख, छ।

¶ "सिक्तत्वानुचित" छ।

** "कर्मणावन्योन्यं" ख, छ।

†† "जायेते" ख, छ।

‡‡ ग-पुस्तके तु इहैव सप्तमखण्डसमाप्तिः।

सि मग्नौ जरामरणक्षुत्पिपासाशोकक्रोधलोभमोहमदभयमत्सरहर्षविषादेर्ष्यासूयात्मकैर्द्वन्द्वैरभिभूयमानः सोऽस्मादार्जवञ्जवीभावानां तन्निमुच्यते सोऽस्मापान्नं महाभूमिकावच्छरीरान्निमेषमात्रैः प्रक्रम्य प्रकृतिरधिपरीत्य* तैजसं शरीरं कृत्वा कर्मणोऽनुरूपं फल मनुभूय तस्य सङ्क्षये पुनरिमँल्लोकं† प्रतिपद्यते‡॥ ॥ ७ (२०) ॥ ७§.

---

* "प्रकृतिरभिपरीत्य" ख, ग, भ।

† "पुनरिमं लोकं"—इत्येव चातिरिक्तसर्वपुस्तकेषु।

‡ "तावुभौ भूतसम्पृक्तौ महान् क्षेत्रज्ञ एव च। उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः॥ असङ्ख्या मूर्त्तयस्तस्य निष्पतन्ति शरीरतः। उच्चावचानि भूतानि सततं चेष्टयन्ति याः॥ पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम्। शरीरं यातनार्थीयमन्यदुत्पद्यते ध्रुवम्॥ तेनानुभूय ता यामीः शरीरेणेह यातनाः। तास्वेव भूतमात्रासु प्रलीयन्ते विभागशः॥ सोऽनुभूयासुखोदर्कान् दोषान् विषयसङ्गजान्। व्यपेतकल्मषोऽभ्येति तावेवोभौ महौजसौ॥"—इति, "देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः। तिर्य्यक्त्वं तामसा नित्य मित्येषा त्रिविधा गतिः॥"—इत्याद्याश्च मनुसंहितायां द्रष्टव्याः (१२अ० १४—१८, ४० श्लो०)। तथापरञ्चापि—"तद्य इह रमणीयचरणा अभ्याशोहयन्, ते रमणीयां योनि मापद्येरन्;—ब्राह्मणयोनिं वा, क्षत्रिययोनिं वा, वैश्ययोनिं वापि; अथ य इह कपूयचरणा अभ्याशोहयत्, ते कपूयां योनि मापद्येरन्;—श्वयोनिं वा, सूकरयोनिं वा, चण्डालयोनिं वा।"—इति छा० उ० ५प्र० १०ख०। २भा० ११२ पृ० १४पं० "कपूयं" पदं तद्व्याख्यानञ्च द्रष्टव्यम्।

§ ख-पुस्तके अत्रैव त्रयोदशस्याध्यायस्य द्वितीयः पादः समाप्तः; ग-पुस्तके चेह "पञ्चे द्वितीयः पादः"—इति लिखितं दृश्यते; परं भ-पुस्तके रोथदृष्टेषु पादाङ्कितपुस्तकेषु च नात्र पादसमाप्तिः।

अथ ये हिंसा माश्रित्य विद्या मुत्सृज्य महत्तपस्तेपिरे चिरेण वेदोक्तानि वा कर्माणि कुर्वन्ति ते धूम मभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्ष मपक्षीयमाणपक्षाद्दक्षिणायनं दक्षिणायनात् पितृलोकं पितृलोकाच्चन्द्रमसं चन्द्रमसो वायुं वायोर्वृष्टिं वृष्टेरोषधयश्चैतद्भूत्वा (तस्य सङ्क्षये*) पुनरेवमँल्लोकं † प्रतिपद्यते ‡ ॥ ८ (२१) ॥ ८.

अथ ये हिंसा मुत्सृज्य विद्या माश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कुर्वन्ति तेऽर्चिरभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्ष मापूर्यमाणपक्षादुदगयन मुदगयनाद्देवलोकं देवलोकादादित्य मादित्याद्वैद्युतं वैद्युतान्मानसं मानसः पुरुषो भूत्वा

* ख-ग-भ-पुस्तकेष्विमे पदे न विद्येते ।

† "पुनरेवमं लोकं"—इत्येव चारिरिक्तेषु ।

‡ "अथ य इमे ग्राम इष्टापूर्त्ते दत्त मित्युपासते, ते धूम मभिसम्भवन्ति, धूमाद्रात्रिं, रात्रेरपरपक्ष, मपरपक्षात् यान् षड् दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवन्ति, मासेभ्यः पितृलोकम्, पितृलोकादाकाश, माकाशाच्चन्द्रमस मेष सोमो राजा तद्देवानामन्नं, तं देवा भक्षयन्ति, तस्मिन् यावत् सम्पात मुषित्वाथैत मेवाध्वानं पुनर्निवर्त्तन्ते; यथैत माकाश, माकाशाद् वायुं, वायुर्भूत्वा धूमो भवति, धूमो भूत्वाभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति, त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते, ऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्न मत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति ।"—इति च छा० प्रा० ७क० १०ख० ।

ब्रह्मलोक मभिसम्भवन्ति* ते न पुनरावर्त्तन्ते† शिष्टा दन्दशूका य इदं‡ न जानन्ति तस्मादिदं वेदितव्य मथाप्याह§ ॥ ६ (२२)॥ ६.

---

* "मभिसम्भवति" क, ग, झ ।

† "पुनरावर्त्तते" क, ग, झ ।

‡ "यत इदं" च, छ, ज ।

§ "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिष मभि सम्भवन्ति, अर्चिषोऽहः, अह्न आपूर्यमाणपक्ष, मापूर्यमाणपक्षाद् यान् षडुदङ्ङेति मासांस्तान्, मासेभ्यः संवत्सरम्, संवत्सरादादित्य, मादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं, तत् पुरुषो मानवः स एतान् ब्रह्म गमयत्येष देवयानः पन्था इति ।"—इति च छा० ब्रा० ७प्र० १०ख० ।

अस्ति च पथद्वयम् —देवयानः, पितृयाण इति । "परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् (ऋ० सं० ७, ६, २६, १)"—इत्यादौ देवयानम्, "पन्था मनु प्र विद्वान् पितृयाणम् (ऋ० सं० ७, ५, २०, ७)"—इत्यादौ च पितृयाणं श्रूयते । "कर्मणा पितृलोको विद्यया देवलोकः"—इति श्रुतिश्च "अन्यदेवाऽऽहुर्विद्याया अन्यदाहुरविद्यायाः (य० वा० सं० ४० अ० १३क०)"—इत्यत्रोद्धृता महीधरेण ।

ऐतरेयब्राह्मणेऽपि—"अथातो ब्रह्मणः परिमरो—यो ह वै ब्रह्मणः परिमरं वेद पर्येनं द्विषन्तो भ्रातृव्याः परिसपत्ना म्रियन्ते यं वै ब्रह्म योऽयं पवते त मेताः पञ्च देवताः पञ्च देवताः परिम्रियन्ते विद्युद्, वृष्टि, श्चन्द्रमा, आदित्यो,ऽग्निः । विद्युद्वै विद्युत्य वृष्टि मनुप्रविशति,०——० वृष्टिर्वै वृष्ट्वा चन्द्रमस मनुप्रविशति,०——० चन्द्रमा वा अमावास्याया मादित्य मनुप्रविशति,०—० आदित्यो वा अस्तं यन्नग्नि मनुप्रविशति,०—० अग्निर्वा उद्यन् वायु मनुप्रविशति;०—० ता वा एता देवता अत एव पुनर्जायन्ते;—वायोरग्निर्जायते, प्राणाद्धि बलान्मथ्यमानोऽधिजायते,०—० अग्नेर्वा आदित्यो जायते,०—० आदित्याद्वै चन्द्रमा जायते,०—० चन्द्रमसो वै वृष्टिर्जायते,०—० वृष्टेर्वै विद्युज्जायते,०—० । स एष ब्रह्मणः परिमरः ।"—इति ८, ५, ५ ।

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति*॥ न तं विद्यया विदुषो य एवं विद्वांसो वदन्त्यक्षरं ब्रह्मणस्पति मन्यद्युष्माक मन्तर मन्यदेषा मन्तरं बभूवेति नीहारेण प्रावृतास्तमसा जल्प्या चासुतृप उक्थशासः प्राणं सूर्यं† यत्पथगामिनश्चरन्त्य-

---

* ऋ० सं० ८, ३, १, ७; य० वा० सं० १७, ३१। अथैतत्सायणभाष्यम् - "हे नराः! 'तं' विश्वकर्माणं 'न विदाथ' न जानीथ; 'यः' ('इमा') इमानि भूतानि 'जजान' उत्पादितवान्। देवदत्तोऽहं यज्ञदत्तोऽहमिति यथ मात्मानं विश्वकर्माणं जानीम इति यदुच्येत, तदसत्; न ह्यहम्प्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य तत्त्वम्; किन्तु 'युष्माकम्' अहम्प्रत्ययगम्यानां जीवानाम् 'अन्यत्' अहम्प्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्य मीश्वरतत्त्वं 'बभूव' भवति, विद्यते। जीवरूपवत्तदपि कुतो न वेद्यः? इति चेत्, श्रूयताम्;—'नीहारेण प्रावृताः' यूयं नीहारसदृशेनाज्ञानेनाच्छन्नाः, अतो न जानीथ। यथा,—नीहारो नात्यन्त मसद्, दृष्टेरावरकत्वात्; नात्यन्तं सत्, काष्ठपाषाणादिवत् सम्भोक्तु मयोग्यत्वात्; एव मज्ञान मपि, नात्यन्त मसत्, ईश्वरतत्त्वावरकत्वात्; नापि सद्, बोधमात्रनिवर्त्यत्वात्। ईदृशेनाज्ञानेन सर्वे जीवाः प्रावृताः। न केवलं प्रावृतत्वं किन्तु 'जल्प्या' च देवोऽहं मनुष्योऽह मित्याद्यनृतजल्पनेन प्रावृताः। किञ्च 'असुतृपः' केनाप्युपायेन असून् प्राणांस्तृप्यन्ते, उदरम्भरा इत्यर्थः, न तु पारमेश्वरं तत्त्वं विचारितवन्तः। न केवल मिहलोकभोगमात्रलग्नाः 'उक्थशासः' नानाविधेषु यज्ञेषु उक्थं प्रउगनिष्केवल्यादिकं शंसन्तः 'चरन्ति' पृथिव्यां वर्तन्ते। केवल मैहिकामुष्मिकभोगपरा वर्तन्तेऽतो विश्वकर्माणं देवं न जानीथेत्यर्थः।"—इति।

† "उद्यन् खलु वा आदित्यः सर्वाणि भूतानि प्रणयति, तस्मादेनं प्राण इत्याचक्षते"—इत्यादि ऐ० ब्रा० ५, ५, ९।

विद्वांसः* क्षेत्रज्ञ मनुप्रवदन्त्यथाहो विद्वांसः क्षेत्रज्ञोऽनुकल्पते† तस्य तपसा सहाप्रमाद मेत्ययाप्तव्यो भवति तेनासन्तत मिच्छेत्तेन सख्य मिच्छेदेष हि सखा श्रेष्ठः सञ्जानाति भूतं भवद्भविष्यदिति ज्ञाता कस्माज्जायतेः‡ सखा कस्मात् सख्यतेः सह भूतेन्द्रियैः शेरते§ महाभूतानि सेन्द्रियाणि प्रज्ञया कर्म कारयतीति (वा||) तस्य यदापः¶ प्रतिष्ठाशील मुपशम आत्मा ब्रह्मेति स ब्रह्मभूतो भवति साक्षिमात्रो व्यवतिष्ठतेऽबन्धो ज्ञानकृतोऽथात्मनो महतः प्रथमं भूतनामधेयान्यनुक्रमिष्यामः** ॥ १० (२३) ॥ १०.

हंसः । घर्मः । यज्ञः । वेनः । मेघः । कृमिः । भूमिः । विभुः । प्रभुः । शम्भुः । राभुः । वधकर्मा । सोमः । भूतम् । भुवनम् । भविष्यत् । आपः । महत् । व्योम । यशः । महः । स्वर्णीकम् । स्मृतीकम् । स्वृतीकम् ।

* "सूर्यं यन्त्यथ गामिन्यस्वरन्त्यविद्वांसः" ख, ग, भ ।

† "क्षेत्रज्ञो न कल्पते" ख, ग, भ ।

‡ "कस्माज्जानतेः" ख, ग, भ ।

§ "शेते" ख, ग, भ ; "खे शेते"—इति रोथुस-इष्टेष m ।

|| नास्त्येतत् पदं च-छ-ज-पुस्तकेषु ।

¶ "तपः" ख, ग, भ ।

** "भूतनामधेयान्यनुक्रमिष्यामः" च, छ, ज ।

सतीकम्। सतीनम्। गहनम्। गभीरम्। गह्वरम्। कम्। अन्नम्। हविः। सद्म। सदनम्। ऋतम्। योनिः। ऋतस्य योनिः। सत्यम्। नीरम्। (हविः*।) रयिः। सत्। पूर्णम्। सर्वम्। अक्षितम्। बर्हिः। नाम। सर्पिः। अपः। पवित्रम्। अमृतम्। इन्दुः। हेम। स्वः। सर्गाः। शम्बरम्। अम्बरम्। वियत्। व्योम। बर्हिः। धन्व। अन्तरिक्षम्। आकाशम्। आपः। पृथिवी। भूः। (स्वयम्भूः†।) अध्व। पुष्करम्। सगरम्। समुद्रः। तपः। तेजः। सिन्धुः। अर्णवः। नाभिः। (ऊधः‡।) वृक्षः। तत्। यत्। किम्। ब्रह्म। वरेण्यम्। हंसः। आत्मा। भवन्ति। वर्धन्ति। अध्वानम्। यद्वाहिष्ठा§। शरीराणि। अव्ययञ्च संस्कुरुते‖। यज्ञः। आत्मा। भवति। यदेनं तन्वतेऽथैनं महान्तमात्मानमेतानि सूक्तान्येता ऋचोऽनुप्रवदन्ति¶ ॥ ११ (२४) ॥ ११.

---

* नास्त्येतत् पदम् ख-ग-भ-पुस्तकेषु।

† नास्त्येतच्च पदम् च-छ-ज-पुस्तकेषु।

‡ नास्त्येतदपि पदम् च-छ-ज-पुस्तकेषु।

§ "यद्वाहिष्ठा"—इति ख, ग, भ।

‖ "अव्ययं च संस्कुरुते"—इति ख, ग, छ, भ।

¶ मेघः, भूमिः, वधकर्मा, सोमः, आपः, यशः, स्वर्णीकम्, सूतीकम्, स्वतीकम्, सतीकम्, कम्, अन्नम्, सद्म, सत्, सर्वं, नाम, पवित्रम्, अमृतम् अध्वा, सगरः तपः, तेजः, सिन्धुः, नाभिः, वृक्षः, तत्, यत्, ब्रह्म, वरेण्यम्, भवति, वर्धन्त्यध्वानम्, —इमे च स्वरपाठभेदाः च-प्रभृतिषु।

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः। जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः* ॥ (सोमः पवते जनयिता मतीनां जनयिता दिवो जनयिता पृथिव्या जनयिताग्नेर्जनयिता सूर्यस्य जनयितेन्द्रस्य जनयितोत विष्णोः†)—(सोमः पवते सोमः सूयः प्रसवनाज्जनिता मतीनां प्रकाशकर्मणा मादित्यरश्मीनां दिवो द्योतनकर्मणा मादित्यरश्मीनां पृथिव्याः प्रथनकर्मणा मादित्यरश्मीना मग्नेर्गतिकर्मणा मादित्यरश्मीनां सूर्यस्य स्वीकरणकर्मणा मादित्यरश्मीना मिन्द्रस्यैश्वर्यकर्मणा मादित्यरश्मीनां विष्णोर्व्याप्तिकर्मणा मादित्यरश्मीना मित्यधिदैवत मथाध्यात्मं सोम आत्माप्येतस्मादेवेन्द्रियाणां जनितेत्यर्थः। अपि वा सर्वाभिर्विभूतिभिर्विभूतत आत्मेत्यात्मगति माचष्टे‡) ॥ १२ (२५) ॥ १२.

ब्रह्मा देवानां पदवीः कवीना मृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्र

---

* ऋ० सं० ७, ४, ९, ५; सा० सं० उ० श्रा० ९, १, ४, ५ ।

† नैवं पाठो दृश्यते च-छ-ज-पुस्तकेषु ।

‡ नैवं पाठो दृश्यते ख-ग-झ-पुस्तकेषु ।

मर्त्येति रेभन्* ॥ ब्रह्मा देवाना मित्येष हि ब्रह्मा भवति देवानां देवनकर्मणा मादित्यरश्मीनां पदवीः कवीना मित्येष हि पदं वेत्ति कवीनां कवीयमानाना† मादित्यरश्मीना मृषिर्विप्राणा मित्येष हि ऋषिणो भवति ‡ विप्राणां व्यापनकर्मणा मादित्यरश्मीनां महिषो मृगाणा मित्येष हि महान् भवति मृगाणां मार्गणकर्मणा मादित्यरश्मीनां श्येनो गृध्राणा मिति श्येन आदित्यो भवति श्यायतेर्गतिकर्मणो गृध्र आदित्यो भवति गृध्यते स्थानकर्मणो यत एतस्मिंस्तिष्ठति स्वधितिर्वनाना मित्येष हि स्वयङ्कर्माण्यादित्यो धत्ते वनानां वननकर्मणा मादित्यरश्मीनां सोमः पवित्र मत्येति रेभन्नित्येष हि पवित्रं रश्मीना मत्येति स्तूयमान एष एवैतत् सर्व मक्षर मित्यधिदैवत मथाध्यात्मं ब्रह्मा देवाना मित्यय मपि ब्रह्मा भवति देवानां देवनकर्मणा मिन्द्रियाणां पदवीः कवीना मित्यय मपि पदं वेत्ति कवीनां कवीयमानाना§

---

* ऋ० सं० ७, ४, ७, १ ; य० वा० सं० ३७, १७ ; तै० आ० १०, १०, ४ ; सा० सं० उ० आ० ३, १ ; १९, २ । देवतुवां हविःषु सोमस्य वनस्पतेर्ब्रह्मा देवाना मिति याज्या (आ० श्रौ० सू० ४. ११.) । म० भा० भग० गौ० ३३ अ० १९—४१ श्लो० ।

† "कवीयमाणाना" ख, ग, भ ।

‡ "ऋषिणा" ग ; "हि ऋषिणा" ख, भ ।

§ "कवीयमाणाना" ख, ग, भ ।

मिन्द्रियाणा मृषिर्विप्राणा मित्यय मप्यृषिणो* भवति विप्राणां व्यापनकर्मणा मिन्द्रियाणां महिषो मृगाणा मित्यय मपि महान् भवति मृगाणां मार्गणकर्मणा मिन्द्रियाणां श्येनो गृध्राणा मिति श्येन आत्मा भवति श्यायतेर्ज्ञानकर्मणो गृध्राणीन्द्रियाणि गृध्यतेर्ज्ञान-कर्मणो यत एतस्मिंस्तिष्ठति † स्वधितिर्वनाना मित्यय मपि स्वयङ्कर्माण्यात्मनि धत्ते वनानां वननकर्मणा मिन्द्रियाणां सोमः पवित्र मत्येति रेभन्नित्यय मपि पवित्र मिन्द्रियाण्यत्येति स्तूयमानो ऽय मेवैतत् सर्व मनुभवत्यात्मगति माचष्टे ‡ ॥ १३ (२६) ॥ १३.

---

* "मित्यय मपि ऋषिणो" च, छ, ज ।

† "एतस्मिंस्तिष्ठन्ति" च, छ, ज ।

‡ "अन्तर्बहिर्वर्त्तिनां प्राणसमुद्रादीना मचेतनानां दृष्टि मत्वा चेतनेषु परमेश्वरस्योत्कृष्टरूपेणावस्थान मुच्यते। 'देवानां' अग्नीन्द्रादीनां मध्ये, 'ब्रह्मा' चतुर्मुखो भूत्वा परमेश्वरो नियामकत्वेनावतिष्ठते। तथा 'कवीनां' काव्यनाटकादिकर्त्तॄणां पुरुषाणां मध्ये, 'पदवीः', भूत्वावतिष्ठते। व्याकरणे निष्पन्नः सुशब्दविशेषः पदं तद्वेति गच्छतीति 'पदवीः' शब्दसामर्थ्याभिज्ञो व्यासवाल्मीक्यादिरूप इत्यर्थः। 'विप्राणां' वैदिकमार्गवर्त्तिनां ब्राह्मणानां मध्ये, 'ऋषिः' तत्तज्ज्ञानप्रवर्त्तको वसिष्ठादिरूपः, बभूव। 'मृगाणां' चतुष्पदां मध्ये, शक्त्याधिक्येन युक्तः 'महिषः', बभूव। 'गृध्रोपलक्षितानां' सर्वेषां पक्षिणां मध्ये प्रबलः 'श्येनः', बभूव। 'वनानां' वृक्षसमूहरूपाणां मध्ये, छेदनार्थः 'स्वधितिः' परशुः, बभूव। यागहेतुभूतवल्ल्यात्मकः 'सोमः', भूत्वा 'रेभन्' मन्त्रशब्दयुक्तः सन्, 'पवित्रं' शुद्धिकारणं गङ्गाजलकुशदर्भादिद्रव्यजातं सर्वम्, 'अत्येति' ॥"—इति तै० आ० सा० भा०। ऋक्सामसंहितयोः सायणीयभाष्ययोः एकरूप मेव व्याख्यानान्तर मपि ।

तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम्। गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः* ॥ वह्निरादित्यो भवति स तिस्रो वाचः प्रेरयत्यृचो यजूंषि सामान्यृतस्यादित्यस्य कर्माणि ब्रह्मणो मतान्येष एवैतत् सर्वं मक्षर मित्यधिदैवत मथाध्यात्मं वह्निरात्मा भवति स तिस्रो वाच ईरयति प्रेरयति विद्यामतिबुद्धिमतामृतस्यात्मनः† कर्माणि ब्रह्मणो मतान्यय मेवैतत् सर्वं मनुभवत्यात्मगति माचष्टे‡ ॥ १४ (२७) ॥ १४.

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः। सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते§ ॥ एत एव सोमं गावो धेनवो

---

* ऋ० सं० ७, ४, १७, ४; सा० सं० उ० आ० ६, १, ४, ३।

† "०बुद्धिमतान्यृतस्यात्मनः" ख, ग, भ।

‡ 'वह्निः' वोढा, यजमानः 'तिस्रः वाचः' ऋग्यजुःसामात्मिकाः स्तुतीः 'प्र ईरयति'। तथा 'ऋतस्य' यज्ञस्य 'धीतिं' धारयित्रीं 'ब्रह्मणः' परिवृढस्य सोमस्य 'मनीषां' मनस ईशित्रीं कल्याणीं वाचं च प्रेरयति। किञ्च 'गोपतिं' वृषभं यथा 'गावः' 'अभिगच्छन्ति' तद्वत् गवां स्वामिनं सोमं गावः, 'पृच्छमानाः' पृच्छन्त्यः सत्या 'यन्ति' स्वपयसा मिश्रयितु मभिगच्छन्ति। तथा 'वावशानाः' कामयमानाः 'मतयः' स्तोतारः 'सोमं' 'यन्ति' स्तोतु मभिगच्छन्ति॥"—इति सा० भा०।

§ ऋ० सं० ७, ४, १७, ५; सा० सं० उ० आ० २, १, १०, १।

रश्मयो वावश्यमानाः* कामयमाना आदित्यं यन्त्येव मेव सोमं विप्रा रश्मयो मतिभिः पृच्छमानाः कामयमाना आदित्यं यन्त्येव मेव सोमः सुतः पूयते अज्यमान एत मेवार्काश्च त्रिष्टुभश्च सन्नवन्ते तत एतस्मिन्नादित्य एकं भवन्तीत्यधिदैवत† मथाध्यात्म मेत एव सोमं गावो धेनव इन्द्रियाणि वावश्यमानानि‡ कामयमानान्यात्मानं यन्त्येव मेव सोमं विप्रा इन्द्रियाणि मतिभिः पृच्छमानानि कामयमानान्यात्मानं यन्त्येव मेव सोमः सुतः पूयते अज्यमान इम मेवात्मा च सप्त ऋषयश्च सन्नवन्ते तानीमान्येतस्मिन्नात्मन्येकं§ भवन्तीत्यात्मगति माचष्टे॥ ॥ १५ (२८) ॥ १५॥

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य राजा। वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो

---

* "वावाश्यमानाः" ख, ग, भ।

† "भवन्त्यधिदैवत" ख, ग, भ।

‡ वावाश्यमानानि" ख, ग, भ।

§ "तान्येतस्मिन्नात्मन्येकं" च, छ, ज।

|| "'धेनवः' प्रीणयित्र्यो गावः 'सोमं' 'वावशानाः' कामयमानाः भवन्ति। 'विप्राः' मेधाविनः स्तोतारो 'मतिभिः' 'पृच्छमानाः' प्रच्छन्तो भवन्ति। 'अज्यमानः' गोभिः सिच्यमानः 'सुतः' अभिषुतः, 'सोमः' ऋत्विग्भिः परि 'पूयते'। तथा 'त्रिष्टुभः' त्रिष्टुब्रूपा 'अर्काः' अस्माभिः क्रियमाणाः एते मन्त्राः 'सोमे' 'सं नवन्ते' सङ्गच्छन्ते॥— इति सा० भा०।

वावृधे सुवानं इन्दुः* ॥ अत्यक्रमीत् समुद्र आदित्यः परमे व्यवने वर्षकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे सुवान इन्दुरित्यधिदैवत मथाध्यात्म मत्यक्रमीत् समुद्र आत्मा परमे व्यवने ज्ञानकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा वृषा पवित्रे अधि सानो अव्ये महत् सोमो† वावृधे सुवान इन्दुरित्यात्मगतिं माचष्टे‡ ॥ १६ (२६) ॥ १६.

महत्तत्सोमो महिषश्चकारापां यद्गर्भो ऽवृणीत देवान्। अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः§ ॥ महत्तत् सोमो महिषश्चकारापां यद्गर्भो ऽवृणीत देवाना माधिपत्य‖ मदधादिन्द्रे

---

* ऋ० सं ७, ४, १८. ५; सा० सं० उ० आ० ६, १, ४, ७।

† "बृहत्सोमो" च, छ, ज।

‡ "समुद्रः" यस्मादापः सन्द्रवन्ति, स समुद्रः, अपां वर्षकः। 'राजा' सोमः। 'प्रथमे' विसृते 'भुवनस्य' उदकस्य 'विधर्मन्' विधारके ऽन्तरिक्षे 'प्रजाः' 'जनयन्' उत्पादयन् 'अक्रान्' सर्वं मतिक्रामति। ***। 'वृषा' कामानां वर्षिता, 'सुवानः'। अभिषूयमाणः, 'इन्दुः' दीप्तः, स 'सोमः'। 'अधि' अधिकं 'सानौ' समुच्छ्रिते, 'अव्ये' अविभवे, पवित्रे 'बृहद्' प्रभूतम् 'वावृधे' वर्द्धते॥"—इति सा० भा०।

§ ऋ० सं० ७, ४, १९, १; सा० सं० उ० आ० ६, १, ५, १०।

‖ "देवानामाधिपत्य" च, छ, ज।

पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुरादित्य इन्दुरात्मा*॥ १७ (३०)॥ १७.

विधुन्दद्राणं समने बहूनां युवानं सन्तं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान†॥ विधुं विधमनशीलं दद्राणं दमनशीलं‡ युवानं चन्द्रमसं पलित आदित्यो गिरति सद्यो म्रियते स दिवा समुदितेत्यधिदैवत मथाध्यात्मं विधुं विधमनशीलं दद्राणं दमनशीलं§ युवानं महान्तं पलित आत्मा गिरति रात्रौ म्रियते रात्रिः समुदितेत्यात्मगति माचष्टे‖॥ १८ (३१)॥ १८.

---

* "'महिषः' महान् पूज्यः वा सोमः, 'महत्' प्रभूतं 'तत्' कर्म 'चकार' अकरोत्। किं तत्? 'अपां गर्भः' उदकानां गर्भः, उदकानां गर्भभूतः, जनयितृत्वाज्जन्यत्वाच्च। सः सोमः 'देवान्' 'अवृणीत' समभजतेति। 'यत्' तत् कृतवानिति। किञ्च 'पवमानः' पूयमानः, सोमः, 'ओजः' सोमपानेन जन्यं बलम् 'इन्द्रे' 'अदधात्' व्यदधात्। तथा 'इन्दुः' सोमः 'सूर्ये' 'ज्योतिः' तेजः अजनयत्॥"—इति सा० भा०।

† ऋ० सं० ८, १, १६, ५; सा० सं० उ० आ० ४, १, ४, २; अथ० सं० ९, १०, ९-१०।

‡,§ "द्रमनशीलं" ख, ग, भ।

‖ "अनया कालात्मक इन्द्रः स्तूयते। 'विधुम्' विधातारम्, सर्वस्य युद्धादेः कर्तारम्। विपूर्वो दधातिः करोत्यर्थः। तथा 'समने'। अनन मनः प्राणनम्, सम्यगननोपेते सङ्ग्रामे। 'बहूनां' शत्रूणां 'दद्राणं' द्रावकम् ईदृक्सामर्थ्योपेतं 'युवानं' सन्तं

साकञ्जानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति। तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः* ॥ सहजातानां षण्णामृषीणामादित्यः सप्तमस्तेषां† मिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वाद्भिः सह सम्मोदन्ते यत्रैतानि सप्तऋषीणानि ज्योतींषि तेभ्यः पर आदित्यस्तान्येतस्मिन्नेकं‡ भवन्तीत्यधिदैवत मथाध्यात्मं सहजातानां षण्णामिन्द्रियाणामात्मा सप्तमस्तेषामिष्टानि वा कान्तानि वा क्रान्तानि वा गतानि वा मतानि वा नतानि वान्नेन सह सम्मोदन्ते यत्रेमानि सप्तऋषीणानीन्द्रियाण्येभ्यः पर

पत्यं 'पलितः' जरा 'जगार' निगिरतीन्द्राज्ञया। एवं मुक्तलक्षणं वक्ष्यमाणलक्षणञ्च 'देवस्य' कालात्मकस्य इन्द्रस्य 'महित्वा' महत्त्वेनोपेतं 'काव्यं' सामर्थ्यम् 'पश्य' पश्यत हे जनाः! तथा 'जरसा' प्राप्तोऽयं 'ममार' म्रियते। सः 'ह्यः' परेद्युः 'समान' सम्यक् चेष्टते; पुनर्जन्मान्तरे प्रादुर्भवतीत्यर्थः। तदेवं चत्वारि नामानि शरीराण्युक्तानि ॥"—इति सा० भा०।

* ऋ० सं० १, १, १६४, १५ ; अथ० सं० ९, १५, १६।

† "मादित्यरश्मयस्तेषा" रोथ्सहृष्टोऽय मपि पाठः क्वचित्।

‡ "आदित्यस्तान्यस्मिन्नेकं"—इत्यपि पाठो रोथ्सहृष्टः।

आत्मा तस्मिन्नेकं* भवन्तीत्यात्मगतिमाचष्टे† ॥ १९ (३२) ॥ १९.

॥ इति नैरुक्ते त्रयोदशस्यैव द्वितीयः पादः समाप्तः‡ ॥

॥ अथ तृतीयः पादः§ ॥

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः। कविर्यः पुत्रः स ईमा चिकेत यस्ता

---

*.“तान्येतस्मिन्नेकं” च, छ, ज।

† “साकञ्जाना मेकस्मादादित्यात् सहोत्पन्नानां सप्तानां ऋतूनां मध्ये ‘सप्तथं’ सप्तमम् ऋतुम्। एकज मेकोत्पन्न माहुः कालतत्त्वविदः। चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन वसन्ताद्याः षडृतवो भवन्ति, अधिकमासेनैक उत्पद्यते सप्तमर्तुः। न च तादृशो मास एव नास्तीति मन्तव्यम्; अस्ति त्रयोदशो मास इत्याहुरिति श्रुतेः। तदेवोच्यते—‘षळिद्यमाः’ इत्यत्र इद् एवकारार्थः। षडेव ऋतवो मासद्वयरूपाः ‘ऋषयः’ गन्तारः। ते च ‘देवजाः’ देवादादित्यात् जाता इत्येव माहुः। सप्तमाधारस्य त्रयोदशस्य मासस्य देवाभावः। “निःसूर्योऽधिकमासो मण्डलं तपते रवेः”—इत्यादिस्मृतेः। तस्मात् षडेव देवजाः; अदेवज एकः। ‘तेषाम्’ ऋतूनां स्वरूपाणि ‘इष्टानि’ सर्वलोकाभिमतानि, ‘धामशः’ तत्तत्स्थाने ‘विहितानि’ पृथक् पृथक् स्थापितानि; ‘रूपशः’ रूपभेदेन विकृतानि, विविधाकारतरूणानि। स च रूपभेदश्रुतिरियैराम्नातः,—‘स रस मह वसन्ताय प्रायच्छत्, यवं ग्रीष्माय’ इत्यादि। ‘स्थात्रे’ अधिष्ठात्रे तदर्थाय ‘रेजन्ते’ चलन्ति, जगद्व्यवहाराय पुनःपुनरावर्त्तन्त इत्यर्थः॥”—इति सा० भा०।

‡ चतुर्दशाध्यायवादिषु च-छ-ज-पुस्तकेषु नास्त्येव पादविभागः, तथा चैष पाठः ख-ग-भ-पुस्तकमात्रसम्मतः; तत्रापि लेखकप्रमादात् क्वचित् व्यतिक्रमश्च।

§ ख-ग-भ-पुस्तकसम्मतः, रोथ्-इष्टेषु च पादाङ्कितपुस्तकेष्वेव नेष।

विजानात् स पितुष्पितासत्* ॥ स्त्रिय एवैताः† शब्दस्पर्शरूपरसगन्धहारिण्यस्ता अमुं पुंशब्देन‡ निराहारः प्राण इति पश्यन् कष्टान्न विजानात्यन्धः कविर्यः पुत्रः स इमा जानाति यः स इमा§ जानाति स पितुष्पितासदित्यात्मगतिं माचष्टे|| ॥ २० (३३) ॥ १¶ ।

---

* ऋ० सं० २, ३, १७, १ ; यज० सं० ९, २५, १९ ।

† "स्त्रिय एवेति ताः" च, छ, ज ।

‡ "पुंशब्दे" च, छ, ज ।

§ "स इमा" ख, ग, झ ।

|| "'मे' मदीया या दीधितयः 'स्त्रियः' संस्त्यानवत्यो 'योषितः' 'सतीः' सत्यः । योषिद्वदुदकधारणात् स्त्रीत्वम् । एषां रश्मीनामाविष्टलिङ्गत्वात् स्त्रीलिङ्गता । 'तान् उ' तान्रश्मीनेव 'पुंस आहुः' प्रभूतदृष्ट्यादकसेक्तॄन् पुरुषानाहुः । प्रतिनिर्देशापेक्षया पुंलिङ्गता । अमुमर्थमत्यन्तनिगूढम् 'अक्षण्वान्' ज्ञानदृष्ट्युपेतः कश्चित् महान् 'पश्यत्' जानाति । 'अन्धः' अतथारूपः स्थूलदृष्टिः 'न विचेतत्' न विचेतयति, न जानाति । किञ्च 'यः' 'कविः' क्रान्तदर्शी 'पुत्रः', स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः; पुत्र जगतां आत्मा, दृष्ट्युदकलक्षणोऽस्ति । 'सः ईम्' स एव पुत्रः । यद्वा ईमेनमर्थं स्त्रीणां सतीनां पश्चात् पुरुषभावम् 'आ चिकेत' सर्वतो जानाति । रश्मीनां स्थितिं पुत्र एव जानाति नान्यः । 'यः' कश्चित् 'ता' तानि 'विजानात्' स्त्रीपुरुषपुत्ररूपाणि जानीयात्, 'सः पितुः पिता असत्' पिता द्रष्टा जगत्पालको रश्मिसमूहः, तस्यापि पिता आदित्यः, स भवति ; आदित्य एव भवतीत्यर्थः । यद्वा लौकिकोक्तिरियम् । यस्तानि जानाति स एवं भवति ; पुत्रपौत्रादिसहितश्चिरकालं जीवी भवति ।—इत्यधिदैवतम् ॥

अथाध्यात्मम् ।– या इदानीं 'स्त्रियः सतीः' स्त्रीत्वं प्राप्ताः 'आहुः' लौकिकाः, 'तान्' तानेव 'मे' मह्यं 'पुंसः' पुरुषान् 'आहुः' प्रतिपादयन्ति तत्त्वज्ञाः । कथमन्य-

सप्तार्द्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि। ते धीतिभिर्मनसा ते विपश्चितः परि भुवः परि भवन्ति विश्वतः* ॥ सप्तैतानादित्यरश्मीनय मादित्यो गिरति मध्यस्थानोर्द्धशब्दो यान्यस्मिंस्तिष्ठन्ति † तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणि कर्माणि§ वर्षकर्मणेत्यधिदैवत मथाध्यात्मं सप्तेमानीन्द्रियाण्यय मात्मा गिरति मध्यस्थानोर्द्धशब्दो यान्यस्मिंस्तिष्ठन्ति‡ तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणीन्द्रियाणि¶ ज्ञानकर्मणेत्यात्मगतिमाचष्टे|| ॥ २१ (३४) ॥ २.

स्यान्यभावः? उच्यते—एकस्यैव निरस्तसमस्तोपाधिकस्यात्मनस्तद्देहावस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः। * * *। द्वितीयः पादः पूर्ववत्। किञ्च पुत्रो वयसाल्पोऽपि 'यः' 'कविः' क्रान्तप्रज्ञः ज्ञानी स्यात् 'ईम्' इम मर्थं 'सः' 'विचिकेत' जानाति। एव मुक्तलक्षणस्य परमात्मनः 'ता' तानि स्त्रीत्वपुंस्त्वादीनि यो विजानीयात् औपाधिकानि जानीयात्, 'सः' 'पितुः' स्वोत्पादकस्यापि ज्ञानरहितस्य 'पिता असत्' पितृवत् पूज्यो भवति॥"—इत्यादि सा० भा० द्रष्टव्यम्।

¶ चिधाङ्कदानमिदानं पुरस्तात् (३९८।१० §, ||, ¶) लिखितं द्रष्टव्यम्।

* ऋ० सं० १, ३, २१, १; अथ० सं० ९, १८, ७।

†,‡ "यत एतस्मिंस्तिष्ठन्ति" च, छ, ज।

§ "सर्वाणि कर्माणि" ख, ग, भ।

|| "'सप्त' सर्पणस्वभावाः सप्तसङ्ख्या वा रश्मयः, 'अर्द्धगर्भाः' संवत्सरस्यार्द्धे 'गर्भे' गर्भस्थानीय मुदकं धारयमाणाः। यद्वा ब्रह्माण्डस्यार्द्धे मध्येऽन्तरिक्षे गर्भवद्वर्त-

न वि जानामि यदि वेद मस्मि निण्यः सन्नद्धो मनसा चरामि। (यदा मागन् प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भाग मस्याः* ॥ न विजानामि यदि वेद मस्मि निण्यः प्रसन्नद्धो मनसा चरामि†) न हि (वि‡) जानन्§ बुद्धिमतः (पुष्टिः||) पुचः परिवेदयन्ते¶ ऽय मादित्योऽय मात्मा** ॥ २२ (३५) ॥ ३.

मानाः । 'भुवनस्य' लोकस्य 'रेतः' सारम्, दृष्टिप्रदत्वेन रेतोभूताः। तादृशा रश्मयः 'विष्णोः' व्यापकस्यादित्यस्य 'विधर्मणि' जगद्धारणव्यापारे 'प्रदिशा' प्रदेशेन 'तिष्ठन्ति' वर्तन्ते। किञ्च ते 'धीतिभिः' प्रज्ञाभिः मनसा जगदुपकारः कर्तव्यः इति बुद्ध्या च 'विश्वतः' सर्वतः। द्वितीयार्थे तसिः। विश्वं परिभवति, परितो भावयन्ति, कृत्स्नं जगद् व्याप्नुवन्तीत्यर्थः। यस्मादेवं तस्मात् 'ते' त एव 'विपश्चितः' बुद्धियुक्ताः परिभुवः सर्वत्र व्याप्तास्च ॥

यद्वा 'सप्तार्द्धगर्भाः'। 'सप्त' महदहङ्कारौ, पञ्च तन्मात्राणीति मिलित्वा सप्तसङ्ख्यानि तत्त्वानि; 'अर्द्धगर्भाः' अविकृतिरूपाया विकाराश्रयाया मूलप्रकृतेः, प्रकृतिविकृतेरुदासीनस्यात्मनश्चोत्पन्नत्वादर्द्धांशेन प्रपञ्चाकारेण परिणामादर्द्धगर्भाः, पुरुषांशस्याविक्रियत्वादित्यभिप्रायः; अत एव तेषां प्रकृतिविकृतित्वम्। यस्मादेवं तस्माद् 'भुवनस्य' 'रेतः' कारणम्। कारणभूतानि तान्येव 'विष्णोः' व्याप्तस्य पुरुषस्य 'विधर्मणि' 'प्रदिशा' प्रदेशेन 'तिष्ठन्ति'। इतरत् समानम् ॥"—इति सा० भा०।

* ऋ० सं० १, ३, ११, २; अथ० सं० ९, १८, ५।

†, || एतौ पाठौ न दृश्येते च-छ-ज-पुस्तकेषु।

‡ नैतत् पदम् ख-ग-भ-पुस्तकेषु।

§ "जानन्" ख, ग, भ।

¶ "परिविद्यते" ख, ग, भ।

** "अहं 'यद् इव इदम्' यदपीदं विश्वम् 'अस्मि'; कृत्स्नः प्रपञ्चोऽप्यह मेवास्मि; नामरूपांशं परमार्थं त्यक्त्वा सर्वत्रानुगतोऽस्मि। योऽयं सच्चिदानन्दाकारोऽस्ति,

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्त्यो मर्त्त्येना

सोऽह मस्मीति 'न विजानामि' विविच्य नाज्ञासिषम् ; परं शास्त्रजनित मिद मह मस्मीति ज्ञानं जातम्, अविवेकमह मित्यर्थः ; कार्यकारणयोरभेदात् । सकल-प्रपञ्चस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपञ्चजात मपि स्वस्वरूप मेव भवति । "इदं सर्वं यदय मात्मा", "ब्रह्मैवेदं सर्वम्", "आत्मैवेदं सर्वम्", "स ईक्षत बहु स्यां प्रजायेय"—इत्यादिश्रुतिभ्यः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् । "तदनन्यत्व मारम्भणशब्दादिभ्यः"—इत्याद्युपपत्तिभिश्च प्रपञ्चस्य ब्रह्मानन्यत्वं सिद्धम् । यद्वा इवशब्द उपमार्थः । यत् परोक्षज्ञानं सर्वैकात्म्यरूप मानुभाविकं मस्ति, तदिव, तद्वदेवाह मस्मि । इदं सर्वं मह मस्मीति ज्ञानं मे जातम् । अपि त्वेतद् दार्ष्टा-न्तिकभूतम् । आनुभाविकं सार्वात्म्यं यदस्ति, तत् 'न विजानामि' न प्राप्तोऽस्मि । शास्त्रजनितं सार्वात्म्यं जातं न त्वानुभाविक मित्यर्थः । तत्र कारण माह—यतो-ऽहं 'निण्यः' अन्तर्हितनामैतत् ; अन्तर्हितः, मूढचित्तः ; चित्तप्रत्यक्प्रवणाभावेन परिच्छिन्न इत्यर्थः । तत्रोपपत्ति माह—'सन्नद्धः' अविद्याकामकर्मभिः सम्यक् बद्धो वेष्टितः । अत एव 'मनसा' युक्तः भावनासहिष्णुना वहिर्मुखेन विक्षिप्तेन चेतसा युक्तः सं 'चरामि' संसारे । अथवा मनसा सन्नद्धः चरामि, इन्द्रियपरवश एव सन् संसारे दुःख मनुभवामि, न सार्वात्म्यं जानामीति परिदेवते । यास्कोऽपीमं परिदेवनार्थत्वेनोदाजहार—"अथापि परिदेवना कस्माचिद् भावात् न वि जा-नामि यदिवेद मस्मि (निरु० ७, १, ३.)"—इति । वहिर्मुखचेतसः स्वरूपापरि-ज्ञानजनितं दुःख मन्यच श्रूयते । "पराग् विखानि व्यतृणत् स्वयम्भूस्तस्मात् पराक् पश्यन्ति नान्तरात्मन्"—इति । तर्हि कदैतद् भवति ? इत्याह—'यदा मागन्' आगमिष्यति तदा । किं तत् ? इत्युच्यते—'ऋतस्य' परमार्थस्य परस्य ब्रह्मणः 'प्रथमजाः' प्रथमोन्मेषः प्रथमोत्पन्नः चित्तप्रत्यक्प्रवणजनितोऽनुभवः । स यदा 'मा' मां प्राप्नोति, 'आदित्' अनन्तर मेव अव्यवधानेन 'अस्याः' 'वाचः' ऐकात्म्य-प्रतिपादिकाया उपनिषद्वाचो यदिवेदमस्मीत्यस्याया वा 'भागम्' भजनीयं शब्दब्रह्मणा व्याप्यं परं ब्रह्मपदम् 'अश्नुवे' प्राप्नोमि । चित्तस्य वहिर्मुखतां परि-त्यज्य अन्तर्मुखतैवदुःसम्पादा । सा यदा स्यात् तदानी मेव स्वरूपं द्रष्टुं शक्तं भवति, पश्चाद् विलम्बाभावात् । यथा गिरिशिखरात् पतन् पाषाणोऽविलम्बेन

सयोनिः। ता शश्वन्ता विषूचीना वियन्ता न्य१न्यञ्चिक्युर्न नि चिक्युरन्यम्* ॥ अपाञ्चयति प्राञ्चयति स्वधया गृभीतोऽमर्त्य आदित्यो मर्त्येन मनसा सह† तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा पश्यत्यादित्यं न चन्द्रमस मित्यधिदैवत मथाध्यात्म मपाञ्चयति प्राञ्चयति‡ स्वधया गृभीतोऽमर्त्य आत्मा मर्त्येन मनसा सह तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा पश्यत्यात्मानं न मन इत्यात्मगति माचष्टे§ ॥ २३ (३६) ॥ ४.

पतति, तद्वत्। चित्तप्रत्यङ्मुखत्वस्य दुःशकत्व मपि तत्रैव श्रूयते—'कश्चिद्धीरः प्रत्यगात्मान मैक्षदावृत्तचक्षुरमृतत्व मिच्छन्'—इति॥"—इति सा॰ भा॰।

* ऋ॰ सं॰ १, २, २१, २; अथ॰ सं॰ ९, २८, ९।

† "मर्त्येन चन्द्रमसा सह" च, छ, ज।

‡ "मपाङ्चैति प्राङ्चैति" ख, ग, झ।

§ "'अमर्त्यः' अमरणधर्मा अय मात्मा, 'मर्त्येन' मरणधर्मणा भूतात्मना देहेन 'सयोनिः' समानस्थानः। यत्र परिच्छेदको देहोऽस्ति, तत्र सर्वत्र सोऽय मपि तिष्ठ-त्रित्यर्थः। यद्वा समानोत्पत्तिः; सहवासेन स्वस्मिन्नप्युत्पत्तिरुपचर्यते। एवम्भूतः सन् 'स्वधया' अन्नोपलक्षिततद्भोगेन 'गृभीतः'। यद्वा स्वधाशब्देनान्नमयं शरीरं लक्ष्यते। तेन गृहीतः सन् 'अपाङ् एति' अपुण्यं कर्म कृत्वाधो गच्छति। 'प्राङ् एति' स्वर्गादिलोकं प्राप्नोति। परमात्मैव सूक्ष्मशरीरोपाधिकः सन् नानाविधं कर्म कृत्वा तद्भोगाय जीवसंज्ञां लब्ध्वा शरीरत्रयेण सम्बद्धो लोकान्तरेषु सञ्चरति। स्थूलसूक्ष्मोभयशरीरपरिग्रहेण लोके गुणत्रयान्वितः सन् परिभ्रमति। तथाच श्रूयते—'गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूप-स्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः सञ्चरति स्वकर्मभिः'—इति। इदानी मभय प्राधान्ये-

तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः। सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः॥* तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तिनृम्णः सद्यो जज्ञानो निरिणाति (शत्रूनिति†) निरिणातिः प्रीतिकर्मा‡ दीप्तिकर्मा वानुमदन्ति यं विश्व ऊमा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु भुवनेषु ज्येष्ठमव्यक्तं यतो जायत उग्रस्त्वेषनृम्णो ज्ञाननृम्णः सद्यो जज्ञानो निरिणाति शत्रूनिति निरिणातिः प्रीतिकर्मा§ दीप्तिकर्मा वानुमदन्ति यं सर्व ऊमा इत्यात्मगतिमाचष्टे‖॥ २४ (३७)॥ ५.

माह—'तौ' तौ भूतात्मकजीवात्मानौ 'सश्चन्ता' अविभागेन सर्वदा वर्त्तमानौ। यद्वा सूक्ष्मशरीरपक्षे सर्वदा सहवास उपपद्यते, स्थूलशरीरपक्षेऽपि सात्त्विकजातेः। तत्कारणानां भूतसूक्ष्माणां सद्भावात् तत्र शरीरसम्बन्ध उपपद्यते। 'विषूचीना' इह लोके सहचरमनौ। 'वियन्ता' तत्तत्फलोपभोगाय सर्वलोकान्तरेषु गच्छन्तौ वर्त्तेते। तत्र नराः 'अन्यं' भूतात्मानं 'निचिक्युः' नितरां विशेषेण पश्यन्ति जानन्ति। 'अन्यम्' अपरं देहवच्छायातिरिक्तं 'न निचिक्युः' न जानन्ति। केचन पामरा देहव्यतिरिक्तं न जानन्ति; केचन विवेकिनः कर्तृत्वभोक्तृत्वोपेतो देहातिरिक्तः कश्चिदस्तीत्यनुमिमते; न केऽपि देहत्रयव्यतिरिक्तमात्मानं जानन्ति। अतो दुर्लभमात्मज्ञानमित्यर्थः॥"—इति सा० भा०।

* ऋ० सं० ८, ७, १, १; य० वा० सं० ३३, ८०; सा० सं० उ० आ० ९, ३: १०, १; अथ० सं० ५, २, १।

† नास्त्ययमंशः ख-ग-झ-पुस्तकेषु।

‡; § "रिणातिः प्रीतिकर्मा"—इत्येव च-छ-ज-पुस्तकेषु।

‖ "'तत्' जगत्कारणत्वेन सर्ववेदान्तप्रसिद्धम्। 'इत्'—शब्दोऽवधारणे। 'भुव-

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्। आसन्निषून् हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात्*॥ क आदित्यो धुरि गा युङ्क्ते रश्मीन् कर्मवतो भानुमतो दुराधर्षानसून्य-सुनवन्तीषूनिषुणवन्ति† मयोभूनि सुखभूनि य इमं सम्भृतं वेद कथं स जीवतीत्यधिदैवत मथाध्यात्मं

नेषु’। भूसत्तायाम्। यत्तु पृथिव्यादिषु लोकेषु मध्ये जगत्कारणं ब्रह्मैव ‘ज्येष्ठम्’ प्रशस्ततमम् ‘आस’ बभूव। तस्य परमार्थत्वात् तद्व्यतिरिक्तानां व्यावहारिकत्वाच्च। यद्वा ‘ज्येष्ठम्’ वृद्धतमं जगत्कारणत्वेन सर्वेषा मादिभूतं बभूव। * * *। यद्वा वृद्धं तदेव ब्रह्म स्वप्रकाशतया ‘आस’ दिदीपे। * * *। ‘यतः’ उपादानभूतात् यस्माद् ब्रह्मणः ‘उग्रः’ उद्गूर्णः ‘त्वेषनृम्णः’ प्रदीप्तबलः सूर्य्यात्मकः इन्द्रः ‘जज्ञे’ जातो बभूव। श्रूयते हि—‘चक्षोः सूर्यो अजायत’ इति, ‘सूर्य्याचन्द्रमसौ धाता यथापूर्व मकल्पयत्’ इति च। * * *। स च ‘जज्ञानः’ जायमान एव ‘सद्यः’ शीघ्रं ‘शत्रून्’ शातयितॄन् मन्देहादीन् राक्षसान् ‘निरिणाति’ निहिनस्ति। यद्वा उपासकानां पापरूपान् शत्रून् निहन्ति। तथाच ब्राह्मणम्—‘सद्यो ह्येष जातः पाप्मान मपाहत’ इति। * * *। ‘विश्वे’ सर्वे ‘ऊमाः’ अवन्ति रक्षन्तीत्यूमाः प्राणिनः। * * *। सर्वे प्राणिनो ‘यं’ सूर्य्यात्मक मुद्यन्त मिन्द्र मनुलक्ष्य मदर्थं मुदगात्—मदर्थे मुदगात्—इति ‘मदन्ति’ हृष्यन्ति। * * *। तथाच ब्राह्मणम्—‘भूतानि वै विश्व ऊमास्त एत मनुमदन्त्युदगादुदगादिति’ इति। तैत्तिरीयकञ्च—‘तस्मात् सर्व एव मन्यन्ते मां प्रत्युदगादिति’ इति। यद्वा यं स्तुत्यादिभिर्माद्यन्त मनु पश्चात् सर्वे प्राणिनोऽभीष्टप्राप्त्या हृष्यन्ति। * * *। स इन्द्रो यज्ञे इत्यन्वयः॥”—इति सा० भा०।

* ऋ० सं० १, ६, ८, १; सा० सं० छ० आ० ४, १, ५, १०।

† “दुराधर्षानसूनसूनवन्तौ”—इत्यादि ख, ग, भ।

क आत्मा धुरि गा युङ्क्ते इन्द्रियाणि कर्मवन्ति भानुमन्ति* दुराधर्षानह्न्यसुनवन्तीषूनिषुणवन्ति† मयोभूनि सुखभूनि य इमानि सम्भृतानि वेद चिरं स जीवतीत्यात्मगतिं‡ माचष्टे§ ॥ २५ ॥ (३८) ॥ ६.

---

* "कर्मवतो भानुमती" च, छ, ज।

† "दुराधर्षानस्वनसुनवन्तीषूनिषुणवन्ति" ख, ग, भ।

‡ "य इमं सम्भृतं वेद चिरं जीवतीत्यात्मगति" च, छ, ज।

§ "'अद्य' अस्मिन् कर्मणि 'ऋतस्य' गच्छतः इन्द्रसम्बन्धिनो रथस्य 'धुरि' अश्ववहनप्रदेशे 'गाः' गतिमतोऽश्वान् 'कः' 'युङ्क्ते' को नाम नियोक्तुं शक्नोति ? न कोपीत्यर्थः। कीदृशानश्वान् ? 'शिमीवतः' वीर्यकर्मोपेतान्। 'भामिनः' तेजसा युक्तान्। 'दुर्हृणायून्' परैर्दुःसहेन क्रोधेन युक्तान्, * * *। 'आसन्निषून्' येषाम् आसनि आस्ये मुखप्रदेशे शत्रूणां प्रहरणार्थं निषवो बाणाः बद्धास्तान्। 'हृत्स्वसः' हृत्सु शत्रूणां हृदयेषु अस्यन्ति, स्वकीयं पादं क्षिपन्तीति हृत्स्वसः। 'मयोभून्' मयसः सुखस्य भावयितॄन्, स्वकीयानां सुखप्रदानित्यर्थः। 'यः' यजमानः 'एषाम्' ईदृशाना मश्वानां 'भृत्यां' भरणक्रियां रथवाहनक्रियाम् 'ऋणधत्' समर्द्धयति स्तौतीति यावत् 'सः' यजमानो 'जीवात्' जीवनवान् भवेत् ॥

यद्वा क इति प्रजापतिरुच्यते; 'को ह वै नाम प्रजापतिः' — इति श्रुतेः। 'ऋतस्य' 'धुरि' निर्वाहे 'गाः' वेदरूपान् वाग्विशेषान् 'अद्य' इदानीं 'युङ्क्ते' संयोजयति। कीदृशान् ? 'शिमीवतः' प्रतिपाद्यैः कर्मभिः युक्तान्। 'भामिनः' उज्ज्वलान्। 'दुर्हृणायून्' हृणीयतिर्हानिकर्मा, शातु मशक्यान्; वेदाध्ययनस्य नित्यत्वात्। 'आसन्निषून्', 'आसनि' आस्ये 'इषुः' एषणं गमन मुच्चारणं येषां तान्। 'हृत्स्वसः', 'हृत्सु' हृदयेषु दीप्यमानान् प्रकाशमानानित्यर्थः। 'मयोभून', 'मयसः' अध्ययनप्रभवस्य सुखसाधनस्यादृष्टस्य भावयितॄन्। 'यः' यजमानः 'एषां' वचसां 'भृत्यां' भरणक्रियाम् 'ऋणधत्' ऋद्धिमतीं करोति 'स जीवात्' स एव जीवति; अन्य जीवन्मृता इत्यर्थः ॥"— इत्यादि सा॰ भा॰

क ईषते तुज्यते को बिभाय को मंसते सन्त मिन्द्रं को अन्ति। कस्तोकाय क इभायोत राये ऽधि ब्रवत्तन्वे३ को जनाय*॥ क एव गच्छति को ददाति को बिभेति को मंसते सन्त मिन्द्रं कस्तोकायापत्याय महते च नो रणाय रमणीयाय दर्शनीयाय†॥ २६ ((३६))॥ ७.

---

* ऋ० सं० १, ६, ८, २।

† "अनुगृहीतरीन्द्रे आगते सति 'क ईषते' शत्रोर्भीतः सन् को निर्गच्छति? न कोपीत्यर्थः। 'कः तुज्यते' को हिंस्यते? शत्रुर्हिंस्योऽपि कश्चिन्नास्तीत्यर्थः। 'कः' यजमानः 'बिभाय' बिभेति? इन्द्रे रक्षके सति भय मपि नोपपद्यते। दूरे तस्य शत्रुकृता हिंसा—'अन्ति' अन्तिके समीपे सन्त मस्माकं रक्षकत्वेन वर्त्तमान मिन्द्रं 'कः' पुरुषो 'मंसते' जानाति; वय मेव जानीमो नान्य इत्यर्थः। एकः 'कः' पूरकः। युद्धे सहायार्थ मिन्द्र आगते सति 'कः' यजमानः 'तोकाय' पुत्राय 'अधिब्रवत्' हे इन्द्र! अस्मदीयं पुत्रं रक्षेत्येवंरूप मधिवचनं को यजमानः कुर्यात्? स्वय मेवेन्द्रो रक्षतीति भावः। 'इभाय' गजाय 'कः' अधिब्रवत्? 'उत' अपि च 'राये' शत्रुभिरपह्रियमाणाय धनाय 'कः' अधिब्रवत्?—अपह्रियमाण मस्मदीयं धनं रक्षेत्यधिवचन मपि को यजमानः कुर्यात्? न कोपीत्यर्थः। अपि च 'तन्वे' स्वकीयाय शरीराय 'जनाय' परिजनाय च 'कः' अधिब्रवत्? स्वशरीररक्षार्थं परिजनरक्षार्थं च इन्द्रस्याधिवचनं नापेक्षितम्; स्तुत्या प्रीत इन्द्रः स्वय मेव रक्षतीत्यर्थः॥

यदा तु क-शब्दाभिधेयस्य प्रजापतेः सम्बन्धिनि कर्मणि विनियोगः, तदानीं परमैश्वर्ययोगात् इन्द्रशब्देन प्रजापतिरेवाभिधीयते; यथा 'ऐन्द्र्या गार्हपत्य मुपतिष्ठते'—इति विनियोगानुसारेण कदाचन—इत्यस्या मृचि विद्यमान इन्द्रो गार्हपत्यपरतया नीयते, तद्वत्॥"—इत्यादि सा० भा०।

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः। कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः* ॥ क आदित्यं पूजयति† हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्ध्रुवेभिरिति कस्मै देवा आवहानाशु होमार्थान् को मंसते वीतिहोत्रः सुदेवः कल्याणदेव इत्यधिदैवतमथाध्यात्मं क आत्मानं पूजयति‡ हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्ध्रुवेभिरिति कस्मै देवा आवहानाशु होमार्थान् को मंसते वीतिहोत्रः सुप्रज्ञः कल्याणप्रज्ञ इत्यात्मगतिमाचष्टे§ ॥ २७(४०)॥ ८.

---

* ऋ० मं० १, ६, ८, ३ ।

†,‡ "पूरयति" च, छ, ज ।

§ " 'कः' यजमानः 'अग्निम् ईट्टे' इन्द्रार्थं हविर्निरूप्य अग्निं स्तौति? इन्द्राय हविर्निर्वापोऽपि सम्यक् कर्तुं न शक्यते, इन्द्रस्य दुर्विज्ञानत्वात् । को वा इन्द्रयागार्थमग्निं 'स्रुचा' जुह्वा, 'ध्रुवेभिः' ध्रुवैः नित्यैः, 'ऋतुभिः' वसन्तादिकालैरुपलक्षितेन 'घृतेन' 'हविषा' 'यजातै' यजेत् । यद्वा ऋतवः प्रयाजदेवताः, "ऋतवो वै प्रयाजाः"—इति श्रुतेः ; ताभिः 'ध्रुवैः' प्रकृतौ विकृतौ चानुष्ठेयतया नित्यैः ऋतुभिः सह 'अग्निम्' आज्यभागदेवताम्, 'घृतेन हविषा' को यजेत्? न कोऽपीत्यर्थः । 'कस्मै' यजमानाय 'होम' ह्वातव्यं प्रशस्यं धनम् 'आशु' शीघ्रम् 'देवाः' 'आवहान्' आवहन्ति प्रयच्छन्ति? न कस्माअपीत्यर्थः। इन्द्र एव धनस्य दाता, नान्ये देवा इतीन्द्रः स्तूयते । 'वीतिहोत्रः' प्राप्तयज्ञः, 'सुदेवः' शोभनदेवताकः 'कः' यजमानः 'मंसते' इन्द्रं सम्यक् जानाति? न कोऽपीत्यर्थः । बहुविधेन स्तोत्रेण चिरकालोपासनेन चेन्द्रः प्रत्यक्षो भवति, नान्येन प्रकारेणेति तात्पर्यार्थः ॥"—इत्यादि सा० भा० ।

त्व मङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्। न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः*॥ त्व मङ्ग प्रशंसीर्देवः शविष्ठ मर्त्यं न त्वदन्योऽस्ति मघवन् पाता वा पालयिता वा जेता वा सुखयिता वेन्द्र ब्रवीमि ते वच इति स्तुतिसंयुक्तम्† ॥ २८‡. (४१)॥ ६.

॥ इति निरुक्ते त्रयोदशाध्यायस्यैव तृतीयः पादः§ ॥

॥ अथ चतुर्थः पादः ॥

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि-दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा

* ऋ० सं० १, ६, ८, ४; य० वा सं० ६, २० ।

† "ते वच स्तुतियुक्तम्" च, छ, ज ।

‡ "'अङ्ग'—इत्यभिमुखीकरणे। 'अङ्ग!' 'शविष्ठ' हे बलवत्तम। इन्द्र! 'देवः' द्योतमानस्त्वं 'मर्त्यं' मरणधर्माणं त्वां स्तुतवन्तं पुरुषं 'प्रशंसिमः' सम्यगनेन स्तुतमिति प्रशंसा। हे 'मघवन्' धनवन्! 'इन्द्र!' 'त्वदन्यः' त्वत्तोऽन्यः कश्चित् 'मर्डिता' सुखयिता 'न अस्ति'। अतः कारणात् 'ते' तुभ्यम् इदं स्तुतिलक्षणं 'वचः' 'ब्रवीमि' उच्चारयामि॥"—इत्यादि सा० भा० ।

§ अत्रापि पूर्वटीप्पनी द्रष्टव्या (३९० पृ० "‡") ।

अद्रिजा ऋतम्* ॥ हंस इति† हंसा सूर्यरश्मयः परमात्मा परं ज्योतिः पृथिवी व्याप्तेति‡ व्याप्तं सर्वं व्याप्तं वननकर्मणानभ्यासेनादित्यमण्डलेनेति§ त्ययतीति|| लोका त्ययतीति¶ हंसयन्त्ययतीति** हंसाः†† परमहंसाः परमात्मा सूर्यरश्मिभिः प्रभूत गभीर वसतीति‡‡ चिभिर्वसतीति वा रश्मिर्वसतीति वा वह्निर्वसतीति वा§§ सुवर्णरेताः पूषा गर्भा|||| रिभेति रिभन्ता वनकुटिलानि कुटन्ता रिभन्तान्तरिक्षा चरत्यथान्तरिक्षा चरदिति दिवि¶¶ भुवि गमनं वा सुभानुः***सुप्रभूतो होतादि-

---

* ऋ० सं० ३, ७, १४, ५ ; य० वा० सं० १०, २४ ; १२, ४ ; कठ० उ० ५ ।

† "हंसेति" ख, ग, भ ।

‡ "पृथिव्याप्नेति" ख, ग, भ ।

§ "वननकर्माभ्यासेना०" ख, ग, भ ।

|| "त्यजतीति" ख, ग, भ ।

¶ "लोकस्त्यजतीति" ख, ग, भ ।

** "हंसस्त्यजतीति" ख, ग, भ ।

†† नास्त्येतत् पदम् ख-ग-भ-पुस्तकेषु ।

‡‡ "प्रभूतगभीत वसतीति" ख, ग, भ ।

§§ "वह्निर्वसतीति वा रश्मिर्वसतीति वा"—इति पाठव्यतिक्रमः ख, ग, भ ।

|||| "पुरुषा गर्भा" ख, ग, भ ।

¶¶ "रिफिरिति रिफिता वनकुटिलानि कुटन्ता रेफान्तान्तरिक्षचरेदर्थेत्यन्तरिक्षं चरतीति दिवि" ख, ग, भ ।

*** "स्वभानुः" ख, ग, भ ।

त्यस्य गता भवन्त्यतिथिर्दुरोणसत्सर्वे दुरोणसद् द्रवं सर्वे रसा विकर्षयति रश्मिर्विकर्षयति वह्निर्विकर्षयति वननमभवत्यश्वगोजा* अद्रिगोजा धरित्रिगोजाः† सर्वे गोजा‡ ऋतजा बहुशब्दा भवन्ति§ निगमो निगमव्यति भवत्यृषे निर्वचनाय|| ॥ २९¶ (४२) ॥ १.**

---

* "भवत्यतिथिर्दुरोणसत् द्रवन्ति सर्वे रसाश्विकीर्षयन्ति रश्मिभिश्विकीर्षयन्तीत्यश्वगोजा" ख, ग, भ।

† "धनगोजा" ख, ग, भ।

‡ "सर्वगोजा' ख, ग, भ।

§ "ऋतगोजा ऋतजो बहुजो शब्दो भवति" ख, ग, भ।

|| "निगमो निगन्तव्यो भवत्यृषिनिर्वचनाय" ख, ग, भ।

¶ ख-ग-भ-पुस्तकेष्वेष खण्डस्तृतीयः।

** अत्र सायणीयभाष्य मेतद् द्रष्टव्यम्। तथाहि,——

"अनया सौर्य्यर्चा य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, हिरण्यश्मश्रुरित्यादि श्रुत्युक्तो मण्डलाभिमानी देवोऽस्ति, यश्च सर्व्वप्राणिचित्तरूपस्थितः परमात्मा, यच्च निरस्तसमस्तौपाधिकं परं ब्रह्म, तत् सर्व्वमेक मेवेति प्रतिपाद्यते॥ हंसः। हन्तिर्गत्यर्थः। सर्व्वत्र सर्व्वदात्मा योऽहं सोऽसावित्यादिश्रुत्युक्तप्रकारेणैकीकृत्योपास्यः परमात्ममन्त्रप्रतिपाद्य आदित्यः। स च शुचौ दीप्ते द्युलोके सीदतीति शुचिषत्। अथ यदतः परो दिवो ज्योतिर्दीप्यते इत्यादि श्रुतेः। अनेन द्युस्थान आदित्यः प्रतिपादितः। स एव मध्यस्थानो वायुरित्याह। वसुः सर्व्वस्य वासयिता वायुः। स चान्तरिक्षसदन्तरिक्षसञ्चारी। अथ तस्यैव क्षितिस्थानवैदिकाग्निरूपता माह—होता देवाना माह्वाता होमनिष्पादको वा। वेदिषद् वेद्यां गार्हपत्यादिरूपेण स्थितः। अतिथिरतिथिवत् सर्व्वदापूज्योऽग्निः। दुरोणसत्। दुरोणं गृहनाम्। तच पाकादिसाधनत्वेन स्थितः। अनेन लौकिकाग्न्यात्मकत्व-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति*॥ द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ दुष्कृतं पापं परिसारक मित्याचक्षते सुपर्णा सयुजा

मुक्तम्। नृषत्। नृषु मनुष्येषु चैतन्यरूपेण सीदतीति नृषत्। अनेन परमात्म-रूपत्व मुक्तम्। पुनरप्यादित्यात्मता माह—वरसत्। वरे वरणीये मण्डले सीदतीति वरसदादित्यः। वरं वा एतत् सद्मनां यस्मिन्नेष आसन्नस्तपतीति हि श्रूयते। ऋतं सत्यं ब्रह्म यज्ञो वा। तत्र सीदतीत्यृतसदग्निः। व्योमान्तरिक्षम्। तत्र सीदतीति व्योमसद्वायुः। इदानी मादित्यतोच्यते—अब्जा उदकेषु जातः। उदकमध्ये ह्ययं जायते। गोजा गोषु रश्मिषु जातः। ऋतं सत्यं। सर्व्वैर्दृश्यत्वेन सत्यजातः! न ह्यसाविन्द्रादिवत्परोक्षो भवति। यद्वोदकेषु वैद्युतरूपेण वाडवरूपेण वा जातः। अद्रिजा अद्रावुदयाचले जातः। एवं महानुभाव आदित्य ऋतं सत्य मबाध्यं सर्व्वाधिष्ठानं ब्रह्मतत्वम्। तद्रूपो ह्यसावेव। आदित्यस्योक्तरूपत्वं हंसः शुचिषदित्येष वै हंस शुचिषदित्यादिना ब्राह्मणे समाम्नातम्(१)"—इति।

* ऋ० सं० २, ३, १०, ५; अथ० सं० ९, १९, १०।

---

(१) "हंसः शुचिषदित्येष वै हंसः शुचिषद् वसुरन्तरिक्षसदित्येष वै वसुरन्त-रिक्षसद्धोता वेदिषदित्येष वै होता वेदिषदतिथिर्दुरोणसदित्येष वा अतिथिर्दुरोण-सन्नृषदित्येष वै नृषद् वरसदित्येष वै वरसद् वरं वा एतत्सद्मनां यस्मिन्नेष आसन्न-स्तपत्यृतसदित्येष वै सत्यसद् व्योमसदित्येष वै व्योमसद् व्योम वा एतत्सद्मनां यस्मिन्नेषः आसन्नस्तपत्यब्जा इत्येष वा अब्जा अद्भ्यो वा प्रातरुदेत्यपः सायं प्रविशति गोजा इत्येष वै गोजा ऋतजा, इत्येष वै सत्यजा अद्रिजा इत्येष वा अद्रिजा ऋत मित्येष वै सत्य मेष एतानि सर्वाण्येष ह वा अस्य छन्दःसु प्रत्यक्षत मादिव रूपम्।"—इति ऐ० ब्रा० ४प० ३अ० ५ख०।

सखायेत्यात्मानं (दुरात्मानं*) परमात्मानं प्रत्युत्तिष्ठति शरीर एव तज्जायते वृक्षं वृक्षशरीरं वृक्षं पक्षौ† प्रतिष्ठापयति तयोरन्यद्भुक्त्वान्न‡ मनश्नन्यां सरूपतां सलोकता मश्नुते य एवं विद्वाननश्नन्यो§ अभिचाकशीतीत्यात्मगतिं माचष्टे॥ ॥ ३०¶ (४३)॥ २.

---

* नास्त्येतत् पदम् ख-ग-भ-पुस्तकेषु।

† "वृक्ष वृक्षं शरीरं वृक्षे पक्षौ" ख, ग, भ।

‡ "तयोरन्यो भुक्त्वान्य" ख, ग, भ।

§ "य एवं वेदाश्ननश्नन्यो" च, छ, ज।

|| ख-ग-भ-पुस्तकेष्वेष एवाद्यखण्डः।

¶ अथ लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ सूच्येते। यथा लोके द्वौ सुपर्णौ सुपतनौ शोभनगमनौ सयुजा समानयोगौ। सखाया समानख्यानौ समानं वृक्षं परिषस्वजाते। एक मेव वृक्षं परिषस्वजाते आश्रयतः। तयोरन्य एकः पिप्पलं पक्वं स्वादुतर मत्ति अपरोऽनश्नन् अभिचाकशीति अभिपश्यति। तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ। सयुजा समानयोगौ। योगो नाम सम्बन्धः स च तादात्म्यलक्षणः। स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा। एव मन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः। एव मेकस्वरूपावित्यर्थः। अनेन भास्करमतानुसारिणोऽतिरिक्तिनाम्नो जीवात्मा परमात्मनो नान्यः। स च परमात्मा जीवादन्यो जीवाश्रयणादिति मतं निरस्तं भवति।

ननु सम्बन्धो द्विष्ठः। स च पक्षिणोरेव भेद मपेक्षते। अतः कथ मैकात्म्य मिति? न। औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः। अतएव सखायौ समानख्यानौ, नान्यख्यानौ। नन्वेकस्य यादृशं ख्यानं तादृश मेवान्यस्येति श्रुत्या भेदः स्फुटं प्रतिभाति। कथं तादात्म्य मुच्यत इति न वक्तव्यम्। नात्र परस्परं दृष्टान्तो दार्ष्टान्तिकभावः। अपि तु यस्य यादृशं ख्यानं स्फुरणं परमात्मनस्तदेव ख्यान मितरस्यापि जीवात्मन इति सखायावित्युच्यते। एकरूपप्रकाशावित्यर्थः। अत उपपन्न मैका-

त्मम् । अनेन वास्तवभेदोऽपि निरस्तः । समानं वृक्षं परिषस्वजाते इत्यत्र यथाश्रयान्तराभावादुभयोरेकाश्रयत्व मभ्युपगन्तव्यं तद्वत् सयुजा सखायावित्युभयत्रापेक्षयोगस्थाने आश्रयणीये । वृश्च्यते इति वृक्षो देहः । स चोभयोः समान एक एव । जीवस्य भोगार्थत्वात् परमात्मना सृष्टैर्महाभूतैरारब्धत्वात्तस्योपलब्धिस्थानत्वाच्चोभयोरपि समानः । तादृशं समानं वृक्षं परिषस्वजाते परिष्वजतः, आश्रयतः ।

न च जीवस्य वस्तुत ईश्वरत्वे कथं जीवबुद्ध्या संसारशोकाविति वाच्यम् । तयोर्मोहकृतत्वात् । तथा चाथर्वणिका अनुमन्त्र माम्नायास्य सन्देहनिवर्त्तक मुत्तरं मन्त्र मेव मामनन्ति—“समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्य मीश मस्य महिमान मिति वीत शोकः ॥”—इति । अस्याय मर्थः—एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वय मपीश्वरोऽप्यनीशत्वबुद्ध्या मुह्यमानो मूढः सन् शोचति । संसारेऽहं कर्त्ता सुखी दुःखीति जननमरणे अनुभवति । यदा तु जुष्टं नित्यतृप्त मन्यं संसारशोकातीत मीशं परमेश्वरं पश्यति स्वानन्यतया साक्षात्करोति । तदा वीतशोको देहाद् व्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन् अस्य महिमान मिति । निरस्तसमस्तोपाधिकस्य परमेश्वरस्य महिमानं सार्वात्म्यसर्वज्ञत्वादिमहिमान मिति । एति प्राप्नोति । न च तद्भावान्यत्र तन्महिमा प्राप्यते । अतस्तद्रूपो भवतीत्यर्थः । तस्माद्वस्तुत एक एव । भेदस्तु मोहकृत इति प्रसिद्धम् । अनुभवदशायां लौकिकबुद्ध्या भेदमभ्युपेत्योच्यते । तयोरन्यो जीवात्मा पिप्पलं कर्मफलंस्वादुभूत मत्ति भुङ्क्ते । यस्य यदुपार्जितं तत्तस्य स्वादु भवति । अन्यः परमात्मानश्नन् आप्तकामत्वेनाभुञ्जानः । स्पृहाया अभावात् । आप्तकामस्य का स्पृहेति स्मृतेः । तस्माद् वास्तवभेद मपश्यत्वं तयोरन्य इत्युक्तम् । वस्तुतस्तु अनीशया शोचति मुह्यमान इत्युक्तत्वादभेद एव । तादृशः परमात्मा स्वात्मन्यध्यस्तं जगत्साक्षित्वेनेक्षते । अत्र “द्वौद्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ”—इत्यादिनिरुक्ते गत मस्य मन्त्रस्य व्याख्यान मनुसन्धेयम्(१)”—इति सा० भा० ।

---

(१) आश्चर्य मेतद्! यदत्र चतुर्दशाध्यायीयं नैरुक्तवचन मिहैकत्र प्रमाणत्वेनोपन्यस्तम् । यदि हि चतुर्दशाध्यायस्याप्यपि निरुक्तत्वं सायणसम्मतं स्यात्, तर्हि एतद-

आ याहीन्द्र पथिभिराळितेभिर्यज्ञमिमं नो भागधेयञ्जुषस्व। तृप्तां जुहुर्मातुळस्येव* योषा भागस्ते पैतृष्वसेयी वपामिव ॥ आगमिष्यन्ति शक्रो देवतास्तास्त्रिभिस्तीर्थैभिः शक्रप्रतरैरीळितेभिस्त्रिभिस्तीर्थैर्यज्ञमिमन्नो यज्ञभाग मग्नीषोमभागाविन्द्रो जुषस्व तृप्ता मेवं मातुलयोगकन्या भागं सर्त्केव सा या देवतास्तास्तत्स्थाने शक्रं निदर्शतिम्† ॥‡ ३१ (४४) ॥ ३.

विप्रं विप्रासोऽवसे देवं मर्त्ता स ऊतये। अग्निं गीर्भिर्हवामहे ॥ विप्रं विप्रासोऽवसे विदुर्वेद विन्दतेर्वेदितव्यं विमलशरीरेण वायुना§ विप्रस्तु हृत्पद्मनिलयस्थित|| मकारसंहित मुकारं पूरयेन्मकारनिलयं

---

* "जुहुर्मातुलस्येव" ङ।

† "निदर्शनम्" च।

‡ भाष्यमेवैष खण्डः ख-ग-भ-पुस्तकेषु, तत्र पाठभेदप्रदर्शनस्य का कथा।

§ "विमलं शरीरं वायुना" ख, ग, भ।

|| "विप्रस्तु पद्मनिलयं हृदिस्थित" ख, ग, भ।

ध्यायगतानां सर्वेषा मेव मन्त्राणां व्याख्यानावसरेऽन्यत्रान्यत्रवत् प्रमाणवचनोद्धारो दृश्येत एवेति। किञ्च "जातवेदसे सुनवाम"—इत्यस्या भाष्ये "जातवेदाः कस्मात्?"—इत्यादिकं सप्तमाध्यायीयवचनमात्र मुद्धृत्य न कथ मपि पर्याप्तं स्यात्, अपि तु इदत्यमपि "जातवेदस इति जातमिदं सर्वं सचराचरं"—इत्यादिक मुद्धृतं दृश्येतैवेति। अतो लिपिकरप्रमादमूलक एवैष ग्रन्थ इत्यनुमेने;—आसीद्धि कस्मिंश्चित् पुस्तके टीप्पनी—"अत्र द्वौ द्वौ" इत्यादिः, ततः केनचिल्लेखकेन ग्रन्थांश एष इति मत्वेह निवेशितेति।

गतं विप्रं* प्राणेषु विन्दुसिक्तं† विकसितं‡ वह्नितेजः-प्रभङ्कनकपद्मेष्वमृतशरीर§ ममृतजातस्थित ममृत-वाचामृतमुखे|| वदन्ति । अग्निङ्गीर्भिर्हवामहे¶ । अग्निं सम्बोधयेदग्निः सर्वा देवता इति** तस्योत्तरा भूयसे निर्वचनाय†† ॥ ३२ (४५) ॥ ४.

जातवेदसे सुनवाम सोम मरातीयतो नि दहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः‡‡ ॥ जातवेदस इति§§ जात मिदं सर्वं सचराचरं स्थित्युत्पत्तिप्रलयन्यायेनाच्छाय सुनवाम सोम मिति प्रसवेनाभिषवाय सोमं राजान ममृतमरातीयतो यज्ञार्थं मिति स्मो निश्चये निदहाति दहति भस्मीकरोति सोमो ददिदित्यर्थः । स नः पर्षदति दुर्गाणि दुर्गम-

---

* "मकारसंहारित मुकारं पूजयन् मकारमिलयं गमयति विप्रं" ख, ग, भ ।

† "विन्दुः सिक्तं" ख, ग, भ ।

‡ "विकचितं" ख, ग, भ ।

§ "वह्नितेजः प्रभुं कनकं पद्मेष्वमृतशरीर" ख, ग, भ ।

|| "ममृतवाचा अमृतमुखा" ख, ग, भ ।

¶ ऋ० सं० ५ अ० ८ अ० २९ व० १ ऋ० ।

** ऐ० ब्रा० १ प० १ अ० १ ख० ।

†† ख-ग-भ-पुस्तकेष्वेव खण्डस्तृतीयः ।

‡‡ ऋ० सं० १, ७, ७, १ ।

§§ केषुचित् पुस्तकेषु व्याख्याता चैषा पुरस्तादपि (२ भा० २९४ पृ०) ।

नानि स्थानानि नावेव सिन्धुं यथा कश्चित्कर्णधारो नावेव सिन्धोः स्यन्दनान्नदीं जलदुर्गां महाकूलान्तारयति दुरितात्यग्निरिति तानि तारयति* तस्यैषापरा भवति† ॥ ३३ (४६) ॥ ५.

इदन्तेऽन्याभिरसमानमद्भिर्याः काश्च सिन्धुं प्रवहन्ति नद्यः। सर्पो जीर्णामिव त्वचं जहाति पापं सशि-

---

* "स्थित्युत्पत्तिप्रलयन्यायेन जातवेदस्या इदं जातवेदसे (ग० "स्था वैव आ०") ऽर्चाय सुनवाम सोम मिति प्रसवायाभिषवाय सोमं राजान ममृत मरातीयतो यज्ञार्थं मनिस्थो निर्दहति (ग० "निदहाति") निश्चयेन दहति भस्मीकरोति सोमो दद-दित्यर्थः। स नः पर्षदति (ग० "दुर्गाणि विश्वानि") दुर्गमनानि स्थानानि नावेव सिन्धुं नावा सिन्धुं यथा यः कश्चित् कर्णधारो नावा सिन्धुः स्यन्दमिमां (ग० "स्यन्द-मानानां") नदीं जलदुर्गाम्महाकुलां तारयति दुरितात्यग्निरिति दुरितानि तारं-यति"—इति पाठाः ख-ग-भ-पुस्तकेषु दृश्यन्ते।

† "जातवेदस इत्येकर्चं षष्ठं सूक्तम्। मरीचिपुत्रस्य कश्यपस्यार्षम्। त्रैष्टुभम्। जातवेदोगुणकोऽग्निः शुद्धाग्निर्वा देवता। तथा चानुक्रान्तम्—'जातवेदस एका जातवेदस्य मेतदादीन्येकभूयांसि सूक्तान्येक मेतत्तु कश्यपस्यार्षम्'—इति। शंस-नीया। सूचितञ्च—'जातवेदसे सुनवाम सोम मित्याग्निमारुते जातवेदस्यानाम्। (आ० सू० ७. १)'—इति। जातवेदसे जातानामुत्पत्तिमतां सर्व्वेषां वेदित्रे। यद्वा जातैः सर्व्वैः प्राणिभिर्ज्ञायमानाय जातधनाय जातप्रज्ञाय वाग्नये सताद्रूपं सोमं सुनवाम अभिषुणुयाम। जातवेदोगुणक मग्निं यष्टुं सोमाभिषवं करवामेत्यर्थः। सोऽग्निररातीयतोऽरातिं शत्रु मिवाचरतः शत्रोर्वेदो धनं निदहाति। नितरां दहतु भस्मीकरोतु। अपि च सोऽग्निर्नोऽस्मान् विश्वा विश्वानि सर्व्वाणि दुर्गाणि दुर्गमनानि भोक्तु मशक्यानि दुःखान्यतिपर्षत अति पारयतु। अतिक्रमय्य दुःख-रहितं सुखं प्रापयतु। तत्र दृष्टान्तः—नावेव सिन्धुम्। यथा कश्चित्कर्णधारो

रस्को ऽभ्युपेत्य॥ इदन्ते ऽन्याभिरसमानाभिर्याः काश्च सिन्धुं पतिं कृत्वा नद्यो वहन्ति सर्पा जीर्णा मिव सर्पस्त्वचन्त्यजति पापं त्यजन्त्याप आप्नोतेस्तासा मेषा भवति॥* ३४ (४७)॥ ६.

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुक मिव बन्धनान् मृत्योर्मुक्षीय मा मृतात्†॥ त्र्यम्बको रुद्रस्तं त्र्यम्बकं यजामहे सुगन्धिं (सुगन्धिं‡) सुष्ठुगन्धिं पुष्टिवर्द्धनं पुष्टिकारक मिवोर्वारुक मिव§ फलं बन्धनादारोधनान्मृत्योः सकाशान्मुञ्चस्व मां कस्मादित्येषा मितरेषापरा भवति॥ ॥ ३५¶ (४८)॥ ७**.

ग्रांहादिभिर्दुष्टसत्वैराकुलितां नदीं नावा तारयति तद्वत्। तथा दुरिता दुरितानि दुःखहेतुभूतानि पापान्यस्मानग्निरतिपारयतु। दुःखनिमित्तात् पापादप्यस्मानुत्तारयत्वित्यर्थः। अत्र निरुक्तम्—जातवेदाः कस्मात् जातानि वेद (२भा० १९२प०)"—इत्यादि सा० भा०।

* नास्त्येष खण्डः ख-ग-भ-पुस्तकेषु, तत्तत्र पाठभेदस्य का कथा।

† ऋ० सं० ५, ४, ३०, ६; य० वा० सं ३, ६०।

‡ नास्त्येतत् पदं ख-ग-भ-पुस्तकेषु।

§ अत्र "इव"-पदं च न दृश्यते ख-ग-भ-पुस्तकेषु।

|| "कस्मादित्येषापरा भवति" घ, ज।

¶ ख-ग-भ-पुस्तकेष्वेष खण्डस्तृतीयः।

** अत्र शौनकः। 'त्रिरात्रं नियतोऽपोष्य श्रपयेत् पायसं चरुम्। तेनाहुतिशतं पूर्णं जुहुयाच्छंसितव्रतः॥ समुद्दिश्य महादेवं त्र्यम्बकं त्र्यम्बकेत्यृचा। एतत् पर्वं शतं कृत्वा जीवेद्वर्षशतं सुखी (ऋग्वि० २. २८.)॥" चयाणां ब्रह्मविष्णुरुद्राणां सम्बकं

शतं जीव शरदो वर्द्धमानः शतं हेमन्ताञ्छत मु वसन्तान्। शत मिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ शतं जीव शरदो वर्द्धमान इत्यपि निगमो भवति शत मिति शतन्दीर्घमायुर्मरुत एना वर्द्धयन्ति* शत (मेन†) मेव शतात्मानं‡ भवति (शत

पितरं यजामह इति शिष्यसमाहितो वसिष्ठो ब्रवीति। किंविशिष्ट मित्यत आह— सुगन्धिं प्रसारितपुण्यकीर्त्तिम्। पुनः किंविशिष्टम्? पुष्टिवर्द्धनं जगद्बीजम्। उद्‌शक्ति मित्यर्थः। उपासकस्य वर्धनम्। अणिमादिशक्तिवर्धनम्। अतस्त्वत्प्रसादादेव मृत्योर्मरणात् संसाराद्वा मुक्षीय मोचय। यथा बन्धनादुर्वारुकं कर्कटीफलं मुच्यते तद्वन्मरणात् संसाराद्वा मोचय। किं मर्यादीकृत्य? आमृतात्। सायुज्यतां-मोक्षपर्यन्त मित्यर्थः। अथ तैत्तिरीयभाष्ये—'शोभनः शरीरगन्धः पुण्यगन्धो वा यस्यासौ सुगन्धिः। यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वातीति श्रुतेः। पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनः। तादृशं त्र्यम्बकं यजामहे पूजयामः। लोके यथोर्वारुकफलानि बन्धनाद्वृन्तात् स्वय मेव मुच्यन्ते(१), तद्वदहं त्र्यम्बकप्रसादेन मृत्योर्मुक्षीय मोचनयुक्तो भूयासम्। अमृताच्चिर-जीवितात् स्वर्गादेर्वा मा मुक्षीय। चतुर्थपादार्थमन्त्रस्य तात्पर्यातिशयं दर्शयति— त्र्यम्बकं यजामह इत्याह मृत्योर्मुक्षीय मामृतादिति वावैतदाहेति।"—इति सा० भा०।

* "मरुतो मां वर्द्धयन्तु" ख, ग, भ।

† नैतत् ख-ग-भ-पुस्तकेषु।

‡ "शत मात्मानं" ख, ग, भ।

(१) "उर्वारुः कर्कटी स्त्रियौ"—इत्यमरः २, ४, १५५। "उर्वारुः—ईर्वारुः, दूर्वारुः, ईर्वालुः, एर्वारुः। उक्तञ्च रुस्तुरिवारुः कर्कटिः स्यादिति पुंस्काण्डे रत्नकोशात्। कर्कटी, कर्कटिः द्वे कर्कट्याः, 'कांकडी'—इति ख्यातायाः।"—इति नवामरविवेकाख्या टीका।

मनन्तं भवति शत मैश्वर्यं भवति*) शत मिति शतं दीर्घ मायुः† ॥ ३६ (४९) ॥ ८.

मा ते राधांसि मा त ऊतयो वसो ऽस्मान् कदाचना दभन्। विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ‡ ॥ मा च ते धामानि§ मा च ते कदा च नः|| सरिषुः सर्वाणि. प्रज्ञानान्युपमानाय मनुष्यहितो ऽय¶ मादित्यो ऽय मात्मा ऽथैतदनुप्रवदन्त्यथैतं** महान्त मात्मान मेषर्गणः प्रवदति वैश्वकर्मणे†† देवानान्नु वयञ्जानानासदासीन्नो सदासीत्तदानी मिति च सैषात्मजिज्ञासा सैषा सर्वभूतजिज्ञासा ब्रह्मणः सारिष्टं‡‡ सरूपतां सलोकतां गमयति य एवं वेद (नमो ब्रह्मणे

---

* नास्त्येषोंऽशः ख-ग-भ-पुस्तकेषु।

† ख-ग-भ-पुस्तकेष्वेष षष्ठः खण्डः।

‡ ऋ० सं० १, ६, ८, ५; सा० स० उ० आ० ८, ३, ५, २।

§ "धनानि" ख, ग, भ।

|| "कदाचन" ख, ग, भ।

¶ "ऽन्युप मानमदन्मनुष्यहितो" ख, ग, भ।

** "प्रवदन्त्यथैनं" ख, ग, भ।

†† "वैश्वकर्मणो" ग, भ।

‡‡ "साष्टिं" ग, भ; "सा र्ष्टिं" ख।

नमो महते भूताय* नमः पारस्कराय† नमो यास्काय‡ ब्रह्म शुक्ल मसीय ब्रह्म शुक्ल मसीय§) ॥३७९॥ (५०) ९॥.

(व्याख्यातन्दैवतमग्निरश्मिजन्मनापश्यङ्गोपामाकाश-गुणस्तम्परिवर्त्तमानंसयद्यनुरुध्यतेऽष्टोत्तरमथयेहिंसा-माश्रित्याथयेहिंसामुत्सृज्यनतंहंसोघर्मःसोमःपवतेब्र-ह्मादेवानान्तिस्रोवाचईरयतिसोमङ्गावोऽङ्कान्महत्तत्सो-मोविधुन्दद्राणंसाकञ्जानांस्त्रियःसतीःसप्ताद्ध्गर्भानवि-जानाम्यपाङ्प्राङेतितद्दिदासकोअद्ययुङ्क्तेकईषतेको-अग्निमीट्टत्वमङ्गहंसःशुचिषद्धासुपर्णाऽऽयाहीन्द्र‖ विप्रं-

---

* "देवाय" ख, ग, झ।

† "नमः पारस्कराय"—इति नास्ति ख-ग-झ-पुस्तकेषु।

‡ नास्त्येषोऽंशः च-ज-पुस्तकयोः।

§ "हे वसो निवासयितरिन्द्र ते तव सम्बन्धीनि राधोत्येभिरिति राधांसि भूता-न्यस्मान् कदाचन कदाचिदपि मा दभन् मा विनाशयन्तु। तथेतयो गम्भारः। यद्वा धूतय इत्यत्र वर्णलोपः। धूतयः कम्पयितारस्ते त्वदीया मरुतश्च मा दभन्। हे मानुष मनुष्यहितेन्द्र! चर्षणिभ्यो मन्त्रद्रष्टृभ्यो नोऽस्मभ्यं विश्वा विश्वानि सर्वाणि वसूनि धनानि च आ उप मिमीहि। सर्वत आहृत्यास्मत् समीपे कुरु। सर्वत्र वर्त्तमानं धन मस्मभ्यं प्रयच्छेत्यर्थः।"—इत्यादि सा० भा०।

‖ नैष खण्डो दृश्यते ख-ग-झ-पुस्तकेषु।

२३ २४ २५ २६ २७
विप्रासोजातवेदसइदन्त्वेन्याभि*स्त्र्यम्बकंशतञ्जीवमाते-

राधांसीति सप्तत्रिंशत्॥†)

(१) (२) (३) (४) (५) (६)
(अथेमायद्द्यावोयदुदञ्चो विहिसोतास्तण्येवतरत्स-

(७) (८) (९) (१०) (११) (१२)
श्चत्वारिशृङ्गास्त्वयन्तश्चत्वारिवागृचोअक्षरआदित्यइत्य-

(१३) (१४) (१५)
क्षरन्नक्षरतिहृदातष्टेषुव्याख्यातन्दैवतमग्निरस्मिजन्मना-

(१६) (१७) (१८) (१९)
पश्यञ्जोपामाकाशगुणस्तम्परिवर्त्तमानंसयद्यनुरुध्यतेऽ-

(२०) (२१) (२२) (२३) (२४)
ष्टोत्तरमथयेहिंसामाश्रित्याथयेहिंसामुत्सृज्यनतंहंसो-

(२५) (२६) (२७) (२८)
घर्मःसोमःपवतेब्रह्मादेवानान्तिस्रोवाचईरयतिसोम-

(२९) (३०) (३१) (३२) (३३)
ङ्गावोऽक्रान्महत्तत्सोमोविधुन्दद्राणंसाकञ्जानांस्त्रियः-

(३४) (३५) (३६) (३७) (३८)
सतीःसप्तार्धगर्भानविजानाम्यपाङ्प्राङेतितदिदासको-

(३९) (४०) (४१) (४२) (४३)
अद्ययुङ्क्तेकईषतेकोअग्निमीट्टेत्वमङ्गहंसःशुचिषद्द्वासु-

---

* नाप्ययं खण्डोऽस्ति ख-ग-भा-पुस्तकेषु।

† ञ-पुस्तकसम्मत एष खण्डप्रतीकपाठः; परिशिष्टस्याध्यायद्वयात्मकत्वे प्रमाणम् क-ख-ग-भा-पुस्तकेषु न क्वापि प्रतीकपाठो दृष्टः।

(४४) (४५) (४६) (४७) (४८)
पर्णाऽऽहीन्द्र*विप्रांविप्रासोजातवेदसइदन्तेन्याभि†स्त्य-
(४९) (५०)
म्बकंशतंजीवमातेराधांसीति पञ्चाशत् ॥‡)

॥ इति निरुक्ते चतुर्दशाध्यायः समाप्तः§ ॥ १४ ॥

(ऊर्ध्वमार्गगतिप्रकरणं समाप्तम् ॥)

॥ इति नैरुक्तं द्वितीय-परिशिष्टं समाप्तम् ॥

(इति परिशिष्टम्)

---

*, † ख-ग-भ पुस्तकेषु नैतौ खण्डौ स्तः, अत एव च तत्र खण्डसङ्ख्याऽष्टचत्वारिंशदेव ।

‡ छ-पुस्तकसम्मत एष पाठः; परिशिष्टस्यैकाध्यायात्मकत्वे प्रमाणम् ।

§ इह यद्वक्तव्यं तदुक्तं पुरस्तात् ३९९ पृ० "†" ।

|| नैतन्निघण्टुमवलम्ब्य कृतम्; अपि तु प्रसङ्गादुक्तमिति केषाञ्चित्; न चाप्यस्य यास्कः कर्त्तेत्येके ।

इति निरुक्तम्

(निघण्टु, निघण्टुभाष्यम्, परिशिष्टं च)

सम्पूर्णम् ॥

अथ नवमादि-चतुरध्यायानां सूची,

परिशिष्टस्य च।

अथ खण्डसङ्ख्यानिर्णयः ।

नवमाध्यायस्य,—

प्रथमे पादे	१०*	(१—१०†)
द्वितीये पादे	११	(११—२१)
तृतीये पादे	१३	(२२—३४)
चतुर्थे पादे	९	(३५—४३)

सङ्कलनया ४३ त्रिचत्वारिंशत् ।

दशमाध्यायस्य,—

प्रथमे पादे	१३	(१—१३)
द्वितीये पादे	११	(१४—२४)
तृतीये पादे	१३	(२५—३७)
चतुर्थे पादे	१०	(३८—४७)

सङ्कलनया ४७ सप्तचत्वारिंशत् ।

एकादशाध्यायस्य,—

प्रथमे पादे	१२	(१—१२)
द्वितीये पादे	९	(१३—२१)
तृतीये पादे	१३	(२२—३४)
चतुर्थे पादे	१६	(३५—५०)

सङ्कलनया ५० पञ्चाशत् ।

द्वादशाध्यायस्य,—

प्रथमे पादे	११	(१—११)
द्वितीये पादे	८	(१२—१९)
तृतीये पादे	१५	(२०—३४)
चतुर्थे पादे	१२	(३५—४६)

सङ्कलनया ४६ षट्चत्वारिंशत् ।

त्रयोदशाध्यायात्मकस्य
त्रयोदशचतुर्दशेत्यध्यायद्वयात्मकस्य वा
परिशिष्टस्य,—

प्रथमे पादे	१३	(१—१३)
द्वितीये पादे	१९	(१४—३२)
तृतीये पादे	९	(३३—४१)
चतुर्थे पादे	९‡	(४२—५०)

सङ्कलनया ५० पञ्चाशत् ।

सपदनिरुक्तखण्डसङ्ख्या,—

सपादपुस्तकमते	४८०
अपरपुस्तकमते	४४८
वृत्तिकृन्मते	४४२

* पादान्वितपुस्तकेषु ।

† प्रतीकवाक्यान्वितपुस्तकेषु ।

‡ ख-ग-भ-प्रभृतिपुस्तकेष्वस्मिन् पादे सप्त एव खण्डा इत्यतोऽस्याध्यायस्याष्टचत्वारिंशत्खण्डात्मकत्वमेव तेष्विति ।

अथ अकारादिवर्णक्रमेण खण्डप्रतीकसूची ।

* भ्रमात्तत्र ९ संख्या मुद्रिता (१२ इष्टा द्रष्टव्या) ; एव मुत्तरत्राप्यापादान्तम् ।

अथ द्रष्टव्यपदानां सूची ।

अथ निरुक्तदृष्ट-सम्बन्धिपदानां सूची ।

पदम्		अ०	पा०	ख०		भा०	पृ०
पुमान् (दायादः)	...	९	२	५	...	४	२३*
स्त्री (अदायादा)	...	३	४	४	...	२	३५६†
ग्ना (बालिका ?)	...	,,	,,	,,	...	,,	,,
योषा (युवती ? ४भा० ४०७)		,,	३	३	...	,,	३१५
मेना (वृद्धा ?)	...	,,	४	४	...	,,	३५६
नपुंसकः (तृतीया प्रकृतिः)		१३	२	६	...	४	३७३
पण्डकः ,,	...	६	६	४	...	३	२७३
उपयमनम्	...	३	१	५	...	२	२६७
सन्तानकर्म	...	,,	,,	४,५	...	,,	२५९,२६६
वरः	...	१	३	२	...	,,	६१
वधूः	...	२	१	३	...	,,	१५६
गर्भः	...	१०	२	१०	...	४	११५‡
भ्रूणः	...	६	५	४	...	३	२५१
बालः	...	११	३	१०	...	४	२१६
शिशुः	...	१०	४	२	...	,,	१४३
कुमारः	...	५	३	७	...	३	९६
युवा (४भा० ३८८)	...	४	,,	३	...	२	४४५
सनयः	...	,,	,,	,,	...	,,	,,
पलितः	...	१३	२	१८	...	४	३८८
स्थविरः	...	६	६	२	...	३	२६३

* २भा० २५९, २६६, २७५ । ४भा० ३७३, ३९० ।

† २भा० २२५, २५९, ३२१ । ४भा० ११५, १९९, ३७३, ३९० ।

‡ २भा० २२५, २७५, ४६२ । ४भा० १४३, ३८७ ।

पदम्		अ०	पा०	ख०		भा०	पृ०
पिता	...	१३	२	५	...	४	३७२*
माता	...	,,	,,	,,	...	,,	,, †
आचार्यः	...	१	२	२	...	२	४९
सः (शिष्यः २भा० ३९५,३८४)		७	१	५	...	३	३१४
भ्राता	...	४	४	,,	...	२	४८६
भगिनी	...	३	१	६	...	,,	२७५
जामिः (२भा० २६७,४६०)		,,	,,	,,	...	,,	,,
स्वसा (२भा० ३२१)		११	२	११	...	४	२१८
ज्येष्ठः (२भा० २६७)	...	२	३	१	...	२	१९५
मध्यमः	...	४	४	५	...	,,	४८६
कनीयान्	...	२	३	१	...	,,	१९५
पतिः	...	१०	२	८	...	४	१०७‡
जाया (२भा०२६७। ४भा०१०७,२२१)		१२	,,	११	...	,,	२६६
जनिः (४भा० ३२१)...		१०	,,	८	...	,,	१०७
पत्नी (४भा०२२५,२५८,२६१,२२१)		१२	४	११	...	,,	३३०
सुभगा	...	११	,,	५	...	,,	२२६
उशती (२भा०२६६। ४भा०३३०)		१	६	३	...	२	१३२
सुवासाः	...	,,	,,	,,	...	,,	,,
विधवा	...	३	३	,,	...	,,	३१५
अपतिका	...	३	१	५	...	२	१६७
अपुत्रा	...	,,	,,	,,	...	,,	,,
गर्त्तारुक्	...	,,	,,	,,	...	,,	,,
निष्षपी	...	५	३	४	...	३	८७
रामा	...	१२	२	२	...	४	२७१

* २भा० २५८,२६७, ४६२। ३भा० १९९। ४भा० २९४, ३००, ३०४, ३७४।

† २भा० १८८, ४६२ । ३भा० ४८७ । ४भा० १५६, २४२, २६८, ३७४।
"मातरा" (मातरौ = माता च पिता च) २भा० २७५ । ४भा० ६०, १०७।

‡ २भा० ३६७, ४६० । ४भा० २२६, २६१ ।

पदम्	अ०	पा०	ख०	भा०	पृ०
सपत्नी	४	१	६	२	३९३
जारः (३भा० ११२, ४भा० १०७)	३	३	४	२	३१०
वृषलः	,,	,,	,,	,,	३११
जारिणी	१२	१	७	४	२५८
जाम् (पुत्रः कन्या वा)	३	,,	६	२	२७५
अपत्यम् (तोकः ४भा० २१५)	,,	,,	१	,,	२५२
ततः (पिता पुत्रो वा)	६	२	२	३	१५५
तना (माता दुहिता वा)	,,	,,	,,	,,	,,
पुत्रः	२	३	,,	२	१९९*
शेषः	३	१	,,	,,	२५५
तोकः (४भा० ७८, २५७, ३९९)	,,	,,	५	,,	२६७
तान्वः	,,	,,	६	,,	२७५
आत्मजः	,,	,,	,,	,,	,,
अन्योदर्यः	,,	,,	३	,,	२५७
अन्यजातम्	,,	,,	२	,,	२५४
अरणः	,,	,,	२, ३	,,	२५४, २५७
कनिः	१०	२	८	४	१०७
कन्या (४भा० १०७)	४	,,	७	२	४१७
दुहिता	३	१	४	,,	२५९†
अप्रत्ता	,,	,,	५	,,	२६७
पुत्रिका	,,	,,	,,	,,	,,
अभ्रातृका (२भा० २६०)	,,	,,	,,	,,	,,
नप्त्री (दौहित्रं पौत्रं वा)	३	,,	४	२	२५८
नप्ता (,,)	,,	,,	,,	,,	२५९
नपात् (,,)	८	२	२	३	४५९

* २भा० २५७, २५९, २६७, २७५। ४भा० १८६, २५२, २७४, ३९०।

† २भा० २५७, २६७, ४६२। ४भा० २६८।

पदम्		अ०	पा०	ख०		भा०	पृ०
पौत्रः (४भा०७८, २५७)		३	१	४	...	२	२५९
तनयः (४भा० २५९)		१०	,,	,,	...	४	७८
दौहित्रः	...	३	,,	,,	...	२	२५९
जामाता	...	६	२	६	...	३	१७९
विजामाता	...	,,	,,	,,	...	,,	,,
देवरः	...	३	३	३	...	२	३१५
श्यालः	...	६	२	६	...	३	१७९
धनिता ("भगिनीभर्त्ता"-इति टीका)		३	१	,,	...	२	२७५
स्नुषा	...	११	,,	९	...	४	२६३
सुवीरा	...	१	३	२	...	२	६१
मातुलः	...	१३	४	३	...	४	४०७
मातुलयोषा	...	,,	,,	,,	...	,,	,,
मातुलयोषकन्या	...	,,	,,	,,	...	,,	,,
पैतृष्वसेयी	...	,,	,,	,,	...	,,	,,
पितृष्वसा	...	,,	३	१	...	,,	३९१
पितरः	...	३	१	५	...	२	२६६*
वंशः	...	५	,,	६	...	३	३५
दायादः	...	३	,,	४	...	२	२५९
ज्ञातयः	...	४	३	५	...	,,	४६२
सबन्धवः	...	,,	,,	,,	...	,,	,,
सनाभयः	...	,,	,,	,,	...	,,	,,

---

* २भा०१७८। ३भा० ३०७। ४भा० ७५, १९०, १९१, १९४, २१९।

॥ अथ नैरुक्तदैवतसूची ॥

		निघ०	निरु०	
दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	पृ०	भा०	पृ०
अक्षाः	देवनानि—विभीदकफलानि	४६६	४	१०—१२
अग्नायी	अग्निशक्तिः—दाहिकादि (यु० उ०२१*)	४७१	४	५१—५२
अग्निः	पार्थिवः (प्रसिद्धः)	४५९	३	३७८—३८६
,,	मध्यमः (विद्युत्)	४८१	३	३८६, ३८८
,,	,, (,,)	,,	४	१४०—१४२
,,	उत्तमः (सूर्यः)	०	३	३८७,३९० —३९२
,,	महान् आत्मा	०	४	३६८
,,	सर्वा देवताः	०	३	३८,३९०—३९२
अग्नीन्द्रौ	(ऋ० स० ३.१,२५,४.)	०	३	३४४, ३४७
अग्नीपर्जन्यौ	(ऋ० स० ४,८,१६,६.)	०	३	३४४, ३४८
अग्नीवरुणौ	(ऋ० स० ३,४,१२,४.)	०	३	३४४, ३४७
अग्नीषोमौ	(ऋ० स० १,६,२८,१.)	०	३	३४४, ३४७
अग्न्यृतवः	(ऋ० स० १,१,२८,४.)	०	३	३४४, ३४८
अघ्न्या	माध्यमिका वाक्†	४८९	४	२२४, २२७
,,	गौः (घर्मधुक्)	११९	४	२२४—२२६
अङ्गिरसः	अङ्गाराः	०	४	१९०—१९१टी०
,,	रश्मयः (ऋषयः आ०‡)	४८५	४	१९४—१९५
अजएकपात्	आदित्यः (एकादश द्वादश वा§)	४९४	४	१९५—१९८,२०२
"अतिथिदेवत्यम्" ब्राह्मणः (तै०आ०१,१०; श०१,४,४,२; ४)			३	३०७
अथर्वा	अचलः (आदित्यः)	४९५	४	२०२,२०४—२०५

* युद्धोपकरणानीति परिचायितेषु द्वाविंशतिषु एकविंश मिदम्।

† माध्यमिका वाक् तु मेघध्वनिरेव; अथवा सर्वेषा मेव शब्दाना माकाशप्रभवत्वात् माध्यमिकत्वम्; "वायुः खात्; शब्दस्तत्"—इति य० का० प्रा० १, ६; ७।

‡ ऋषयः आ०—अङ्गिरसः ऋषय एवेति आख्यानविदो वदन्ति।

§ ४ भा० १९६ पृ० §, २०० पृ० ‡ टीप्पनी च द्रष्टव्या। अस्तकालीनः सूर्यः।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
अथर्वाणः ...	स्थिरावयवः (ऋषयः आ०)	४८६	४	१९१—१९५
अदितिः ...	अखण्डनीया शक्तिः (प्रकृतिः)	४०१	२	४८८
,, ...	प्रातःसन्ध्या (दाक्षायणी) ...	४८६	४	१९९—२०४
,, ...	अग्निः*	०	४	२००, २०४—२०५
अनुमतिः ...	पूर्वा पौर्णमासी	४८७	४	२१३—२१५
अपांनपात् ...	विद्युत्	४७८	४	१०३,१०४—१०५
अमा ...	व्याधिः, भयञ्च (यु० उ० २२)...	४७१	४	५२
अभीशवः ...	अङ्गुलयः (यु० उ० ५) ...	४६६	४	२४
,, ...	सूर्यरश्मयः, अश्वरश्मयश्च ...	२४	२	२१५
अरण्यानी ...	अरण्यशक्तिः—विभीषिका (यु०उ०१८)	४७०	४	४७—४९
अश्वः ...	प्रसिद्धः† (तै० आ० ३, १२, ५.)	४६५	४	१—४
अश्वाजनी ...	अश्वकशा (यु० उ० ९) ...	४६८	४	२९—३१
अश्विनौ ...	तमःप्रकाशौ (रसद्-रसहृतौ‡)	४९१	४	२४७—२५६
असुनीतिः ...	जीवनवायुः (अहर्विभाक्) ...	४८१	४	१४२, १४५—१४६
अहिः ...	मेघः, वैद्युताग्निर्वा§ ...	४८२	४	१५३, १५४
अहिर्बुध्न्यः ...	"योऽहिः स बुध्न्यः" ...	,,	४	१५४, १५५
आग्नापौष्णम्...	(हविः। ऋ० स० ७,६,१२,३.)	०	३	३४४, ३५०
आग्नावैष्णवम्...	(हविः। तै० स० १,८,२२,१.)	०	३	३४४, ३४९
आत्मा ...	शरीरस्थः परमात्मा च (३,२,३.)	०	४	३८९, ३९२
आदित्यः ...	सूर्यः, आत्मा च	०	४	३९३—४०१, ४०२

* निघण्टौ पृथिवी-गो-वाक्-द्यावापृथिवी-पर्य्यायेषु (१ भा०१२, ९२, ३३० ३७५ पृ०) चादितिशब्दो दृश्यते ; सर्वा आन्तरिक्ष्या एव देवता अदितिशब्दवाच्या—इति तट्टीकाकृतो देवराजस्याशयश्च (१ भा० ४८६ पृ०)।

† सूरादश्वः ऋ०स०२,३,११,२। वारुणः तै०ब्रा०३,९,१६,१। आदित्यः तै०आ०५,३ ५।

‡ द्यावापृथिव्यौ, अहोरात्रौ, सूर्य्याचन्द्रमसौ, वासात्यौ राजानौ वा। "देवाना मध्वर्यू" तै० ब्रा० ३,२,४,६ ; तै० आ० ३, ३। "देवानां भिषजौ" तै० ब्रा० १, ७, ३,५।

§ १ भा० ६९ पृ०, २ भा० २१७ पृ०, ऐ० ब्रा० ३, ३, १२. एवं ऋ० स०, ५, ३, २६, ७।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
आदित्यसंवत्सरौ	(ऋ० सं० २,३,१६,२.) ...	०	३	३६०, ३६२
आदित्याः ...	त्वष्ट्रादयः सवित्रादयो वा द्वादश	४६५	४	३०५—३०८
आपः ...	उदकम् (यु० उ० १५) ...	४७०	४	४०, ४३—४४
आप्राः	एकतद्धितचिताः (अग्निवायुसूर्याः, ऋषयो वा)	४८६	४	१९६—१९९
आर्त्नी ...	धनुःप्रान्ते (द्व० ५*) ...	४७३	४	५९—६१
इध्मः	समित्। "अग्निः" शा०† (आप्री १‡)	४६१	३	४५६—४६३
इन्दुः ...	चन्द्रमाः§ (अद्दविभाक्) ...	४८१	४	१४७—१५२
" ...	आदित्यः, आत्मा च‖ ...	०	४	३८८
इन्द्रः ...	वर्षणहेतुर्वायुः (रसानुप्रदः) ...	४७६	३	३२०—३२६, ३५२
" ...	" (वृत्रादिनामदानवहन्ता¶)	"	४	८१—८८
" ...	आदित्यः (अथ० सं० ७,८२,६.)	४१४	३	५६—६०
" ...	" (निश्वानः ३ भा० २८९ पृ०)	"	४	३८
" ...	कालः (ऋ० सं० ८, १, १६, ४. सा०)	०	४	३८८
"	परमेश्वरः ("शुभाशुभकर्मणो द्रष्टा" दे०**)	४७३	४	३४०
" ...	आत्मा ("क्षेत्रज्ञसञ्ज्ञकः" दे०)	"	४	३६८
इन्द्राकुत्सा ...	(ऋ० सं० ४,१,३०,४.) ...	०	३	३५२, ३५६
इन्द्राग्नी ...	(ऋ० सं० ३,१,१२,४.) ...	०	३	३५२, ३५३
इन्द्राणी ...	इन्द्रसहचारिणी (शची = क्रिया)	४८८	४	२२५—२२८
इन्द्रापर्वता ...	(ऋ० सं० ३,३,१९,१.) ...	०	३	३५२, ३५५
इन्द्रापूषणा ...	(ऋ० सं० ४,८,२३,१.) ...	०	३	३५२, ३५४

* द्वन्द्वानीति परिचायितेषु अष्टसु पञ्चम मिदम्।

† शाकपूणिमते सर्वा एव आप्रियोऽग्निवाचकाः। तै० सं० २, ६, १, २. च द्रष्टव्यम्।

‡ आप्रीति परिचायितेषु द्वादशसु प्रथम मिदम्।

§ सोम-(लता)-परोऽपि इन्दुशब्दो दृश्यते बहुत्र संहितादिषु।

‖ निघण्टौ उदकनामसु यज्ञनामसु च (१ भा० १२५, २४९) दृश्यते।

¶ "त्वाष्ट्रोऽसुर इत्यैतिहासिकाः"—इति, "तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति च २ भा० २१७ पृ०। किञ्च दानवः—दानकर्मा, जलप्रदो मेघ एव ४ भा० ८४ पृ०। एव मसुरादिशब्दार्थोऽपि बोध्यः; वृत्रादिशब्दस्य मेघपर्य्याय एव (१ भा० ५८ पृ०)।

** दे०—निघण्टुटीकाकृद्देवराज एव मन्तिखदित्यर्थः।

* एषोऽर्थस्त्वैतरेयब्राह्मणादिसम्मतः (ऐ० ब्रा०२,१,४); यास्केन तु "ईड्डेः"—इत्यादिना "इळः"—इति निरुच्य ईड्यशब्दस्य निगम उदाहृतः, व्याख्यातश्च सोऽग्निदैवतः; तथाचात्यग्रन्थो विचार्य एव; अस्माकन्तु "इळो अग्न आज्यस्य वियन्तु" (तै० ब्रा० ३, ५, ५, १.) इत्यादिसमालोचनया ऐतरेयोयार्थ एव श्रद्धा; तिस्रोदेवीष्वपीद मन्नम्।

† पृथिवी-वाक्-अन्न-गोनामसु च दृश्यते निघण्टौ (१ भा० १४, ७७, २०८, २३० पृ०); ४ भा० २४२ पृ० "*" द्रष्टव्यम्।

‡ ३ भा० ७३—८९ पृ० द्रष्टव्यम्; सर्वत्र तद्रूपकमेव। तै० सं० ३,४,७,३. द्रष्टव्यञ्च।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
कः ...	आदित्यः, आत्मा च* ...	०	४	४९८
"कामदेवता"	(तै० ब्रा०२, २, ५, ६ ; ३, १, १, १.)	०	३	३०७
कुहूः ...	उत्तरामावास्या	४८८	४	२१६, २१८—२२०
केशिनः ...	अग्निविद्युत्सूर्याः	४९३	४	२९०—२९२
केशी ...	आदित्यः (अष्टमो नवमो वा)	४९३	४	२८९—२९१
क्षेत्रस्यपतिः	क्षेत्रमध्यस्थः क्षेत्रपालको वायुः	४७८	४	९३—९९
गौः ...	जलधरशब्दः†	४८८	४	२२०—२२३
गौरी ...	विद्युत्सहिता मेघध्वनिः ...	,,	४	२२८—२३१
ग्नाः ...	आपः, देवपत्न्यो वा‡ ...	०	४	१५७, ३३१
ग्रावाणः ...	सोमकण्डनशिलाः	४६६	४	११—१४
चन्द्रमाः ...	प्रसिद्धोऽन्तरिक्षस्थः§ ...	४८३	४	१६७, १७०—१७३
जातवेदाः ...	पार्थिवोऽग्निः (मुख्योऽर्थः) ...	४६०	३	३९३—३९८
,, ...	मध्यमोऽग्निः (विद्युत्) ...	०	३	३९५
,, ...	उत्तमोऽग्निः (सूर्य्यः) ...	०	३	,,
ज्या ...	धनुर्गुणम् (यु० उ० ७) ...	४६८	४	२५—२८
तनूनपात् ...	आज्यम्। "अग्निः" शा० (आप्री २)	४६१	३	४५९, ४६३—४६५
तार्क्ष्यः ...	हस्तिसदृशो वातः	४८०	४	१२७, १२९—१३१
तिस्रोदेवीः	इडा, सरस्वती, भारती¶ (आप्री ९)	४६२	३	४७७—४७९
त्वष्टा ...	अग्निः (आप्री १०) ...	४६३	३	४७९—४८४

* हिरण्यगर्भः ऋ० स० ८, ७, ३, १ ; प्रजापतिः ऐ० ब्रा० २, ५, ६ ; ३, २, ९ ।

† १ भा० ६ पृ० पृथिवी ; ३१, ३७८ पृ० द्यौरादित्यश्च ; ७७ पृ० वाक् ; २४५ पृ० स्तोता ; ४०१ पृ० सूर्य्यरश्मिः । २ भा० १७५ पृ० पशुः, गोदुग्धः, चर्म, स्नाव, श्लेष्मा, ज्या ; १८०, ४७८ पृ० ज्योत्स्ना ; २११ पृ० आदित्यः, द्यौः ; २५८ उषाः ।

‡ ग्ना इति निघण्टौ वाङ्नामसु स्त्रीनामसु च पठितं दृश्यते (१भा० ७४, ३७० पृ०) ।

§ ४ भा० १७० पृ० * टिप्पनी, ७३ पृ० † टिप्पनी च द्रष्टव्या । किञ्च तत्र "दिवि सोमो अधिश्रितः"—इति सूर्यवाचकस्य सोमस्यैव ग्रहणेन समाधातव्यम् ।

¶ इडा—पृथिवीस्थाना, आग्नेयी, अन्नरूपा ; इयमेव ब्रह्माणीति प्रसिद्धा । सरस्वती—मध्यस्थाना, वायव्या, वाणीरूपा जलरूपा वा ; इयमेव रुद्राणीति प्रसिद्धा । भारती—द्युस्थाना, सौरी, प्रभारूपा ; इयमेव वैष्णवीति प्रसिद्धा । तै०ब्रा०२, ६,१०, ४. द्रष्टव्यञ्च ।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
त्वष्टा ...	गर्भादिरूपकृत् वायुः ...	४८०	४	१२६, १२७—१२९
,, ...	सर्वरूपकृत् आदित्यः* ...	४९१	४	२६८—२६९
दधिक्राः ...	नवजलधरसहचरो वायुः ...	४८०	४	१२२
दध्यङ् ...	ध्यानशक्तिदः आदित्यः (ऋषिः आ०)	४९४	४	२०१, २०४—२०५
दुन्दुभिः ...	रणवाद्यविशेषः (यु० उ० १)	४६७	४	१९, २१
देवताः ...	अग्निवायुसूर्याः † ...	०	२	१८५—२२०—२७७
देवपत्न्यः ...	इन्द्राणीप्रभृतयः	४९७	४	३२९—३३३
देवाः ...	(देवतापर्यायोऽपि देवशब्दः ‡)	४९६	४	३१२
,, ...	रश्मयः, इन्द्रियाणि च ...	०	४	३५६
देवी ऊर्जाहुती	वीज-कालौ§ (द्व० ८) ...	४७४	४	६३—६५
—— जोष्ट्री	,, (द्व० ७) ...	,,	४	६१, ६२
दैव्याहोतारा	पार्थिववैद्युतावग्नी—(आप्री ८)	४६३	२	४७५—४७६
द्यावापृथिव्यौ	द्युलोकभूलोकौ (द्व० २) ...	४७१	४	५७, ५८
द्रविणोदाः	पार्थिवोऽग्निः (मुख्योऽर्थः) ...	४६१	२	४२९—४५६
,, ...	मध्यमोऽग्निः (विद्युत्), इन्द्रश्च	०	२	४४०—४४६
,, ...	उत्तमोऽग्निः (सूर्यः) ...	०	२	४५२—४५६
द्रुघणः ...	मुद्गरः (यु० उ० १२) ...	४६९	४	३४—३७
द्वारः ...	यज्ञगृहद्वारः। "अग्निः" शा० (आप्री ६)	४६२	२	४७०, ४७१—४७४
धनुः ...	शरासनं प्रसिद्धम् (यु० उ० ६)	४६८	४	२४, २५—२६
धेनुः ...	नवजलधरगर्जनम् ...	४८८	४	२२१—२२५
धाता ...	सरसी वायुः	४८४	४	१७८
नद्यः ...	गङ्गाद्याः सप्त (यु० उ० १४)	४७०	४	३८—४२
नराशंसः ...	यज्ञः। "अग्निः" शा० (आप्री ३)	४६१	२	४६४, ४६६—४६८

* एष एव प्रथम आदित्य इति मते तूदयाव्यवहितपूर्वकालीनोऽयम्।

†, ‡ "त्रयश्च त्रिंशच्च मनोर्देवा यज्ञियासः"—इति ऋ० सं० ६, २, २७, २; "त्रयस्त्रिंशद्वै देवाः सोमपाः त्रयस्त्रिंशदसोमपाः"—इत्यादि ऐ० ब्रा० १, २, ८; ता० ब्रा० २, १, १; "त्रयस्त्रिंशद्वै देवताः" इति तै० सं० १. ४, २, ४। ते चाष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, प्रजापतिश्चेति द्वात्रिंशत्; इन्द्रो वषट्कारो वा त्रयस्त्रिंशः।

§ द्यावापृथिव्यौ, अहोरात्रे, सस्यसंवत्सरौ वा। ४ भा० ६२, ६२ पृ० द्रष्टव्यम्।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ॰ पृ॰	निरु॰ भा॰	निरु॰ पृ॰
नाराशंसः ...	मन्त्रः, स्तुतिमन्त्रो वा ...	४६६	४	१४—१६
पथ्या (स्वस्ति)	अन्तरिक्षस्थिता (कल्याणसत्ता)	४८९	४	२२७—२२९
पर्जन्यः ...	मेघः (ऋ॰सं॰१. ३, १६; १७.)	४७७	४	८, ८६, ८९
पलितः ...	आदित्यः, आत्मा च (२ भा॰ ४८६ पृ॰) ०		४	३८८
पाकः ...	विपक्वप्रज्ञः—आत्मा ...	०	२	३०१
पितरः ...	मृतपितॄणामात्मानः* ...	४८६	४	१९०—१९३
,,	पालयितारो रश्मयः† (तै॰ब्रा॰ १, ३, १०.)	,,	४	१९४
पितुः ...	अन्नम् चतुर्विधम् (यु॰ उ॰ १३)	४६९	४	३६—३८
"पितृदेवत्यम्"	अग्निष्वात्तादयः (तै॰ब्रा॰ १,६,८; ९.) ०		३	३७
पुरूरवाः ...	बहुगर्जको मेघव्यूहः‡ ...	४८२	४	१५६—१५९
पूषा ...	आदित्यः (चतुर्थः पञ्चमो वा)	४९२	४	२७७, २७८—२८०
पूषाग्नी ...	("अग्य मुदाहरणम्" नि॰-इ॰)	०	३	३५२, ३५९
पृथिवी ...	इयं प्रसिद्धा (यु॰ उ॰ २०) ...	४७१	४	५१
,, ...	मेघमण्डली (,,)...	४८८	४	२२२, २२५
,, ...	द्युमण्डली (,,)...	४९४	४	२९९, ३०२
प्रजापतिः...	प्रजापालको वाय्वादिः§ ...	४८२	४	१५१, १५३
"प्रायोदेवता"	प्रकरणानुसारतः ज्ञेयाः) ...	०	३	३०७
बर्हिः ...	कुशा (आप्री ५) ...	४६१	३	४६८, ४६९—४७२
बृहस्पतिः...	मेघस्थो मेघरक्षको वायुः ‖ ...	४७७	४	८९—९१

* जीवत्पितॄणा मात्मान इति केचित्तदाऽस्मभ्यं रोचतेऽस्मभ्यम्; अन्तरिक्षस्थानदेवतास्तु पितर इति दर्शनात्; जीवितानां स्थानं हि पृथिव्येवेति (तै॰ ब्रा॰ २, ६, ३.)।

† त एव ऋभ्वङ्गिरसभृग्वथर्वादिनामभिस्तोच्यन्ते इत्याख्यानविदः।

‡ "पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचः"—इति तै॰ स॰ ३, ४, ७, २।

§ मी॰ जै॰ सू॰ १, २, १०. शा॰ भा॰ "प्रजापतिः स्यात् वायुराकाश आदित्यो वा"—इति। ऐ॰ ब्रा॰ २, ५, १. सृष्टिकर्ता। ऐ॰ ब्रा॰ ३, २, ७. संवत्सरः। य॰ वा॰ स॰ ३१, १९. म॰ टी॰ सर्वात्मा। य॰ वा॰ स॰ ३१, २०. म॰ टी॰ आदित्यः। य॰ तै॰ ब्रा॰ १, १, ५, ५. अग्निः; ३, १, १, १. मनः; १, ३, ४, ५. वाक्; १, ३, १०, १०. यज्ञः: २, २, ७, १. रूपं नाम च। य॰ तै॰ स॰ २, १, ३, ३ सर्वा देवताः। एवमयं बह्वर्थः।

‖ ३ भा॰ २०१—२०३ पृ॰; ऐ॰ ब्रा॰ ३, ३, १० ख॰; ऋ॰ स॰ ८, २, १५, १. सा॰।

दैवतपदम् ...	निरुक्तनिष्पन्नोऽर्थः ...	निघ० पृ०	निरु० भा०	निरु० पृ०
ब्रह्म ...	?	०	४	४१२
ब्रह्मणस्पतिः	सृष्टिसंहर्त्ताऽन्नपालको वायुः	४७८	४	९०, ९१—९२
भगः ...	आदित्यः (द्वितीयस्तृतीयो वा)	४९२	४	२७१, २७४—२७५
भारती ...	सूर्यप्रभा ("तिस्रोदेवीः" *)...	०	३	४७९
भृगवः ...	प्रचण्डातपाः (ऋषयः आ०)	४८६	४	१९१—१९७
मण्डूकाः ...	भेकाः (वर्षाभ्वः) ...	४९६	४	७—९
मनुः	दिवाजातः प्रकाशः, तापो वा (वैवस्वतः†)	४९५	४	३०२, ३०४—३०५
मन्युः	वज्रसदृशो वायुः (तै० ब्रा० २, ४, १, ११.)	४८०	४	१३०, १३१
मरुतः ...	रुद्रपुत्राः‡ (झटिकाः) ...	४८५	४	१८१, १८२
महान् आत्मा	?	०	४	३८०, ३८१
मित्रः ...	जीवनहेतुर्वायुः, तापश्च ...	४७९	४	१०८,—११२
,, ...	आदित्यः§ (तै० ब्रा० १, ७, १०, १.)	०	४	३०७
,, ...	महान् आत्मा (२ भा० २९ पृ०)	०	४	३६८
मित्रावरुणा	(ऋ० सं० ३,४,११,६.) ...	०	३	३५१, ३५७
मित्रावरुणौ	अहोरात्रे (ऐ० ब्रा० ४, २, ४.)	०	४	२००—२०१
मृत्युः	देहान्तच्छ्वासवायुः (तापाभावजन्यः)	४८४	४	१७१, १७३—१७५
यमः	अग्निः (पार्थिवः, मध्यमः, उत्तमश्च)	०	४	१०६—१११
,,	रात्रिजातोऽन्धकारः, शैत्यं वा (वैवस्वतः)||	४७८	४	१०४—१०५
,, ...	आदित्यः (दशम एकादशो वा)	४९४	४	२९३, २९४—२९५
यमी	तामसी भीतिः, जड़ता वा (वैवस्वता¶)	४८८	४	२१९—२२१
"याज्ञदैवतः"	(तै० ब्रा० २, ५, ५, १०) ...	०	३	३०७

* आग्नेयी वाक्शक्तिश्च भारतीत्युच्यते श० ब्रा० ; ऐ० ब्रा० उ० ; १ भा० ८० पृ० ।

† मानवाना मादिपुरुषः इत्याख्यानविदो वदन्ति। "स्वायम्भुवः" २ भा० २५९ पृ० ।

‡ ऋ० सं० १, ८, ६, १ ; ४, ३, २१, १. सा० भा० द्रष्टव्यानि ।

§ उक्तञ्चैतत्—"मित्र एव धारयति पृथिवीञ्च दिवञ्चेति (४ भा० ११२ पृ०), तत्र माध्याकर्षणादिशक्त्या जगतां धारकत्वं सूर्यस्यैव मित्रनामकस्येति प्रतीयते ।

|| पितृराजत्वञ्चास्य ऋ० सं० ७, ६, १४, १ ऋ० ; अथ० सं० १८, ३, १३ म० ।

¶ यमी—यमभगिनी ; शारीरतापाभावे शैत्यं जड़ता च, तत्रैव मृत्युः ।।

दैवतपदम् ...	निरुक्तनिष्पन्नोऽर्थः ...	निघ० पृ०	निरु० भा०	निरु० पृ०
रथः ...	योद्धादिवाहनम् (पु० उ० १)	४६७	४	१७—२०
राका ...	उत्तरा पौर्णमासी ...	४८७	४	२१३, २१५
राजा ...	भावयव्यादिः*	०	४	१५—१७
रात्रिः ...	("वारुणी" तै० ब्रा० १,७,१०,१.)	४७०	४	४५, ४७ (पु० उ०१७)
रुद्रः ...	मेघशब्दहेतुरग्निः (मध्यमः)	४७६	४	८०, ८१
,, ...	मेघशब्दहेतुर्वायुः ...	,,	४	७५—८०
रुद्राः ...	रुद्रपुत्राः (मरुतः) ...	४८५	४	१८२—१८४
रोदसी ...	रुद्रवाणी (स्फूर्जथुः) ...	४९०	४	२४२—२४५
वनस्पतिः ...	यूपः। "अग्निः" शा० (आप्री ११)	४६४	३	४८५—४९४
वरुणः ...	मेघवहो वायुः (जलस्थः)	४७५	४	७१—७६
,, ...	आदित्यः (सप्तमोऽष्टमो वा)	४९२	४	२८५—२८९
,, ...	महान् आत्मा	०	४	३६८
वसवः ...	त्रिस्था रश्मयः (दिशस्त्वाष्टौ च?)	४९६	४	३२०, ३२५—३२८
वसिष्ठाः ...	ऋषयः (तै० ब्रा० १, ३, १०, ९.)	०	४	१९४, १९६—१९७
वह्निः ...	सूर्यः, आत्मा च ...	०	४	३८५
वाक् ...	व्यक्ताव्यक्ता च ध्वनिः† ...	४८७	४	२११—२१४, ३४८—३५८
वाचस्पतिः ...	शब्दोच्चारणहेतुर्वायुः‡ ...	७८	४	१००, १०३
वातापर्जन्या	(ऋ० स० ८,२,१३,५.) ...	०	३	३५२, ३५९
वाजिनः ...	आदित्यरश्मयः§ ...	४९७	४	३२७—३२९
वातः ...	वायुः—गन्धवहः ...	४८१	४	१३९
वायुः ...	,, ...	४७५	४	६७—७२
वाय्वादित्यौ	(य० वा० स० ३४,५५.)	०	३	३६०, ३६२
वास्तोष्पतिः...	ग्राममध्यचरः स्वास्थ्यहेतुर्वायुः	४७५	४	९६, ९९—१०२
विधाता ...	सरसो वायुः (धाता) ...	४८४	४	१७९

* "यज्ञसंयोगाद्राजा स्तुतिं लभते"—इति यास्कः ४ भा० १७। ऐ० ब्रा० ८, ४, ८; ९।

† "परिशेषाज्जिह्व माकाशस्य"—इति (वै० द० २, १, २७.) अस्या माध्यमिकत्व मेव।

‡ अतएव "मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्"—इति पा० शि० ७ श्लो०।

§ "अग्निर्वायुः सूर्यः, ते वै वाजिनः"—इति तै० ब्रा० १, ६, ३, ९।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
विपाट्छुतुद्र्यौ	पञ्चनदप्रदेशीयनद्यौ (द्व० ४)	४७२	४	५८—६१
विश्वकर्मा ...	रसादिसहचरो गर्भादिहेतुर्वायुः*	४७९	४	११८—१२८
विश्वानरः ...	आन्तरिक्ष्यं ज्योतिः ...	४८४	३	४०८—४१०
,, ...	,, ...	,,	४	१७५—१७७
,, ...	दिव्यं ज्योतिः	०	३	१७५—१७७
,, ...	आदित्यः (षष्ठः सप्तमो वा)	४९३	४	२८४
विश्वेदेवाः ...	रश्मयः, बहुदेवताश्च ...	४९६	४	३१४—३१९
विष्णुः ...	आदित्यः† (पञ्चमः षष्ठो वा)	४१२	४	२८०, २८१—२८३
,, ...	,, आत्मा च‡ ...	०	४	३९२
वृषभः ...	रथादिवाहो गौः (यु० उ० ११)	४६६	४	३३—३५
,, ...	इन्द्रः—"वर्षिता अपाम्"	०	२	४०२ इ०
,, ...	यज्ञः, सूर्य्यः, शब्दश्च ...	०	४	२४५—२४७
वृषाकपिः ...	आदित्यः§ (नवमो दशमो वा)	४९३	४	२९२—२९४
वृषाकपायी ...	आपराह्णिकप्रभा ...	४९१	४	२९१, २९३—२९५
वेनः ...	गर्भग्रहणहेतुर्वायुः, (अङ्गविभाक्)	४८१	४	१४३—१४४
वैश्वानरः ...	पार्थिवोऽग्निः (मुख्योऽर्थः)	४६०	३	३९८—४११
,, ...	मध्यमोऽग्निः (विद्युत्) ...	०	३	३९९—४०१, ४३४
,, ...	उत्तमोऽग्निः (सूर्यः) ...	०	३	४१२—४३४

* ४ भा० ११९ पृ० १ पं वायुः ; १२०—१२६ पृ० आदित्यः, आत्मा, भौवनः ; १२७, १२८ पृ० अग्निः । अयमेव हि धाता विधातेत्युच्यते (१२० पृ०); तथाच सृष्टिकर्त्तेति निष्पन्नार्थः । वस्तुतः सृष्ट्युपादानानामेव सृष्टिकर्त्तृत्वमिति मते सर्वेषामेव वाय्वादीनां सृष्टिकर्त्तृत्वमिति सर्वेषामेव साधारणं नाम विश्वकर्मेति। परमात्मवादिनये तु आत्मन एव विश्वकर्मेतिनाम; अपि वा वाय्वादयः सर्व एव आत्मजन्मान इति सर्व एव विश्वकर्माणः ।

† "अग्निर्वै देवानामवमो विष्णुः परमः"—इति, "अग्निः सर्वा देवता विष्णुः सर्वा देवता"—इति च ऐ० ब्रा० १, १, १। इहाप्यग्निसाहचर्याद्विष्णुरादित्य एव। २ भा० ४७—५३ पृ० च द्रष्टव्यम्। सर्वथाप्ययं मध्याह्नकालीनः सूर्यः ।

‡ "यज्ञः"—इति १ भा० ३४६ पृ० ; तै० स० १, १, ८, ३ ; ऐ० ब्रा० १, ३, ४ । "विष्णुर्वै देवानां द्वारपः"—इति च ऐ० ब्रा० १, ५, ४ ।

§ "वर्षिता चावश्यायानां कम्पनश्च भूतानाम्"—इत्ययमपराह्णकालीनः सूर्य एव ।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
शकुनिः ...	पक्षी (कपिञ्जलादिः) ...	४६५	४	५—७
शुनासीरौ ...	वाय्वादित्यौ (द्र० ६) ...	४७३	४	६१, ६२
श्येनः ...	इन्द्रः (सोमरसवाही वायुः*)	४८३	४	१६१—१६३
,, ...	आदित्यः, आत्मा च ...	०	४	३८३
श्रद्धा	सत्यबुद्धिः (तै० ब्रा० २, ८, ८, ७ ; ८)	४७१	४	४८—५० (यु० उ० ९)
संवत्सरः	(ऋ० सं० १,२,१४,२.—१६, १—५)	०	२	४९० ४९२
सदान्वा ...	दुर्भिक्षाधिदेवता ...	४५५	३	२६३
सप्तऋषयः ...	रश्मयः, इन्द्रियाणि च ...	४९५	४	३०९—३१२
समुद्रः ...	आदित्यः (द्वादश, रात्रिकालीनो वा)	४९४	४	२९९, ३००—३०२, ३८७
,, ...	आत्मा, आदित्यश्च ...	०	४	३८७
सरण्यूः	रात्रिः, छाया वा (यमयम्योर्माता आ०)	४९१	४	२६४, २६५—२६७
सरमा ...	वाक् (देवशुनी† आ०)	४८७	४	२०५—२०९
सरस्वती‡ ...	सरसा वाक् ("तिस्रोदेवीः")	४८७	४	२०९—२११
,, ...	नदी (नद्यः)	४७०	४	३८—४२
सरस्वान् ...	आन्तरिक्ष्य मुदकस्थानम् §	४७९	४	११५, ११८
सविता ...	प्रसवशक्तिसम्पन्नं तेजः‖	०	३	४३४, ४३६
,, ...	प्रसवशक्तिसम्पन्नो वायुः ...	४८०	४	१२२, १२४—१२५
,, ...	आदित्यः¶ (प्रथमः द्वितीयो वा)	४९२	४	१२६—१२७, २६९—२७२
साध्याः ...	प्राणाः, रश्मयश्च (विश्वसृजः आ०)	४९६	४	३१५, ३२०—३२५
सिनीवाली ...	पूर्वामावास्या	४८७	४	२१६—२१८
सुपर्णः ...	सूर्यरश्मिः ("वायुः" दे०)	४८२	४	१५५, १५६

* "गायत्री श्येनो भूत्वा सोम माहरत्"—इति श० ब्रा० ३, ९, ४, १०।

† अस्या एव पुत्रौ सारमेयौ (ऋ० सं० ७, ६, १५, ५) ; तौ च धर्माधर्मौ एव, वाच एव हि तौ उत्पद्येते। ४ भा० ३०९ * टीप्पनी च द्रष्टव्या।

‡ "कण्ठस्य खे" इत्यादि ऋ०प्रा०१३। अतश्च वाग्वादिन्याः सरस्वत्या माध्यमिकत्वम्।

§ "मध्ये व्योम दिशश्चाष्टावपां स्थानञ्च शाश्वतम्"—इति म० सं० १ १३।

‖ य० वा० सं० १, १०; तै० सं० १, १, ४. २. मी० अ० ९, १. इत्यादि द्रष्टव्यम्।

¶ यस्मिन् काले द्यौरेव अपहततमस्का, न पृथिवी; पृथिव्यां तम एव; स एव सावित्रः कालः ; "अधोरामः सावित्रः" इति ४ भा०२७० पृ०। एवञ्चाथ मुदयावस्थः।

दैवतपदम्	निरुक्तनिष्पन्नोऽर्थः	निघ० पृ०	निरु० भा०	निरु० पृ०
सुपर्णौ ...	जीवात्मपरमात्मानौ* ...	०	४	४०४, ४०६
सूर्यः ...	आदित्यः† (तृतीयश्चतुर्थो वा)	४९२	४	२७४,२७६—२७८
,, ...	आत्मा	०	४	२७७, ३६७
,, ...	प्राणः	०	४	२७९
सूर्या ...	सूर्यप्रभा (चन्द्रगतापि)‡	४९१	४	२५८, २६१—२६२
सूर्याचन्द्रमसौ	(ऋ० सं० ८,३,२२,६. विशू)	०	३	३६०, ३६१
सोमः ...	ओषधिविशेषः§ (लता) ...	०	४	१६१, १६४, १६७
,, ...	चन्द्रमाः	४८३	४	१६४—१६९
,, ...	सूर्यः‖	०	४	१६८, ३८२—३८७
,, ...	आदित्यः, आत्मा च ...	०	४	३८२—३८७
सोमापूषणा ...	(ऋ० सं० २,८,६,१.) ...	०	३	३५२, ३५८
सोमारुद्रा ...	(ऋ० सं० ५,११८,३.) ...	०	३	३५२, ३५८
स्वस्तिः ...	कल्याणतमा	४८९	४	२२७—२२९
स्वाहाकृतयः...	स्वाहायुक्तमन्त्राः (आप्री१२)	४६४	३	४९०, ४९३—४९५
हंसः ...	परमात्मा	०	४	४०२
हंसाः ...	सूर्यरश्मयः	०	४	४०२
हविर्धाने ...	सोमवाहिशकटौ (द्वि० २)	४७२	४	५६, ५७
हस्तघ्नः	...गोधा—प्रकोष्ठचर्मावरणम् (यु०उ०४)	४३७	४	२२, २३

---

* सुपर्णाः—सूर्यरश्मयः; ते हि आन्तरिक्ष्या एव। आदित्यरश्मयः इन्द्रियाणि च २ भा० ३०२ पृ०; आदित्यरश्मयः २ भा० ३७८; ३ भा ४१६ पृ०। सुपर्णः—रात्रयः ३ भा० ४३४ पृ०। सुपर्णः—वायुः, प्राणवायुः, परमात्मा वा ऋ० सं० ८, ६, १६, ४. सा०।

† अयं हि प्राधान्येन पूर्वह्नकालीन एव बुध्यते।

‡ "सोमाय सूर्यां प्रायच्छत्" इत्यस्य 'ज्योत्स्नां सोमाय ददाति" ४ भा०२६२ पृ० वृत्तिः।

§ "वायुः सोमस्य रक्षिता (ऋ० सं० ८, ३, २०, ५)"—इत्यत्र "वायुर्गोपा वनस्पतयः इति श्रुतेः"—इति सा० भा०। अतएव मध्यस्थानदेवतास्वाम्नातः।

‖ "दिवि सोमो अधि श्रितः (ऋ० सं० ८, ३, २०, १.)"—इत्यादि द्रष्टव्यम्।

॥ नैरुक्तश्रुतिसूची ॥

अथ यास्कीयेऽस्मिन् निरुक्ते, तत्सहैवेह प्रकाशितयोः टीकाटीप्पन्योश्च, या श्रुतयः स्मृताः, तासां प्रायः सर्वासामकारादिक्रमतः प्रतीकस्वरूपम्, तासु यथास्थानानिर्दिष्टस्थानानां यथालब्धं स्थानादिनिरूपणञ्च प्रकाशयामि ।

अ.

---

* तै० सं० १. २. ११. १ । † तै० सं० ४. ७. १. १ । ‡ तै० सं० १. ३. ७. २ ।

§ तै० सं० ५. ६. ८. ३ । तै० आ० ५. ८. १२ । काठ० ग्र० १८. ६. १७ ।

‖ 'अग्निः पशुरासीत्, तेनायजन्त—वायुः पशुरासीत्०——०सूर्यः पशुरासीत्' —इत्यादि शत० ब्रा० १२. ९. १. १३—१५ । ६. २. ३. २२ ; ७ १. ४. १७ ।

¶ तै० सं० २. १. १०. २ ।

** तै० सं० २. ५. ९. ४. । तै० ब्रा० ६. ५. ३. २ । शत० ब्रा० १. ४. १. १६ ।

* "अग्निर्वा इतो वृष्टिं सुदीरयति" — इति शत० ब्रा० २. ४. १०. १।

† "तथा च ब्राह्मणान्तरम् — अग्निर्वै देवानां सेनानीरिति" — इत्यादि ऋ० स० १. १. १. १. सा० भा०। "अग्निर्वै देवताना मनीकं सेनाया वै सेनानीरनीकम्" — इति शत० ब्रा० ५. २. ५. १।

‡ तै० ब्रा० ५. ११. ५। तै० सं० २. २. ५. १—४; ६. १—४।

§ तै०ब्रा० १. १. ३. ८; २. १. ४। "अग्ने रेतो हिरण्यम्" इति शत०ब्रा० ५. २. ५. १।

‖ शत० ब्रा० ५. ३. २ १७।

* शत० ब्रा० १४. ७. ५. ८. (असम्पूर्णः) । छान्दो० उप० ६. २. ३. ४ ।

† शत० ब्रा० १४. ६. २. २२ । ‡ शत० ब्रा० ४. ५. ६. ५ ; ८. १. १. ७ ।

§ 'अद्भ्यो ह वाऽअग्नेऽग्रः सम्बभूव' ५. १. ४. ५ ।

‖ 'आश्विनावधोरामौ' शत० ब्रा० १२. १. ११. ५ ।

¶ सायणाचार्येण तस्य वचनस्य कुम्भशाखीयत्वं सूचितम् । ऋ० सं० भा० १. १. १. १ ।

* तै० सं० १. १. ४. १ ।

† 'अपश्यं गोपा०——०एष वै गोपा य एष तपति, एष हीदं सर्वं गोपायति'—इति शत० ब्रा० १४. १. ४. ९ ।

‡ शत० ब्रा० १०. ४. ७. १; १३. १. ११. १९; १. १. १० । 'अप्सु योनिर्वा अश्वः'—इति च तै० सं० १. ३. १२. २; ५. ३. १२. १ ।

* शत० ब्रा० ५. १९. १०। "अथो अर्द्धो ह वा एष आत्मनो यत् पत्नी"—इति च तै० ब्रा० ३. ३. ३. ५।

† गर्भोपनिषदि, शाकल्योपनिषदि चान्वेष्टव्यम्।

‡ प्राचीनमनुसंहिताया वचनं वैतत् स्यात्।

§ 'स इन्द्रः स एषोऽसपत्नः'—इति शत० ब्रा० १४ ३. ३. १९।

‖ 'वाग् वै बृहती, तस्या एष पतिस्तस्मादु बृहस्पतिः'— इति शत०ब्रा० १४. ३. १. २२।

¶ 'वाग् वै ब्रह्म, तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः'—इति शत०ब्रा०१४. ३. १. २३।

** 'अश्विनौ वै देवाना मध्वर्यू'—इति शत० ब्रा० १२. ४. १. २२।

†† तै० सं० २. ६. ३. ६।

‡‡ 'असौ वा आदित्य एषोऽश्वः'—इति शत० ब्रा० ६. २. ३. २९; ७. ३. ४. १३।

* तै० आ० १. १३ २। शत० ब्रा० ३. १. ३. ३।

† "वैश्वानरो वै सर्वेऽग्नयः"— इति शत० ब्रा० ६ १. ४. ३५। "असौ वा आदित्यो बृहज्ज्योतिः, एष उ एषोऽग्निः"—इति च शत० ब्रा० ६. २. ३. १५। 'असौ वा आदित्य इन्द्रः'—इति च तै० सं० १. ७. ६. ३।

‡ तै० आ० ५. ६. ४। § तै० सं० १. २. ७. १। || तै० सं० २. २. ९. १।

¶ शत० ब्रा० १. ८. ३. १२। ** तै० सं० १. ८. १. १। शत० ब्रा० २. १. ५. २१।

†† 'आग्नेय मग्निष्टोम आलभते। अग्निर्वा अग्निष्टोमः'—इति शत० ब्रा० ५. ५. १. ३. १।

‡‡ 'आग्नेयाः पशवः'—इति तै० सं० १. ५. ९. ३।

* छा० उप० १. १९. १ । † शत० ब्रा० १४. ७. २. १७—१९ ।

‡ शत० ब्रा० ११. २. ६. १३ । § शत० ब्रा० १४. ९. ४. २६ ।

‖ छा० उप० ५ २५. २ । 'आत्मैवाग्निः'—इति च शत० ब्रा० ६. ५. १. २० । 'कतम आत्मेति । योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योतिः सः'—इत्यादि च शत० ब्रा० १४. ६. १. ७—३१ । पुनः—स वा अय मात्मा ब्रह्म०——०आकाशमयो वायुमयस्तेजोमय आपोमयः पृथिवीमयः'—इत्यादिः २. ६—९ ।

¶ तै० सं० २. १. १०. ३, 'सौर्यं' ।

** असौ वा आदित्यः प्राणः'—इति तै० सं० ५. २. ५. ४ ।

†† लिपिकरप्रमादज एष पाठः ; प्रकृतपाठस्तु "मा नो मित्रो वरुणो"—इति ऋ० सं० २. ३. ७. १ । 'मा नो मित्रो वरुणो अर्यमायुरिन्द्रेतत् स्तम्भ मभिगावावपति'—इति च शत० ब्रा० १३. ३. १८ ।

इ.

* 'पवित्रं वाऽआपः"—इति शत० ब्रा० १. १. १. १ ।

† गर्भोपनिषदि शाकल्योपनिषदि चान्विष्यम् । ‡ बृह० उप० ४. ४. ६ ।

* बृहद्दे० ६. १३८, १३९ ।

† शत० ब्रा० ११. १. ५. ५ ।

‡ तै० सं० २. २. ७. २; ४. २. २ ।

§ तै० सं० ३. ४. ७. १—२ ।

* तै० सं० ३. ४. ३. १ । † काठ० सं० ३०. १ ।

‡ 'इन्द्राणीह वा इन्द्रस्य प्रिया पत्नी'—इति शत० ब्रा० १४ १. ५. ८ ।

§ एषोऽपपाठः ; प्रकृतपाठस्तु "उत्सन्नयज्ञः"—इति । तै० सं० ५. ३. १. १ । 'उत्सन्नयज्ञ इव वा यच्चातुर्मास्यानि'—इत्यादि शत० ब्रा० २. ४. ३ ४८ । तथा 'उत्सन्नयज्ञ इव वा एष यदश्वमेधः'—इत्यादि च शत० ब्रा० १३. २. ८. ६ ।

* उच्छन्नयज्ञ इति द्रष्टव्यम्। † शत० ब्रा० १. १. ६. ८। ‡ तै०सं० १. २. १२ २।
§ "तथाचान्यत्राम्नायते—'ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः'—इति"—तै० सं० ४. ३. ११ २. सा० भा०। || तै० सं० २. ६. ११. ५। शत० ब्रा० १. ४. ४ १।

* तै० ब्रा० १. १. ४. ८। † तै० सं० १. ८. ६. १। ‡ अथ० सं० ११. ४. ११।
§ शत० ब्रा० ३. ६. २. ३; ५. १।
|| ऐ० ब्रा० १ १६, २५। शत० ब्रा० १३. ४. १. १५। ¶ ऐ० ब्रा० ६ १. ३।
** तै० सं० १. ८ ६. २। †† शत० ब्रा० १४. १. ४ ९।

* छान्दो० उप० २. २३ ३।

† शत० ब्रा० ३. १. २. ७; ६. ३. १२। तै० सं० १. २. १ १।

‡ 'अथ त्रयो वाव लोकाः। मनुष्यलोकः, पितृलोको देवलोक इति। सोऽयं मनुष्य-लोकः पुत्रेणैव जय्यो नान्येन कर्मणा; कर्मणा पितृलोकः; विद्यया देवलोकः। देवलोको वै लोकानां श्रेष्ठस्तस्मात् विद्यां प्रशंसन्ति'— इति शत० ब्रा० १४. ३. ३. २४।

§ काठ० उप० ४ १. "ऐक्षत्"।

* तैत्ति० ब्रा० १.१.१०। 'को नामासि प्रजापतिः'—इति शत० ब्रा० ११.२.६ १।

---

* ऋ० सं० १०. ९०. १३ । † छान्दो० उप० ५. १०. २ ।
‡ शत० ब्रा० १. ४. २. १४ । तै० सं० २. ५. ९. २ । § तै० सं० १. ६. ३. १ ।
||,¶ शत० ब्रा० १. २. ५. ९ ; ६. ४. ८, ९, १४ ; ३. ७. ४. ९ ।
** 'प्रजापतिर्वै जमदग्निः'—इति शत० ब्रा० १३. १. ११. १४ ।
†† शत० ब्रा० ९. ४. २. ६८ ।

---

* 'पुरस्तात् स्वाहाकृतयो वा अन्ये देवा उपरिष्टात् स्वाहाकृतयोऽन्ये'—इति शत॰ ब्रा॰ ११ २. ५. २ ।

† तै॰ ब्रा॰ २. ५. ११. १ । तै॰ सं॰ २. ६.१०. २ । तै॰ आ॰ १.९. ७ । शत॰ ब्रा॰ १. ७. २. ११ । ‡ तै॰ सं॰ १. २. ७. १ । शत॰ ब्रा॰ ३. २. ६. ८

* य० वाज० सं० ३९. १० ।

† 'तस्मादश्नौ पशवो रमन्ते'—इति शत० ब्रा० ६. २. ४. १२ ।

‡ 'ततोऽश्वः समभवत्'—इति शत० ब्रा० १०. ४. ८. ७. ।

§ शत० ब्रा० १०. ४ ८. ७. । ‖ साङ्ख्या० श्रौ० सू० १८. १९. ९ ।

13

* "तदेष श्लोको भवति। 'अर्वाग्बिलश्चमस०—०ब्रह्मणा संविदानः'—इति'—इति शत० ब्रा० १४. ४. २. ५।

† तै० सं० १ २.५.७; ३. १. ५।

‡ शत० ब्रा० १२. १. १०. ३।

* "त्वष्टा वै सिक्तं रेतो विकरोति"—इति शत० ब्रा० १. ९. २. १०।

† 'आपो वै पुष्करम्०—०अद्भ्यो निरमन्थत्'—इति शत० ब्रा० ६. २. २. २।

‡ शत० ब्रा० ६. २. २. २।

§ बृह० उप० ८ २. १६।

|| शत० ब्रा० १. २. २ १; ४. २. १३; ९. १. १०।

ध.

* शत० ब्रा० ७ ३. १. ५; ६।

† तै० ब्रा० ३. ६. ६ १—४। तैत्तिरीयदृष्टपाठ एव व्याख्यातो दुर्गाचार्येण। स च पाठः सायणीयव्याख्यासहित एव द्रष्टव्यः।

‡ शत० ब्रा० ९. १. ६ ४; ११. १. १० २।

§ 'द्वे स्रुती अशृणवम्'—इति शत० ब्रा० ११. २ ५. २१; १४. ७ १. ४।

न.

* "तस्मादेतदृषिणाभ्यनूक्तम् ।—'न त्वं युयुत्से कतमच्चनाहर्न तेऽमित्रो मघवन् कश्चनास्ति । मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा युयुत्से ।'—इति ॥"—इति शत॰ ब्रा॰ ११. १. ६. १० ।

† ता॰ ब्रा॰ १०. १. १८ । शत॰ ब्रा॰ ८. ४. १. २४ ।

* शत॰ ब्रा॰ ३ १. ३. ६; ११. १. ६. २५ ।

† शत॰ ब्रा॰ ११. १. १०. १ ।

‡ काठ॰ उप॰ ४. १. "पराञ्चि खानि व्यतृणत्" ।

§ शत॰ ब्रा॰ ३. ९. ५. ८ ।

* 'अन्नं वै पितुः'—इति शत० ब्रा० ७ १. २ १५ ।

† 'सोऽस्यां पुरि शेते, तस्मात् पुरुषः'—इति शत० ब्रा १२ ४. ९. १ ।

‡ 'पिता वै प्रयाजाः प्रजा अनुयाजाः'—इति तै० सं० ३. ६. १. ६ ।

§ शत० ब्रा० ११. ४. २ १—४ ।

|| शत० ब्रा० ११. ३. ६. १ ।

¶ तै० सं० ५ ५. १. २ ।

* 'अन्नु वेत्वित्येव प्रयाजानां रूपम्; वसुवने वसुधेयस्येत्यनुयाजानाम्'—इति शत० ब्रा० २. २ १. २७।

† 'आज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानूयाजाः' तै० सं० ६.३.११.७।

‡ शत० ब्रा० ११. २. ३. २७।

§ शत० ब्रा० १४. ४. २. ५; 'गौतमभरद्वाजौ०—०विश्वामित्रजमदग्नी०—०वसिष्ठकश्यपौ०—०अत्रिरिति' ६।

* 'प्राणो दिवः प्राणाद्वा एष प्रथम मजायत'—इति शत० ब्रा० ६. ५. ४. ३। 'प्राणोऽजायत, स इन्द्रः' १४. ३. ३. १९। 'प्राणाद्ध एष उदेति, प्राणेऽस्त मेति' ३४।

† तै० सं० २. २. ९. १। तै० आ० ५. ४. १। शत० ब्रा० ११. ८, ३. १९।

‡ तै० सं० २. १. ८. १।

§ 'असौ वा आदित्यो ब्रह्म'—इति शत० ब्रा० ७ ३. १. १४।

‖ तै० आ० २ ९. १। शत० ब्रा० १३. ४. ३. १।

¶ बृह० उप० ४. ४. १—१४।

* छान्दो० उप० ४. १७. ८।

† शत० ब्रा० ३. १. ३. १. ३। तै० ब्रा० १. १२. ३ ।

‡ 'एष वै मूर्द्धा य एष तपति'—इति शत० ब्रा० १३. २ १४ १२।

§ शत० ब्रा० ३. ४. १. २ ।

य.

---

* शाखान्तरीय एषः (ऋ० सं० सा० भा० भू०)।

† अथ० सं० ७. ७. ८. १।

---

* तै० सं० १. ५. १. १ । 'अग्निर्वै रुद्रो यदरोदीत्तस्माद्रुद्रः' शत० ब्रा० ६. १. ३. १० ।

† 'यदिमांल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वम्'—इति तै० सं० २. ४. १२. २ ।

‡ शत० ब्रा० ११. १. ११. १ । 'अस्मिन्नेव लोकेऽग्निं वायु मन्तरिक्षे दिव्येव सूर्यम्' ।

§ शत० ब्रा० ११. ४. २. ४—७ । ‖ छान्दो० उप० १. ३. २ ।

¶ शाखान्तरीय एषः (ऋ० सं० सा० भा० भू०) ।

** य० वा० सं० ३. ४५ ।

†† अथ० सं० ७. ७. ८. ६ । तै० सं० २. ४ १४ १ । 'पुरुषो वा अचितिः'—इति शत० ब्रा० १४. ३. ३. ७ ।

* शाखान्तरीय एषः (ऋ० सं० सा० भा० भू०)। † श्वेता० उप० ३. ९।

‡ शत० ब्रा० ११. १. ६. २४। § इत्तिकता नापि व्याख्यातम्।

‖ अथ० सं० ६. १२. ४. ३। पर मत्रोह किञ्चिच्छाखाभेदकृतः पाठव्यतिक्रमः।

¶ 'स यो मनुष्याणां राद्धः ०——० स एकः कर्मदेवाना मानन्दा ये कर्मणा देवत्व मभिसम्पद्यन्ते ०——० अत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति'—इति शत० ब्रा० १४. ९. १. ३२—३९।

---

* शत० ब्रा० ३. ७. ३. १२; १२. २. ६. ६. ७।

† 'दध्यङ्ङाथर्वणोऽश्विभ्या मुवाच। तदेतदृषिः पश्यन्नवोचत्। रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते ०——० अय मात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्'—इति शत० ब्रा० १४. ४. ५. १९।

‡ तै० सं० १. ५. ९. १। "त्वष्टा वै सिक्तं रेतो विकरोति" शत० ब्रा० १. ९. २ १०।

व.

* तै० सं० ३. ४ ३. ४ ।
† शत० ब्रा० १. १. ३. २ ।
‡ 'अग्निर्वायुरादित्य एता ह्येव देवता विश्वं ज्योतिः'—इति शत० ब्रा० १०. ४. २. १५ ।
§ 'प्राणेन वा अग्निर्दीप्यते, अग्निना वायुः, वायुना आदित्यः'—इत्यादि शत० ब्रा० १०. ४. ५. ११ ; 'वायुरेवाग्निः'—इति च ३. ४. १ ।
‖ तै० सं० १. ७. ७. २ ।

* शाखान्तरीय एषः (ऋ० सं० सा० भा० भू०)।
† तै० सं० ४. ६. २. ६।
‡ शत० ब्रा० १३. ७. १. १.।
§ तै० सं० ४. ६. २. ३।
|| शत० ब्रा० १४. ७. २. २५।
¶ तै० सं० १. १. ११. १।

---

* 'एष वै बहुलो वैश्वानरः'—इत्यादि शत० ब्रा० १०. ४. ४. ११ ।

† शत० ब्रा० ६ १. ४. ३६ ; ४ ३. २ ५ ; 'वैश्वानरं वा एत मग्निम्' ६ ; 'अथाध्यात्मं शिर एव वैश्वानरः' ३. ९ ; 'अग्नये वैश्वानराय द्वादशकपालम्' ११. १. ५. ५ ।

‡ बृहद्दे० ६. १२९ । § अथ० सं० २०. ८. ६. ९ । || तै० आ० ५. ४. २ ।

¶ 'श्रद्धा वै सूर्यस्य दुहिता'—इति शत० ब्रा० १२ २ ४. ११ ।

** 'अथो परमं वाऽएतदन्नाद्यं यद् वसा'—इति शत० ब्रा० ११. ४. १. ११ । महाभारतटीकाकृन्नीलकण्ठकृत मस्या व्याख्यानमपूर्व मेव । तत्रैव द्रष्टव्यम् ।

* शत० ब्रा० १०. ३. २. १९।
† छान्दो० उप० ६. २. ३।
‡ तै० सं० २. ६. ६. १।
§ शत० ब्रा० ११ १. १०. ४।
|| मुण्ड० उप० ३. १. २।

---

* 'समुद्रात् सर्वे देवाः सर्वाणि भूतानि समुद्द्रवन्ति'-इति शत० ब्रा० १४. २. १. १।

† शत० ब्रा० ६. ५. ४ ३—५।   ‡ शत० ब्रा० ४ १. ६. २०।

§ तै० सं० १ ७.१. २। || काठक० १२. ६। तै० सं० ३. ४. ३. १।

* 'वीर्यं वै सुपर्णः'—इत्यादि शत० ब्रा० ६ ५. २. ६ ।

† ऋ० सं० ८. ८. ४८. ३ ।

‡ शाखान्तरीय एषः (ऋ० सं० सा० भा० भू०) ।

ह.

---

* शत० ब्रा० ३. १. २. ७ । तै० सं० १. २. १. १ ।

† तै० सं० १. ८. १५. २ । शतपथीयं व्याख्यानं च द्रष्टव्यम् ९. ५. २. १२ ।

‡ तै० ब्रा० ३. ६. ८. १ ।

॥ अथ नैरुक्तस्मर्त्तव्यवाक्यसूची ॥

अ.

द.

ध.

न.

प.

य.

श.

* "कः कमनो वा क्रमणो वा सुखो वा"—इति ४ भा० ११२पृ० १०पं०

॥ नैरुक्तविषयसूची ॥

आ.

इ.

ई.

उ.

ध.

न.

प.

ब.

भ.

म.

ह.

॥ निघण्टुटीकोल्लिखितग्रन्थादिनामसूची ॥

॥ अथ निरुक्तालोचनविषयसूची ॥

* अ=१, क=११, ख=२१ इत्येवमङ्कप्रतिनिधिव्यवहारो दक्षिणामूर्तिरीत्येह।

८.

६.

१०.

११.

१२.

॥ अथैतद्भागीयसूचीनां सूची ॥

॥ मूल-पाठशुद्धिः ॥

अ०	पा०	ख०	पं०	अशुद्धम् ।	शुद्धम् ।
९	१	६	१	अंतचारिणः	अंतचारिणः
,,	,,	१०	४	०नत्पान्वा	०नत्वान्वा
,,	४	२	३	०विह्रियते	०विह्रियेते
,,	,,	४	३	विपाट्च्छुतुद्र्यौ	विपाट्छुतुद्र्यौ
,,	,,	५	८	?	वा
,,	,,	१०	५	सहग्धिद्य	सहजग्धिद्य
१०	१	५	६	सप्तास्वसार	सप्तस्वसार
,,	,,	,,	१०	रादयतेर्वा	रोदयतेर्वा
,,	,,	९	८	अवाहन्नेनं	अवहन्नेनं
,,	,,	१२	३	पयपश्यन्	पर्यपश्यन्
,,	२	२	२	पोषयित्वश	पोषयित्वा
,,	३	५	४	मनुष्यजातात्ति	मनुष्यजातानि
११	३	१०	३	सुकथ्यम्	सुकथ्यम्
१२	२	७	५	कर्मकमं	कर्मकर्म
,,	३	२	३	०रयन-	०रयने-
,,	,,	१४	५	स्तृता	स्तुता
,,	४	२	३	घृतस्तूघृत०	घृतस्तूर्घृत०
,,	,,	१२	२	ऋतुञ्जनीनाम्	ऋतुर्जनीनाम्
१३	१	६	२	सव	सर्वं

अ०	पा०	ख०	पं०	अशुद्धम्।	शुद्धम्।
१२	१	९	१	वाक् परिमिता	वाक्परिमिता
,,	२	६	२	संच्यवत	सञ्च्यवत
,,	,,	,,	२३	अवाङ्मुख	अवाङ्मुखः
,,	,,	१२	६	सूयः	सूर्यः
,,	,,	१३	२	मागाणाम्	मृगाणाम्
,,	४	३	१	०राक्ति ते०	०रौक्ति ते०
,,	,,	४	८	सवा	सर्वा
,,	,,	७	२	वर्ध्दनान् मृत्यो०	वर्ध्दनान्मृत्यो०
,,	,,	९	२	उपमिमीहि	उपमिमौहि
,,	,,	,,	७	वयञ्ज्ञानानाम०	वयञ्ज्ञाना नाम०

॥ मूल-पाठभेदपूर्त्तिः ॥

अ०	पा०	ख०	पं०	मुद्रितातिरिक्ताः पाठाः।
१०	१	८	१०	"इक्ष्वाकूणां"—इति च-प्रभृतिषु।
,,	२	१०	३	"हिरण्यगर्भो हिरण्मयो गर्भो हिरण्मयो गर्भोऽस्येति वा"—इति च-प्रभृतिषु।
१२	४	९	४	"गमयन्त रमयन्त शुभ्राः"—इति च-प्रभृतिषु परं वृत्तिविरुद्धः।
१३	२	२	६	"मभ्यात्मज"—इति च-प्रभृतिषु।

अथ निरुक्तालोचनम् ।

"साक्षात्कृतधर्म्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान्सम्प्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च" (१ भा० ११७ पृ०)

अथेद मालोचयामः ।—कि मिदं निरुक्तम् ? तस्यैतस्य वेदाङ्गत्व मस्ति नास्ति वा ? तन्मूलस्य कः प्रणेता, को वा तस्य ? कश्चासौ यास्कः ? तस्य ऋषित्व मस्ति नास्ति वा ? कियांश्चायं ग्रन्थो यास्कीयः ? कश्च कालो यास्कस्य ? कैमर्थिकी तस्यैषा प्रवृत्तिः ? कोऽसौ वेदः ? वेदकालनिर्णयः शक्यो ऽशक्यो वास्माकम् ? के विषयाश्चैतन्निरुक्तप्रतिपाद्याः ? तट्टीकाकृतोर्देवराजदुर्गाचार्ययोश्च कौ जीवितसमयाविति द्वादश ।

(१)

तत्रादौ पुरैकदास्माभिर्विचारित मपि पुनरिद मेव विचार्यते किञ्चिद्विशेषप्रतिपत्तये कि मिदं निरुक्त मिति । ऋग्भाष्यभूमिकायां सायणस्त्वेव माह—"अतिगम्भीरस्य वेदस्यार्थ मवबोधयितुं शिक्षादीनि षड्ङ्गानि प्रवृत्तानि । अत एव तेषा मपरविद्यारूपत्वं मुण्डकोपनिषद्याथर्वणिका आमनन्ति—'द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिष मिति ; अथ परा यया तदक्षर मधिगम्यते'—इति । साधनभूतधर्मज्ञानहेतुत्वात् षड्ङ्गसहितानां

कर्मकाण्डाना मपरविद्यात्वम्; परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वात् उपनिषदां परविद्यात्वम् ।

(१) वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा । तथाच तैत्तिरीया उपनिषदारम्भे समामनन्ति—'शिक्षां व्याख्यास्यामः । वर्णः स्वरः मात्रा बलं साम सन्तान इत्युक्तः शिक्षाध्यायः'—इति । * * * । तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः ।

(२) कल्पस्त्वाश्वलायनापस्तम्बबोधायनादिसूत्रम् । कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः । * * * । अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठान मुपदिश्योपकरोति । * * * । तस्मात् शिक्षेव कल्पोऽप्यपेक्षितः ।

(३) व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते । * * * । तस्मादियं वाक् इदानी मपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यत इत्यर्थः । * * * ।

(४क) अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् । 'गौः ग्मा ज्मा क्ष्मा क्षा क्षमा'—इत्यारभ्य 'वसवः वाजिनः देवपत्न्यो देवपत्न्यः'—इत्यन्तो यः पदानां समाम्नायः समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते; एतावन्ति पृथिवीनामानि, एतावन्ति हिरण्यनामानीत्येवं तत्र तत्र विस्पष्ट मभिहितत्वात् । तदेतन्निरुक्तं त्रिकाण्डम् । * * * । पञ्चाध्यायरूपे काण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षितया पदार्थस्योक्तत्वात् तस्य ग्रन्थस्य निरुक्तत्वम् ।

(४ख) तद्व्याख्यानञ्च 'समाम्नायः समाम्नातः'—इत्यारभ्य 'तस्यास्तस्याः ताद्भाव्य मनुभवत्यनुभवति'—इत्यन्तैर्द्वादशभिरध्यायैर्यास्को निर्ममे, तदपि निरुक्त मुच्यते; एकैकस्य पदस्य सम्भाविता अवयवार्थास्तत्र निःशेषेणोच्यन्त इति व्युत्पत्तेः । * * * । तस्माद् वेदार्थावबोधायोपयुक्तं निरुक्तम् ।

(५) तथा छन्दोग्रन्थोऽप्युपयुज्यते, छन्दोविशेषाणां तत्र तत्र विहितत्वात् । * * * । 'यो ह वा ०—० तस्मादेतानि मन्त्रे मन्त्रे विद्यात्'—इति श्रूयते । तस्मात्तावद्वेदनाय छन्दो ग्रन्थ उपयुज्यते ।

(६) ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रन्थे विहितम्—'यज्ञकालार्थसिद्धये'—इति। कालविशेषविषयश्च श्रूयन्ते—***। अतः कालविशेषान् अवगमयितुं ज्योतिष मुपयुज्यते।

एतेषां वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षाया मेव मुदीरितम्—'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषा मयनं चक्षुर्निरुक्तं श्रोत्र मुच्यते। शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्ग मधीत्यैव ब्रह्मलोके महीयते'—इति"—इति।

तदित्थं सर्ववेदभाष्यकारस्य सायणाचार्यस्य नये—द्वे निरुक्ते; मूलं पञ्चाध्यायी, तद्व्याख्यानञ्च द्वादशाध्यायीति; तथा निरुक्तशब्दव्युत्पत्तिप्रकारश्च द्विविध एव; 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'—इति, 'एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेणोच्यन्ते तन्निरुक्तम्'—इति च। तथैव मुण्डकोपनिषदादौ यच्छ्रूयते निरुक्तमिति पदम्, सायणमते तदुभयोरेव बोधकम्; शिक्षावचनतोऽपि यद् ज्ञायते निरुक्तस्य वेदश्रोत्रत्वम्, तन्मते तदप्युभयविषयस्यैव। ततश्चास्य नये द्वयोरेव वेदाङ्गत्वं समम्; द्वयोरेव निरुक्त मित्येकनाम्ना बोधाच्च अङ्गानां षट्सङ्ख्यात्व मप्यवितथ मेवेति। एतत्फलितार्थमात्र मवलम्ब्यैव कार्यारम्भकाले ऽस्माभिः किञ्चिल्लिखितञ्च, पर मिदानीं तदेव परीक्षितु मेवैष प्रबन्धो ऽवतार्यते।—

श्रूयते ह्येवं छान्दोग्योपनिषदि—"स वा एष आत्मा हृदि, तस्य तदेव निरुक्तᳪ हृद्यय मिति तस्माद्धृदयम् (८. ३. ३.)"—इति। तदेतत् हृदयनिर्वचनं क्वास्ति निघण्टौ, यास्कीये वा? न क्वापि। निघण्टौ तु तादृशनिर्वचनदर्शनस्य सम्भावनैव नास्ति; यास्कीये निघण्टुभाष्यरूपे निरुक्तग्रन्थे ऽपि हृदयशब्दनिर्वचनावसरस्तु बहुत्र विद्यते (४ भा० ५२, १४०, ३६०, ३७५, ४०७ पृ०), परं न क्वापि तन्निर्वचनं कृत मस्ति। ततश्चेमे सुव्यक्ते—नेदं यास्कीयं निरुक्तं प्रादुरभूत् छान्दोग्योपनिषदः पुरस्तात्, 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'

—इति सायणीय माद्यं निरुक्तलक्षणं च नाभिमतं छान्दोग्योपनिषत्प्रवक्तुरिति ।

श्रूयते चैवं गोपथब्राह्मणे—"ओङ्कारं पृच्छामः *** किन्निरुक्तम् ? *** आपेरोङ्कारः सर्वं माप्नोतीत्यर्थः (१. १. २४—३०.)"—इत्यादि । तदेतदोङ्कारनिर्वचनं निघण्टौ, यास्कीये वा क्वास्ति ? एतत्प्रश्नस्योत्तरं चेद मेव वक्तव्यं न क्वापीति । निघण्टौ तु तादृशनिर्वचनदर्शनस्य सम्भावनैव नास्ति; निघण्टुभाष्यात्मके यास्कीये निरुक्तेऽपि ॐशब्दनिर्वचनावसरस्तु विद्यते (४ भा० ३५२ पृ०) परं न च तत्र तन्निर्वचनं कृत मस्ति । तथाच अत्रापीद मेव द्वयं सुव्यक्तम्—नेदं यास्कीयं निरुक्त माविरभूत् गोपथब्राह्मणतः पुरस्तात्, न च 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्' —इति सायणीय माद्यं निरुक्तलक्षण मभिमतं गोपथब्राह्मणप्रवक्तुरिति ।

ऋक्प्रातिशाख्यद्वितीयवृत्तिकारः खलु देवमित्रपुत्त्रो विष्णुमित्त्रोऽप्येव माह—"निरुक्तं पदविभागमन्त्रार्थदेवतानिरूपणार्थं शास्त्रम् (१ पृ०)" —इति । अतो ज्ञायते तस्यापि सायणीय मन्त्यं निरुक्तलक्षण मेव सम्मत मिति; आद्यलक्षणलक्षिते निघण्टुसमाम्नाये मन्त्रार्थप्रभृतिनिरूपणोपायस्यादर्शनादिति ।

मनुसंहिताया अन्यतमटीकाकारस्य कुल्लूकभट्टस्य मतेऽपि निर्वचनमूलक एव निरुक्तशब्दप्रयोग उपलभ्यते । तथाहि—"श्राद्धभुग् वृषलीतल्पम् (३, २५०)"—इति मानवीयश्लोकस्य व्याख्यानावसरे एतदुक्तं तेन "वृषलीशब्दोऽत्र स्त्रीपर इत्याहुः । निरुक्तञ्च कुर्वन्ति— वृषस्यन्ती चपलयति भर्त्तार मिति वृषली । ब्राह्मणस्य परिणीता ब्राह्मण्यपि वृषलीति"—इति । नैतद् यास्कीयं वचन मिहोद्धृतं कुल्लूकेन, नापि मानवीयम् (८. १६.); अपि तु केषाञ्चिदपरटीकाकारादीनां मत मेव मित्येव प्रदर्शितम् । यास्कस्तु—"वृषलो वृषशीलो भवति वृषाशीलो वा (२भा० ३२१ पृ०)" —इत्येव मिरवोचत् । अत्र त्वेतदेव समालोच्यं यदनतिप्राचीनस्य पण्डितस्य कुल्लूकस्यापि प्रयोगे निरुक्तं न निघण्टुपर मिति । एव मपरत्रापि

तत्रैव। तथाहि—"मां स भक्षयितामुत्र यस्य मांस मिहाद्म्यहम्। एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः (५. ५५.)"—इति मानवीयवचनव्याख्यानावसरे ह्युक्तं तेनैव कुल्लूकभट्टेन—"एतत् मांसशब्दस्य निरुक्तं पण्डिताः प्रवदन्ति। इति मांसशब्दस्य निर्वचन मवैधमांसभक्षणपापफलकथनार्थम्"—इति। इहापि कुल्लूकभट्टमते ऽपि निर्वचनपर मेव निरुक्तम्, न तु निघण्टुपाठपर मित्येव प्रदर्शन मस्माक मिष्टम्। प्रदर्शितनिर्वचनन्तु न यास्ककृतम्; अपि मनुसंहिताकारकालिकैः कैश्चिद्विद्भिरनुमोदितं तत्संहिताकृतैव कृतम्। यास्कस्तु मनुसंहिताकृतो ऽपि बहुप्राचीनः, तत्काले तु मांसशब्दस्य निर्वचन मन्यथैव प्रचलित मासीदित्यन्यदेतत्। तथाहि—"मांसं माननं वा मानसं वा मनोऽस्मिन् सीदतीति वा (२भा० ३७८ पृ०)"—इति यास्कीयं निरुक्तम्। "एतद्वै परम मन्नाद्यं यन्मांसम्"—इति च शतपथीया श्रुतिर्यास्कीयस्य तन्निर्वचनस्य साधिका भवितु मर्हति चेति कथान्तरम्। प्रकृते तु कुल्लूकस्यापि सायणीयं द्वितीयनिरुक्तलक्षण मेवाभिमतम्; न त्वाद्यलक्षणं निघण्टुपर मित्येवेहास्माभिरित्थं प्रदर्शितम्।

आख्यायते महाभारते चादिपर्वणि—"महत्त्वाद् भारतत्वाच्च महाभारत मुच्यते। निरुक्त मस्य यो वेद सर्वपापैः स मुच्यते (१. १. २७०.)"—इति। एवञ्चेद मेव प्रतीयते— सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतं महाभारतकारस्यापि; न त्वाद्यम्। तत्र मोक्षधर्मेऽपि—"अर्जुन उवाच। भगवन् भूतभव्येश सर्वभूतसृगव्यय। लोकधाम जगन्नाथ लोकाना मभयप्रद। यानि नामानि ते देव कीर्त्तितानि महर्षिभिः। वेदेषु सपुराणेषु यानि गुह्यानि कर्मभिः। तेषां निरुक्तं त्वत्तोऽहं श्रोतु मिच्छामि केशव। न ह्यन्यो वर्णयेन्नाम्नां निरुक्तं त्वा मृते प्रभो!। श्रीभगवानुवाच। * * *। गौणानि तत्र नामानि कर्मजानि च कानि चित्। निरुक्तं कर्मजानां त्वं शृणुष्व प्रयतोऽनघ!। * * *। नराणा मयनं ख्यात मह मेकः सनातनः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं

मम तत् पूर्वं मतो नारायणो ह्यहम्। * * *। नामानि चैव गुह्यानि निरुक्तानि च भारत!। ऋषिभिः कथितानीह यानि सङ्कीर्त्तितानि ते (३४१,३४२ अ० १—५६, १—१३६ श्लो०)"—इति। एव मपीद मेव प्रतीयते—सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतं मोक्षधर्म्मलेख-कालेऽपि; न त्वाद्यम्। तत्रैव निघण्टुनाम चाख्यातं दृश्यते, परं न तन्निरुक्तपर मपि तु पदपाठात्मकग्रन्थविशेषपर मेव। तथाहि—"निघण्टुक-पदाख्याने विद्धि मां वृष मुत्तमम्। कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते। तस्माद् वृषाकपिं प्राह काश्यपो मां प्रजापतिः (३४२ अ० ८६, ८७. श्लो०)"—इति। पठितश्चाच निघण्टौ "वृषाकपिः"—इति (४६३ पृ०)। तदेवं निघण्टोर्निरुक्तत्वं नेष्टं महाभारतकारस्येत्यपि सुवचम्।

यास्कीयेऽत्र निरुक्ते च निरुक्तस्योल्लेखो बहुत्रैवोद्घोषितः, परं न तत्र क्वापि निघण्टोर्ग्रहणं विवक्षितम्। तथाहि—"इतीमानि चत्वारि पदजातान्यनुक्रान्तानि—नामाख्याते चोपसर्गनिपाताश्च। तत्र नामा-ख्यातजानीति शाकटायनो नैरुक्तसमयश्च (२ भा० ८३पृ०)"—इत्येव मा-दीनि द्रष्टव्यानि। निघण्टोस्तु निघण्टुनाम्नैव व्यपदेश आदृतः; न क्वापि निरुक्तत्वेन। तथाहि ग्रन्थारम्भे एव—"निगमनान्निघण्टव उच्यन्ते (२ भा० ७पृ०)"—इति। ग्रन्थभूमिकायां (२भा० १३७पृ०) निघण्टोः स्वरूपं पारि-भाषिकलक्षणं च प्रदर्शितम्, तदप्यत्र समालोचनीय मेव। तथाहि—"एतावन्तः समानकर्माणो धातवः, * * *, एतावन्त्यस्य सत्वस्य नामधेयानि, एतावता मर्थाना मिद मभिधानं नैघण्टुक मिदं देवताना मप्राधान्येनेद मिति; तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत्"—इत्यादि। किञ्चात्र द्वितीयाध्यायारम्भे यन्निरुक्तशास्त्रप्रयोजनं वर्णितम् (२भा० १४७—१७४ पृ०), तदपि निघण्टुपाठादेव न सम्भवति। अतः सायणीये द्वितीय-निरुक्तलक्षणे एव भगवतो यास्कस्यापि सम्मतिर्ज्ञायते; न त्वाद्ये।

भगवता कात्यायनेनाप्युक्तम् भाष्यागामश्लोकग्रन्थे—"बाहुलकं प्रकृते-स्तनुदृष्टेर्नैगमरूढिभवं हि सुसाधु। नाम च धातुज माह निरुक्ते व्याक-

रणे शकटस्य च तोकम्"—इति। एतच्छ्लोकपर्य्यालोचनेन च बुध्यते सायणीयं द्वितीयं निरुक्तलक्षण मेव भगवतः कात्यायनस्यापि सम्मतम्; न त्वाद्यं लक्षण मिति;—द्वितीयलक्षणलक्षिते यास्कीये (१भा०८३ पृ०) एव ग्रन्थे तथोक्तदर्शनादिति।

तस्यैव श्लोकस्य व्याख्यानावसरे भगवान् पतञ्जलिराह—"नाम खल्वपि धातुज मेव माहुर्नैरुक्ताः (३अ० २पा० ३आ०)"—इत्यादि। ततश्चावगम्यते तस्य भगवतोऽप्यभिमतं सायणीयं द्वितीयनिरुक्तलक्षण मेव; न त्वाद्यम्;—आद्यलक्षणलक्षितेऽखिलनिघण्टौ तथादर्शनादिति।

"सञ्ज्ञाया मनाचितादीनाम् (पा० ६. २. १४६.)"—इति सूत्रीये चाचितादिगणे निरुक्तशब्दपाठदर्शनाच्चावगम्यते गणपाठकृतोऽपि सायणीयान्त्यलक्षणे एव सम्मतिः; अन्यथा हि निघण्टोर्निरुक्तसञ्ज्ञया प्रसिद्ध्यभावादेव सिद्धे कृतं तत्र निरुक्तशब्दपाठेनेति।

अस्ति चेयं हरिकारिका—"वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"—इति। तदित्थं भगवता खलु माङ्गलिकेनाचार्य्येण पाणिनिना "पृषोदरादीनि यथोपदिष्टम् (६. ३. १०९.)"—इति सूत्रेण यत्सर्वं सङ्क्षेपेण विहितम्, तदपि निरुक्ते विशदीकृत्य प्रदर्शित मिति फलितम्। तथा चोक्तं तत्र महाभाष्ये—"पृषोदरादीनीत्युच्यते, कानि पृषोदरादीनि? पृषोदरप्रकाराणि। कानि पुनः पृषोदरप्रकाराणि? येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते (६अ० ३पा० ३आ०)"—इति। लोपागमवर्णविकारादयश्च बोधिता एव विशेषेण यास्कीयेऽत्र निरुक्ते; द्वितीयाध्यायारम्भे तु "अथ निर्वचनम्"—इत्यादीनि, "एकपदानि निर्ब्रूयात्"—इत्यन्तानि (२भा० १३७—१६० पृ० १६पं०) ग्रन्थसारभूतानि तथाविधानि बोधनानि स्वय मुक्तानि च। तथा चेद मवश्यं वक्तुं शक्यते यत् श्रीमतो भर्तृहरेरपि सायणीयं द्वितीयं निरुक्तलक्षण मेवाभिमतम्; न त्वाद्यम्;—आद्यलक्षणलक्षिते हि निघण्टौ लोपागमादीनां बोधनादर्शनादिति।

निघण्टुनिर्वचनकारस्य देवराजयज्वनोऽपि सायणीये द्वितीयनिरुक्तलक्षणे एवाभिमतिः प्रतीयते । तथाहि तत्र भूमिकाया मेव—“निरुक्तविद्या-निगमप्रतिष्ठाम् अवाप यास्कः”—इति, “प्रणमामि यास्कभास्करं यो हृत्तमसः प्रकाशितपदार्थः”—इति, “भगवता यास्केन ०—० निरुक्तानि” —इति, “तत्र प्रदर्श्य कतिचिदेव निरुक्तानि”—इति, “स्कन्दस्वामी च तत एव निरुक्त मनुजगाम”—इति, “भाष्यकारेण (यास्केन) बहुवक्तव्य-त्वात् प्रकरणश एव निरुक्तानि”—इति, “अतोऽन्येषां यथाक्रमेणानि-रुक्ते”—इति, “पदानां (निघण्टुस्थितानाम्) भाष्यकारेण (यास्केन) निरु-क्तानाम्”—इति, “भाष्यकारेणैव ०—० निरुक्तानि”—इति, “निर्वचनञ्च निरुक्तं ०—० निरीक्ष्य क्रियते”—इति, “स्कन्दस्वामिकृतां निरुक्तटीकाम्”—इति, “निरुक्तकारोक्तनिर्वचनसामान्यलक्षणं मनुसृत्य निरुक्तिः क्रियते”—इति द्वादशवारं प्रयुक्तं निरुक्तपदम् ; परं नैकत्रापि सायणीयाद्यलक्षणा-लक्षितस्य निघण्टोर्बोध उपयुज्यते । ग्रन्थमध्येऽपि बहुत्रैव निरुक्तस्यो-ल्लेखः कृतः । तथाहि—“तथाच निरुक्तम्—योनिरन्तरिक्षं महानवयवः परिवीतो वायुना (१ भा० २६पृ०)”—इति । दृश्यते चैतत् यास्कीये एव निरुक्तद्वितीयाध्यायीयद्वितीयपादतुर्यखण्डे ; न तु निघण्टौ । यत्र यत्र तु निघण्टोर्बोधन मेवाभीप्सितम्, तत्र सर्वत्रैव निघण्टुरिति समाम्नाय इति च प्रयुक्तम् । तथाहि तत्रैव भूमिकायाम्—“समाम्नायं ०—० निर्ब्रुवता” —इति, “तेन च समाम्नायपठितानां पदाना मन्येभ्यः (प्रसङ्गान्निरुक्तेभ्यः) व्यावृत्त्यर्थं किञ्चिच्चिह्नं कृतम्”—इति, “क्षीरस्वाम्यनन्ताचार्यादिकृतां नि-घण्टुव्याख्याम्”—इति च ; एव मन्यत्राप्यूह्य मिति ।

निरुक्तवृत्तिकारस्य श्रीमद्दुर्गाचार्यस्यापि सायणीयं द्वितीयनिरुक्तलक्षण मेवाभिमतम् ; न त्वाद्यम् । तथाहि तदीयमङ्गलाचरणे एव दृश्यते—“पञ्चाध्यायी-निघण्टोश्च निरुक्त मुपरिस्थितम्”—इति । एवञ्च तन्मते खलु पञ्चाध्यायात्मग्रन्थस्य कस्य चित् निघण्टुरिति नाम, तद्व्याख्यानग्रन्थस्य च निरुक्त मिति स्फुटम् । ततश्च भूमिकाया मपि अङ्गग्रन्थप्रयोजनकथना-

वसरे—"अतः * * * निरुक्तं नामेद मङ्ग मारभ्यते। ०—०। अथास्यैव मखिलपुरुषार्थोपकारवृत्तिसमर्थस्य सङ्ग्रहः। तद्यथा— नामाख्यातोपसर्गनिपातलक्षणम्, ०—० इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः"—इत्युक्त मस्ति। एतस्माच्च ज्ञायते यास्ककृतभाष्यरूपस्यैव ग्रन्थस्य निरुक्तत्वं तत्सम्मतम्; न हि पञ्चध्यायीरूपस्य निघण्टुनामग्रन्थस्य नामाख्यातोपसर्गनिपातलक्षणादयश्चिन्ताविषया दृश्यन्ते। स्पष्टश्चोक्तं तत्तदनुपद मेव—"तस्य (यास्कीयनिरुक्तस्य) एषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसङ्ग्रहः (२भा० ६पृ० १५—२० पं०)"—इत्यादि।

मधुसूदनसरस्वतीकृते प्रस्थानभेदनामग्रन्थे प्रथमन्तूक्तम्—"एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे ज्ञाते वैदिकमन्त्रपदाना मर्थज्ञानाकाङ्क्षायां तदर्थं भगवता यास्केन 'समाम्नायः समाम्नातः स व्याख्यातव्यः'—इत्यादि त्रयोदशाध्यायात्मकं निरुक्त मारचितम्'—इत्यादि। तथा च तस्यापि सायणीये द्वितीयनिरुक्तलक्षण एव सम्मतिर्बुध्यते; न त्वाद्यलक्षणे। तत उत्तरम् "एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव"—इत्युक्तम्। तदेतन्निघण्टोर्वेदाङ्गत्वसाधनायैवानन्यगत्योक्तम्; न तु तत्स्वप्रमासिद्ध मिति।

व्यवहारतस्तु ज्ञायते सायणीयं द्वितीयं निरुक्तलक्षण मेव सङ्गतम्; न त्वाद्य मिति। तथाहि—बहूनां निघण्टुपुस्तकाना मादौ 'निघण्टुः प्रारभ्यः' इति, सर्वेषां मध्ये च 'निघण्टौ प्रथमाध्यायः' इत्यादि, अन्तेऽपि 'निघण्टुः समाप्तः'—इत्येवमादय एव प्रयोगा लिखिता दृश्यन्ते; न क्वचिदपि निघण्टुपुस्तके निरुक्तशब्दोल्लेखो दृष्टः केनचिदद्यापि। एवं निघण्टुनिर्वचनग्रन्थे च 'निघण्टुनिर्वचन मारब्धम्' इति, 'निघण्टुनिर्वचने प्रथमोऽध्यायः' इत्यादि, 'निघण्टुनिर्वचनं समाप्तम्' इत्येवमादय एव प्रयोगा लिखिता दृश्यन्ते; न क्वचिदपि निघण्टुनिर्वचनपुस्तके 'निरुक्तनिर्वचन मारब्धम्'—इत्येवमादयः प्रयोगा लिखिता दृष्टाः केनचिदद्यापि।

ननु निरुक्तवृत्तिकृता भगवद्दुर्गाचार्येण तु निरुक्तप्रथमाध्यायीयप्रथम-

पादव्याख्यानान्ते "इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ निरुक्तव्याख्यायां षष्ठस्याध्यायस्य प्रथमः पादः"—इति यास्कीयप्रथमाध्यायस्यैव निरुक्तषष्ठाध्यायत्वं बोधितम्; एव मुत्तरत्रापि; ग्रन्थान्ते च "इति सपादसप्तदशाध्यायी ऋज्वर्था नाम निरुक्तवृत्तिः समाप्ता"—इति यास्कीयसपादद्वादशाध्याय्या एव सपादसप्तदशाध्यायीत्वं ज्ञापितम्। ततश्च तन्मते निघण्टुनिरुक्तयोरैकात्म्य मेव प्रतीयते। तथासत्युपपन्न मेव निघण्टोश्च निरुक्तत्व मिति तन्मते सायणीय माद्यं निरुक्तलक्षण मपि सुसङ्गतम् ?—इति चेन्न; उपक्रमोपसंहारविरोधप्रसङ्गात्। उक्तं ह्युपक्रमे "पञ्चाध्यायीनिघण्टोश्च निरुक्त मुपरि स्थितम्"—इति, "अथच तस्या द्वादशाध्यायी भाष्यविस्तरः (१भा० ८ पृ०)"—इति च; एवञ्च निघण्टोः पञ्चाध्यायीत्वम्, तद्भाष्यात्मकस्य निरुक्तस्य द्वादशाध्यायीत्वं सुतरां तयोः पार्थक्यञ्चोररीकृत मेव; प्रतिपादीयवस्तूपसंहरणे ग्रन्थोपसंहरणकाले च उभयोरैकात्म्यमूलकं निरुक्तस्यैव सपादसप्तदशाध्यायीत्वं स्वीकृत मिति स्वीकारे तु उपक्रमोपसंहारयोर्विरोधोऽपरिहार्य एव प्रसज्येत। अतस्तद्विरोधप्रसक्तिभिया इद मेवावधारित मस्माभिः,—सूत्रभाष्यरूपयोः निघण्टुनिरुक्तयोः उभयोरेव वृत्तौ कृते दुर्गाचार्येण; तत्र सूत्रात्मकस्य निघण्टोरेव प्राधान्यात् प्रथमं स एव व्याख्यातः, तत उत्तरश्च निरुक्तग्रन्थः; निरुक्तावबोधे च क्वचित् क्वचित् निघण्ट्वपेक्षा विद्यत एवेत्यनयोः पूर्वापरीभावेनैकत्र संस्था मस्य तस्य वृत्तिकृतोऽभीप्सित मिति उभयवृत्त्योरेवैकात्म्यं मत्वा सपादसप्तदशाध्यायीत्वं व्यपदिष्ट मिति भवतु नाम तदीयवृत्तिग्रन्थस्य सपाद सप्तदशाध्यायीत्वं तेन किं निरुक्तस्येति।

तथापि "निरुक्तव्याख्यायां षष्ठस्याध यायस्य"—इत्याद्युक्तयः कथ मुपपद्येयुः ?—इति चेदत्र ब्रूमः,—यथा च महाभारतादौ तथैवात्रापीत्येवं व्यवहारो न भ्रमहेतुरिति। तथाहि महाभारते आदिपर्वण्येव—"पौलोमपर्वणि एकादशोऽध्यायः" इति। न तत्र पौलोमस्यैव पर्वणः एकादशोऽध्यायो गत इति बुध्यते; अपि तु तत्रैकाध्यायात्मक मनुक्रमणिका-

पर्व, तत एकाध्यायात्मकं पर्वसङ्ग्रहपर्व, तत एकाध्यायात्मकं पौष्यपर्व, ततोऽष्टाध्यात्मकं पौलोमपर्व, तत्सङ्कलनयैवैकादशत्वं सम्पद्यते। एव मुत्तरत्रापि तत्रान्यत्र च सर्वत्रैव। एव मिहापि निरुक्तवृत्तिग्रन्थस्य निघण्टुव्याख्याने पञ्चमाध्यायेऽतीते निरुक्तप्रथमाध्याय एव षष्ठत्वेन व्यपदिष्ट इति नैव शङ्कप्रसङ्ग इति। दृष्ट मेव मन्यत्रापि—अस्ति मगधादिषु सुप्रचलित मेकं व्याकरणम्, तस्य एकार्द्धस्य सारस्वत मिति नाम, अपरार्द्धस्य तु चन्द्रिकेति। नेमौ भागौ एककालिकौ एककर्तृकौ वा सुतरां विभिन्नग्रन्थावित्येव प्रसिद्धौ ; परं तट्टीकाकृद्भिर्भट्टमाधवप्रभृतिभिः सारस्वतस्य व्याकरणपूर्वार्द्धत्वं चन्द्रिकाया व्याकरणपरार्द्धत्वं च व्यवस्थाप्य उभयोरेवैका टीका सिद्धान्तरत्नावल्यादिका प्रणीता ; परं न हि तट्टीकया सारस्वतचन्द्रिकयोरैकात्म्यं सम्पन्नम्,—सारस्वतस्तु सारस्वत इत्येव, चन्द्रिका च चन्द्रिकेत्येवाद्यापि व्यपदिश्यते लोके ; पर मुभयोर्यथाक्रतपूर्वापरीभावतोऽधिगमनेनैव भवेद् व्याकरणबोध इत्येव बोधितम्। एव मत्रापि उभयग्रन्थैरैकात्म्यतया न हि निघण्टुनिरुक्तयोरैकात्म्यतासम्भवो न च तदिष्टं दुर्गाचार्यस्य ; परं वृत्तिबोधितपूर्वापरीभावतोऽधिगमनेनैव भवेद् वेदपदार्थबोध इत्येव बोधित मिति।

तदेवं निरुक्तवृत्तिकारस्यापि सायणीये द्वितीयनिरुक्तलक्षणे एवाभिमतिर्नाद्ये इति यदुपन्यस्तं पुरस्तादिह, तत्समीचीन मेवेति वृत्तिकृतो व्यवहारः खलु सायणीयाद्यलक्षणखण्डनेऽननुकूल इति च नाग्रहम्। तद्वृत्तावेव हि पञ्चाध्यायी निघण्टुरित्येव लोकव्यवहार इति च स्पष्ट मेव स्वीकृतम्। तथाहि—"त एते गवादयो देवपत्न्यन्ता निघण्टवः, तदेकदेशो नैघण्टुकं प्रकरण मिति निघण्टु सञ्ज्ञया व्यवहारो लोके ;—निघण्टु मधीमहे निघण्टु मध्यामहे इति (श्भा० १४३ पृ०)"—इति। एवञ्च लोकव्यवहारादपि सम्यक् ज्ञायते निघण्टुर्निघण्टुरेव निरुक्त मेव निरुक्त मिति।

सिद्ध मित्थं प्राचीनतमानां प्राचीनाना मनतिप्राचीनाना माधुनिकानाञ्च

सर्वेषा मेवार्यग्रन्थकाराणाम्, ग्रन्थसमालोचकानां व्यवहारविदां च सर्वेषा मभिमतं सायणीयं द्वितीयं निरुक्तलक्षण मेव ; तदाद्यलक्षणन्तु सर्वथानभिमत मिति। तथाच "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"—इति सायणस्वकपोलकल्पितं लक्षणं निर्मूल मेवेति निघण्टुभाष्यात्मकस्यास्य यास्कीयस्यैकस्यैव निरुक्तत्वं सर्वसम्मतम् ; निघण्टोस्तु निघण्टुत्व मेव। अथैव मपि निघण्टुग्रन्थस्य निरुक्तमूलसूत्रात्मकत्वात् निरुक्तसम्पादनात् पुरैवैकत्र चात्र सम्पादन मस्मत्कृतं न दोषायेत्याशास्महे वय मिति शम्।

---

(२)

अथैतर्हि विचार्यते,— निघण्टु निरुक्तयोरुभयोरेव वेदाङ्गत्व मुतान्यतमस्य ? अन्यतमस्यैवेति चेत्, कस्य ? इति। वेदाङ्गग्रन्थास्तु षडेव ; श्रूयते हि गोपथब्राह्मणे "षडङ्गविदस्तत्तथाधीमहे (१. १. २७.)"—इति। पातञ्जलमहाभाष्यादौ स्मर्यते च "आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षड़ङ्गो वेदोऽध्येयो ज्ञेयश्च"—इति पस्पशायाम्। एष चागमः कात्यायनानुमत एव ; यतोऽस्यैतद्वार्त्तिकम् "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"—इति। पाणिनिशिक्षादावपि वेदाङ्गानि षडेवेति निर्णीतं दृश्यते (३ पृ०)। प्रस्थानभेदेऽप्युक्तम्—"वेदाङ्गानि षट्"–इति। तत्र शिक्षा, कल्पः, व्याकरणम्, छन्दः, ज्योतिष मिति पञ्चाङ्गानि तु सर्वसम्मतान्येव ; निघण्टुनिरुक्तयोः उभयोरेव वेदाङ्गत्वे षट्त्वं व्याहन्येत ; अन्यतमस्य वेदाङ्गत्वेऽन्यतमस्य तदभावः सुतरां सम्पद्यते ; तत् कस्य वेदाङ्गत्व मिष्टं कस्य नेत्ययं विचारः प्रवर्त्तते।

प्रस्थानभेदे उभयोरेव वेदाङ्गत्व मङ्गीकृतम्। कथं न तथा षट्त्वं व्याहत मित्यत्राह च तत्र "एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव"—इति। न च तत्कथनमात्रेणैव

उभयोर्वेदाङ्गत्वसाधनायैव वा वादिनस्तथा स्वीकुर्युः; वादी भङ्गं न पश्यतीति हि प्रसिद्ध मेव।

ऋग्भाष्यभूमिकायां सायणाचार्योऽपीमां विपत्तिं परिलक्ष्यैव निघण्टोरपि निरुक्तत्वसम्पादकं प्रदर्शित माद्यलक्षणं (श्रा ए०) व्यरचयत्। तथाच निघण्टोश्च निरुक्तत्वेनैव ग्रहणात् सप्तानां मप्येषां ग्रन्थानां वेदाङ्गत्व मुपपद्येत, न च वेदाङ्गानां षट्त्वं व्याहन्येतेति। प्रशंसनीयैवैषा तस्य चातुरी! परं किं कुर्मो वयम्,—तदेतन्मतं न सर्ववादिसम्मतं नापि विचारसह मिति प्रतिपादितं पुरस्तादिहैवेति।

पाणिनिशिक्षायान्तु "निरुक्तं श्रोत्र मुच्यते"—इति दर्शनात् निरुक्तस्यैव वेदाङ्गत्वं सिध्यति, न तु निघण्टोः। न चेदं सहसा श्रद्धामहे; परकालजस्य भाष्यस्य वेदाङ्गत्व मस्ति, अतिपूर्वकालजस्य मूलस्य तन्नास्तीति वदत एवाश्रद्धोत्पादात्। ननु भवान् पाणिनिवचनेऽपि कथ मश्रद्दधते? अत्र ब्रूमः—न चेदं पाणिनिवचनम्; न हि पाणिनिः स्वय मेव "अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा"—इत्युपक्रान्तु मर्हेत्, नापि हि "येनाक्षरसमाम्नाय मधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः"—इत्याद्युक्तिभिरुपसंहर्त्तुं वार्हेदिति।

निरुक्तवृत्तिकृन्मते तु निरुक्तस्यैव वेदाङ्गत्वम्, निघण्टोस्तु साक्षाच्छन्दोधर्मित्व मेवेति किङ्कृतं भवेद् वेदाङ्गत्वेनेति नात्रास्माक मश्रद्धावसरः। तथाहि "अतः *** निरुक्तं नामेद मङ्ग मारभ्यते। प्रधानञ्चेद मितरेभ्योऽङ्गेभ्यः"—इत्याद्युक्तिभिः निरुक्तस्य वेदाङ्गेषु प्राधान्यं स्थापितम्; "तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसङ्ग्रहः। सा च पुनरियं *** श्रुतर्षिभि *** छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता। सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव; यथायथापन्नास्ता गौर्गोधर्म्मा*"—इत्युक्त्या तु निघण्टोश्छन्दस्त्व मध्याहृत मेवेति च वर्णितम्।

---

* मुद्रितपाठस्तु आदर्शदोषात् स्खलिताशुद्धियुक्त इति लाशङ्कितं तत्रैव (१भा०६पृ०*)।

'यथा' च 'अयथापन्ना' अप्रकृतविपन्ना परं सामान्यविपन्ना, 'अस्ता' यूथपरिभ्रष्टा, 'गौः' 'गोधर्म्मा' एव; न हि तस्या यूथपरिभ्रष्टत्वेन गोत्वं नष्टम्; तथैव छन्दोभ्यः समाहृता एषा पञ्चाध्यायी छन्द एव, समाहरणहेतुत एव न ह्यस्या छन्दस्त्वं तिरोभूत मिति भावः (२भा०६पृ०)। तथाच निघण्टुनामकानि समाम्नायात्मकानि पदानि तु बहुपूर्वकालत एव विश्रुतानि; तान्येव पदान्यनुसृत्य यास्को द्वादशाध्यायात्मकं निरुक्ताख्यं ग्रन्थं निर्ममे, तस्य च वेदार्थबोधोपयोगितया तदानीन्तनैरार्यैर्वेदाङ्गत्वं स्वीकृत मित्येव निरुक्तवृत्तिकृदाशयः फलितः।

यास्कस्य पूर्वश्रुतिलेखदर्शनात्त्ववगम्यते निघण्टोर्नास्ति वेदाङ्गत्वम्, नापि वेदत्व मिति। तथाहि—"उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च (२भा० १३७पृ०)"–इति। अत्र "इमं ग्रन्थम्"–इत्युक्त्या निघण्टोरेव ग्रहण मिष्टम्, न तु निरुक्तस्यास्य; प्रणीयमाने हि निरुक्ते "समाम्नासिषुः"–इति परोक्षातीतप्रयोगानुपपत्तेः। अपरञ्च निरुक्त मासीत् शाकपूण्यादिप्रोक्तम्, तदभिलक्ष्यैव तथा क्रिया प्रयुक्तेत्यपीह वक्तुं न युज्यते; अनुपद मेव "एतावन्तः समानकर्माणो धातवः"—इत्याद्युक्त्या निघण्टुपरिचयस्यैवोपलब्धेः। अतएवात्र वृत्तिः "इमं ग्रन्थं गवादि देवपत्न्यन्तं समाम्नातवन्तः"—इति; गवादिः देवपत्न्यन्तश्च निघण्टुग्रन्थ एव। किञ्चात्रापर मपि विवेच्य मस्ति— न चेदं वचन मेतस्य हि निरुक्तस्य कर्त्तुर्यास्कस्य, यथा चेम मिति एतन्निरुक्तं गृह्यतेति; अपि त्वेतद् वचनं प्राचीन मेव यास्केनेहानूक्त मिति। अतएव "बिल्मं भिल्मं भासन मिति वा"—इति बिल्मशब्दस्य निर्वचनप्रदर्शनं सङ्गच्छते यास्कस्य; न हि स्वय मेव दुरूहं शब्दं प्रयुज्य तद्व्याख्यानाय च यतितुं प्रवर्त्तते कश्चिद्। स्वपदवर्णन मेव भाष्यलक्षणम्, निरुक्तस्य च निघण्टुभाष्यत्वं सर्वसम्मत मिति स्वपदव्याख्यान मपीह न दोषायेत्यपि वक्तुं न युज्यते; यदत्र बिल्मशब्दस्य भिल्म मिति प्रतिशब्द मुक्त्वापि अर्थान्तरं वदति भासन मिति, वेति संशय मपि ध्वनयति; तदेवाचार्यप्रवृत्तिर्ज्ञापयति— न ह्येवेदं स्वपद-

वर्णन मिति ; न हि स्वपदव्याख्याने स्वज्ञान-वैकल्पिकत्व-प्रकटन मुपयुज्यते क्वचिदपीति। एतस्मिन् खलु वचने बहूनि समालोच्यानि सन्ति, तानि चोपरिष्टाद् वक्ष्यामः; साम्प्रतन्तु वेदाङ्गेभ्यः पृथगेव निघण्टोर्ग्रहणं यास्कस्याप्यभिमत मित्येवैष प्रदर्शन मस्मदिष्टम्।

नन्वत्र वृत्तिग्रन्थे "वेदाङ्गानि च इतराणि (२भा० १३८ पृ० ६ पं०)" —इति लिपिभङ्गितो निघण्टोरपि वेदाङ्गत्वं ध्वनित मेवेति चेत्, ध्वनयतु नाम स तथैव किन्तेन; न हि वृत्तिकारोऽभ्रान्त एवेत्यस्माकम्। वस्तुतो यदि नाम 'इतराणि'—इति पदप्रयोगात् तथैव ध्वनितं गम्येत, तर्हि तादृशवचनस्यैकदेशयुक्तित्व मेव स्वीकार्यम्; प्रदर्शितभूमिकोक्तविरोधात्। महाभाष्ये भगवतोऽशेषशेमुषीसम्पन्नस्य पतञ्जलेरप्येवं बह्वैकदेशयुक्तयः प्रदर्शिता लघुशब्देन्दुशेखरादौ नागेशभट्टप्रभृतिभिः, तत् किमस्य वृत्तिकृतः स्वल्पधियो हि दुर्गाचार्यस्येति। वस्तुतो दुर्गाचार्यस्य निरुक्तवृत्तिभूमिकायां दृष्टं यास्कीयस्य निरुक्तस्य वेदाङ्गत्वम्, तन्मूलस्य निघण्टोस्तु न तत्त्व मपि छन्दोधर्मित्व मेवेत्येव युक्ततरं प्रतिभात्यस्माक मिति।

अथात्रापरापि च शङ्का समुत्पद्येत नाम। तथाहि—प्रदर्शितयास्कपूर्वश्रुतिसमालोचनादवगतं नास्ति निघण्टोर्वेदाङ्गत्व मिति वाढम्! परं तथैवेद मप्यवगम्यते यास्कप्रणीतैतन्निरुक्तात् बहुपूर्व मेव वेदाङ्गानि निर्वृत्तानीति कथं तत्र वेदाङ्गेषु तदानीं प्रणीयमानस्यैतस्य निरुक्तस्यान्तर्भावः शक्यते वक्तु मपि ? वदत एव हि व्याघातः स्फुट मिति। इहास्माक मीदृगस्ति गुरूपदेशः,—प्रदर्शितगोपथश्रुत्यादिभ्योऽवगम्यते षडेव वेदाङ्गानीति; प्रदर्शितशिक्षावचनादिभ्यश्च ज्ञायते निरुक्तस्य च वेदाङ्गान्यतमत्वम्; यास्कीयेऽत्रैव निरुक्ते "नैरुक्ताः", "शाकपूणिः"—इत्यादिपर्यालोचनया च बुध्यते तत्पूर्व मपि चासन् बहवो निरुक्तविदस्तथा बहूनि निर्वचनापरपर्यायाणि निरुक्तानि चेति; तेषा मेव साजात्यहेतुक मस्य यास्कीयस्यापि ग्रन्थस्य यथा निरुक्तत्वं तथैव वेदाङ्गत्व मपीति।

एतदेवाभिप्रेत्याह ऋक्प्रातिशाख्यकारः शौनकोऽपि—"शाखापवा-

दात् प्रतिपत्तिभेदात् निन्दन्त्यङ्गत्वेति च वर्णयिष्यामः। नैतेन शास्त्रेण विशिष्यतेऽन्यैः कृत्स्नञ्च वेदाङ्ग मनिन्द्य मार्षम् (१४.१८,१९.)"—इति । तथैतत्तृतीयवृत्तिकृतोव्वटेन च स्वारब्धवृत्त्युपक्रमे शौनकीयस्यास्य प्रातिशाख्यस्यापि वेदाङ्गत्व मिच्छमाणेनैतदुक्तम्—"अङ्गता चास्यान्यशास्त्रसव्यपेक्षस्य नैव स्यादकृत्स्नत्वात् ? कृत्स्नतां वेदाङ्गता मनिन्द्यता मार्षताञ्च स्वय मेव शौनको दर्शयिष्यति—'कृत्स्नञ्च वेदाङ्ग मनिन्द्य मार्षम्'—इति । अनयोः पक्षयोर्यतरः पक्षः श्रेयान्, ततरो गृहीतव्यः"—इति ।

अथापरञ्च ;— यद्यपि प्रदर्शितयास्कापूर्वश्रुतवचनोत्तरांशे वेदशब्देन ब्राह्मणभागएवेष्ट इति बुध्यते ब्राह्मणत्वं निघण्टोर्निराकृतम् ; तत्पूर्वांशे मन्त्रभागस्यापि पृथक् श्रुतेः मन्त्रत्व मपि वारितम् ; तथापि तत्रैव 'समाम्नासिषुः'—इति क्रियादर्शनात् समाम्नायत्व मव्याहत मेव । अतएव "समाम्नायः समाम्नातः स व्याख्यातव्यः"—इति निरुक्तग्रन्थारम्भस्य, 'सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव (२भा० ६ पं०)"—इति दुर्गाचार्यप्रबन्धस्य च नासङ्गतिप्रसङ्गः ।

तदित्थ मसौ निघण्टुर्न हि मन्त्रग्रन्थः, न च ब्राह्मणग्रन्थः, नापि वेदाङ्गान्यतमः ; अपि तु मन्त्रतो न्यूनमानः, ब्राह्मणवेदाङ्गाभ्या मन्यूनमानश्च समाम्नायविशेष एवेति यास्कस्याशयः, तत्पूर्वतनानाञ्च सम्मतः; किञ्चास्यैव निघण्टुभाष्यस्य निरुक्तत्वं तदनुगतं वेदाङ्गत्वञ्चेति शम् ।

---

(२)

अथैतर्हि विचार्य मेतत्,—निरुक्तमूलसूत्ररूपस्य निघण्टोः कः समाम्नाता को वा प्रणेता तद्भाष्यरूपस्य निरुक्तस्य ?—इति ।

अनतिप्राचीनाना मार्यकोविदाना मन्यतमः स्वर्गतो विमुक्तो वा ख्यातो मधुसूदनसरस्वती सञ्ज्ञयाहैकं प्रबन्धं प्रस्थानभेद-नामेति । तत्रेदं लिखितं दृश्यते—"भगवता यास्केन 'समाम्नायः समाम्नातः स व्याख्या-

तव्यः'—इत्यादि * * * निरुक्त मारचितम्"—इति। नात्र वादो दृश्यते ऽस्माभिः। तत्र उत्तरं लिखित मस्ति—"निघण्टुसञ्ज्ञकः पञ्चाध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः"—इति। तदेतल्लिखनं तदीय मेतद्विषयकं भ्रान्त मेव प्रकटयति। हन्त भो वेदान्तिन् मधुसूदन! स्वोद्धृतं 'समाम्नायः समाम्नातः स व्याख्यातव्यः'—इति वचन मपि नालोचितम्?—अद्ययुगीयेन कृतस्य ग्रन्थस्य कथं भवेत् समाम्नायत्वम्? अथवा सम्भव एवैवं भवादृशानां सर्वभ्रमवादिनां वेदान्तिनाम्। एवं हि तल्लिखितं निघण्टोर्निरुक्तान्तर्भूतत्व मपि (का पृ०) कथं नाम भवेत् श्रद्धेयं तद्विरुद्ध-बलप्रमाणदर्शिना मिति।

सायणाचार्यस्त्वत्र सम्यगेवालेखीत्—"गौः ग्मा ज्मा क्ष्मा क्षा क्षमेत्यारभ्य * * * पदानां समाम्नायः समाम्नातः"—इति, "तद्व्याख्यानञ्च समाम्नायः समाम्नात इत्यारभ्य * * * यास्को निर्ममे"—इति च (ऋ०सं०भा० भू०)। तदेवं सायणमते हि निघण्टोः समाम्नायत्वेनानादित्वम्, निरुक्तस्य तु तद्भाष्यरूपत्वं यास्कीयत्वञ्चेति प्रतिपन्नम्।

देवराजयज्वकृत-निघण्टुटीकाया भूमिकायाञ्च तथैव बोध्यते। तथाहि—"भगवता यास्केन समाम्नायं नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं गवादि देवपत्न्यन्तं निर्ब्रुवता"—इत्यादि। एतच्चैतन्नयेऽपि निघण्टोः समाम्नायत्वेनानादित्वम्, तन्निर्वचनात्मकस्यैतस्य निरुक्तस्य यास्कीयत्वं च स्फुटम्।

निरुक्तवृत्तिकारः खलु दुर्गाचार्यस्तु यद्यपि स्वग्रन्थभूमिकायां निरुक्तवर्णनसमये केन कृतं तदिति नोक्तवान्; पर मनुपदं प्रथमखण्डव्याख्यानावसरे एवाह—"आचार्यः अयं यास्को निरुक्तकारः"—इति; एव मन्यत्रापि। निघण्टुकर्तृनिर्णयविषये तूष्णीं तद्भूमिकाया मेव। तथाहि—"सा (पञ्चाध्यायी निघण्टुः) च पुनरियं साक्षात्कृतधर्मभ्यो महर्षिभ्यः उपदेशेन मन्त्रार्थ मुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्य मपेक्ष्य तदनुजिघृक्षया वाच्यार्थसामर्थ्यादभिधेयानुनीय मन्त्रार्थावबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता"—इति। एतच्च सर्वं निरुक्तोक्तसारभूत मेव

(१भा० १३७, ७ पृ०)। एवं हि वृत्तिकृतो दुर्गाचार्यस्य मतेऽपि निघण्टोः समाम्नायत्वेनानादित्वम्, निरुक्तस्यैतस्य यास्कीयत्वं च सुव्यक्तम् ।

महाभारतीये मोक्षधर्मपर्वणि 'शिपिविष्ट'-नामनिर्वचनप्रसङ्गे ये त्रयः श्लोकाः (३४२ अ० ६९, ७०, ७१ श्लो०) दृश्यन्ते, तैश्च ज्ञायते यास्कप्रणीत मेवैतन्निरुक्तम्। तथा हि—

"शिपिविष्टेति चाख्यायां हीनरोमा च यो भवेत् ।
तेनाविष्टन्तु यत् किञ्चित् शिपिविष्टेति च स्मृतः ।
यास्को मा मृषिरव्यग्रोऽनेकयज्ञेषु गीतवान् ।
शिपिविष्ट इति ह्यस्माद् गुह्यनामधरो ह्यहम् ।
स्तुत्वा मां शिपिविष्टेति यास्क ऋषिरुदारधीः ।
मत्प्रसादादधोनष्टं निरुक्त मभिजग्मिवान्"—इति ।

अस्यैव ह्यत्र निघण्टुभाष्ये शिपिविष्ट-निर्वचनञ्च द्विविधम् (२भा० ४७—५३ पृ०)। तत्रैव किञ्चिदुत्तरं द्वाभ्यां श्लोकाभ्यां (३४२ अ० ८६, ८७ श्लो०) निघण्टुकर्तृनाम च प्रकटितम् । तथाहि—

"वृषो हि भगवान् धर्म्मः ख्यातो लोकेषु भारत ।
निघण्टुकपदाख्याने विद्धि मां वृष मुत्तमम् ।
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः"—इति ।

अस्यैव ह्यत्र निघण्टौ दैवतकाण्डे द्युस्थानदेवताख्यानेषु वृषाकपिरिति पदपाठश्च (१भा० ४९० पृ०)। इतश्चावधार्य्यते यस्य खल्वेतस्य निघण्टु-ग्रन्थस्य कर्तृपदं पाणिनितोऽप्यवरजाय यास्काय दातु मुद्यतः प्रस्थानभेद-कारः, स हि वेदाङ्गाना मुत्पत्तितो बहु प्रागेव ब्राह्मणग्रन्थानाञ्चोत्पत्तिः, ततोऽपि प्राक् महर्षिणा कश्यपेन समाम्नात इति ; तदानीन्तनस्यैव कश्यपस्य प्रजापतित्वश्रवणात्, निघण्टूत्पत्तिज्ञापकस्य यास्कानूक्तवचन-स्यापि तत्रैव तात्पर्यावबोधाच्च ।

तथा चानूक्तं भगवता यास्केन पुराकल्पश्रुतवचन मिदम्—"साक्षात्-

क्षतधर्माण ऋषयो बभूवुः (मन्त्रकाले मन्त्रद्रष्टारः); तेऽवरेभ्योऽसाक्षात्कृत-धर्मभ्यः (शाखाप्रवक्तृभ्यः) उपदेशेन मन्त्रान् सम्प्रादुः; उपदेशाय ग्लायन्तो ऽवरे (निघण्टु-ब्राह्मण-वेदाङ्गकाराः) बिल्मग्रहणायेमं ग्रन्थं (निघण्टुम्) समाम्नासिषुः, वेदञ्च (ब्राह्मणञ्च), वेदाङ्गानि च"-इति (२भा०१३७ पृ०)। एतस्माच्च श्रुतेः समासत इमानि पञ्च ज्ञायन्ते; -(१) पुराकल्पेऽपि मन्त्राणा मुत्पत्तिरनिर्णीतैवेति प्रथमम्। (२) पूर्वं मन्त्रा विकीर्णा एव स्थिताः, ततो ग्रन्थीभूताना मेव तेषा मध्ययनाध्यापनतः शाखाः समुद्भूताः, ततः सर्वशाखा-गतानां नैघण्टुकादिपदानां सुखबोधार्थं निघण्टुनामको ग्रन्थः समाम्नातः, ततः तन्मात्रेण मन्त्रार्थज्ञानेऽकृतकृत्यतां संलक्ष्य मन्त्रभागीयदुरवबोधपदादीनां तात्पर्यादिवेदनाय ब्राह्मणग्रन्थाः समाम्नाताः, तत उत्तरं ब्राह्मणग्रन्थैरपि मन्त्रार्थबोधो न पर्याप्त इति निरुक्तादीनि अङ्गानि समाम्नातानीति द्वितीयम्। एतादृशक्रमोत्पत्तिज्ञाने तादृशक्रमश्रुतिरेव मानम्। किञ्च यतोऽत्र "मन्त्रान् सम्प्रादुः"-इति कथनानन्तरं पुनरुक्तं 'वेदञ्च'-इति, अतो ज्ञायते, नेह वेदशब्देन मन्त्राणां बोधोऽपि तु तदतिरिक्तभागानां ब्राह्मणाना मेव। वेदशब्देन ब्राह्मणग्रन्थमात्राणां ग्रहणाच्च वेदाङ्गत्वं न विलीयते निरुक्तादीनाम्; यदर्थं हि प्रवृत्ता वेदाः (ब्राह्मणग्रन्थाः), तदर्थ मेव चेमानि प्रवृत्तान्यङ्गानीत्येव मेषा मङ्गाङ्गिभावोपपत्तेः। ननु 'इमं ग्रन्थं' कीदृशम्? तदुत्तर मेव श्रुतं 'वेदम्'-इति, तथाच निघण्टोर्वेदत्वातिदेशायैव प्रयुक्त मचैतद् वेद मिति चेन्न; विशेषफलाभावात् ब्राह्मणग्रन्थोल्लेखाभावापत्तेश्च। तथा हि—समाम्नायत्वं तु सिद्ध मेवास्य निघण्टोः, 'समाम्नासिषुः'-इति क्रियादर्शनात्; वेदतुल्यत्व-समाम्नायत्वयोश्च नास्ति कार्यकृतो विशेषः; किञ्च तथा सति श्रुतावत्र मन्त्राणाम्, वेदतुल्यस्यास्य निघण्टोः,वेदाङ्गानाञ्च सर्वेषां श्रवणं सम्पन्नम्; परं ब्राह्मणग्रन्थानामुल्लेखो नैव सम्पद्येतेति तादृशवादिना मसमीक्ष्यकारितैव प्रतिपद्येतेति। (३) यथा चेह मन्त्राणां पृथक् श्रुतेः वेदशब्देन मन्त्रातिरिक्तानां ब्राह्मणानां बोध उपलभ्यते, तथैव वेदाङ्गानां पृथक् श्रवणाच्च ब्राह्मणेष्वपि वेदाङ्गेतरवाक्याना मेव ग्रहणीय-

तेति तृतीयम् । (४) निरुक्तादिवेदाङ्गानां सर्वेषा मेव यस्मां वीजादिरूपत-यैतन्निरुक्ततोऽपि प्रागस्तित्व मिति चतुर्थम्। (५) मन्त्राणा मर्थज्ञानसौक-र्य्यायैव यथाम्नानं निघण्टोः,— यथा च वेदाङ्गानां निरुक्तादीनाम्; तथैव तदानी मपि स्वीकृत मासीद् वेद इति प्रसिद्धानां ब्राह्मणानाञ्च; ततः कालभूयस्त्वानुसारत एव ब्राह्मणानां मन्त्रसमत्वं जात मिति पञ्चमम् ।

एवञ्चैतस्मात्कृतेर्निघण्टोः खलु ब्राह्मणग्रन्थेभ्योऽपि प्रागाम्नातत्वं गम्यते; तादृग्समाम्नायत्वमूलक मतिपुराकालिकत्वं च सुव्यक्त मेव; ततः प्रद-र्शितमहाभारतात् कश्यपप्रजापतिकृतत्वञ्च तस्य लब्ध मिति योगतः सम्पन्नस्तत्कर्तृनिर्णय इत्यस्माकम् ।

तस्यैव निघण्टोर्भाष्यरूपस्यैतस्य निरुक्तस्य कर्त्ता तु यास्कः। ऐते-तिह्य मेव मानम् ; न हि तद्ग्रन्थस्य आरम्भे मध्येऽन्ते वा क्वचिदपि तथा प्रत्यायकं वाक्यादिक मस्ति। देवताप्रणामादिभिर्मङ्गलाचरणादिकं येषु ग्रन्थेषु दृश्यते, प्रायस्तेषु ग्रन्थकृद्भिः स्वय मेव स्वाख्यान मप्याख्यात मस्ति ; बहुत्र तु प्रकरणसमाप्तौ ग्रन्थसमाप्तौ च ग्रन्थकृन्नामोल्लेखो दृश्यत एव ; कथाप्रसङ्गतोऽपि ग्रन्थकृन्नामावगमो भवत्यनेकत्र। इह तु नास्ति तथा मङ्गलाचरणम्, नास्ति पादादिसमाप्तौ च तथोल्लेखः, नास्ति च मन्वादा-विव कथाप्रसङ्गः; अतोऽनैतिह्य मेव शरणं ग्रन्थकृन्नामविज्ञानाय। टीका-कृत्प्रभृतीनां लेखोऽपि तदनुगत एव। प्रदर्शितमहाभारतवचनान्यप्येतस्यैव ग्रन्थस्य कर्त्तासीद्यास्कः कश्चनेति निःसंशयबोधने नालम्; तत्रैतदीयस्यै-काक्षरस्यापि यथावदुद्धृतिविरहात्; वरं तत्रापि एष एव यास्कः की-र्तित इत्यवगमे, एतस्य यास्ककृतत्वप्रवाद एवैकं वीजम्। तदेव मेतादृग्-ग्रन्थकर्तृनिर्णये ऽनन्यगत्या प्रवाद एव शरणम्; तथा च यत एव मस्ति प्रवादश्चिरन्तनः,—इदं निरुक्तं यास्ककृत मिति, अत एव ज्ञायतेऽस्य निरुक्तग्रन्थस्य प्रणेता भगवान् यास्क इति शम् ।

---

(४)

अथास्य निरुक्तस्य कर्तृविषये त्वन्यदपि किञ्चिद् विचार्यमस्ति;— कोऽयं यास्कः ? इति ; कस्यापि परिचयोऽस्य प्राप्यते न वेति भावः ।

एको हि यास्कः श्रूयते शतपथब्राह्मणे उभयत्र (१४.५.५.२०, २१.— ७. ३. २६. २७.) । तथा हि—"अथ वंशः । तदिदं वयं (शतपथ-ब्राह्मणप्रवक्तारः) शौर्पणाय्यात्, शौर्पणाय्यो गौतमात्, * * * भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्च"—इति । "तत्र प्रथमान्तः शिष्यः, पञ्चम्यन्त आचार्यो बोद्धव्यः"—इति च तदीयव्याख्यानं द्विवेदगङ्गकृतम् । एवञ्च शतपथीयो यास्कः शतपथब्राह्मणप्रवक्तुः षड्विंशपुरुषादप्यधिकः पूर्वतनः, किञ्च मधुविद्यायाः सम्प्रवक्ता चाभूदिति सम्पद्यते । नायं निरुक्तकारः ; एतस्य निरुक्तकारस्य हि पाणिनेरपि परभवत्वनिर्णयादद्ययुगीयत्वात्, मधुविद्याप्रवक्तृत्वाप्रसिद्धेः, ब्राह्मणकालानन्तर मेव वेदाङ्गकाल इति शास्त्रतो युक्तिबुद्धितश्च सुसिद्धाच्चेति । तदनुपद मेव क्रमात् स्फुटिष्यति ।

पिङ्गलोक्ते छन्दोग्रन्थेऽपि स्मर्यते चैकत्र यास्क इति । तथाहि— "उरोबृहती यास्कस्य (५. १०.)"—इति । अय मपि यास्को नैतन्निरुक्त-कारः ; अत्र तथाऽदर्शनात् । यस्य खलु यास्कस्य ग्रन्थे विहिता 'उरो बृहती'—इति सञ्ज्ञा, स एव यास्कः तत्र पिङ्गलसूत्रे स्मृतः ; स च छन्दःसूत्रकारादेतस्माच्च पिङ्गलात् पूर्वतनः, तत्समकालिको वेति विचार-विषयश्च । पर मत्र निरुक्ते क्वापि नोपलभ्यते उरोबृहतीव्याख्यान मिति सिद्ध मेव नायं सः ; अपि तु पिङ्गलोक्तो यास्कः खलु कश्चित् भिन्न एवेति । स च छन्दःशास्त्रीयग्रन्थकारो भवितु मर्हतीत्यपि सम्भाव्यते । अत एव ऋक्प्रातिशाख्यस्य तृतीयवृत्तौ शास्त्रप्रयोजनश्लोकव्याख्यानावसरे उक्त मुव्वटेन—"तथा सर्वैः छन्दोविचित्यादिभिः पिङ्गल-यास्क-सैतवप्रभृतिभिः यत् सामान्येनोक्तं लक्षणम्"—इत्यादि ।

कश्चिदाह,—शौनकीये प्रातिशाख्यग्रन्थे चैकत्र दृश्यते यास्कनाम, स एव यास्कोऽस्य निरुक्तस्य प्रणेतेति । परं तत्र "वैयास्कः", "यास्कः" वा

इति राजते सन्देहोऽद्यापि । तथाहि—"न दाशतय्येकपदा काचिदस्तीति वैयास्कः । अन्यत्र वैमद्याः सैकादशिनी मुखतो विराट् (१७.२५.)"—इति, "दाशतये भवा दाशतयी काचित् एकपदा नास्ति इति वैयास्क आचार्यो मन्यते"—इत्यादि चोव्वटकृतं तद्व्याख्यानम् । तदेतदुव्वटव्याख्यादर्शनात्तु प्रतीयते तत्र वैयास्कस्यैवोल्लेखः; अन्यथा हि व्याख्याकालेऽपि मूलानुरूप एव वैपूर्वो यास्कः कथं नाम दृश्येत । अस्तु वा तत्र यास्कस्यैव ग्रहणम्, परं सोऽपि खलु यास्को नैतन्निरुक्तकारो भवितु मर्हति; अत्रापि हि तथाऽदर्शन मेव हेतुः; सपरिशिष्टेऽखिलनिरुक्ते हि न क्वापि वैमद्या ऋग्व्यतिरिक्ता काचिदेकपदा दाशतयी नास्तीत्येतदर्थकं वाक्यं ध्वननं वा यास्कीयं दृश्यते । एव मपि यद्युच्येत अय मेव यास्कः प्रातिशाख्यकृतः शौनकस्य लिपिविषयताकृत इति, तथा च प्रकारान्तरेण शौनकस्यानृत-भाषित्व मुन्मत्तप्रलापित्वं वोक्तं भवेत्; तत्तथाकल्पनातो वरं यास्कान्तर-कल्पनैवेत्यस्माकम् ।

पाणिनिसूत्रेष्वपि नायं यास्कः परिचितः । यद्यप्यस्त्येकं सूत्रं पाणिनीयं "यस्कादिभ्यो गोत्रे (२.४.६३.)"—इति, परं न तत् निरुक्तकारयास्कपरि-चयायालम्; तत्र श्रुतेन यस्केन यास्कस्य बहुपार्थक्यात् । तत्र हि साक्षाद् विश्रुतो यस्कः; न तु यास्कः; यास्कस्तु न यस्कः; अपि तु तद्गोत्रीयः; तादृशयास्कस्त्वद्यतनीयोऽप्यस्त्येव । सूत्रे 'गोत्रे'—इति दर्शनादिदन्तु प्रती-यत एव,— यस्कगोत्रस्य ज्ञानं पाणिनेरवश्यं स्थित मिति । "अपत्यं पौत्रप्रभृति गोत्रम् (पा०४.१.१६२.)"—इति शासनाच्च ज्ञायते, यस्कस्यो-परितनतृतीयपुरुषतोऽद्यतनीयान्ताः सर्व एव यस्कगोत्राः, तथाच सर्वेषा मेव यास्का इति व्यवहारः पाणिन्यादिसम्मतः; बहुत्वे त्विद मेव सूत्रं लुग् विधत्ते इत्यन्यदेतत् ।

ननु चेयं तत्सूत्रवृत्तिः—"एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे, न तु स्त्रियाम् (भ० दी०)"—इति । एवञ्च यस्कस्यानन्तरापत्यस्य यास्क-स्यास्यैव तत्र पाणिनेर्बोध उपलभ्यते ?—इति चेत्, दृश्यता मिह नागेशभट्टकृतं

तद्व्याख्यानम्—" 'अपत्यप्रत्ययस्य'—इति प्रवराध्यायप्रसिद्धघटकस्येत्यर्थः; अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति भावः"—इति। तथा च दीक्षितवृत्तौ अपत्येत्यस्यापि गोत्रेत्यर्थ एव सुतरां सम्पन्नः; वस्तुतो गोत्रोऽप्यपत्यमेव। तदेवं तत्सूत्रस्य यस्कगोत्र एव विषय इति स्थिरम्; अपि गोत्रज्ञाननिर्णयेऽपि नैव भवेद्व्यक्तिज्ञाननिर्णयः किं मस्त्यत्र विचार्यं नाम।

किञ्च "शिवादिभ्योऽण् (४. १. ११२.)"—इति सूत्रीये शिवादिगणेऽपि यस्क एव पठ्यते। तेनैव च सूत्रेण यस्कशब्दात् अपत्येर्थेऽणि यास्कः पदं सिध्यति। तथाच यथा यस्कस्यानन्तरापत्यं यास्कः, तथैव यस्कस्य शततमापत्यं सहस्रतमापत्यं च यास्क एव। लघुशब्देन्दुकार-नागेशभट्टमते तु इहापि गोत्रार्थे एव प्रत्यय इष्टः। तथा हि—"शिवादिभ्योऽण्"—इति अस्ति पाणिनिसूत्रम् (४.१. ११२.)। अत्रेयं दीक्षितकृता वृत्तिः—"गोत्रे इति निवृत्तम्। शिवस्यापत्यं शैवः। गाङ्गः"—इति। अत्राह नागेशः—"निवृत्तमितीदं वृत्त्यनुरोधेन; यूनि लुक् सूत्रभाष्ये गोत्रसञ्ज्ञासूत्रपर्यन्तं गोत्राधिकार इति ध्वनितत्वात्। तत्र भाष्ये"—इत्यादि। "शास्त्रीयगोत्रञ्च युवत्वानक्रान्तपौत्रप्रभृत्यपत्यरूपम्"—इति, "लौकिकञ्च प्रवराध्यायप्रसिद्धम्; लोके तत्रैव गोत्रव्यवहारात्"—इति द्विविधं गोत्रलक्षणञ्च तत्रैवोक्तम्, तदपीह पर्यालोच्यम्।

अतएव च "वान्यस्मिन् (पा० ४. १. १६५.)"—इति सूत्रीयभाष्यव्याख्यानावसरे कैयट आह—'यस्कस्यापत्यं गोत्र मिति शिवाद्यण्'—इत्यादि। एवञ्च यस्कगोत्रीयः कश्चन यास्कोऽस्ति लोके इत्येवं ज्ञानमासीदेव पाणिनेरिति स्वीकारेऽपि कथं नामेदं स्वीकृतं भवेत् यस्कगोत्रीयोऽप्ययं निरुक्तकारः पाणिनेः परिचित एवेति ?

अपरिचित एवायं यास्क इत्यपि कथ मिति चेदुपरिष्टात्तत् प्रतिपादयिष्यामः कालनिर्णयप्रसङ्गे; इह तु वचनमात्रेणैव बोधयामो नेति। तस्मान्मत मस्मद्वचनादेव स्वीकार्य मेतत्—पाणिनिसूत्रपरिचितोऽपि नायं यास्कः, परं पाणिनिशासनावधारणादेवैतत्तु विज्ञायत एव यस्कगोत्रीयो-

ऽय मिति। आसीच्च गोत्रकारो यास्कः कश्चनातिप्राचीनतमः प्रायः कश्य-पादिसमकालज एव ; आश्वलायनीयश्रौतसूत्रान्तिमेऽध्याये दशम्यादिषु कण्डिकासु गोत्राः प्रवरा निरूपिताः, तत्र दशम्यां (आ० श्रौ उ० ६. १०. १०.) यास्कस्यापि स्मरणात्। तस्यैव ग्रहणा मिह पाणिनिसूत्रे इति तु सुव्यक्त मेव।

तदेवं पाणिन्यादौ खल्वस्य यास्कस्य परिचय मप्राप्य खिद्यमाना वयं ततोऽप्यधिकान्वेषणपराः सन्तो दृष्टवन्त एकं यास्कं निरुक्तकारत्वेन परि-चितं महाभारतैककोणे। ततस्तेभ्य एव पूर्वप्रदर्शितमहाभारतश्लोकेभ्यो ऽनुमीयते यास्कोऽय मेव वा भवेत्तस्य महाभारतकारस्य परिचित इति।

ततो बङ्गषु सपरिशिष्टनिरुक्तपुस्तकेषु केषुचित् सर्वान्ते "नमः पार-स्कराय नमो यास्काय (४भा० ४१३ पृ०)"–इति पाठोऽपि दृश्यते। तथा च तत्र केनचित् पारस्करायेति यास्कपरिचयायैवोक्त मिति चानुमीयते। सत्येवं पारस्करोऽयं यास्क इत्यपि लब्धः। पर मिह पारस्करज्ञान मपि न सुगमम्। आसीदेकः पारस्करो गृह्यकृत् प्रसिद्धः ; आसीच्च पारस्करो धर्मशास्त्रीयान्यविधानकृत् रघुनन्दनशूलपाणि-प्रमाणभूतो निर्णयसिन्ध्वादौ कीर्त्तितश्च। तथाहि शुद्धितत्त्वे—"त्र्यहपिण्डदाने आदि-पुराणोक्तात् पक्षान्तर माह पारस्करः—'प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा"–इत्यादि। अथापि पारस्करशब्देऽत्रास्त्येव सन्देहभावः, पातञ्जले हि महाभाष्ये "पारस्करो देशः"–इति निर्णयात्। तथा ह्यस्त्येकं सूत्रं पाणिनीयम्—"पारस्कर-प्रभृतीनि च सञ्ज्ञायाम् (६. १. १५७)"–इति। तत्रैवं भाष्य मस्ति—"अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः। पारस्करो देशः, कारस्करो वृक्षः, रथस्या नदी, किष्किन्धा गुहा, किष्कुः"–इति। तत्रेय मस्मदाशङ्का—गृह्यकृत् पारस्कर एव निरुक्तकृतोऽस्य यास्कस्य पूर्व-पुरुष इति चेत् कथं न महाभाष्यकारस्य पतञ्जलेः परिचितः? न हि यास्कस्यास्य ततोऽप्यर्वाचीनत्वसम्भव इति च प्रतिपादयिष्याम उपरिष्टात्;

तत्पूर्वपुरुषस्य पारस्करस्य तु का कथा। अथवा देशनामत एव तस्य गृह्यकृतो नाम इति हेतुत एव मूलपरिचयायैवोक्तं तेन भगवता, पारस्करो देश इति। तथैव मस्य यास्कस्योभय मेव ज्ञातम्; निवासोऽभिजनो वा देशः, पूर्वपुरुषस्य।

शतपथीयः खलु यास्कोऽप्यस्यातिपूर्वपुरुष इत्यपि भवितु मर्हति; तस्यापि यस्कगोत्रीयत्वेनावगमात्। ततश्चास्य यजुर्वेदित्व मपि सम्पद्यते।

तथाचायम्—यस्कगोत्रः, पारस्करदेशीयः, पारस्करवंशधरः, यजुर्वेदी च निरुक्तकृत् यास्क इत्येतावन्तः परिचयाः यथाकथ मपि लभ्यन्त इति शम्।

---

(५)

अथ इदानी मिद मपि विचार्यम्,—अस्य यास्कस्य ऋषित्व मस्ति नास्ति वेति। अनुभूयते हि त्रिविध मृषित्वम्,—मुख्य मातिदेशिकं तार्त्तीयीकञ्चेति। तदेतत्त्रिविधाना मन्यतम मस्यास्त्येव चेत् किंविध मित्येव निर्णेतु मवतार्यतेऽयं प्रबन्धः।

मुख्यर्षिलक्षणन्तु स एव स्वय मेव माह—"ऋषिः, दर्शनात्। स्तोमान् ददर्शेत्यौपमन्यवः। तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् तदृषीणा मृषित्व मिति विज्ञायते (२ भा० १९९ पृ०)"–इति। अत्रोक्तं तद्यदेनानि-त्यादिकं ब्राह्मणमत मेवेह प्रमाणत्वेनोपन्यस्तम्; तदुक्तं तत्रैव वृत्तिकृता दुर्गाचार्येण—"ब्राह्मण मपि चैतस्मिन्नर्थे दर्शयति 'तद्यदेनांस्तपस्यमानान्' –इत्यादि। 'तत्' एतत् उच्यते यत्कृत मृषीणा मृषित्वम् (२भा०२०१पृ०)"- इत्यादि। अपरत्रापि "ऋषिः कुत्सो भवति, कर्त्ता स्तोमानाम्—इत्यौ- पमन्यवः (२ भा० २९९ पृ०)"–इति च तन्निदर्शनं प्रदर्शित मेतेनैव यास्केन। किञ्च तत्पूर्वतनाना मपि तथैव व्यवहार इति च प्रदर्शितं तेनैव। तथाहि— "साक्षात्कृतधर्माण ऋषयो बभूवुः"–इत्याद्युक्त मालोचनीयम् (कै पृ०)। तत्रैव

"ऋषन्ति अमुष्मात् कर्मण एव मर्थवता मन्त्रेण संयुक्तादमुना प्रकारेण तल्लक्षणं फलविपरिणामो भवतीत्यृषयः"—इति च ऋषिपदनिर्वचनं कृतं दुर्गाचार्येण । एवञ्च मन्त्रद्रष्टॄणा मेव मुख्य मृषित्व मिष्टम्; तथा चादिकाल्पजाना मतिप्राचीनतमानां वसिष्ठ-वामदेवादीना मेव तादृशर्षित्व मुररीकार्य मिति प्रतीयत एव ।

द्रष्टृत्वं कर्तृत्वञ्चाभिन्न मेव प्रायः; तत्र अतीवप्राचीनाना मज्ञेयकालिकाना मेव कृते दृष्ट मिति व्यवहारो नान्यत्रेत्येव विशेषः । तदिमानि "दृष्टं साम (४.२.७.)"—इत्यादि-पाणिनिसूत्रीयाणि "वसिष्ठेन दृष्टं वासिष्ठं साम"-इत्यादीनि वृत्तिकृदुदाहरणादीनि द्रष्टव्यानि; तथैव "य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्, स गृत्समदो द्वितीयं मण्डल मपश्यत्"-इत्येवमादीन्यनुक्रमणीवचनादीनि च । किञ्चैतन्निरुक्तकारोऽप्याह तथा—"ऋषेर्दृष्टपरिपूर्णस्य तदार्षम् (४ भा० ११ पृ०)"-इति । "मत्स्यानां जाल मापन्नाना मेतदार्षम् (३ भा० २५१ पृ०)"-इत्यादि च ।

दृष्टे तत्रैवार्थे कृत इति व्यवहारोऽपि नादृष्टचरः । तथा ह्यैतरेयके ब्राह्मणे—"देवा ह वै सर्वचरौ सत्रं निषेदुस्ते ह पाप्मानं नापजघ्निरे । तान् होवाचार्बुदः काद्रवेयः सर्प ऋषि मन्त्रकृत्(६.१.१.)"—इति । निरुक्तेऽप्येवं दृष्टान्तो न दुर्लभः । तथाहि—"इदञ्च मेऽदादिदञ्च मेऽदादित्यृषिः प्रसङ्ख्यायाह सुवास्त्वा अधि तुग्वनि(२ भा० ४१७ पृ०)"—इति, "वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव (४भा० ८ पृ०)"-इत्यादि च । यास्कपूर्वप्रवादा अप्यत्र सङ्गृहीताः सन्ति, तत्राप्यस्यैव कृतकत्वप्रसिद्धिर्मन्त्राणाम् । तथाहि—"तत्रेतिहास माचक्षते— विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव । * * * । स वित्तं गृहीत्वा विपाट्छुतुद्र्योः सम्भेद माययावनुययुरितरे । स विश्वामित्रो नदीं तुष्टाव गाधा भवतेत्यपि, द्विवदपि बहुवत् (२भा० २३७पृ०)"—इत्यादि । तथा "धातोः कर्मणः समानकर्तृकादिच्छायां वा (३.१.७.)"—इति पाणिनीयस्य सूत्रस्य व्याख्यानावसरे प्रसङ्गतो भगवता पतञ्जलिनापि भाषितम्—"ऋषिः पठति—'पृणीत

ग्रावाणः’-इति”—इति। स्तवनपठनादिकञ्च कृतिविशेष एव ; तदेवं मन्त्रकर्तृत्वं मन्त्रद्रष्टृत्वञ्च वस्तुतोऽभिन्न मिति स्फुटम्।

तदित्थं मन्त्रद्रष्टृत्वं त्वृषीणा मेव, तथा ऋषित्व मपि मन्त्रद्रष्टृत्वानुगत मेवेत्यपि स्थिरम्। एव मृषित्व-मन्त्रद्रष्टृत्वयोः सामानाधिकरण्यं सर्वसम्मत मिति मन्त्रद्रष्टृत्वमूलक मेव मुख्य मृषित्व मित्यत्र च न कोऽपि संशयः। अथ कस्या मपि संहितायां यास्ककृत एकोऽपि मन्त्रो न दृष्टचरः, न चाद्ययुगीयस्यास्य यास्कस्य मन्त्रकर्तृत्वसम्भवोऽपि ; तदेव मस्य यास्कस्य मन्त्रकर्तृत्वाभावात् मुख्य मृषित्वन्तु नास्त्येव।

ब्राह्मणकर्तॄणां ताण्ड्यादीनां मन्त्रकर्तृत्वाभावेऽपि मन्त्रकर्तृत्वतुल्यतया आतिदेशिक मृषित्वन्तु स्वीकृत मेव यास्कपूर्वतनैरपि। तथाहि—“साक्षात्कृतधर्माण ऋषयो बभूवुः *** उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं वेदाङ्गानि च (२ भा० १३७)”-इति। अत्र ‘अवरे’-इति पदात् ऋषय एव गम्यन्ते ; तथाच निघण्टुकारस्य, ब्राह्मणापरपर्यायाणां वेदानां प्रवक्तॄणाम्,वेदाङ्गानाञ्च कर्तॄणा मपि ऋषित्वव्यवहार आर्यसम्मत एवेति तत्र ध्वनितम्। तदत्र, यास्कस्य निघण्टुकर्तृत्वं नैवेति पूर्वमेव प्रतिपादित मस्माभिः ; ब्राह्मणप्रवक्तृत्व मपि नास्त्येव ; वेदाङ्गकर्तृत्वं त्वस्ति, परं न तद् वेदाङ्ग मिदं निरुक्तम्, यत्कृत मृषित्वं स्यादेतत्कर्तुर्यास्कस्य ; प्रदर्शितयास्कानूक्तश्रुतितोऽपि यास्कपूर्वप्रचलितनिरुक्तादिकर्तॄणा मेव ऋषित्वावगमात्। तदेतावतेद मेव निष्पन्नम्, यास्कस्यास्य त्वेव मातिदेशिक मृषित्व मपि नोपयुज्यते इति।

अथ प्रदर्शिते शतपथब्राह्मणवचने व्यक्त मेवास्य पूर्वपुरुषस्य मधुविद्याप्रवक्तृत्वम्, मधुविद्या च ब्राह्मणान्तर्गतैव ; तथाच तादृशस्य ब्राह्मणप्रवक्तुः वंशधरत्वेनैवास्यापि यास्कस्य मुख्यर्षित्व मापाद्य मेवेत्यपि वक्तुं न युज्यते ; लोकवेदव्यवहारविरोधात् ; न च लोके नापि वेदे ऋषिवंशप्रभवत्वेनैवर्षित्वं क्वचिदपि हि व्यवहृतं दृश्यते।

लोके तावत्— वयन्तु कश्यपर्षिवंशप्रभवा एव, परं कः खलु भारते

ऽस्मान् प्रति ऋषय इमे इति व्यवहरन्ति ? किं बहुना यदि हि वंशप्रभवत्वेनैव ऋषित्व माप्यं भवेत्तर्हि अद्यतनीया अप्यार्याः सर्वे एव प्राय ऋषय एवोक्ताः स्युः ; सर्वेषा मेव कश्यप-भरद्वाज-वसिष्ठादि-वंशीयत्वात् ; न ह्येवं व्यपदेशो दृश्यते लोके क्वापीति नैवं व्यवहारो लौकिक इति स्फुटम् ।

वैदिकव्यवहारतस्त्वधिगम्यते नावाप्य ऋषित्व मृषिवंशप्रभवत्वेनैवेति । तथा हि—"अर्चनानाः पुराऽऽत्रेयो दाल्भ्येन रथवीतिना । आर्त्विज्याय वृतो यज्ञे वितते ह्यौच आश्रितः । रथवीतिसुतां कन्यां ददर्श पितुरन्तिके । ययाचे स्वकुमाराय श्यावाश्वाय च तां सुताम् । स प्रदानमना भार्या मपृच्छत् किं प्रयच्छसि । इति पृष्टा पुनः प्राह कथ मस्मै प्रदास्यसि । इतः पूर्वं सुता दत्ता नासीदनृषये क्वचित् । तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसम् । श्यावाश्वः संस्थिते यज्ञे तेन राज्ञा निराकृतः । तत्प्रत्याशान्वितो विप्रस्तपस्तेपे सुदारुणम् । ब्रह्मचर्यरतः शान्तो भिक्षार्थं पर्यटन् द्विजः । तरन्तमहिषीं साध्वीं बिभिद्वेऽसौ शशीयसीम् । सा तमाप्यान्तिकं पत्युः प्रोवाचागतवानृषिः । इत्युक्तो नृपतिर्भार्यां प्रत्याहैनं प्रपूजय । सानुज्ञाता गवां यूथं प्रादादाभरणानि च । तरन्तोऽपि पुनस्तस्मै प्रादाद्धन मपेक्षितम् । दत्त्वा च पुरुमीढस्य स्वानुजस्यान्तिकं प्रति । प्रेरयामास त मृषिं सोऽपि त्वां मानयिष्यति । तथेति राज्ञो वचनं निशम्य तद्भार्यया दर्शितसर्वमार्गः । गच्छन् शनैरर्द्धपथे मरुद्गणान् समानरूपान् स्वदिदृक्षयागतान् । विलोक्य विप्रः सभयः प्रणम्य कृताञ्जलिः कण्टकिताङ्गसङ्घः । तुष्टाव दृष्टान् मरुतो विशिष्टैरथैर्वचोभिः परितुष्टचित्तः । सम्प्राप्य सर्वं स्वमनीषितं तदा मरुद्गणेभ्यो मुदितात्मवक्त्रः । तदाभवदृषिः सूक्तद्रष्टा श्यावाश्वनामकः । पश्चात् पुनर्गृहं गत्वा भूयो लब्ध्वा गवां शतम् । दाल्भ्यो मन्त्रदृशे राज्ञा चोदितः स्वसुतां ददौ । पुरुमीढस्तरन्तश्च तद्भार्या च शशीयसी । दाल्भ्यो यो रथवीत्याख्यः सप्त ये मरुतां गणाः । ते तस्मै यद्ददुस्तुष्टास्तत् केष्ठेत्यत्र वर्ण्यते ॥"—इति शौनकीय-बृहद्देवतोक्तं सायणलिखितं पुरावृत्तं 'केष्ठा'—इति सूक्ती-

योपोद्घातम् । तच्च सूक्त मेकोनविंशत्यृच ऋक्संहितायाः पञ्चमाष्टकीय पञ्चमाध्यायस्य पञ्चमम् । एवञ्च यद्यपि अत्रिवंशप्रभवः अर्चनानाः, ऋषिरिति प्रसिद्धः, तथापि तत्पुत्रः श्यावाश्वो न ऋषिशब्दव्यपदेशभाक् पितृनामकृत इति सुव्यक्त मत्र ।

अर्चनानसः ऋषित्वं तु तत्रैवाग्रे स्पष्ट मुक्तम् । तथाहि, तत्र सूक्तीय-सप्तदशर्गव्याख्यानप्रसङ्गे च पुनः—"सम्पन्नऋषिभावस्य श्यावाश्वस्यार्चनानसः । रथवीतिसुतायाश्च विवाहं शौनकोऽब्रवीत् । कथम् ? मरुत्सु तु प्रयातेषु श्यावाश्वः सुमहायशाः । प्रादुर्भूतार्षं मात्मानं ज्ञात्वाऽत्रिकुलनन्दनः । रथवीतेर्दुहितर मगच्छन्मनसा तदा । स सत्य ऋषि मात्मानं प्रवक्ष्यन्रथवीतये । 'एतं मे स्तोमम् (५.५.५.१७,१८.)'-इत्याभ्यां दौत्ये रात्र्यं न्यवेदयत् । ऋषेर्नियोग माज्ञाय देव्या राज्ञ्या प्रचोदितः । आदाय कन्यकां दातु मुपेयायार्चनानसम् । पादौ तस्योपसङ्गृह्य स्थित्वा प्रह्वः कृताञ्जलिः । रथवीतिरहं दाल्भ्य इति नाम शशंस सः । मया संयोग मिच्छन्तं त्वां प्रत्याचक्षि यत् पुरा । तत् क्षमस्व नमस्तेऽस्तु मे मास्म भगवन् ! क्रुधीः । ऋषेः पुत्रः स्वय मृषिः पितासि भगवानृषेः । हन्त प्रतिगृह्णाणेमां स्नुषा मित्येन मब्रवीत् । तस्मै ददावश्वशतं स राजा स्वलङ्कृतां चापि सुतां स्नुषार्थम् । विवाहकालेऽपि ददौ नरेन्द्रः शतं हयानां दुहितुः सहस्रम् । गवां सहस्रं वसु च प्रभूतं तस्मै तपोऽन्तेऽथ वनं जगाम"—इति । एवञ्च श्यावाश्वस्य, पितुः पितामहस्य च ऋषित्वेऽपि न ऋषित्वव्यवहारोऽभूत् ; अपि तु मन्त्रद्रष्टृत्वेनैवेति सुव्यक्त मेव ।

ऋक्संहितायान्तु श्यावाश्वस्य सप्तदश सूक्तानि (५.५२—६१ ; ५.८१ ; ५.८२ ; ८. ३५—३८; ९. ३२.), तत्र च १७७ ऋचः श्रूयन्ते ; अत एव तस्य ऋषित्वम् । तत्पितुः अर्चनानसस्तु त्रीणि सूक्तानि (५. ६३ ; ५. ६४ ; ८. ४२.), तत्र च २० ऋचः श्रूयन्ते ; अत एव तस्यापि ऋषित्वम् । तत्पितुश्च अत्रेर्भौमस्य चतुर्दश सूक्तानि (५. २७ ; ५. ३७—४३ ; ५. ७६ ; ५. ७७ ; ५. ८३—८६.) तत्र च १२२ ऋचः; अपरसूक्तेषु च तस्यैवान्येः

खलु नव (९. ६७. १०—१२; ९. ८६. ४१—४५; १०. १३७. ४.) ऋचः श्रूयन्ते; अतएव तस्यापि ऋषित्वम्। अचिन्त्व ऋक्संहिताया मेको भौमोऽपरः प्राह्णः; तदत्र न ज्ञेयः कतरोऽस्य श्यावाश्वस्यादिपुरुषः? परं प्राह्णस्याप्यत्रेरस्ति षडृच मेकं सूक्तम् (९. १४३.); अतस्तस्याप्यृषित्वम्। तदित्थ मस्य हि यास्कस्य मुख्यर्षिवंशप्रभवत्वेऽपि मुख्यर्षित्वं सुदुर्लभ मेव।

नन्वेवं महाभारते कथ मुक्तं दृश्यते "यास्को मा मृषिरव्यग्रः"—इति, "यास्क ऋषिरुदारधीः"—इति च? अत्र ब्रूमः— तत्तु महाभारतकारस्य खस्य यथा ऋषित्वं तथैव पूजनीयत्वापरपर्यायक मेव; तादृग ऋषित्वयापि वर्त्तत एवेति। वस्तुतो मन्त्रद्रष्टृत्वेनैव आदिवसिष्ठादीना मृषित्वं मुख्यम्; तादृ-गृषित्वन्तु ताण्ड्यादीनां ब्राह्मणप्रवक्तृणा मपि नास्ति; तत् महाभारतरामा-यणादिकर्त्तृणान्तु कथा दूरपराहतैव। तत्तुल्यत्वेन च ऋषित्वं द्वितीयम्; तदेवाह महाभाष्ये भगवान् पतञ्जलिः—"न तावदन्टषिः कश्चित् स्मर्यते कल्पसूत्रकृत्। कर्त्तृत्वं यदृषीणान्तु तत् सर्वं मन्त्रकृत्-समम् (१.३.१०.)" —इति। तदेवं द्वितीय मृषित्वम्, ब्राह्मणभागप्रवक्तृणाम् अनुब्राह्मणप्रवक्तृ-णाम्, ब्राह्मणान्तर्गतानां किञ्च प्रायोलुप्तानां—कल्पादिवेदाङ्गशास्त्राणां प्रव-क्तृणाम्। ईदृगृषित्व मपि नास्ति तेषा मद्यप्रचलितैतन्महाभारतकारादी-नाम्। बहुश्रुतत्वात्, बहुमानत्वादितस्मादरातिशय्यप्रकाशकवचन मिदम् "अय मृषिः"—इति यत्र प्रयुज्यते, तस्य त्वृषित्वं पूजनीयत्वापरपर्य्यायकं तृतीयम्। तादृगृषित्व मेव व्यासवाल्मीक्यादीनाम्। तत् तार्त्तीयीक मृषित्व मेव यास्कस्यास्य स्थित मिति मन्यते चेन्न तत्रास्माक मसम्मतिः; परं मुख्य मृषित्वं तु तस्य नासीदेव, द्वितीयत्विषं मपि न सम्भाव्यते।

अपि च गणपाठे शिवादिषु (४.१.११२.) यस्कपाठदर्शनाच्चेद मपि ज्ञायते,— यन्नामतोऽस्य नाम यास्क इति, तस्याप्येतदादिपुरुषस्य नासीत् ऋषित्व मिति; सति हि तस्य ऋषित्वे ऋष्यणा (४.१.११४.) एव यास्केति सिद्धौ तत्पाठफल माकाशकुसुमायित मेव स्यात्। अत एव "यास्को मुनिः"—इति दृश्यते मुग्धबोधादौ; न तु "यास्क ऋषिः"—इति।

यास्कस्य मुख्यर्षित्वविचारस्तु दूरे आस्ताम्,—विक्रतिवल्लीकारः खलु यास्कपूर्वजो व्याडिस्तद्गुरोः शौनकस्य प्रातिशाख्यकारस्यापि मुनित्व मेव। तथाहि—"नत्वादौ शौनकाचार्यं गुरुं *** मुनीन्द्रम्"—इति (वि० १. २.)। "पुनः किं विशिष्टम्? 'मुनीन्द्रम्' मननशीला मुनयः, तेषु श्रेष्ठम्"—इति च तत्र तट्टीकाकारः। तथा पाणिनि-कात्यायन-पतञ्जलीना मपि मुनित्व मेव सर्वत्र व्यवहृतं गम्यते, न क्वाप्यृषित्वम्। तथा हि—"मुनित्रयं नमस्कृत्य"—इत्याह दीक्षितः; किञ्च "योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन। योऽपाकरोत् तम् प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि"—इत्यत्रापि पतञ्जलेर्मुनिप्रवरत्व मेव स्मर्यते। तथा "तत्र वृद्धिरादैजित्याद्यध्यायाष्टकात्मकं महेश्वरप्रसादेन भगवता पाणिनि नैव प्रकाशितम्। अत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम्, तद्वार्त्तिकस्योपरि च भगवता पतञ्जलिना महाभाष्य मारचितम्। तदेतत् त्रिमुनि व्याकरणं वेदाङ्गं माहेश्वर मित्याख्यायते"—इति चाह प्रस्थानभेदकृन्मधुसूदनोऽपि।

वेदाङ्गेषु षट्सु, यास्तु शिक्षाः तैत्तिरीयब्राह्मणादौ श्रूयन्ते, तासा मेव ऋषिकृतत्वम्; छन्दोविधानानि च यानि सामवेदीयानुब्राह्मणादौ श्रूयन्ते, तेषा मेव ऋषिकृतत्वम्; ज्योतिषाञ्च ये खलु निदानसूत्रादौ श्रूयन्ते तेषा मेव ऋषिकृतत्वम्; व्याकरणानि च पदपाठाद्यात्मकानि पुरा स्थितानि, यानि चेदानीं पाणिनीयार्कप्रभातोऽदृश्यानि,—अहनि सहस्ररश्मिप्रभातस्तारकामण्डलानीव किञ्च शाकटायनीयकृत्तन्त्रादीनि च यानी दानी मपि ज्योतिरिङ्गणा इव वरीवर्त्तन्ते, तेषा मृषिकृतत्व मेव; निरुक्तानि च यानि ब्राह्मणेषु दृश्यन्ते, अनुब्राह्मणेषु च स्थितानीत्यनुमीयन्ते, निदानसूत्रेषु चोपलभ्यन्ते, शाकपूण्यादिकृतान्यासन्निति च यास्कवचनादितोऽवगम्यन्ते, तेषा मृषिकृतत्व मेव; पैङ्ग्यादीना मतिप्राचीनतमकल्पसूत्राणान्तु प्रायो ब्राह्मणसमकालिकत्व मेव पाणिनिशासनादिभिरवगम्यते, तत्तेषा मृषिकृतत्वे तु नास्त्येव सन्देहावसरः। यतश्च पैङ्ग्यादीनि

प्राचीनतमानि कल्पसूत्राणि चिरादेव ब्राह्मणतः पृथगेव प्रोक्तानि, प्रायस्तत्समकालिकानि चेति तेषा मार्षत्वं निर्विवाद मेव ; अतो भाष्योद्धृतायां सङ्ग्रहकृतकारिकायां 'न अन्टषिः कल्पकृत्'–इति कल्पकृता मेवान्टषित्वशङ्का निवारिता ; न हि तत्रोक्तं दृश्यते 'न अन्टषिः वेदाङ्गकृत्'–इति । एवं हि निष्पन्न मेतत्,— ब्राह्मणानुब्राह्मणान्तर्गतानां निरुक्तादीनां वेदाङ्गाना मातिदेशिकार्षत्व मस्त्येव; शाकपूण्यादिकृतानाञ्च तथा सम्भवः, यास्कीयस्यास्य ग्रन्थस्यार्षत्वं तु महाभारतादिग्रन्थाना मिव तार्त्तीयीक मेवेति ।

विकृतिकौमुद्यादौ यत् पाणिनिपरजस्यापि व्याडेः ऋष्याख्यानं दृश्यते— "व्याडिनैव महर्षिणा"–इति (१.४श्लो०), तदपि तथाभिप्रायेणैव ; तेषां हि नये मन्त्रादिकर्तृयोग्यतैवर्षित्वे निदानम् । तादृशी योग्यता तु नूतनवेदाङ्गानां तदङ्गानाञ्चापि कर्तॄणां पाणिनि-व्याडि-शौनक-यास्कादीना मासीदेवेति तेषा मप्यृषित्वं मन्तव्य मेवेति भवेत्तदपि तार्त्तीयीक मेव ; तद् भवतु नामात्रापि न नो विवादः । ऋक्प्रातिशाख्यकृत् शौनकोऽपि तार्त्तीयीक मार्षत्व मेवाभिप्रेत्योक्त मेवम्—"कृत्स्नञ्च वेदाङ्ग मनिन्द्य मार्षम्' इति– (कृ ए०) । अपि च व्याडेर्मुख्यर्षित्वे तु क्रौड्यादिगणे व्याडिशब्दस्य पाठो वैयर्थ्य मेवापद्येत ; "क्रौड्यादिभ्यश्च (पा० ४.१.८०.)"–इति सूत्रस्याप्यनार्षविषयत्व मेव निर्णयात् ; तस्य हि "अणिञोरनार्षयोः ०(४. १. ७८.)"— इत्येतत्सूत्रीयप्रपञ्चभूतत्वात् । अत एव "गोत्रावयवात् (पा० ४. १. ७९.)"–इति सूत्रस्य भाष्ये—"अष्टाशीति सहस्राण्यूर्द्ध्वरेतसा मृषीणां बभूवुः, तत्रागस्त्याष्टमैः ऋषिभिः प्रजननोऽभ्युपगतः, तत्र भवतां यदपत्यं तानि गोत्राणि, अतोऽन्ये गोत्रावयवाः । * * * । कथं येभ्यः अगुरूपोत्तमेभ्य इष्यते ? सिद्धन्तु रौढ्यादिषूपसङ्ख्यानात् । * * * । के पुनरौढ्यादयः ? ये क्रौड्यादयः"–इत्याह भगवान् पतञ्जलिः । तदेतत्सार मेवाकृष्योक्तं दीक्षितेन सिद्धान्तकौमुद्याम्—"अगुरूपोत्तमार्थोऽनणिञर्थश्चारम्भः"-इति ; न चोक्तं तेन तत्रार्षार्थश्चेति । यद्यप्यृषिरपि कश्चिद् व्याडिः स्यात्, तर्हि तदपत्यं न भवेत् 'व्याड्या' इत्यतोऽत्र क्रौड्यादिगणेऽवश्यं गणपाठकार-भाष्यकारा-

रिभिः कश्चन यतः कर्त्तव्य एव ; न च तथात्वं दृश्यते। अतो व्याडेरपि मुख्य मृषित्वं नास्त्येवेति किं तत्परजस्यैतस्य यास्कस्यर्षित्वविचारेणेत्यलम्। सङ्ग्रहकारो व्याडिरेव विज्ञतिवल्लीकारः; स च पाणिनिपरजो यास्क-पूर्वजश्चेत्यपि प्रतिपादयिष्यामो वय मुपरिष्टादिहैव।

आश्वलायनगृह्यसूत्रेऽपि मन्त्रकृता मेव गणानां मुख्य मृषित्व मिति तेषां विशेषत उल्लेखो दृश्यते। तथाहि—"अथ ऋषयः,—शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्यः क्षुद्रसूक्ताः महासूक्ता इति (३.४.२.)"-इति। तत्रैव चेतोऽनन्तर माचार्य-नामान्यपि कानिचित् स्मृतानि—"सुमन्तु-जैमिनि-वैशम्पायन-पैल-सूत्र-भाष्यभारतमहाभारतधर्माचार्या जानन्ति बाहवि-गार्ग्य-गौतम-शाकल्य-बाभ्रव्य-माण्डुकेया गार्गी वाचक्नवी वडवा प्राचीथेयी सुलभा मैत्रेयी कहोलं कौषीतकं पैङ्ग्यं महापैङ्ग्यं सुयज्ञं साङ्ख्यायन मैतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्र मौदवाहिं महौदवाहिं सौजामिं शौनक माश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यन्त्विति (३.४.४.)"-इति। इह त्वाचार्यनामसु यद्यपि न दृश्यते यास्कनाम, पाणिन्यादीनाञ्च नाम; तथापि सूत्रकारत्वेनैव पाराशर्यकाशभच्छाश्चरणपाणिनिप्रभृतीनां, निघण्टुसमाम्नायभाष्यकारत्वेन च यास्कस्य ग्रहणा मिष्ट मिति गम्यते।

अद्यप्रचलितमहाभारतस्य बीज मासीत् पुरा किञ्चन भारतं नाम, तदेव क्रमादङ्कुरितं प्रस्फुटतत्त्व मभूत् प्रसिद्धं महाभारत मिति, तन्महा-भारत मेव प्रवृद्धं पल्लवितं विस्तृत मिदानीं दृश्यते महाभारत मित्येवेति चेह गुरुचरणाः। किञ्च अत्र स्मृतः शौनकस्तु न चादिकालिको मण्डल-कार ऋक्संहितायाः, तस्य ह्यत्र ऋषिनामसु गृत्समद इत्येव ग्रहणात्; नापि बह्वृक्प्रातिशाख्यकारोऽपि तु शाखाविशेषस्य प्रवक्तैव; शाकलादि-साहचर्य मेव हि तत्र नियामकम्। आश्वलायनोऽप्यत्र न तु गृह्यादिकृदपि शाखाप्रवक्तैव, अत्रापि हि शाकलादिसाहचर्य मस्त्येव नियामकम्; को हि नाम 'रामकृष्णावमू आसाते'—इत्यत्र दशरथापत्यस्य रामस्य, 'राम-

लक्ष्मणौ'—इत्यत्र च आमदसादेर्ग्रहणा मिच्छति। वस्तुतस्त्विहाश्वलायनीये अधोऽधः क्रम एव विवक्षितः। तथाहि—सुमन्त्वादयः चत्वारो व्यासशिष्याः समकालिकाः, तत्पूर्वजा व्यासादयः सूत्रकाराः, तत्पूर्वकालिका वाह्वयादयः संहितापाठाध्ययनभेदोपदेशकाः, तत्पूर्वतनाः गार्गीप्रभृतयो ब्रह्मवादिन्यः, तत्पूर्वतनाः कहोलादयो ब्राह्मणादिप्रवक्तारः, तत्पूर्वतना एव शाकलादयः शाखाकारा इति। एव मेव क्रमो सामवेदीयवंशब्राह्मणादौ च सर्वत्रैव सायणादिभिश्च सर्वैरेवोररीकृत इति दिक्।

ततश्चैषा मध्ययुगीयानां तार्त्तीयीकर्षित्वसम्पन्नानां सुमन्तुप्रभृतीनाम्, तत्पूर्वकालिकाना मतिदिष्टर्षिभावापन्नानाञ्च वाह्वयादीना मतिवृद्धाश्वलायनान्ताना माचार्यत्व मेव सम्मत माश्वलायनस्यापि ; न तु मुख्यर्षित्व मिति।

सामान्यत ऋषिलक्षणं तु न दुर्लभं सम्भाव्यते ऽध्ययुगीयानां सुमन्त्वादीना मपि। तथा च सूचित मिहैव त्रयोदशाध्याये;—"मनुष्या वा ऋषीषूत्क्रामत्सु देवानब्रुवन्,—को न ऋषिर्भविष्यति ? इति। तेभ्य एतं तर्क मृषिं प्रायच्छन्,—मन्त्रार्थचिन्ताभ्यूह मभ्यूढम्। तस्माद्यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद् भवति (४भा० ३५८ पृ०)"—इति। एवञ्च 'अनूचानत्वे सति मन्त्रार्थाभ्यूहनसमर्थत्वम्, ऋषित्वम्'—इत्येव सामान्यत ऋषिलक्षणं फलितम्। अनूचानस्तु गुरुमुखाल्लब्धवेद एव; तल्लक्षणादिकं तु द्रष्टव्यं मन्वादौ। मन्त्रार्थाभ्यूहनप्रकारस्तु इहैव विहितः,—"तपसा पार मीप्सितव्यम्"—इत्यादिना; "शाकपूणिः सङ्कल्पयाञ्चक्रे (२भा० १८८ पृ०)"—इत्याद्युदाहृतञ्च तदत्र यास्केन। तदीदृश मृषित्वं त्वस्माक मपि कृतब्रह्मचर्य्याणां मन्त्रार्थाभ्यूहनसमर्थानां सम्भवेदेव, तत् किन्नाम भगवतोऽस्य यास्कस्येति।

इत्थं निष्पन्न मेतत् ;—एतन्निरुक्तकारो यास्कः खलु वस्तुतो मुनिराचार्य्यस्त्वेव चिरात् प्रसिद्धः; एव मप्यस्य भगवतः सामान्यत ऋषित्व मव्याहत मेव ; तत्रापि विशेषतो विचारिते स्यात् तार्त्तीयीकं तदिति सिद्ध मेतस्यापि च ग्रन्थस्यार्षत्व मिति शम्।

(६)

अथेदानी मिद मिह विचार्य्यम्,—कियान् निरुक्तग्रन्थोऽय मिति। अस्माभिस्तु यावन्ति निरुक्तपुस्तकानि दृष्टानि, तेषु सर्वेष्वेवास्य "समाम्नायः समाम्नातः स व्याख्यातव्यः"-इत्यारम्भवाक्यं दृष्ट मेव, च-जातिरिक्तेषु सर्वेष्वेव "ब्रह्म शुक्ल मसीय ब्रह्म शुक्ल मसीय"-इति परिसमाप्तिवचनञ्च; च-ज-पुस्तकयोस्तु "य एवं वेद"-इत्येव समाप्तिवाक्यम्; तदुत्तरस्थितः "नमो ब्रह्मणे नमो महते भूताय नमः पारस्कराय नमो यास्काय ब्रह्म शुक्ल मसीय ब्रह्म शुक्ल मसीय"-इत्येवं पाठस्तु तयोर्न दृश्यते; तदिदं न विशेषपार्थक्यम्। द्वि-चतुः-खण्ड-कृतं न्यूनाधिक्यं खण्डभेदकृत माधिक्यं चाकिञ्चित्कर मेवेदृशे प्राचीनतमे ग्रन्थे। तथाप्यस्ति किञ्चिदत्र विचारणीयम्। तथाहि—केषुचित् पुस्तकेषु द्वादशाध्यायान्तं निरुक्तम्, तत उत्तर मध्यायद्वयात्मकं परिशिष्ट मिति लिखितं दृश्यते; केषुचित् द्वादशाध्यायान्त मेव निरुक्तम्, परं तत उत्तर मेकाध्यायात्मक मेव परिशिष्ट मिति लिखितं दृश्यते, अपि तस्मिन्नेकस्मिन्नेवाध्यायेऽपरपुस्तकदृष्टाध्यायद्वयीयाः सर्व एव खण्डा विद्यन्त एव; केषुचित्तु तादृश-त्रयोदशाध्यायस्यान्ते एव "निरुक्तं समाप्तम्"-इति लिखित मस्ति, परिशिष्टशब्दोऽपि न तेषु लक्ष्यते; केषुचित् अन्त्याध्यायद्वयान्ते परिशिष्टं समाप्तं लिखित मस्ति, किन्तु तयोः क्रमात् त्रयोदशचतुर्दशाध्यायत्वे च। अत एतर्हि विचार्यते द्वादशाध्यायात्मकं त्रयोदशाध्यायात्मकं चतुर्दशाध्यायात्मकं वेति कत्यध्यायं निरुक्त मिति।

निघण्टुव्याख्यानकारस्य देवराजयज्वनो मते तु "समाम्नायः समाम्नातः (२ भा० ८ पृ०)"—इत्यादि, "य ऋतुः कालो जायानां य ऋतुः कालो जायानाम् (४ भा० ३३२ पृ०)"—इत्यन्तं द्वादशाध्यायात्मक मेव यास्कीयं निरुक्तम्। तदुक्तम्—"भगवता यास्केन समाम्नायं नैघण्टुक-नैगम-दैवत-काण्डरूपेण त्रिविधं गवादि देवपत्न्यन्तं निर्ब्रुवता"—इत्यादि (१ भा० २—५ पृ०)। नाचातिस्तुतिप्रकरणस्योर्द्ध्वमार्गगतिप्रकरणस्य च नामापि कीर्त्तितम्;

सन्ति तु तत्रतत्रापि बहूनि निर्वचनपदानि, येषां च प्रामाण्यरूपेण ग्रहणं योग्य मेव देवराजयज्वनः ; यज्वना तु "स्कन्दस्वामिना च निगमव्याख्यानेषु अन्यानि च पदानि शतद्वयमात्राण्युपात्तानि (१भा० ४ पृ०)"–इत्यपि स्वग्रन्थप्रामाण्यपरिरक्षणायोक्तं परं त्रयोदशचतुर्दशाध्यायीयनिर्वचनाना मस्तित्वं तत्सम्मत मेव चेत् कथं न तेषा मिह स्मरणं कृतम्? तथाच तादृशानां स्वर्त्तव्यानां मप्यस्मरणात् तेषा मस्तित्वेन निरुक्तत्वेन वा ज्ञानाभाव एव तस्य यज्वनः सुव्यक्त इति ।

निरुक्तवृत्तिकृता दुर्गाचार्येण तु ग्रन्थारम्भे निरुक्तस्य द्वादशाध्यायीत्व मुक्तापि, अन्ते सपादद्वादशाध्यायीत्व मुक्तम् ; फलतस्त्रयोदशाध्यायीत्व मेव स्वीकृतम् । तथाहि प्रथमखण्डव्याख्यानारम्भे— "अयञ्च तस्या द्वादशाध्यायी भाष्यविस्तरः ; तस्य इद मादिवाक्यं समाम्नायः समाम्नात इति (२ भा० ८ पृ०)"–इति । अन्ते "ऋज्वर्थायां निरुक्तवृत्तौ अष्टादशाध्यायः (त्रयोदशाध्यायः) समाप्तः । इति सपादसप्तदशाध्यायी ऋज्वर्था नाम निरुक्तवृत्तिः समाप्ता"–इति (४भा० ३६५)। एवञ्च वृत्तिकृन्मते अतिस्तुतिरूप-त्रयोदशाध्यायस्य च निरुक्तत्व मेव, न तु परिशिष्टत्वम् ; ऊर्द्धमार्गगतिरूप-चतुर्दशाध्यायस्य (द्वितीयपरिशिष्टस्य) तु सर्वथाऽस्वीकरण मेव सम्पन्नम् । अपरञ्च त्रयोदशस्याध्यायस्य स्वल्पग्रन्थत्वादेकचरणत्व मेव मत्वा, ग्रन्थान्तेऽस्य विशेषतः सपादद्वादशाध्यायीत्वं स्वीकरिष्यमाण मपि सामान्यत एवोल्लिखित मुपक्रमे द्वादशाध्यायीति। तदेव मतिस्तुतिप्रकरणस्य स्वल्पत्वादध्यायरूपत्वाभावात् सामान्यतो निरुक्तग्रन्थो द्वादशाध्यायीत्येव निर्देश्यः; विशेषतस्तु सपादद्वादशाध्यायीति, किञ्च मूलसूत्ररूपनिघण्टुपञ्चाध्याय्या सह सपादसप्तदशाध्यायीति चेत्येव वृत्तिकृन्मत मभिव्यक्तम् ।

सायणाचार्यस्तु अतिस्तुतिप्रकरणात्मकस्य त्रयोदशस्याध्यायस्य च निरुक्तत्व मभ्युपगम्यापि वचनतो द्वादशाध्यायी एव निरुक्तग्रन्थ इति चाभिचख्यौ। तथाहि ऋक्संहिताभाष्यभूमिकायाम्–"तद्व्याख्यानञ्च समाम्नायः समाम्नात इत्यारभ्य तस्यास्तस्यास्ताद्भाव्य मनुभवत्यनुभवतीत्यन्तैर्द्वादशभिरध्यायैर्यास्को

निर्ममे"–इति। 'तस्यास्तस्यास्ताद्भाव्य मनुभवत्यनुभवति'—इति तु त्रयोदशाध्यायान्त एव विद्यते; न तु द्वादशाध्यायान्ते। तथा चैतन्मतेऽपि त्रयोदशाध्यायस्यातिस्वल्पग्रन्थत्वात् द्वादशाध्यायशेषत्वेनैव ग्रहणं व्यज्यते। किञ्चैतादृशनिरुक्तनिर्देशकथनादेतस्यापि नये ऊर्द्ध्वमार्गगतिप्रकरणात्मकस्य चतुर्दशस्याध्यायस्य सत्तापि न लभ्यते; परमाश्चर्यमेतत् "द्वा सुपर्णा (ऋ० स० २. ३. १७. ५.)"–इति मन्त्रस्य व्याख्यानावसरे प्रमाणत्वेनोपन्यस्तमेव तच्चतुर्दशाध्यायीय मपि निर्वचनं निरुक्त मिति। तथाहि—"अत्र 'द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्त्तारौ'–इत्यादि (निरु० १४ अ० ३० ख०; ४ भा० ४०४ पृ०) निरुक्ते गत मस्य मन्त्रस्य व्याख्यान मनुसन्धेयम्"–इति। तदत्र तत्त्व मुन्नेयं धीमद्भिरेव पूर्वापरदर्शिभिरिति।

अस्मन्मते तु "समाम्नायः समाम्नातः"–इत्यादि, "य ऋतुः कालो जायानाम्"–इत्यन्त मेव द्वादशाध्यायी ग्रन्थो यास्कीयं निरुक्तम्; अतिस्तुतिप्रकरणम्, ऊर्द्ध्वमार्गगतिप्रकरणञ्च न यास्कीयम्। समाम्नातानां हि निघण्टुपदानां व्याख्यानानि, तत्प्रसङ्गतो विशेषवक्तव्यानि च द्वादशाध्यायात्मकेनैव ग्रन्थेन वृत्तानीति सिद्धेऽप्युद्देशे कथ मन्यत्र यास्कस्य प्रवृत्तिरेवोदियादिति। अत एव सायण-दुर्गाचार्य-देवराजेत्येतेषु विद्वत्सु प्राचीनतमेन देवराजेन तयोः सत्तापि न द्योतिता; ततश्च देवराजकाले न स्त एव त इमे प्रकरणे; स्त एवेति चेन्न निरुक्तत्वेन प्रसिद्धे इति सुव्यक्त मेव। ततो दुर्गाचार्यसमयेऽपि ऊर्द्ध्वमार्गगतेर्दशा तु तथैव; पर मतिस्तुतेर्निरुक्तत्वे तु संशय एवासीत्तदानीन्तनानाम्। अत एव ग्रन्थारम्भकाले अनाकाङ्क्ष मतिस्तुतिप्रकरण मिति मत्वा तस्य निरुक्तत्वपरिहारं मनसि कृत्वैवोक्तं द्वादशाध्यायीत्वं निरुक्तस्य; पश्चाद् ग्रन्थावसानकाले तुष्यतुदुर्जन इति न्यायेन बहुपुस्तकस्थत्वादेव तस्याप्यादरः कृतोऽपि चिरप्रसिद्धो निरुक्तो द्वादशाध्यायात्मक एवेति संस्मृत्य पुनः सङ्कोचभावेनोक्तं सपाददादशाध्यायीति। सायणाचार्यस्त ततोऽप्यर्वाचीन इति निःसङ्कोचेनैवाभिचख्यौ तस्यास्तस्यास्ताद्भाव्य मित्यादि, परं चिरप्रवादानुगतं निरुक्तस्य द्वाद शाध्यायीत्वञ्च न तेनोपेक्षितम्।

तथा च तस्याप्याचार्यस्य वृत्तिकृदुक्तं सपादद्वादशाध्यायीत्व मेव सम्मत मपि प्रवादविरोधभिया तत्र मौनावलम्बन मेव चातुर्य मवलम्बितम् । ऊर्द्ध-मार्गगतिप्रकरणं तु तदापि निरुक्ते न प्रवेश मलभत ; सति हि प्रवेशे ऽवश्य मेव तन्नामापि सायणेन गृहीतं भवेदिति । यच्चावलोक्यते "द्वा सुपर्णा (ऋ० सं० २. ३. १७. ५.)"–इत्यस्य भाष्ये "अत्र द्वौ द्वौ *** निरुक्ते गतम्"–इत्यादि, न तद् भाष्यीयवचन मपि तु टीप्पनीटीपित माधुनिक मेव ; कालाल्लेखकानवधानात् तदन्तर्भूत मित्यत्र सन्देहाभावः । अन्यथा सायणाचार्यस्योन्मत्तता प्रसज्येतेति सुधीभिरेव विभाव्यताम् ।

तदेवं निष्पन्न मेतत्,—साम्प्रतं निरुक्तस्य चतुर्दशाध्याय इति प्रसिद्धम् ऊर्द्धमार्गगतिप्रकरण मनतिप्राचीनैरेव कैश्चित् निरुक्ताङ्गीभूतं कृतम् ; सायणाचार्यसमयेऽपि न तस्य निरुक्तत्वं निरुक्तपरिशिष्टत्वं वा स्थित मिति ; किञ्च यदेतर्हि निरुक्तस्य त्रयोदशाध्याय इति प्रसिद्धम्, तदतिस्तुतिप्रकरणं तु सायणकालात् पूर्व मेव निरुक्तान्तर्गतीभूतम् ; तत्पूर्वजस्य दुर्गाचार्यस्य कालेऽप्येतद्विषये तादृशाना मपि धीमतां धियः सन्देहदोलायां दोदुल्य-माना एव स्थिताः,—किमिदं निरुक्तं न वेति । तत्पूर्वकाले तु तयोर्निरुक्तत्व-शङ्कापि नासीदेव । अत एव यास्कीयेतन्निरुक्तात् परजेऽपि कात्यायनीयेऽत्र व्याकरणाध्ययनप्रयोजनान्वाख्यानपरवार्त्तिके 'चत्वारि शृङ्गाः (ऋ० सं० ३. ८. १०. ३.)'–इति मन्त्रस्योल्लेखो विद्यते ; अपि तदीये खलु पातञ्जले महाभाष्ये तस्य मन्त्रस्य निरुक्त-त्रयोदशाध्यायसम्मतं व्याख्यानं न दृश्यते, दृश्यतेऽपि तु व्याख्यानान्तर मेव तत्प्रकरणानुगतम् । तथाहि—"चत्वारि शृङ्गाणि, चत्वारि पदजातानि ; नामाख्यातोपसर्गनिपाताश्च । त्रयो अस्य पादाः, त्रयः कालाः ; भूतभविष्यद्वर्त्तमानाः । द्वे शीर्षे, द्वौ शब्दात्मानौ ; नित्यः कार्यश्च । सप्त हस्तासो अस्य, सप्त विभक्तयः । त्रिधा बद्धः, त्रिषु स्थानेषु बद्धः ; उरसि कण्ठे शिरसीति । वृषभः, वर्षणात् । रोरवीति, शब्दं करोति ; कुत एतत् ? रौतिः शब्दकर्मा । महो देवो मर्त्त्यान् आविवेश इति, महान् देवः शब्दः, मर्त्त्या मरणधर्माणो मनुष्याः ;

वान् आविवेश। महता देवेन साम्यं यथा स्यादित्यध्येयं व्याकरणम्"— इति। नैरुक्तव्याख्यानन्त्विहैव त्रयोदशे (४भा० ३४५ पृ०) द्रष्टव्यम्। यदि हि नामैतस्यातिस्तुतिप्रकरणस्यापि निरुक्तत्वं भगवतः कात्यायनस्याप्यभिमतं स्यात्तर्ह्येतस्य तु मन्त्रस्य तत्र प्रकरणेऽनुपयुक्तत्वादुल्लेख एव न स्यात्। तत् किं पतञ्जलेर्व्याख्यानान्तरप्रतिपिपादयिषयेति। किञ्चैव मत्र त्रयोदशेऽध्याये (४भा० ३४४ पृ०) 'जर्भरी'–इत्यस्य 'भर्त्तारौ'–इति, 'तुर्फरीतू'–इत्यस्य 'हन्तारौ'–इति चार्थद्वयदर्शनसम्पन्नोऽपि महाभाष्यकारः कथं ब्रूयात्— "बहवोऽपि हि शब्दा येषा मर्थो न विज्ञायन्ते 'जर्भरी'–'तूर्फरीतू' (१अ० १पा० १आ०)"–इति ? अतः स्पष्ट मेवाभिगम्यते—नाय मध्यायो भगवत्पतञ्जलिना दृष्ट इति। सिद्ध मित्थं द्वादशाना मेवाध्यानां यास्कीयनिरुक्तत्वम्, तस्यैव परिशिष्टरूपयोर्द्वयोस्तु महाभाष्यतोऽप्यर्वाचीनत्व मिति शम्।

---

(७)

अथेदानी मिद मपीह विचार्यं मस्ति;—कः कालोऽस्य यास्कस्य ? कस्मिन्नु समये ऽय मिमां भुव मलञ्चकारेति विवेचयामइति यावत्।

अहोवत! अस्माक मैतिहासिकग्रन्थो दोषशून्यः सर्वावयवशो विश्वास्यो नैकोऽपि दृश्यते; पुराप्यासीन्नवेति कस्यावगमो विद्यते।

सत्य मेतत् वेदानां मन्त्रभागेषु बहव एवेतिहासा लभ्यन्ते; तथा चोक्तं भगवता यास्केन—"त्रितं कूपेऽवहित मेतत् सूक्तं प्रतिबभौ; तत्र ब्रह्म,—इतिहासमिश्रम्, ऋङ्मिश्रम्, गाथामिश्रं भवति (२ भा० ३९४ पृ०)"–इत्यादि। परं प्रायस्ते सर्वे एवोपमामूलका रूपकवर्णनात्मका एव। तथाहि— अतिष्ठन्तीना मिति मन्त्रं व्याख्यन्निन्द्रशत्रुपदनिर्वचनावसरे चाह यास्कः—"इन्द्रशत्रुः; इन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः, तत्कः? वृत्रः;—मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर

इत्यैतिहासिकाः* । अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (२ भा० २१७ पृ०)"–इत्यादि ।

अन्यच्च; श्रूयते हि –"प्रजापतिरात्मनो वपा मुदक्खिदत् (तै० सं० २. १. १.)"–इत्यादि । अत्राप्येव मेव रूपकार्थाः कृता मीमांसाभाष्यकृत्कु-वरस्वाम्यादिभिः । तथाहि–"कथं पुनरनुत्खिन्नायां वपायां 'प्रजापति-रात्मनो वपा मुदक्खिदत्'–इत्याह ? उच्यते,–असद्वृत्तान्तान्वाख्यानम् ; स्तुत्यर्थेन प्रशंसाया गम्यमानत्वात् । इहान्वाख्याने वर्त्तमाने द्वयं निष्पद्यते,– यच्च वृत्तान्तज्ञानम्, यच्च कस्मिंश्चित् प्ररोचना द्वेषो वा । तत्र वृत्तान्ता-न्वाख्यानं न प्रवर्त्तकं, न निवर्त्तकं चेति प्रयोजनाभावादनर्थक मित्यविव-क्षितम् ; प्ररोचनया तु प्रवर्त्तते, द्वेषान्निवर्त्तते इति तयोर्विवक्षा । वृत्तान्तान्वाख्यानेऽपि विधीयमाने आदिमत्ता दोषो वेदस्य प्रसज्येत । कथम्पुनरिदं निरालम्बन मन्वाख्यायते ? इति, उच्यते—नित्यः कश्चिदर्थः प्रजापतिः स्यात्,—वायुः, आकाशः, आदित्यो वा । 'स आत्मनो वपा मुदक्खिदत् (तै० सं० २. १. १.)'–इति वृष्टिम्, वायुम्, रश्मिं वा । 'ता मग्नौ प्रागृह्णात् (तै० स० २. १. १.)'–इति वैद्युते, आर्चिषे, लौकिके वा । 'ततो अजः (तै०सं०२.१.१.)'–इति अन्नम्, वीजम्, विरुत् वा । 'त मालभ्य (त मुपयुज्य) प्रजाः पशूनाप्नोति (तै०स०२.१.१.)"–इति गौणाः शब्दाः (मी० भा० १. २.१.)'–इति । तथा चैवमादिभ्यो मन्त्रभागी-येतिहासेभ्यः कथङ्कार माम्नायमैतिहासिकं तथ्यम् ।

ब्राह्मणभागेषु च बहव एवेतिहासा उपलभ्यन्त इत्यपि सत्य मेव । तथा चैतरेयके—"प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम् (४.२.१.)"–इत्यादयः । पर मेवमादिष्वपि प्रायस्तथैवार्थोऽवगम्यते, तथैव नैरुक्तादिशासनात् । तथाच—"सूर्या, सूर्यस्य पत्नी ; एषैवाभिसृष्टकाल-तमा"–इति हि (२भा० २५८ पृ०) निरुक्तम् ; "एषैव उषाः, अभि-

* महाभारते व०प० १००,१०१अ० ; शा० मो०प०२७८—२८१ अ० ।

स्पष्टकाशतमा यथा यथा सूर्यस्योदयकालं प्रत्यभिस्पष्टतमा भवति, शुक्लतमा भवति, तथा तथा सैषा उषाः सूर्या सम्पद्यते (२भा० २६०पृ०)”—इति, “ज्योत्स्नां सोमाय ददाति; यदुक्तम्—आदित्यतोऽस्य दीप्तिर्भवतीति (२भा० २६३पृ०) ”—इति च तत्राह दुर्गाचार्यः। अथैवं मन्त्रब्राह्मणयोः नास्त्येवैतिहासिकं तथ्य मिति च वक्तुं न प्रक्रमः, न चास्माकं तथाभिप्रायः; पर मीदृशगूढतत्त्वागाधसलिलादभिमतैतिहासिकतथ्यरत्नोद्धारस्वरूपाक मतिदुष्कर एवेति ।

पुराणादिष्वपीतिहासा विद्यन्त एवेति च सत्यम्; तेषां प्राचीनेतिहासवर्णनपूर्वकधर्मोपदेशायैवोत्पत्तेः। परं तेष्वपि रोचनाद्यर्थान्येव बहून्युपाख्यानानि रूपकात्मकेभ्यो वेदशब्देभ्य एव सङ्गृह्योपबृंहितानि दृश्यन्ते; अत एव तत्तच्छास्त्रं वेदार्थोपबृंहण मित्याख्यायते (म० भा०१.१.२६४.)। तथाहि—इन्द्रस्याहल्याहरणोपाख्यानं बहुष्वेव काव्येतिहासपुराणेषु समासतो व्यासतो वा वर्णितं दृश्यते। वस्तुतस्तु वेदेषु ऋग्वेदीय-मन्त्रभागे “उदीरय पितरा जार आ भगम् (ऋ०सं०७.६.१०.१.)”—इति मन्त्रे श्रुतं जारपद मेव तादृशसर्वप्रसिद्धस्य अहल्योपाख्यानस्य मूलम्; न च तस्य मूलान्तर मस्ति; तस्य च जारशब्दस्य प्रकृतोऽर्थः खल्वेवं भाषितो यास्केन—“अथाप्युपमार्थे दृश्यते—‘जार आ भगम्’ जार इव भगम्। आदित्योऽत्र जार उच्यते; रात्रेर्जरयिता स एव (२भा०३२०पृ०)”—इति। ‘जार आ भगम्’—इत्येतावदेवालम्ब्यैव प्रथमं तावत् ब्राह्मणग्रन्थीय माख्यान माख्यातम्;— “अहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण (तै० आ०१.१२.४.)”—इति, “अहल्यायै जारेति (श०ब्रा०३.३.४.१८.)”—इति च। ततश्च तदेव मूलीकृत्यातिबृंहितं दृश्यते वाल्मीकीयरामायणे बालकाण्डेऽष्टचत्वारिंशोनपञ्चाशत्तमयोः सर्गयोः; तदेव चोपसङ्क्रान्तं क्रमान्महाभारतादिष्वपीतिहासपुराणेषु। भट्टकुमारिलस्वामिनाप्येतस्य ब्राह्मणग्रन्थीयेतिहासस्य प्रदर्शितनैरुक्तानुगत मेव व्याख्यानं स्पष्ट मभिहितं मीमांसाभाष्यवार्त्तिके। तथाहि—“समस्ततेजाः परमेश्वरत्वनिमित्तेन्द्रशब्द-

वाच्याः । सवितैवाहनि क्षीयमानतया रात्रेरहल्याशब्दवाच्यायाः क्षयात्मकजरणहेतुत्वात् जीर्य्यत्यस्मादनेन वोदितेन वेत्यहल्याजार इत्युच्यते; न परस्त्रीव्यभिचारात् (६. १. ४१.)"—इति । मीमांसायाः सूत्र-भाष्य-वार्त्तिक-न्यायमालादिषु सर्वत्रैव सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानूहाधिकरणेऽन्यानि चैव मुदाहृतानि (६. १. १५. अधि०) ।

एवं बहुष्वेव पुराणादिषु "उषो न जारः (ऋ० सं० १. ६६. १.—६.—७. १०. १.)"—इत्येतन्मन्त्रमूलकं प्रजापतेः स्वकन्यानुगमनाख्यानञ्च वृंहितं दृश्यते; परं तदपि रूपकत्वेनैव व्याख्यातं ब्राह्मणे। तथाहि—"प्रजापतिर्वै स्वां दुहितर मभ्यध्यायत्; दिव मित्यन्य आहु रुषस मित्यन्ये (ऐ०ब्रा०३.३.६.)"—इत्यादि । तत्रैव मीमांसावार्त्तिके अस्याप्यौपचारिक मेव व्याख्यानं कृतं दृश्यते। तथाहि—"प्रजापतिस्तावत् प्रजापालनाधिकारादादित्य एवोच्यते। स चारुणोदयवेलाया मुषस मुद्यन्नभ्येति । सा तदागमनादेवोपजायत इति तद्दुहितृत्वेन व्यपदिश्यते। तस्याञ्चारुणकिरणाख्यवीजनिक्षेपात् स्त्रीपुरुषसंयोगवदुपचारः"—इति। इत्थ मस्मदितिहासपुराणादिवचनेष्वपि ऐतिहासिकं तथ्यं कथ मुपलभ्येत ? तथ्येऽपि वा कथं न सन्देहो दुर्वार एव ?

कि मधिकेन यदि हि नाम यौधिष्ठिराब्दः प्रचलितो न स्यात्, यौधिष्ठिरीयस्तम्भादिकं च न दृश्येत, तर्हि को नाम महाभारतवचनादेव विश्वस्यादासीत् पुरा युधिष्ठिरो नाम नृपतिरित्यपि ? तत्र यौधिष्ठिरीयेतिहासेऽपि अर्जुनस्य स्वर्गीयेन्द्रसभायां गमनादीनि (व० प० ३७—५१ अ०) बहून्येव कविकल्पितानि सन्तीति धीमत्समाजेषु प्रसिद्धान्येव। भारतीयेतिहासग्रन्थेषु च महाभारत मेव सर्वप्रधानम्; अत एवोक्तं तत्रैवादिपर्वणि—"महत्वात् भारतत्वाच्च महाभारत मुच्यते (१.१.२७०.)"—इति । तादृशभारतेतिहासस्य च वृंहणकल्पनातिरञ्जनादिदोषदुष्टत्वात् ऐतिहासिकतथ्यान्वेषिणा मप्रीतिकरत्वं चेत्, पुराणोपपुराणादीनान्तु कथा दूरपराहता एव ।

एवं षड्गुरुशिष्यादयोऽपि टीकाकारा ऐतिहासिकांशेऽलीकवक्तार एव ; तेषां हि ग्रन्थकर्तृनामविभ्रमहेतुकं पौर्वापर्यज्ञानविरहत्वं व्यज्यत एव सर्वत्र। तथाहि ऋग्वेदसर्वानुक्रमणीवृत्तौ— "शुनकाच्छौनकोऽभवत्। एतत्सूक्तयुतं पश्यत् द्वितीयं मण्डलं पुनः। * * *। यस्मै व्याचष्टे * * * उग्रश्रवा व्यासशिष्यः * * * महाभारत माख्यानं हरिवंशकथान्वितम्"— इति। इह हि सूक्तद्रष्टृत्व-मण्डलद्रष्टृत्व-व्यासशिष्योक्तभारत-तत्परिशिष्टश्रोतृत्वाना मैकाधिकरण्यं प्रदर्शितम्। पुनरित उत्तर मस्यैव शौनकस्यापरदशग्रन्थकर्तृत्व मप्युल्लिखितम्। तदेतत्सर्वं षड्गुरुशिष्यकथन मस्मच्छ्रुतिषु शूल मिव व्यथयति ; कथं हि सम्भाव्यते,—प्रदर्शिताश्वलायनीयगृह्ये ऋषिनामसु गार्त्समद इति गृहीतनाम्नो मण्डलद्रष्टुः अतिवृद्धस्यानिर्दिष्टकालिकस्य शौनकस्य, आचार्यनामसु शौनक इति गृहीतनाम्नः शाखाप्रवक्तुः प्राग्युगीयस्य च शौनकस्य, अद्ययुगीयव्यासशिष्योक्तभारतश्रवणम् ? अनतिप्राचीनहरिवंशकथाश्रवणं च ?—इति सुधीभिरेवैतदाकल्यताम्। वस्तुतस्त्वैतिहासिकांशे षड्गुरुशिष्योक्तानि खलु उन्मत्तप्रलपितानीवेत्यत्र नास्त्येव संशयः ; तद्विशदयिष्यामश्चोपरिष्टादिहैव। तत्कथ मेतादृशोऽपि ग्रन्थः प्रामाण्यपद मारोहेदैतिहासिकतथ्यनिर्णयायेति।

अस्त्येवैको ग्रन्थो राजतरङ्गिणी नामेतिहासेषु प्रसिद्धः, भारतैतिहासिकतत्त्वजिज्ञासूनां किञ्चित् प्रीतिपदश्चेति सत्यम्! परं ततस्तु खलु आदिगोनर्दप्रभृतीनां काश्मीरेन्द्राणा मेव वंशावलिर्ज्ञायते, न त्वन्यत् कि मपि विशेषतः।

देशावल्यादिनामेतिहासग्रन्थास्तु आधुनिका अपि समग्रा विशुद्धाश्च नोपलभ्यन्ते, तदल मिह तत्कथयेति।

गुणाढ्यकृतो भूतभाषाख्यो बृहत्कथाग्रन्थस्तु सप्तलक्षश्लोकात्मक इत्येव श्रुतम्, न च दृष्ट मद्यापि, तदलं तददृष्टकथान्दोलनेनापीति।

अनन्तपत्न्याः सूर्यवत्याश्चित्तविनोदनाय सोमदेवभट्टेन सम्पादितः कथासरित्सागरस्तु स्त्रीजातिचित्तविनोदायैवालम्, न त्वैतिहासिकतथ्यानुसन्धि-

त्नूनां तोषाय ; वर मस्ो तदुपन्यासपाठादैतिहासिकानां विमलहृत्सरःस्वपि शैवालचया एव समुत्पद्यन्ते । वस्तुतः तद्ग्रन्थपर्यालोचनयेद मेव प्रतीयते सोमदेवस्य तस्य यथाकथ मपि अनन्तपत्नी-चित्तविनोदन मेव उद्देश्य मासीत् ; न त्वैतिहासिकतथ्यप्रदर्शन मिति ; सति हि तत्र पाणिनितो न्यूनाधिकसहस्राब्दीपरजस्यापि कात्यायनस्य पाणिनिसतीर्थत्वं वक्तुं नोत्सहेत ; को हि नामैतिहासिको वृद्धत्वादिहेतुजवाख्यंशहीनः प्रकृतिस्थोऽपि व्याकरणसूत्रकार-पाणिनेः कालान्तरवीजमूलक-भाषाव्यवहारान्तरगतपदसंस्कारक-कात्यायनस्य च समकालिकत्वं मन्येत । अस्मन्मते त्वीदृशासत्यैतिहासिकज्ञानविकाशसहायस्योपन्यासग्रन्थस्य प्रचारव्याघात एवोचितः, प्रचरितस्य स भस्मसादेव कर्त्तव्य इति । यस्त्वस्मद्देशीयः कश्चित् पण्डितो बह्वन्वेषणासमर्थोऽपि हन्त स्वश्रमकातरतानिबन्धन मनायासलब्ध मेतत्कथन मेव विश्वस्य तदेव च भित्तीकृत्य किञ्चिदप्यलेखीत्, तादृशाविवादिसाधवे च वयं बहुदूरत एव शतं नमस्कुर्मः ।

तदेव मस्मद्देशीयैतिहासिकतथ्याविष्करणाय बहुकालतो बहुश्रमतश्च बहूनां ग्रन्थानां परिदर्शनम्, मधुलिड्विव यथालब्ध मैतिहासिकमधुग्रहणम्, ऐतिह्याद्यवलम्बनञ्च प्रयोजनीयम् । तथा कृत्वा आविष्कृते च तथ्ये न च सर्वावयवशो विश्वस्यात् ; अपि तु कदाचित् खण्डनीय मपीदं भवेदिति चाशङ्कैतैव । एतादृशे च दुष्करे प्रवृत्ता वय मवश्य मेव कृतकृत्याः स्यामेत्यपि दुराशैव ; परं प्रवृत्ताश्चेत् कथं निर्व्रीडाः प्रतिनिवृत्ता भवेम इत्यालोच्यैवेह यथाज्ञानं किञ्चिद् वदामस्तत्र "पदे पदे प्रस्खलतां सन्तः सन्त्ववलम्बनम्" । किञ्च, हैमसङ्घातगा ये तु नोपहास्याः स्खलत्स्वपि । अनन्यगमनानां हि स्खलनं नोपहस्यते ।—

अथ प्रदर्शितेषु अद्यप्रचलितमहाभारतश्लोकेषु निरुक्तकर्तृत्वेन यास्कनाम्नः स्मरणात् तन्महाभारतकारात् प्राचीनोऽयं यास्कः इति त्वविचारित मपि सिद्ध मेव । स च महाभारताख्य इतिहासग्रन्थः पाणिनिभाष्यकारात् पतञ्जलिमुनेः परभव एव ; पतञ्जलिना हि उदाहृतेष्वपि

भारतीयप्रसङ्गेषु अद्यप्रचलितैतन्महाभारतीयवचनान्युद्धृतानि नैव दृश्यन्ते, प्रत्युतान्यथैव श्लोकांशादिकास्तत्रतत्रोपलभ्यन्ते। तथाहि तृतीयाध्याये—"धर्मेण स्म कुरवो युध्यन्ते (२पा० २आ०)"–इति। अवश्य मिदं श्लोकचरणम्, परं नास्त्येतन्महाभारते; अतो नूनं सम्भाव्यते पतञ्जलिसमये नासीदेतन्महाभारत मपि त्वासीदेतन्मूलरूपो युधिष्ठिरादीतिहासाश्रयः कश्चनापरो ग्रन्थ इति। किञ्चेह पातञ्जले ह्युदाहृत मेतत्— "वृद्धकुमारीवाक्यवदिदं द्रष्टव्यम्। तद्यथा। वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति। सा वर मवृणीत। 'पुत्रा मे बहुक्षीरघृत मोदनं कांस्यपात्र्यां भुञ्जीरन्!'–इति। न च तावदस्याः पतिर्भवति; कुतः पुत्राः? कुतो गावः? कुतो धान्यम्? तत्रानया एकेन वाक्येन पतिः पुत्रा गावः धान्य मिति सर्वं सङ्गृहीतं भवति (८अ० २पा० १आ०)"–इति। एतद्वृद्धकुमार्याख्यानन्तु नैवं दृश्यते ऽद्यप्रचलितेऽत्र महाभारते (शा० प० ५२अ०)। अतोऽप्यवबुध्यतेऽद्यप्रचलितमहाभारतकारात् पूर्वज एवायं महाभाष्यकारः पतञ्जलिरिति।

निरुक्तकारोऽयं यास्कः खलु पाणिनिव्याकरण-महाभाष्यकारस्य भगवतः पतञ्जलेरप्यतिपूर्वजः। पश्यतु तावत्—निरुक्तेऽत्र अर्थज्ञप्रशंसाप्रकरणे योद्धृता ऋक् उत त्वः पश्यन्निति, महाभाष्येऽप्यर्थज्ञप्रशंसने सैव प्रदर्शिता; निरुक्तकारकृता अर्था एव तत्र यथावदुद्धृता च (निरु० २भा० १३२पृ०; म० भा० १अ० १पा० १आ०)। किञ्च यद् दृश्यतेऽत्र निरुक्ते "शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते; *** विकार मप्यार्येषु भाषन्ते शव इति। दातिर्लवनार्थेषु प्राच्येषु; दात्र मुदीच्येषु"–इत्येव (२भा० १६०पृ०)। पातञ्जले तु एतदेवोद्धृत्य किञ्चित् विस्तृतम्—"शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति; विकार एन मार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु; रंहतिः प्राच्यमगधेषु; गमि मेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु; दात्र मुदीच्येषु (१अ० १पा०१आ०)"–इति। अपरञ्च—"तितउ परिपवनं भवति; ततवद्वा, तुन्नवद्वा, तिलमात्रतुन्न मिति वा (२भा० ४०३पृ०)"–इति नैरुक्तम्। तदेव

तिलमात्रेति परिहायेह पातञ्जले सक्तु मिव तितउनेति मन्त्रव्याख्याने प्रमाणत्वेनोपन्यस्तं दृश्यते (१अ० १पा० १आ०)। अपि च तत्रैव सक्तु-पदनिर्वचनं सचतेरित्यादि; धीरा इत्यस्य, मनसेत्यस्य, अक्रत इत्यस्य च प्रतिवचनानि ध्यानवन्तः, प्रज्ञानेन, अकृषत इत्यपि निरुक्तात एव लब्धानि (निरु० २भा० ४०४पृ०)। अपर मपि—"हंसा हन्तेर्घ्नन्त्यध्वानम् (२भा० ४२१पृ०)"–इति नैरुक्तम्। एतन्नैरुक्तनिर्वचनबलादेवाह पतञ्जलिः—"कः पुनराह हन्मतेर्हंस इति। किन्तर्हि? हन्तेर्हंसः; हन्त्यध्वान मिति (६अ० १पा० २आ०)"–इति। स्फुटतोऽपि च महाभाष्ये व्याख्यातव्यत्वेन प्रसिद्धग्रन्थनामप्रदर्शनाय निरुक्तनामग्रहणं कृतं दृश्यते। तथाहि—"शब्दग्रन्थेषु चैषा प्रहततरा गतिर्भवति निरुक्तं व्याख्यायते इति (४अ० १पा० १आ०)"— इति।

नन्वत्र निरुक्त मिति शाकपूण्याद्यन्यतमकृतो ग्रन्थो ग्राह्यः? इति चेन्न; शाकपूण्याद्यन्यतमकृतो ग्रन्थः खलु महाभाष्यकालेऽपि स्थित इत्यत्र हि न किञ्चिन्मानं पश्यामः; प्रत्युत लुप्तेष्वेव तादृशग्रन्थेषु नूतनस्यैतस्य निरुक्तस्य प्रचारसम्भवः; प्रचरिते चैतस्मिन्, महाभारते यास्कस्यैव निरुक्त-कर्तृत्वेन ग्रहणं सङ्गच्छते। न च महाभाष्य-महाभारतयोः एव मन्तरालसम्भवः, यत्र शाकपूण्याद्यन्यतमकृतं निरुक्तं लुप्त मुत्पन्नञ्च सुप्रचलित मिद मिति।

केचिदाहुः—यास्कीयेतन्निरुक्ते "स्याल आसन्नः संयोगेनेति नैदानाः" –इत्यस्य, "ऋचा समं मेन इति नैदानाः"–इत्यस्य च (३भा० १७९, ३६७ पृ०) दर्शनात् ज्ञायते सामवेदीयस्य निदानसूत्रस्य यास्कतोऽपि प्राचीनत्वं निरुक्तवत्त्वञ्च। अपि च सामवेदीये बौधायनीयकल्पपद्धता-वपि बहुत्र निदाननामश्रवणात् ततोऽपि प्राचीनत्वं तस्यावगम्यते। तथाहि—"निदानकारस्य द्वाविंशत्यक्षरप्रभृतयश्चतुरुत्तरास्त्रयः सप्तवर्गाः ०—० परमेष्ठ्यन्तस्येति पथ्यस्येति"–इति। किञ्च तत्रैव किञ्चिदुत्तरम् —"उक्तं हि निदाने ज्योतिष्टोमं षोडशिनं चाधिकृत्य 'संख्या मप्यस्यैतां

विद्यमानानां मन्ये'-इति"—इति च (१५०)। एव मन्यत्रापि तत्र बहुत्र सर्ववेदाङ्गविषयेष्वेव निदानता उपलभ्यते। तत्त्रातिप्राचीनेऽपि निदानसूत्रे दैवतनिर्णयविषयेऽपि शाकपूणिनामोल्लेखो दृश्यते, परं न तु तत्रापि निरुक्त मित्युक्त्या। तथाहि—"ऐन्द्राः प्राजापत्याः साम्पराज्ञस्वान्द्रमसस्य सौर्यं इति शाकपूणिः (४. ६.)"-इति। शाकपूणेर्दैवतप्रत्यक्षकारितां चाह यास्कोऽपि। तथाहि—"शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति। तस्मै देवतोभयलिङ्गा प्रादुर्बभूव। तां न यज्ञे। तां पप्रच्छ विविदिषाणि त्वेति। साऽस्मा एता मृच मादिदेशैषा मद्देवतेति (२भा० १८८पृ०)"-इति। तदेतत् सर्वं समालोच्येद मेव प्रतीतं भवति,—शाकपूणिः खलु यास्कादस्मात् बहुपूर्वजो ब्राह्मणकाले स्थितोऽनुब्राह्मणविशेषस्य कर्त्तासीत्; तत्रानुब्राह्मणे एव मन्त्रार्थपदनिर्वचनानि दैवततत्त्वादीनि चोपदिष्टानि। अत एव निदानसूत्रे क्वचिदनुब्राह्मणग्रन्थनामोल्लेखतया क्वचिच्च शाकपूणिनामोल्लेखतया च प्रमाणं प्रदर्शितम्। तदीयः शाकपूणिनामोल्लेखस्तु दर्शितः; अनुब्राह्मणनामोल्लेखोऽप्यत्र प्रदर्श्यते। तथाहि—"किं स्तोमाः? अनुब्राह्मणं स्युरित्येकविंशस्तोमाः" -इत्यादि (८. ३.)। तदेवं शाकपूणेः निर्वचनापरपर्यायनिरुक्तकर्तृत्वेऽपि न पुनः निरुक्तेत्येवप्रसिद्धग्रन्थविशेषकर्तृत्व मिति व्याख्यातव्यत्वेन प्रसिद्धग्रन्थनामप्रदर्शनाय यदुक्तं महाभाष्यकृता निरुक्तं व्याख्यायते इति तन्नूनं यास्कीय मिदं निरुक्त मभिलक्ष्यैवेति।

किञ्च दृष्टं वर मदृष्टत इति न्यायात् किं मदृष्टनिरुक्तकल्पनयेत्यस्यैवेह भाष्ये ग्रहणं न्याय्यः; अपि च नाम भाष्येऽत्र शाकपूणिकृतस्यैव निरुक्तस्य ग्रहण मिष्ट मित्यत्र नास्ति किञ्चिदपि विनिगमक मतो यास्कीयनिरुक्तस्यापि बोधेन कथं न भवितव्य मिति। वस्तुतस्तु अद्यप्रचलिता या मनुसंहिता, एतस्या अपि प्राचीन मिदं निरुक्तम्; पातञ्जलं महाभाष्यं तु एतन्मनुतः पराचीन मिति ध्रुवम्। सत्येव मस्य निरुक्तस्य पातञ्जलादस्मात् अतिप्राचीनत्वे कोऽस्ति शङ्कावसरः।

पश्यतु तावत् पातञ्जले खलु महाभाष्ये—"पूर्ववयसः अप्रत्युत्थाने दोष उक्तः, प्रत्युत्थाने च गुणः। कथम्? 'ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते'—इति। स च पूर्ववयोमात्रे प्रसक्तः, अतोऽत्राप्यववयवेन शास्त्रार्थः सम्प्रतीयते (६ अ० ५ पा० ४ आ०)"—इति। तदत्रोद्धृत मूर्द्धं प्राणा इति वचनं तु साम्प्रतं मनुसंहितेति प्रसिद्धाया भृगुसंहिताया द्वितीयेऽध्याये (१२० स्रो०) दृश्यत एव। एतावतैव पातञ्जलस्यास्य महाभाष्यस्यैतन्मनुपरजत्वं सुव्यक्तम्।

निरुक्तस्यास्य त्वेतन्मनोश्च पूर्वजत्व मेवानुमीयते। तथाहि उक्तानि ह्येतन्निरुक्ते—"पुमान् दायादो अदायादा स्त्री"—इति, "स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः"—इति, "अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे"—इति, "गर्त्तारोहिणीव धनलाभाय"—इति, "नाभ्रात्री मुपयच्छेत"—इति च (२ भा० २५६—२७५ पृ०)। एष्वेकत्राप्यद्यप्रचलितमनुसंहिताया नामोल्लेखोऽपि न कृतः; सति ह्यस्याः संहिताया निरुक्तपूर्वजत्वेऽवश्य मेवैतन्नामकीर्त्तनादिक मिह दृश्येतैव। किञ्चाद्यतनीय-मनुसंहितायान्तु पञ्चैव महापातका निर्द्दिष्टा दृश्यन्ते। तथाहि—"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह (११ अ० ५४ स्रो०)"—इति। निरुक्ते तु "सप्त मर्यादाः कवयश्चक्रुः। तासा मेका मप्यधिगच्छन्नंहस्वान् भवति। स्तेयम्, तल्पारोहणम्, ब्रह्महत्याम्, भ्रूणहत्याम्, सुरापानम्, दुष्कृतस्य कर्मणः पुनः पुनः सेवाम्, पातके ऽनृतोद्यम्—इति (३ भा० २५१ पृ०)"—इति सप्त महापातकानि वर्णितानि दृश्यन्ते। तत्र मनुमते भ्रूणहत्याया मुख्यं महापातकत्वं नास्त्येव; नापि त्वातिदेशिकम् (११ अ० ५५—५८ स्रो०); परं विहितश्च तत्र ब्रह्महत्याप्रायश्चित्त मेव (११ अ० ८७ स्रो०); कुल्लूकमते तु तच्च 'ब्राह्मणगर्भ-विषयम्'। किञ्च कुल्लूकभट्टकृतं तद्व्याख्यानं सङ्कृहकारस्य शूलपाणेरपि सम्मत मेव प्रतीयते। तथाहि—"तत्र पुंस्त्वेन ज्ञाते पुम्बधप्रायश्चित्तं स्त्रीत्वेन ज्ञाते स्त्रीबधप्रायश्चित्तम्, अविज्ञाते तु पुम्बधप्राय-

श्चित्त माह मनुः—"हत्वा गर्भ मविज्ञातम् (११. ८७.)"—इत्यादि प्रायश्चित्तविवेकः। अपि चात्र मनुसंहितायां दुष्कृतकर्म्मणः पुनःपुनः सेवने पातककार्यप्रवर्त्तने च महापातकं न दृश्यते ; अपि दृश्यते च महापातकिसंसर्गकारिणोऽपि महापातकित्वम् (११. ५४.)। तद्यदि हि नाम निरुक्तप्रचारात् पूर्वस्मिन्नपि काले खल्वेषा संहिता प्रचलिता स्यात्तर्हि ईदृशविरोधभञ्जनाय यास्कस्योष्ठाधरेऽवश्यं मनागपि स्फुरिते दृश्येते एव। अपरञ्चैतद् विचार्यम्,—अस्ति ह्येतदत्र निरुक्ते "तदेतदृक्-श्लोकाभ्या मभ्युक्तम्—'अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्'—इति। 'अविशेषेण पुत्राणां दायो भवति धर्मतः। मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् (२भा० २५९ पृ०)"—इति। अत्र ऋक्पदेन न तु ऋग्वेदीयमन्त्रो गृह्यते ; नास्त्येव हि तत्र अङ्गादङ्गादिति ; अपि तु ऋग्लक्षण एव मन्त्रः ; ततश्च शतपथीयायाश्चास्या ऋचोऽत्र ग्रहणं मिष्टम् ; अस्ति चैषा ऋक् शतपथब्राह्मणे (१४. ९. ४. २६.)। अपि चेह श्लोक-शब्देन यस्य ग्रहण मिष्टम् 'अविशेषेण'—इत्यादेः, तस्य तु दर्शनं मद्यप्रचलितायां मनुसंहितायां नास्त्येव ; यास्केन तूक्तं स्पष्ट मेव 'मनुः स्वायम्भुवोऽब्रवीत्'—इति। सोऽयं कोऽसौ मनुरित्यवश्यं विचारयितव्यम्। विचारिते च तथा, इद मेव प्रतीयते,—सम्प्रति येयं मनुसंहितेति प्रचलिता, सा नूनं यास्कीयादेतस्मान्निरुक्तात् परं प्रणीता ; अपि त्ववश्य मासीत् पुरातनोऽपरः कश्चन मनुप्रणीतः स्मृतिग्रन्थः सुप्रचलितो यास्ककालेऽपीति। वस्तुतस्त्वियं न मनुप्रणीता ; अपि भृगुप्रणीता भृगुसंहितैवेति च प्रमाणयिष्याम उपरिष्टात्। अन्यच्च—"विद्या ह वै ब्राह्मण माजगाम"-इति शाखान्तरगताश्चत्वारो ये मन्त्रा निरुक्ते उद्धृताः, त एव मन्त्राः किञ्चिन्निवेशपरिहाराभ्यां भाषान्तरीकृताश्चाद्यतनीयायां मनुसंहितेति प्रसिद्धायां स्मृतिसंहितायां च लभ्यन्त इत्यपि सुवचम् (निरु० २भा० २७२ पृ० ; म० स० २ अ० ११३—११६। श्लो०)। अत एव ऋग्भाष्यभूमिकाया

मेव मुक्तं सायणाचार्येण—"विद्याया ग्रहणेऽधिकारिविशेषः शाखान्तरगतै-श्चतुर्भिर्मन्त्रैरुपदर्शितः; तांश्च मन्त्रान् यास्क उदाजहार"–इत्यादि; न चोक्तं तत्र मनुरुदाजहारेति। किञ्चैतस्याः स्मृतिसंहिताया द्वादशेऽध्याये ऽन्त्यश्लोकेऽप्युक्तं दृश्यते 'नैरुक्तः'–इति; 'निरुक्तज्ञः'–इति च तद्व्याख्यानं कुल्लूककृतम् (१११ श्लो०)। तदित्थं निरुक्त मिदं पातञ्जलमहाभाष्यतः प्राचीनं न वेति विचारस्तु दूरे आस्ताम्; ततोऽपि पुरातनात् मनु-संहितेतिप्रथितादद्यप्रचलितसर्वप्रधानस्मृतिसंहिताग्रन्थादपि पूर्वं भगवता यास्केन प्रणीत मिति ध्रुवम्।

ततः खलु यास्कीयस्यास्य निरुक्तस्य प्रणयनकालनिर्णयाय प्रवृत्तानां प्रथमं तावत् पातञ्जलस्य, मनुसंहितेत्यप्रसिद्धस्य ग्रन्थस्य चाविर्भावकाल-निर्णय एव कर्त्तव्य इति तत्रतत्रैवादौ यतामहे।

(पतञ्जलिः) राजतरङ्गिण्या मवलोक्यते,–यदा काश्मीरप्रदेशस्य शासन-दण्डोऽभिमन्युनामनरपतिकरचालित आसीत्, तदैव चन्द्राचार्यादयः दुर्लभं पातञ्जलं महाभाष्य मलभन्त, नीतवन्तश्च स्वदेश मिति। तथाहि—"चन्द्रा-चार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमत्। प्रवर्त्तितं महाभाष्यं स्वञ्च व्याक-रणं कृतम् (रा० त० १. १७६.)"–इत्यादि। विशेषतश्चावगम्यते वाक्यपदीय-ज्ञापनीपाठात्,— विलोपदशाग्रस्त मेवैकं महाभाष्यपुस्तकं दाक्षिणात्येषु पार्वत्यप्रदेशाल्लब्धम् चन्द्राचार्यादिभिरिति। तथाहि— "प्रायेण सङ्क्षेप-रुचीनल्पविद्यापरिग्रहान्। सम्प्राप्य वैयाकरणान् सङ्ग्रहेऽस्त मुपागते। कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना। सर्वेषां न्यायवीजानां महाभाष्ये निवन्धने। अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवात्। अस्मिन्न-कृतबुद्धीनां नैवावास्थितनिश्चयः। यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकर-णागमः। कालेन दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः। पर्वतादागमं लब्ध्वा भाष्यवीजानुसारिभिः। स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः"–इति। वाक्यपदीयग्रन्थस्यैव कारिकावद्धो महाभाष्यतात्पर्यज्ञापकः, चन्द्राचार्यात्–आचार्यवसुराताच्च परभवेन भर्तृहरिणा कृतः। एतदीय-

श्लोका एव 'हरिकारिकाः'–इत्युच्यन्ते सर्वत्र। एवञ्चाभिमन्युनरपतेर्जन्मतोऽपि बहुपूर्वमेव विरचितं महाभाष्यमिति लभ्यत एव।

पाश्चात्याः किल बहव एव धीरा अभिमन्युकालसमालोचने प्रवृत्ताः; तत्र विल्फर्डमहोदयेन ४२३ खी० पू० तद्राज्यान्तो निर्णीतः, प्रिन्सिपमहोदयेन तु ७३ खी० पू० तद्राज्यान्तः स्वीकृतः, लासेन्-महोदयेन तु खीष्टीयचत्वारिंशाब्दगते एव तद्राज्यारम्भ इति स्थिरीकृतम्, बोथ्लिङ्गमहोदयेन तु खीष्टजन्मतः शतवर्षपूर्वमेवाभिमन्युः काश्मीरसिंहासनमलञ्चकारेत्युक्तम्*। तदेतन्मतं (बोथ्लिङ्गीयं) प्रिन्सिप्-मतेनैक्यं गच्छति च; राजतरङ्गिण्यां तद्राज्यकालः पञ्चत्रिंशदब्दमित इत्यभ्युपगमात्। तथाच ७३ खी० पू० अभिमन्युराज्यान्त इति स्वीकृते स्वीकृतमेव स्यात् १०८ खी० पू० अभिमन्युराज्यारम्भः प्रिन्सिपमहोदयस्यापि। तदेतदैक्यं गतं मतद्वयमेवावलम्बनीयमिह विभ्रमगतानामस्माकमित्यतः खीष्टजन्मतोऽप्यष्टाधिकशतवर्षपूर्वमपि स्थितं महाभाष्यमिति लब्धम्।

ततः पूर्वप्रदर्शितवाक्यपदीयवचनालोचनादिदमपि प्रतीयत एव तदानीं खल्विदं पुनरुद्धृतमिति। तथाचेदं विचार्यं सम्पन्नम्,—एतादृशो महान् ग्रन्थः कियत्सु कालेषु प्रचरद्रूपो भूतः?—ततः क्रमात् कियत्सु च कालेषु लुप्तदशां गतः? इति। एष महाभाष्यकारस्तु गोनर्द्ददेशीयः। तथाह्याह स स्वयमेव तत्र बहुत्रैव–"गोनर्द्दीयस्त्वाह"–इत्येवमादि (पा०१.१. २१.); व्याख्यातश्च तत् तट्टीकाकृता कैयटेन—"भाष्यकारस्त्वाह"-इति; कैयटटीकाकृन्नागेशोऽपि तथैव व्याचष्टे—"गोनर्द्दीयपदं व्याचष्टे भाष्यकार इति"—इति। गोनर्द्ददेशवासित्वादेव च पतञ्जलेर्गोनर्द्दीयत्वम्। स च गोनर्द्ददेशोऽद्यतनीयो "गोण्डा"–इति प्रसिद्धोऽयोध्याप्रदेशीय इत्यपि निर्णीतमस्मद्देशीयाध्यापकविशेषेण रामकृष्ण-गोपालभण्डारकेण†। एष

* Otto Boethlingk's Pánini, P. XIV—XVIII.

† Indian Antiquary, Vol. II. P. 70.

एव "गोनर्दा" गोनर्दो भवतु मा भूद् वा, गोनर्दस्तु प्रागदेशविशेषस्तत्र नास्त्येव संशयः ; काशिकायाम्—"एङ् प्राचां देशे (पा० १.१.७५.)" –इत्यस्योदाहरणेषु 'गोनर्दीयः'–इति पदस्यापि दर्शनात्। तदानीं च नासन् खल्विदानीन्तना इव लौहवर्त्मगा अपि धूमयानशकटाः, आसंश्च प्रायः प्रतिनगरान्तेषु दुर्लङ्घ्याः कान्ताराश्च, प्रसङ्गतस्तदप्युक्तं महाभाष्ये– "कश्चित् कान्तारे समुपस्थिते सार्थ मुपादत्ते, स यदा निष्कान्तारीभूतो भवति तदा सार्थं जहाति (१अ० १पा० ६आ०)"–इति। प्रदर्शित-वाक्यपदीयवचनात्त्ववगम्यत एवैतत्,—चन्द्राचार्यादिभिर्दाक्षिणात्येष्वेक मेव लुप्तावशिष्टं महाभाष्यपुस्तक मवाप्त मिति। तदद्य विचार्यतां तावत् धीमद्भिः,—तदानीं खलु प्राच्यदेशतो दाक्षिणात्यं यावत् भाष्यप्रचलनाय कत्यब्दाः प्रयोजनीयाः सञ्जाताः ? कतिष्वब्देषु च तत् प्रचरद्रूपं स्थितम् ? कियद्भिश्च कालैः पुनर्लोपदशां गत मलाभि च चन्द्राचार्यादिभिरिति।

अस्मन्मते त्वभिमन्युराज्यकालतोऽन्यूनसार्द्धद्विशतवर्षपूर्वं प्रणीत मेत-न्महाभाष्यम् ; अन्तरेण हि सार्द्धद्विशताब्दकाल मेतादृशस्य महतो ग्रन्थस्य आर्यावर्त्तीयप्राच्यदेशाद्दाक्षिणात्यं यावत् प्रचारो लुप्तप्रायता च न सम्भवेदिति। तथाच महाप्रभावः खल्वालेगजण्डरो दिग्विजयाय यदेदं भारतं प्रविष्टः (३२७ खी० पू०), तत्पूर्व मेव प्रणीतं महाभाष्य मिति। अत एव दिग्विजयिना तेन ग्रीक्-नृपतिना कृतः साङ्कलनगरध्वंसो नाव-गतो महाभाष्यकारस्यैतस्य पतञ्जलेः। सति ह्यवगते "सङ्कलादिभ्यश्च (पा० ४.२.७५.)"–इति सूत्रेऽवश्य मेवोच्येत 'सङ्कलेन निर्वृत्तः साङ्कलो जन-पद इदानीं ध्वस्तः'–इति ; कस्य हि नाम ग्रन्थकारस्य शताब्दवृत्तं किञ्चिदधिकशताब्दवृत्तं वा जनपदध्वंसनविवरण मपि न श्रुतं स्यात् ? नापि स्मृतिपथ मारोहेत् ? अथवा सङ्कलेन निर्वृत्तः साङ्कलो जनपदः आसीदित्येव मप्याशङ्केतैव।

यद्युच्येत इरावत्याः पश्चिमोपतटस्थितं शाकल मेव नगर मासीत् पुरा साङ्कल मिति प्रसिद्धम्, तदेव ग्रीकनृपतिना विध्वस्त मपि पुनः कालात्

प्रादुर्भूतं, चैनिकपरिव्राजकेन ह्वोयेन्थ्सांङ्गेनापि (६२९—६४५ ख्री० प०) दृष्ट मिति ह्वोयेन्थसाङ्गतो बहुपूर्वजस्य भाष्यकारस्य न तत्र ध्वंसनकथनावसरो नापि सन्देहावसर इति। तत्र ब्रूमः;—शाकलसाङ्कलयोरुभयोरेव पाणिनीये प्रस्थाने पृथगवस्थानात् नैवास्ति तादृशकथनावसरः। किञ्च तेन हि दिग्विजयिना इरावतीं समुत्तीर्य्यैव इरावतीपूर्वोपतटस्थ मराजकप्रायं साङ्कलं विध्वस्त मित्येव मेवैतिह्यासिकम्*; चैनिकपरिव्राजकस्य ह्वोयेन्थ्सांङ्गस्य निर्द्दिष्टतस्त्ववगम्यते तत्तीर्थयात्राकाले शाकलं नाम नगरं त्विरावत्याः पश्चिमोपतटे एव स्थित मिति। तथाच नामभेदात् संस्थानभेदाच्चानयोः पार्थक्यं सुव्यक्त एव। तदिह्यावश्य मेव स्वीकार्यम्,— पाणिनिकाले योऽसौ साङ्कलो नामासीत् कश्चन महाजनपदः पूर्वोपतटस्थ एवेरावत्याः, स एव कालात् श्रीमक्क्षः श्रीमता दिग्विजयिना तेन ध्वस्तश्च; शाकल मिति तु तस्माद् विभिन्न मेव स्थान मिरावत्याः पश्चिमोपतटे चिरात् स्थितम्, तदेव दृष्ट्वा यथावद् वर्णितं तीर्थयात्रागतेन तेन चैनिकपरिव्राजकेनेति। अपि तेन हि चैनिकपरिव्राजकेन यस्य शाकलस्य नगरत्वं वर्णितम्, तस्यैव "शाकलं नाम वाहीकग्रामः (४ अ० २ पा० २ आ०)"—इति ग्रामत्वेन व्यपदेशो दृश्यते महाभाष्ये; ततश्च ज्ञायते,— इह चैनिकपरिव्राजकागमनसमये तस्य स्थितं नगरत्वम्, ततः पुरा भाष्यकारसमये तु ग्रामत्व मेवासीत्तस्येति; ग्राम एव हि नगरत्व मार्गं युज्यत एव क्रमोन्नत्येति। एवञ्चेह चैनिकपरिव्राजकागमनात् बहुपूर्वम्, तस्य हि ग्रीक्-नरपतेर्विजयागमनाच्च पूर्व मेव सुतरां खीष्टजन्मतः सार्द्धत्रिशतवर्षतोऽपि प्राक् प्रणीतं पातञ्जलं महाभाष्य मिति चावाप्यते।

अन्यच्च; आसन् पुरा केचन मालवाः क्षुद्रकाश्च ('माली', 'अक्षिद्रक') पार्वत्या आयुधजीविनः; दिग्विजयायागतेन हि तेन ग्रीक्नरपतिना

* Indian Antiquary, Vol. I. P. 21—23.

प्रायो निर्मूलिता एव त इति च प्रवदन्त्यैतिहासिकाः* ; परं पातञ्जले तु महाभाष्ये ऽसकृदुक्तं दृश्यते— "एकाकिभिः क्षुद्रकैः जितम् (१अ० १पा० ५ आ० ; ५ अ० ३ पा० १ आ०)"—इति । तदेतद् विचारयन्तु धीमन्तः,—यदि हि नाम भाष्यकृज्जन्मतः पुरैव मालव्यक्षुद्रकजातयो दिग्विजयिना तेनालेग्‌जण्डरेण विजिता विनष्टाश्च स्युस्तर्हि तेषां विजयित्वोल्लेखस्तु दूरे आस्तां मस्तित्वोल्लेख एव कथङ्कारङ्कृतः स्यादिति ? तदेतदपि मान मिह्यालेग्‌जण्डरागमनादपि प्राक्तनत्वेऽस्य भाष्यकारस्येति ।

कियत्कालकृतं तत् प्राक्तनत्वम् ? अत्र ब्रूमः ;—अस्तीह पातञ्जले महाभाष्ये पाटलीपुत्रनामकीर्त्तन मनेकत्रैव । तथाहि— "साङ्काश्यकेभ्यः पाटलीपुत्रका आढ्यतराः (१ अ० ३ पा० १ आ०)"—इति, पुनस्तथैव "साङ्काश्यकेभ्यः पाटलीपुत्रका अभिरूपतराः (१अ० ४पा० ३आ०)"—इति च ; एवमादयो द्रष्टव्याः । महावंशनामकस्य बौद्धग्रन्थस्य द्वितीयपरिच्छेदपर्यालोचनयैतच्च स्थिरीभूत मेव बौद्धधर्मस्य सुप्रचारकः शाक्यमुनिः खल्वजातशत्रोः राज्याभिषेकादतीतेऽष्टमे वर्षे (खी० पू० ५४३) निर्वाणं गत इति † । तस्यैवाजातशत्रोः पुत्त्रः पौत्त्रो वाभूत् उदयाश्व इति प्रसिद्धः । तेनैवोदयाश्वेन पाटलीपुत्त्रं नाम नगरं निर्म्मापित मिति च वायुपुराणादिभ्योऽवगम्यते । तथाहि—"स वै पुरवरं राजा पृथिव्यां कुसुमाह्वयम् । गङ्गाया दक्षिणे कोणे चतुर्थेऽब्दे करिष्यति"—इति ‡ । त्रिकाण्डशेषहेमचन्द्रीयाभिधानादिभ्यश्चावगतम्,— पुष्पपुरं कुसुमपुरञ्च तस्यैव नगरस्य नामान्तर मिति । तदेवं शाक्यबुद्धनिर्वाणतोऽन्यूनपञ्चाशद्वर्षानन्तर मेव प्रादुर्भूतं पाटलीपुत्त्रं नाम समृद्धं नगर मिति च वक्तुं शक्यत एव ; महाभाष्यं तु तत उत्तर मेव प्रणीत मिति ।

किञ्चास्य पतञ्जलेः शाक्यबुद्धपरभवत्वनिर्णयेऽपरश्च हेतुरयम् ;—अस्ति

---

* Indian Antiquary. Vol. I. P. 21—23.

† Turnour's 'महावंश' Appendix, P. IX.

‡ The Pilgrimage of Fa Hian, Calcutta, 1848. PP. 259, 260.

सूत्रम् "इतराभ्योऽपि दृश्यन्ते (पा० ५. ३. १४.)"—इति, अनेन च तसिलादयो विधीयन्ते ; ते खलु भाष्यकृता भवदादिभिर्योगे एवेष्टाः ; भवदादिषु च 'देवानाम्प्रियः'—इत्येतदपि समस्तं पदं पठितम् । दृश्यते च बौद्धग्रन्थे बौद्धानां 'देवानाम्प्रियः'—इति प्रशंसाख्यानम् । अतो ज्ञायत एवास्य भाष्यकारस्य शाक्यबुद्धजन्मपरभवत्वम् । तथैवास्ति "षष्ठ्या आक्रोशे (६.३.२१.)"—इति पाणिनिसूत्रम् । अत्र च सन्ति कात्यायनकृतानि कतिचिद् वार्त्तिकानि ; तेषु चैकम् "देवानाम्प्रिय इति च मूर्खे" —इति । भाष्यकारस्तु तत्र 'मूर्खे'—इत्यंशं परित्यज्यैवाब्रवीत् 'देवानाम्प्रिय इति चोपसङ्ख्यानं कर्त्तव्यम्"—इति । तथाचेद मपि सुव्यक्तम्,—कात्यायनकाले मूर्खाभिधान मेवासीत् देवानाम्प्रिय इति ; ततोऽतीते बहुतिथे बौद्धमान्याभिधान मभूत्तदेव ; तत्कालज एवैष पतञ्जलिः सामयिकव्यवहारानुरोधत एव विससर्ज ततो वार्त्तिकात् 'मूर्खे'—इति । वस्तुतो यथेह भारते महम्मदीयराज्यस्थापनात् प्रागप्यपरदेशे हिन्दुरिति व्यवहार आसीदेव अधार्मिकेषु; तत उत्तरं सैव समाख्या तदाक्रोशकृतोपचरितैवास्मासु च ; ततो वय मपि "हीनञ्च दूषयत्यस्मात् हिन्दुः"—इति (मेरुतन्त्रे) व्युत्पादन मभिमत्यात्मनो हिन्दुनामकथनेऽपि गौरव मेव मन्यामहे ; तथैव पुरा खलु पाणिनिकाले 'देवानां प्रियः'—इति पदद्वय मसमस्त मेवासीद् व्यवहारार्थम् ; एतेन चासमस्तपदद्वयेन यज्ञीयपशोरेव बोधश्च भवति स्म; तत उत्तरं कात्यायनकाले मूर्खे एव तत् समस्त मेकपदीभूतं पशुतुल्यताव्यञ्जकं व्यपदिष्टम् ; ततोऽनन्तरं बौद्धानां मूर्खत्व मेवाभिमन्वानैरार्यैः प्रयुक्तं तत् तेषु ; काले तदेव पदं प्रशंसावचन मिति कृत्वा गृहीतं स्वस्वनामसु तैर्बौद्धैरिति तदानीं तात्कालिकव्यवहारानुरोधत एव परित्यक्तो वार्त्तिकीयो 'मूर्खे'—इत्यंशो भाष्यकृतेति । एतावता तु सामान्यतः खीष्टजन्मतः सार्द्धत्रिशतवर्षपूर्वम्, शाक्यबुद्धनिर्वाणतस्त्वन्यूनपञ्चाशद्वर्षोत्तरम् (खी० पू० ३५०—५००) प्रणीत मेतत् पातञ्जलं महाभाष्य मित्युपलभ्यते ।

परन्त्वत्रापि किञ्चिद् विशेषोऽस्ति द्रष्टव्यः। महावंशे चैतच्च लिखित मस्ति,—जीवत्येव शाक्यमुनौ शोणतीरे पाटलीनामग्रामे अजातशत्रोः आज्ञया दुर्गस्यैकस्य निर्म्माण मारब्धम्, तद् दृष्ट्वा कथिता चैषा भविष्यद्वाणी तेनैव शाक्यमुनिना,— "काले एतदेव भविष्यति प्रधानं नगरम्"–इति। तथाच स एव ग्रामो नगरत्व मुपगत इति प्रथमं तावत् शोणतीरस्थं शोणसङ्गमस्थं वासीत् पाटलीपुत्रम्; ततः पश्चात् कालचक्रपरिभ्रमण-वशात् गङ्गातटे परिशोभित मित्यनुमीयतेऽस्माभिः। यदा तु गङ्गातीरे, तदैवाभूद् वायुपुराणम् (डी ए०); तात्कालिक मेव च वर्णनं दृश्यते चन्द्रगुप्तसमसामयिके मुद्राराक्षसे,—"स्वय मेव सुगाङ्गप्रासादशिखरगतेन देवेनावलोकित मप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् (३अ०)"–इति। गङ्गातीरस्थ मेव तत् पाटलीपुत्रं त्वद्यापि दृश्यते। हितोपदेशादिषु अनतिप्राचीनतमग्रन्थेषु च प्रायस्तथैव वर्ण्यते,—"अस्ति भागीरथीतीरे पाटलीपुत्रं नामधेयं नगरम्"–इत्यादि। परं यदा तु शोणतीरे, शोण-गङ्गासङ्गमोपतटे वा स्थितम् पाटलीपुत्रम्, तदैव जातोऽयं गोनर्द्दीं पतञ्जलिः; अत एव दृश्यते ह्यत्र महाभाष्ये "अनुशोणं पाटलीपुत्रम् (२अ० १पा० २आ०)"–इति; न त्वनुगङ्गम्। ततश्च वायुपुराणमुद्राराक्षसादिवर्णितपाटलीपुत्रात् प्राचीनम् महाभाष्यीयं पाटलीपुत्र मिति स्पष्टम्। तदेवं पाटलीपुत्रस्यादिमावस्थाया मेवेदं भाष्यं प्रणीत मिति यस्मि मेव शताब्द्यां शाक्यबुद्धो निर्वाणं गतः, तच्छताब्द्या मेव पतञ्जलिश्च सञ्जात इत्यपि वक्तुं शक्नुयामेव।

वस्तुतोऽयं भाष्यकारः, शाक्यमुनेर्बुद्धात् न बह्वर्वाचीनः; जीवति हि पतञ्जलौ नाभवत् शाक्यमतप्रचारः समन्तात्; सुप्रचरिते हि तत्र बौद्धसम्मतो निर्वाणार्थोऽपि कथं न ज्ञात आसीत् पतञ्जलेः? ज्ञाते च तत्र "निर्वाणोऽवाते (पा० ८.२.५०.)"–इति सूत्रस्य भाष्ये तद्विषयकविचारोऽपि कथं न दृश्यते? सति हि तदानीं शाक्यमतप्रचारप्राबल्येऽवश्य मेव तत्र तद्विषय-कोऽपि विचारो दृश्येतैव। तादृशप्राबल्याभावस्य चाल्पदिनप्रसरतैव

निदान मनुमीयते। तदेवं कालाशोकक्कतात् द्वितीयमहासङ्गमात् पुरैवेदं महाभाष्यं प्रकाशित मित्यप्युक्तं न दोषाय। स च द्वितीय-महासङ्गमो बौद्धानां नतु खीष्टजन्मतः चतुःशताब्द्या अपि प्रागभूदिति च महावंश-ग्रन्थीयद्वादशपरिच्छेदालोचनात् निर्णीत मेव*। सिद्ध मित्थं खीष्टजन्मतो ऽन्यूनसार्द्धचतुःशताब्दीपूर्वम् (४५० खी० पू०) कलेश्च सप्तविंशशताब्द्यां प्रणीतं पातञ्जलं महाभाष्य मिति।

अथ ये चात्र वादिनो विप्रवदन्ते, तानपीह किञ्चित् प्रतिबोधयामः स्वोपलब्ध्यनुसारतः ; न चेहास्माकं हठकारिता जिगीषा वा।

(क) तत्र केचित्त्वाहुः—"सभाराजाऽमनुष्यपूर्वा (पा० २. ४. २३)"—इति सूत्रीयभाष्ये "तद्विशेषणानाञ्च न भवति। पुष्यमित्रसभा ; चन्द्रगुप्तसभा"—इत्युक्तं यतो दृश्यते, ततो गम्यत एवैतत्,—मगधराजविशेषः पुष्यमित्रः, तद्वङ्शपूर्वभवश्चन्द्रगुप्तश्चासीदेव पतञ्जलेर्ज्ञानविषय इति ; तस्माच्चास्य पतञ्जलेः चन्द्रगुप्तपरभवत्वविचारस्तु दूरे आस्ताम्, तद्वङ्शपरजात् पुष्यमित्रादप्यवरजत्वं सम्पद्यत एवेति। अत्र वदामः ;—पुष्यमित्रराज्यन्तु (खी० पू० १७८–१४२) द्विचत्वारिंशदधिकशतवर्षपूर्वं वृत्तं खीष्टजन्मत इति तैरेव निरूपितम्†; अभिमन्युराजाज्ञयैव लोपदशाग्रस्तं भाष्यं पुनरुज्जीवितं चन्द्राचार्यादिभिरिति च सर्ववादिसम्मतम् ; तस्याभिमन्योः राज्यकालश्च खीष्टजन्मतो ऽष्टाधिकशतवर्षपूर्वं मित्यपि बोथ्लिङ्गादिसम्मत्या निरूपित मेव (ङ पृ०)। तत् कथयन्तु भवन्त एव,—न्यूनाधिकचतुस्त्रिंशदब्देष्वेत्र कि मेतादृशस्य महाग्रन्थस्य तदानीन्तनीये कान्तार-पूर्णे भारते आर्यावर्त्तीयप्राच्यप्रदेशात् दाक्षिणात्यं यावत् सुप्रचलनं कालाल्लोपदशाग्रस्तत्वञ्च सम्भवेत् किमु? येषां सम्भवेत् सम्भवतु नाम! अस्माकन्तु नायं विश्वासविषयः। अस्मन्मते तु चन्द्रगुप्तः पुष्यमित्रश्चेमा-

* Turner's 'महावंश' p. 71.

† Wilson's Vishnupurana, Vol. IV. 190.

वुभावेव तादृशनामराजानौ भाष्यकारेण कल्पितौ; सन्त्येवैवं हि देवदत्त-यज्ञदत्त-विष्णुमित्रादयो बहव एव व्यक्तयो वैयाकरणादिभिः कल्पिताः। महा-भाष्ये इहैव च तथाविधं नामकरणं खलपुत्रस्य कृतं तदुत्तरं तत्पित्रेति च सम्भवपर मेव । अन्यथा हि 'चन्द्रगुप्तसभा'–इति प्रथमं प्रयुदाहृत्यैव तत उच्येत पुष्पमित्रसभेति, तयोस्तथैवपौर्वापर्य्यात् * ; न हि प्रसिद्धपौर्वापर्यं-क्रमोल्लङ्घन मुचितं तादृशस्याशेषशेमुषीसम्पन्नस्य महाभाष्यकारस्येति । किञ्च चन्द्रगुप्तकाले तु पाटलीपुत्रं नगर मनुगङ्ग मेव वर्णितं मुद्राराक्षसादौ (ङ॰ पृ॰), ततोऽद्यापि तथैव ; तदत्र विचार्य्यता मिद मपि,—"यदि नाम चन्द्रगुप्तराज्यकाले पुष्पमित्रराज्यकाले वा महाभाष्यं प्रणीतं स्यात्, तर्हि कथन्नाम तत्र "अनुशोणं पाटलीपुत्रम्"–इति (ङ पृ॰) इष्येतेति ? अस्मन्मते तु चन्द्रगुप्तराज्यकालात्पूर्व्वन्त्वासीदेव पाटलीपुत्र मनुशोण मित्युक्त मतो युक्ततरं चैतत् चन्द्रगुप्तादपि प्राचीनत्वं भगवतः पतञ्जलेः किमु पुष्पमित्रादिति ।

(ख) यदप्युच्यते "वर्त्तमाने लट् (पा॰ ३. २. १२३.)"–इति–सूत्रीयभाष्ये "इह पुष्पमित्रं याजयामः"–इत्युत्तमपुरुषप्रयोगात् पतञ्जलेः पुष्पमित्रा-र्त्विज्य मपि स्फुटम्, तदत्र तत्कालिकत्वात्तत्कालिकत्वविचारेणेतीति ; तदपि न विचारसहम् । यद्येव मुत्तमप्रयोगदर्शनादेव तस्य याजकत्व मङ्गी-क्रियेत, तर्हि तत्रैव 'इह वसामः'–इतिप्रयोगदर्शनात् तस्य पाटलीपुत्र-वासित्व मप्यङ्गीकरणीयं भवेत् । न च पुष्पमित्रयागानुरोधेनैव तदानीं तस्य तत्र वासस्त्वासीदित्येतीष्ट मेवेति वाच्यम् ; सति हि तस्य तादृशवक्तव्याभिमते तिष्ठाम इत्येव मेव क्रिया प्रयुज्येत, न तु वसाम इति ; गोनर्द्दवासित्वात्तस्य। किञ्च तत्रैव "इहाधीमहे"–इत्यप्युक्त मस्ति ; तत् किं तदानी मपि पतञ्जलिः तत्र पाटलीपुत्रेऽध्ययनार्थं स्थितः? गुरुमुखादर्थग्रहण मेव ह्यध्ययन मार्य्याचार्य-सम्मतम् ; तत् तदानीं तत्र पतञ्जलेर्न कथ मपि सम्भाव्यते केनचिदपि ;

* S. W. Jone's 'Chronology of the Hindus' in Asiatic Dissertation Vol. I. p. 315; and As. Res. Vol. IX. p. 96.

तथाचावश्य मेव वक्तव्यम्,— एवमादिषूत्तमपदप्रयोगदर्शनं न तु पतञ्जलेः स्वस्य तच्चापाराश्रयत्वं गमयति ; अपि तु वैयाकरणाना मुदाहरणप्रत्युदाहरणप्रदर्शनायैवं प्रयोगास्त्ववश्य मेव कल्पनीयाः सदैवेति । तदेवं यथैवोक्तम् "इह वसामः"-इति, यथैव च "इह अधीमहे"-इति, तथैव "इह पुष्पमित्रं याजयामः"-इति च ; न च तेभ्यः कि मप्यैतिहासिकं तथ्यं लभ्य मस्ति । वस्तुतः पतञ्जलिर्दृष्टपाटलीपुत्त्र इति वक्तुं शक्यत एव, परं पाटलीपुत्त्रस्थ एवेदं भाष्यं व्यरचयदिति तु न कदापि वक्तुं युज्यते ; यतो भाषित मेतच्च तेनैव— "यथा देवदत्त इह भूत्वा पाटलीपुत्रे भवति, सा नूनं क्रिया (१ अ० ३ पा० १ आ०)"-इति, पुनस्तत्रैव किञ्चिदग्रे-"स इहस्थः पाटलीपुत्त्रस्थं देवदत्त मुपदिशति,— अङ्गदी कुण्डली व्यूढोरस्को वृत्तबाहुर्लोहिताक्षस्तुङ्गनासिको विचित्राभरण ईदृशो देवदत्त इति (१ अ० ३ पा० १ आ०)"-इति च ; एवमादिप्रयोगदर्शनाच्च कः खलु प्रज्ञावान् मनसापि शङ्कितुं समर्थः पाटलीपुत्त्रनगरे स्थित एव पतञ्जलिः प्रणिनायैतद्भाष्य मिति । किञ्च प्रदर्शितयोरुदाहरणयोर्यथा किल देवदत्तो भाष्यकृत्कल्पित एव जनः, ततः प्रख्यातास्त्वद्यापि दृश्यन्त एव बहवो देवदत्ताः ; यथा च "पश्य देवदत्त कष्टं श्रितो विष्णुमित्रे गुरुकुलम् (२ अ० १ पा० १ आ०)"-इत्यत्र च देवदत्त-विष्णुमित्रौ कल्पितौ, तथैव तत्र पुष्पमित्र-चन्द्रगुप्तावित्यपीत्यत्र च नास्त्येव सन्देहलेशोऽपीति ।

प्रतिपादितञ्च पुरस्तात्,—अद्यप्रचलितमहाभारतात् पूर्वजत्वं त्वेतन्महाभाष्यस्य (घु ए०) ; तस्माच्चैतस्य खीष्टजन्मतो द्विशताब्दीपूर्वाङ्कृतत्वन्तु पाश्चात्त्यैरपि स्वीकार्य्यम् ; महाभारतस्यास्य हि खीष्टजन्मतो द्विशताब्दीपूर्वप्रणीतत्वे सर्वेषा मेव तेषां मतैक्यात्* । पुष्पमित्त्रस्य राज्यारम्भकालस्तु तैः खीष्टजन्मतः शताब्दीपूर्वं मित्येव निर्णीतम् ; तथाच स्वकृतसिद्धान्तव्याकोपभियापि तेषां स्वीकार्य मेवास्य पतञ्जलेः तत्पुष्पमित्त्रतोऽति-

---

* W. W. Hunter's Brief History of the Indian People, P. 59.

पूर्वजत्वम्, तथा तादृशोदाहरणे श्रुतस्य तस्य कल्पितव्यक्तित्वञ्च । स्वीकृते त्वेवं तत्तुल्यतया 'चन्द्रगुप्तसभा'-इत्यत्र चोदाहरणे चन्द्रगुप्तेत्याख्यव्यक्तेरपि भाष्यकृत्कल्पकपोलकल्पितत्वं सुवच मेवेत्यल मतिजल्पनेनेति ।

(ग) अस्ति "अनद्यतने लङ् (पा० ३. २.१११.)"-इत्येकं सूत्रम् । तद्भाष्ये च वार्त्तिकोदाहरणतया द्वे वाक्येऽवलोक्येते,—"अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकान्"-इति । अत्र कश्चित् श्रीमान् माध्यमिकानिति नागार्ज्जुनमतानुगतबौद्धसम्प्रदायविशेषस्थितानेव मत्वा पतञ्जलिकालनिर्णये यतितवान्, तदपि भ्रमसङ्कुल मिवैवाभाति ; राजतरङ्गिणी-पर्यालोचनया हि स्फुट मेवावगम्यते नागार्जुनोऽसावभिमन्युसमकालिक एवेति । तथाहि—"अथ निष्कण्टको राजा कण्टकोत्साग्रहारदः । अभीर्बभूवाभिमन्युः प्रतमन्युरिवापरः । स्वनामाङ्कं शशाङ्काङ्कशेखरं विरचय्य सः । परार्द्ध्यविभवं श्रीमानभिमन्युपुरं व्यधात् । चन्द्राचार्यादिभिः * * * व्याकरणं कृतम् । तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः । नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः । ते वादिनः पराजित्य वादेन निखिलान् बुधान् । क्रियां नीलपुराणोक्ता मच्छिन्दन्नागमद्विषः (रा० त० १. १७४-१७८.)" -इति । अभिमन्युसमये एव च चन्द्राचार्यादिभिर्बङ्कन्वेषणतो ह्येकं महाभाष्यपुस्तकं दाक्षिणात्यादानीत मिति तु सर्ववादिसम्मत मेवेत्युक्तम् (घौ पृ०) । तत्कथ मभिमन्युतो बहुप्राक्तनस्य पतञ्जलेः किलाभिमन्युसमकालोत्पन्नमाध्यमिकज्ञानसम्भवो यतस्त तादृशानां माध्यमिकाना मवरोधदर्शन मपि तस्य सम्भाव्येत नामेति सुधीभिरेव विभाव्यताम् ।

अस्मन्मते त्विह भाष्ये माध्यमिकशब्दात् मध्यदेशप्रभवा एव ग्रहणीयाः । मध्यदेशस्तु मन्वादौ परिभाषित एव,—"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि । प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः (२. २१.)"-इति । पातञ्जलेश्चैतन्मनूत्तरभवत्वं पुर एव प्रतिपादितम् (घै पृ०); तथाचैतन्मनूक्तमध्यमदेशभवाना मेव माध्यमिकत्वं तदभिमतं सम्भाव्यते । बृहत्संहितायाः समालोचनाच्च मध्यदेशजनामपरतयापि भवन्ति माध्यमिका

इति बुध्यते। तथाहि—"भद्रारिमेदमाण्डव्यसाल्वनीपोज्झिहानसङ्ख्याताः। मरुवत्सघोषयामुनसारस्वतमाध्यमिकाः (१४. २.)"—इति। वस्तुतो यवना-वरोधानुसारत एव भाष्यकालनिर्णयस्तु सर्वथा असम्भव एव; भारते हि चिरादेव विद्यन्ते यवनोत्पाताः। महाभारतपाठादवगम्यत एव यौधि-ष्ठिरीयेऽपि काले क्वचित्क्वचित् यवनप्राबल्यसंवादः, हरिवंशपाठात् जरा-सिन्धुकालेऽपि यवनराजस्य कालयवनाभिधस्यातिबलत्वं विज्ञायत एव*। एव मन्यत्रान्यत्रापि भारते यवनोत्पातवृत्तान्ता बहव एव वर्णिता दृश्यन्ते; तत्र ग्रीक्भूपत्यादीना मपीह पदार्पणं मसङ्गदेवाभूत्। तदेवं यवना-वरोधानुसारतो भाष्यरचनाकालनिर्णये प्रवर्त्तनं नूनं दैवविडम्बन मिति न तदालोचनेऽप्यस्मन्मतिः प्रसरतीति दिक्।

(च) यच्च कश्चित् "तथाच सूच्यते हि भगवता पिङ्गलेन पाणिन्यनुजेन"—इति षड्गुरुशिष्योक्तिं दृष्ट्वैव पाणिनिसमकालिकत्वं पतञ्जलेः स्वीकर्त्तु मिच्छे, पतञ्जलेः पिङ्गल इति नामान्तरश्रवणात्। तस्य खल्वनुत्तमधियः प्रसा-वादाः कथन्नु सम्भवेयुरेकमुखेन? यतोऽननुभूतपूर्व मेवैतत्तेन निर्णीतं हिमवद्विन्ध्ययोर्मिलन मिवातीव चित्रम्! पाणिनि—पतञ्जल्योः प्रायोऽष्टा-दशशताब्दान्तरितत्वावगमात्। अत एव भगवता पतञ्जलिना क्वचित् क्वचित् पाणिनि—काले व्यवहृतं लौकिकं किञ्चिद् बोधयितुं 'पुराकल्पे' —इति तदुल्लेखः कृतः। तथाहि—"पुराकल्पे एतदासीत्— * * * शब्दा उपदिश्यन्ते * * * एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्य आचार्य इदं शास्त्र मन्वाचष्टे (१ अ० १ पा० १ आ०)"—इति, "पुराकल्पे एतदासीत्—षोडशमाषाः कार्षापणं षोडशपलास्च माषशंवद्यः (१अ० २पा० ३आ०)" —इति चैवमादि। यद्यपि पाणिन्यनुजस्य पिङ्गलः, महाभाष्यकारस्य च नामान्तरं पिङ्गल इति भवितु मर्हतीति सत्यम्; पर मनयोर्न चैक्यं स्वीकुर्मो वयम्; अपि तु बहुभिन्नकालिकत्व मेव। वस्तुतोऽङ्कवर्णानुसारत

---

* हरिवंशे विष्णुपर्वणि १०९—११४ अध्याया द्रष्टव्याः

एव कृष्ण-पिङ्गल-गौर-श्यामेति नामानि तदानीमाख्यातानि भवन्ति स्म। छान्दोग्येऽपि श्रूयते चैकत्र पिङ्गलः। तथाहि—"अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति (८. ६. १.)"-इत्यादि। न चात्रापि पिङ्गलनाम्नः पाणिन्यनुजस्यान्यस्य वा कस्यचित् मते इत्येव मर्थो गम्यते; 'शुक्लस्य'-इत्यादेः, 'आदित्यः पिङ्गलः'-इत्यादेश्चोत्तरत्र तत्रैव श्रवणात्, छान्दोग्यस्य तस्य पाणिनिपूर्वजत्वावधारणाच; दृश्यते हि छान्दोग्ये ऽनेकत्र शौनकः कापेयः (पा० ४. ३. ५, ६, ७.), प्रत्युदाहरणञ्च तदेव पद मनुभूयते "कपिबोधादाङ्गिरसे (४.१.१०७.)"-इति पाणिनिसूत्र-स्येतीह दिक्।

(ङ) अपि दृश्यते चात्र महाभाष्ये (पा०४.२.६०.) आख्यायिकात्वेन वासवदत्ताया ग्रहणम्। "आख्यायिका—वासवदत्तिकः"-इति; सुबन्धुकृतै-वाख्यायिका सेति प्रसिद्धा; सुबन्धुश्च कविः रामायणस्य, महाभारतस्य, तत्परिशिष्टरूपस्य हरिवंशस्य, विक्रमादित्यस्य च परभव एव। तथाहि— "रामायणेनेव सुन्दरकाण्डचारुणा"-इति, 'भारतेनेव सुपर्वणा'-इति, 'हरिवंशैरिव पुष्करप्रादुर्भावरमणीयैः'-इति, 'सा रसवत्ता विहता नवका विलसन्ति चरति नो कं कः। सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये"-इति च। तदेव मम हि महाभाष्यस्य वासवदत्ता-पर-भवत्वस्वीकारपूर्वकं रामायणादिपरभवत्व मपि मन्तव्य मित्येव मपि कश्चित् शङ्कितु मुत्सहेतैव। पर मवश्यं तस्येमानि च त्रीणि वितर्काणि भवेयुः,—यदि हि स्वर्गते च विक्रमादित्ये स्थितस्य सुबन्धोः समनन्तर मेव प्रणीतं स्यात् पातञ्जलं नाम महाभाष्यम्, तर्हि काश्मीरराजाभिमन्युसमये विक्रमादित्यजन्मतो बहुपूर्व मपि चन्द्राचार्यादिभिः कथं तद्भाष्यपुस्तक मवाप्त मिति प्रथमम्। सर्वैरेव पुरातत्त्वानुसन्धित्सुभिर्महाभाष्यस्यास्य खीष्टजन्मपूर्वप्रणीतत्व मेकवाक्यतो निर्णीत मेव; स सर्वसिद्धान्तोऽपि कथं न व्याकुप्येतैवेति द्वितीयम्। अपि यदि हि नाम महाभाष्यकारः खल्विदानीं प्रचलितान्महाभारतादपि परभवः स्यात्, तर्हि महाभाष्येऽत्र

प्रदर्शितं वृद्धकुमार्युपाख्यानं (पु० पृ०) प्रचलितमहाभारतीयानुरूप मेव कथं न दृश्येतेति तृतीयम्।

अस्मन्मते तु कालान्तरात्पाठान्तरवाक्यते तन्महाभाष्यपुस्तके सुबन्धुपरज एव कश्चित् तत्र 'वासवदत्तिकः' प्रभृत्यभिनिवेश्य तस्य नष्टाक्षरत्व मुद्धारेति। अत एव प्रवादोऽपि "यत्र लालायितः फणी"–इति।

महाभाष्यकृतो भगवतः पतञ्जलेः सुबन्ध्वादिबहुपूर्वभवत्वे, अपरा चैषोपपत्तिः समालोच्या,—यो हि नाम वासवदत्ताकृतः सुबन्धोरप्युत्तरभवः, तेन चावश्यं कालिदासस्य कवेरप्युत्तरभवेन भवितव्यम्; स्वीकृते च तथा कालिदासकृतान् प्रयोगानप्यवेक्ष्यावश्यं तत्र भाष्ये तथैवेष्टयः प्रणीता दृश्येरन्; न च तथा दृश्यन्ते, नापि तेषु भाष्यकृता कश्चन विचारः कृत इति पश्यामः; प्रत्युत सिद्धान्तकौमुद्यादौ तादृशप्रयोगाना मपप्रयोगत्व मेव निर्णीति मवलोक्यते। तथाहि—'अवैहि—इति त्वङ्गिरसाधुरेव'–इति (अ० पु०); किञ्च 'कथन्तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः, अनुदितौषसरागा इति भारविः, समानकालीनम्, प्राक्कालीनम्,—इत्यादि च? अपभ्रंशा एवैते इति प्रामाणिकाः'–इति (तद्धि० प्रौ०)। अपर मप्यत्रेदं विवेच्यम्,—महाभाष्यप्रयुक्तानां पाणिन्यादिविरुद्धाना मपि प्रयोगानां साधुत्वं मन्यते; कालिदासादीनां तु तत्पूर्वजत्वे तत्तत्प्रयुक्तानां कथ मुच्यतेऽसाधुत्व मिति? यथा दृश्यत एव हि पाणिनीयधातुपाठविरुद्धः प्रयोगोऽसौ भाष्यकारस्य—"आदित्यस्याभिप्राये सज्जते"–इति। न चेदृशप्रयोगस्यासाधुत्व माशङ्कित मपि केनचित्; प्रत्युताह च कैयटः—"सज्जते इति, भाष्यकारवचनादात्मनेपदम् (३अ० १पा० २आ०)"–इति। तत उत्तर मिदानीं तु भागवतादावपि बहुत्रैव प्रयुक्तं दृश्यते 'सज्जते'–इति*; ततो वय मपि तथा प्रयोक्तुं सदैव

* "प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु"—इति भाग० पु० ४.१९.२५.। महाभारतीयभीष्मपर्वान्तर्गतगीतापर्वान्तिमाध्यायीयसप्तदशश्लोकव्याख्यानावसरे श्रीधरस्वामिनापि प्रयुक्तम् "यस्य बुद्धिर्न लिप्यते, इष्टानिष्टबुद्ध्या कर्मसु न सज्जते"—इति।

सञ्जामहे एव । एवं “भाष्यकारस्तु लकृत्पिटको मकृत्पिटक इति रूपे इष्टापत्तिं कृत्वेदं सूत्रं प्रत्याचख्यौ”—इत्येवमादयश्चोक्ता दीक्षितादिभिः (वै॰ सि॰ कौ॰ अ॰ पु॰)। अहो मतप्राबल्यं तस्य भगवतो व्याकरणेषु ! अस्ति सूत्रं पाणिनीयम्—“अवाद् ग्रः (१.३.५१.)”—इति, एतेन पाणिनिमते ऽनुभूयत एव ‘अवगृणाते’—इत्येवमादीना मपि प्रयोगाणां साधुत्वम्; पर मत्र भाष्यकृता “गृणातिस्त्ववपूर्वो न प्रयुज्यत एव”—इत्युक्तम्; एतस्मादेव शास-नादद्य ‘अवगृणाते’—इत्येवमादीन् प्रयोक्तुं न क्षमते कश्चिदपि । तदेवं कालिदासादीना मपप्रयोगानवेक्ष्य तेषां साधुत्वाख्यापनाय पातञ्जले महा-भाष्ये कस्याप्येकस्य यत्नस्यानुपलाभात्, पाणिन्यादिमतविरुद्धाना मपि भाष्योक्तानां प्रयोगाणां शिष्टगृहीतत्वोपलाभात्, पाणिनिमतसिद्धाना मपि प्रयोगाणां पतञ्जलिवारितानां व्यवहारादर्शनाच्चावश्य मेव महाभाष्य-कारस्य भगवतः पतञ्जलेः किल कालिदासादितो बहुप्राचीनत्वं मन्तव्य मेवेति किं तस्य सुबन्धुपूर्वजत्वविचारेणेत्यलम् ।

अथ पतञ्जलिविषये ऽपर मपि किञ्चिद् समालोचयितव्य मस्ति । तथाहि —‘अय मेव पतञ्जलिः वैद्यशास्त्रप्रणेतापि, योगशास्त्रप्रणेतापि’—इत्येवं प्रवादः सुप्रचलितः श्रूयत एव । पर मस्य नामैक्य मेव वीज मनु-गच्छामो नान्यत् किञ्चनेत्यग्राह्य एवैषः प्रवादः । “योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन । योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि”—इत्येष श्लोकोऽपि तदनुगत एव । अपि वा वैद्यशास्त्रे आसीदस्य महाभाष्यकारस्यावगम इति तु प्रतीयते; इह हि भाष्ये बहुत्र तथाप्रयोगदर्शनात् । तथाहि—“वातिकम्, पैत्तिकम्, श्लैष्मिकम् ॰ —॰सान्निपातिकम् (५ अ॰ १ पा॰ १ आ॰)”—इति, “दधित्रपुसम्प्र-त्यक्षो ज्वरः॰—॰ । नड्वलोदकं पादरोगः॰—॰ । आयुर्घृतम्॰—॰ । (६ अ॰ १ पा॰ २ आ॰)”—इति, “घृतभोजन मारोग्यस्यादिः (६अ॰ ४ पा॰ ४ आ॰)”—इत्यादि च । तदेवं कश्चित् वैद्यकभाष्यविशेषस्य कर्तृतां च पतञ्जलेरस्य स्वीकर्त्तुं मुत्सहेत चेत् स्वीकरोतु नाम, परं योग-

शास्त्रीयमूलसूत्रकर्त्तृत्वं तस्य नैव स्वीकार्यम्; न ह्यत्र क्वापि योगविषयकोदाहरणानि दृश्यन्ते, येन चास्य योगशास्त्रज्ञत्वस्यापि परिचय उपलभ्येत; नापि हि व्याकरणे वैद्यके वा मूलसूत्रकर्त्तृत्वं दृश्यतेऽपि तु भाष्यकर्त्तृत्व मेव; तथा च यदि नाम योगेऽप्यस्य किञ्चित् कृतित्वं स्वीकार्यं भवेत्तदपि तद्भाष्यविषये एव सम्भवो न कदापि तत्सूत्रांशे। तादृशं योगभाष्य मस्ति लुप्तं वेत्यन्यदेतत्। षड्गुरुशिष्यलेखोऽपि च तादृशप्रवादमूलक एव। हन्त! यदा हि तेनालेखि "यत्प्रणीतानि वाक्यानि भगवांस्तु पतञ्जलिः। व्याख्यत् * * *। योगाचार्यः स्वयं कर्त्ता योगशास्त्रनिदानयोः"–इति (अ० भा०)। तदेतन्न स्मृतं किं मस्ति व्यासकृतं भाष्यं तस्य योगशास्त्रस्येति। पाणिनिसूत्राणां भाष्यस्य कर्तुः पतञ्जलेः पाणिनिपरभवत्वे कास्ति वक्तव्यता;—"पाराशर्य्यशिलालिभ्याम् (पा० ४. ३. ११०.)"–इति सूत्रदर्शनात् पाणिनेश्च पारशर्य्यव्यासपरजत्वं व्यज्यत एव। तदत्र कथयतु नाम नामैक्यश्रवणादेव व्यत्ययभिन्नवादी भवान् योगशास्त्रं खलु पाणिनिपरभवञ्चेत् कथं तद्भाष्यकारत्व मुपपद्येत तत्पूर्वजस्य तस्य व्यासस्येति?

अस्मन्नये तु,—योगशास्त्रस्य पातञ्जलस्य भाष्यकारो व्यासः, भिक्षुसूत्रकृतो व्यासात् विभिन्नो बहुपरभवश्चेति; "भुवनज्ञानं सूर्ये संयमात् (पात० ३. २४.)"–इति सूत्रीयभाष्येऽनतिप्राचीनपुराणादिसम्मतभुवनवर्णनदर्शनात् तस्य अद्यप्रचलितमहाभारतकारादेरिवानतिप्राचीनत्वावगतेः, लिपेरार्षत्वानवगमादिभ्यश्च। एवं बभूव च कश्चिदपरः पतञ्जलिर्योगसूत्रकृत् दर्शनशास्त्राविर्भावकालिकः, पाणिनितोऽपि प्राचीनः। तथाच पातञ्जलं नाम योगशास्त्रं पाणिनितो बहु प्रागेव प्रणीतम्; प्राचीनतमे भिक्षुसूत्रेऽपि "एतेन योगः प्रत्युक्तः (२.१.३.)"–इत्येवमादिदर्शनात्। अत एव सम्पृचानुरुधा० (३. २. १४२.)"–इति पाणिनीयसूत्रेण पातञ्जलशास्त्रविहितयोगाभ्यासकारिण्येवार्थे साध्यते 'योगी'–पदम्; न हि पातञ्जलात् पुरातनं किमप्यस्ति आसीद्वा योगशास्त्रम्। अत एव च पतञ्जलिशब्दस्य व्यक्तिविशेष-

नामत्वादव्युत्पन्नप्रातिपदिक मिति पाणिनिना उपेक्षितस्यापि कात्यायनकृते "शकन्ध्वादिषु पररूपम् (पा०६.१.९४.)"–इति वार्त्तिके ग्रहणं लभ्यते; शकन्ध्वादिगणपाठे दृश्यते हि "पतञ्जलिः"–इत्यपि। न चात्र किञ्चिदुक्तञ्च भगवता भाष्यकारेण; गणपाठो हि येन केन चित् कृतः स्यात् पर मस्मान्महाभाष्यकारात् प्राचीनतरेणैव केनचित् कृत एवेत्यत्र च नास्ति सन्देहः; अत एव "सिद्धन्तु रौढ्यादिषूपसङ्ख्यानात्। * * *। के पुन-रौढ्यादयः? ये क्रौड्यादयः (पा० ४.१.७९.)"–इत्येवमाद्युक्तं सङ्गच्छते तत्र तत्रेति।

आदिमीमांसाचार्यात् काशकृत्स्नेश्चाप्ययं परभव एव, नास्त्यत्र संशयः। अत एवोक्त मिह—"काशकृतिना प्रोक्ता मीमांसा काशकृत्स्नी (४अ० १अ० १आ० पुनः ३पा० २आ०)"–इति। इह प्रोक्तत्वोल्लेखदर्शनादस्य च काशकृत्स्नेः पाणिनितो बहु पूर्वजत्व मपि ध्वन्यते; तत्पूर्वजस्यैव हि तेन प्रोक्तत्वेन ग्रहणोपदेशात्। अद्यप्रचलितमीमांसाशास्त्रसूत्राणां कर्त्ता खलु जैमिनिस्तु पाणिनिसमकालिकः; व्यासशिष्यत्वात्, वैशम्पायनादिवत्। अतो जैमिनेश्चार्वाचीनोऽयं पतञ्जलिरिति च सुवचम्।

वेदान्तसूत्राणां प्रणेतुश्चायं परभवः। यदस्येतत् सूत्रं पाणिनीयम्—"पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (४.३.११०.)"–इति, अत्र पाराशर्यशब्देन वेदान्तसूत्रकृतो व्यासस्यैव बोधात्; अद्य वेदान्तेतिप्रसिद्धाना मेव हि सूत्राणां पाणिनिकाले भिक्षुसूत्रेति व्यपदेश आसीत्, न चान्यत् किञ्चन भिक्षुसूत्रं नामेति। अत एव वेदान्तसूत्रभाष्यवार्त्तिककृत् बालकृष्णा-नन्दोऽपि सर्वेष्वधिकरणेषु भिक्षुसूत्रकृत मित्याद्युक्त्या पाराशर्यं व्यास मेव प्रणनाम विविधप्रकारेण वर्णयन्। तथाहि, आत्माधिकरणभाष्यवार्त्ति-कारम्भे (सू० ४. १. २.—'आत्मेति तूपगच्छन्ति ग्राहयन्ति च')— "पाराशर्यः प्रथयतु परं भाव मव्याहतं स्वम्, सूत्रे स्वीये सकलविदुषां मोदमूलस्वभावम्। शिष्यैर्विश्वैरपि परिवृतः पैलपूर्वैः प्रतीतैः, आचूड़ं मे सजलजलदाकारदायादमूर्त्तिः"–इति, तथाध्यक्षाधिकरणभाष्यवार्त्तिकारम्भे

(सू० ४. २. ३.—'सोऽध्यच्चे तदुपगमादिभ्यः')—"भिक्षुयोगकृतं व्यासं प्रकृष्ट्य गुरुं परम्। स्मृत्वा व्याकुर्महेऽध्यच्चसूत्रभाष्यस्य वार्त्तिकम्"—इति। एवञ्च यान्यखिलसूत्राणि भिक्षुसूत्राणीति पाणिनिकाले प्रथितानि, तान्येवेदानीं ब्रह्मसूत्राणीति वेदान्तसूत्राणीति च कथ्यन्त इति स्फुटम्। सङ्ग्रहकारस्तु व्याडिः पतञ्जलेरस्मात् पूर्वतन इति तु "सङ्ग्रहेऽस्त मुपागते (घौ ए०)"—इति वाक्यपदीयवचनादिभ्यश्च सिद्ध मेव; तस्मिन् व्याडि-काले ऽप्यस्य वेदान्तदर्शनस्य ब्रह्मविद्येति प्रसिद्धिरासीत्। तथाहि विकृतिवल्ल्यारम्भे श्लोकित मेतद् स्वय मेव व्याडिना,—"ब्रह्मविद्या-गुरुं श्रेष्ठं भारद्वाजं बृहस्पतिम् (१.३.)"—इति। तदेतस्य ग्रन्थस्य पातञ्जलात् प्राक्तनत्वस्य तु का कथा? व्याडितः, पाणिनितश्चापि प्राक्तनत्व मेवेति।

न्यायवैशेषिककाराभ्या मप्ययं पतञ्जलिः परभव एव। दृश्यत एव हि नैयायिकाद्यनुमानप्रणाल्यादिकं तत्कृते महाभाष्ये। तथाहि—"धूमं दृष्ट्वा अग्निरत्रेति गम्यते (२ अ० १ पा० १ आ०)"—इत्यादि। वैशेषिक—न्याय-कारयोः कणभक्षाक्षचरणयोश्च वेदान्तसूत्रकार—पाराशर्य—समकालिकत्व-ञ्चेहैवानुपदं प्रतिपादयिष्यामः।

साङ्ख्याचार्यात् कपिलाचार्यं परभवः। अत एवात्रोक्तं दृश्यते कापिल-मतम्—"अथवा भवति वै कश्चित् जाग्रदपि वर्त्तमानं कालं नोपलभते। तद्यथा। वैयाकरणानां शाकटायनः रथमार्ग आसीनः शकटसार्थं यान्तं नोपलेभे। किं पुनः कारणं जाग्रदपि वर्त्तमानं कालं नोपलभते? मनसा संयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात् (३ अ० २ पा० २ आ०)"—इति। अपरञ्च चैवम् "षड्भिः प्रकारैः सतां भावाना मनुपलब्धिर्भवति। अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति (४ अ० १ पा० १ आ०)"—इति। तदेवमादीनां दर्शनात् कापिलशास्त्रप्रचारात्परभवत्वं चास्य पतञ्जलेः सुव्यक्तम्। अपि वास्य कपिलपरभवत्वविचारस्तु दूरे आस्ताम्, तत्सम्प्रदायीयद्वितीयपुरुषादासुरेश्चायं पतञ्जलिर्बह्वर्वाचीन एव;

एतत्पूर्वजेनापि हि वार्त्तिककारेण कात्यायनेन "आसुरेरुपसङ्ख्यानम् (पा० ४. १. १६.)"–इत्युक्तत्वात्। आसुरिर्हि साङ्ख्याचार्येषु द्वितीय इति दृश्यते। तथाप्युक्त मीश्वरकृष्णेन—"पुरुषार्थज्ञान मिदं गुह्यं परमर्षिणा समाख्यातम्। * * *। एतत् पवित्र मग्र्यं मुनिरासुरये ऽनुकम्पया प्रददौ–(सा० त० कौ० ६९, ७०)"–इति। 'परमर्षिणा कपिलेन'–इति च तत्र वाचस्पतिमिश्रकृता टीका। प्रवचनभाष्येऽप्युक्तम्—"आदिविद्वान् निर्माणचित्त मधिष्ठाय कारुण्याद् भगवान् परमर्षिरासुरये जिज्ञासमानाय तन्त्रं प्रोवाच (१. २५.)"–इति।

पाशुपतदर्शनकाराच्चासौ भाष्यकारः कनीयान्। अत एव तत्कृतेऽत्र महाभाष्ये दृश्यते—"शिवभागवतः (५ अ० २ पा० १ आ०)"-इति पदम्। "भगवान् भक्तिरस्य भागवतः, शिवस्य भागवतः इति षष्ठीसमासः"–इति च तत्र व्याख्यातं कैयटेन। एव मिह "सौर्यभगवता उक्तम् (८ अ० २ पा० २ आ०)"–इति दर्शनाच्चावगम्यतेऽस्य पतञ्जलेः सौरसम्प्रदायारम्भाच्च परभवत्व मेव; सौर–सौर्ययोर्न ह्येव भेदः। वस्तुतः सौरसम्प्रदायः खलु शैवसम्प्रदायादपि बहुपुरातन एवेति प्रामाणिकाः।

चार्वाकादिनास्तिकदर्शनशास्त्राणि तु बहुपुरातनान्येव न वेत्यत्र स्यात् विचार्यम्, परं नास्तिकभावः खलु पाणिनिकालेऽपि स्थित एव। अत एव स हि सूत्रयामास—"अस्तिनास्तिदिष्टं मतिः (४. ४. ६०.)"–इति। मनुसंहितायाम् अपि नास्तिकशासनवचनानि सन्त्येव, तानि चानुपदं प्रदर्शयिष्यामः। पतञ्जलिनापि स्वस्य नास्तिकमतज्ञता प्रकाशितैव। तथाहि —"किञ्च भोः श्लोका अपि प्रमाणम्? किञ्चातः? यदि प्रमाणम्, अय मपि प्रमाणं भवितु मर्हति–"यदुदुम्बरवर्णानां घटीनां मण्डलं महत्। पीतं न गमयेत् स्वर्गं किन्तु क्रतुगतं नयेत्'–इति। प्रमत्तगीत एषः। भवतो यस्त्वप्रमत्तगीतः तत् प्रमाणम् (१ अ० १ पा० १ आ०)"–इति। 'यदुदुम्बरेति। अयं श्लोकः सौत्रामणीयागे सुरापानस्य दुष्टत्व मुद्भावयति। प्रमत्तगीत इति। प्रमादेन विप्रतिपन्नत्वेन गीत इत्यर्थः"—इति च

तत्र कैयटः। अस्मन्मते तु 'उदुम्बरवर्णानाम्' उदुम्बरकाष्ठनिर्मितानाम्, 'घटीनाम्' ग्रहेतिप्रसिद्धानां सोमपात्राणां 'यत् महत् मण्डलम्' शुक्र-मन्थ्यादिसमूह माध्वर्य्यवे प्रसिद्धम्, तत् 'पीतं' सत् पानकारिणं 'स्वर्गं न गमयेत्' 'किन्तु' 'क्रतुगतं' कर्म्मानुगतं श्रमकष्टादिक मेव 'नयेत्' प्रापयेत्। इत्येव तदर्थः। किञ्चेहत्यः प्रमत्तशब्दो नास्तिकपर एव भाष्यकाराभिप्रेतः।

काश्मीरेन्द्रात् जलूकाच्चाय मर्वाचीनः। यतो ह्युक्तम् "यत्तेन कृतं न च प्रोक्तम्—वाररुचं काव्यम्, जालूकाः श्लोकाः (४ अ० ३ पा० १ आ०)" —इति। एष च वररुचिः कात्यायन एव; स एव व्याकरणस्य वार्त्तिककारः; पतञ्जलेरस्य तत्परभवत्वे कोऽस्ति विचारः; परं जलूकेन राज्ञा कृताः श्लोका अप्यस्य महाभाष्यकारस्य पतञ्जलेरासीद् विदिता इतीत्थं ततोऽपि पराचीनत्वं व्यक्तम्।

वार्त्तिककार-कात्यायनात् परभवत्वन्त्वस्याविचारित मपि सिद्ध मेव, परं ततो बहुकालकृतावरत्व मस्येत्यपि प्रतीयत इति तु प्रदर्शनीयम्। तथाहि पठितश्चेदं वार्त्तिकम्,—"ढ-ग्रहणे सानुवन्धस्योपसङ्ख्यानम्"-(पा० ४. १. १५.)"-इति; "कथं स्त्रीनाम सभायां साध्वी स्यात्"—इत्युक्त्वा च (४ अ० १ पा० २ आ०) खण्डितं तद्वार्त्तिकम्। "यज्ञसभायां विदुषा मेव पुरुषाणां साधुत्वाधिकारादिति भावः"—इति च तत्राह तट्टीकाकारः कैयटः। तथाचेदं सुव्यक्त मेव कात्यायनकाले यज्ञसभादौ स्त्रीणां गमनं न दोषावह मासीदिति तेन पठितं तथा वार्त्तिकम्; पतञ्जलिसमये तु यज्ञसभादौ स्त्रीणां गमनं दोषावह मेवेति परिहृतं तदितीत्थं सिद्ध मेव वार्त्तिककाराद् बह्वर्वाचीनोऽयं पतञ्जलिरिति।

(मनुसंहिता) मनुसंहिता तु या खलु सूत्रनिबद्धा, सैवातिप्राचीना, मानवकल्पसूत्रादिभिः समानवयस्का, समानमाना च। महाभाष्ये (१अ० १पा० ७आ०) यदुक्तं "नैव ईश्वर आज्ञापयति, नापि धर्म्मसूत्रकाराः पठन्ति"-इति, तत्ताद्दशमन्वाद्यभिप्रायेणैव। इदानीं प्रचलितो मनुसंहितेति प्रसिद्धो ग्रन्थस्तु भृगुप्रोक्त इति भृगुसंहितेत्येव व्यवहार्यः; परं ज्योतिष-

शास्त्रे भृगुसंहितेति ग्रन्थविशेषस्य, इतोऽपि प्राचीनस्य दृष्टचरत्वात् न तथा व्यवहृतोऽयं लोकैः । एतस्य ह्युपक्रमे प्रत्यध्यायावसाने चास्य भृगुप्रोक्तत्वं स्पष्टमेवेति न च तत्रास्ति प्रमाणप्रदर्शनीयतेति । तदुक्तं साङ्ख्यीयकौमुदीप्रभायां स्वप्नेश्वरेणैतत्,—"पञ्चशिखः सूत्रकारः आसुरिशिष्यः; कापिल मिति प्रसिद्धिस्तु सम्प्रदायप्रवृत्तेः; भृगुप्रोक्तसंहिताया मिव मनुसमाख्या" —इति ।

तस्यैतस्य मनुसंहितेतीदानीं प्रसिद्धस्य भृगुसंहिताग्रन्थस्य प्रणयनकालनिर्णयस्तु सुदुष्कर एव; सामान्यतस्तु एतन्मनुसंहिताकारः बौद्धधर्म्मप्रचारकात् खलु शाक्यमुनेः, रामायणलेखकादादिकवेर्वाल्मीकाच्च प्राचीनतमो वार्त्तिककारकात्यायनात्तु पराचीन इति वक्तुं शक्यत एव । यतस्त्वात्र संहितायां महाभारते इवाहिंसाधर्म्मो विशेषतो नोपदिष्टः, न च बौद्धधर्म्मप्रकाशितनिर्वाणमुक्तिप्रसङ्गश्च, अत एवास्याः बौद्धधर्म्मप्रचारात् प्राचीनत्व मवगम्यते । बौद्धधर्मसुप्रचारोत्तरप्रकाशिते हि महाभारते ऽहिंसाधर्म्मो निर्वाणमोक्षश्चोक्तः ।—"बहूनां यज्ञतपसा मेकार्थानां पितामह ! धर्म्मार्थं न सुखार्थार्थं कथं यज्ञः समाहितः"—इत्यादिः, अहिंसा सकलो धर्म्मो हिंसाधर्मस्तथाहितः । सत्यस्तेऽहं प्रवक्ष्यामि यो धर्म्मः सत्यवादिनाम्"—इत्यन्तश्चाध्यायो द्रष्टव्यः (शा० प० २७१ अ० १–२० श्लो०) । अस्मिन्नध्याये यज्ञगतवधस्यापि दुष्कृतत्वं वधत्वञ्च वर्णितम्; तदेतन्महाभारतकारस्य बौद्धसंसर्गफल मेवावबुध्यते । मनौ तु—"मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्जने"—इत्यारभ्य त्रिंशच्छ्लोकेषु मांसस्य भक्षणवर्जने विहिते (५ अ० २६–५६ श्लो०) । तत्र वृथामांसभक्षणे प्रवृत्तिश्चेत् भक्षयतु, निवृत्तिश्चेत् महाफल मित्येव प्रतिपादितम् (५६) । देवपितृकृत्यादौ तु मांसभक्षणे न कोऽपि दोष उक्तः (३२); मधुपर्कादौ तु विहित मेव मांसभक्षणम् (४१), यज्ञादौ तु कृता हिंसा, अहिंसैवेत्यपि कथितम् । अत एव ब्रूमः,—अहिंसाविधेः प्रशंसनान्महाभारतस्य शाक्यबुद्धपरजत्वम्, तथैव हिंसाविधेर्विधानाच्च मनोस्तत्पूर्वजत्व मपि । एव मेव

भीष्मपर्व्वणि—"कामक्रोधविमुक्तानां यतीनां यतचेतसाम्। अभितो ब्रह्म निर्वाणं वर्त्तते विदितात्मनाम् (२९अ० २६श्लो०)"—इत्येवमादि। मनौ तु प्रथमाध्याये (१०४–१०६) त्रिषु श्लोकेषु यानि फलान्युक्तानि, न तत्रास्ति निर्वाणं नाम; तत्रैव द्वादशाध्यायेऽपि "प्राप्यते ह्यमृतं ततः (८५)"—इति, "स्वाराज्य मधिगच्छति (९१)"—इति। "नैःश्रेयस मिदम् (१०७)"—इत्यादीनि तु दृश्यन्ते, परं न क्वापि बौद्धप्रचारितं निर्वाणपद मिति। तदेवं शाक्यस्य ज्ञानलाभात् पूर्व मेवेदं शास्त्र मिह प्रथित मित्यत्र नैव संशयः। शाक्यज्ञानलाभस्तु खी० पू० ५८८ वर्षेऽभूदिति निर्णीत मेवेति। न खलु कस्य चिदपि धर्म्मशास्त्रस्य शतवर्षान्यूनकाले एव भवेदभ्युदयः, नापि तन्न्यूनतो भवेत् प्रभावाल्पत्वम्, न च तत्प्रभावाल्पत्व मन्तरा अन्यधर्मे मतिर्भवति कस्यचिदपीत्यन्यधर्म्मशास्त्रोत्थानसम्भवः। अतः शाक्यमुनिकालादन्यूनशताब्दीद्वयपूर्व मेवेदं मानवं धर्मशास्त्रं समुत्पन्न मिति च सुतरां सम्पद्यते।

अपि नाम रामायणलिपिस्तु शाक्यमुनेर्जन्मतः पुरैवेति अध्यापक-लासेनादीना मपि सम्मतम्। तत्र मनुवचनोद्धृतिदर्शनात् मनुसंहितायास्तस्यास्तत्पूर्वकालिकत्व मपि व्यक्तम्। तथाहि तत्र किष्किन्धाकाण्डे—"श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ। गृहीतौ धर्म्मकुशलैस्तथा तच्चरितं मया। 'राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः। निर्म्मलाः स्वर्ग मायान्ति सन्तः सुकृतिनो यथा॥ शासनाद्वापि मोक्षाद्वा स्तेनः पापात्प्रमुच्यते। राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम् (१८. ३०, ३१, ३२.)"—इति। राजभिर्धृतदण्डास्त्वित्यादी श्लोकौ तु मनुसंहिताया अष्टमाध्याये (३१६. ३१८.) दृश्येते एव। तदेव मपि प्रतीयते मनुसंहितायाः समुत्पत्तिर्नूनं शाक्यबुद्धजन्मतो बहुपूर्व मेवेति।

किञ्च H. H. उइल्सन्-महोदयस्य विचारतो ज्ञायत एवैतत्,—जलूकाख्यो नरपतिरासीत् खीष्टजन्मतः पूर्वं सप्तमशताब्द्या मिति; राजतरङ्गिणी-प्रथमतरङ्गदर्शनाच्चावगम्यते आसीत् स शैव इति। तथाहि—

"विजयेश्वरनन्दीशक्षेत्रज्येष्ठेशपूजने । तत्र सत्यगिरौ राज्ञः प्रतिज्ञा सर्वदा ऽभवत् (१३.)"—इति । तदेवं जलूककाले विजयेश्वरादिलिङ्गनामस्मरणात् ततः पूर्व्वैव शैवधर्म्मः सुप्रचलित इत्यपि व्यक्तम् । एवं हि शैवधर्म्मप्रचारोऽवश्य मन्यूनाष्टशताब्दीतोऽपि पूर्व्व मभवत् खीष्टजन्मतः इत्यप्युक्ते न कश्चिद्दोषो लक्ष्यते । मनुसंहिताकाले तु नैव शिवोपासनोद्भूता ; सत्यां हि तस्या मवश्य मेव तत्र शिवपूजाप्रकारादिक मुपदिष्टं दृश्येतैव ; नात्र तु क्वचित् प्रसङ्गतोऽपि शिवपूजाविधिराख्यातः ; "मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् । वाच्यग्निं मित्र मुत्सर्गे प्रजने च प्रजापतिम् (१२. १२१.)"—इति दर्शनात् बलाधिष्ठातृत्वं हरस्येति मनुसंहिताकारसम्मत मित्येव बुध्यते, तथा चन्द्रादेश्च मनोऽधिष्ठातृत्वादिकम् ; परं नेत्थं शिव-लिङ्गस्थापनपूजनादीनि तत्समये प्रचलितानीति ज्ञायन्ते । तथाच शैवधर्मा-विर्भावाच्च प्रागेव प्रणीतैषा संहिता भृगुणा मनुप्रणीतधर्म्मसूत्रानुसारत इति स्फुटम् । एतावता हि कलेरत्यधिकत्रयोविंशशताब्द्याम्, खीष्टजन्मतो ऽन्यूननवमशताब्द्या मेतस्याः स्मृतिसंहितायाः सम्पन्नं प्रणयन मिति लभ्यत एव ।

यद्युच्येत,— मनुसंहितायाम् "पाषण्डिनो विकर्म्मस्थान् (४अ० ३० श्लो०)"—इत्यस्य व्याख्यानावसरेऽवदत्तट्टीकाकारः कुल्लूकः—"पाषण्डिनो वेदवाह्यव्रतलिङ्गधारिणः शाक्यभिक्षुक्षपणकादयः"—इति ; तथाच बौद्ध-धर्म्मप्रादुर्भावकालजत्व मेवास्याः संहितायाः सम्पद्यते ? इति । अत्र ब्रूमः ; —तयोक्त्या तस्यैव कुल्लूकस्याधुनिकत्वं प्रकटितम् ; किं तेन मूलकारस्य ? मूले हि न क्वचिदपि तादृश आभाषोऽपि दृश्यते । वस्तुतः कुल्लूकभट्टकृता मनुटीका नातिप्राचीना, नैव समीचीना ; ततः क्वचित् क्वचित् तत्र व्याख्यादोषोऽपि लक्ष्यत एव । तथाहि—मनुसंहितायाः सृष्टिप्रकरणे "मध्ये व्योम दिशश्चाष्टावपां स्थानञ्च शाश्वतम् (१. १३.)"—इति व्याख्याना-वसरे तूक्तं तेन "समुद्राख्य मपां स्थानम्"—इति, पुनश्चाग्रे "सरितः सागरान् (१. २४.)"—इति व्याख्यानावसरेऽप्युक्तम् "सागरान् समुद्रान्"—इत्येव ।

तदेवं कथिते पुनरुक्तिदोषो भवति; अपि पूर्वत्र 'मध्ये'–इत्युक्तम्, दिगर्थयोः साहचर्यञ्चास्ति; तदेतानि नैवालोचितानि। अस्मन्मते तु पूर्वत्र माध्यमिकं जलस्थान मेवेष्टम्। मेधातिथिनाप्युक्तं तथैव "अपां स्थानम् = अन्तरिक्षं समुद्रम्"–इति (१. १३.)। इतोऽप्याश्चर्य मेतत्,—प्रथमेऽध्याये "पाषण्ड-गणधर्म्मांश्च (११८.)"–इतिव्याख्याने सः स्वय मेवोक्तवान् कुल्लूकः—"पाष-ण्डिनः = विकर्मस्थान्–इत्यादयः (४.३०.), तेषां पृथग्धर्म्मानभिधानात्"–इति; चतुर्थाध्याये तु पूर्व मुक्तं विस्मृत्यैव किं व्याचष्टे "पाषण्डिनः = वेद-बाह्यव्रतलिङ्गधारिणः शाक्यभिक्षुक्षपणकादयः, विकर्म्मस्थाः = प्रतिषिद्ध-वृत्तिजीविनः"–इति। कुल्लूककृत–प्रथमाध्यायीय–व्याख्यानानुसारत एवास्य चतुर्थाध्यायीयवचनस्य व्याख्यानं भवेच्चेत्, तथापि विकर्मस्थादीनां तच्छ्लोका-भिहितानामेवात्र पाषण्डित्वेन ग्रहणं क्रियेत ? न तु शाक्यादीनाम्। तत् कथ मुक्त मेव मिति विचारिते, मेधातिथिकृतव्याख्यानानुसारित्व मेवात्र कुल्लूकस्येष्टस्य स्वोक्तविस्मरणे निदान मुपलभ्यते। मेधातिथिर्नाम मनु-टीकाकारस्तु नूनं भागवतपुराणप्रचाराद्दुत्तरभवः; भागवत मपि तत् शाक्यबुद्धधर्म्मप्रचारात् पराचीन मेव। श्रीधरस्वामिना च बोधितं तत्र भागवते शाक्यादिमतानुगाना मेव पाषण्डित्वम्। तथाहि—"यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया। तानि पापस्य खण्डानि लिङ्गं खण्ड मिहोच्यते। एव मिन्द्रे हरत्यश्वं वैण्ययज्ञजिघांसया। तद्गृहीतविसृष्टेषु पाषण्डेषु मतिर्नृणाम्। धर्म्म इत्युपधर्मेषु नग्नरक्तपटादिषु। प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु (भाग० पु० ४. १९. २३–२५.)"–इति। "नग्नाः = जैनाः, रक्तपटाः = बौद्धाः, आदिशब्देन कापालिकादयश्च"–इति च तत्राह स्वामी। तदेतत् पाषण्डलक्षण मेवानुलक्ष्य भाषित मिह तेन मेधातिथिना—"पाषण्डिनो बाह्यलिङ्गिनो रक्तपटनग्नचर-कादयः"–इति। कुल्लूकस्तु श्रीधरकृतां तां भागवतटीकां संस्मृत्य, मेधा-तिथिकृता मेताञ्च मनुटीकां संलक्ष्यैव विसस्मार मनुप्रथमाध्यायीयं

त्सङ्गत मपि व्याख्यानम्,—तत एवोक्तम् ‘पाषण्डिनो वेदवाह्यव्रतलिङ्ग-धारिणः शाक्यभिक्षुक्षपणकादयः’–इति ।

वस्तुतो ये खलु लोकविमोहनार्थं यथासमयं यथेच्छधर्म्मचिह्नानि धारयन्ति, त एव पाषण्डाः ; अत एवोक्त ममरसिंहेन—“पाषण्डाः सर्वलिङ्गिनः (२. ७. ४५.)”–इति । एवञ्च पाषण्डाः खलु नास्तिका एव गम्यन्ते । ते तु चिर मेव स्थिताः ; ततश्चैतन्मनुसंहिताकालेऽपि तादृशनास्तिकाना मस्तित्वे कोऽस्ति शङ्कावसरः? नास्तिकानां ग्रन्थाश्च पुरा बहव आसन्नित्यपि प्रतीयते । अत एवोक्त मेवम्—“योऽनधीत्य द्विजो वेद मन्यत्र कुरुते श्रमम् (म० सं० २. १६८.)”–इति । ‘अन्यत्र = नास्तिकादिशास्त्रे’–इत्येव मेवात्रास्मद्गुरूपदेशः । पातञ्जले महाभाष्येऽपि दृष्टं प्रदर्शितम् पुरस्तात् “यदुदुम्बरवर्णानाम् (चै ए०)”–इति । पतञ्जलिना किलोद्धृतः स च श्लोकोऽवश्यं कुतश्चिन्नास्तिकागमादेव । सर्वदर्शनकारसङ्गृहीताः चार्वाकदर्शन मिति प्रदर्शिताः ‘न स्वर्गो नापवर्गो वा’–इत्यादयः श्लोका अपि नास्तिकागमनिदर्शनभूता एव । तादृशानां नास्तिकाना मेव पाषण्डिन इति पदेन तत्र मनुश्लोके ग्रहण मिष्टम्; अतिथिभावापन्नैश्च तैः वाङ्मात्रालापेनाप्यर्च्चनं न कार्य्य मित्येव तद्विधेराशयः । ये तु न नास्तिकाः पर मालस्यदोषादिभिः विकर्म्मस्थाः, किञ्च ये केचित् आस्तिका अपि उदरपूरणाद्यर्थं वैडालव्रतिकादयः सम्पन्नाः ; तैश्च संसर्गः परित्याज्य एवेति च तच्छ्लोकाशयः । तदेव मत्र श्लोके शाक्यबुद्धगन्धोऽपि न लभ्यतेऽस्माभिस्तर्त्किं कुर्मो वदाम एवैतद्धपि शाक्यजन्मतो बहुपूर्व मेव जातोऽयं मनुसंहिताकार इति ॥

एतत्संहितासमालोचनादेतदप्यवगम्यते,—अयञ्च भृगुः, योगसूत्रकृतः आदिपतञ्जलेः, वेदान्तमतपोषकभिक्षुसूत्रकृतः पाराशर्य्याद् व्यासात्, मीमांसादर्शनीयादिसूत्रकृतः काशकृत्स्नेरपि जैमिनेश्च, वैशेषिकसूत्रकृतः कणादात्, न्यायसूत्रकृतो गौतमात्, साङ्ख्यसूत्रकृतः कपिलात्तच्छिष्यादासुरेश्चावरज एवेति । समासतः प्रदर्शयामश्चैतत् क्रमेण । षष्ठेऽध्याये

यतिधर्मप्रकरणे—"अङ्गा रात्र्या"—इत्यादिचतुर्दशश्लोकानाम् (६६–८२) विशेषतश्च तेष्वेव "प्राणायामैर्दहेद् दोषान् धारणाभिश्च किल्बिषम्। प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् (७२)"–इत्यस्य, पुनः सप्तमेऽपि—"इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् (४४)"–इत्यस्य च दर्शनात् ज्ञायत एव,—आदिपतञ्जलिकृतायोगशास्त्रात् परस्तात् प्रणीतेयं संहितेति। तत्रैवाग्रे "आध्यात्मिकञ्च सततं वेदान्ताभिहितं च यत् (८३)"–इति, "वेदान्तं विधिवच्छ्रुत्वा (९४)"–इति, पुनः सप्तमेऽपि—"आत्मविद्याम् (४३)"–इति, पुनर्द्वादशेऽपि "सर्वमात्मनि सम्पश्येत् सच्चासच्च समाहितः। सर्वं ह्यात्मनि सम्पश्यन् नाधर्मे कुरुते मनः॥ आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्। आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥"–इति (११८, ११९) च। तदेवमादीनां दर्शनात् ज्ञायत एव,—पाराशर्यव्यासकृताद् वेदान्तशास्त्राच्च परस्तात् प्रणीतेयं संहितेति। मीमांसामूलिकाया एवास्या धर्मसंहिताया मीमांसापरजत्वप्रमाणायाल मायासेनेति। अस्ति सप्तमाध्याये "आन्वीक्षिकीञ्च (४३)"–इति, द्वादशे "तर्की (१११)"–इति च। एवमादीनां दर्शनात् ज्ञायते वैशेषिकसूत्रेभ्यो न्यायसूत्रेभ्यश्च परस्तात् प्रणीतेयं संहितेति। प्रथमेऽध्याये षष्ठ–चतुर्दश–पञ्चदश–षोडशश्लोकानां दर्शनात्, द्वादशाध्याये पुनः साङ्ख्योक्तप्रमाणत्रयाणामेव स्मरणाच्चावगम्यतेऽसौ संहितावश्यं साङ्ख्यशास्त्रात् परं प्रणीतेति च। इह च द्वादशाध्याये दशावरापरिषद्विधौ (१११ श्लो०) यद्दृश्यते 'हैतुकः'–इति पदम्, तत् साङ्ख्यविद एव बोधकम्; साङ्ख्यस्यैव हेतुशास्त्रत्वात्। दृश्यते हि—"मूले मूलाभावादमूलं मूलम् (सा० प्र० १.६७)"–इति साङ्ख्यसूत्रम्, "प्रकृतिरिह मूलकारणस्य सञ्ज्ञामात्रम्"–इति च विज्ञानभिक्षुकृतं भाष्यम् (१.६१. सूत्रीयम्), "मूलं प्रकृतिरविकृतिः"–इतीश्वरकृष्णवचनञ्च; एवमादीनां दर्शनात् साङ्ख्यशास्त्रस्य मौलिकत्वं प्रतीयते सम्यगेव। अत्रैवैकं सूत्रम् "ईश्वरासिद्धेः (१. ९२)"–इति, तदेवमादीनां पर्यालोचनया नास्तिक-

सम्पादन मपि सुकर मिति मत्त्वैवोक्त मित्येव भृगुप्रोक्तायां मनुसंहितायाम्—"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर्बहि ष्कार्यो नास्तिको वेदनिन्दकः (२.११.)"—इति। अपरश्चैकं सूत्रं साङ्ख्यस्य "सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः (१.६८.)"—इति, "तस्मादपि चासिद्धं परोक्ष माप्तागमात् सिद्धम्"—इति च तदनुगता ऐश्वरकृष्णीयकारिका; तदेवमादिभ्यः प्रतीयत एव साङ्ख्यदर्शनस्य वेदानुगतत्वञ्च। अत एव चात्र संहितायां दशावरायां साङ्ख्यविदोऽपि नियोगो विहितो "हैतुकः"—इति (१२.१११)। पाणिनिवार्त्तिककाराच्च कात्यायनात् परभवत्व मस्या अनुपद मेव प्रतिपादयिष्यामः; तेन च कात्यायनेनोक्तं वार्त्तिकम्—"आसुरेरुपसङ्ख्यानम् (पा० ४. १. १६. वा०)"—इति; ततश्चास्यासुरिपरभवत्व मपि सुतरां सम्पद्यते। तदेवं प्रदर्शितमामभ्यः सङ्ख्योऽपि दर्शनशास्त्रेभ्योऽर्वाचीनेयं मनुसंहितेति प्रथिता भृगुसंहितेति स्फुट मवगम्यत एवेति॥

एवञ्च षसां दर्शनानां पौर्वापर्यविषये बहव एव वादा उपलभ्यन्ते। अस्मन्मते तु साङ्ख्यदर्शनस्यैवास्तिकदर्शनेषु प्राथम्यम्; साङ्ख्यप्रथमाचार्यस्य कपिलस्यैव "आदिविद्वान्"—इति प्रसिद्धेः; तादृशप्रसिद्धौ चाय मेव हि हेतुरुपलभ्यते,—यद्यपि सर्वविद्यानिधानेषु वेदेषु दार्शनिकभावा अपि चिरादेव स्थिताः, परं पृथक्त्वेन दर्शनशास्त्रस्य प्रचारस्तु तेनैव विदुषा प्रथमं प्रारब्ध इति। भागवतादौ भगवदवतारेषु वर्णितक्रमदर्शनाच्चावगम्यते—"आन्वीक्षिकी"—इति प्रसिद्धाया अध्यात्मविद्यायाः प्रथमोपदेशकात् आत्रेयादाद्यशोऽयं हि कपिल इति। तथाहि—"पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम्। प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम्। षष्ठ मत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया। आन्वीक्षिकी मलर्काय प्रह्लादादिभ्य ऊचिवान् (भाग० पु० १. ३. १०, ११.)"—इति। सैषान्वीक्षिकी विद्यैव इदानीं प्रचलितानां वैशेषिकन्यायवेदान्तसूत्राणां वीज मित्यनुमीयते; स्मर्यते हि जैमिनीयमीमांसायां वादरायणनामकीर्त्तनात् पुरैव

चात्रेयनाम। तथाहि—"मुख्यानन्तर्य्यं मात्रेयः * * *। अन्ते तु बादरायणः * * * (मी० द० ५. २. १८, १९)"—इति। बादरायण एव वेदान्तसूत्र-कृदिति तु प्रसिद्धः; वेदान्त-न्याय-वैशेषिक-जैमिनीयमीमांसासूत्राणाञ्च समकालिकत्व मेवाभ्युपगम्यते। अतो निरवद्य मेवैतदुक्तं साङ्ख्यदर्शन मेव सर्वप्रथम मिति। अत एव श्लोक्यते च श्वेताश्वतरोपनिषदि—"ऋषिं प्रसूतं कपिलं यस्त मग्रे, ज्ञानैर्बिभर्त्ति० (५. २.)"—इत्यादि, "नित्योऽनित्यानां चेतनश्चेतनाना मेको बहूनां यो विदधाति कामान्। तत् कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः (६. १३.)"—इति च। "न वयं षट्पदार्थवादिनो वैशेषिकादिवत् (१अ० २५सू०)"—इति साङ्ख्यसूत्रन्तु द्वितीयकपिलस्य वा पञ्चशिखाचार्य्यस्य वा भवितु मर्हति; तथाच सति नैतत्सूत्रदर्शनादपि वैशेषिकादिपरत्वं सिध्यति साङ्ख्यादिग्रन्थस्य; अपि तु साङ्ख्यशास्त्रीयषड्ध्याय्या एव। उक्तं हि कौमुदीप्रभायाम्—"पञ्चशिखः सूत्रकार आसुरिशिष्यः। कापिल मिति प्रसिद्धिस्तु सम्प्रदायप्रवृत्तेः भृगुप्रोक्तसंहिताया मिव मनुसमाख्या"—इति। किञ्च "य माहुः कपिलं साङ्ख्याः परमर्षिं प्रजापतिम्। स मन्ये तेन रूपेण विस्मापयति हि स्वयम् (शा० मो० प० २१८ अ० ९ श्लो०)"—इतिमहाभारतीयश्लोकव्याख्याने नीलकण्ठोऽप्याह—"स कपिलः, तेन पञ्चशिखरूपेण तत्शिष्यत्वात् तत्तुल्यत्वम्"—इति। तत्त्वसमासव्याख्यायां सर्वोपकारिण्यां तु सुस्पष्ट मेवोक्तं कपिलद्विकादिकम्। तथाहि—"अथाज्ञानादिक्लेशकर्मवासनासमुद्रनिपतितानाथदीनानुद्दिधीर्षुः परमकृपालुः स्वतःसिद्धतत्त्वज्ञानो महर्षिर्भगवान् कपिलो द्वाविंशति सूत्राणि उपादिक्षत्। * * *। सूत्रषड्ध्यायी तु वैश्वानरावतारभगवत्कपिलप्रणीता; इयन्तु द्वाविंशतिसूत्री तस्या अपि बीजभूता नारायणावतारमहर्षिभगवत्कपिलप्रणीतेति वृद्धाः"—इति। विज्ञानभिक्षुकृतसाङ्ख्यप्रवचनभाष्याच्चैव मेवावगम्यते। तथाहि—"तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं साङ्ख्यदर्शनम्, तस्यैव प्रकर्षेणास्यां निर्वचनम्"—इत्यदि।

आदिमतञ्जलिनापि कृतं योगशास्त्र मादिसाङ्ख्यपरज मेव । अत एवोक्तं दृश्यते साङ्ख्यप्रवचनभाष्ये—"तत्वसमासाख्यं हि यत् सङ्क्षिप्तं साङ्ख्यदर्शनम्, * * *, षड्ध्याय्यां तत्वसमासाख्योक्तार्थविस्तरमात्रम् ; योगदर्शने त्वाभ्या मभ्युपगमवादप्रतिषिद्धस्यैवेश्वरस्य निरूपणेन न्यूनतापरिहारोऽपीति"—इति । वेदान्तदर्शने तु "एतेन योगः प्रत्युक्तः (२. १. ३.)" —"योगिनः प्रति च स्मर्यते (४. २. २१.)"—इत्यादिदर्शनात्, तस्य योगशास्त्रादप्यवरजत्वं सुव्यक्त मेव ।

कणादगौतमकृतयोः सूत्रात्मकयोर्वैशेषिक—न्यायशास्त्रयोः समानतन्त्रत्वन्तु सर्वसम्मत मेव ; तत्रापि वैशेषिकस्य प्राथम्यं स्वीकृत मस्मत्प्रियसुहृदा महामहोपाध्यायचन्द्रकान्ततर्कालङ्कारेणेति* । तत्र हि न्यायशास्त्रे २. ६६.—४. २५.—६७. सूत्रेषु वेदान्तमतपरिदर्शनात्, वेदान्ते च २. २. ११, १३, १४. सूत्रेषु न्यायवैशेषिकमतदर्शनात्,—एवं वेदान्ते "साक्षादप्यविरोधं जैमिनिः (वे० सू० १. २. २८.)"—इत्यादिषु जैमिनेर्नामकीर्त्तनात्, मीमांसायाञ्चाद्यप्रचलितायां "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः ०————०वादरायणस्यानपेक्षत्वात् (मी० सू० १. १. ५.)"—इत्यादिषु वादरायणस्योल्लेखात् न्याय—वैशेषिक—वेदान्त—मीमांसा—सूत्रकाराणां समकालिकत्व मेव गम्यते । तत्रापि आत्रेयकृता आन्वीक्षिकी, काशकृत्स्निकृता मीमांसा च एभ्यो बहुप्राचीनैव ; तयोर्विरलप्रचारकाले एवाद्यप्रचलितानां वेदान्तादीनां जैमिनीयमीमांसायाश्च प्रयोजनीयत्वात् ।

सिद्ध मित्थम् साङ्ख्यदर्शनाविष्कर्त्तुः कपिलस्यैव दर्शनकारेषु प्राचीनतमत्वम् ; आदिपतञ्जलेस्तत्परजत्वम् ; आत्रेयस्य, काशकृत्स्नेश्च ततोऽव-

---

* तत्कृतस्य वैशेषिकभाष्यस्य भूमिकायाम्—'न्यायवैशेषिकयोस्तु'-इत्यारभ्य 'अतोऽनुमीयते, कणादेनैव रीतिरेषा समुद्भाविता, उत्तरकाले गौतमपादेन विस्तारिता परिशोधिता समीचीनतया निबद्धा चेति'—इत्यन्तः प्रबन्धो द्रष्टव्यः ।

रजत्वम्; कणभक्षाक्षचरणपाराशर्य्यजैमिनीनां ततोऽप्यर्वाचीनत्व मिति॥

(कात्यायनः) सैषा शैवमतप्रभवात् पाशुपतदर्शनादग्रजा, प्रदर्शितसांख्यादिदर्शनेभ्यश्चानुजा, मनुसंहितेति प्रथिता, भृगुसंहिता, कात्यायनकृताद् वार्त्तिकसूत्राच्चावरजैवेत्यसकृदुक्तं पुरस्तात् (चौ, कू ६०)। क्रमप्राप्तं तदेवेहोपपादयामः।

तथाहि—"शूद्राणा मनिरवसितानाम् (२.४.१०.)"–इति सूत्रस्य भाष्ये, "पृषोदरादीनि यथोपदिष्टं तथैव साधूनि (६.३.१०९.)"–इति सूत्रीयभाष्ये च दृश्यते तावदेतदार्यावर्त्तलक्षणम्—"प्राक् आदर्शात्, प्रत्यक् कालकवनात्, उत्तरेण हिमवन्तम्, दक्षिणेन पारियात्रम्"–इति। एतच्च लक्षणम्, सङ्ग्रहग्रन्थकारेण भगवता व्याडिनोपदिष्टम्, वार्त्तिककारकात्यायनसम्मतञ्च पतञ्जलिनोद्धृत मिति वृद्धोपदेशः। एतल्लक्षणे विन्ध्यगिरेः पश्चिमस्थः पारियात्र एवार्यावर्त्तदक्षिणसीमेति गम्यते, अपि च सिन्धुसङ्गमात् पश्चिमसमुद्राद् बहुपश्चिमस्थ आदर्श एव पश्चिमसीमेति गम्यते, ब्रह्मपुत्रसङ्गमात् पूर्वसमुद्रात्तु बहुर्वाक्स्थत्वेन निर्दिष्टः कालकवन एव पूर्वसीमेत्यपि गम्यते। मनूक्तार्यावर्त्तलक्षणे तु सिन्धुसङ्गमपश्चिमे नार्यावर्त्तः; अपि ब्रह्मपुत्रसङ्गमान्तश्चार्यावर्त्तः; किञ्च पूर्वविन्ध्योत्तरस्थः कीकटोऽप्यार्यावर्त्तान्तर्गत एव। तथाहि—"आ समुद्रात् तु वै पूर्वादासमुद्राच्च पश्चिमात्। तयोरेवान्तरं गिर्योः (विन्ध्यहिमागमयोः) आर्यावर्त्तं विदुर्बुधाः (२.२२.)"–इति मनुः। तथाचेद मेवावधार्यते यावन्नामार्यावर्त्तोऽयं न हि पूर्वस्यां विस्तृतो नापि पश्चिमतः सङ्कुचितः, तावदेव जातः कात्यायनः, तदुत्तरभवस्तु मनुसंहिताकारः स्वानुभूतानुरूप मेवार्यावर्त्तलक्षणञ्चकार पूर्वोक्त मिति।

शिष्टलक्षणादयदर्शनाच्चानयोस्तथैव पौर्वापर्य मवगम्यते। तथाहि—"धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः (१२.१०९.)"–इति मनुः। सङ्ग्रहकारलिखितं कात्यायनसम्मतन्त्वेवं दृश्यते शिष्टलक्षणम्—"एतस्मिन्नार्यावर्त्ते निवासे ये

ब्राह्मणाः, कुम्भीधान्याः, अलोलुपाः, अगृह्यमाणकारणाः किञ्चिदन्तरेण, कस्याश्चिद् विद्यायाः पारङ्गताः, तत्र भवन्तः शिष्टाः (६अ० ३पा० ३आ०)" —इति। एवञ्च कात्यायनकाले आर्यावर्त्तवासादेव शिष्टत्व मपि तदानीन्तनानां ब्राह्मणानां कुम्भीधान्यादित्वञ्च साधारणो धर्म इति गम्यते; मनुकाले तु विशेषतोऽध्ययनेनैव शिष्टत्व माप्यं स्थित मिति। तदेतल्लक्षणद्वयपर्यालोचनया चावगम्यते कात्यायनस्यैतन्मनुसंहिताकारात् पूर्वजत्वम्,—तत्रापि बहुपूर्वजत्वम्; न ह्यल्पपौर्वापर्यत एव एतादृशी साधारणाचारभिन्नता सम्भवेन्नाम।

नास्तिकलक्षणद्वयालोचनेनाप्येव मेवावबुध्यते पौर्वापर्यम्। तथाहि—अस्त्येकं पाणिनिसूत्रम्—"अस्ति-नास्ति-दिष्टं मतिः (४. ४. ६०.)"—इति। "अस्तीत्यस्य मतिः— आस्तिकः, नास्तीत्यस्य मतिः— नास्तिकः, दिष्ट मित्यस्य मतिः— दैष्टिकः (४अ० ४पा० ४आ०)"—इति च तद्भाष्यम्। दिष्टम् = भाग्यम्। एतदेव साधारणं लक्षणं कात्यायनकालेऽपि स्थितं सर्वसम्मतम्। ततः परं क्रमात् शिथिलिते वेदविश्वासे पुनस्तद्दार्ढ्यायैवेदं समुद्भूतं लक्षणान्तरम्—"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः (म० सं० २. ११.)"—इति। यदि हि नाम कात्यायनोऽयं मनुसंहिताकाराचास्मादवरजः स्यात्, तर्हि एतदनुगतं वार्त्तिकञ्च नास्तिकादिविधायकसूत्रे उच्येतैव; न च तथोक्तम्; तदेव मप्यगम्यते वार्त्तिककारकात्यायनस्यैतन्मनुसंहिताकारात् प्राचीनत्व मिति।

एव मिह मनौ आचारपर्यायो वृत्तशब्दः (५. १६६.); पूर्वं मृते-त्यर्थे 'पूर्वमारिणी' (५. १६७, १६८.)—इति; एवमादयश्च दृश्यन्ते, परं नैवमादिषु वार्त्तिककारस्यैतस्य कानिचिन्नूतनशासनान्युपलभ्यन्ते; यदि हि नामैतन्मनुसंहितातः परभवः स्यात् कात्यायनः, तर्ह्येवस्य मवश्य-देव तथैव वार्त्तिकानि यथा सिध्येयुरेव वृत्तादीनि आचारादर्थेष्वपीति। अतश्च सिध्यत्येवैतन्मनुपूर्वजत्वं कात्यायनस्य।

एवं "वृषो हि भगवान् धर्मः, तस्य यः कुरुते ह्यलम्। वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत् (८. १६.)"—इत्येतच्च निर्वचनं यास्कस्य त्वविदित मेव, कात्यायनवार्त्तिकपाठादपि पर उत्पन्नम्; अन्यथा हि नैवं ब्रूयाद् यास्कः,—"वृषलो वृषशीलो भवति, वृषाशीलो वा (२भा० ३११पृ०)"—इति; न चेह मौन माचरेत् कात्यायनः खल्विति। तदेवं मनुसंहितेतिप्रथितायाः किल भृगुसंहिताया अन्यूनशताब्दीत्रयपूर्व मेवाभवत् कात्यायनीयो वार्त्तिकपाठ इति सुवचम्; न हि तन्न्यूनेन कालेन देशसीमपरिवर्त्तन माचारपरिवर्त्तनं नास्तिकलक्षणपरिवर्त्तनादिकञ्च सम्भाव्य मिति। सिद्ध मित्थम्—कलेर्विंशशताब्द्याम्, खीष्टजन्मतः पूर्व मन्यूनद्वादशशताब्द्यामभवत् व्याकरणवार्त्तिककारो भगवान् कात्यायन इति ॥

अपर मप्यत्रेह तावत् किञ्चिद् विचारयितव्यम्।—कैश्चित् पुरातत्त्वानुसन्धित्सुभिः दाक्षिणात्येषु पाण्ड्यराज्यस्थापनं ननु खीष्टजन्मतः पुरा षष्ठा मेव शताब्द्यां बभूवेति निर्णीतम्; अस्ति च कात्यायनवचनम्—"पाण्डोर्ड्यन् (पा० ४. १. १६८. वा०)"—इति; तथाचैतस्य कात्यायनस्य खीष्टजन्मतोऽप्यधिकपञ्चशताब्दीपूर्वजत्व मेव सम्पद्यते। नैतच्चतुरस्रम्; खीष्टपूर्वाष्टमशताब्द्यां शैवमतं प्रचरित मित्यत्र तेषा मपि सम्मतिदर्शनात्; तादृशशैवमतप्रचारतोऽपि प्राचीनात् किल मनुसंहिताकारात् प्राचीनोऽयं वार्त्तिककारः कात्यायनः, कथङ्कारं स्यात् खीष्टपूर्वषष्ठशताब्दीतोऽपि परज इति? अतः पाण्ड्यराज्यस्थापन मवश्यं बभूव खीष्टजन्मतो द्वादशाब्दीतोऽपि प्रागेव; अथ वा "पाण्डोर्ड्यण् (पा० ४. १. १६८. वा०)"—इत्यादिवचनानि नैव कात्यायनीयानि, अपि भाष्यकाराद्युक्तान्यनतिप्राचीनान्येवेति सर्वैर्मन्तव्यम्; अन्यथा हि सर्वमते एव सर्वं भवेत् पिण्डीभूत मिति धीमद्भिरेव विचार्यं पूर्वापरदर्शिभिः समन्तादिति ॥

(यास्कः) तस्मादेतस्माच्च कात्यायनात् प्राचीनोऽयं यास्कः। तदत्र चत्वारो हेतवः।— "अरण्यानी अरण्यस्य पत्नी"—इत्युक्त मिह निरुक्ते

(४ भा० ४७ पृ०); यदि हि नाम वार्त्तिकग्रन्थात् पुरातनं न स्यादेतन्निरुक्तम्, तर्ह्येवमस्य मेवैवं निरुच्येत "अरण्यानी महदरण्यम्"–इति; "हिमारण्ययोर्महत्त्वे (४. १. ४९. पा० वा०)"–इति वार्त्तिकानुरोधात्। एवञ्च ज्ञायत एव निरुक्तप्रणयनकालं यावत् नाभवद् वार्त्तिकग्रन्थ इति। यदा चाभूत् वार्त्तिकग्रन्थः, तदा तु अरण्यपत्नीत्यर्थे अरण्यानीति व्यवहारो दूरकृतः, समुत्पन्नश्च महदरण्य मित्यर्थे अरण्यानीति; तत एव प्रणीतं तत्कालानुगतं लक्ष्य मिदं 'हिमारण्ययोर्महत्त्वे'–इतीति प्रथमः।

वेदे "सुकिंशुकम् (ऋ० सं० ८. ३. १३. ५.)"–इत्येवमादौ श्रुतस्य 'सूर्या'–इति पदस्य पुंयोगागमता सूर्यस्य पत्नीति व्याख्या नासीत् पाणिनिकाले प्रचलिता, ततो बहुतिथेऽतीते तादृशव्याख्याने प्रचलिते जातोऽयं यास्को वेदे सर्वविधेर्बाहुल्यं पाणिनेरपि सम्मत मेवेत्यालोच्य निरवोचत् "सूर्या=सूर्यस्य पत्नी (४ भा० २५८ पृ०)"–इति; तद्दृष्ट्वेदं वार्त्तिक मारचितम् "सूर्याद् देवतायाम् चाप् (पा० ४. १. ४८. वा०)"–इति। इतश्चोभयं गम्यते— अस्य पाणिनितो बहुर्वाचीनत्वम्, कात्यायनात् प्राचीनत्वञ्चेतीति द्वितीयः।

अत्रैव मत्र निरुक्ते जरयितेत्यर्थकं जारशब्दव्युत्पादनम्—"आदित्योऽत्र जार उच्यते, रात्रेर्जरयिता (२ भा० ३२० पृ०)"–इति। नून मेतद् दृष्ट्वेदं वार्त्तिक मारब्धम्—"दारजारौ कर्त्तरि णिलुक् च (पा० ३. ३. २०. वा०)"–इति। एवमादिभ्योऽपि प्रतीयते यास्कस्य कात्यायनपूर्वजत्व मिति तृतीयः।

चतुर्थस्त्वयं मतिप्रबलः— पाणिनिसूत्रेषु ऋणशब्दे परे वृद्धिविधानं न विद्यते, ततः खलु पाणिनिकाले 'प्रणम्', 'अपर्णम्', 'वत्सतरर्णम्'— इत्यादयः प्रयोगा एवेष्टा इति गम्यते। ततो बहुकालान्तरे जातोऽयं यास्कः, तदानीं क्वचित् क्वचिद् वृद्धियुतः प्रयोगोऽपि ऋणशब्देऽवश्यं प्रचलित इत्यनुमेने; लभ्यत एव हि निरुक्ते "अपार्णम् (३ भा० ११पृ०)"–इति प्रयोगः। ततो बहुकालगते जातः कात्यायनः, तदानीं तेन हि

षट्स्वेव स्थानेषु ऋणशब्दे वृद्धिः प्रचलिता दृष्टा, तथैव वार्त्तिके पठिते "प्रवत्सतरकम्बलवसनानां चर्णे"—इति, "ऋणदशभ्यां च"—इति च (पा० ६. १. ८९. वा०)। आभ्याश्च वार्त्तिकाभ्यां सिद्धान्त्येव प्रार्णं मित्यादीनि ; परं मपार्णं मितिपदस्य साधनाय न कश्चिद्यत्नः कृतो दृश्यते, ततोऽवगम्यते तदानीं तथा व्यवहारो लुप्त एवेति। अतएवावश्य मेवं मन्तव्यम्— यास्कोऽयं पाणिनितो बह्वर्वाचीनः, कात्यायनतस्तु बहुप्राचीन इति ; नान्यथा ह्यपार्णं मिति नैरुक्त मुपपद्यते। यदि ह्ययं यास्कः कात्यायनतोऽप्यर्वाचीनः स्यात्, तर्ह्यवश्यं वदेदपर्णं मिति, सूत्रवार्त्तिककारयोस्तथैवानुशासनात् ; यदि ह्ययं पाणिनितोऽपि प्राचीनः स्यात्, तर्ह्यवश्य मेव पाणिनिस्तथैव सूत्रं विदध्यात्, यथा च सिद्धं भवेदपार्णं मिति। तदेतदेक मेव पदम् यास्कसमयनिर्णये बहु मन्यतेऽस्माभिः "अपार्णम्— अपार्णम्— अपार्णम्"—इति॥

(पाणिनिः) यास्कस्य पाणिनिपरजत्वे त्वन्येऽपि हेतवः समुपलभ्यन्ते। तथाहि—(१) निरुक्तस्यास्य प्रथमेऽध्याये एव (२ भा० ११९ पृ०) "परः सन्निकर्षः संहिता (पा० १. ४. १०९.)"—इति पाणिनीयं संहितालक्षण मुद्धृतं दृश्यत इति प्रथमः। (२) पाणिनिपरजन्मनो बह्वृक्प्रातिशाख्यकृतः शौनकाच्चायं यास्कः पराचीनः सुतरां पाणिनितो बह्वर्वाचीन इति द्वितीयः। यथाच स शौनको यास्कात् पूर्वभवः, पाणिनिः खलु ततोऽपि पूर्वभवः, तदनुपद मेव स्फुटीभविष्यति। (३) उक्तञ्च निरुक्ते— "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च ; न सर्वाणीति गार्ग्यो वैयाकरणानाञ्च (२भा० ८२ पृ०)"—इति। इह, वैयाकरणशब्देन पाणिनीयवेत्तृणा मेव ग्रहणं भवितु मर्हति ; पाणिन्यष्टके एव हि तादृशमतनिदानसूत्रद्वयदर्शनात्। तथाहि— "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च (१. २. ४५, ४६.)"—इति। एते एव सूत्रे अवलम्ब्य 'प्रातिपदिका व्युत्पन्ना अव्युत्पन्नाश्च'—इति पाणिनिमतं वर्णितं महाभाष्यादौ ; न चान्यत्र (प्रातिशाख्यादौ) नाम्नां तादृशोभयविधत्व मुपदिष्टं क्वचिदपि।

एवञ्चेह पाणिनीयवैयाकरणानामेव मत मुपन्यस्तं यास्केन 'वैयाकरणानाम्'—इतीदं सुवच मिति तृतीयः। (४) निरुक्तस्यास्य चतुर्थाध्याये (२ भा० ४७५ पृ०) यद् दृश्यते 'अस्याः', 'अस्य' —इत्यनयोर्निर्वचनादिकम्, तत्तु "इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ (२. ४. ३२.)"—इत्यस्य पाणिनीयसूत्रस्य व्याख्यानपर मेव स्फुट मिति चतुर्थः। (५) अयञ्च हेतुः पञ्चमः,—उक्त मिह निरुक्तद्वितीये "आपनीफणदिति फणतेश्चर्करीतवृत्तम् (२ भा० २४६ पृ०)"—इति; "चर्करीतम् = अभ्यस्तम्"—इति महाभाष्यम् (७ अ० १ पा० १ आ०); न हि चर्करीतवृत्तस्य ज्ञानं भवितु मर्हति शाकटायनीयादिभ्य ऋक्तन्त्रादिभ्य इति। (६) तत्रैवाध्याये (२ भा० १६० पृ०) "तद्धितसमासेषु"—इति च दृश्यते; महाभाष्यकारेण तूक्तं पस्पशायाम्—"न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्"—इति; इह महाभाष्यवाक्ये व्याकरणपदेन पाणिनीयस्यैव ग्रहण मन्यथा तत्प्रयोजनाख्यान मेव व्याकुप्येतेति सोऽयं षष्ठः। (७) तत्रैवाग्रेऽस्ति निरुक्ते —"निर्ब्रूयान्नावैयाकरणाय (२ भा० १६८ पृ०)"—इति, इतश्च ज्ञायते निरुक्तादस्मात् पूर्व मेव व्याकरणम्; व्याकरणज्ञानपूर्वकं ह्येव निरुक्तज्ञान माचार्यस्याभिमत मिति। न हि तद् व्याकरणं सर्वतोमुखं पाणिनीय मन्तरान्यत् किं मप्यासीदादिम मित्यवश्य मेवैवमादिषु सर्वत्रैव निरुक्ते पाणिनीय मेवेष्टं यास्कस्येति सप्तमः। (८) अपि चाय मष्टमः—निरुक्तप्रयोजनकथनावसरे यास्कः स्वय माह—"व्याकरणस्य कार्त्स्न्यं स्वार्थसाधनञ्च (२ भा० १०२ पृ०)"—इति। ततः सिद्ध मस्य निरुक्तस्य व्याकरणपरिशिष्टरूपत्वम्; यतश्चायं ग्रन्थो व्याकरणपरिशिष्टरूपः, अतो व्याकरणपरभव एव; तच्च व्याकरण मिह पाणिनीय मेवेत्यप्यस्माकम्; दृश्यते ह्यत्र "पृषोदरादीनि यथोपदिष्टम् (६. ३. १०६.)"—इति पाणिनिसूत्र मेव प्रपञ्चितं लोपागमवर्णविकारादिप्रदर्शनपरेण नैरुक्ताधिकभागेन—(२ भा० १४७—१६८ पृ०)। अत एव तत्र महाभाष्ये उक्तम्—"पृषोदरादीनीत्युच्यते, कानि पृषोदरादीनि? पृषोदरप्रकाराणि। कानि

पुनः पृषोदरप्रकाराणि ? येषु लोपागमवर्णविकाराः श्रूयन्ते, न चोच्यन्ते (६ अ० ३ पा० ३ आ०)"—इति ।' अत एवेदेव चैषा हरिकारिका—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"–इति ॥

अपि नाम व्याकरणं तु सर्वतोमुखं पाणिनिनैव प्रथमं प्रणीत मिति वैयाकरणानां सिद्धान्तः । अत्र च बहूनि प्रमाणानि देदीप्यन्ते ; किञ्चिदिहोपवर्णयामः । —

प्रथमं तावत्, नन्दिकेश्वरकृतकाशिकायां चतुर्दशसूत्रव्याख्यायाम्—"नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ॥ अत्र सर्वत्र सूत्रेषु अन्त्य' वर्णचतुर्दशम् । धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये"–इति । "धात्वर्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम्"–इत्यादि च तत्र नागेशभट्टः । तदेवमादीनां समालोचनयोपलभ्यत एव पाणिनेरादिव्याकरणकर्तृत्वम् ।

द्वितीयस्त्विमानि पाणिनीयशिक्षावचनानि—"शङ्करः शाङ्करीं प्रादात् दाक्षीपुत्राय धीमते । वाङ्मयेभ्यः समाहृत्य देवीं वाच मिति स्थितिः ॥ येनाक्षरसमाम्नाय मधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥"—इति । पाणिनेरादिव्याकरणकर्तृत्वे इतोऽपि स्फुटतरं मानं किं भवितु मर्हतीति ।

तथैव फणिभाषितभाष्याब्धेः पस्पशाह्निकं प्रायः सर्व मेवात्र मतेऽनुकूलम् । तथाहि—"अथ शब्दानुशासनम्"–इति प्रतिज्ञालक्षणाधिकारवचनपर्यालोचनेनैव प्रतीयते,—इतः पूर्वं नासीदेवं लौकिकवैदिकोभयविधसर्वशब्दानां लघुनोपायेनानुशासन मपरं किञ्चिच्छास्त्रं व्याकरणं नामेति । अन्यच्च—"अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते—'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, न चान्तं जगाम' । बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता,

दिव्यं वर्षसहस्र मध्ययनकालः, न चान्तं जगाम; किम्पुनरद्यत्वे? यः सर्वथा चिरञ्जीवति, स वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवन्ति—आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। तत्र चागमकालेनैव कृत्स्न मायुः पर्युपभुक्तं स्यात्। तस्मादनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। कथं तर्हीमे प्रतिपत्तव्याः? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम्; येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्।"—इत्यादेः भगवत्पतञ्जलिविरचितायाः पाणिनीयव्याकरणावतरणिकायाः पाठादेवावगम्यते नैतत्पूर्व मेवं सर्वतोमुखं सर्वावयवसम्पन्नं कि मपि व्याकरणं स्थित मिति तृतीयम्।

श्रूयन्ते च सर्वेष्वेव वेदेषु पदसंहिताः। "अग्निम्। ईळे। पुरः अहितम्"—इत्येवं मन्त्रीयपदविभागादिकं कुर्वन्त एव ता अध्यापयन्त्याचार्याः। तादृशपदपाठग्रन्थास्तु महाभाष्योक्तप्रतिपदपाठश्रेणीगता एवेत्यपि स्फुट मवगम्यते। तथा प्रतिपदपाठाश्च तदैव शोभन्ते स्म, यदा नासीत् सामान्यविशेषवल्लक्षणात्मकं किञ्चिदपि सर्वतोमुखं व्याकरणम्। ईदृशपदपाठानां चाविष्कर्त्ता शाकल्य एव। "वायः * * * वेति च य इति च चकार शाकल्यः (३ भा० २५५ पृ०)"—इति यास्कोक्तेः। इमा मेव त्रयीपदसंहिता मभिलक्ष्याह महाभाष्यकारः—"शाकल्यस्य संहिता मनु प्रावर्षत् (१ अ० ४ पा० ४ आ०)"—इति। स एष च शाकल्यो नाम ऋषिः, पाणिनितः पुरातन एव; तदीयाष्टाध्याय्याम् "सम्बुद्धौ शाकल्यस्येतावनार्षे (पा० १. १. १६.)"—इत्यादौ शाकल्यनामस्मरणात्। तदेवं ज्ञायते नासीदेव पाणिनेः पूर्वं शाकल्यसमयेऽपि पाणिनीयसदृशं सर्वतोमुखं व्याकरणं कि मपीति चतुर्थम्।

एव मस्ति च सर्वेषां वेदानां क्रमपाठो नाम ग्रन्थ एकैकः; त एव क्रमसंहिता उच्यन्ते। एतत्क्रमपाठनियमस्तु यद्यपि शाकल्यस्य पदपाठप्रवृत्तेः परकालभव एव, सति कुड्ये चित्र मिति न्यायात्; परं पाणिन्यष्टकात् पुरैवाविरासीदित्यपि सत्यम्; तत्र हि क्रमाध्येत्रर्थे क्रमक

इति पदसाधनार्थैव "क्रमादिभ्यो वुन् (पा० ४. २. ६१.)"–इति सूत्रस्य दर्शनात् । क्रमस्यैतस्यादिप्रवक्ता, एतादृशाध्ययनविधेः प्रवर्त्तकः खलु बाभ्रव्य एव । तच्चोक्त मृक्प्रातिशाख्ये—"इति प्र बाभ्रव्य उवाच च क्रमम्, क्रम-प्रवक्ता प्रथमं शशंस च (११. ६१.)"–इति । "इत्येवं बभ्रुपुत्रः भगवान् पाञ्चालः, क्रमस्य वक्ता शिष्येभ्यः, क्रमं प्रथमं प्रोवाच प्रशशंस च हिताय" –इत्यादि च तत्र तद्व्याख्यान मुव्वटस्य । महाभारतेऽपि शान्तिपर्वान्तर्गत-मोक्षधर्म्मेषि तथैवोक्तम्—"पाञ्चालेन क्रमप्राप्तस्तस्माद् भूतात् सनात-नात् । बाभ्रव्यगोत्रः स बभौ प्रथमं क्रमपारगः (महाभा० शा० मो० ३४२ अ० १०० श्लो०)"–इति । एष च बाभ्रव्यः, पाणिनेः पूर्वभवः; अष्टके "मधुबभ्रोर्ब्राह्मणकौशिकयोः (पा० ४.१.१०६.)"–इति सूत्रस्य दर्शनात् । एतस्य च क्रमाध्ययनस्य प्रयोजनकथनावसरे चोक्त मिदं मृक्प्रातिशाख्य-भाष्ये "भवति चात्र श्लोकः—'शरदुज्ज्वलो वितिमिरो विभाति भगवान् यथांशुमान् । सत्यवचनवित्तमः क्रमकः क्रमते हि संशयं तमस्तथात्मवान्'' –इति (११. २७.) । एवञ्च वेदसंहितासु श्रुतानां मन्त्राणा मर्थबोधोप-योगिपदच्छेदादिविषयकसंशयनाशायैव क्रमग्रन्थाः प्रादुर्भूताः पुरा इत्येव क्रमहेतुसारम् । तादृशसंशयस्तु भवेन्नामेदृशसर्वतोमुखव्याकरणाविर्भावात् प्रागेव; आविष्कृते ह्येतादृशे व्याकरणे नैव तादृशसंशयस्य प्रसरतेति । अतश्च ज्ञायते पाणिनेः पूर्वं बाभ्रव्यकाले ऽपि नासीदेवं सर्वतोमुखं सर्वाङ्ग-सम्पन्नं व्याकरणं नाम कि मपीति पञ्चमम् ।

बाभ्रव्यः खलु ऋग्वेदस्य क्रमकारः; अतो मृक्प्रातिशाख्ये तस्यैव नाम-ग्रहणम्; तथा हयग्रीवो यजुर्वेदस्य । स एव चैतस्याः पद्धतेः प्रथमोद्भावकः । अत एवोक्तं महाभारते तत्पूर्व मेव—"यत्तद्धयशिरः पार्थ समुदेति वरप्रदम् । सोऽह मेवोत्तरे भागे क्रमाक्षरविभागकृत् । वामादेशित-मार्गेण मत्प्रसादान्महात्मना"–इति; एतदुत्तर मुक्तं प्रदर्शितं पुरस्तादिहैव "पाञ्चालेन०—०क्रमपारगः"–इति । एवं कण्डरीकः खलु गालवस्यर्षिः सामसंहितायाः छन्दोविभागस्य क्रमकृत्, ब्रह्मदत्तस्याथर्वसंहितायाः ।

ताविमौ बाभ्रव्यस्यावरजाविति चास्ति तत्रैव महाभारते तदुत्तरम्— "नारायणाद् वरं लब्ध्वा प्राप्य योग मनुत्तमम् । क्रमं प्रणीय शिक्षाञ्च प्रणयित्वा स गालवः । कण्डरीकोऽथ राजा च ब्रह्मदत्तः प्रतापवान् (महाभा० शा०मो० प० ३४२ अ० १०१, १०२ श्लो०)"—इति । अपि च गालवस्यायं बाभ्रव्यपरजोऽपि पाणिनितः पूर्वज एव; तदीयाष्टके हि "इको ह्रस्वो ऽङ्यो गालवस्य (पा० ६. ३. ६१.)"—इत्यादौ गालवनाम-स्मरणात् । तथाच गालवकालेऽपि नाविष्कृत मेवं सर्वतोमुखं व्याकरण मन्यथा कृतं नाम सामयोनिक्रमपाठेनेति षष्ठम् ।

अस्ति चैको ग्रन्थो वैदिकानां "चातुर्ज्ञानम्"—इति । ततश्च ऋक्-संहिताग्रन्थे विसर्गसन्धीनां, सन्ध्यक्षरसन्धीनाम्, नान्तपदानाम्, समस्ता-समस्तानां च बोधो भवति । तथाहि—ऋग्वेदसंहितायाः प्रथमेऽष्टके अग्निमीळे—इति वर्गे—"सुता विश्वा दधाना अजोषा इन्द्रताः सोमपा इमा जुष्टा मत्सरा द्रप्सा घृतपृष्ठा यजत्रा द्रविणोदा धानाः शुभ्राः पञ्चदश । तुविजातौ दधानाइन्द्रे योगे वाजे महाधने ये वृहते इमहे यज्ञे सुजिह्नौ भियत एकादश ; यत्कात्सर्वणीनां कक्षीवन्तं य इति वर्जयित्वा । अवी. वृधन् दुहन् आदित्यान् विश्वान् पर्वतान् पञ्च । पावकासने तदिमं द्वैपदम्, दुहन् रोहयन्नेष आमुत्कर्णैकपदम्, सहस्रसातमं द्वितीयं नेष्टरिति दीद्यग्नी इति दीद्यग्नी ऋतेन द्वैपदम् (१. १. १.)"—इति । पदगाढ़ादयो वैदिकग्रन्था अप्येव मेव । एतादृशाश्च ग्रन्थाः सूक्तावदेव कृतार्थाः यावन्नै-वाभिभूतं पाणिनीयसदृशं कि मपि सर्वतोमुखं व्याकरणम् ; प्रचलिते ह्येता-दृशव्याकरणे विसर्गसन्ध्यादिसंशयानां प्रसरतैव कथ मिति सुधीभिरेवा कल्प्यतां समन्तादिति सप्तमम् ।

एव मस्ति चापरो ग्रन्थो वैदिकानां "सप्तसङ्ख्या"—इति नाम । तत्र ऋग्-वेदसंहितायाः प्रतिवर्गस्य पदानाम्, इतिकरणानाम्, द्विःखण्डानाम्, विस-र्गाणाम्, मकारान्तानाम्, नकारान्तानाम्, तकारान्तानाञ्चेति सप्तानां सङ्ख्याः अङ्काक्षरैर्निर्दिष्टाः । तथाहि—"अयं देवाय"—इति—प्रथमाष्टकीयद्वितीया-

ध्यायीयाद्यवर्गे "४३ । २ । ८ । १४ । ६ । २ । ० ।"–इति (२. १.१.)। एतेन तु निःसंशयं विज्ञायत एतत् ;— तत्र वर्गे त्रिचत्वारिंशदेव पदानि; द्वे एव इतिकरणे ('हरी इति', 'पुनरिति'); अष्टौ एव द्विःखण्डानि ('रत्नऽधातमः', 'वचःऽयुजा', 'परिऽज्मानम्', 'सुऽखम्', 'सबःऽदुघाम्', 'सत्यऽमन्त्राः,' 'ऋतुऽयवः', 'राजऽभिः')। द्विःखण्ड मित्युक्ते समस्तस्यासमस्तस्य चावग्रह्यस्यान्तःपदस्य पदस्य बोधो भवति। तथाहि—"अन्तः पदं येषां स्याद् विकारोऽनन्यकारितः। एतानि परिग्रहीयाद् बह्वमध्यगतानि च (ऋ० प्रा० १०. ६८)"—इत्याह शौनकः। 'अवग्रह्याणि द्विःखण्डानि पूर्वोत्तरपद्यभूतानि'–इत्यादि च तत्रोव्वटः। प्रदर्शितेष्विह तु 'रत्नऽधातमः'–इत्यत्र 'रत्नानां धातमः'–इत्येवं समास इष्टः पदकारस्य शाकल्यस्य, तथैवान्येषा मपि पाणिनिपूर्वजानाम्; किञ्च राजभिरित्यत्र अन्तःपद-कार्यस्य न-लोपस्य कर्त्तव्यत्वात् तस्यापि द्विःखण्डत्व मन्तःपदत्व मिति। एवं तत्र वर्गे सन्ति चतुर्द्दशैव विसर्गाः; नवैव मकारान्तानि पदानि; द्वे एव स्तो नकारान्ते पदे; तकारान्तं पदन्तु नास्त्येक मपीति। तदेवमादीनां ग्रन्थानाञ्च प्रादुर्भावदर्शनात् गम्यत एवास्मात् पाणिनीयाष्टकात् पूर्वं नासीदेव कि मपि व्याकरणं सर्वतोमुखं सर्वाङ्गसम्पन्न मीदृशम्, यथा चैवमादीनां ग्रन्थानां प्रादुर्भाव एव न स्यादिति; को हि नामाधीतपाणिनीयः पदच्छेदप्रभृतिज्ञानाय, विशेषतो द्विःखण्डज्ञानाय चैतादृशस्यापि ग्रन्थस्याध्ययने यतते साम्प्रत मित्यष्टमम्।

एवं सन्ति च "वैठ"–प्रभृतयः सङ्केतग्रन्थाः प्राचीनतमाः। तत्तदनुगतान्येव सङ्केताक्षराणि दृश्यन्ते वर्गाणां सूक्तानां साम्नां चान्तेषु। तादृशाक्षरसन्निवेशैश्च तत्तद्वर्गादिषु प्रगृह्यसङ्ख्यादीनां निश्चयतावगम्यते। तथाहि—"अग्निमीळे (ऋ० स० १. १. १.)"-इत्यस्य वर्गस्यान्तेऽधीयत एव "डै"–इति सङ्केताक्षरम्। तेन च ज्ञायते—तत्र वर्गे नान्त-विसर्गान्त-पदानां विषमत्वम्, द्विःखण्डानां तु समत्वम्, प्रगृह्याभावः, स्यन्तवैषम्यञ्चेति। वस्तुतः सन्ति तत्र वर्गे विसर्गान्तानि सप्तदश, द्विःखण्डान्यष्टौ; अस्ति च

एक मेव नान्तम्, ख्यन्तञ्चैकम्, प्रगृह्याभावश्चेति। एवं "घृतवती (ऋ० सं०५.१.१४.)"—इत्यस्य वर्गस्यान्तेऽधीयत एव खलु 'घ्नु'–इति सङ्केताक्षरम्। एतेन च तत्र वर्गे नान्त-ख्यन्त-द्विःखण्डानां वैषम्यम्, विसर्गान्तानां साम्यम्, प्रगृह्यास्त्वैकत्रिंशत्,—इत्येवं बोधितं भवति। नास्ति च तत्र नान्तं ख्यन्तं वा पद मेक मपि ; सन्ति च द्विःखण्डानि सप्तविंशतिः, विसर्गान्तानि च पदानि चतुर्दश, प्रगृह्याख्यपदानि चैकत्रिंशदेवेति। तदेव-मादीनां ग्रन्थानां तदैवोपयोगो विशेषत आसीत्, यदा नासीत् पाणि-नीयसदृशं सर्वतोमुखं व्याकरणं कि मपि ; पाणिनीये व्याकरणे, पाणि-नीयसदृशापरव्याकरणे वा व्युत्पन्नानां हि कि मेतादृशसङ्केताक्षराभ्यासेन; ननु ते हि मन्त्रान् प्रपठ्यैव किमु नावमच्छेयुः प्रगृह्यादीनि? गच्छेयु-रेवेति चेदवश्यं मन्तव्यं नासीत् पाणिनीयात् पूर्वं पाणिनीयसदृशं कि मपि सर्वतोमुखं व्याकरण मित्यत एव तादृशसङ्केतोपदेशाः समुद्भाविताः समादृताश्च तदानीन्तनैरिति नवमम्।

यच्च वोपदेवकृतस्य कविकल्पद्रुमस्य भूमिकाया मिन्द्रादीनां शाब्दिकाना मुल्लेखो दृश्यते—"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः। पाणिन्य-मरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥ मतानि तेषा मालोच्य सर्वसाधारणः स्फुटः। * * *। कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च॥"—इति, तेनापि व्याकरणेषु पाणिनीयस्यादिमत्ता न विहन्यते ; शाब्दिकत्वव्याकरणकर्तृत्वयोः सामानाधिकरण्यनियमाभावात् ;— न ह्येवं कश्चिन्नियम उपलभ्यते, ये ये शाब्दिकाः, स्युरेव ते ते व्याकरणकर्त्तार इति ; व्याकरणकर्तृत्वाभावे हि शाब्दिकत्वं न भवतीत्येवं नियमो नैव विचारसहः। तदेव मस्मन्मते, अचोक्तेषु शाब्दिकेषु इन्द्रस्य प्रतिपदपाठाध्येतृत्वेन शाब्दिकत्वं महाभाष्ये वर्णित मेव, प्रदर्शितञ्च पुरस्तादिहैव (३ पृ०)। चन्द्रस्तु व्याकरण-कर्त्तेति सत्यम्, परं न स पाणिनितः प्राचीनः ; पाणिनिभाष्यानुसारत एव तेन व्याकरणान्तरं प्रणीतं यतः। तथाहि राजतरङ्गिण्याम्—"चन्द्रा-चार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमम्। प्रवर्त्तितं महाभाष्यं स्वञ्च व्याकरणं

क्तम् (१.१.७६.)"–इत्युक्तं पुरस्तात् प्रदर्शित मेव। काशकृत्स्निस्तु शाब्दिक इति सत्यम्, परं न वैयाकरणः; अपि तु मीमांसकः। तथाहि महाभाष्ये—"काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी (४ अ० १पा० १ आ०)"–इति। शाब्दिकाना मन्यतमः खल्वापिशलिर्यतो "वा सुप्यापिशलेः (६.१.९२)"–इत्युक्त्या पाणिनिना सम्मानितो दृश्यते, अतः पाणिनिसमकालिकः तत्पूर्वकालिको वेति प्रतीयत एव, परं नैतेन तस्य व्याकरणकर्तृत्व मङ्गीकर्तव्य मेव; न ह्युपलभ्यते इदानीं प्राचीनतमे वा भाष्यादौ तद्व्याकरणस्य सत्तेति; सामतन्त्रस्य च कर्त्ता खल्वापिशलिरित्यस्ति च प्रवादः क्वाचित्कः। शाकटायनस्य तु ऋक्तन्त्रं व्याकरण मद्यापि विद्यत एव, परं न तेन समासतद्धितादीनां सर्वेषां बोधो भवति सर्वथा; नापि च तेन सुब्रूपास्य इत्यादीनां साधनिका ज्ञायन्ते। न च तस्यात्र निरुक्ते व्याकरणत्वेन ग्रहण मिष्टं गम्यते; यास्केन हि प्रायो वैयाकरणेभ्यः पृथक् कृत्वैव तन्नामग्रहणं कृत मिति दृश्यत एव। तथाहि— "नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च; न सर्वाणीति गार्ग्यो वैयाकरणानां च (२भा० ८३पृ०)"–इति। अमरोऽपि न व्याकरणकृत्, नापि पाणिनेः पूर्वभव इति तु सुप्रसिद्ध मेव। जैनेन्द्रस्तु सत्य मभवत् सर्वतोमुखस्यैव व्याकरणस्य प्रणेतेति; दृश्यत एव हि तद्व्याकरण मद्यापि, परं तस्य पाणिनिपरजत्वं तु सर्वसम्मत मेवेति दिक्॥

यश्चैष प्रवादः,—आसीत् पुरा माहेशं नाम व्याकरणं पाणिनीयतोऽपि बृहत्तरं पुरातनञ्चेति। तथा चोद्भटश्लोकोऽप्ययम्—"यान्युज्जहार माहेशाद् व्यासो व्याकरणार्णवात्। किं तानि पदरत्नानि सन्ति पाणिनिगोष्पदे"–इति। तदेतस्य मातृपितृनिर्णयहीनत्वात् अप्रामाण्य मेवेति विदुषां परामर्शः। मधुसूदन-सरस्वती तु प्रस्थानभेदे इद मेव व्याकरणं माहेश्वर मित्याह। तथाहि—"तच्च वृद्धिरादैजित्याद्यष्टाध्यायात्मकं महेश्वरप्रसादेन भगवता पाणिनिनैव प्रकाशितम्; अत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्त्तिकं विरचितम्; तद्वार्त्तिकस्योपरि च

भगवता मुनिना पतञ्जलिना महाभाष्य मारचितम् । तदेतत् त्रिमुनि व्याकरणं वेदाङ्गं माहेश्वर मित्याचक्षते"–इति । "अइउण्"–इत्यादिषु चतुर्दशसु सूत्रेषु पुरासीत् वृहद्व्याख्यानं नन्दिकेश्वरकृतम्, तदेव माहेश मिति व्यपदिष्ट मिति च वृद्धाः। अस्मन्मते तु पाणिनीयद्वेषिणा केन चिदाधुनिकेनैवैष श्लोकः प्रकाशितः, आसीन्माहेशं नाम अतिवृहद् व्याकरण मिति प्रवादोऽपि तदनुगत एव ; ततो माहेशन्तु वस्तुतः खपुष्प मिव त्रैकालिकाभावसम्पन्न मेवेति॥

किञ्चेह पाणिनीये अत्रि–शाकल्य-काश्यप–भृगु–कुत्स–वसिष्ठ–गौतम–कौण्डिन्य–जावाल–वडवा–यस्क*–शाकटायन–कौरव्य–मण्डूक–मधु–बभ्रु–पीला–कणादि–वैशम्पायन–तित्तिरि–वरतन्तु–कौशिक–शौनक†–गालव–भारद्वाज–चाक्रवर्म–स्फोटायन–आपिशलि-आङ्गिरस-छागलि–कठ–चरक–पाराशर्य–शिलालि–प्रभृतिबह्वाचार्यनामस्मरणात् तेभ्यो ह्यवरजत्व मस्य पाणिनेः स्फुट मेवेत्यवश्यं स्वीकार्यम्; परं न तथा स्वीकारे स्वीकृतं भवेत्,—एतत्पुरापि कश्चिदासीद्व्याकरणग्रन्थ ईदृश इति। वस्तुतस्तेषु केचिदाचार्याः पाणिनिसमकाला एव, तेषां भाषाव्यवहारतो ज्ञातानि तेन भगवता तेषां शाब्दमतानि ; ये केचन तत्पूर्वभवाः, तेषा मपरशास्त्रीय-ग्रन्थादिदर्शनादपि सम्भवेन्नाम तदीयशाब्दमतज्ञानम्; ये तु व्याकरण-कर्त्तारोऽपि, तेषां तान्यपि व्याकरणानि, न ह्येतादृशानि सर्वतोमुखानि सर्ववेद–लोक–विषयाणीति चावश्य मुररीकर्त्तव्य मस्मत्प्रदर्शितहेतुभिः, निर्वीजावृक्षकल्पनाया अन्याय्यत्वाच्च।

गरुडपुराणोक्तस्य कुमारव्याकरणस्य तु वोपदेवकृतात् मुग्धबोधादपि आधुनिकत्वम् ; तच्च "तिप्तसन्ति प्रथमो मध्यमः सिप्थस्थोत्तमपूरुषः। मिब्वस्मसः परस्मै तु पदानाञ्चात्मनेपदम्"–इत्यादिपाठादेव स्फुटम् । अग्नि-पुराणाद्युक्तानि व्याकरणानि तु वालक्रीड़नानीव। कार्त्तिकेयोक्तव्याकरणादीन्यपि पाणिनीयप्रवेशाय कृतान्येवेत्यल मिह बहुजल्पनेनेति।

---

* नायं निरुक्तकृद् यास्कः। † नायं प्रातिशाख्यादिकृत्।

तदेवं पाणिनीयस्यैवादिव्याकरणत्वात् यास्कीयेऽत्र निरुक्ते यत्र क्वचित् व्याकरणनामोल्लेखो दृश्यते, तत्सर्वं मेव यास्कस्य पाणिनीयपरभवत्वे विनिगमकम्; न हि यास्कीयनिरुक्तात् पूर्वं किञ्चन सर्वतोमुखं व्याकरणं पाणिनीय मन्तरेण स्थित मिति पाणिनेर्यास्कपूर्वजत्वं सुवचम् ॥

सोऽयं भगवान् पाणिनिः खलु युधिष्ठिरवासुदेवार्जुनेभ्यः परभव एव; तदीयेऽष्टके "गवियुधिभ्यां स्थिरः (८. ३. ९५.)"–इत्यस्य, "वासुदेवार्जुनाभ्यां वुन् (४. ३. ९८.)"–इत्यस्य च सूत्रस्य दर्शनात्। किञ्च परिक्षिताद् जनमेजयाच्चायं किञ्चिदुत्तरभवः; एतदीये ह्यष्टके जनमेजयपदसाधनायैव "एजेः खश् (पा० ३. २. २८.)"–विधानात्। जनमेजयस्तु युधिष्ठिर-तृतीयभ्रातुरर्जुनस्यैव पौत्रः। अर्जुनः खलु "शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले। कलेर्गतेषु वर्षाणा मभवन् कुरुपाण्डवाः (१. ५०.)"–इतिराजतरङ्गिणीलेखदर्शनात् कलेः सप्तमशताब्द्यां स्थित इति ध्रुवम्। ततश्च जनमेजयः खलु कलेरष्टमशताब्दीज इत्येव सम्भाव्यते। व्यासोऽपि कश्चित् तदानी मासीदिति च महाभारताख्यानादिभिर्ज्ञायत एव; तस्य व्यासस्य पुत्रः शुकोऽपि तच्छताब्दीज एव भवितु मर्हति, परं यतश्च व्यासपुत्रशुकवाचकवैयासकिसाधनाय न कश्चिद् दृश्यते योगः पाणिनीयः, दृश्यते च "व्यासवरुण० (पा० ४. ३. ९७. वा०)"–इति वार्त्तिकम्, अतोऽवगम्यते वैयासकिपरिचयो नैव विदितः पाणिनेरित्यपि। एतावता व्यासपुत्रस्य शुकस्य लोके ख्यातिप्रतिपत्तिलाभात् पुरैव प्रणीत मिद मष्टकम्पाणिनीय मिति। तदित्थं सम्पद्यते,—कलेरष्टम्या मेव शताब्द्यां खीष्टजन्मतश्च प्राक् चतुर्विंशशताब्द्यां किल भूषयामास स पाणिनिरिम मार्यावर्त्त मितीति ॥

(व्याडिः) उक्तं पुरस्तात् (जि ए०) ऋक्प्रातिशाख्यकृतः शौनकस्य पाणिनिपरजत्वम्, यास्कस्य तु ततोऽप्यर्वाचीनत्वम्; तदेवावसरप्राप्त मिदानीं निर्णेतु मादौ व्याडिविषयेऽपि किञ्चिद् ब्रूमः। तथाहि— अस्ति पाणिनेरष्टके स्वरप्रकरणे "आचार्योपसर्जनश्चान्तेवासी (६. २. ३६.)"–

इति सूत्रम्; अत्र च कृतः सन्देहो वार्त्तिककारेण—"आचार्योपसर्जने ऽनेकस्यापि पूर्वपदत्वात् सन्देहः"—इति; "आपिशल-पाणिनीय-व्याडीय-गौतमीयाः, एकं पदं वर्जयित्वा सर्वाणि पूर्वपदानि, तत्र न ज्ञायते कस्य पूर्वपदस्य स्वरेण भवितव्य मिति"—इत्येवं च तद्भाष्ये तत्सन्देहोप-पादनम्। अत्र हि सन्देहोदाहरणे आपिशलादीनां ननु "अभ्यर्हितञ्च (पा० २. २. ३४. वा०)"—इति शासनात् अभ्यर्हितक्रमेणैवास्ति सन्निवेशः; अभ्यर्हितत्वञ्च तेषां स्वस्वाचार्यपौर्वापर्यमूलक मेवेति। तथा च आपि-शलितः पराचीनः पाणिनिः, पाणिनितश्च पराचीनोऽयं व्याडिरिति तु व्यज्यत एव; किञ्चेह कात्यायनीयोदाहरणे व्याडीयशब्ददर्शनात् कात्या-यनात् खलु प्राचीनोऽयं व्याडिरित्यत्र च कास्ति वक्तव्यता? तदेतस्मा-देकस्मादेवोदाहरणविन्यासाद् द्वे एव विज्ञाते,— व्याडेः पाणिनितोऽव-रजत्वं कात्यायनतः पूर्वजत्वञ्चेति।

स च व्याडिः, 'सङ्ग्रह'-नामकस्य पाणिनीयव्याख्यानविशेषस्य प्रणेता। तत एवोक्तं महाभाष्ये पस्पशायाम्—"सङ्ग्रहे एतत् प्राधान्येन परीक्षितम्, —नित्यो वा स्यात् कार्यो वेति। तत्रोक्ता दोषाः, प्रयोजनान्यप्युक्तानि। तत्र त्वेष निर्णयः,— यद्येव नित्यः अथापि कार्यः उभयथापि लक्षणं प्रवर्त्त्य मिति"—इति। "सङ्ग्रहे = ग्रन्थविशेषे"—इति च तद्व्याख्यायां कैयटः। "सङ्ग्रहो व्याडिकृतो लक्षश्लोकसङ्ख्यो ग्रन्थ इति प्रसिद्धः"—इति च तद्वि-वरणे नागेशभट्टः। तदेतस्मादेकस्माच्चेमे विदिते—व्याडिरेव सङ्ग्रहस्य कर्त्तेति, स तु पाणिनितोऽवरजश्चेति।

स च दाक्षायण इत्यप्युच्यते। अस्ति पाणिनिसूत्रम्—"उभयप्राप्तौ कर्मणि (२. ३. ६६.)"—इति। "शेषे विभाषा"—इति च तत्र कात्याय-नस्य वार्त्तिकम्। "शोभना खलु पाणिनेः सूत्रस्य कृतिः, शोभना खलु पाणिनिना सूत्रस्य कृतिः; शोभना खलु दाक्षायणस्य सङ्ग्रहस्य कृतिः, शोभना खलु दाक्षायणेन सङ्ग्रहस्य कृतिः"—इति च तदुदाहरणानि। तदेतदामूलसमालोचनया च त्रीणि विज्ञातानि भवन्ति,— दाक्षायण इति

सङ्ग्रहकर्तुर्व्याडेरेव नामान्तरम्, स च पाणिनितोऽवरजः, कात्यायनतोऽग्रजश्चेति ॥

ये केचिदाहुः—दाक्षायण इति युवप्रत्ययदर्शनात् तस्य खलु व्याडेः दाक्षीपुत्र-(पाणिनि)-समकालिकत्वम्, तदसङ्गत मेव; न हि समकालिकग्रन्थे एवेदृशी श्रद्धा समुत्पद्येत, यत् तत्र लक्षश्लोकात्मकं व्याख्यान मारचयेदिति। नापि हि पाणिनिकाले एव पाणिनीयसूत्राणा मेवं व्याख्यानं प्रयोजनीयं भवितु मर्हति; तदानीन्तनानां सर्वेषा मेवातिबुद्धित्वात्; किञ्च सूत्रकाले एवैवं व्याख्यानं प्रयोजनीयं चेत्, तादृशसूत्रप्रणयनं सूत्रकाराणा मसङ्गत मेव स्यात्; न हि लोकहितचिकीर्षुभिः पाणिन्यादिभिः लोकविडम्बनायैव दुर्बोधसूत्ररचनं सम्भाव्यते। अतोऽस्मन्मते तु पाणिनिजन्मतोऽन्यूनद्विशताब्द्यन्तरे जातोऽयं व्याडिः, तदानीन्तनानां पाणिनीयावगमे कष्ट मेवानुभूय सुहृद्भूत्वैवान्वाचचक्षे तद्व्याख्यानं सङ्ग्रहं नाम; न हि द्विशताब्दी मन्तरा तथा मन्दबुद्धित्वं सम्भाव्यते, यथा च सूत्रबोधाय तादृश मतिबृहद् व्याख्यान मतिप्रयोजनीयं भवेदिति।

आदिदक्षस्यैवापत्यं युवा स्याद् दाक्षायणो नान्यः, एव मपि न नियमः; दक्षगोत्रीयस्य शततमस्यापि यस्य कस्याप्यपत्यं युवा भवितु मर्हत्येव दाक्षायण इति; तत्र वाधादर्शनात्, जीवद्वंश्यत्वमात्रस्यैव युवसञ्ज्ञानिदानत्वाच्च। जीवद्वंश्यत्वन्तु शततमस्यापि हि उपलभ्येत चेत्, तत्रापि युवसञ्ज्ञया भवितव्य मेवेति वैयाकरणानां सिद्धान्तः।

किञ्च युवप्रत्ययस्तु जीवद्वंश्यादावेव भवति नान्यत्रेति च न नियमः, अपि जीवद्वंश्यादौ भवत्येवेत्यपि नायं नियमः; वार्त्तिककार—कात्यायनेन हि "वृद्धस्य च पूजायाम्" युवसञ्ज्ञा विहिता, "यूनश्च कुत्सायां गोत्रसञ्ज्ञा" अपि कृतैवेति युवसञ्ज्ञा मधिकृत्य महाभाष्ये लघुशब्देन्दुशेखरे चैतत् सर्व मेव सुव्यक्तम्। तदेवं दक्षगोत्रजो मान्यः कश्चिदद्यतनीयोऽपि दाक्षायण इत्युच्येतैव, किं सङ्ग्रहकारस्य व्याडेः दक्षगोत्रविभूषणस्य ?

अन्यच्च; यदि हि नाम स व्याडिः पाणिनेः समकालिको मातुलपौत्रश्च

स्यात्, तद्दुर्वचं दृश्येत सूत्र मष्टके 'व्याड्यादयः शालायाम्'-इत्येव ;— न च "छात्र्यादयः शालायाम् (६.२.८६.)"-इति ; व्याडिशालाया एव पाणिने-र्मनसि पूर्वोदयसम्भवात्। तत्रैव छात्र्यादिगणे व्याडिशब्दस्य पाठः खलु व्याडेः पाणिनिसमकालिकत्वं बोधयतीत्यपि वक्तुं न युज्यते ; गणपाठे हि काले काले शब्दाः सन्निवेश्यन्ते,—इति तु सर्वैरुररीकर्त्तव्य मेव। सिद्ध मित्थं व्याडेराचार्यस्य आदिव्याकरणाचार्यात् पाणिनितो बहुकालपरत्वं वार्त्तिककाराच्च कात्यायनात् बहुपूर्वजत्व मपीति ॥

(शौनकः) प्रातिशाख्यकृत्-सङ्ग्रहकृतोः शौनक-व्याड्योश्च समकालिकत्व मवगम्यते। अस्ति हि शौनकीये ऋक्प्रातिशाख्येऽसकृद् व्याडेरुल्लेखः, अस्ति च व्याडिकृतायां विकृतिवल्ल्या मसकृच्छौनकस्यावगमश्च । तद्यथा,—

शौनकीये ऋक्प्रातिशाख्ये व्याडेरुल्लेखः—"परिग्रहे त्वनार्षान्तात्तेन वैकाक्षरीकृतात् । परेषां न्यास माचारं व्याडिस्तौ चेत् स्वरौ परौ (३प० ८.)"-इति । "अनार्षादितिकरणात् परेषा मक्षराणां न्यास मनुदात्तत्व माचारं मन्यते व्याडिराचार्यः"-इत्येवमादिकञ्च तत्रोव्वटकृतं भाष्यम् । तथा "उभे व्याडिः समस्वरे (३प० १३.)"-इति । "व्याडिस्त्वाचार्यः"— इत्यादि च तद्भाष्यम् । "व्याडेः सर्वत्राभिनिधानलोपः (६प० २१.)"-इति । "व्याडेराचार्यस्य"-इत्यादि च भाष्यम् । अपरञ्च "समापाद्यं नाम वदन्ति षत्वं तथा णत्वं नामवशांश्च सन्धीन् । उपाचारं लक्षणतश्च सिद्ध माचार्या व्याडिशाकल्यगार्ग्याः (१३ प० ३८.)"-इति । "तथा वदन्ति के ? आचार्याः,—व्याडि-शाकल्य-गार्ग्याः"-इत्यादि च तद्भाष्यम् । अपर मपि "व्याडिर्नासिक्य मनुनासिकं वा (१३ प० ४४.)"-इति । "व्याडिराचार्यः"-इत्यादि च तत्र भाष्यम् । तान्येवमादीनि व्याडि-मतानि तु पाणिनीयव्याख्यानरूपात् सङ्ग्रहग्रन्थादेव शौनकेन सङ्गृहीता-नीत्यपीह ध्येयानीति ।

एवं व्याडिकृतायां विकृतवल्ल्याञ्च शौनकस्यावगमः— "अनुलोमे यथा-क्रमम् (वि० व०१.८.)"-इत्यत्र "यथाक्रमशब्देन प्रातिशाख्योक्ता अन्व-

सरन्ध्रैप्रादयो ग्रह्याः"–इत्याह विकृतिकौमुदीकृत्। तथा 'शुत्क्रमे क्रमवत् सन्धिः (१.११.)"–इत्यत्र च "विपर्ययक्रमसन्धौ शौनकोक्ताः दैप्रादिसन्धयो भवन्तीत्यन्वयः"–इत्यादि चाह स एव कौमुदीकृद्दृष्टाचार्यः। तत्रैव "डकारादिविधानम्"–इतिव्याख्यायां चोक्तम्—"डकारस्य ळकारादेशः शौनकोक्त एव"–इत्यादि। तथाग्रेऽपि "एकारौकारपरस्तु अकारोऽभिनिहन्यते (१.१३.)"–इत्यस्य कौमुद्याम् "उद्ग्राहसन्धौ शौनकाचार्यैः प्रकृतिभावनिमित्तं प्रापितः 'प्रकृत्यान्तः (पा० ६. १.११५.)'–इत्यनेन सूत्रेण"–इत्यादि। स्पष्टं चास्ति तत्र शौनकनामोल्लेखः "उदात्तादिविधानं तच्छौनकोक्तं भवेदिह (वि० व० १ प० १५ श्लो०)"–इति।

अतो मन्यते सुष्ठुमितं शौनकव्याड्योः समकालिकत्व मिति। तत्र च प्रथमं तावत् व्याडिराचार्यः पाणिनेरष्टक मवलम्ब्य सङ्ग्रह मारचितवान्; ततः शौनकाचार्यः शाकलसंहितायां विशेषाख्यापनाय प्रातिशाख्यं प्रणीतवान्; ततश्च तत्परिशिष्टस्थानीया अष्टप्रकारा विकृतिवल्ली कृता पुनस्तेनैव व्याडिनेत्यपि प्रतीयते तत्तद्ग्रन्थसमालोचनादिभिरिति ॥

एतौ च शौनक–व्याडी गुरुशिष्यौ,—इत्येतदपि विज्ञायते, तत एव विकृतिवल्लीग्रन्थात्। तथाहि तन्मङ्गलाचरणे—"नत्वादौ शौनकाचार्यं गुरुं वेदमहानिधिम्। मुनीन्द्रं सर्ववेदज्ञं ब्रह्मज्ञं लोकविश्रुतम् (२)"–इति। एव मपि सिद्ध मेतयोः समकालिकत्वम्। तस्मान्नून मसौ प्रातिशाख्यकृच्छौनकः पाणिनेः परभव एवेति ॥

ननु शौनकस्य पाणिनिपरभवत्वं सत्य मेवेति चेत्, कथं न तत्कृते ऋक्प्रातिशाख्ये पाणिनेर्नामोल्लेखः ? अत्रेदं सम्भाव्यते,— यथा च सम्प्रति भट्टोजिदीक्षितकृता वैयाकरणसिद्धान्तकौमुदी नाम वृत्तिः प्रचलिता, अत एवाविशेषेण 'पाणिनीयव्याकरण मधीते'–इत्युक्ते तद्वृत्तिसमन्वितस्यैवाध्ययनस्य बोधो भवति, 'कौमुदी मधीते'–इत्युक्ते च पाणिन्यष्टकान्विताया एव तस्या वृत्तेरध्ययनं प्रतीयते, अपि च व्याकरणकारोल्लेखप्रसङ्गे तद्वृत्तिकर्त्तुः दीक्षितस्यापि नामोल्लेखः क्रियत एव; तथैव शौनककाले

अपि ससूत्रसङ्ग्रहस्यैव व्याकरणत्वेन प्रसिद्धिरासीत्, सङ्ग्रहकारस्य च तस्य व्याडेर्व्याकरणकर्तृत्वेनेति। तदुक्त मस्ति हेमचन्द्रीये चाभिधानचिन्तामणौ —"ससूत्रवृत्त्यर्थपदं महार्थम् (१२. २८.)"—इति सङ्ग्रह-विवरणम्। तदेवं व्याडेरुल्लेखादेव पाणिनेरुल्लेखः सिद्धः। सत्येवं शौनकीयप्रातिशाख्यादौ यत्र क्व च व्याकृतिविषये व्याडेराचार्यस्य नामोल्लेखो दृश्यते, तत्सर्व मेव पाणिनिमतस्मारकम्; व्याडिः खलु पाणिनीयव्याख्यातृत्वेनैव वैयाकरणत्वसिद्धेः; न हि व्याडिर्व्याकरणसूत्रकारः। तथाच— यद् दृश्यते ऽत्र "व्याडिर्नासिक्य मनुनासिकं वा (ब० प्रा० १३ प० ४४.)"—इति, तदिदं "मुखनासिकावचनोऽनुनासिकः (१. १. ८.)"—इत्यस्य पाणिनीयस्य सूत्रस्यैव व्याडिकृतं व्याख्यानं शौनकेन संस्मृत्योल्लिखित मित्येव गम्यते। एव मन्यत्रापि। भाष्यकृताप्युक्तं पस्पशायाम्— "अथ व्याकरण मित्यस्य शब्दस्य कः पदार्थः? सूत्रम्। * * *। न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते। किन्तर्हि? व्याख्यानतश्च। ननु च तदेव सूत्रं विगृहीतं व्याख्यानं भवति? न केवलानि चर्चापदानि व्याख्यानम्— 'वृद्धिः, आत्, ऐच्'—इति। किन्तर्हि? उदाहरणम्, प्रत्युदाहरणम्, वाक्याध्याहारः—इत्येतत्समुदितं व्याख्यानं भवति"—इति। अत एव चोक्तं दृश्यते वृत्तौ— "ससङ्ग्रहं व्याकरण मधीते"—इति (पा० ६. ३. ७९.)। अपि च शौनकीये हि तत्र प्रातिशाख्ये आचार्यपदेनापि पाणिनेः स्मरणं बहुत्र लक्ष्यते। तथाहि—"अष्टावाद्यानवसानेऽप्रगृह्यानाचार्या आहुरनुनासिकान् स्वरान्। तन्निमात्रे शाकला दर्शयन्त्याचार्यशास्त्रापरिलोपहेतवः (१. ४. १.)"—इत्यत्रावश्यं पाणिनिकृतम् "अणोऽप्रगृह्यस्यानुनासिकः (८.४.५७.)"—इत्येव सूत्रं लक्ष्यीभूत मिति स्वीकार्य मिति॥

किञ्च पाणिनीयप्रणयनात् पुरा कस्यापि प्रातिशाख्यग्रन्थस्य प्रचारः समभवदित्यपि न प्रतीयते, क्वचिदपि पाणिनीयसूत्रे प्रातिशाख्यशब्दादर्शनात्; प्रातिशाख्यशब्दव्युत्पत्तये वार्त्तिककृत्कृतयत्नस्योपलाभाच्च। यथाहि—'गम्भीराञ्ञ्यः(४.३.५८.)"—इति सूत्रे उक्तं कात्यायनेन "अप्रक-

रणे परिमुखादिभ्य उपसङ्ख्यानम्"–इति; परिमुखादिगणे एव च दृश्यते "प्रतिशाख"–इति। परिषच्छब्दस्तु दिङ्क्ष्यते पाणिनीयेऽपि, परं न तत्र तत्र प्रातिशाख्यार्थोऽवगम्यते; अपि तु गाथकाद्यर्थ एव। तथा "पार्षदकृतिरेषा तत्र भवतां नैव लोके नान्यस्मिन् वेदे अर्द्ध एकारोऽर्द्ध ओकारो वास्ति (१ अ० १ पा० ७ आ०)"–इति महाभाष्यवचनस्य नागेशादिकृतं व्याख्यानं चालोच्यम्।

वस्तुतस्तु शाखाविशेषेषु व्याकृत्यादिविशेषबोधनपरा एव प्रातिशाख्य-ग्रन्थाः, सामान्यतः सर्वशब्दानुशासनाय प्रवृत्तात् पाणिनीयाद्याकरणादवरजा एव भवितु मर्हन्ति। अतस्तथैवोक्तं ऋक्प्रातिशाख्यशास्त्रप्रयोजनश्लोक-व्याख्यानावसरे तत्तृतीयवृत्तिकृतोव्वटेन, कृतश्च तत्र पाणिनिसूत्रोद्धरणम्। तथाहि—"तथा व्याकरणे यत् सामान्येन, यथा—'ऋचि तु-नु-घ-मक्षु-तङ्-कु-त्रोरुष्याणाम् (पा० ६. ३. १३३.)'-इति, तद् व्यवस्थापयितु मिद मारभ्यते; न सर्वत्रैतानि पदानि अस्यां शाखायां दीर्घा भवन्ति। यथा— "–इत्यादि। एव माथर्वणप्रातिशाख्येऽप्युक्तं स्वयं सूत्रकृतैव "एव मिहेति च विभाषाप्राप्तं सामान्येन"–इति। सामान्येन लक्षणेन पाणि-नीयेन यद् विकल्पेन प्राप्तम्, तदेव मस्यां शाखायां व्यवस्थितं भवतीति च तदर्थः। अत एवोक्तं महाभाष्यकारेण च—"अवश्यं खल्वप्यस्माभिरिदं वक्तव्यम्, बहुल मन्यतरस्या मुभयथा वा एकेषा मिति। सर्ववेदपारिषदं हीदं शास्त्रम्, तत्र नैकः पन्थाः शक्य आस्थातुम् (म० भा० २ अ० १ पा० ३ आ०)"–इति।

अथ केषाञ्चिन्मते प्रातिशाख्यकृच्छौनक एवैकः सूक्तद्रष्टा, मण्डलद्रष्टा, कल्पकृत्, शाखाप्रवक्ता चेति। पूर्वप्रदर्शितानि षड्गुरुशिष्यवचनान्येवात्र वीज मुपलभ्यते; तत्रापि नामैक्य मेव, नान्यत् किञ्चनेत्यस्माकम्। समा-सतः खण्डितञ्चैतत् पुरस्तादेव (वि पृ०)। वस्तुतस्तु शुनकवंशीयाः अद्य-तनीया अपि शौनका एव; तस्मान्नामैक्यवीजकं तादृश मद्भुतमतं स्मतिभ्रमविजृम्भित मिवैव प्रतिभाति; न हि तत्र किमपि मानं लभ्यते,

प्रत्युत लघ्यन्त एव वादा बहवः। तेषां कतिचित् पुरस्तादेव भणिताः*, प्रदर्शयिष्यामश्चोपरिष्टादपि (वेदसमालोचने) कतिचिद्। इह च किञ्चित् प्रकटयामः।—

प्रातिशाख्यकारस्य शौनकस्य तु मुनित्वेन व्यवहारदर्शनात् ऋषिकालात् परभवत्व मध्ययुगीयत्वञ्च। तथाहि—"नत्वादौ शौनकाचार्यं गुरुं वन्दे महानिधिम्। मुनीन्द्रं सर्ववेदज्ञं प्रख्यातं लोकविश्रुतम्"—इति विज्ञतिवक्ष्यां व्याड़िवचनम् (२); न हि तेन तत्रोक्तम् ऋषीन्द्र मिति। पाणिन्यादीनां पतञ्जल्यन्ताना मध्ययुगीयाना मेव हि मुनित्वेनैव व्यवहारो दृश्यते प्रधानतः सर्वत्र, ऋषित्वेनापि व्यवहारस्त्वापेक्षिकः पूजार्थश्च; पतञ्जलेः परभवाणां महाभारतकारादीनां तु सर्वेषा मेव कवित्वेनैव व्यवहारो दृश्यते प्रधानतः सर्वत्र, मान्यार्थ एवर्षित्वेन व्यवहारस्त्वौपचारिकः; पाणिनिपूर्वजाना मपि-शलि-शाकटायन-गार्ग्य-शाकल्य-काश्यपच्छौनक-माण्डव्य-पाराशर्यप्रभृतीनां त्वाचार्यत्वेनैव व्यवहारो दृश्यते प्रधानतः सर्वत्र, ऋषित्वेन व्यवहारस्त्वाति-देशिकः; तेभ्योऽपि प्राचीनतमानां पुराकल्पभूतानां वसिष्ठ-वामदेव-गृत्समदप्रभृतिशौनकादीनां मन्त्रद्रष्टृणा मेव ऋषित्वं मुख्य मिति तु प्रति-पादितं पुरस्तादेव (ख—गौ ए०)। तदेवं प्रातिशाख्यकृच्छौनको नून मध्य-युगीयः; तत्रापि व्याड़िसमकालिक इति पाणिनिपरभवातो नास्य कथ मपि युज्यते सूक्तद्रष्टृत्वादिक मितोऽप्यपास्तं बड्गुरुशिष्यमतम्॥

एवञ्च यद्यपि बहूना मेव वैदिकग्रन्थानां प्रणेतृनाम शौनक इत्येवं श्रूयत एव, परं न हि तन्मात्रेणैव तेषां सर्वेषा मेक एव प्रणेतेति प्रामाण्य मुपगन्तु मर्हतीति शौनकानां विभिन्नव्यक्तित्व मसमकालिकत्वञ्च सुतरां सम्पद्यत एव। वर मनुमीयते,—शिक्षाकृत् शौनकाचार्यः खलु पाणिनेः पूर्वजः; प्रोक्ताधिकारे "शौनकादिभ्यश्छन्दसि (४. ३. १०६.)"—इतिसूत्रीय-शेखरे "छन्दसि किम्? शौनकीया शिक्षा"—इतिप्रत्युदाहरणदर्शनात्।

---

* का, मि, गौ, चि, जि, भा, लि, भू, भे, भै, भो द्रष्टव्यं।

कल्पकृत् शौनकाचार्यस्तु ततोऽपि पुरातनः; तत्रैव षड्ग्रन्थस्यैवोदाहरणत्वेन बोधनात्; छन्दस्त्वसामानाधिकरण्येन प्रोक्तत्व मेव हि तादृशोदाहरणत्वेबीजम्। यस्तु कल्पकृत्, स एव कर्त्ता शाखाप्रवचनस्यापि। तथा ह्युद्धृतं विक्षतिकौमुद्यां गङ्गाधरभट्टाचार्येण—"शाकलाः शौनकाः सर्वे कल्पं शाखां प्रचक्षते(१. ४.)"–इति। तत्त्वतः पाठभेदकल्पभेदावेव शाखाभेदहेतू। मण्डलद्रष्टुः शौनकर्षेस्तु द्रष्टृत्वेन व्यवहारात् ततोऽपि प्राचीनत्व मन्ययुगीयत्वञ्च; न ह्येतद्युगीयस्य कस्यापि द्रष्टृत्वेन परिचयः क्वाप्युपलभ्यते; अस्ति चैतस्य शौनकस्य द्रष्टृत्वेनैव व्यपदेशः,—"द्वितीयं मण्डल मपश्यत्"–इति (बृ० दे०)। मण्डलशब्दस्तु वैदिकमन्त्रसूक्तानां सङ्घविशेषस्यैव वाचकः; तदाह सर्वानुक्रमणीकृच्छौनकोऽपि—"तत्तदृषिवृष्टानां बहूनां सूक्ताना मेकर्षिकर्तृकः सङ्घो मण्डलम्"–इति, "सम्पूर्ण मृषिवाक्यन्तु सूक्त मित्यभिधीयते"–इत्यादि च। ततस्तस्माच्च तादृशसङ्घकारात् शौनकात् प्राचीनोऽन्य एव शौनकर्षिः सूक्तकारः,—इत्यप्यविचारित मेव सिद्धम्। 'आर्ष्यनुक्रमणी'-प्रभृतीनां दशाना मृग्वेदीयग्रन्थानां तु प्रणेता बभूव चैकः शौनक इति च सर्वानुक्रमणीकृत्तौ षड्गुरुशिष्यः। तथाहि—
—"शौनकीया दशग्रन्थास्त ऋग्वेदस्य गुप्तये। आर्ष्यनुक्रमणीत्याद्या छान्दसी दैवती तथा। अनुवाकानुक्रमणी सूक्तानुक्रमणी तथा। ऋक्पादयोर्विधाने च बार्हद्दैवत मेव च। प्रातिशाख्यं शौनकीयं स्मार्तं दशम मुच्यते"–इति। नात्र वादं पश्यामः। एवञ्च य एव प्रातिशाख्यकृत् स एव आर्ष्यनुक्रमण्यादीना मपि प्रणेतेति सर्व एवैते ग्रन्थाः पाणिनीयतो बहुत्तरभवाः; प्रातिशाख्यकृत्सङ्घकृतोर्गुरुशिष्यत्वेन समकालिकत्वप्रतीतेरिति (भा० ए०)॥

स एष शौनकः, षड्गुरुशिष्यकथितो महाभारताख्यानप्रसिद्धो गृहपतिरित्येव चेत्, पाणिनेरर्द्धशताब्दीपरजः स्यात्। तथाचाह षड्गुरुशिष्यः—"आसीद् गृहपतिर्यो वै नैमिषारण्यवासिनाम्। शतानीकाथ राज्ञे वै जनमेजयसूनवे"–इत्यादि। तदपि न; व्याड़िसमकालिकत्वादस्य;

व्याडेश्च हि पाणिनितोऽन्यूनद्विशताब्दीपरजन्मत्व मनुमित मितः पुर एव (भू पृ०)। तदेवम् सर्वानुक्रमणीभाष्ये दृष्टानि षड्गुरुशिष्योक्तानि शौनक-परिचायकवचनानि सर्वाण्येवास्मान् विस्माययन्त एव। तत्त्वतो ऋक्प्राति-शाख्यकारः खल्वेष शौनको यतो व्याडिसमकालिकः, तत एव कलेरन्यूनै-कादशशताब्द्यां खीष्टजन्मतश्च द्विसहस्राब्दीतः प्रागिहासीद्दिति चोप-लभ्यत एवेति ॥

(यास्कः) निरुक्तकारोऽयं यास्कस्तु तस्मादस्माच्च शौनकात् परा-चीन एव। दृश्यते ह्यत्र निरुक्ते (२ भा० ११६ पृ०) शौनकीयप्राति-शाख्यसूत्र मुद्धृतम्—"पदप्रकृतिः संहिता (ऋ० प्रा० २. १.)"—इति। उक्तञ्चेह—"पदप्रकृतीनि सर्वचरणानां पार्षदानि (२भा०११६पृ०)"—इति। अतोऽस्मान्निरुक्तात् पूर्व मेव प्रणीताः प्रायः सर्व एव प्रातिशाख्य-ग्रन्था इत्यप्यनुभवाम एवेति ॥

यत्तु केन चित् "न दाशतय्येकपदा काचिदस्तीति वैयास्कः"—इतिप्राति-शाख्योक्तिदर्शनात् यास्कस्यैतस्य शौनकाग्रजत्वं निर्णीतम्; तस्य तु मूले एव कृतः कुठाराघातः पुरस्तादेवेति (ख पृ०)॥

तथाच निरुक्तकारोऽयं यास्कः खलु शौनकपरशताब्दीज इत्यपि वक्तुं शक्यते, सम्भाव्यते च तथा पाणिनितः त्रिशताब्दीपरजन्मत्व मस्य; नापि हि त्रि-चतुःशताब्दी मन्तरा मनुष्याणा मेतादृशं बुद्धिवैजात्यं सम्भाव्यते,— यत्रैकेनैव सूत्रेण कृतार्थो मुनिः, तदर्थ एवैवं बृहद्ग्रन्थः प्रयोजनीयो भवेत्;—पृषोदरादीनीति सूत्रेणैव साधितं पाणिनिमुनिना प्रायः सर्वनैरुक्तकार्य मिति तु बोधित मेव पुरस्तात् (ए, औ पृ०)। एवञ्चेद मेव स्फुटं प्रतीयते पाणिनिकाले शिष्टानां भाषाव्यवहारत एव पदाना मर्थाः प्रतीयन्ते स्म, अत एव सूत्रयामास पृषोदरादीनीति; तत उत्तर-कालम् जाते हि शिष्टाना मपभाषाव्यवहारबाहुल्ये, सञ्जाते च बुद्धि-मालिन्ये ऽवश्य मेव विशेषतो निर्वचनादेर्वक्तव्यत्व मुपगत मत एव प्रवृत्त मिदं निरुक्तं यास्कीय मिति। तदेवं कलेर्द्वादशशताब्द्यां खीष्ट-

जन्मतस्तेनविंशशताब्दीतोऽपि प्राक् समभवदयं यास्क इति सिद्धम् ॥

पाश्चात्याध्यापकगोलङ्ष्टूकरोद्भावितप्रणालीतो बोथलिङ्कीयं स्वं मार्गञ्च अपारकालपारावारे विचरन्तो वय मिमं यास्क मपश्याम ;—कस्यां नु वेलाया मासीनः स प्रणिनायेदं निरुक्त मिति ।

साधवो येन गच्छन्ति तेन गच्छन् न दोषभाक् ।
निन्दा वा यदि वा शंसा नानुगानां हि युज्यत इति शम् ॥

---

(८)

अथेदानीं विचार्य मस्ति,—कैमर्थिकी वस्यैषा प्रवृत्तिर्यास्कस्येति ; "प्रयोजन मनुद्दिश्य न मन्दो हि प्रवर्त्तते"। किञ्च, "सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्य चित् । यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ?" न केनापीति भावः । अतोऽस्य च यास्कस्यात्र प्रवृत्तेः प्रयोजनं वक्तव्य मेव । न चात्र साङ्ख्यकर्तुः सृष्टिविषयकः प्रश्न इवायं विचारः स्वार्थः परार्थो वास्यारम्भ इति निर्णयायेति ; न ह्यस्मप्रकृतिरिव कोऽपि केवलं परार्थं कि मपि कर्त्तु मुत्सहतेऽत्रेति धीमतां सिद्धान्त एव। अत एवाह भगवान् पतञ्जलिः—"नेह कश्चित् परोऽनुगृहीतव्य इति प्रवर्त्तते, सर्वं इमे स्वभूत्यर्थं प्रवर्त्तन्ते। ये तावदेते गुरुशुश्रूषवो नाम, तेऽपि स्वभूत्यर्थं प्रवर्त्तन्ते ;—पारलौकिकञ्च नो भविष्यति, इह नः प्रीतो गुरुरध्यापयिष्यतीति। तथा य एते दासाः कर्मकरा नाम, एतेऽपि स्वभूत्यर्थं प्रवर्त्तन्ते ; भक्तं चैलञ्च लप्स्यामहे, परिभाषाश्च न नो भविष्यन्तीति ("परिभाषाः = दण्डनादिकाः" कै०)। तथा य एते शिल्पिनो नाम, एते च स्वभूत्यर्थं प्रवर्त्तन्ते ; वेतनञ्च लप्स्यामहे, मित्राणि च नो भविष्यन्तीति (३ अ० १ पा० २ आ०)"–इति। हरिणाप्युक्त मेव मेव—"निमित्तेभ्यः प्रवर्त्तन्ते सर्वं एव स्वभूतये। अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये"–इति। एष चाशयोऽस्य प्रश्नस्य— यथा च खलु ऋक्तन्त्र-व्याकरणस्य ऋग्वेद एव विषयः, सामतन्त्र-व्याकरणस्य सामवेद

एव ; तथैवास्यापि शास्त्रस्य कश्चिद्वेद एवैको विषयतया निर्दिष्ट उत यथा पाणिनीयं नाम व्याकरणं लौकिकानां सर्ववेदगतानां च सर्वविधसाधुशब्दाना मविशेषेण व्युत्पादनाय प्रवृत्तम्, तथैवेद मपि ?–इति। अत्र ब्रूमः ;— नेद मृक्तन्त्रादिवदेकवेदविषयम्, इह सर्ववेदीयाना मेव निगमानां दर्शनात् ; नापि पाणिनीय मिवेदं लोकवेदयोरविशेषेण शासकम्, इह केवललोकविदितानां केवलब्राह्मणगतानाञ्च पदानां निर्वचनाना मनालोचनात् ; ततोऽयं ग्रन्थः तृतीयश्रेणीकः सर्ववेदमन्त्रव्याख्यामार्गबोधनायैव प्रणीतः। अत एवाह यास्कः स्वय मेव—"अथापीद मन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते"–इत्यादि, "अथापीद मन्तरेण पदविभागो न विद्यते"–इत्यादि च (२ भा० १०२—१२७ पृ०)।

अपरञ्चास्य विशेषतः समालोचनयेद मपि लभ्यते,—यथा मन्त्राणा मेवार्थादिज्ञापनाय प्रवृत्ता ब्राह्मणग्रन्थाः, तथैवेद मपीति। मन्त्रात्मकानां वेदाना मर्थादिकाशनोपकारित्वयैवास्य च वेदाङ्गत्व मपि वा वेदेतिप्रसिद्धानां (भू, को पृ०) ब्राह्मणग्रन्थाना मंशविशेषत्वात् परिशिष्टरूपत्वाद्वा सिद्ध मस्य निरुक्तशास्त्रस्य वेदाङ्गत्वम्। ब्राह्मणग्रन्थेष्वपि हि निरुक्तनामोल्लेखं निर्वचनानि च पश्यामो बहुचैव ; ततोऽनुब्राह्मणग्रन्थेषु तच्छास्त्रं सुपुष्ट मनन्तरञ्च निदानसूत्रग्रन्थेषु बहु लीलायितं दृष्ट मेव तद् भगवता यास्केनाबद्धं पृथग् ग्रन्थरूपेणेति। एवञ्च नेदं शास्त्रं ब्राह्मणग्रन्थीयपदादिव्याख्यामार्गबोधनाय ; अपि तु यदर्थं प्रवृत्तं ब्राह्मणं तदर्थ मेवेद मपीति सर्वेषां वेदानां मन्त्रगतपदादीना मेव व्याख्यानप्रकारबोधनायैवेदं शास्त्रं निरुक्तं नामेत्यनादिसिद्धं ग्रन्थीकृतं यास्केनेत्यस्माकम्।

सर्ववेदभाष्यकारः सायणाचार्यस्तु ऋग्भाष्यभूमिकाया माह—"अथ निरुक्तप्रयोजन मुच्यते"—इत्यारभ्य "तस्माद्वेदार्थाववोधायोपयुक्तं निरुक्तम्"–इत्यन्तम्। तथा वृत्तिकारः खलु दुर्गाचार्योऽप्याह—"वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेद मङ्ग मारभ्यते"–इति। प्रस्थानभेदकारो मधुसूदनोऽप्येव माह— "वैदिकमन्त्रपदाना मर्थज्ञानाकाङ्क्षायां * * * निरुक्त

मारचितम्"–इति। तदत्र सायणीयवचनादिषु मन्त्रब्राह्मणविशेषेण सर्वेषा मेव वेदाना मर्थादिबोधनायैवेद मारब्ध मिति प्रतीयते स्फुटम्।

तदिमावुभौ पक्षौ सम्पन्नौ,—मन्त्राणा मेव व्याख्यानमार्गादिप्रदर्शनायेदं प्रवृत्तं निरुक्तं नाम वेदाङ्गशास्त्र मित्येकः; मन्त्राणां ब्राह्मणवचनानाञ्च व्याख्यानमार्गादिप्रदर्शनाय प्रणीत मिदं निरुक्त मित्यपरः; तदनयोः पक्षयोः कतरो ज्यायानिति बलवत्पक्षपातशून्यहृदयैर्धीमद्भिरेवानुसन्धीयता मिति शम्॥

---

(८)

अथ कोऽसौ वेदः?—वेदशब्दस्य कीदृशी व्युत्पत्तिरिष्टा आर्याणाम्; तथा वेदस्य किं लक्षणम्, स्वरूपञ्च तस्य कि मिति त्रयः प्रश्नाः स्वत एव सर्वमनःसु समुत्पद्यन्त एव; तत्समालोचनायैवैतर्हि किञ्चिदिह यतामहे इति यावत्।

(वेदः) "विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मादिपुरुषार्था इति वेदाः"–इत्येतद् वेदशब्द-व्युत्पादनं कृतं दृश्यते देवमित्रपुत्रेण विष्णुमित्रेण ऋक्-प्रातिशाख्यस्य वृत्त्युपक्रमे। अन्यान्यविधानि च सन्ति बहूनि वेदशब्दव्युत्पादनानि, तानि चान्यत्रान्यत्र द्रष्टव्यानि।

"प्रत्यक्षानुमानागमेषु (प्रमाणेषु) अन्तिमो वेदः"–इति, "समयबलेन सम्यक् परोक्षानुभवसाधनं वेदः"–इति, "अपौरुषेयं वाक्यं वेदः"–इत्यादीनि च वेदलक्षणानि सायणीये ऋग्भाष्यादौ द्रष्टव्यानि। "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिक मुपायं यो वेदयति स वेदः"–इत्येकेनैव वाक्येन च वेदस्य व्युत्पादन-लक्षणे ऽप्युक्ते कृष्णयजुर्भाष्यभूमिकायां सायणेनैव। "प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता"–इति वचनञ्च तत्र मानत्वेनोपन्यस्योक्तं च "स एवोपायो वेदस्य विषयः; तद्बोध एव प्रयोजनम्; तद्बोधार्थी चाधिकारी; तेन सह्योपकार्योपकारकभावश्च सम्बन्धः"–इति।

वेदस्वरूपश्चोक्त मेवं बौधायनेन—"मन्त्रब्राह्मणा मित्याहुः"—इति। आपस्तम्बेन च यज्ञपरिभाषायां स्फुट मुक्तम्—"मन्त्रब्राह्मणयोर्वेदनामधेयम्"—इति। सर्ववेदभाष्यकारेण सायणाचार्येणापि तदेवापस्तम्बीयलक्षण मवलम्ब्यैव प्रपञ्चित मृग्भाष्यभूमिकायां बहुधैव; सिद्धान्तितञ्चैतत् तत्र "मन्त्रब्राह्मणात्मकः शब्दराशिर्वेदः"—इति। उक्तञ्च भगवता जैमिनिमुनिनापि तथैव; तदनुमोदितञ्च सर्वानुक्रमणीवृत्ति भूमिकायां षड्गुरुशिष्येण। तथाहि—

"मन्त्रब्राह्मणयोराहुर्वेदशब्दं महर्षयः।
विनियोक्तव्यरूपो यः स मन्त्र इति चक्षते।
विधिस्तुतिकरं शेषं ब्राह्मणं कथयन्ति हि।
विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते।
ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये।
अहेबुध्नीय मन्त्रं मे गोपायेत्यभिधीयते।
ऋक् पादबद्धो, गीतस्तु साम, गद्यं यजुर्मन्त्रः।
चतुर्ष्वपि हि वेदेषु त्रिधैव विनियुज्यते।
वेदैरशून्य इत्यादौ मन्त्रे त्रैविध्य मुच्यते।
सर्वैर्ब्रह्मेति सूत्रेऽपि चतुर्भिरिति निर्णयः।
प्रस्तुतर्क्यादिति वाचि त्वो वा मन्ते सूत्रकारणे।
ऋग्रूपमन्त्रबाहुल्यादृग्वेदः स्यात् तथेतरौ।
शान्तिपुष्ट्यादिकब्रह्मवर्गप्रणवविद्यया।
ऋचाञ्च यजुषां तुर्यो बाहुल्येन विधायकः।
एकविंशत्यध्ययुक्त मृग्वेद मृषयो विदुः।
सहस्राध्वा सामवेदो यजुरेकशताध्वकम्।
नवाध्वाथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम्"—इति।

एतेन खलु सर्वेषा मेव वेदानां सर्वविधस्वरूपाण्यान्येव समासतस्तेन धीमतैवेत्यत्रास्माकं नैव किञ्चिदत्राव मस्त्यवशिष्टम्; विशेषतस्तु जिज्ञा-

सायां वेदविषयनिर्णयायैवोत्पन्नं सुमहद् दर्शनशास्त्रं जैमिन्यादिभिर्महात्मभिः प्रपञ्चितं मीमांसासूत्रादिक मेव सुधीभिर्द्रष्टव्य मित्यलं चर्वितचर्वणेन वेदस्य पौरुषेयत्वापौरुषेयत्वादिविचारेणेति ॥

परन्त्वस्त्यन्नैतदालोच्यम्,— आपस्तम्बादिमतानुगाः सायणाचार्यादयस्तु मन्त्राणां ब्राह्मणानाञ्च वेदत्वं चिरात् सिद्ध मिति मन्यन्ते। केचित्त्वाधुनिका ब्राह्मणग्रन्थेषु बहुत्र 'य एवं वेद'–इति दर्शनादेव प्रथमं तावत् ब्राह्मणग्रन्थाना मेव वेदाख्या प्रचलिता, ततः कालक्रमेण मन्त्रेष्वपि सा उपचरितेत्याहुः। वयन्तु तदुभयोरेव विपरीतं ब्रूमः;—पुरासीत् विद्यापरपर्याय एवायं वेदशब्दः; तथा यतश्च सर्वासा मेव विद्यानां निधानानीमे मन्त्राः प्रदृष्टाः, अतो मन्त्रकाले एव त्रिविधानां मन्त्राणां वाचकः सम्पन्नो वेद इति; ततो ब्राह्मणकाले ब्राह्मणेष्वपि ग्रन्थेषु मन्त्रमात्रपर एव व्यवहृतो वेदशब्दः; पश्चात् सूत्रकाले तु मन्त्रब्राह्मणयोरुभयोरेव विद्यानिधानत्वेनादरातिशयस्थितेरुभयोरेव बोधकः सञ्जातो वेद इति। तदत्र त्रयः पक्षाः सम्पद्यन्ते;—(१) मन्त्रब्राह्मणयोरुभयोर्वेदत्वम्, (२) ब्राह्मणग्रन्थाना मेव मुख्यं वेदत्वम्, (३) सर्वविद्यानिधानानां हि मन्त्राणा मेव वेद इति व्यवहारो मुख्योऽतिपूर्वकालिकश्चेति। अथैषां कतमः पक्षो ज्यायान् इति पूर्वापरदर्शिभिर्मध्यस्थधिषणावद्भिरेव समालोच्यताम्।

श्रूयते हि शुक्लयजुषि मन्त्रे एव त्रयीपरो वेदशब्दः—"वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः (१९. ७८.)"–इति। "प्रजापतिः 'सुतासुतौ' सुतासुतयोः रूपे 'वेदेन' ज्ञानेन, त्रय्या विद्यया वा 'व्यपिबत्' विविच्य पीतवान्। सुतः=सोमः, असुतः=पयः परिस्रुत्"–इति च तस्यैव व्याख्यानं भाषितं महीधरेण। तदत्र वेदेनेत्यस्य द्विविधोऽर्थः कृतो दृश्यते,—ज्ञानेन, त्रय्या विद्ययेति च; तत्र द्वितीयोऽर्थ एव युक्ततरोऽस्माकम्, मूले 'वेदेन'–इत्याद्युदात्तश्रवणात्। अस्ति हि वेदशब्दः उञ्छादिगणे (६. १. १६०. पा० सू०) पठितः करणव्युत्पाद्यो यौगिको ऽन्तोदात्तः; अस्ति चापरो वृषादिगणे (६. १. २०३.) पठितस्त्वयां रूढः

आद्युदात्तो वेद इति। अत एव ऋक्संहितायां श्रुतस्य "यः समिधा (६. १. ५.)"–इति मन्त्रस्य व्याख्याने भाषितं सायणाचार्य्येण 'वेदेन = वेदाध्ययनेन'–इति। तैत्तिरीयसंहिताया मप्येव मस्ति त्रयीपरो वेदशब्द आद्युदात्तः (७. ५. ११. २.)। तथैवाथर्वणिका अप्यसन्नदामनन्ति संहिताया मेव त्रयीपरं वेदशब्दम्। तथाहि—"यस्मिन् वेदा निहिता विश्वरूपास्तेनौदनेनातितराणि मृत्युम् (४. ७. ५. ६.)"–इति; बुध्यत एवात्र हि वेदा इत्यस्यार्थं ऋगादय इति। तथा तत्रैवोनविंशकाण्डेऽपि त्रिशः श्रुतो वेदशब्दस्त्रयीपर एव। तदेवं सर्वसंहितास्वेव त्रयीपरो वेदशब्दो विश्रूयत एव।

एवं ब्राह्मणेष्वपि सर्वत्र श्रूयत एव वेदस्त्रयीपरः। तथाहि, बह्वृग्ब्राह्मणे—"त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्; तान् वेदानभ्यतपत् (ऐ० ब्रा० ५. ५. ६.)"–इति; एव मन्यत्रान्यत्र च तत्रैव (६. १५; ७. १८.)। तैत्तिरीयब्राह्मणेऽपि तृतीयकाण्डे (१०. ११. ४.) श्रूयत एव त्रयीपरो वेदशब्दः। तथा छान्दोग्यब्राह्मणे च—"स होवाचर्ग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेद माथर्वणं चतुर्थम् (६. १. २.)"—इत्यादि। अथर्वब्राह्मणेऽपि—"इमे सर्वे वेदाः (गो० ब्रा० १. २. ६.)"–इत्यादि। तदेवं सर्वब्राह्मणेषु च त्रयीपरो वेदशब्दः श्रूयत एव।

अत इदानीं वक्तुं शक्यत एवैतत्,—सर्वसंहितास्वेव त्रयीपरवेदशब्ददर्शन मेव प्रमाणयति, आसीन्मन्त्रकालेऽपि केवलमन्त्राणा मेव वेद इति व्यपदेशः; तदापि मन्त्रव्याख्यानार्थकानां ब्राह्मणग्रन्थाना मनाविर्भावात्। प्रदर्शितब्राह्मणवाक्यानि च तदेव दृढयन्ति; ऋगादिशब्दानां मन्त्रेष्वेव मुख्यशक्तेः। अत एवोपपद्यन्ते तत्र गोपथे "इमे सर्वे वेदाः"–इत्यत्र विशेषणानि "सब्राह्मणाः"–प्रभृतीनि। निरुक्ते ये चार्थज्ञप्रशंसनाय शाखान्तरीयमन्त्रा उद्धृता यास्केन, तत्र च श्रूयते त्रयीपर एवाद्युदात्तो वेदशब्दः—"अधीत्य वेदम्"–इति (२ भा०१३० पृ०)। तस्माच्च

ज्ञायते मन्त्रकाले एव मन्त्रार्थको वेदशब्द आसीत् प्रसिद्ध इति। यास्कः स्वयञ्चाह सुव्यक्तम्—"कर्मसम्पत्तिर्मन्त्रो वेदे (२ भा० २४ पृ०)"—इति; स च कर्मसम्पत्तिमन्त्रः क्वास्ति ब्राह्मणेषु संहितासु वा? संहितास्वेवेति चेदितोऽपि स्फुटं व्यज्यते संहितार्थ एव वेदशब्दोऽभिमतः खलु निरुक्तकारस्यैतस्य यास्कस्यापीति॥

वस्तुतो ज्ञानार्थस्य लाभार्थस्य वा विदधातोरेव रूपं वेद इत्युक्ते विद्यैव तस्यार्थः फलति। अनन्ताश्च विद्या इह जगति सन्ति चिरराचाय; तत एव वेदस्य सनातनत्व मनन्तत्वञ्च मन्यन्ते आर्याः। आदिसभ्यकाले चात्र भारते ये ऋषयः प्रादुर्बभूवुः, आसन्नेव ते विविधविद्याविभूषणाः साक्षात्कृतधर्म्माणः, अत एव तैर्दृष्टा मन्त्रास्तत्कालादेवोच्यन्ते वेदा इति। तदेवं मन्त्रेष्वेव वेदशब्दस्य मुख्या शक्तिः; ब्राह्मणानान्तु यथा ऋगादिलक्षणाभावेऽपि तत्तद्व्याख्यानाद्यर्थतया तत्तन्नाम्ना व्यवहारः; तथैव वेदनाम्नापीति वेदशब्दस्य तत्र वृत्तिस्त्वौपचारिक्येव। तथा ह्यामनन्ति तैत्तिरीयाः—

"भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्य्य मुवास। तꣳ ह जीर्णिꣳ स्थविरꣳ शयानम्, इन्द्र उपव्रज्योवाच। भरद्वाज! यत्ते चतुर्थ मायुर्दद्याम्, कि मेनेन कुर्य्या इति। ब्रह्मचर्य्य मेवैनेन चरेय मिति होवाच। तꣳ ह त्रीन् गिरिरूपानविज्ञातानिव दर्शयाञ्चकार; तेषाꣳ हैकैकस्मान्मुष्टि माददे। स होवाच भरद्वाजेत्यामन्त्र्य। वेदा वा एते, अनन्ता वै वेदाः, एतद्वा एतैस्त्रिभिरायुर्भिरन्ववोचथाः; अथ त इतरदननूक्त मेव (तै० ब्रा० ३. १०. ११. ३, ४.)"—इति।

छान्दोग्येऽपि श्रूयत एव वेदार्थो विद्याशब्दः। तथाहि—"प्रजापतिर्लोकानभ्यतपत् * * * अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्। स एतां त्रयीं विद्या मभ्यतपत्"—इत्यादि (१. १७. १—१०.)। एवं तत्रैवान्यत्रान्यात्रपि (४. १९. १; २३. २.)। तदेवं वेदस्य विद्यापरपर्य्यायत्वं स्फुट मेव।

अतः सुष्ठूक्त मस्माभिः 'पुरासीत् विद्यापरपर्याय एवायं वेदशब्दः'—

इत्यादि (६३ पृ०); तथा सम्भाव्यते चैष पक्षो युक्ततम एवोपन्यस्तो मन्त्रेष्वेव वेदशब्दस्य मुख्या वृत्तिरिति ॥

आपस्तम्बादिसूत्रारम्भकाले तु ब्राह्मणग्रन्थाना मपि वेदत्वं व्यपदिष्टम्; ततः प्रभृति सिद्ध मेव "मन्त्रब्राह्मणयोर्वेदनामधेयम्"—इति। तत एव मनुसंहितादावपि "वेदः कृत्स्नोऽधिगन्तव्यः (२. १६५.)"—इत्यादिषु वचनेषूभयोरेव ग्रहण मवगम्यते। अत एवोक्तं सङ्गच्छते "उदितेऽनुदिते चैव समयाध्युषिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः (२. १५.)"—इति; "उदिते जुहोति"—इत्यादिविधयस्तु ऐतरेयादिब्राह्मणेष्वेव श्रूयन्ते। तथाहि— "वृषशुष्मो ह वातावत उवाच जातूकर्ण्यो वक्ता स्मो वा इदं देवेभ्यो यदेतदग्निहोत्र मुभयेद्युरहूयताऽन्येद्युर्वाव तदेतर्हि हूयत इत्येतदु हैवोवाच कुमारी गन्धर्वगृहीता वक्ता स्मो वा इदं पितृभ्यो यदेतदग्निहोत्र मुभयेद्युरहूयताऽन्येद्युर्वाव तदेतर्हि हूयत इत्येतद्वा अग्निहोत्र मन्येद्युर्हूयते; यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्र मुभयेद्युर्हूयते; यदस्तमिते सायं जुहोत्युदिते प्रातस्तस्मादुदिते होतव्यम्। * * *। उद्यन् खलु वा आदित्य आहवनीयेन रश्मीन्त्सन्दधाति। स योऽनुदिते जुहोति, यथा कुमाराय वा वत्साय वाऽजाताय स्तनं प्रतिदध्यात् तादृक्; तदथ य उदिते जुहोति, यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात् तादृक् * * *। तदेषाभियज्ञगाथा गीयते—प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्। दिवाकीर्त्य मदिवा कीर्त्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषा मिति (५. ५. ४, ५, ६.)"— इति। तथा "श्रुतिस्तु वेदो विज्ञेयः (म० सं० २. १०.)"—इत्यत्र च श्रुतिलक्षणे मन्त्राणां ब्राह्मणानाञ्च ग्रहण मिष्टं तस्येत्यपि प्रतीयत एव; ज्ञायते च तथा श्रुतिरिति वेदस्यैव नामान्तर मिति ॥

(श्रुतिः) श्रवणात् श्रुतिरित्याख्या। "श्रुयजीषिस्तुभ्यः करणे (पा० ३. ३. ९५. वा० २.)"—इति निष्पादितः श्रुतिशब्दस्तु श्रवणेन्द्रियपरः; इह तु "स्त्रियां क्तिन् (३. ३. ९४.)"—इति भावार्थ एव क्तिनिष्टः। एष हि

वेदश्चिर मेव श्रूयते गुरुपरम्परानुसारेण ;— केनापि कदापि एकस्यापि मन्त्रस्य प्रणयनकालनिर्णये कथ मपि न समर्थः ! अत एव वाय्वादिवद् अनादिरपौरुषेयश्चेति सूयत एवाय मिति वृद्धाः ।

स एषः श्रुतिशब्दो वेदपरो न व्यवहृत आसीत् मन्त्रकाले, मन्त्र-संहितासु क्वचिदपि वेदार्थश्रुतिशब्दस्य दर्शनाभावात् ; अपि तु ऐतरेयादि-ब्राह्मणप्रचारात् पुरैव गाथाकाले व्यवहृतो भावसाधनः प्रवादपरः । तथा ह्यैतरेयकम्— "तस्मादपत्नीकोऽप्यग्निहोत्र माहरेत् । तदेषाभियज्ञगाथा गीयते-- 'यजेत् सौत्रामण्या मपत्नीको ऽप्यसोमपः । मातापितृभ्या मन्ट-णाद्यजेति वचनाच्छ्रुतिः'-इति । तस्मात् सौम्यं याजयेत् (ऐ० ब्रा० ७. १. ९.)"— इति । ता मिमां यज्ञगाथा मवलम्ब्यैवाख्यातं ब्राह्मणम्— "तदा ऊर्वाचाऽपत्नीकोऽग्निहोत्रं०-०स्वर्गांल्लोकान् जयन्तीति (७. १. १०.)"— इति । तदेवमादीनां दर्शनादिद मपि व्यक्तम्— आदौ मन्त्रकालः, ततस्तेषां यज्ञादिषु व्यवहारकालः, ततस्तादृशप्रवादश्रुतिकालः, ततो गाथाकालः, ततश्च ब्राह्मणकालः; गाथामूलान्येव हि बहूनि ब्राह्मण-वचनानि श्रूयन्त इति ॥

स एषः प्रवादार्थ एव श्रुतिशब्दो ब्राह्मणकालादनन्तर मेव मन्त्रब्राह्म-णयोर्व्यवहर्त्तुं मारब्धः; तत एवैतन्निरुक्तत्रयोदशाध्यायान्ते दृश्यते— "सेयं विद्या श्रुतिमतिबुद्धिः(४भा० ३६०पृ०)"-इति । तथा स्मर्यते च मन्वादिभिः— "श्रुतिस्मृत्युदितं धर्म मनुतिष्ठन् हि मानवः (२. ९.)"- इति । "उदितेऽनुदिते चैव समयाध्युषिते तथा । सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः (२. १५.)"—इत्यादि च । वेदस्यानुश्रवणमापि श्रुतिमूलक मेव । तथाहि— "दृष्टवदानुश्रविकः"-इतीश्वरकृष्णीयसाङ्ख्य-कारिकाव्याख्यानावसरे व्युत्पादित मेवं वाचस्पतिना— "गुरुमुखादनुश्रूयते इत्यनुश्रवो वेदः"-इति ॥

लौकिकप्रवादवाक्याना मपि श्रुतित्वव्यवहारो दृश्यते बहुत्र । तदेवं यस्य कस्यचिद् वचनस्य प्रचारकालस्यादिर्न निर्णीयते,— कदा केन

कथित मिद मिति, अपि च प्रामाणिकतया गुरुपरम्परयोपदेशो लभ्यते, तत् किल वैदिकं वा लौकिकं वा वचनं श्रुतिरित्युच्यते । कल्पयन्ति चानुमित-श्रुतीः मन्वादिभिर्वेदविद्भिर्विहितानां विधीनां मूलानि स्मार्त्तग्रन्थेषु; वेदार्थ-स्मरणमूलकत्वादेव च तेषां स्मृतित्वाख्यानात्। तदेवं यस्य च प्रामाणिक-स्मृतिवचनस्य मूलं वैदिकवचनं साक्षान्नोपलभ्यते, तस्य मूलं तादृशवैदिक-वचनं कल्पनीयं भवति, तत् कल्पितवचन मपि श्रुतिरिति व्यवहृतं रघु-नन्दनादिभिः। वस्तुतः श्रुतिकल्पनारीतिस्त्वयुक्तैव मीमांसाधिकरणमालायाम् 'औदुम्बरीं स्पृष्ट्वोद्गायेत्'— इति विधान मनुसृत्य 'औदुम्बरी सर्वा वेष्टयि-तव्या'—इति विधेर्लोभमूलकत्वेनाप्रामाण्याख्यापनात् । तदेवं मन्त्रभागानां श्रुतित्वं तु सर्ववादिसम्मतम्; ब्राह्मणभागानां श्रुतित्वं च मन्वादिभिः स्वीकृत मेव; प्रवादवाक्यानां लौकिकानाञ्च श्रुतित्वं व्यावहारिकं दुर्बलम्; कल्पित-श्रुतयोऽपि सन्ति रघुनन्दनादीना मिति श्रुतिचातुर्विध्यं सुस्थिर मिति॥

(आम्नायः) "श्रुतिस्त्री वेद आम्नायस्त्रयी"— इति नामलिङ्गानुशासनात् श्रुतिः, वेदः, आम्नायः, त्रयी,—इत्येतान्येकार्थान्येव पदानि। आम्नायसमाम्नायौ चाभिन्नार्थौ। अतएव "इति माहेश्वराणि सूत्राणि"—इति भट्टोजिदीक्षित-प्रथमवचनव्याख्यानावसरे उक्तं नागेशेन लघुशब्देन्दुशेखरे— "आम्नाय-समाम्नायशब्दौ वेदे एव रूढौ"—इति। वेदशब्देन तु आ सूत्रकालात् मन्त्रा ब्राह्मणवचनानि च गृह्यन्ते इत्युक्त मिदानी मेव। अत एव भगवता जैमि-निना कृते इदानीं प्रचलिते मीमांसादर्शने च बहुत्रैव मन्त्रब्राह्मणार्थपरो ह्याम्नायशब्दो दृश्यते। तथाहि— "आम्नायस्य क्रियार्थत्वादानर्थक्य मतद-र्थानाम् (१. २. १.)"—"उक्तं समाम्नायैदमर्थ्यं० (१. ४. १.)"—इत्येवमादयो द्रष्टव्याः। "स्वाद्याम्नायधर्मित्वाच्छन्दसि नियमः (१. ४.)"—इत्येतस्य वाजस-नेयिप्रातिशाख्यसूत्रस्य व्याख्यानावसरे च "आम्नायो वेदः"—इत्यारभ्य "ब्राह्मणं विध्यर्थवादरूपम्, मन्त्रस्तु कर्माङ्गभूतद्रव्यदेवतास्मारकः"— इत्याद्युक्तं तद्भाष्यकृदुव्वटेनापि। तथा स्पष्टमोक्त मथर्ववेदीये कौशिक-सूत्रे— "आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च (१)"—इति।

यास्कीयेऽत्र निरुक्तेऽप्युभयोरेवाम्नायत्व माख्यातं दृश्यते। तथाहि— "अथाप्यनुपपन्नार्था भवन्ति— 'ओषधे त्रायस्वैनम् (य० वा० सं० ४.१; ६.१५.)', 'स्वधिते मैनं हिंसीः (य० वा० ४.१; ६.१५.)'—इत्याह हिंसन् (२ भा० १०२, १०७ पृ०)"—इत्याशङ्क्य समाहितं तत उत्तरम्— "यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत (२ भा० ११२, ११४ पृ०)"—इति। तदत्र मन्त्राणा मेवाम्नायत्वेन ग्रहणं दृष्टम्। अन्यत्र तु "एषां लोकानां रोहेण सवनानां रोह आम्नातः (३ भा० ४० ३ पृ०)"—इत्यत्र, इत उत्तरत्रैतत्सिद्धान्ते "यथो एतन्नोहात्प्रत्यवरोहश्चिकीर्षित इति, आम्नायवचनादेतद् भवति (३भा० ४१६ पृ०)"—इत्यत्र च ब्राह्मणाना मेवाम्नायत्वेन ग्रहणं दृष्टम्। एवञ्च सुव्यक्तं निरुक्तग्रन्थेऽप्युभयोरेव मन्त्रब्राह्मणयोराम्नायत्व मिति।

मन्त्राणा माम्नायत्वं मत्त्वैव ततः सङ्गृहीतस्य निघण्टोश्च समाम्नायत्व मुक्त मादौ तेनैव निरुक्तकृता— "समाम्नायः समाम्नातः, स व्याख्यातव्यः (२ भा० ७ पृ०)"—इति। अत एव तद्वृत्तिकृता दुर्गाचार्येणोक्तं भूमिकायाम् "छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता, सैषा छन्दोऽवयवभूता छन्दो-धर्मिण्येव यथायथापन्नाख्या गौर्गौश्चर्म्मा इति (२ भा० ६ पृ०)"—इति॥

वेदाङ्गाना मप्याम्नायत्वं निरुक्तकृत्सम्मत मेव; तेन प्रदर्शिते पुरावादे "समाम्नासिषुर्वेदञ्च वेदाङ्गानि च (२भा०१३७पृ०)"—इति वचने मन्त्राणाम्, ततः सङ्गृहीतानां नैघण्टुकपदानाम्, वेदानाम् (मन्त्रातिरिक्तानाम्)= ब्राह्मणानाम्, वेदाङ्गानाञ्चाम्नायत्वबोधनात्। लघुशब्देन्दुशेखरेऽपि प्रत्या-हारव्याख्यानावसरे "ननु चतुर्दशसूत्र्या मक्षरसमाम्नाय इति व्यवहा-रानुपपत्तिः?"—इत्यादिकं विचार मवतार्य पाणिनिव्याकरणादीनां वेदा-ङ्गाना मप्याम्नायत्वं प्रमाणीकृतं नागेशेनेति॥

"तस्येदम् (४.३.१२०.)"—इति पाणिनीयसूत्रे हि यदुक्तं वार्त्तिकम् "चरणाद्धर्माम्नानयोः (२)"—इति, तदनुसृत्यैव "छन्दोगौक्थिकयाज्ञिक-बह्वृचनटाञ्ञ्यः (पा० ४.३.१२९.)"—इति सूत्रे नाट्यस्याप्याम्नायत्व मुर-

ष्टीकृतं दीक्षितेन। तथा ह्युक्तम्— "चरणाद् धर्माम्नाययोरित्युक्तं तस्माद्-चर्याद्नटशब्दादपि तयोरेव"—इति। एवञ्च शिलालिप्रभृतिकृतानां प्राचीन-तमानां नटसूत्रादीना मप्याम्नायत्वं दीक्षितादिसम्मत मिति॥

वृद्धास्त्वाहुः— 'म्ना अभ्यासे'—इति धातुत एवाम्नायपदं निष्पन्नम्; अतो यः कश्चन ग्रन्थोऽभ्यस्त उक्तः, स एवाम्नायः। एकस्यैव पुनःपुनरुच्चारणादिना स्मृत्यनुगतकरण मेवाभ्यसनम्। युगावसानकाले प्रायः सर्वेष्वेव प्राण्यादि-ष्ववसन्नेषु ये केचिच्छिष्टा अवशिष्टा बभूवुः, तैः स्वस्वस्मृत्यनुरूपः- साङ्गो वेदः प्रोक्तः स्वस्वान्तेवासिभ्यः, तैश्च बहुभ्य इत्येवं पुनर्विस्तृतः सः; पुनर्युगान्ते चोपगते पुनः सर्व एव ते विलीनाः, पुनर्नवयुगारम्भे यथावशिष्टैः शिष्टैः स्वस्वस्मृत्यनुरूपत एव प्रोक्तः स्वस्वान्तेवासिभ्यः। एव मेवाभ्यासः सम्पद्यते साङ्गस्य वेदस्य सदैवेति स साङ्गो वेदः सर्व एव समाम्नाय इत्या-ख्यायते। अत एव ज्योतिषविषये सूर्यसिद्धान्ते ज्योतिषोपनिषदध्याये ऽप्युक्त मेव मेव "युगेयुगे समुच्छिन्ना रचनेयं विवस्वतः। प्रसादात् कस्य-चिद्भूयः प्रादुर्भवति कामतः"—इति (१९श्लो०)।

तत्र चायं विशेष उपलभ्यते,— मन्त्राणा मेव यथावत् स्वरवर्णमात्रादि-युतानां यथाश्रुताना मभ्यासः क्रियते; स एव मन्त्रभागो दृष्ट इत्युच्यते। तत्रापि स्मृतिच्युत्यादिहेतुभिः पाठन्यूनाधिक्यं पाठान्तरत्वं क्रमान्यत्वञ्चा-निवार्य मिति शाखान्तरत्वं सम्पद्यते। ब्राह्मणानान्तु तदर्थाभिधाने एवो-पयोगित्वात्तत्रान्यथाप्युपपद्यतेति न तत्र यथावत्पाठाभ्यासः स्वीकृतः प्रत्युत तदर्थाभ्यास एव कृतोऽपरग्रन्थप्रवचनेनेति; स एव ब्राह्मणभागः प्रोक्त इत्युच्यते। एवं वेदाङ्गग्रन्थाना मपि मूलतत्त्वाना मभ्यसनीयत्वेऽपि तत्तत्प्र-योगस्थानाना मस्ति देशकालाद्यपेक्षेति देशकालाद्यनुसारेणैव विधान मुचित मिति प्रतिनवयुगे नवकल्पनैव कृता; स एव वेदाङ्गभागः कल्प इति चोच्यते। तदेवं सर्व एव वेदाङ्गाः तत्त्वतोऽभ्यस्ता अपि अक्षरशः प्रतियुगे नूतनाः कल्प्यन्ते—इति कल्पनामभाजः स्युः, परं शिक्षाप्रभृतीनां पञ्चानां कल्पनामतो व्यवहारो न दृश्यतेऽपि तु यागादिविधायकानां पैङ्गीप्रभृ-

तीना मेव ग्रन्थाना मेकविधानां कल्प इति प्रसिद्धिः; व्यवहार एवात्र निदानम्। तथाच वेदाङ्गग्रन्थेषु तेषा मेव यज्ञसूत्रग्रन्थानां प्राथम्य मनुमीयते; यथा हि शैशिरीयाणां पञ्चाना मेव शाकलत्वेऽपि आद्याया एव शाखायाः शाकल इति प्रसिद्धिः, यथा च सर्वेषां सामवेदीयार्चिकानां छन्दस्त्वेऽपि पूर्वभागस्यैव छन्द इति।

अत एव ब्राह्मणग्रन्थेष्वपि निरुक्तादिनामदर्शनं न विस्मयकरं भवत्वार्याणाम्। नाट्यादिग्रन्थोऽपि नासीत् पुराकल्पे इति को वदितुं सक्षमः? परं मन्त्रातिरिक्तानां केषा मपि प्रबन्धानां न हि यथावदक्षरशोऽभ्यसनं सप्रयोजन मित्यतिप्राचीननटसूत्रादीनां कृतकत्वेऽप्याम्नायत्व मव्याहत मेव। तदेवं नटशब्देनापि कात्यायनोक्तधर्माम्नानयोरभिसम्बन्धे को दोषः पाणिनिवृत्तिकृतः खलु भट्टोजिदीक्षितस्य।

पर मत्र चेद मवश्यं धार्यम् यद् भवतु नाम मन्त्रब्राह्मणात्मकस्य वेदस्य, मन्त्रोद्धृतपदसङ्घात्मकस्य निघण्टोः, षड्भागोपेतस्य वेदाङ्गस्य, अन्येषाञ्च नटसूत्रादीनां सर्वेषा मेव प्राचीनतमाना मार्ष्यशास्त्राणा माम्नायत्वम्; परं मन्त्रभागस्यैवाम्नायत्वं मुख्यम्, प्रतिकल्पे मन्त्राणा मेवाक्षरश आम्नानात्; तथैव नैघण्टुकपदानाम्; तदनु ब्राह्मणभागस्य, तस्यापि तथा व्यवहारात्; तदनु वेदाङ्गानाम्, यास्कादिभिः स्वीकारात्; नटशास्त्रादीनान्तु तथात्वे प्रामाण्यं विप्रकृष्टत इतीति॥

(त्रयी) अमरसिंहोक्तेषु वेदनामसु त्रयीत्येवावशिष्ट मालोचयितुम्; तदप्यालोच्यते यथाज्ञानम्।— रचनायास्त्रैविध्य मेव मन्त्राणां त्रयीत्वे वीजम्। अस्ति हि काचिद्रचना पद्यं नाम, सैव पुरा ऋगिति श्रुता; अस्ति काचिद्रचना गद्यं नाम, सैव पुरा यजुरिति श्रुता; अस्ति काचिद्रचना गानं नाम, सैव पुरा सामेति श्रुता। यतो हि गद्यपद्यगानातिरिक्तो नास्ति रचनाप्रकारः, अत एव ऋक्संहितासु, यजुःसंहितासु, सामसंहितासु, अथर्वसंहितासु वा ऋग्यजुःसामभ्योऽन्यो नैव दृश्यते कोऽपि वेदमन्त्रः। पद्यगद्यगानातिरिक्ता हि रचना कदापि नासीत्, इदानी मपि

नावलोक्यते लोके, तत् कथन्नाम ऋग्यजुःसामलक्षणातिरिक्ताऽपि मन्त्ररचना भवेद्वैदिकीति। तदाह भगवान् जैमिनिः— "तेषा मृग् यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुःशब्दः (मी॰ द॰ २. १. ३२, ३३, ३४.)"–इति। तदेतन्न्यायविस्तरे स्फुटीकृतञ्च माधवेन, द्रष्टव्यं तत् तत्रैव। एवञ्च त्रयी नाम त्रिविधरचनामयी आम्नायवाणी; सैव वेदः, सैव आम्नायः, सैव श्रुतिरित्यादि।

यद्यपि मन्त्राणा मेव रचनानियमाधीन मेतत्त्रयीनाम, अतो मन्त्रभागस्यैव त्रयीत्व मङ्गीकर्त्तव्यम्, न तु ब्राह्मणभागस्येति वक्तुं युज्यते; "अहिर्बुध्न्येय मन्त्रं मे गोपाय य मृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि (तै॰ ब्रा॰ १. २. २६.)"–इति श्रुतिस्तत्र साक्षिकैव। अत्र हि "त्रीन् वेदान् विदन्तीति त्रिविदः। त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदाः, ते च यं मन्त्रभागम् ऋगादिरूपेण त्रिविध माहुः, तं गोपायेति योजना"–इत्यभिकरणमालाकारो माधवश्चोक्तवान् तथैव। तथापि मन्त्रभागानुगतब्राह्मणग्रन्थाना मपि त्रयीत्वं व्यावहारिक मिदानीं मन्तव्य मेव; सञ्ज्ञायाः खलु व्यवहाराधीनत्वात्। परं यथोक्तं पुरस्तात् मन्त्रभागस्यैव वेदत्वं, श्रुतित्वं, समाम्नायत्वं च मुख्यम्; ब्राह्मणभागस्य त्वप्रधान मिति; बोध्यं तथैवात्रापीति॥

इह केचिदन्यथैवाहुरन्यदेशीयाः। तद्यथा— पुरा किल यदा ऋग्वेदो यजुर्वेदः सामवेदः—इति त्रय एव वेदा आसन्, नासीदथर्ववेदः; तदैव वेदस्य त्रयीत्याख्या प्रचलितेति। अत एव प्राचीनतमेष्वेव ग्रन्थेषु त्रयीति वेदस्योल्लेखो दृश्यते; नातिप्राचीनेषु। यथा च छान्दोग्यब्राह्मणे—"अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्। स एतां त्रयीं विद्या मभ्यतपत् (६. १७.)"– इत्यादि। एवं मनुसंहिताया मपि—"अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्ध्यर्थ मृग्यजुःसामलक्षणम् (१, २३.)"–इति। छान्दोग्यादिभ्योऽर्वाचीना ये ग्रन्थाः, तेषु तु वेदस्य चतुष्ट्व मेव, न त्रयीत्वम्; तदानी मथर्ववेदोऽपि सम्भूत इत्येव तथात्वे वीजम्। तथा हि

बृहदारण्यके—"अरे अस्य महतो भूतस्य निःश्वसित मेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः (४. ४. १०.)"—इत्यादि। किञ्च महाभारतेऽपि—"एकतश्चतुरो वेदान् भारतञ्चैतदेकतः। पुरा किल सुरैः सर्व्वैः समेत्य तुलया धृतम्॥ चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा। तदा प्रभृति लोकेऽस्मिन् महाभारत मुच्यते (१प० २६८, २६९ श्लो०)"—इति। पुनस्तत्रैव "यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः। न चाख्यान मिदं विद्यात् नैव स स्याद् विचक्षणः (१प० ३६८ श्लो०)"—इति। एवञ्च ऋग्यजुःसाम—इत्येव त्रयो वेदाः त्रयीशब्दवाच्याः; अथर्ववेदस्तु न त्रयीशब्दस्य शक्त्या बुध्यते; अपि तु गौण्येति। तथा च ऋगादयस्त्रय एव प्राचीनतमाः; अथर्ववेदस्तु तदपेक्षयार्वाचीन एवेति फलितं वेदतत्त्वान्वेषिणां तेषां मनोरथद्रुमेणेति।

नैतन्मत मस्मन्मनोहरम्, नापि विचारसहम्; निर्मूलत्वात् एकदेशदर्शित्वदोषग्राहग्रस्तत्वाच्च। तथाहि—न क्वापि वेदे लोके वा तादृशमतस्य किञ्चिदपि मूलं कथ मपि दृश्यतेऽनुमातुं वा शक्यते। त्रयीतिनाम्ना वेदस्य व्यवहार एवात्र निदान मिति चेत्, अस्मदुक्तत्रयीनामकारण मेव तत्संहारकतया सदैव जागर्त्ति; सत्स्वपि हि चतुर्ष्वपि वेदेषु रचनात्रयभेदनिबन्धनं तेषु त्रयित्व मव्याहत मेव। अत एव, सामवेदे ऋचां यजुषां च पाठा विद्यन्त एव, एवं यजुर्वेदेऽपि ऋचां पाठा उपलभ्यन्त एव, कथ मसाङ्कर्यं सामादिलक्षणाना मित्याशङ्क्य सिद्धान्तितं माधवाचार्येण,—अस्तु सामादिनामतः सम्प्रति प्रसिद्धेषु ग्रन्थेषु यजुरादीनां साङ्कर्यम्, परं न हि तेन सामादिलक्षणानां साङ्कर्यं सम्पद्यते। ऋगादिलक्षणानि तु सर्वथा अव्याप्त्यतिव्याप्तिदोषशून्यान्येवेति इदानीन्तनाध्यापकप्रसिद्धिविरुद्धा एव ऋगादयः शास्त्रसम्मता इति। तथाहि—"नर्क्सामयजुषां लक्ष्म साङ्कर्यादिति शङ्किते। पादश्च गीतिःप्रश्लिष्टपाठ इत्यस्त्वसङ्करः॥ * * *। तत्र त्रिविधाना मृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति। कुतः? साङ्कर्यस्य दुष्परिहरत्वात्। 'अध्यापकप्रसिद्धेषु ऋग्वेदादिषु पठितो मन्त्रः'—इति हि

लक्षणं वक्तव्यम्, तच्च सङ्कीर्णम् । 'देवो वः सवितोत्पुनात्वच्छिद्रेण वसोः सूर्यस्य रश्मिभिः'—इत्ययं मन्त्रो यजुर्वेदे सम्प्रतिपन्नो यजुषां मध्ये पठितः; न च तस्य यजुष्ट्व मस्ति, तद्ब्राह्मणे साविन्त्र्यर्चे त्वृकत्वेन व्यवहृतत्वात् । 'एतत् साम गायन्नास्ते'—इति प्रतिज्ञाय किञ्चित् साम यजुर्वेदेऽङ्गीकृतम् (तै० स० १.६.५.१) । 'अक्षित मसि । अच्युत मसि । प्राणसंशित मसि' —इति त्रीणि यजूंषि सामवेदे समाम्नातानि (छा० ब्रा० ३.१७.) । तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायन्ते । तस्मान्नास्ति लक्षण मिति चेत्, न; पादादीना मसङ्कीर्णलक्षणत्वात् । 'पादबन्धेनार्थेन चोपेता वृत्तबद्धा मन्त्राः ऋचः', 'गीतिरूपा मन्त्राः सामानि', 'वृत्तगीति-वर्जितत्त्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि'—इत्युक्ते न क्वापि सङ्करः (अधि० मा० २. १.५०.)"—इति ।

एवञ्च इदानीन्तनाध्यापकप्रसिद्धितो वेदनामग्रहो मुग्धकार एव; वस्तुतो यत्र क्व च ग्रन्थेऽग्रन्थे वा यस्य कस्यचिन्मन्त्रस्य पादबन्धेनार्थेनोपेतत्वं वृत्तबद्ध-त्वञ्च दृश्यते, सोऽवश्य मेव ऋङ्मन्त्रः; एवं यत्र क्व च ग्रन्थेऽग्रन्थे वा यस्य कस्यचिन्मन्त्रस्य गीत्यात्मकत्वं दृश्यते, सोऽवश्य मेव साममन्त्रः; तथैव यत्र क्व च ग्रन्थेऽग्रन्थे वा यस्य कस्यचिन्मन्त्रस्य यजुष्ट्वं दृश्यते, सोऽवश्यं यजुर्मन्त्रः । एतदेवाङ्गीकृत्य सूतं बह्वृक्प्रातिशाख्यव्याख्याने विष्णुमित्रेण— "तथाचोक्तम् —'यः कश्चित् पादवान् मन्त्रो युक्तश्चाक्षरसम्पदा । स्वरयुक्तोऽवसाने च ता मृचं परिजानते'—इति"—इत्यादि । अत एव चात्रैव निरुक्ते ऋगिति प्रदर्शितं शतपथब्राह्मणीयवचनम् 'अङ्गादङ्गात् सम्भवसि"—इति । न ह्येतद्वचन मस्ति क्व चिदपि ऋक्संहितायाम्, प्रत्युत अस्त्येव शतपथ-ब्राह्मणे (१४.६.४.२६.); यदि नाम ऋक्संहितावचनाना मेव ऋक्त्व माचार्यसम्मतं स्यात्, तर्हि कथ मुच्येतात्र भगवता यास्केन "तदेतदृक्-श्लोकाभ्या मभ्युक्तम् (२ भा० २५६ पृ०)"—इत्यादि । इह तु ऋगिति शतप-थीयवचनम्, श्लोक इति तदानीं प्रचलिताया मनुसंहिताया वचनञ्च प्रदर्शितम् । तदेव मेवैषाचार्यप्रवृत्तिर्ज्ञापयति यत्र क्व च वेदे स्यात् ऋग्-

लक्षणो मन्त्रः, भवत्येव ग्रहणं तस्य ऋगिति; एवं यजुरपीति। एवञ्च ग्रन्थानां कालकृतबहुत्वेऽपि वेदस्य त्रैविध्यं तदनु त्रयीत्वञ्च यथा पुरा तथाद्यापि सुस्थित मित्यथर्ववेदोऽपि नास्माद् भिन्नः; तस्यापि ऋग्यजुर्मयत्वात्। अपि च यथा सामबहुले सामवेद इति प्रसिद्धेऽपि ग्रन्थे पठितानामृचा मृक्त्वं यजुषां यजुष्ट्व मुररीकार्य्य मेव, न च तत्स्वीकारात् तस्य सामवेदत्वं विहन्यते; तथैव अथर्वकृत्याबहुले अथर्ववेद इति प्रसिद्धेऽपि ग्रन्थे पठितानामृचा मृक्त्वं यजुषाञ्च यजुष्ट्वं कथं न स्वीकार्य्यम्? तथा स्वीकृते च तस्य अथर्ववेदत्वं कथं वा विहन्येत? एवं हि अस्त्वथर्ववेदस्य स्वातन्त्र्यम्, तदीयमन्त्राणां केषाञ्चिदृक्त्वं केषाञ्चिच्च यजुष्ट्वं न केनापि कदापि कथ मपि वारितुं शक्यते। तत् सिद्ध मेतत्,— वेदानां ग्रन्थभेदकृतचतुष्ट्वेऽपि रचनाभेदकृतत्रयीत्वे न कोऽप्यस्ति संशयः। अत एवैव मुक्तं दृश्यते सर्वानुक्रमणीवृत्तौ— "विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते। ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये। अहिर्बुध्नीय मन्त्रं मे गोपायेत्यभिधीयते। ऋक् पादबद्धो, गीतस्तु साम, गद्यं यजुर्मन्त्रः। चतुर्ष्वपि हि वेदेषु त्रिधैव विनियुज्यते"–इति।

यच्चोक्तम्,— प्राचीनतमेष्वेव ग्रन्थेषु छान्दोग्यादिषु त्रयीव्यवहारः; तदपेक्षयार्वाचीनेषु बृहदारण्यकादिष्वेवाथर्वनामेति; तदिदं तेषा मेकदेशदर्शित्व मेवावेदयति; सर्वत्रसर्वविधदर्शनात्। तथाहि, तत्रैव छान्दोग्ये— "ऋग्वेदं विजानाति यजुर्वेदं सामवेद माथर्वणञ्चतुर्थम् (७.७.)"–इति च; तत्रैव मनुसंहिताया मपि—(६. २६.) "अभिचारेषु", "कृत्यासु"–इति। तत्रैव शतपथब्राह्मणेऽपि— "त्रयो वेदा अजायन्त (११. ५. ८.)"–इत्यादि च; तत्रैव महाभारतेऽपि—"अग्निहोत्रं त्रयी विद्या (१. १००. ६६.)", "कच्चिद्धर्मे त्रयीमूले (२. ५. ६८.)", "न सामऋग्यजुर्वर्णाः (३. १५०. १३.)"–इत्यादि च। किम्बहुना यत्र क्वच ग्रन्थे वेदस्य त्रित्वं दृश्यते, तत्र सर्वत्रैव चतुष्ट्व मपि। तदेवं ग्रन्थानां प्राचीनत्वार्वाचीनत्वभेद एव वेदस्य त्रित्वचतुष्ट्ववर्णने वीज मिति मतं सर्वथैवापास्तम्॥

अथर्ववेदस्याधुनिकत्वे पाणिनेरस्मरण मपि मानान्तर मित्युक्तिश्च तेषां तथैव। तथाहि— ऋक्, यजुः, साम—इमानि तु मन्त्रलक्षणानि; ऋग्लक्षणो मन्त्रः, यजुर्लक्षणो मन्त्रः, सामलक्षणो मन्त्र इति; तादृशमन्त्रास्तु सर्वेष्वेव वेदेषु राजन्ते इति तेषां ग्रहणेनैव सर्ववेदानां ग्रहणं सम्पन्नम्; सूत्राणा मेव ग्रहणेनैव यथा सर्वेषा मेव पटाना मिति। अथर्वेति तु न किंचिन्नस्यापि मन्त्रस्य लक्षणम्; अपि तु यथा शाकलादिशाखानां साधारणं नाम ऋग्वेद इति, यथा च कठादिशाखानां साधारणं नाम यजुर्वेद इति, यथा च कौथुमादिशाखानां साधारणं नाम सामवेद इति; तथैव शौनकादिशाखानां साधारणं नाम अथर्ववेद इति। शाकलादिसंहिताग्रस्थानान्तु दृष्टत्वाभावः; अपि तु पाणिनेरतिपूर्वतनीयत्वादार्षत्वाच्च प्रोक्तत्वं पाणिनिसम्मतम्। अत एव यथाप्रयोजनं प्रोक्ताधिकारे एव शाकलादीना मुल्लेखः कृतः पाणिनिना—"शाकलाद्वा (४. ३. १२८)"—इत्यादिभिः सूत्रैः; तच्चाथर्ववेदीयशौनकसंहिताना मप्यस्त्येवोल्लेखः— "शौनकादिभ्यश्छन्दसि (४. ३. १०६)"—इति। तस्मिंश्च सूत्रे छन्दसि इति दर्शनादिदञ्च ज्ञायते यत् प्रोक्तत्वेनैव ग्राह्योऽपि न छान्दसः, एव मप्यस्त्येव कश्चन ग्रन्थः पाणिनेर्विदित इति। स च ग्रन्थः खल्वथर्ववेदीयशिक्षैव; तत एव तत्र प्रत्युदाहृतं नागेशेन "शौनकीया शिक्षा"—इति। अथर्ववेदीयकल्पस्यापि ग्रहणं कृत मेव तत्र प्रोक्ताधिकारे "काश्यपकौशिकाभ्या मृषिभ्यां णिनिः (४. ३. १०३.)"—इति। चतुरध्यायिकौशिकसूत्रस्याथर्ववेदीयत्वन्तु सुप्रसिद्ध मेव। किञ्च तत्रैव प्रोक्ताधिकारे यथैव "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञः (४. ३. १२९)"—इति सूचितम्; तथैव "आथर्वणिकस्येकलोपश्च (४. ३. १३३.)"—इत्यपि सूचित मेव। तथाच यथैव छन्दोगानां धर्म आम्नायो वा इत्यर्थे साधितं छान्दोग्य मिति, तथैव आथर्वणिकानां धर्म आम्नायो वा इत्यर्थे साधित मेव आथर्वण इति परम्। "चरणाद्धर्म्माम्नाययोः (४. ३. १२६.)"—इति वार्त्तिकञ्च पाणिनितात्पर्याख्यानपर मेव न तु वाचनिक मित्यपि तत्रैव भाष्ये स्फुटम्। तथाहि—

"न चेदानी मन्यदाथर्वणिकानां स्वं भवितु मर्हति, अन्यदतो धर्माद्वा आम्नायाद्वा"–इति। वस्तुतः सर्वत्रैव "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्"–इत्येव भाष्यसम्मतम्। तदित्थ मथर्ववेदाखिलत्वानं पाणिनेरासीन्नवेति विचारस्तु दूरे आस्ताम्; प्रत्युत अथर्ववेदीया शौनकसंहिता, अथर्ववेदीयकल्पसूत्रं चतुरध्यायात्मकं कौशिकं नाम, अथर्ववेदीया शिक्षा, अथर्ववेदीयानां पाठप्रकाराद्यात्मको धर्मश्चेति सर्वाण्येतानि आसन्नेव तस्य पाणिनेर्विदितानीति।

निरुक्तकारः खलु यास्कः पाणिनेः पूर्वतनः,–इति वादिनां निरुक्तेऽसकृदेवाथर्ववेदीयनिगमोद्धृतिदर्शनात् तस्य यास्कवद्धपूर्वदृष्टत्वनिर्णयेनैव पाणिनिविदितत्वं सुवच मेव। तदथर्ववेदस्य पाणिनिविदितत्वविचारस्त्वस्तु पेटिकाबद्धः; तन्मते हि तत्पूर्वजस्य यास्कस्यापि विदित एवासीत्स इत्युपपद्यते। तथाहि—"तथापि निगमो भवति—'य मह्निति मह्नितयः पिबन्ति'—इति। * * *। तथापि निगमो भवति—'यथा देवा अंशु माप्याययन्ति'–इति (२ भा० ५७ पृ०)"–इति। तावेतौ द्वावेव निगमौ अथर्ववेदत एव लब्धौ (अथ० सं० ७. ७. ८. ६.)। अन्यत्र च "एकं पादं नोत्खिदतीत्यपि निगमो भवति (४ भा० २८५ पृ०)"—इति। एषोऽपि निगमोऽथर्वसंहितात एव लब्धः; श्रूयते हि तत्रैवैकादशकाण्डीयद्वितीयानुवाकान्त्यसूक्ताद्या ऋक् "एकं पादं नोत्खिदति सलिलाद्धंस मुच्चरन्"– इत्यादि। किञ्चात्र निघण्टुस्थितस्यैकपादित्यस्यैष एव निगमोऽन्यत्र वैश्वदेव्याद्यृत्तु तु निपात एवेति निर्णयात् निघण्टुसमाम्नायश्रवणात् पुराप्यासीदथर्ववेद इति यास्कसम्मत मेवेत्युपलभ्यते; निघण्टोस्तु यास्कादिवद्धपूर्वश्रुतत्वं प्रतिपादित मेव पूर्वम् (को पृ०)। तस्मात् सर्ववेदसमकालिकत्व मेवाथर्ववेदस्येत्यत्र सन्देहलेशोऽप्ययुक्त एवेत्यस्माक मिति॥

वस्तुत एक एव वेदः, त्रिविधरचनात्मकस्त्रयीति प्रसिद्धोऽपि ऋक्संहिता, यजुःसंहिता सामसंहिता, अथर्वसंहितेति चतुःसंहिताभिस्तुःसङ्ख्यान्वितः। संहितालक्षणं तु प्रातिशाख्यादौ प्रसिद्धम्—"पदप्रकृतिः

16

संहिता (ऋ० प्रा० २. १.)"—इति, "वर्णाना मेकप्राणयोगः संहिता (य० वा० प्रा० १. १५८.)"—इति, "परः सन्निकर्षः संहिता (पा० १.४.१०६.)" —इति ; एवमादि। तत्र । ऋग्लक्षणानां (पद्यात्मकानां) मन्त्राणां चतुर्विधास्वपि संहितासु विद्यमानत्वेऽपि यत्र ग्रन्थेऽन्यलक्षण एकोऽपि मन्त्रो न दृश्यते, तस्यैव ऋक्संहितात्वम्। एवं तदतिरिक्तासु त्रिविधास्वपि संहितासु यजुर्लक्षणानां (गद्यात्मकानां) मन्त्राणां विद्यमानत्वेऽपि यत्र ग्रन्थे यजुषा मेवाधिक्यम्, ऋचा मपि यजुष्ट्वेनैव पाठो विनियोगश्च तस्यैव यजुःसंहितात्वम्; अतएवोक्तं मध्वर्युब्राह्मणभाष्य-भूमिकायां सायणाचार्येणापि— "तत्र यजुषा मध्वर्युवेदेऽतिबहुलत्वात् क्वचित् क्वचित् ऋचां सद्भावेऽपि यजुर्वेद इत्येवाख्यायते"—इति। साम-संहितायास्तु स्तोमानां गानानाञ्च मूलीभूतानां कासाञ्चिदृचाम्, स्तोभलक्षणानां कतिपयानां यजुषां चाश्रयत्वेऽपि सर्वेषा मेव साम्ना माधारभूमित्वं स्पष्ट मेव। तदेवं पद्यगद्यगीतिभेदात् त्रिविधा एव रचना भवन्ति; तादृग्रचनात्रैविध्यावलम्बनेनैतानि त्रीणि नामानि सम्पन्नानि। तत-श्चतुर्थसंहितायाः किं नाम भवितव्य मिति चिन्ताया मेवं विभागकारिणो नाम्नैवैतस्या नामकरण मुचित मिति सिद्धं नामाथर्वसंहितेति ॥

अथर्वा नामर्षिरेव हि यज्ञप्रक्रियायाः प्रथमप्रकाशकः; अतः स एव त्रैधादिकार्यसौकर्यायैव ऋगादिनाम्ना वेदविभाजकश्चेत्यपि सम्भाव्यते। तथा हि—"यज्ञैरथर्वा प्रथमः पथस्तते (ऋ० सं० १.६. ४. ५.)"—इति, "अग्नि-र्जातो अथर्वणा (ऋ० सं० ७. ७. ४. ५)"—इति, "त्वा मग्ने पुष्करादध्य-थर्वा निरमन्थत (ऋ० सं० ४० ५. २३. ३)"—इति, "अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितुरसुं युवानम्। य इमं यज्ञं मनसा चिकेत प्र णो वोचस्त मिहेह ब्रवः (अ० सं० ७.१. २.)"—इति चैवमादिमन्त्रलिङ्गात् प्रतीयत एवाथर्वणो यज्ञाविष्कर्तृत्वम्। "यदृचैव होत्रं क्रियते यजुषा-ध्वर्यवं साम्नोद्गीथं व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियते इति त्रय्या विद्ययेति ब्रूयात् (ऐ० ब्रा० ५. ५. ८.)"—इत्यादिश्रुतेश्च स्फुट मेव

प्रतीयते यज्ञकार्यनिर्वाहसौकर्यार्थ मेव च ऋगादिसंहिताविभाग इति। किञ्चानैव च "अथ केन ब्रह्मत्वं क्रियते ? त्रय्या विद्यया"—इत्यतः समग्रा एव त्रयी विद्या ब्रह्मत्वकरणे साधिकेति स्पष्टम्। न चाथर्वसंहिताध्ययन मन्तरा समग्रायास्त्रय्याः ज्ञानं भवितु मर्हति; हौत्राध्वर्यवौद्गात्रव्यवहार्यातिरिक्ताना मप्यृग्यजुर्मन्त्राणां तत्र सद्भावात्। अतएव "ऋचान्त्वः पोष मास्ते(ऋ० सं०)"–इति मन्त्रस्य निर्वचनावसरे यास्कोऽप्याह–"ब्रह्मा सर्वविद्यः सर्वं वेदितु मर्हति (२भा० ६६पृ०)"–इति। अथर्ववेदी एव ब्रह्मा भवति स एव च यज्ञं समन्तात् रक्षति। तथाहि—"ब्रह्मैव विद्वान् यद् भृग्वङ्गिरोवित् सम्यगधीयानश्चरितब्रह्मचर्योऽन्यूनातिरिक्ताङ्गोऽप्रमत्तो यज्ञं रक्षति, तस्य प्रमादाद् यदि वाप्यसान्निध्याद् यथा भिन्ना नौरगाधे महत्युदके सम्प्लवेत्"–इत्यादिः, "तस्माद् यजमानो भृग्वङ्गिरोविद मेव तत्र ब्रह्माणं वृणीयात्; स हि यज्ञं तारयतीति ब्राह्मणम्"–इत्यन्तो गोपथग्रन्थो द्रष्टव्यः (गो० ब्रा० २. २. ५.)। छन्दोगा अपि ब्रह्मणो भिषक्त्व मामनन्त्येव—"भेषजकृतो ह वा एष यज्ञो यत्रैवंविद् ब्रह्मा भवति (छा० ब्रा० ५. १७. ८.)"–इत्यादि। सामवेदभाष्यावतरणिकादौ सायणाचार्योऽप्यवोचत्–"त्रयाणा मपराधन्तु ब्रह्मा परिहरेत् सदा"–इति। युक्ततरश्चैतद् तदैव ब्रह्मर्त्विजि, यदा खलु तस्य चतुर्वेदवित्त्वेन समग्रत्रयीवेत्तृत्वं स्यात्; सर्ववेदवेत्तृत्वेनैव च तस्य विश्वव्यचा इति समुद्र इति चाख्यानं सङ्गच्छते। श्रूयते हि—"समुद्रोऽसि विश्वव्यचा (य० वा० सं० ५. ३३.)"–इति यजुर्मन्त्रः। स्फुटतरञ्चैतदाम्नातं दृश्यते गोपथपूर्वार्द्धे एव। तथाहि—"तस्मादृग्विद मेव होतारं वृणीष्व, यजुर्विद मध्वर्युम्, सामविद मुद्गातारम्, अथर्वाङ्गिरोविदं ब्रह्माणम्"–इति, "प्रजापतिर्यज्ञ मकरोत्; स ऋचैव हौत्र मकरोत्, यजुषाध्वर्यवम्, साम्नौद्गात्रम्, अथर्वाङ्गिरोभिः ब्रह्मत्वम् (गो० ब्रा०१.३.१.२.)"–इति च।

एवञ्च यज्ञीयहौत्रादिकार्यानुसारत एव चतस्रः संहिताः सम्पन्नाः; यत्र च यदीयं विधानादिकं श्रूयते, तदेव तस्य ब्राह्मण मिति च। तदुक्तं

सर्वानुक्रमणीवृत्तिभूमिकायाम् "विनियोक्तव्यरूपो यः स मन्त्र इति चच्यते। विधिस्तुतिकरं शेषं ब्राह्मणं कथयन्ति हि"—इति। एव मेकस्यैव वेदस्य चतुर्द्धा विभागः सम्पन्नस्तत्र कः संशयः। सामवेदीयोह्योह्यग्रन्थयोः प्रकरण-सन्निवेशदर्शनेन च यज्ञकार्यसौकर्यायैवैकस्य वेदस्य चतुर्भेदाः कृता इत्या-भाति स्फुट मेव ; तयोरुभयोरेव हि ग्रन्थयोः क्रमात् दशरात्र-संवत्सर-एकाह-अहीन-सत्र-प्रायश्चित्त-क्षुद्रेतिसप्तपर्वात्मकत्वम्। एव मेव अध्वर्यु-वेदसंहिताभाष्ये प्रथमानुवाकव्याख्यावतरणिकायां यदाह सायणाचार्यः— "अस्मिन् वेदे समाम्नाता दर्शपूर्णमासेष्टिमन्त्रास्त्रिविधाः, आध्वर्यवा याजमाना हौत्रकाश्चेति। * * *। एतेषां मध्ये याजमानानां हौत्राणाञ्च चित्रस्थानीयत्वात् भित्तिस्थानीयाना माध्वर्यवाणा मेवादौ पाठो युज्यते"—इत्यादि, तदपि सङ्गच्छते; यदि हि यज्ञकार्यानुक्रमेणैवे-तास्तत्त एव संहिता ग्रथिता न स्युस्तर्हि तस्य तथोक्तिरसङ्गतित्व मेवो-पगच्छेन्नामेति। वस्तुतस्तु यजुर्वेदीयमैत्रायणीयशाखायाः परिच्छेदविन्यासानां प्रत्यक्षसन्दर्शनेनैवास्तकुच्छेदेवैषसंशयस्तत् किं मत्र प्रमाणपारायणेनेति।

तथाच निष्पन्न मेतत्;—होतृव्यवहार्यमन्त्रास्तु सर्व एव ऋचः; तासा मृचां संहननेनोपनिबद्धो ग्रन्थ एव ऋक्संहितेति सम्पन्नः; तदर्थविनियोगाद्यभिधायकश्च ग्रन्थ ऋग्ब्राह्मण मिति। तावेव ग्रन्थावधुना ऋग्वेद इति प्रसिद्धौ। अध्वर्युव्यवहार्यमन्त्राः प्रायो यजूंषि, ऋचोऽपि सन्ति; तादृशयजुःसंहननेनोपनिबद्धो ग्रन्थ एव यजुःसंहितेति सम्पन्नः; तदर्थविनियोगाद्यभिधायकश्च ग्रन्थो यजुर्ब्राह्मण मिति। तावेव ग्रन्था-वधुना यजुर्वेद इति प्रसिद्धौ। उद्गातृव्यवहार्यमन्त्रास्तु ऋचो, यजूंषि, सामानि च; तादृशर्ग्यजुःसाम्नां संहननेनोपनिबद्धो ग्रन्थ एव साम-संहितेति सम्पन्नः; तदर्थविनियोगाद्यभिधायकश्च ग्रन्थः सामब्राह्मण मिति। तावेव ग्रन्थावधुना सामवेद इति प्रसिद्धौ। ये, खलु ऋग्वेद-मात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च ऋग्वेदमात्रम्, त एवा-ख्यायन्ते ऋग्वेदिन इति। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः

प्रयोजनीयाः, तेऽपि तदीयसंहिताया मन्त्रनिर्विष्टाः। ये खलु यजुर्वेदमात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च यजुर्वेदमात्रम्, त एवाख्यायन्ते यजुर्वेदिन इति; किञ्च यजुःसंहिताया ऋचा मपि सद्भावात् यजुर्वेदिना ऋग्बोधोऽपि सुतरां सम्पद्यते, अतस्ते "द्विवेदी"–इत्यप्युच्यन्ते; भाषायां 'दुबे'–इति च। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः प्रयोजनीयाः, तेऽपि तदीयसंहिताया मन्त्रनिर्विष्टाः। ये खलु सामवेदमात्रे कृतश्रमाः, अध्यापयन्ति व्यवहरन्ति च सामवेदमात्रम्, त एवाख्यायन्ते सामवेदिन इति; किञ्च सामसंहिताया ऋचां यजुषाञ्च विद्यमानत्वात् सामवेदिना ऋग्यजुषोर्बोधोऽपि सुतरां सम्पद्यते, अतस्ते "त्रिवेदी"–इत्यप्युच्यन्ते; भाषायां 'त्रिवाडी'–'तिवारी'—इति च। तेषां ब्रह्मयज्ञादिसिद्धये ये केचन मन्त्राः प्रयोजनीयाः, तेऽपि तदीयसंहितायां ब्राह्मणे चान्तर्निविष्टाः। एभ्योऽवशिष्टमन्त्राणां पेटिकाख्या संहत्यैव निबद्धा चतुर्थसंहिता सम्पन्ना। तत्र ऋचोऽपि सन्ति यजूंषि अपि। सैवाथर्वसंहितेति प्रसिद्धा। तदर्थविनियोगाद्यभिधायकश्च ग्रन्थोऽथर्वब्राह्मणमिति। तावेव ग्रन्थावधुना अथर्ववेद इति प्रसिद्धौ। अतो ब्रह्मत्वकार्ये कर्त्तव्ये सर्वासा मेवर्चां सर्वेषा मेव यजुषां सर्वेषाञ्चैव साम्नां बोधः प्रयोजनीयः; तादृशसर्वमन्त्रवेत्तृत्वञ्च ऋग्यजुःसामसंहिताध्ययनवता मपि अथर्वसंहिताध्ययन मन्तरा न सम्भवति, अतो यथा हौत्रे ऋग्वेदः, यथा च आध्वर्यवे यजुर्वेदः, यथैव औद्गात्रे सामवेदः; तथैव ब्रह्मत्वे ऽथर्ववेदः। किञ्च यथा ऋग्वेदस्य होतृवेद इत्यपरं नाम, यथा च यजुर्वेदस्य अध्वर्युवेद इत्यपरं नाम, यथैव सामवेदस्य उद्गातृवेद इत्यपरं नाम; तथैवाथर्ववेदस्य ब्रह्मवेद इत्यपरं नाम। अपि च ब्रह्मत्वकरणायैवाथर्ववेदाध्ययनं विशेषतः सप्रयोजनम्, तच्च ऋगाद्यध्ययनमृते न सम्भवति, अतो ऽथर्ववेदाध्ययनेच्छुना ऋग्वेदाद्यध्ययन मप्यवश्यं कर्त्तव्य मित्यतो ये त्वथर्ववेदिनस्त एव प्रायश्चतुर्वेदाध्यायिनो भवन्ति, ततः "चतुर्वेदी"–इत्याख्यायन्ते, भाषायां 'चौबे'–इति च।

तदेवं मूलत एकस्यैव वेदस्य रचनाभेदमूलकत्रयीत्वेऽपि होत्रादिकार्य-सौकर्यार्थं कृतं चतुष्ट्व मवश्य मेव सर्वैरादरणीयम्। अतएव दृश्यतेऽत्र निरुक्तेऽपि—"चत्वारि शृङ्गेति वेदा वा एत उक्ताः (४भा० ३४५पृ०)"-इति। सिद्ध मित्थं चत्वार एव वेदास्त्रयीशब्दवाच्या इति॥

(छन्दः) "छन्दः"-इत्यपि वेदस्यैवान्यतम मतिप्राचीनं नाम।

(१) छन्दःशब्देन पुरा खलु एषांप्रबन्धाना मेषां वाय्वादीनां सर्वेषा मेव बोधो भवति स्म। तत एवैव माथर्वणिका आमनन्ति—"त्रीणि च्छन्दांसि कवयो ०—० आपो वाता ओषधयः (१८.१.२.७.)"-इति। तत्र छन्दांसि बन्धनानीत्यर्थः। अत्राप्युपपद्यत एवैतन्निरुक्तम्—'छन्दांसि छादनात् (३भा० ३६७पृ०)'-इति; छादनं नाम बन्धन मेव; बन्धनान्येव हीमाः सर्वे विषयाः; तदुक्तं हि साङ्ख्यतत्त्वकौमुद्याम्—"विषयन्ति विषयिण मनुबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्, विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनाम् (५ श्लो० कौ०)"-इत्यादि।

(२) तत उत्तरं सर्वेषा मपि अक्षरसमाम्नायाना मर्थतस्तु सर्वेषां येन केनापि जीवेन कृतानां शब्दाना मकारादीनां छन्दः-शब्देन व्यपदेशो भवति स्म। तत एवैवं तैत्तिरीया आमनन्ति—"छन्दः पुरुष इति य मवोचाम, अक्षरसमाम्नाय एव; तस्यैतस्याकारो रसः (३.२.३.४.)"-इति। तत्राप्युपपद्यत एवैतन्निरुक्तम्—'छन्दांसि छादनात्'-इति; छादनान्येव हि शब्दा अकारादयोऽर्थानाम्।

(३) ततः पश्चात् ऋषीणां प्रबन्धेषु ऋगादि-त्रिविधेषु मन्त्रेष्वपि व्यवहृतं छन्द इति। तत एवैव मप्याथर्वणिका आमनन्त्युच्छिष्टसूक्ते—"अग्न्याधेय मथो दीक्षा कामप्रश्छन्दसा सह। उत्सन्ना यज्ञाः सत्राण्युच्छिष्टेऽधि समाहिताः (११.४.१.८.)"-इति; अन्यत्र च "दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद्रसेन। स मिन्द्रियेण पयसाह मग्ने छन्दोभिर्यज्ञैः सुकृतां कृतेन (६.१२.११.१.)"-इति। तत्राप्युपपद्यत एतदेव निरुक्तं 'छन्दांसि छादनात्'-इति; छादनान्येव हि ते मन्त्रा मनो-

भावादीनाम् । निरुक्तारम्भेऽपि यद् भाषितम्—"छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः (२ भा० ७ पृ०)"–इत्यादि, तत्रापि मन्त्रेभ्य इत्येव तस्यार्थः; तत्र हि निघण्टौ मन्त्रमात्रत एवोद्धृतानां पदानां दर्शनात्। अत एव तस्य वृत्तौ 'छन्दांसि = मन्त्राः'— इत्येवोक्तं दुर्गाचार्येणापि ।

श्रूयते चेदं तैत्तिरीयारण्यके—"यश्छन्दसा मृषभो विश्वरूपः ०—० भूर्भुवः सुवश्छन्द ओम् (१०. ६.)"–इति । " 'यः' प्रणवः 'छन्दसां' वेदानां मध्ये 'ऋषभः' श्रेष्ठः"–इत्यादि च तद्भाष्यं सायणीयम् । तथैव छान्दोग्यब्राह्मणेऽपि—"देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳस्ते छन्दोभिरच्छादयन्; यदेभिरच्छादयꣳस्तच्छन्दसां छन्दस्त्वम् (१. ४. २.)" –इति । शतपथेऽप्येव मेव—"यदेभिरात्मान माच्छादयत्, देवा मृत्यो-र्बिभ्यत, तच्छन्दसां छन्दस्त्वम् (४. ५. १. १.)"–इति ।

निघण्टुश्रुतस्य (१ भा० २०२ पृ०) कान्तिकर्मणोऽपि भवति छन्द इत्येके। तथाच सर्व एव वेदाः काम्यमानास्त्वास्माकं सर्वकामपूरकाः कमनीया वा । अर्चतिकर्मण एव (१ भा० ३३४ पृ०) भवति छन्द इति च केचित् । तथाच सर्वेषा मेव वेदमन्त्राणा मर्चायां गतिरिति छन्दस्त्वम्; अर्चनीया वा सर्ववेदा अस्माकं ततोऽपि छन्दो वेदस्त्रयीत्याद्यभिप्रायः । तदित्थं पुरा सर्वेषा मेव मन्त्राणां साधारणं नाम छन्द इत्यासीदिति तु सर्वसम्मत मेव । अतएव च निघण्टौ स्तोतृनामसु (१ भा० ३४३ पृ०) 'छन्दः'–इति । पाणिनीयसूत्रेषु, कात्यायनीयवार्त्तिकेषु, पतञ्जलेरिष्टिषु, अन्यत्रान्यत्र चैवमादिषु ग्रन्थेषु सर्ववेदपरं छन्दोवचनं सर्व्ववादिसम्मतं सुप्रसिद्धञ्चेत्यत एव सर्व एव वैदिकाश्छान्दसा इत्यभिधीयन्तेऽपीति ।

(४) अस्तीद्वापर मपि ज्ञेयम्;—"ऋचः सामानि छन्दांसि पुराणं यजुषा सह । उच्छिष्टाज्जज्ञिरे० (अ० सं० ११. ४. २. ४.)"–इत्याथर्वणे, "तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत (ऋ० सं० १०. ९.)"–इत्यृचि च "छन्दांसि"

—इति पदेन सामवेदीयच्छन्दोनामग्रन्थीयमन्त्राणा मेव ग्रहण मिष्यते छान्दसैरेकमत्येति । सामवेदीयानां हि संहिताग्रन्थो गानम् छन्द इति च द्विधा भिन्नः । गानं तत्र गेयारण्योह्योह्येति चतुर्विधम्; छन्दस्तु योनिरुत्तरेति द्विविध मेव, तयोर्द्वयोरार्चिक इति च व्यवहारोऽनतिप्राचीनो वैयाकरणतोषकरः । एवं हि यथैव 'तस्मात् सर्वहुतः यज्ञात्' 'ऋचः' ऋग्वेदीयाः, यजुर्वेदीयाः, अथर्ववेदीयाश्च; 'यजुः' यजूंषि छन्दोगीतिवर्जितामवाक्यानि यजुर्वेदीयानि सामवेदीयानि अथर्ववेदीयानि च; 'सामानि' सामवेदीयानि यजुर्वेदीयानि च 'यज्ञिरे', तथैव 'तस्मात्' तत एव यज्ञात् 'छन्दांसि' सामवेदीयगानमूलीभूताश्छन्दोनामकमन्त्राश्च जज्ञिरे इति तदर्थः । यदि च तेषु छन्दःसु अपि ऋग्लक्षणं विद्यत एवेति पुनश्छन्दोग्रहण मानर्थक्यं भजेतैव, परं तेषां प्राधान्यख्यापनाय ब्राह्मणवसिष्ठन्यायेन पृथग्ग्रहणाच्च न दोषावहम्; अन्यथा हि ऋग्वेदोद्धृता एव ते मन्त्रा इति तेषा मप्राधान्य मेव स्यादिति ।

एतेन ऋग्वेदत एव साममूलीभूतास्ता ऋचस्तत्र सङ्गृहीता इति च मतं दूरोत्सारित मेव । पुनर्विशदयिष्यामश्चैतदिहैवोपरिष्टान्मन्त्रनिरुक्तिप्रकरणे । वस्तुतो यज्ञार्थ मेव हौत्रम्, यज्ञार्थ मेवौद्गात्रम्; तत्र होतृकार्यनिर्वाहाय ये मन्त्राश्चिताः ते हि सर्व एव ऋक्संहितायां दृश्यन्ते; औद्गातृकार्यनिर्वाहाय ये च मन्त्राश्चिताः, ते सामरूपा ऋग्रूपाश्च; त एव च सामसंहितायां दृश्यन्ते । तत्र हि सामसङ्घातात्मग्रन्थानां सामेत्येव प्रसिद्धिश्चिरन्तनी, इदानीन्तु गान मित्यपि; ऋक्सङ्घात्मग्रन्थयोस्तु छन्दइत्येव प्रसिद्धिः पुरातनी, आर्चिक इति तु पाणिनीयाना मिति विशेषः । इत्यन्यच्च पश्यतु तावत्—ऋक्संहितातः सामवेदीयगुद्धरणे कोऽवसरः ? यदेव यथैव यतएव येनैव ऋक्संहिताया ऋचां सङ्ग्रहः सम्पन्नः, तदेव तथैव ततएव तेनैव सामसंहितायाश्छन्दसाञ्च सङ्ग्रहः; इत्येतत्ख्यापनायैव "छन्दांसि जज्ञिरे तस्मात्"—इति श्रुतः पृथगुपन्यास इति ।

(५) पुरैव गायत्र्यादीना मपि छन्दस्त्वं व्यवहृतं मन्त्रेष्वपि; तद्यथा— "छन्दांसि च दधतो अध्वरेषु (ऋ० सं० ८. १६. ५.)"– इत्यादि। तत्रापि छादन मेव बीजम्; भवति हि शब्दानां छादनं गायत्र्यादिभिः। किञ्च यथा खलु पद्यैर्भवति शब्दानां छादनम्, तथैव गद्यैर्गानैरपीति सर्वविधरचनाना मेव छन्दस्त्वं चिरात्प्रतिष्ठितम्; काव्यभेदाल्लौकिक-व्यवहारो विभिन्न इत्यन्यदेतत्। अत एव "छन्दांसि=छादनात्"–इति व्याख्यानावसरेऽप्युक्तं दुर्गाचार्येण—"ते (मन्त्राः) छन्दोमयाः; नाच्छन्दसि वागुच्चरति"–इत्यादि। अतएव च गद्यात्मकस्य यजुर्मन्त्रस्यापि छन्दो-निर्णयं कुर्वन्ति वैदिकाः, याजुषीति गायत्र्यादिभेदोऽपि वर्णितः पिङ्गलेन (३. ३–८ सू०)। तदित्थं निश्छन्दो यजुरिति त्वापेक्षिक मेव; कात्यायनेन यजुर्वेदीयमन्त्राणां सर्वेषा मेव छन्दोज्ञानस्य विधानात् (अनु० १. १.)। माध्यन्दिनीभाष्यकारेण महीधरेणाप्युक्तम्—'तत्र यजुर्वेदमन्त्रेषु कानिचिद् यजूंषि काश्चन ऋचः; तत्र ऋचां नियताक्षरपादावसानाना मावश्यकं छन्दः कात्यायनेनोक्तम्, यजुषां षडुत्तरशताक्षरावसानाना मेकाक्षरादीनां पिङ्गलेन दैव्येक मित्यादिनोक्तं छन्दो बोद्धव्यम्'–इति।

(६) यतः प्रभृति 'मन्त्रब्राह्मणयोर्वेदनामधेयम्'–इत्यभूत् सुदृढ़म्, ततः प्रभृत्येव ब्राह्मणग्रन्थाना मपि छन्दःशब्देन च ग्रहणीयता सुतरां सम्पन्ना; एव मपि मन्त्रभागाना मेव मुख्यं छन्दस्त्व मिति तु न ततोऽपि विलय मुपगतम्। अतएव यास्को मन्त्रार्थे एव छन्दःशब्दं प्रायुङ्क्त (२भा० ७पृ०) मन्त्रब्राह्मणयोरुभयोरेवाविशेषेण छन्दःशब्दव्यवहारं कृतवता भगवता पाणिनिनापि क्वचित् प्रायोजि मन्त्रेष्वेव च छन्द इति। तथाहि—"छन्दो-ब्राह्मणानि च तद्विषयाणि (४. २. ६६.)"–इत्येवमादीनि समालोच्यानि; न हि तत्र छन्दःशब्दस्योभयपरत्वे ब्राह्मणानां पृथक् ग्रहण मुपपद्यते।

(७) ततो वेदाङ्गाना मपि वेदत्वातिदेशात् छन्दस्त्व मप्यनिवार्य मेव। तदुक्तं भगवता पतञ्जलिना "छन्दोवत् सूत्राणि भवन्ति (१ अ० ४ पा० २ आ०)"–इति, परं तत्रापि ये केचित् शौनकीयशिक्षादयः, तेषां

वेदाङ्गत्व मस्तु नास्तु वा छन्दस्त्वं तु नास्त्येव। तथा च दर्शितं ग्रन्थदारम्भे "शौनकादिभ्यश्छन्दसि (४. ३. १०६)"–इति सूत्रीयशेखरे 'छन्दसि किम्? शौनकीया शिक्षा'–इति। अपि वा तत्र सूत्रे मुख्यछन्दस्त्व मेवापेक्षितम्, न च तद्वेदाङ्गाना मित्येव तथोक्तं नागेशेनेति। प्रातिशाख्यादावपि व्यवहृत एव छन्दःशब्दः पतञ्जलिना—"छन्दःशास्त्रेषु (१ अ० २ पा० १ आ०)"–इति; प्रातिशाख्यादिष्वेव तदर्थो गम्यते; अपि वा छन्दसां शास्त्रेषु इत्येव तदर्थः॥

(८) नागेशादिभिस्तु भिक्षुसूत्रनटसूत्रयोरपि छन्दस्त्वं स्वीकृतम्। तथाहि—"तित्तिरि०। इत आरभ्य वक्ष्यमाणाः प्रत्ययास्तेनैकदिगित्येतत्पर्यन्तं छन्दसि वाच्ये इष्यन्ते। शौनकादिभ्यश्छन्दसीत्यतश्छन्दोग्रहणस्य पूर्वं मपकर्षादुत्तरत्रानुवृत्तेश्च"–इति लघुशब्देन्दुशेखरे द्रष्टव्यम्। तित्तिर्यादिषु तेनैकदिगिति सूत्रतः पूर्वेषां (४. ३. १०२—१११.) दशानां सूत्राणां नवमे एव "भिक्षुनटसूत्रयोः" ग्रहणं दृश्यते। तदेवं क्रमादिदानी मार्षतिप्रसिद्धग्रन्थमात्रस्यैव छन्दस्त्व मुररीकुर्वन्ति विपश्चित इत्यलं छन्दोविचारेणेति॥

(स्वाध्यायः) स्वाध्याय इति च तस्यैव वेदस्य नामान्तरम्। "स्वाध्यायोऽध्येतव्यः (तै० आ० २. १५. ७.)"–इत्यादिश्रुतिषु "यः स्वाध्याय मधीतेऽब्दम् (२. १०७.)"– इत्यादिस्मृतिषु च तथैव व्यवहारात्। द्विजातिभिः सम्यगध्येय एष इत्येवासौ स्वाध्याय इति कथ्यते। अतएवाह भगवान् मनुः—"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्व माशु गच्छति सान्वयः (२. १६८)"–इतीति॥

(आगमः) आगम इति च वेदस्यैव नामान्तरम्। "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"–इति पाणिनीयवार्त्तिककार–कात्यायनाद्युक्तेः; "आगमः,—खल्वपि ब्राह्मणेन षड़ङ्गो वेदोऽध्येयो ज्ञेयश्च"–इति च तत्र पातञ्जलम्। भट्टकुमारिलेनाप्युक्तं श्लोकवार्त्तिकभूमिकाया मेव—"आगमप्रवणश्चाहं नापवाद्यः स्खलन्नपि"–इति। साङ्ख्यकारिकाया मीश्वर-

क्षणेनापि यदुक्तम् "तस्मादपि चासिद्धं परोक्ष माप्तागमात् सिद्धम्"— इति तदप्येतदभिप्रायेणैवेति ॥

(निगमः) निगम इति च आगम इति चानर्थान्तरम्। यास्कीयेऽत्र निरुक्ते यावन्ति खलूदाहरणानि दर्शितानि, प्रायस्तावतां सर्वेषा मेव निगम इत्युपन्यासो दृश्यते। तथाहि—"तत्र खलु इत्येतस्य निगमा भवन्ति—" —इत्यादि (२ भा० २८४ पृ०)। "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते, दमूनाः क्षेत्रसाधा इति ; अथापि नैगमेभ्यो भाषिकाः उष्णं घृत मिति (२ भा० १५६ पृ०)"—इति चाह स एव यास्कः। "निगमाः ०—०निगमनात् (२ भा० ७ पृ०)"—इति च नैरुक्त मिति ॥

अत्र चेदं तत्त्वम्—आदौ नु निगम इति मन्त्रभागस्यैवाभिधान मासीन्न ब्राह्मणभागस्यापि; निरुक्तग्रन्थे सर्वत्रैव मन्त्राणां मन्त्रांशानाञ्चैव निगमत्वेनोपन्यासात्, तत्प्रदर्शितयोः 'दमूनाः', 'क्षेत्रसाधाः'—इत्यनयोः पदयोः मन्त्रभागे एव दृश्यत्वाच्च। मन्त्रभागत उद्धृताना मेव पदानाम्, तदाश्रयग्रन्थानां चास्ति निगम इति व्यवहारः। तथाहि मनुसंहितायाम्— "निगमांश्च वैदिकान् (४. १९.)"—इति। अत्र चोक्त मिदं कुल्लूकेन— "तथा पर्यायकथनेन वेदार्थावबोधकान् निगमाख्यांश्च ग्रन्थान्"—इति। तत उत्तरं कालाद् ब्राह्मणेष्वप्युपसङ्क्रान्तं निगमाभिधानम् ; तत एव भागवतादौ निगमपदेन मन्त्रब्राह्मणोभयात्मकस्य वेदस्यैव बोधो भवति। तथाहि —"निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्। पिवत भागवतं रस मालयं मुहुरहो रसिका भुवि भावुकाः (भा० पु० १. १. ३.)"— इति। "निगमो वेदः, स एव कल्पतरुः, सर्वपुरुषार्थोपायत्वात् ; तस्य फल मिदं भागवतं नाम"—इति तत्र श्रीधरस्वामी। "निगमकल्पतरोः सर्वफलोत्पत्तिभुवः शाखोपशाखाभिर्वैकुण्ठ मप्यध्यारूढस्य वेदकल्पतरोः"— इति च तत्र क्रमसन्दर्भः। "निगमो वेदः स एव कल्पतरुः"—इत्यादि च तत्रैव विश्वनाथः।

वस्तुतो मन्त्रभागस्यैव निगमत्वं चिरादेव व्यवहृतम्। ब्राह्मणभागस्य

तथा व्यवहारस्त्वतिप्राचीन एव। निगमव्याख्यानादिपरा ग्रन्था एव ब्राह्मणाख्या ऐतरेयादिनामभिः प्रसिद्धा भाष्याणीत्येवाख्यातुं युज्यन्ते। यदा ह्यतीते बहुतिथे काले मन्त्रार्थोऽतीव दुर्बोधः सम्पन्नः, तदैव यज्ञकाले यज्ञानुष्ठानतत्परैः तदानीन्तनैर्ब्राह्मणैः तेषां मन्त्राणां विधानादिव्यवस्थया च सह मन्त्रान्तर्गतदुर्बोधपदाना मर्था अपि भाषिताः; अतो ब्राह्मणान्येवादिवेदभाष्याणि। भाषाभाष्य मितीमावेकधातुमूलकावेव शब्दौ; तेन चैषु ग्रन्थेषु यतस्तत्कालप्रचलितया भाषयैव बोधिता वेदार्था अत एवैषां भाष्यत्वम्।

तथाहि श्रूयतेऽसौ ऋङ्मन्त्रः—"यज्ञेन यज्ञ मयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः (ऋ० स० २.३.२३.४; ८.४.१९.६.)"—इति। तद्व्याख्यानपरश्चैतदैतरेयकं ब्राह्मणम्—"यज्ञेन यज्ञ मयजन्त देवा इत्युत्तमया परिदधाति। * * *। छन्दांसि वै साध्या देवाः, तेऽग्रेऽग्निनाग्नि मयजन्त। 'ते स्वर्गं लोक मायन्' आदित्याश्चैवेहासन्नङ्गिरसश्च (ऐ० ब्रा० १.३.५.)"—इत्यादि। एतदेव व्याख्यानं निरुक्तादौ विशदीकृतं च दृश्यते (४ भा० ३२०—३५२ पृ०)।

तथैव योऽयं शुक्लकृष्णयोरुभयोरेव यजुषोरारम्भमन्त्रः—"इषे त्वोर्जे त्वा वायवं स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे (१.१.१.)"—इति। तस्यैतस्य च दुर्गमपदव्याख्यानानि कृतानि दृश्यन्ते शुक्लकृष्णयोरुभयोरेव ब्राह्मणयोः। तथाहि शतपथब्राह्मणे—"वृष्टौ तदाह यदाह इषे त्वेति"—इति, "यो वृष्टादूर्ग् रसो जायते, तस्मै तदाह"—इति, 'यज्ञो वै श्रेष्ठतमं कर्म"—इति च (१.७.१.१–५.)। तैत्तिरीये "तृतीयस्या मितो दिवि सोम आसीत्"—इत्यारभ्य "श्रेष्ठतमाय कर्मण इत्याह यज्ञो हि श्रेष्ठतमं कर्म तस्मादेव माह"—इति यावत् (तै० ब्रा० ३.२.१.१–४.) द्रष्टव्यो ग्रन्थसन्दर्भः।

तथा श्रूयन्ते सामवेदे सर्वसामस्वेव ये स्तोभाः, ते खलु व्याख्याता

दृश्यन्त एव तद्ब्राह्मणे—"अयं वावलोको हाउकारो वायुर्हायिकार-श्चन्द्रमा अथकारः। आत्मेहकारोऽग्निरीकारः। आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोइकारः प्रजापतिर्हिङ्कारः प्राणः स्वरोऽन्नं या वाग् विराट्। अनिरुक्तस्त्रयोदश स्तोभः सञ्चरो हुङ्कारः (छा० ब्रा० १.१३.१—३.)"—इति।

वचनेपायितस्वाय मर्थो मीमांसादर्शने। तथाह्यस्ति तत्र मन्त्रलिङ्गाधि-करणे सूत्रम्—"विधिशब्दाच्च (१.२.५३.)"—इति। विधिशब्दाश्च विव-क्षितार्थानेव मन्त्राननुवदन्ति,—'शतं हिमाः शतं वर्षाणि जीव्यास्मे-त्येतदेवाह'—इति"—इति तद्भाष्यं शबरस्वामिकृतम्। "मन्त्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्द इत्युच्यते"—इति च तत्राह सायणाचार्योऽपि। तत्रैवोदाहृत्य व्याख्यातश्च तेनापि तथैव ब्राह्मणम्। तथाहि—"स चैव माम्नायते—'शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाह'—इति। तत्र 'शतं हिमाः (ऋ०स० १.५.८.४ इ०)'—इत्येतद् व्याख्येयमन्त्रस्य प्रतीकम्; अवशिष्टं तु तस्य तात्पर्यव्याख्यानम्"—इत्यादि। तद्भाष्येऽप्युक्तम्—'अत्र हिमशब्देन तद्युक्ता हेमन्तर्त्तवोऽभिधीयन्ते; तथाच ब्राह्मणम्'—इत्यादि।

भगवता कात्यायनेनापि यजुःप्रातिशाख्ये निगमापरपर्य्यायस्य मन्त्र-भागस्यैव वेदत्वं तद्व्याख्यापरस्य ब्राह्मणभागस्य भाष्यत्व मिति मन्त्रब्राह्म-णयोः पार्थक्यं स्फुटं सूचितम्। तथाहि—"ॐकारं वेदेषु (१.१८)। अथकारं भाष्येषु (१.१९)"—इति। यदि च तत्र तद्भाष्यकारः खलु उव्वटो वेदशब्देन मन्त्रब्राह्मणयोरुभयोरेव ग्रहणं स्वीचकार, भाष्यशब्देन च कल्पाद्यङ्गानाम्; परं तत्रैवानुपद मेव "सप्त। त्रीन्। द्वौ। एकम्"—इति स्वरविधायकेषु सूत्रेषु (१.१२७—१३०) सामस्वर-नैगमस्वर-भाषिकस्वर-यज्ञकर्म्मस्वराणां विधानस्य पर्य्यालोचनयेहश्रुतभाष्यशब्देन ब्राह्मणाना मेव बोधने कात्यायनाभिप्रायोऽनुभूयते; "अथ ब्राह्मण-स्वरसंस्कारनियमः"— इत्यारभ्य "तान एवाङ्गोपाङ्गानाम्"— इत्यन्तेन परिशिष्टग्रन्थेन भाषिकादिस्वराणां सुष्ठु परिचायितत्वात्। ब्राह्मण-

ग्रन्थानां हि भाष्यत्वेनैव तदीयस्वराणां भाषिकत्वसिद्धिः । ब्राह्मणस्वर एव भाषिकस्वर इत्युच्यते इति तु सर्वसम्मतम् । अतएवोक्तम् "एकम्"–इति सूत्रस्योव्वटभाष्यस्य टीप्पन्याम्—"मन्त्रकाण्डपठितानामपि ब्राह्मणभागाना मश्वस्तूपर इत्यादीनां त्रैस्वर्यम् (निगमस्वरत्वम्) एव; ब्राह्मणकाण्डपठितानां विश्वेदेवाः शृणोतन मपर्थेद्दित्यादीनां भाषिकस्वर एवेति" –इति ।

तथा तैत्तिरीयसंहिताभाष्यभूमिकाया मपि स्पष्ट मेवाभिचख्यौ सायणाचार्यो ब्राह्मणानां मन्त्रव्याख्याग्रन्थत्वम्—"यद्यपि मन्त्रब्राह्मणात्मको वेदः, तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वात् मन्त्रा एवादौ समाम्नाताः" –इति ।

तदित्थं सिद्ध मेव सर्वेषां किल मन्त्रग्रन्थाना मसाधारणं नाम मन्त्र इति निगम इति च ; एवं सर्वेषा मेव ब्राह्मणग्रन्थाना मसाधारणं नाम ब्राह्मणं भाष्य मिति च ; तथा मन्त्रग्रन्थेषु श्रुतानां पदानां वाक्यानां स्वराणाञ्च नैगमत्वम् ; ब्राह्मणग्रन्थश्रुतानां पदानां वाक्यानां स्वराणाञ्च भाषिकत्व मिति । अत एव "प्रोत्तणन्तु हिरण्वता पाणिना दर्भपिञ्जूलवता वेति भाषिकम् (६. २.)"–इत्युक्तं सङ्गच्छते साङ्ख्यायनगृह्यकारस्येति ।

"अथापि भाषिकेभ्यो धातुभ्यो नैगमाः * * * ; अथापि नैगमेभ्यो भाषिकाः (२ भा० १५६ पृ०)"–इत्यादौ निरुक्ते श्रुतं भाषिकपदं यदि भाषाशब्दमूलक मेव, तथापि न क्षतिः ; भाषाभाष्ययोरेकधातुजत्वात् । किञ्च भाषयोपनिवद्ध मेव भाष्यं भवति ; मूलार्थबोधने एव हि सर्वभाष्यस्य तात्पर्यम् ; न च चलितभाषया कथन मन्तरा मूलस्य स्पष्टतया बोधः सञ्जायते । तदेवं वेदस्य दुर्बोधत्वपरिहाराय यदा ब्राह्मणग्रन्था विरचिताः, तदा तादृश्या एव भाषाया व्यवहार आसीत् यादृश्या रचितानि वेदभाष्यरूपाणि ब्राह्मणानि । एवञ्च तदानीं ब्राह्मणग्रन्थीयानां वाक्यादीनां यथासीद् भाषिकत्वम्, तथैवाद्यतनीयाना मस्मद्वाक्यादीना मपीति सम मेवेति तन्नैवक्तञ्च न विरुध्यते । वस्तुतस्तु पुराकल्पे ब्राह्मणग्रन्थरचना-

काले मन्त्राणा मेव वैदिकत्वेन ग्रहण मासीद्योग्यम्; ब्राह्मणानान्त्ववश्यं लौकिकत्वेनैव; पर मिदानीन्तु मन्त्रब्राह्मणयोरुभयोरेव वैदिकत्वेनाभ्यर्चनं समानम्; लौकिकाणा मपि वचनानां वैदिकवत्त्वम्; ततः परस्याणा मेव लौकिकत्व मिति। शास्त्रकृतां व्यवहार एवात्र निदानम्; तत्रापि कालस्यैव प्राधान्य मित्यभ्युपगन्तव्य मत एव आ सूत्रकालात् सिद्ध मविशेषेण "मन्त्रब्राह्मणयोर्वेदनामधेयम्"—इति॥

(मन्त्रः) तत्र, तयोर्मन्त्रब्राह्मणयोरादौ तावत् मन्त्रस्य लक्षण मनुसन्धेयम्, — किन्नाम मन्त्रत्वम् ? इति; लक्षणस्योपयोगो हि पूर्वाचार्यैः प्रदर्शित एव—"ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्शः। लक्षणेन तु सिद्धाना मन्तं यान्ति विपश्चितः"–इति। ततोऽनुसन्धीयमानञ्च दृश्यते—उक्तं खलु भगवता यास्केनैव "मन्त्राः मननात् (३ भा० ३६७ पृ०)" –इति मन्त्रनिर्वचनम्; तत एव सिद्धञ्च मन्त्रलक्षणम्—'मननहेतुर्मन्त्रः' इति। तथाच तत्र वृत्तिः—"तेभ्यः (मन्त्रेभ्यः) हि अध्यात्माधिदैवाधियज्ञादिमन्तारो मन्यन्ते तदेषां मन्त्रत्वम्"–इति।

दूषितञ्चैतत् सायणेन ऋग्भाष्यभूमिकायाम्—'मननहेतुर्मन्त्र इत्युक्ते ब्राह्मणेऽतिव्याप्तिः'–इत्युक्त्वा; परं न च तत्रोदाहृतं तादृशं ब्राह्मणवाक्य मेक मपि। तथाचावगम्यते— "तच्चोदकेषु मन्त्राख्या (जै० सू० २. १. ३२.)"–इतिसूत्रानुगतम् "अभियुक्तानां मन्त्रोऽय मिति समाख्यानं लक्षणम्"–इति विवक्षया,—'विहितार्थाभिधायको मन्त्रः'–इत्यस्य पूर्वाचार्यविहितस्य, असिपदान्तादीनां पञ्चदशानां च मीमांसावृत्तिकृदुदाहृतानां, मन्त्रलक्षणानां मीमांसाभाष्यकारकृतखण्डनेभ्यः लोदाहरणेभ्यः कतिचिदुद्धृत्य दिदर्शयिषया चोदिमचित्तस्त्वैवैकाग्रमना यास्कोक्ते विचारावसरं नालभत स इति। प्रतिपादित मस्माभिर्मीमांसाकारस्य खलु जैमिनेः यास्काग्रजत्वम् (चू० पृ०); तथाच आगरितेऽपि हि तादृशे लक्षणे यदुक्तं यास्केन "मननान्मन्त्रः"–इति, ततः सम्भाव्य मेवैतल्लक्षणा मदुष्ट मिति। अपि च सायणतः प्राचीनेन, उद्धृतासिनापि हि प्रवर-

स्वामिना तत्सूत्रस्य भाष्ये विहितार्थाभिधायकत्वादीनि मन्त्रलक्षणानि खण्ड-खण्डीकृतानि; परं न तस्मिन्निहवेऽस्य याक्षीयलक्षणस्यावतरणा मपीष्टं तेन; इतश्च ज्ञायते नैतल्लक्षणं दुष्ट मिति। "अविशिष्टस्तु वाक्यार्थः (जै० सू० १. २. ४०.) इति सूत्रस्य, "विधिशब्दाच्च (जै० सू० १. २. ५३.)"—इति सूत्रस्य च व्याख्यानावसरे, मन्त्राणां मननसाधनत्वं स च स्वयं व्यनक्ति—"तु-शब्देन मन्त्राणा मदृष्टार्थं मुच्चारणमात्रं वारयति •—• तस्मान्मन्त्रोच्चारणस्य अर्थप्रकाशनरूपं दृष्ट मेव प्रयोजनम्"—इति, "तस्माद्विवक्षितार्था मन्त्राः प्रयोगकाले स्वार्थप्रकाशनायैवोच्चारयितव्याः"—इति च। मन्त्राणां मननहेतुत्वलक्षणा मनुलक्ष्यैवोक्तिरेषा भगवतो यास्कस्य—"यत्काम ऋषिर्यस्यां देवताया मार्थपत्य मिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति (३ भा० २८५ पृ०)"—इति। तदेवं 'मननहेतुर्मन्त्रः'—इति, 'मन्त्रोऽय मित्यभियुक्तोपदिष्टो मन्त्रः'—इति च द्वे एव मन्त्रलक्षणे निर्दिष्टे इति गम्यते; तद् यस्मै यद्रोचेत, तदेव स गृह्णात्वित्यल मिह गौरवविवादेनेति।

अथवाचैतत् सुष्ठु समाधानम्—जैमिनिकृतं मन्त्रलक्षणं ग्रन्थपरम्, यास्ककृतलक्षणं तु वाक्यपर मिति। तथाच जैमिनिनये वैदिकसमाख्यासिद्धानां मन्त्रेतिप्रसिद्धानां संहिताग्रन्थाना मेव मन्त्रग्रन्थत्वम्; न त्वन्येषां ताण्ड्यादीनाम्; यास्कमते तु ग्रन्थानां तथा लक्षणेऽपि न क्षतिः; परं ताण्ड्यब्राह्मणाद्याध्यायगतानां 'मह्यन्मे वोचः'—इत्यादीनाम्, छान्दोग्यब्राह्मणाद्याध्यायद्वयगतानाञ्च 'देव सवितः प्रसुव'—इत्यादीनाम्, तथा तैत्तिरीयारण्यकादिपठितानाञ्चोद्धृतासीत्यादीनां वाक्यानां मन्त्रत्वसिद्धये खल्विद मवश्यं वक्तव्यम्—'मननहेतुर्मन्त्रः'—इति। तदेव मुभयलक्षणयोर्विषयभेदात् नैवास्ति विवादविषय इत्यस्माक मिति॥

"आनन्दपुरवास्तव्य-वज्रटाख्यस्य सूनुना। मन्त्रभाष्य मिदं क्लृप्तं भोजे पृथ्वीं प्रशासति"—इत्युक्त्या स्वपरिचय मुक्तवताखिलमन्त्रभाष्यं कृतवता उव्वटेन तत्रैव भूमिकायां प्रदर्शिताश्चैते मन्त्रभेदाः;—

"न्यायविदः पठन्ति—

'विध्यर्थवादयाच्ञाशीःस्तुतिप्रैषप्रवह्लिकाः ।
प्रश्नो व्याकरणं तर्कः पूर्ववृत्तानुकीर्त्तनम् ।
अवधारणं चोपनिषत् वाक्यार्थास्तु त्रयोदश ।
मन्त्रेषु ये प्रदृश्यन्ते व्याख्याहश्रुतिचोदिताः ।'–इति ।

अथ तेषा मुदाहरणानि । तत्र,—

परमेष्ठ्यभिहितः–"अश्वस्तूपरो गो मृगस्ते (य० वा० स० २४.१.)"–इति ।
अर्थवादः—"देवा यज्ञ मतन्वत (य०वा०स० १६. १२.)"–इत्यनुवाकः ।
याच्ञा—"तनूपा अग्नेऽसि तन्वं मे पाहि (य०वा०स० ३. १७.)"–इति ।
आशीः—"आवो देवास ईमहे (य० वा० स० ४. ५.)"–इति ।
स्तुतिः—"अग्निर्मूर्द्धादिवः ककुत् (य० वा० स० ३. १२)"–इति ।
प्रैषः–"होता यक्षत् समिधाग्निम् (य० वा० स० २१. २६.)"–इति ।
प्रवह्लिका—"इन्द्राग्नी अपादियम् (य० वा० स० ३३. ६३.)"–इति ।
प्रश्नः—"कः स्विदेकाकी चरति (य० वा० स० २३. ६. इ०)"–इति ।
व्याकरणम्—"सूर्य एकाकी चरति (य० वा० स० २३. १०. इ०)"–इति ।
तर्कः—"मा गृधः कस्य स्विद्धनम् (य० वा० स० ४०. १.)"–इति ।
पूर्ववृत्तानुकीर्त्तनम्—"ओषधयः समवदन्त (य०वा०स० १२.९६.)"–इति ।
अवधारणम्—"तमेव विदित्वातिमृत्युमेति (श्वे० उ० ६. १५.)"–इति ।
उपनिषत्—"ईशा वास्य मिदं सर्वम् (य० वा० स० ४०. १.)"–इति ।"

शवरभाष्येऽपि आशीरादयस्त्रयोदशैव मन्त्रभेदाः प्रदर्शिताः, परं तत्त्व-न्यथैव ; द्रष्टव्यास्च ते तत्रैव (जै० सू० २. १. ३२. भा०) । ऋग्भाष्यभूमिकायाञ्च सायणेन तत एव कति चिदुद्धृत्य प्रदर्शिताः ।

उव्वटेन ह्येतानि सर्वाण्येव यजुरेवाधिकृत्योदाहृतानि ; निरुक्तकारेण भगवता यास्केन त्वेव ऋग्वेदेऽपि दर्शितानि बहून्युदाहरणानि । तथाहि—"तास्त्रिविधा ऋच ;—परोक्षकृताः प्रत्यक्षकृताः, आध्यात्मिक्यश्च"–इत्युपक्रम्य, "परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा अल्पश आध्यात्मिक्यः"–

इत्युक्त्वा, "अथापि स्तुतिरेव भवति नाशीर्वादः * * *; अथाप्याशीरेव न स्तुतिः; तदेतद्बहुलम् आध्वर्यवे याज्ञेषु च मन्त्रेषु"–इति प्रदर्श्य, उदाहृतानीमानि—"अथापि शपथाभिशापौ ०—०; अथापि कस्यचिद् भावस्याचिख्यासा ०—०; अथापि परिदेवना कस्माच्चिद् भावात् ०—०; एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति"–इति, "अक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा च (१ भा० २९६ पृ०)"–इत्येवमादीनि ॥

स चैष एव मन्त्रभागः संहितेत्युच्यते। तल्लक्षणं चोक्तं पुरस्तात् समासतः (ठ पृ०)। सा चादौ द्विविधा;—निर्भुजसंहिता, प्रतृण्णसंहिता चेति। "अग्निमीळेपुरोहितम् (ऋ० सं० १.१.१.१.)"–इत्यादयः पाठा एव निर्भुजसंहिताया उदाहरणानि। यैव निर्भुजसंहिता, सैव आर्षी संहितेत्यप्युच्यते। प्रतृण्णसंहितापि द्विविधा;—पदसंहिता, क्रमसंहिता चेति नाम। तत्र, "अग्निम्, ईडे, पुरःऽहितम्"–इत्येवं पठ्यते पदसंहिता; "अग्निम्, ईडे; ईडे, पुरोहितम्; पुरोहित मिति पुरःऽहितम्"–इत्येवं क्रमसंहितेत्युच्यते। इमा मेव क्रमसंहिता मवलम्ब्य जटाद्या अष्टविधाश्च विकृतयः पठ्यन्ते। तदुक्तं विकृतवल्ल्याम्—"जटा, माला, शिखा, लेखा, ध्वजो, दण्डो, रथो घनः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः (१. ५.)"–इति। तासो जटादीना मपि क्रमात्मकत्वेन प्रतृण्णसंहितात्व मेव। तदेव मेकैकमन्त्रस्य एकादशप्रकाराः संहितापाठा भवन्ति। तत्त्वतस्तु पाठप्रकारभेदात् बहुशश्चापि सार्षीसंहिता प्रतिवेद मेकैकैवेति ॥

तासाञ्च सर्वासा मेव संहितानां बहुप्राचीनत्वात् कालभेददेशभेदव्यक्तिभेदादिभिरध्ययनाध्यापनयोरुच्चारणादिभेदाः पाठभेदाश्च सम्पन्नाः, पाठन्यूनातिरिक्तता च किञ्चित् सञ्जाता, आचार्याणां प्रकृतिवैषम्यात् स्वस्वदेशकालाद्यनुरोधाच्च अनुष्ठेयभेदाः प्रयोगभेदाश्च सम्पन्नाः; अत एवैकैकापि सा बहुशाखत्व मापन्ना। तदेवोदाहृतञ्च प्राचीनभाषितं चरणव्यूहटीकायां षड्गुरुशिष्येण—"एकविंशत्यध्वयुक्तं ऋग्वेदं ऋषयो विदुः। सहस्राध्वा सामवेदो यजुरेकशताध्वकम्। नवाध्वाथर्वणोऽन्ये तु प्राहुः पञ्च-

दशाध्वकम्"–इति । "अध्वा, देवता, गतिः, शाखा इति पर्यायवाचकाः" –इति च तचोक्तं तेनैव । अत्र च कासाञ्चित् शाखात्वम्, कासाञ्चिदनुशाखात्वं निर्णीतं चरणव्यूहकारादिभिस्तत्तत्रतत्रैव द्रष्टव्यम् ।

इत्थं बहुशाखत्वेऽप्येकैकस्य वेदस्य, कस्या अप्येकस्याः शाखाया अध्ययनेनैव भवेदेवाधीत एकैको वेदः ; सर्वास्वेव शाखासु संहितायाः प्रायोऽभेदात् । किञ्चित्पाठन्यूनातिरिक्तेन, किञ्चिदुच्चारणभेदेन किञ्चिदनुष्ठानपद्धतिपार्थक्येन च न ह्येव भवेत् संहितायाः स्वरूपतो विभिन्नत्वम् ; नागर्त्त्येव ह्येष न्यायः 'एकदेशविकृत मनन्यवत् (पा० सू० १. १. ७२. भा०)'–इति, भवत्येव हि छिन्नपुच्छे शुनि श्वत्वव्यवहारो लोके । अत एव सायणाचार्यादिभिरेकैका मेव शाखा मवलम्ब्य कृतैर्भाष्यैरेवावाप्ता तत्र कृतकृत्यतेति । अत एव च "वेदः कृत्स्नोऽधिगन्तव्यः(२. १६५.)"–इति "षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवैदिकं व्रतम् (३. १.)–"–इति, "वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् (३. २.)"–इति च मनुवचनानि सङ्गच्छन्ते ; मूलतः प्रकृतपार्थक्ये हि तासां कथं सम्भवेन्नामाध्ययनं द्वादशस्वेवाब्देषु सहस्रशाखस्य सामवेदस्येति तादृशस्मृतिवचनाना मुन्मत्तप्रलपितत्व मेव प्रसज्येतेति । अतोऽस्त्वेव मेवावधार्यम्,—एष खलु वेदशाखाभेदो न मन्वाद्यध्यायभेदतुल्यः, प्रत्युत भिन्नकालखिखितानां भिन्नदेशीयाना मेकग्रन्थीयाना मपि बहुतरादर्शपुस्तकानां यथा भवत्येव पाठादिभेदः, तथैवेति । अथाप्यत्र संशयश्चेत् कस्याप्येकस्य वेदस्य कयोरपि शाखयोराद्यन्तपाठसन्दर्शनेनैव तद्दूरोत्सारणं सुकर मेवेति भवेन्निवृत्तः कोलाहलः ।

परन्त्वेव मपि यजुषस्तु कतिपयशाखाभिः कतिपयशाखाना मेव मस्ति भेदः, यत्तयोरुभयोरेव शाखासमूहयोः मिथः शुक्लकृष्णत्व ममंसत प्राचीनाः । तथाच माध्यन्दिनीप्रभृतीनां यजुःशाखानां शुक्लयजुरिति ख्यातिः ; तैत्तिरीयादीनान्तु यजुःशाखानां कृष्णयजुरिति समाख्या चेति । ईदृशासदृशभेदकारणादिकन्तु वैदिकग्रन्थसमूहतः स्वधिषणापरि-

चालनतश्च यथानुभव मेव वेदितव्यम् ; किञ्च तत्र शुक्लयजुषः कति शाखाः किन्नामकाश्च, कृष्णयजुषोऽपि कति शाखाः किन्नामकाश्चेति चरणव्यूहादिभ्य एवावगन्तव्य मिति ॥

तथाचायं मन्त्रभागः ऋग्-यजुः-सामेतित्रिविधरचनात्मकोऽपि छौन्दाध्वर्यवौद्गात्रब्राह्मेति चतुःसंहितात्मकः, कालेन शुक्लकृष्णेति द्वैविध्यं गते च यजुषि सम्प्रति राजते पञ्चसंहितात्मक एव ;—ऋग्वेदसंहिता, शुक्लयजुर्वेदसंहिता, कृष्णयजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहितेति ॥

अथासु च पञ्चसु वेदसंहितासु बहुधैव पौर्वापर्यं केचिदाहुः। तथाहि—'ऋक्संहितायाः सर्वत एव प्राथम्यम् ; तत्रापि तृतीयमण्डलस्यापेक्षिकनूतनत्वम्, दशममण्डलस्य तु ऋक्संहितापरिशिष्टरूपत्वञ्च ; सामसंहिताया तत एवोद्धृतार्चिकमूलकत्वम् ; शुक्लयजुःसंहितायाः तदपेक्षयाप्यर्वाचीनत्वम्; अथर्वसंहितायास्तु सर्ववेदपरिशिष्टत्वेन ततोऽप्यर्वाचीनत्वम्'—इति। वेदतत्त्वानुसन्धित्सुभिः प्राक्तनैरेवेदं तत्त्व मुद्भावित मित्यत्र विश्वास एवोचितः सर्वेषाम् ; परं किं कुर्मो वयं नात्रास्माकं बुद्धिः प्रसरति ; एकस्मिन्नेव हि काले, एकस्यैवाचार्यस्य, एकेनैव चयनयत्नेन चतुष्ट्व मापन्नानां पौर्वापर्यं कथङ्कारं स्यादिति। यदि कश्चित् फलविक्रयी,—आम्रार्थी आम्र मेव गृह्णातु,जम्बर्थी जम्बू मेव, पनसार्थी पनस मेव, राजादनार्थी राजादन मेवेति क्रयविक्रयसौकर्यार्थ मेकदैवैकेनैव यत्नेनैक मेव फलराशिं विभज्य चयनेन चतुरः स्तूपान् विदध्यात् ; तत्र कः खलु धीर एवं वदितु मुत्सहेत,—अयं स्तूपः पूर्वं कृतः, अत्राप्ययमंशो नूतन इत्यादि? तथैवात्रापि। किञ्च यथास्त्येव तत्र फलाना मुत्पत्तौ कालपौर्वापर्यम्, न त्वेककालजातान्येव तानि सर्वाणि ; एव मत्रापि अस्तु मन्त्राणा मुत्पत्तौ कालपौर्वापर्यम्, न त्वेककालोत्पन्नास्ते इति स्यात् सत्य मेव ; परं न हि तेन स्तूपानां संहितानां वा प्राचीनत्वार्वाचीनत्वविचारः कथ मपि सङ्गच्छते ; फलानां मन्त्राणाञ्चोत्पत्तिकालविचारस्तु स्तूपानां संहिताना मुत्पत्तिकालविचारतः सर्वथा स्वतन्त्र एवेति बहुशास्त्रपारावारदृश्वनां विश्वविख्यातकीर्त्तीनां

मपि तेषामत्र तद्वचो न प्रमाणकोटिं प्रवेष्टु मिष्ट इत्यस्माकम् ॥

तथापीदं विचार्यते कथङ्कार मृक्संहितायाः प्राथम्य मिति ;—

स्मर्यते हि मनुसंहितायाम्—"ऋग्यजुःसामलक्षणम् (२. ११.)"—इति। एव मादौ ऋग्वेदस्य प्रथमप्रयोगदर्शनादेव तस्यैव वेदेषु प्राथम्यं गम्यत इति चेन्न ; तादृशसमस्तप्रयोगे हि शब्दानुशासनादेव ऋक्शब्दस्य पूर्वनिपातो भवति। तथा हि पाणिनिसूत्रम्—"अल्पाच्तरम् (२. २. ३४)"—इति। यद्येवम्प्रयोगादेव प्राथम्यं गम्येत, तर्हि "विन्ध्यकिष्किन्ध-हिमालयाः"—इत्युक्ते विन्ध्यस्यैव प्राथम्य मुररीकार्यं स्यात्। असमस्त-प्रयोगेषु च यत्र ऋक्शब्दस्य प्रथमतः प्रयोगो दृश्यते, तत्र प्रयोक्तुः यादृच्छिकत्व मेव बीजम्। अपि वा पद्यगद्यगानात्मिकासु त्रिविध-रचनासु तत्त्वतो गानरचनाया एव ज्यायस्त्वेऽपि पद्यरचनायास्तदस्थि-रूपत्वेन ततोऽपि गरीयस्त्व मवश्य मभ्युपगन्तव्य मिति रचनानियमाधीन मेव प्राधान्य मृचां बहुत्र आद्युल्लेखे निदानम्। तदेवं सर्वत्रैवर्क्-शब्दस्य प्रथमप्रयोग एव ऋग्वेदस्य सर्ववेदप्राथम्ये विनिगमक मिति तेषां मनोराज्यविजृम्भणमात्र मेव।

श्रूयते च कौषीतकीब्राह्मणे—"तत्परिचरणाविलरौ वेदौ (६. ११.)"—इति। एतेन यज्ञकाण्डे होमकर्मण एव प्राधान्यम्, होमार्थ मेव अध्वर्यु-कृत्य मुद्गातृकृत्यञ्चेत्येव बोधितम् ; एतस्माच्चर्चां प्रथमोत्पन्नत्वं न कथ मपि बुध्यते। एवञ्चास्य तद्विषयकमानत्वेनोपन्यासोऽपि वृथैव।

सर्ववेदभाष्यकारस्य श्रीमतः सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायाम्—"मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋचो बह्व आम्नाताः। साम्नान्तु सर्वेषा मृगाश्रितत्त्वं प्रसिद्धम्। आथर्वणिकैरपि स्वकीयसंहिताया मृच एव बाहुल्येनाधीयन्ते।"—इत्युक्तिर्दृश्यते सत्यम् ; पर मेतस्मादपि ऋग्वेदस्य प्राथम्ये सायणसम्मतिर्न बुध्यते ; अपि तु मन्त्रेषु ऋचां बाहुल्य मित्येव ध्वन्यते। किञ्चर्चां प्राधान्याख्याने च ऋक्संहितायाः प्राधान्यं नैव गम्यते ; ततोऽन्यत्रापि ऋचां सद्भावात्। अत एव ऋचां

ह्वि रचनानियमाधीनं बाहुल्यमूलकं वा प्राधान्यमुररीकुर्वतोऽपि सायणस्य मते ऋग्वेदस्य त्वप्राधान्य मेव । तथा ह्युक्त मध्वर्युभाष्यभूमिकायाम् —"आनुपूर्व्या कर्मणां स्वरूपं यजुर्वेदे समाम्नातम् । तत्र विशेषापेक्षाया मपेक्षितायां याज्यापुरोऽनुवाक्यादय ऋग्वेदे समाम्नायन्ते, स्तोत्रादीनि तु सामवेदे । तथा सति भित्तिस्थानीयो यजुर्वेदः, चित्रस्थानीयावितरौ । तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यम्"—इति । सामभाष्यभूमिकायाञ्च —"अध्वर्युमुख्यैर्ऋत्विग्भिश्चतुर्भिर्यज्ञसम्पदः । निर्म्मिमीते क्रियासङ्घैरध्वर्यु-र्यज्ञियं वपुः । तदलं कुरुते होता ब्रह्मोद्गातेत्यमी त्रयः । * * * । यज्ञं यजुर्भिरध्वर्युर्निर्म्मिमीते ततो यजुः । व्याख्यातं प्रथमं पश्चा-दृचां व्याख्यान मीरितम् । साम्ना मृगाश्रितत्वेन सामव्याख्याय वर्ण्यते"—इति । वस्तुतो जगत्सृष्टेः पुरैव ब्रह्मणश्चतुर्भ्यो वदनेभ्यश्चत्वारो वेदा युग-पत् समुत्पन्ना इत्येवंवादिनां पौराणिककालप्रभवाणां श्रीमत्सायणादीनां तथाविधविचारे मनोनिवेशोऽप्यसम्भव एव ; तेषां तादृशाशिरस्कविचार-प्रवृत्तौ भवेदेव हि स्वसिद्धान्तव्याकोपः ।

किञ्च ऋक्संहितायाः प्राथम्येऽभ्युपगते ऋक्संहिताप्रणयनकाले यजुः-साम्नोरसद्भावात् तत्रैव ऋक्संहितायां यजुःसाम्नोरुल्लेखः कथङ्कारं श्रूयत इत्येवं तादृशचतुरचेतसां चेतःसु कथन्न चमत्कार माविष्कृतम् ? पश्यन्तु तावत् धीमन्तः—"यजुस्तस्मादजायत (ऋ० स० १०. ९०. ९.)"—इति, "त मेव ऋषिं तमु ब्रह्माण माहुर्यज्ञन्यं सामगा मुक्थशासम् (ऋ० स० १०. १०७. ६.)"—इति, "ऋक्सामाभ्या मभिहितौ (ऋ० स० १०. ८५. ११.)"—इत्येवमादीनि । इमानि तु निदर्शनानि दशममण्डलादाहृतानि, दशम-मण्डलस्यानतिप्राचीनत्व मेव तेषा मिति चेत्, ततोऽन्यतोऽपि दर्शयामः । तथाहि—"बर्हिरिव यजुषा रक्षमाणाः (ऋ० स० ५. ६२. ५)"—इति पञ्चममण्डलीयम्, "उभे वाचौ वदति सामगा इव (२. ४३. १.)"—इति च द्वितीयमण्डलीयम् । सामविशेषनामान्यपि श्रूयन्त एव ऋक्संहितायाम् । तथाहि—"रथन्तर मा जभारा वसिष्ठः (१०. १८१. १.)"—इति,

"भरद्वाजो बृहद्राचक्रे अग्नेः"–इति च। एते च निदर्शने दशममण्डलीये इत्येवाग्राह्ये तेषा मिति चेत्, अन्यत्राप्यस्त्येवं तथैव। तथाहि—"रथन्तरे सूर्यम्पर्यपश्यत् (१. १६४. २५.)"–इति प्रथममण्डलीयम्, "प्र गायत्रेण गायत (९. ६०. १.)"-इति च नवममण्डलीय मिति दिक्। तदेव ऋक्-संहितायाः मण्डलद्वयमन्त्राणां वा प्रथमरचितत्वं तेषां स्वकपोलकल्पित मिवाभातीति॥

यदप्युक्तं तद्द्वितीयमण्डलस्य अपेक्षाकृतमर्वाचीनत्वं तदप्येव मेव; मानाभावात्। कश्च खलु धीमान् शुष्कतृणसहाय एव वटविटपिदुर्गच्छेदने समर्थो भवेत्? अस्ति खलु ऋक्संहिताद्वितीयमण्डलीयसायणभाष्या-रम्भे "य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् स गृत्स-मदो द्वितीयं मण्डल मपश्यत्"–इत्यनुक्रमणीवचन मुद्धृतम्। तथाच द्वितीयमण्डलस्य शौनकीयत्वं सुव्यक्तम्; शौनकीयग्रन्थस्य च पाणिनिना "शौनकादिभ्यश्छन्दसि (४. ३. १०६.)"–इति सूत्रे प्रोक्तत्वस्वीकारात् प्राचीनतमत्वाभावः सुतरां स्फुट मित्येवैकैषा युक्तिर्द्वितीयमण्डलस्य चिरा-त्सिद्धप्राचीनतमत्वखण्डने शुष्कतृणमयी कर्त्तनी। इह पश्यन्तु तावद्भ्रा-न्ताः—एकवंशीयाश्चान्यवंशप्रभवाश्च शौनकाः खलु बहव एव;— मन्त्राणां द्रष्टारः आसन् शौनकाः; तेभ्योऽन्ये सूक्तानाञ्च द्रष्टारः स्थिता एव शौनकाः; द्वितीयमण्डलस्य द्रष्टा च शौनकस्ततोऽप्यन्य एव; अथर्व-शाखाविशेषस्य च प्रवक्ता शौनकोऽप्यन्य एव; तत्तद्वंशप्रभवा ह्यद्यापि बहुत्र बहवः शौनका राजन्त एव। "शौनकादिभ्यश्छन्दसि (४. ३.१०६.)"– इति पाणिनिसूत्रस्य शौनकप्रोक्तग्रन्थ एव विषयः, तथाच शौनकप्रोक्तं अथर्ववेदीयसंहिताग्रन्थं येऽधीयते त एव शौनकिनः; शौनकदृष्टग्रन्थस्तु न चास्य सूत्रस्य विषयः; अनुक्रमण्यान्तु "द्वितीयमण्डल मपश्यत्"– इत्युक्तम्, न तु द्वितीयं मण्डल मवोचदिति*। ततश्च शौनकदृष्टत्व

* शौनकविषये लिह पुरस्तादप्यसकृदुक्तानि, तान्यपत्र स्मर्तव्यानि (भौ, अ ४०)।

मेव द्वितीयमण्डलस्येति शौनकदृष्टं द्वितीयं मण्डलं ये ऽधीयते इति विग्रहे तत्प्रत्ययस्य प्रवृत्तिरेव नास्तीति तस्य द्वितीयमण्डलस्य प्रोक्तत्वमूलकार्वाचीनत्वकल्पनं भ्रमविजृम्भित मेवेति। वस्तुतः पाणिनिसूत्राणां समालोचनयेद मेव ज्ञायते;—तस्य भवतः पाणिनेः शाखाना मेव प्रोक्तत्वेन ग्रहणा मीप्सितम्, तदध्येत्रर्थे एव च प्रत्ययादयो विहिताः; मन्त्रसूक्तमण्डलादीनान्तु दृष्टत्वेनैव ग्रहणा मिति दृश्यतेऽनुक्रमणिकादावपि। न च क्वचिदपि पाणिनीये मण्डलाध्येत्रर्थे तादृश प्रत्ययविधिर्दृश्यते प्रत्युत शाखाद्यध्येत्रर्थे एव; सन्ति यथैव ऋग्वेदादीनां शाकलादयः शाखा, तथैवास्ति शौनकसंहितेत्यथर्ववेदस्यापि चिरादेव; एवं यथैव शाकलादिशाखानां प्रोक्तत्व मेव पाणिनिसम्मतम्, तथैव शौनकशाखाया अपि। तत्कथ मत्र द्वितीयमण्डलाध्येतरि तादृशप्रत्ययप्रसङ्गः? कुतो वा अनुक्रमण्यां यस्य द्रष्टृत्वं भासते, तस्यैवेह बलात् प्रोक्तत्वेन ग्रहणं भवेदिति?

यदप्युक्तम्—तस्यैव ऋग्वेदद्वितीयमण्डलस्य प्रथमसूक्तीयद्वितीयस्यां "तवाग्ने होत्रं तव पोत्र मृत्वियं तव नेष्ट्रं त्व मग्निदृतायतः। तव प्रशास्त्रं त्व मध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे (ऋ० सं० २.१.२.)"—इत्यस्या मृचि यत् होत्रादीनि याज्ञिकाभिधानानि श्रूयन्ते, ततश्च ज्ञायते तन्मण्डलं यज्ञकालभवम्, तदेव च मानान्तरं तस्यापेक्षाकृताधुनिकत्वस्येति; इतश्च वक्तुरेकदेशदर्शित्व मेव विशदीभवति। यतः खलु यज्ञकाले एव सर्वासां संहितानां ग्रथनं सम्पन्न मतः संहितासु सर्वत्रैव विद्यन्ते तथाविधा मन्त्राः; न द्वितीयमण्डले एव। तथाहि तत्प्रदर्शितमन्त्रश्रुतानि पदान्यन्यत्रापि यथाक्रमेण दर्शयामः—१. ७६. ४. होत्रम्, तत्रैव पोत्रम्, ८. ४०. ११. ऋत्वियम्, १. १५. ३. नेष्टः, १०. १४. १३. अग्निध्रम्, १. ९४. ६. प्रशास्ता, १. २३. १६. अध्वरीयताम्, १. ८०. १. ब्रह्मा १. १३. ६. गृहपतिः, १. १. ८. दमे इति। एवञ्च होत्रादिपददर्शनात् तत्तन्मन्त्राणां यज्ञकालजत्वसिद्धेऽपि प्रथममण्डलादिभ्यो द्वितीयं मण्डल माधुनिक मिति वक्तुं कथ मपि न युज्यत इति सुष्ठूक्तम्॥

एवं दशममण्डलस्य ऋक्परिशिष्टरूपत्वं कल्पयितुश्चैका आकाशवल्ली अवलम्बिता तैर्भाषापार्थक्यादिर्नाम ; दशममण्डलस्य हि भाषा मन्त्रार्थगततात्पर्याणि च प्रथममण्डलादिभ्यः सर्वथा पृथगेवेति परिशिष्टरूपत्व मेव स्वीकार्य मिति तदाशयः। कि मत्र भ्रमो वयम्? अस्मच्छ्रुतिषु हि दशममण्डलस्य मण्डलान्तराणाञ्च एकविधैव भाषा उपलभ्यते, अस्मद्बुद्धिषु च तथैकविध मेव तात्पर्य मिति न जानीमहे केषां बुद्धिमालिन्यं केषां वा श्रवणेन्द्रियदुष्टत्व मिति।

वस्तुतो वेदानां कृतकत्वपक्षे मन्त्राणां बहुकर्तृकत्वात् अनेककालजत्वाच्च भाषातात्पर्ययोः पार्थक्यन्तु प्रतिमन्त्रगत मेवेत्यन्यदेतत् ; मण्डलगतपार्थक्यन्तु असम्भव मेव मण्डलरूपेण ग्रन्थाविर्भावाभावात्। सर्वास्वेव च शाखासु एकविधपरिच्छेदविभागोऽपि न सम्भवपरः ; तथाच यत्र खलु शाखायां नवपरिच्छेदपरिच्छिन्ना एव सर्वे मन्त्राः, यत्र वैकादशपरिच्छेदपरिच्छिन्ना इमे एव सर्वमन्त्राः, तत्र कथं दशममण्डलस्य परिशिष्टत्वं परिरच्येत? इदानीं प्रचलितेयं हि संहिता, शाकलबाष्कलेतिशाखाद्वयमिलितेत्येव बुध्यते ; द्विविधपरिच्छेदविभागदर्शनात्। तथाचाष्टकाध्यायवर्गैर्विभागः खलु एकशाखाकृतः, मण्डलानुवाकसूक्तैर्विभागस्त्वपरशाखाकृतः स्फुट मेव प्रतीयते। अष्टकाध्यायवर्गविभक्तसंहितायां किञ्चित् पाठाधिक्य मपि। त एवाधिकाः पाठाः वालखिल्यमन्त्रा इत्युच्यन्ते। न च मन्त्राः ते खिलात्मिकाः ; तेषा मपि पदपाठाद्यध्ययनाध्यापनश्रवणात्, "अथ वालखिल्या विहरेत् (उ० २. २. ३—२२.)"-इत्याद्याश्वलायनीयश्रौतविधानादिस्मरणात्, निरुक्ते निगमत्वेन व्यपदेशाच्च। अतएवाह च षड्गुरुशिष्यः—'बाष्कलके संहितापाठे अतः शाकलात् अधिकान्यष्टौ सूक्तानि'-इति। भगवता सायणाचार्येण तु शाकलसंहिता मधिकृत्यैव व्याख्यात ऋग्वेद इति नैव व्याख्यातानि वालखिल्यानि ; परं स्वीकृतान्यैतरेयकभाष्ये तान्यष्टाविति। अपि यथैवान्यत्रान्यत्र, तथैवेहापि वालखिल्याना मष्टसूक्तात्मकत्व मेकादश-

सूक्तात्मकत्वञ्चेति सूक्तसङ्ख्याविषयकोऽप्यस्ति पाठभेदः। तदेव मण्डक-विभागे बाष्कलके दशममण्डल मेव नास्तीति कथङ्कारं भवेत् तस्य परिशिष्टत्व मिति विचार्यं सुधीभिरेव। तथाच पुरा ऋक्संहिताया नवमण्डलात्मकत्व मेवासीत्, ततोऽभवत्तस्या दशमण्डलात्मकत्व मिति कथनं यथा सुकरम्; तथा नेदम्— पुरा सप्तमाष्टकीयपञ्चमाध्यायाद्याविंशतिवर्गान्त मेवर्क्संहितायाः प्रवचन मासीत्, ततस्तदष्टकीयतदध्यायस्योनविंशतितमादयो वर्गाः प्रणीताः, अष्टमाष्टकञ्च समग्रः प्रणीत इति। न च निरुक्ते दाशतयीति व्यपदेशाद् दशममण्डलात्मकत्व मेव सर्वर्क्शाखासंहिताना मिति वाच्यम्; तत्र सर्वत्र दाशतयीति शाकलशाखासंहिताया एव ग्रहणे बाधाभावात्। किञ्च प्रथमादि-मण्डलेषु श्रुतानां बहूनां सूक्तानाम्, दशममण्डलस्थितानाञ्च बहूनां सूक्तानाम्, इत्यारोऽभिन्ना एवावगम्यन्ते; परिशिष्टत्ववादिनां मते तत् कथ मुपपद्येतेत्यपि विचारयन्त्वत्र माध्यस्थ्यपदमादधाना एवेति॥

एवं सामवेदीयच्छन्दसां मक्संहितात उद्धृतत्वकथन मपि प्रौढिवाद-मात्रम्; ऋक्संहिताया मपि छन्द इति श्रवणात्। तथाहि—"तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत (ऋ० स० १०, ६०, ६.)"—इति। अस्या मृचि छन्दांसीति पदेन सामवेदीयर्चा मेव ग्रहण मिष्टम्; तथैव सर्ववैदिकप्रसिद्धेरिति प्रतिपादितं पुरस्तादपि (ठे० पृ०); छन्द इति हि सामवेदीयार्चिक-ग्रन्थानां तथा तत्तद्ग्रन्थीयमन्त्राणां च नाम इति केऽधीतवेदा न जानन्ति? पाणिनिना च विशेषतः सामवेदीयच्छन्दोग्रन्थस्थमन्त्रा एव छन्दस्त्वेन लक्षिताः। तथाहि—"सोऽस्यादिरिति छन्दसः प्रगाथेषु (४. २. ५५.)"—इति तत्सूत्रम्; "पङ्क्तिरादिरस्येति पाङ्क्तः प्रगाथः"—इत्यादीनि च तदुदाहरणानि। प्रगाथास्तु सामवेदे एव दृश्यन्ते, नान्यत्र; विहिताश्च ते सामवेदीये ताण्ड्यमहाब्राह्मणे एव।

किञ्च यतश्च साममूलमन्त्राणां सर्वेषा मेव छन्द इति चिरात्समाख्या,

अत एव तेषां गानकारिणः सामवेदिनश्छन्दोगा एवेत्युच्यन्ते ; न तु ते क्वचित् केश्चिदपि ऋग्गा इति श्रुताः । यतश्च सामवेदिन एव छन्दोगा इत्युच्यन्ते, तत एव सामवेदीयब्राह्मणग्रन्थाना मुपनिषदाच्च छान्दोग्य मिति समाख्या प्रसिद्धैव ; विहिता च सा पाणिनिनापि "छन्दोगौक्थिक (४.३. १२६)"—इति । एवञ्च यच्च केनचिदुक्तम् 'वेदसंहितासु ये केचन प्राचीनतमश्लोकाः, त एव छन्दांसि इत्यभिधीयन्ते ; ततोऽप्राचीना एव मन्त्राः'—इति, तदिद मपि जलमध्यगतमत्स्योदवहिलीन मेव न वेत्यपि विचारयन्तु त एव ।

नन्वेव मपि ऋक्साम्नोरुत्पत्त्यनन्तर मेव छन्दसा मुत्पत्तिश्रवणात् सामवेदीयर्चा मृक्तोऽवरजत्वं यथावत् स्थित मेवातः 'खादितेऽपि लशुने न प्रान्तो व्याधिः'—इति चेदत्र ब्रूमः ;—तस्माद्यज्ञादिति मन्त्रे न हि क्रमोत्पत्तिवर्णन मिष्टम् ; अन्यथा हि ऋगुत्पत्त्यनन्तरं सामोत्पत्तिः, तदनन्तरञ्च छन्दउत्पत्तिः इत्येवं मन्तव्यं स्यात्, तच्चाप्रसिद्ध्यसम्भवदोषग्रस्तं भवेदेव । तथाहि—ऋग्वेदीयर्चोऽवलम्ब्यैव सामानि गीतानि इति चेत् ते खलु ऋग्गा इत्येव प्रसिद्धाः स्युः, न च तथा प्रसिद्धिर्दृश्यते क्वचिदपि लोके वेदे वा ; प्रत्युत छन्दोनामतः प्रसिद्धाना मेव सामवेदीयर्चां गातृत्वादेव सामवेदीयाः छन्दोगा इत्येवोच्यन्ते ; एवं साम्नां प्रथम मुत्पत्तिस्ततस्तन्मूलानाच्छन्दसा मित्यप्यसम्भव एव । तस्मात् यदैव यतश्च ऋचः प्रादुरभूवन्, तदैव ततश्च सामानि च, साममूलच्छन्दांसि च, यजूंषि चेत्येव तन्मन्त्राणाम्यथा च सहोत्पत्तिरेव । अतएवाथर्ववेदीये तदनुरूप एव मन्त्रे सहशब्दश्च श्रूयते—"ऋचः सामानि छन्दांसि पुराणं यजुषा सह । उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः (११. ७. २४.)"—इति । अत्र श्रुतः पुराणशब्दस्तु प्राचीनेतिवृत्तान्वाख्यानपरमन्त्रवाचकः । तदेतस्मान्मन्त्राच्च सर्वविधमन्त्राणां सहोत्पत्तिः सुव्यक्तैव ।

किञ्च यदि नाम ऋक्संहितात एव सामयोनिमन्त्रा उद्धृताः स्युः, तर्हि उद्धृतिक्रमत एवेह सामवेदे मन्त्रा दृश्येरन् ; न च तथा दृश्यन्ते ।

अपरञ्च, एव मपि बहवो मन्त्राः सामवेदे सन्ति, येषा मृक्संहितायां श्रवणं नास्त्येव । अथापर मपि, यथैवर्क्संहितायां सूक्तानि, तथैवेह दशादारीनि ; ततश्च कुतः कस्योद्धरणं किम्मानकं भवेदिति च स्याद् विचार्य मेव, विचारकाले तु विनिगमकाभाव एव मूर्तिमान् दरी-दृश्येतेत्यत्र च कः संशयः ।

वस्तुतः पुरा तु ऋगादिलक्षणाः सर्व एव मन्त्रा विकीर्णा एव आसन्, ततो यदैव ऋक्चयनेन ऋग्वेदीयसूक्तानि सङ्गृहीतानि, तदैव तथैव सामवेदीयान्यपि दशादारीणीति किञ्चित्रम् ? एकस्या एव हि ऋक्चयन मुभयत्रैककालेऽपि सम्भवत्येवेत्यपास्यैतैवोद्धृतिमत मिति दिक् ॥

अथर्वविचारस्तु प्रदर्शित एव पुरस्तात् (टी पृ०) ॥

(ब्राह्मणम्) ततो ब्राह्मणस्यास्ति किं लक्षण मित्यन्विच्छन्तः पश्याम इद मापस्तम्बसूत्रम्—"कर्मचोदना ब्राह्मणानि"–इति । कर्मचोदना विधिरिति त्वनर्थान्तरम् । विधिश्चैष द्विविध इत्याह सायणः । तथाहि— "विधिरपि द्विविधः ; अप्रवृत्तप्रवर्त्तनम्, अज्ञातज्ञापनञ्चेति । 'आग्नावैष्णवं पुरोडाशं निर्वपति दीक्षणीयायाम्'–इत्याद्याः कर्मकाण्डगता विधयः अप्रवृत्तप्रवर्त्तकाः ; 'आत्मा वा इद मेक एवाग्र आसीत्'–इत्यादयो ब्रह्मकाण्डगता अज्ञातज्ञापकाः (ऋ० सं० भा० भू०)"–इति ।

एतस्यैव ब्राह्मणस्य शेषरूपवाक्यान्येवार्थवादा उच्यन्ते इत्याह चापस्तम्बः । तथाच तत्सूत्रम्—"ब्राह्मणशेषोऽर्थवादः"–इति । शेषशेषिभावः अङ्गाङ्गिभावश्चेत्यनर्थान्तरं मीमांसकानाम् । तच्च प्रतिपादितम् "अथातः शेषलक्षणम् (३. १. १.)"–इत्यधिकृत्य "शेषः परार्थत्वात्, द्रव्यगुणसंस्कारेषु बादरिः, कर्माण्यपि जैमिनिः, फलञ्च पुरुषार्थत्वात्, पुरुषश्च कर्मार्थत्वात् (३. १. २—६.)"–इति । विधिभिरङ्गाङ्गिभावश्चार्थवादानां ते मन्यन्त एव । तथाहि—"आम्नायस्य क्रियार्थत्वादानर्थक्य मतदर्थानां तस्मादनित्य मुच्यते"–इत्यादिभिः षड्भिः सूत्रैः (जै० सू० १. २. १—६.) अतदर्थानाम्=अक्रियार्थानाम्=अर्थवादानाम् आनर्थक्यम्, तस्मात्तेषा

मनित्यत्व माशङ्क्य "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युः" –इत्यादिभिः षड्भिः सूत्रैः (जै० सू० १२. ७—१२.) विधीनाम्=‘वायव्यं श्वेत मालभेत’–इत्यादीनाम्=ब्राह्मणवाक्यानां स्तुत्यर्थत्वेनैव "वायुर्वै क्षेपिष्ठा देवता"–इत्येवमादीना मर्थवादवाक्यानां सार्थकता तस्मान्नित्यता च सिद्धान्तिता। एतदेवाभिप्रेत्याह सायणाचार्यः "द्विविधं ब्राह्मणम्—विधिः, अर्थवादश्च"–इति।

अर्थवादाना मपि ब्राह्मणत्वं स्वीकृतं निरुक्तेऽपि। तथाहि—"प्राश्नन्त मस्याह्नियो निर्जघानेति च ब्राह्मणम् (४भा० २७४पृ०)"–इत्येवमादीनि द्रष्टव्यानि। अपि चार्थवादानां ब्राह्मणत्व मुररीकुर्वतैव तेन तेषां तत्त्वख्यापनेऽप्रामाण्यञ्च ध्वनितं तत्र। तथाहि—"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति (३भा० ४१६ पृ०)"–इत्यादि॥

अत्र त्वेतदपि ज्ञातव्य मस्ति,—सायणस्य प्रदर्शितप्रकारं विधिद्वैधन्तु वैदान्तिकाना मनुरोधतः प्रौढिवादमात्र मिति; कर्मचोदनैव विधिरिति आपस्तम्बादियाज्ञिकानां जैमिन्यादिमीमांसकानाञ्च सम्मतत्वात्। न हि केऽपि याज्ञिकाः "आत्मा वा इद मेक एवाग्र आसीत्"–इत्यादीनां विधित्वं मन्यन्ते; अपि त्वर्थवादत्व मेव। अत एवोक्तं दृश्यते शालिकनाथीयप्रकरणपञ्चिकायाम्—"केवलवस्तुवादी वेदभागो नास्ति"–इत्येवमादि॥

विध्यर्थवादयोः प्रकारभेदादीनि जैमिनीयादौ बाहुल्येन वर्णितानि। लौगाक्षिभास्करेणार्थसङ्ग्रहे, कृष्णयज्वना च मीमांसापरिभाषायां सङ्क्षेपेण निर्णीतानि; विधिविचारादिप्रकरणेषु प्रपञ्चितानि च; तेभ्य एव विशेषतोऽवगन्तव्यानि॥

मीमांसावृत्तिकारेण तु ब्राह्मणलक्षणान्येव मुदाहृतानि—‘इतिकरणबहुलम्’, ‘इत्याहोपनिबद्धम्’, ‘आख्यायिकास्वरूपम्’—इति च। इमानि लक्षणानि प्रायिकाभिप्रायेणोक्तानि; मन्त्रेष्वपि तथादर्शनात्, ब्राह्मणेष्वपि क्वचित्तदभावदर्शनाच्चातिव्याप्त्यव्याप्तिदोषापत्तेरित्याहतुः शबरस्वामिसायणौ। जैमिनिस्तु सूत्रयामास "शेषे ब्राह्मणशब्दः (२.१. ३३.)"–इति।

"मन्त्राश्च ब्राह्मणानि वेदः, तत्र मन्त्रलक्षणे उक्ते परिशेषसिद्धत्वात् ब्राह्मणलक्षण मवचनीयम्, मन्त्रलक्षणेनैव सिद्धम्,—यस्यैतल्लक्षणं न भवति, तद् ब्राह्मण मिति परिशेषसिद्धं ब्राह्मणम्"–इति च तद्भाष्यम्। तदेवं निष्पन्न मेतत्—अभियुक्तानां समाख्यान एव ज्ञेयम्— एष मन्त्रः, एतद् ब्राह्मण मिति ; अपि च नैव मन्तरेण सम्भवेतां तयोर्लक्षणे ; इति-करणबहुलादिषु सर्वत्रैवाव्याप्त्यतिव्याप्तिदोषयोरनिवार्यत्वात्। अतः सुष्ठूक्तं सायणेन—"ईदृशेष्वत्यन्तविजातीयेषु समाख्यान मन्तरेण नान्यः कश्चिदनुगतो धर्मोऽस्ति यस्य लक्षणत्व मुच्येत"–इति। लक्षणाप्युदाहरणपरे प्राचीनपद्ये अपि। तथाहि—

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥
उपमानं दशैवैते विधयो ब्राह्मणस्य तु।
एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्॥"–इति।

तत्र, (१) हेतुः—"शूर्पेण जुहोति, तेन ह्यन्नं क्रियते"–इति।

(२) निर्वचनम्—"तद्दध्नो दधित्वम्"–इति।

(३) निन्दा—"उपावीता वा एतस्याग्नयः"–इति।

(४) प्रशंसा—"वायुर्वै क्षेपिष्ठा देवता"–इति।

(५) संशयः—"तद्व्यचिकित्सन् जुहवानीश्मा हौषाश्म्"–इति।

(६) विधिः—"यजमानसम्मिता औदुम्बरी भवति"–इति।

(७) परकृतिः—"माषानेव मह्यं पचति"–इति।

(८) पुराकल्पः—"पुरा ब्राह्मणा अभैषुः"–इति।

(९) व्यवधारणकल्पना—"यावतोऽश्वान् प्रतिगृह्णीयात्, तावतो वारुणांश्चतुष्कपालान् निर्वपेत्"–इति।

दशम मुदाहरणन्तु शवरस्वामिना नैव प्रदर्शितम्; तत एव लब्धविद्येन सायणेनापि कथङ्कारं भवेद् दर्शितम्? अथवा लेखकप्रमाद एवात्र निदानम्। यद्यप्येतादृशेऽस्मादृशानां लेखनीचालन मुपहासास्पद मेव सम्भवेन्नाम,

तथापि कर्तव्यपरवशैः कथ मुपेक्षणीयं स्यादिद मिति यथाज्ञानं तत् प्रदर्श्यते—"स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा ऽन्यत्रायतन मलब्ध्वा बन्धन मेवोपश्रयत, एव मेव खलु सोम्य तन्मनो दिशं दिशं पतित्वाऽन्यत्रायतन मलब्ध्वा प्राण मेवोपश्रयते ; प्राणबन्धनं हि मन इति (छा० ब्रा० ८. ८. २.)"–इत्येवमादिक मेवोपमानोदाहरणं भवेद् दृष्टम मिति॥

अथात्रेद मप्यालोचनीयम्—ब्राह्मणग्रन्थेषु खल्वेतत्पदद्वयोक्तातिरिक्ताना मितिहासादीना मपि कतिविधानां वाक्याना मस्तित्व मुपलभ्यते। तथाहि छान्दोग्ये—"स होवाच ऋग्वेदं भगवोध्येऽमि ०—० इतिहासपुराणम् (७. १. ३.)"–इत्यादि। शतपथेऽप्यश्वमेधप्रकरणे—"अथाष्टमेऽहन् ०—० तानुपदिशतीतिहासो वेदः, सोऽय मिति किञ्चिदितिहास माचक्षीतैव मेवाध्वर्युः सम्प्रेष्यति (१२.)"–इति, "अथ नवमेऽहन् ०—० तानुपदिशति पुराणं वेदः, सोऽय मिति किञ्चित् पुराण माचक्षीतैव मेवाध्वर्युः सम्प्रेष्यति (१३.)"–इत्येवमादि। तैत्तिरीयेऽपि—"यद् ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतयः (आ० २. ९. २.)"–इति। "ब्राह्मणानि कर्मचोदनाः—'वायव्यं श्वेत मालभेत'–इत्यादयः। इतिहासाः ब्रह्माण्डादिनियमाः ;—'देवाः सुराः संयत्ता आसन्'–इत्यादयः। 'आत्मा वा इद मेक एवाग्रआसीन्नेवेह किञ्चानाग्रे'—इत्यादीनि सृष्ट्यादिप्रतिपादकानि पुराणानि। कल्पाः कल्पसूत्राणि —प्रयोगप्रतिपादकानि। गाथाः गायन्ति चोदिता मन्त्रविशेषाः ;—'योऽस्य कौष्ठ्य'–इत्यादयः ; यमगाथाभिः परिगायतीति विधानात्। नाराशंसीः नाराशंस्यः 'होतायक्षन्नराशंसम्'–इत्याद्याः ; ब्राह्मणान्तःपठिताना मपि पुनरुक्तिः फलातिशयद्योतनार्थम्"–इति च तद्भाष्यं सायणीयम्। तत्त्वतस्त्विह कल्पाः कल्पसूत्रबीजानीत्येव वक्तु मुचितम्; अस्ति वात्र पाठान्तरता? गाथाः खलु श्लोकबद्धाः प्रवादवाक्यरूपा ब्राह्मणग्रन्थेभ्योऽपि प्राचीना एव ; ता एव च श्लोका इत्यप्युच्यन्ते ; तद्यथा—

"तदेषाभियज्ञगाथा गीयन्ते—'यजेत्सौत्रामण्या सपत्नीकोऽप्यसोमपः। मातापितृभ्यामनृणार्थायजेतिवचनाच्छ्रुतिः'–इति (ऐ० ब्रा० ७. २. ६.)" –इति। नाराशंस्यस्तु नरस्तुतिश्रुतयः ; तास्तु मन्त्रात्मिकाः, गाथात्मिकाः, ब्राह्मणात्मिकाश्च भवन्ति। तद्यथा—"अधि द्वयुः पणीनां वर्षिष्ठे मूर्द्धन्नस्थात् (ऋ० सं० ४. ७. २६. ६, ७, ८.)"–इत्येवमादयो मन्त्रात्मिकाः ; "हिरण्येन परीवृतान् कृष्णान् शुक्लदतो मृगान्। मष्णारे भरतो ददाच्छतं बद्धानि सप्त च (ऐ० ब्रा० ८. ४. ६.)"–इत्येवमादयो गाथात्मिकाः ; "एतेन ह वा ऐन्द्रेण महाभिषेकेणोदमय आत्रेयोऽङ्ग मभिषिषेच तस्मादङ्गः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे (ऐ० ब्रा० ८. ४. ७.)"–इत्येवमादयश्च ब्राह्मणात्मिकाः। अथर्ववेदीयगोपथब्राह्मणे तु तत्त्रयप्रकारश्रुतातिरिक्ता बहुविधा एव श्रुतयः संलक्ष्यन्ते। तथाहि— "इमे सर्वे वेदा निर्मिताः ; सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्यानाः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः, सानुमार्जनाः, सवाकोवाक्याः (१. २. ६.)"–इति। तत्र कल्पाः खल्विदानींप्रचलितकल्पसूत्राणां मूलान्येवोपलभ्यन्ते ; रहस्यानि त्वारण्यकानि ; स्वरा इति तु इदानींप्रचलितशिक्षाग्रन्थानां मूलानि ; निरुक्तानि चाद्यप्रचलितनिरुक्तमूलान्येव ; अनुशासनान्यपि अद्यप्रचलितछन्दोऽनुशासनमूलानि ; संस्काराः खलु पदसंस्कारकशास्त्राणां पाणिन्यादीनां मूलान्येव ; अनुमार्जनानि चाद्यस्थितलुप्तप्रतमवेदाङ्गज्योतिषस्य मूलानि ; वाकोवाक्यानि तु प्रश्नोत्तररूपाणीति शङ्कराचार्यः ; ऊहापोहादितर्कप्रतिपादकमीमांसाशास्त्रमूलान्येवेत्यपि केचित्। तदेतेषा मिह प्रदर्शितपञ्चोक्तेषु दशसु कथं भवेत् समावेशः ? तदत्र बहुयत्नतोऽपि द्वयोस्त्रिषु वा समावेशानुभवेऽपि न तु सर्वेषां समावेशः सिद्ध्यतीति कथं स्यादेवंविधानां ब्राह्मणत्वम् ?

अत्रोऽत्रैवं ब्रूमः।—आसीत् पुरा सर्वा एवेमाः श्रुतयो विकीर्णा इति। तत्र, विधायकवाक्यानाम्,—'वायव्यं श्वेत मालभेत'–इत्येवमादीनाम्, तत्र

प्रवर्त्तकत्वेन (निषेधविध्यादौ निवर्त्तकत्वेन च) 'वायुर्वै क्षेपिष्ठा देवता'—इत्येवमादीनाञ्च कर्मचोदनापरत्वेनैव ब्राह्मणत्वम् ; तदतिरिक्तानामर्थ-तात्पर्यादिनिर्णायकानां निरुक्तादीनामेव वेदार्थवादोपयोगित्वेनार्थवादत्वम् । तयोस्तु प्राचीनपद्ययोः ब्राह्मणभेदा एव निर्दिष्टाः, न त्वर्थवादभेदाः "दशै-वैते विधयो ब्राह्मणस्य तु । एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्"—इत्युक्तेः । विधिः कर्मचोदना इत्यनर्थान्तरम् ; "कर्मचोदना ब्राह्मणानि"—इति हि आपस्तम्बसूत्रम् । अर्थवादशास्त्राणि खलु निरुक्तादीनि ब्राह्मणतो विभिन्नान्येव ; अतएवोक्तं द्वितीयं सूत्र मापस्तम्बेन—"ब्राह्मणशेषो-ऽर्थवादः"—इति । ब्राह्मणेभ्योऽवशिष्टो वेदार्थप्रसवहेतुर्विधिवाक्यसङ्घ एवा-र्थवाद इत्युच्यते इत्येव च तस्यार्थः। यथा चाह जैमिनिः— "शेषे ब्राह्मण-शब्दः (२. १. ३३.)"—इति । न च तत्रावगम्यते मन्त्रस्यैव भागविशेषो ब्राह्मण मिति, अपि तु गम्यत एव मन्त्रातिरिक्तो वेदभागो ब्राह्मण मिति ; तथैवेहापि गम्यतैव ब्राह्मणातिरिक्तो मन्त्रलक्षणविधुरो वेदभागोऽर्थवाद इति । सिद्ध मित्थं वेदत्रैविध्यम् ;—मन्त्रः, ब्राह्मणम्, अर्थवादः इति । अत एव वाभवद्वेदस्त्रयीतिव्यपदेशभाक् । सायणीय मेतद्वचनञ्चास्माक मनुकूल मेव—"तदेवं वेदे विद्यमानानां त्रयाणां मन्त्रविध्यर्थवाद-भागाना मप्रामाण्यकारणाभावात् वाचकानां तेषां प्रामाण्यस्य स्वतस्त्वाङ्गी-कारात् कृत्स्नस्यापि वेदस्य प्रामाण्यं सिद्धम् (ऋ० सं० भा० भू०)"—इति ।

यद्यप्यैतरेयादिग्रन्थेषु विध्यर्थवादावुभावेव स्तः ; परं विधीनां बाहुल्यादेव ब्राह्मण मित्येव ते व्यपदिश्यन्ते ; यथाच यजुःसंहितायां ऋग्यजुषोरु-भयोरपि विद्यमानत्वेऽप्याख्यायत एव यजुरिति यजुषां बाहुल्यात् । तथा ह्यैतरेये बह्व्य एवगाथाः प्रमाणत्वेनोल्लिखिता दृश्यन्ते, तैत्तिरीये च शिक्षा-दयो बहवः श्रूयन्ते, तथा छान्दोग्ये ऽपि छन्दोऽनुकीर्त्तनानि च, गोपथे तु "ओङ्कारं पृच्छामः को धातुः"—इत्यारभ्य "किं ज्योतिषं किं निरुक्तं किं स्थानं का प्रकृतिः कि मध्यात्म मिति षट्त्रिंशत् प्रश्नाः(१. १. २४) ।"

—इत्यन्तग्रन्थसन्दर्भेण षडङ्गपरिचया व्यज्यन्त एव; तत्तृतीये च खण्डे "षडङ्गविदस्तत्तथाधीमहे"—इति स्फुटम्।

तस्मादिद मेव युक्त मिवाभाति,— ऐतरेयादिग्रन्थाविर्भावात् प्राक् ब्राह्मणार्थवादेतिहासोद्दयगतानि सर्वाण्येव वाक्यान्यासन् विकीर्णानि: (तदनुसृत्यैव कृत मुक्तलक्षणादय मापस्तम्बेन) तत उत्तरं खलु तान्येव सङ्गृह्य यागपद्धत्यनुसारत एव ग्रन्थीकृतानि तानि महीदासादिभिः; तत्प्रभृत्येव सर्वेषा मेव निर्वचनादीना मभवद् ब्राह्मणान्तर्गतत्वं तथा तन्नाम्नैव व्यपदेशभाक्त्वञ्च; तत एव जैमिनिर्विध्यर्थवादयोरुभयोरेव ब्राह्मणत्व मुररीकृत्य तथैव सूचयामास ब्राह्मणलक्षण मिति॥

अथ दृश्यते चैको ग्रन्थो निदानसूत्राभिधः सामवेदीयो दशप्रपाठकः। तत्रादौ 'अथातश्छन्दसां विचयं व्याख्यास्यामः'—इत्यादिभिः सामवेदच्छन्दोग्रन्थान्तर्गताना मृचां छन्दोविषया निर्णीताः, ततः 'अथातः स्तोभान् व्याख्यास्यामः (१. ८.)'—इत्यारभ्य सामवेदीयस्तोभग्रन्थगतस्तोभा निर्णीताः, ततः 'अथातः सामान्तानां चत्वारो भागाः (१. १२.)'—इत्यारभ्य सामान्तापरपर्यायाणि सामनिधनानि निर्णीतानि, ततो द्वितीयाध्यायारम्भे सामवेदीयोहग्रन्थादिविषया अप्यत्र चिन्तिताः, तत्रैव पञ्चमखण्डादौ 'अथातो यज्ञस्थानानि (२. ५.)'—इत्यारभ्य सामवेदीयकल्पशास्त्राण्युक्तानि, ततस्तृतीये 'अथायऽँसन्धिरन्तर्भागं भवति (३. ६.)'—इति सामवेदीयमन्त्रेषु व्याकरणविधयश्च सूचिताः, ततः पुनरेव क्रतुविधयो मन्त्रागमादिविधयश्च प्रपञ्चिताः, ततः पञ्चमाध्यायान्तखण्डत्रये 'अथातः संवत्सरवर्गाणां पञ्चसंवत्सरवर्गाः (५. ११-१३)"—इति ज्योतिषग्रन्थविषयाः कालादयोऽपि निर्णीताः। ततश्च पुनरासमाप्तिं सामग्रन्थीयव्रतद्वन्द्वादिपर्वविषयाः, बृहद्रथन्तरादिसामविषयाः, सत्राहीनैकाहादिक्रतुसम्पादकविविधसामादिविषयाश्च विधयः प्रपञ्चिताः। अत्रैव यथाप्रयोजनं निरुक्तं स्वरादिशिक्षाविधानं च क्वचित् क्वचिदुपदिष्टञ्च, परं न तथापि सर्वत्र तत् कृतकृत्यतां प्रतिभाति; नापि निरुक्तोक्तं स्थालशब्दनिर्वचनं

सामशब्दनिर्वचनस्थाने यथोक्तं पश्यामः ; अत इदानीं प्रसङ्गसङ्गत्येद मपि ब्रूमः,—सर्वेषा मेव वेदाना मेकैकं निदानसूत्र मासीदेवैतर्हि तानि लुप्तानीव, सन्त्येव वास्मदगोचराणीति । तदेतेभ्य एव निरुक्तादीनि वेदाङ्गशास्त्राणि समुद्भूतानि ; दृश्यन्ते हि क्षुद्रतमन्यग्रोधबीजादिभ्यः प्ररोहन्तो न्यग्रोधादिमहामहीरुहा अपि, अतएव चास्य शास्त्रस्य प्रथितं नाम निदानसूत्र मिति । निरुक्तकृताप्यसकृदेव प्रमाणत्वेनोपन्यस्तं (३ भा० १७६, ३६७ पृ०) 'नैदानाः'—इति । एवं निदानसूत्रे बहुत्रैव अनुब्राह्मणनामकीर्त्तनं च श्रूयते । यथाष्टमप्रपाठकीयतृतीयखण्डे—"षोडशिनोऽनुब्राह्मणम्"—इति, तत्रैव पुनः "अनुब्राह्मणम्—'स्युरेकविंश स्तोमाः'—इति" —इति । "पाणिनिश्च सूत्रयामास "अनुब्राह्मणादिनिः (४. २. ६२.)"—इति "तदधीते तद्वेद (पा० ४. २. ५९.)"—इत्यधिकारेऽस्य सूत्रस्य पाठादवगम्यत एवैष ग्रन्थो वैदिक एवेति । "ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम्, तदधीतेऽनुब्राह्मणी"—इति च तत्र दीक्षितवृत्तिः । ब्राह्मणसादृश्याचास्य चतुर्वेदीयत्व मपि प्रतीयते, ततस्तत्सङ्ख्याबाहुल्यञ्च सुतरां स्वीकार्य मेव । तत् कि मेतदनुब्राह्मणम् ? केन चित् क्वचिदपि दृष्ट मेक मपि किं न वेति वर्वर्त्ति महान् संशयः ।

अस्मद्गुरुचरणास्त्वेव मुपादिशन्,— ब्राह्मणोक्तानां छन्दोविध्यादीनां वैशद्याय, तदनूक्तानां दैवतादीनाञ्च कथनायैव तेषा मभवदाविर्भावः । ततस्ततोऽपि प्रकृष्टतमेषु समुत्पन्नेषु निदानसूत्रेषु तेषा मादराल्पत्वं सञ्जातम् । ततस्ततोऽपि प्रकृष्टतमेष निरुक्तादिषड्ङ्गग्रन्थेषु ऋष्यनुक्रमण्यादिषु ऋषिनैगेयादिषु च प्रकटितेषु प्रायोऽद्य विलोपदशां गतानि तानि ; साम्नां देवतादिख्यापनाय सामवेदीयं निदानसूत्रं सर्वतो नालम्, नाप्यद्यापीतोऽप्युत्कृष्टतरः कश्चन ग्रन्थ आविर्भूतः सामवेदीय इति तद्विषयकाण्येव तानि लुप्तावशिष्टानि सन्ति देवताध्यायादीनि पञ्चैवेति । तत्र देवताध्यायनामानुब्राह्मणे साम्नां देवताः श्रूयन्ते, आर्षेयनामानुब्राह्मणे ऋषयः, वंशनामानुब्राह्मणे सामवेदीयाचार्यवंशाः, संहितोपनिषन्नामानुब्राह्मणे

संहितादिविषयः, सामविधिनामानुब्राह्मणे नित्याग्निहोत्राणां रहस्यप्राय-श्चित्तादिसाम्नां काम्येषु प्रयोज्यानां साम्नां च विधानानीति ।

सायणाचार्येण तु देवताध्यायादीना मपि ब्राह्मणत्व मेवाख्यातम् । तथाहि ताण्ड्यब्राह्मणभाष्यभूमिकादौ—"अष्टौ हि ब्राह्मणग्रन्था प्रौढ़ं ब्राह्मण मादिमम् । षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत् । आर्षेयं देवताध्यायं भवेदुपनिषत्ततः । संहितोपनिषद् वंशो ग्रन्था अष्टा-वितीरिताः"–इति । अत्र यदुच्यते प्रौढ़ मिति, तदेव ताण्ड्य मिति सामगप्रसिद्धम् ; यच्चोच्यते षड्विंश मिति, तस्यैवान्ताध्यायोऽद्भुत मिति कथ्यते; यदुच्यते उपनिषदिति, तदेव छान्दोग्य मिति सामगैर्व्यपदिश्यते । तत्र चाद्यद्वितीयाध्याययोर्मन्त्र इति समाख्याविशेषः तृतीयाद्यासमाम्नाना मष्टानामध्यायाना मुपनिषदिति चेति ।

अत्रास्मद्विश्वासस्त्वेवम्,—सायणाचार्यस्तु नासीद् गुरुमुखादधीतसाम-विद्यः, ततोऽत्र नैव तद्वचनं प्रमाणं भवितु मर्हतीति ; अनुभूयत एव हि सामवेदे तस्यापूर्णाधिगतत्वं प्रतिपद मेव । तथाहि प्रथमं तावत्—साम-वेदीयार्चिकग्रन्थमात्राणां व्याख्यानेनैव समग्रसामसंहिता व्याख्याता भवि-ष्यतीति विचारयतैव तेनोक्त मेतत् सामभाष्यावतरणिकावसानकाले— "नन्वस्मिन् सामवेदे ब्राह्मणभागस्य व्याख्यातुं योग्यत्वेऽपि मन्त्रभागस्य न व्याख्यानयोग्यतास्ति"–इत्यारभ्य "ऋचः संहिताग्रन्थे छन्दोनामके समा-म्नाताः, ताः सर्वा ऋच आम्नातक्रमेणेह व्याख्यायन्ते"–इत्यन्तम् । न च तदनुमोदन्ते सामगाः ; पदवाक्यस्तोभादियुक्तानां हि साम्नां भवत्येवार्था-न्तरता, तदर्थज्ञानाय च सामग्रन्थव्याख्यानस्याप्यतितरां कर्त्तव्यत्वात् । सामातिरिक्ताश्च मन्त्रा न हि सर्वं एव निःशेषेण छन्दोग्रन्थे श्रुताः, यत् तेषा मेव व्याख्यानेन भवेयुर्व्याख्याताः सर्वं एव ते ; गानग्रन्थेष्वप्यारण्यके आक्र-न्द्येत्यस्या ऋचः, स्तोभग्रन्थे आयुर्विश्वायुरित्यादीनां यजुषां च श्रूयमाण-त्वात् । तदेतस्माच्च स्फुट मवगम्यते, नाधिगतास्तेन गानस्तोभग्रन्थाः ; अपि तु मीमांसादिशास्त्रदर्शनत एवावगता तेषां विद्यमानतेति

द्वितीयम्। तत्रैवोक्त मपर मपि—"न च तासां (ऋचाम्) क्रतुषु स्वातन्त्र्येण विनियोगोऽस्ति"—इति। तदपि भ्रमविजृम्भित मेव; ऋक्त्रयाणा मपि बृहद्रथन्तरादिस्तोमानां क्रतुषु विनियोगदर्शनादिति तृतीयम्। यच्चोक्तम्—"तासा मृचां क्रमव्यत्यासेन बह्वृच प्यधीयमानत्वात्तदीयानुक्रमणिकोक्तानि ऋष्यादीन्येवात्रानुसन्धेयानि"—इति, तदपि तस्यैकदेशदर्शित्व मेवावेदयति; बह्वृचैरनधीताना मप्यृचा मिह विद्यमानत्वात्, सामवेदीयर्चा मृष्यादिपरिज्ञानाय नैगेयनामग्रन्थानां प्रामाण्यतरत्वाच्च; सन्ति चानेकत्र मतभेदाः अनुक्रमणी-नैगेयशास्त्रयोरिति चतुर्थम्। तत्रैवानुपद मुक्तम्—"काण्डत्रयात्मको योऽयं छन्दोनामकः संहिताग्रन्थः"—इति, तदप्यसङ्गत मेव; सामवेदे— सामसंहितासु, आर्चिकसंहितासु, ब्राह्मणेषु वा न क्वापि हि तैत्तिरीयादाविव काण्डविभागो दृश्यते; अपि तु सर्वास्वेव संहितासु पर्वेति, ब्राह्मणेषु तु पञ्चिकेति च। तदत्र पर्वत्रयात्मक इति वक्तव्ये यदुक्तं काण्डत्रयात्मक इति, तेन व्यज्यते तस्य तैत्तिरीयादावेव ज्ञातबहुश्रमत्व मिति पञ्चमम्। एवं तत्रैवोत्तरत्र सर्वत्रैव 'प्रथमे दशति'—इत्यादि वक्तव्ये "प्रथमे खण्डे"—इत्याद्युक्त मिति षष्ठम्। किं बहुना एतस्माच्च भाष्यसमालोचनादिद मेव प्रतीयते,—स ह्यात्मनः खलु सर्ववेदभाष्यकर्तृत्वप्रतिपादनायैव अनधीताया अपि सामसंहिताया व्याख्याने प्रवृत्तः प्रायः स्वकृतात् ऋग्वेदभाष्यादेव यथायथं व्याख्यानान्युद्धृत्य ग्रथनेनैव अमंस्त सम्पन्नं सामभाष्यञ्चेति। वस्तुतो नैव तद् भाष्यं सामभाष्य मिति मन्यन्ते सामगाः; अपि बालक्रीडित मेव। यच्च तस्माद् गम्यते, तत्तु लभ्यत एव हि ऋग्भाष्यत एव; यत्तु न लभ्यते ऋग्भाष्ये, तत्तावन्नास्ति च तत्रापीति किङ्कृत मेतेन सामभाष्यडिण्डिमेनेति। तत्त्वतस्तु श्रीमान् सायणाचार्यो ह्यासीदधीततैत्तिरीयः, ततस्तद्विषयकज्ञान मेव तस्य सञ्जात मुपदेशानुरूपम्, बृंहितञ्च तत् स्वातिबुद्ध्यनुगतविशेषपरिशीलनादिभिः; अत एव तद्भाष्य मादरणीयतम मेव सम्पन्नम्; अध्वर्युवेदविदा ऋग्वेदवित्त्व मपि न दुराप मिति ऋग्भाष्य मपि सम्पन्न मेवादरणीयतरम्;

ऋग्यजुषोर्व्याख्यातुस्तु ऋग्यजुर्मयस्यैवाथर्ववेदस्यापि व्याख्याकरणं न सुदुष्कर मिति तस्यापि भाष्यस्य सम्भवत्येवादरणीयता ; परं सामवेदस्तु गुरुमुखादनधीतो नैव भवेदुच्चार्य्योऽपि तद्बोधस्तु दूरपराहत एव । सामसंहिताया भाष्ये कर्त्तव्ये—'ऊप् ऊप्', 'विवि', 'वंवम्'–इत्यादिपदस्तोभयुक्तानां साम्नां व्याख्यानानि कर्त्तव्यानि ; "आयुर्विश्वायुर्विश्वम्"–इत्यादियजुर्मात्राश्रितसाम्नाञ्च व्याख्यानानि प्रदर्शयितव्यानि ; सर्वत्रैव सामसु मूलतः स्वरवर्णमात्रादिपरिवर्त्तनकारणानि यथायथं प्रदर्शयितव्यानि ; कस्यां योनौ कति सामानि किंस्वरूपाणि च तानि परिचेयानि ; साम्नां सर्वेषा मेव यथायथं नामानि सप्रमाणानि दर्शयितव्यानि ; तद्योनीनाञ्च नामानि छन्दआदीनि चोपदेष्टव्यानि ; साम्नां देवतादिकाश्च यथायथं विज्ञाप्याः ; यत्र यत्र ऋक्षु स्तोभो भवति, भवेत् तत्र तत्र तथैव प्रकाश्यो ऽत्रैष स्तोभो भवतीति ; प्रगाथमूलेष्वपि तथा प्रकटन मुचितम् ; ऋचाम्, स्तोमानाम्, स्तोभानाम्, साम्नाञ्च विनियोगादयः सर्वत्र ब्राह्मणं सूत्रञ्च प्रदर्श्यैव वक्तव्याः ; साम्नां प्रतिहारादिभागोपदेशाश्च सर्वत्र कर्त्तव्या एव ; तत्र निधनविचाराश्च प्रदर्शनीयाः ; १, २, ३, ४, ५, ६, ७, ८, र, उ, स्व, क, ᳡, —, ऽ इमानि च व्याख्येयानि ; मन्त्रमध्यगतानाञ्च २३४५, २३२, १९१, १ २ ३ ४ ५–इत्यादीना मर्थाश्च बोधयितव्याः ; प्रतिसामान्ते च यदस्ति कु धू इत्यादयः, तेषा मर्थाश्च विज्ञाप्या एव ; अपरयोनिषु चापरसामोत्पत्तिप्रभृतयश्चोदाहार्य्याः ; सामोपासनाप्रकाराश्च भावितव्या इत्यल मत्र प्रासङ्गिकचिन्ताविस्तरेणेति दिक् ।

प्रकृते त्विद मेव वक्तव्यम्—आर्षेयादिग्रन्थानां ब्राह्मणत्व मनुब्राह्मणत्वं वास्तु, गृह्यन्त एवाद्य तान्यपि ब्राह्मणानीत्येव ; मन्त्रब्राह्मणयोरेव वेदनामधेयत्वपर्यवसानात् ; अस्ति हि तेषां वेद इति व्यवहारोऽद्यतनीयानां वैदिकाना मिति । तथाच सम्पद्यत एतत्—ब्राह्मणानाम् (विधायकतदुपयोजकानाम्), अर्थवादानाम् (वेदाङ्ग-मीमांसा-पुराणेतिहासवीज-

रूपाणाम्), अनुब्राह्मणानां (ब्राह्मणसदृशानाम्) चेति त्रयाणा मेवैदानीं साधारणं नाम ब्राह्मण मिति ॥

अथात्र मन्त्रब्राह्मणनिर्णयप्रसङ्गादारण्यकोपनिषदोरपि किञ्चिद् ब्रूमः;—श्रूयते ह्यारण्यकं नाम च वेदभागः। स चैकाध्यायात्मक एवेति केचित्। ब्राह्मणभागपरिशिष्टरूप मेव तदारण्यक मिति च केचित्। पाणिनीयतः पुरा नैवासीत् किञ्चिदारण्यकनामेत्यपि केचित्। तदेतत् सर्वं मेव वेदानां मुमूर्षुंदशात्व मेवावेदयति। हन्त! यदि ह्यत्र "स्वाध्यायोऽध्येतव्यः"—इत्यादि-श्रुतेरादरः कार्यतो दृश्येत, यदि ह्यत्र "वेदः कृत्स्नोऽधिगन्तव्यः"—इत्यादि-स्मृतेश्चादरः कार्यतो दृश्येत, तर्हि सर्वैरवश्य मेतत्तु ज्ञात मेव स्यादारण्यकं न त्वध्यायात्मक मेव;—नापि ब्राह्मणान्त्यभागरूप मेव;—आसीच्च पाणि-नीयतो बहुप्रागपीति। तथाहि—सर्वेषा मेवारण्यकग्रन्थाना मध्यायपरि-गणनादेव ज्ञायते, नारण्यकग्रन्थोऽध्यायमात्र एवेति। यदि हि "पथ्यध्याय-न्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्"—इत्येतद्वार्त्तिकभाष्ये "आरण्य-कोऽध्यायः"—इत्येकवचनान्तोदाहरणदर्शनादेवारण्यकग्रन्थाना मेकाध्याया-त्मत्व मेव स्यात्, तर्हि तत्रैव "आरण्यकः पन्थाः, * * * आरण्यको न्यायः, आरण्यको विहारः, आरण्यको मनुष्यः, आरण्यको हस्ती"—इत्येकवचना-न्तोदाहरणानां दर्शनाच्च आरण्यक-पथ-न्याय-विहार-मनुष्य-हस्तीनां चैकै-कत्व मेवावधार्येतैव; न च तथावधार्यते केनचिदपि प्रकृतिस्थेन। तदेवं यथैव लोके पन्थानः, न्यायाः, विहाराः, मनुष्याः, हस्तिनश्च बहव एव सन्त्येव आरण्यकाः, तथैव वेदे अध्याया अपि बहवः सन्त्येवारण्यकाः; तथा सामवेदस्य छन्दोनामार्चिकमध्ये सामसंहिताग्रन्थेषु च सामारण्यक-दर्शनादेव स्फुट मवगम्यते, नारण्यकग्रन्थो ब्राह्मण एवोपनिबद्धो नापि परिशिष्टरूप एवेति; सामारण्यकमन्त्राणां हि सामसंहितामध्यस्थत्वेन तत्र न कस्यापि विरुद्धवाक्प्रवृत्तिसम्भवः, तेषां परिशिष्टता माश-ङ्कितु मपि न भवेत् कोऽपि सक्षमः। "अरण्यान्मनुष्ये (४. २. १२९)" —इति पाणिनीयसूत्रेण आरण्यको मनुष्य इत्येव सिद्ध्यति; न तु आर-

ण्यकः पश्वः, आरण्यकोऽध्यायः—इत्यादीनि पदानि ; अतोऽत्र तेषां साधनाय "पथ्यध्याय"–इत्यादिकं वार्त्तिक मपठीत् कात्यायनः ; एवञ्चोपपद्यते नासीत् पाणिनिकाले आरण्यकोऽध्याय इति ; सति हि तस्मिन् कथं न साधितस्तादृशप्रायेवरेणापीदृश आर्यप्रयोगः ?—इति चेत्, अत्रेदं ब्रूमः— आसीत् तदाप्यारण्यकोऽवश्य मेव ; सामसंहिता मध्यभागीयत्वादिनारण्यकस्यापि मन्त्रब्राह्मणात्मकत्वादेवातिप्राचीनत्वावधारणात् ; परं पाणिनिकाले नासीत् तथाविधमन्त्राणां ब्राह्मणानाञ्चारण्यक मिति व्यवहारः ; अपि तु मन्त्रात्मकारण्यकानां मन्त्रत्वेनैव ब्राह्मणात्मकानान्तु ब्राह्मणत्वेनैवेति नासम्भवः । भगवतः पाणिनेः तादृशप्रयोगासाधने तदाद्यपदार्थानां तात्कालिकोऽभाव एव कारण मिति तु वक्तुं नैव युज्यते ; तथावादिनां हि पाणिनिकाले आरण्यकाः पश्वानोऽपि नासन्,— आरण्यकाः हस्तिनोऽपि नासन्,—अरण्येषु गावः पुरीष मपि नोदसृजन्,— महद्धिम मपि नासीत्,—महदरण्य मपि नासीदेवेत्यादीनि च गलेकुठारन्यायेन स्वीकार्याण्येव ; पथ्यध्यायेति वार्त्तिकेन न हि अध्यायवाचक एवैक आरण्यकः प्रयोगः साधितः, नापि कात्यायनेन तदेवैकं वार्त्तिकं विरचित मित्यपि स्मर्त्तव्य मेवेति ॥

केचित्तु "सामध्वनावृग्यजुषी नाधीयीत कदाचन । वेदस्याधीत्य वाप्यन्त मारण्यक मधीत्य च (४. १२३.)"–इत्यत्र मनुवचने ऋग्यजुःसामभ्यः पृथगेवारण्यकोल्लेखदर्शनाच्च नास्त्यारण्यकस्य त्रयीत्व मित्याहुः, तदपि न साधीयः ; ब्राह्मणात्मकारण्यकस्यापि बोधनार्थं मेव तत्र तथोक्तत्वात् । तथाहि तस्य च मनुश्लोकस्याय मर्थः,— 'सामध्वनौ' सामगानानन्तरम् 'ऋग्यजुषी' ऋचः यजूंषि वा 'कदाचन न अधीयीत' ; न हि सप्तस्वराद्यन्वितगानानन्तरं त्रैस्वर्यादिश्रुतिमधुरा भवेत्, नापि ह्युद्गाता सप्तस्वराद्यवतीर्य तदानी मेव स्वकण्ठतस्त्रैस्वर्यं काशितुं समर्थ इति तादृशयत्न एवासत्फलः स्यादिति तथा यतन मेव प्रतिषिध्यते । किञ्च 'वेदस्य अन्तम् आरण्यकम् अधीत्य अपि' ऋचो यजूंषि वा मन्त्रा न अधी-

यीत ; तादृशारण्यकाध्ययनत एवाध्येतुः श्रोतृणाञ्च मनसां ब्राह्मणत्वेन परिदृष्टत्वात् ततोऽपि ऋङ्मन्त्रयजुर्मन्त्रयोः पाठो निषिद्धः ; न हि पूर्णा-दरस्यान्तेऽपि रुचिसम्भवः। अत्र च वेदस्य अन्त मारण्यक मित्युक्त्या ऐतरेयकतैत्तिरीयबृहदाथर्वणारण्यकाना मेव ग्रहणं बोध्यम्, तेषा मेव ब्राह्मणात्मकवेदस्यान्तावयवत्वात् ; सामारण्यकमन्त्राणान्तु मन्त्रभाग-मध्यस्थितत्वेन वेदस्यान्तरूपत्वाभावादिहाग्रहण मेव ; परं पूर्वार्द्धे साम-ध्वनावित्युक्त्यैव तद्ग्रहणं सम्पन्न मिति सामारण्यकाध्ययनात् पर मपि ऋग्यजुर्लक्षणान् मन्त्रान् नाधीयीतेत्येव। एवञ्च वेदेषु श्रुताना मारण्यका-नान्तु वेदत्वं तदनुगतप्राचीनतमत्वञ्चाक्षत मेव ; प्रत्यक्षस्य बाधाभावात्।

ऐतरेयकपञ्चमारण्यकादीनान्त्ववेदत्वं सर्ववादिसम्मत मेव। तथा ह्याह सर्ववेदभाष्यकारः सायणाचार्यः स्वय मेव—"महाव्रतस्य पञ्चविंशति मित्यादि पञ्चमारण्यकं सूत्र मेव ; अरण्ये एवैतदध्येय मित्यभिप्रेत्याध्येतार आरण्यकाख्येऽन्तर्भाव्याधीयते"—इत्येवमादि। तदित्थं यथा मन्त्रभागे सन्त्येव खिलरूपाः श्रीसूक्ताद्यात्मकमन्त्राः, परं न च ते सम्मि-लिता मन्त्रभागावयवत्वेन ; तथैव ब्राह्मणभागेऽपि सन्त्येव पञ्चमारण्यका-दीनि च, परं नैव तानि सम्मिलितानि ब्राह्मणभागावयवत्वेनेति। तत् तादृशानां मा भूत् वेदत्वं प्राचीनतमत्वञ्चेति ; तदन्येषान्तु वेदात्मकारण्य-कोपनिषदां वेदत्वं तथा प्राचीनतमत्वञ्चापह्नोतुं न कोऽपि क्षमेतेति सर्वं मवदातम्॥

एवं पाणिनिसूत्रेषु क्वापि वेदांशवाचकत्वेन उपनिषच्छब्दस्य प्रयोगा-दर्शनात् पाणिनीयतः पूर्वं मुपनिषदो नासन्नित्यप्याहुः केचिदाधुनिकाः, तदप्यस्माक मतिविस्मयकर मेव ; संहितासु पञ्चस्वेव, ब्राह्मणेषु च बहुषु विकीर्णरूपत्वेन बहूना मेवोपनिषल्लक्षणवचनाना मीशावास्य मित्येवमादी-नाम्, उपनिषदिति ब्राह्मणग्रन्थेषु प्रसिद्धानाञ्च प्रत्यक्षदर्शनात्। भगवता पाणिनिना उपनिषत्पदसाधनाय विशेषः कश्चन प्रयत्नो नोद्भावित इत्येव उपनिषदा माधुनिकत्वे बीज मिति त्वद्भिमता मप्यक्षिषु धूलिनिक्षेपणाय

यत्न एव । न हि सर्वतोमुखसूत्रकारेणाचार्य्येण प्रतिपदसाधनायैव विभिन्नं सूत्रं कार्यम् । तथाच साधारणनियमत एव सिद्धे ह्युपनिषच्छब्दे विशेष-वक्तव्याभावादेव न कृतं सूत्रान्तर मिति सुवच मेवाच समाधानम् ।

"ऋगयनादिभ्यः (४. ३. ७३.)"—इति सूत्रीये ऋगयनादिगणे "वेतनादिभ्यो जीवति (४. ४. १२.)"—इति सूत्रीये च वेतनादिगणे उपनिषच्छब्दस्य पाठोऽपि दृश्यत एव। इदानीम्प्रचलितस्यास्य गण-पाठस्यापाणिनीयत्वस्वीकारेऽपि आसीच्च पूर्वं कश्चनैवं गणपाठोऽपीत्यवश्यं-स्वीकार्य मेव ; अन्यथा हि "ऋगयनादिभ्यः"—"वेतनादिभ्यः"—इत्यादिषु सर्वत्रैव आदिशब्दव्यवहार एवाचार्यस्य व्यर्थता मापद्येत । स्वीकृते तु तस्मिन् प्राचीनगणपाठे नासीदेवोपनिषच्छब्द इत्यत्र मानाभावादुप-निषदा माधुनिकत्वपक्षः स्यान्निःसहाय एव । ऋगयनादीना माकृति-गणत्वस्वीकारेऽपि पाणिनेरुपनिषच्छब्दाज्ञानं न सिध्यति; विनिगमना-विरहात् । सति हि पाणिनेरुपनिषज्ज्ञाने "वेतनादिभ्यः"—इत्येवं नोक्त्वा "उपनिषदादिभ्यः"—इत्येव ब्रूयादिति तु कुतर्क एव ; तथोक्ते हि पाणिने-र्वतनज्ञानं नासीदित्यपि उच्येतैवेति तुल्यो न्यायः ।

किञ्च वेदांशवाचकोपनिषच्छब्दोच्चारणं पाणिनिना न क्वचिदपि कृत मित्यत एवोपनिषदां पाणिनीयपरभवत्व मनुमीयेत चेत्,—कात्यायनेनापि तथा नोच्चारितम्, पतञ्जलिनापि तथा नोच्चारित मिति वार्त्तिकपाठात् महाभाष्याच्च परभवत्वं तासा मबाध मेव ; किं बहुनाद्यतनीयेऽपि क्वचित् व्याकरणे न दृश्यते उपनिषत्साधनाय यत्नविशेष इति नाद्यापि काचिदु-पनिषदाविर्भूतेत्यपि वक्तुं युज्येतैव । अथेदृशेऽपि वचने यदि कश्चित् श्रद्धीत, तर्हि तादृशवचनेऽपि ते श्रद्धां विधत्ता मित्येवास्माकम् ।

वस्तुतस्तु इदानीं यावन्त्य उपनिषदः प्रथिता दृश्यन्ते, न च ताः सर्वा एव वेदोपनिषदः ; प्रत्युत तत्र सन्त्येव कतिपया वेदविद्भिर्वेदार्थतत्त्वोपदेशा-यव स्वशिष्येभ्य उपदिष्टाः, उपनिषत्तुल्या इति उपनिषदिति गृहीताश्च शिष्टैः; रामतापन्यादयो ग्रन्थास्तु कैश्चिदर्वाचीनैरेव स्वसम्प्रदायमर्यादा-

हृदये प्रणीताः, तासा मप्युपनिषत्त्वं तु मन्यन्ते च तदनुगता एव; अन्यथा-दयस्तु सर्वथा अग्राह्या एव; परं यास्तु मन्त्ररूपा ब्राह्मणरूपाश्च, ताः खलु पाणिनेर्जन्मतो बहु प्रागपि स्थिता इति ध्रुवम्; अपि वेदविदा मुपदेश-रूपाश्च याः काश्चिदुपनिषत्तुल्या उपनिषदित्येव प्रसिद्धाः, तासां बहुशो-ऽप्यासन्नेव पाणिनीयतोऽपि पूर्वम्; नास्त्यत्र सन्देहलेशोऽपि। इह युक्तीश्च तिस्रोऽवलोकयामः। तथाहि—

(१) अस्त्येकं सूत्रं पाणिनीयम्—"जीविकोपनिषदावौपम्ये (१. ४. ७९.)" -इति। अनेन च सूत्रेण औपम्ये गम्यमाने एव जीविकोपनिष-च्छब्दयोर्गतिसञ्ज्ञा विधीयते, तस्याञ्च गतिसञ्ज्ञायां "कुगतिप्रादयः (२. २. १८.)"-इति समासो भवति। तथाच 'जीविकाम् इव कृत्वा'-इति विग्रहे 'जीविकाकृत्य'-इति पदम्, 'उपनिषदम् इव कृत्वा'-इति विग्रहे च 'उपनिषत्कृत्य'-इति च पद मुदाहृतम्, "समासेऽनञ्पूर्वे क्त्वो ल्यप् (७. १. ३७.)"-इति ल्यभावश्च तादृशसमासफल मिति च दर्शितं वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन। इत्थञ्च 'उपनिषत्कृत्य'-इत्यस्य पदस्य 'उपनिषद्ग्रन्थतुल्यग्रन्थकरणानन्तरम्'-इत्येवार्थः सर्ववैया-करणसम्मतः। तदेवं पाणिनेः प्राचीनतमोपनिषद्विषयकं ज्ञान मासीन्न वेति विचारस्तु दूरे आस्ताम्,—रचनया स्वरेण तात्पर्येण वा ये च ग्रन्था उपनिषत्तुल्याः कृताः पाणिनिपूर्वतनैर्वेदोपनिषद्विद्भिः, तेषा मुपपनिष-त्तुल्याना मपि बोध आसीत्तस्येत्यपि स्फुटम्। सिद्ध मित्थं कासाञ्चित् कृत्रिमोपनिषदा मप्यस्तित्वं पाणिनिकालात् पूर्वस्मिन्नपीति, तत् कस्तत्र सन्देहस्तदानीं प्रकृतोपनिषदा मस्तित्वे इति विचारयन्तु धीमन्त एव।

(२) अस्ति चैतत् सूत्रम्—"पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (४. ३. ११०.)"-इति। एतच्च पाणिनिनैव कृत मिति मन्तव्यं चेत्, अवश्य मेवैतत्कर्त्तुः पाणिनेः भिक्षुसूत्रास्तित्वज्ञाने सन्देहाभावः स्वीकार्य एव; स च सूत्रग्रन्थो वेदान्तदर्शनवीजभूतः, उपनिषद एव च तत्करण मित्युपनिष-द्विषयकज्ञान मपि पाणिनेरवश्य मेव स्थित मिति सुतरां प्रतीयत एव।

(३) ये तु निरुक्तकारस्य यास्कस्य पाणिनिपूर्वजत्वं स्वीकुर्वन्ति, तेषां प्रबोधायेद मपि स्मारयामः—"यच्चा सुपर्णा (ऋ० सं० २. २. १८. १.)"—इति मन्त्रस्याधिदैवतव्याख्यानपक्षेऽब्रवीद्यास्कः—"इत्युपनिषद्वर्णो भवति (निरु०२भा० ३०२पृ०)"—इति। "यया ज्ञान मुपगतस्य सतो गर्भजन्मजरामृत्यवो निश्चयेन सीदन्ति, सा रहस्यं विद्या उपनिषदित्युच्यते ; उपनिषद्भावेन वर्ण्यत इति उपनिषद्वर्णः"—इति च तदीयं भाष्यं दुर्गाचार्यकृतम्। अथैतर्हि तेऽधिब्रुवन्तु पाणिनिपूर्वजस्य यास्कस्याप्युपनिषज्ज्ञान मासीचेत्, कथन्न तत्परजस्य पाणिनेरुपनिषज्ज्ञान मिति ?

तदेव मेतत्समालोचने प्रवृत्ताना मस्माक मेव मेव बोधः सम्पद्यते— ये केचनोपनिषदां पाणिनीयतोऽप्यर्वाचीनत्वं निरनयन्, ते नूनं "जीविकोपनिषदावौपम्ये"—इति पाणिनिसूत्रस्य प्रकृतमर्थं न विदन्ति; भिक्षुसूत्रग्रन्थोऽपि तेषां न कदापि दृग्गोचरतां गतः ; उपनिषदां पाणिनीयतः प्राचीनत्वाप्राचीनत्वनिर्णयसमये प्रदर्शितं यास्कीयवचनञ्च तन्मनःसु नोद्भूत मित्येव ते तथा निर्णेतु मभवन् समर्था इति शम् ।

---

(१०)

अथेदानी मेषोऽपि प्रश्नः स्वतः समुदेति नाम,— तस्यैतस्य वेदस्योत्पत्तिकालनिर्णयः शक्योऽशक्यो वास्माक मिति। कथन्नाम शक्यः? कथं वा अशक्यः ? तदेवेह समासतश्चिन्तयाम इति यावत् ।

पश्याम एव तावत्,—प्राचीनानां कालिदासादिग्रन्थाना मपि कालाः सुनिर्णीता इव, अतिप्राचीनानां भूगर्भोत्थिताना मपि शिलास्तम्भादीनां भवत्येव कालनिर्णय इत्यपि ; वेदकालनिर्णये च केचिद्धीमन्तोऽपि यतितवन्त एवेति; तत एवैव मुत्पद्यतेऽस्माक मप्येषाशा, शक्योऽस्य कालनिर्णय इति । यदा तु स्मरामः,—अपौरुषेयोऽय मिति सिद्धान्तो मीमांसकानाम्; यदा चाध्यापयामः,—"नित्या वागुत्सृष्टा स्वयम्भुवा"—इति, "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थ मृग्यजुः-

सामलक्षणम्"—इति, "वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे"—इत्येवमादीनि च स्मृतिवचनानि, तदैव तत्र कृताशाः सम्पद्यामहे; अकृतकत्वादेवैतस्य। कृतकत्वेऽपि मनुष्यनिर्मितत्वाभावेन वाय्वादितुल्यत्वे नैव फल मनुसन्धानस्य। मनुष्यनिर्मितत्वेऽप्यनद्यतनयुगीयत्वेन प्रकृष्टबह्निर्णय-सम्भावनाविरहात् स्यादशक्य एवैतत्कालनिर्णय इति॥

एष खल्वार्याणा मादिधर्मग्रन्थः; धर्मग्रन्थानां प्रायः सर्वेषा मेवोत्पत्तौ कश्चनकश्चनालौकिकः प्रवादो विद्यत एव; अस्योत्पत्तिविषयेऽपि तथैवैषः,—'न केनचिदपि पुरुषेण प्रणीतो वेदः'—इति। मीमांसकानां कर्मशक्त्यनुमतफललाभवादिना मीश्वरविचारोऽप्यप्रयोजनीयः, परं वेदानां सर्वथानादित्वप्रतिपादने एव महान् यत्नः। तथाहि—"वेदांश्चैके सन्निकर्षं पुरुषाख्याः, अनित्यदर्शनाच्च"—इति सूत्रद्वयाभ्यां पूर्वपक्षं निर्माय सिद्धान्तित मुत्तरसूत्र-चतुष्टयेन—"उक्तन्तु शब्दपूर्वत्वम्, आख्या प्रवचनात्, परन्तु श्रुतिसामान्यमात्रम्, कृते वा विनियोगः स्यात् कर्मणः सम्बन्धात्"—इति मी० द० जै० सू० १. १. २९—३२। एतान्येव सूत्राण्यवलम्ब्य बहु विचारितं शास्त्रदीपिकादौ, तथा निर्णीतन्तु वेदाना मकृतकत्व मेव।

भगवता वादरायणेन तु वेदस्य ब्रह्मकार्यत्वं सूचितम् "शास्त्रयोनित्वात् (१. १. ३.)"—इति। ऋग्वेदादिशास्त्रकारणत्वाद् ब्रह्म सर्वज्ञ मिति हि तत्सूत्रार्थः। एतावताप्यपौरुषेयत्वं वाय्वादितुल्यत्वञ्च नापगतं वेदस्य; मनुष्यनिर्मितत्वाभावात्; फलञ्च तुल्यं तत्कालनिर्णयाय अनुसन्धानाननुसन्धानयोः; न हि मनुष्यनिर्मितातिरिक्तेषु कालनिर्णयसम्भवः, ततस्तत्र नैव वाचः प्रसरन्ति प्रेक्षावतां विपश्चिताम्। को नाम मर्त्यो निर्णेतुं क्षमः, कदैषाभवत् सृष्टिः? आदिसृष्टेर्वर्णनन्तु स्वस्वकल्पनाशक्तेः परिचयदानमात्रम्। पृथिव्याः अन्तस्तरादिदर्शनात् पृथिवीसृष्टिकालकथन मपि धीशक्तेः परिचयदान मेव। पुराणोक्तास्सृष्टिकथाश्च नैकरूपाः स्मर्यन्ते, अतस्ताः कल्पनाप्रसूता एव न तत्रापि संशयः; अस्तु वा कल्पभेदेन तत्र विरुद्धभाषणमीमांसा, न तथापि सृष्टेरादिकालनिर्णयः सम्भवेत्। एवं ब्राह्मणादिश्रुतञ्च

सृष्टितत्त्वं मन्तव्यं किल यथायथ मेवेत्यत्रापि धीमतः संशय एव समुत्पद्यते; वेदार्थसहायके निखिलमीमांसादर्शनेऽपि ब्राह्मणगतसृष्टिप्रतिपादकाख्या-ख्यायिकावाक्यानां काल्पनिकत्वनिर्णयात् । तथाहि "बबरः प्रावाहणिर-कामत"-इत्येवमादिषु श्रुतिषु बबरादीना मनित्यार्थानां संयोगात् वेदस्या-धुनिकत्व माशङ्क्य सिद्धान्तित मेतत् — "न तु तत्रानित्यो बबराख्यः कश्चित् पुरुषो विवक्षितः, किन्तु बबर इति शब्दानुकृतिः; तथासति बबरेति शब्दं कुर्वन् वायुरभिधीयते ; स च प्रावाहणिः, प्रकर्षेण वहनशीलः । एव मन्य-त्राप्यूहनीयम्"-इति (मी० जै०सू०१.२.५०. सा०भा०) । निरुक्तकारः खलु यास्कोऽपि तादृशानां निखिलब्राह्मणवचनाना मादरातिशयेन प्रामाण्यं नाङ्गीचकार । अत एवाह—"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति (७. ७. २.)"-इति । वस्तुतो वैदिकसृष्टिविवरणानि तु प्रायो रूपकाण्येवेति नाल मैतिहासिकतोषायेति । तदेव मादिसृष्टिकालनिर्णयो न कदापि भूतो भवति भविष्यति वा । अतएव श्रूयन्ते—"ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्व मिदं जगत् (ऋ० सं० ८. ८. ३१. ४.)"-इत्येव-मादयः, स्मर्यन्ते च—"सिद्धे शब्दार्थसम्बन्धे (का० वा० १.)"-इत्यादयः, "सिद्धा द्यौः सिद्धा पृथिवी, सिद्ध माकाशम् (पा० भा० १. १. १.)"-इत्येवमादयश्च । सिद्धशब्दस्य चेह नित्यार्थता ; तथाह्याह पस्पशायां भग-वान् पतञ्जलिः—"नित्यपर्यायवाची सिद्धशब्दः"-इति । वेदस्यापि तथात्वे तत्कालनिर्णयमनोरथद्रुमः खलु भवेच्छपलाहत एवेति ।

यास्केन त्वेवं प्रदर्शितः पुरावादः—"साक्षात्कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान्सम्प्रादुः, उपदेशेन ग्लाय-न्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च (२भा० १३७ पृ०)"-इति । सिद्धञ्चेत्थं वेदाना माम्नातत्व मार्षत्वञ्च । ऋषयः खल्वस्मत्पूर्वपुरुषा इति मनुष्या एव । परन्त्वेव मप्यशक्यनिर्णयतैव वेद-कालस्य ; आम्नानकृतयोर्विभिन्नार्थत्वात् । आम्नात इत्युक्ते न ज्ञायते कृत इति, अपि बुध्यते अभ्यस्त इत्येव ; अभ्यासे एव म्नातेरुपदेशात् (धा०

पा० १.६२९.)। एव मभ्यासस्तु पूर्वस्थितानामेव भवति; न तु क्रियमाणानाम्। अतएव वामदेव्यादीनि सामानि वामदेवादिभिर्दृष्टान्येवोच्यन्ते; न तु कृतानीति प्राचीनाः।

वैशेषिक-न्याय-साङ्ख्य-पातञ्जलेष्वपि वेदस्य प्रामाण्यं स्वीकृत मेव; परं न चोक्त मकर्तृक इति, नाप्युक्त मीश्वरकृत इति च; अपि त्वार्षैः ऋषिभिरेवैषः कृत इत्येव। तथाहि—"बुद्धिपूर्वा वाक्यकृतिर्वेदे, ब्राह्मणे सञ्ज्ञाकर्मसिद्धिलिङ्गम् (६.१.१, २.)"—इति, "आर्षं सिद्धदर्शनञ्च धर्मेभ्यः (९. २. १३.)"—इति, "तद्वचनादाम्नायस्य प्रामाण्यम् (१०.२१०)"—इत्येवमादि च वैशेषिके। एव मन्येषु च।

एवं "विश्वामित्र ऋषिः०—० नदीस्तुष्टाव गाथा भवतेति (२भा० २३७ पृ०)"—इति, "ऋषिपुत्र्या विलपितं वेदयन्ते (३ भा० १० पृ०)"—इति, "गृत्समद मर्थ मभ्युत्थितं कपिञ्जलोऽभिववाशे, तदभिवादिन्येषर्ग् भवति (४ भा० ५ पृ०)"—इत्येवमादिषु यास्कवचनेषु चोपलभ्यते तत्तन्मन्त्राणा मृषिकृतत्व मेव। "सर्प ऋषिर्मन्त्रकृत् (ऐ० ब्रा० ६. १. १.)"—इत्यादिब्राह्मणवाक्येभ्यश्च स्फुट मवगम्यते मन्त्राणा मप्यृषिकृतत्वम्।

वस्तुतो बहूनां मन्त्राणां समालोचनादपि व्यक्तं प्रतीयत एव तेषां धीमत्पुरुषकृतत्वम्; विशेषतः क्वचित् क्वचित् मन्त्रे एव ध्वन्यते चैषां बहुपुरुषकृतत्वञ्च। तथाहि—

"सक्तु मिव तितउना पुनन्तो यत्र धीरा मनसा वाच मक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि।"
—इति ऋ० स० ८. २. २३. २.।

तथा चास्मत्पूर्वपुरुषैः ऋषिभिरेव कृत एष वेदमन्त्रभागोऽपीति सुस्थिरम्॥

सत्येव मप्येषां कालनिर्णयस्त्वशक्य एव; अनद्ययुगीयत्वात्। तथाहि—एतद्युगप्रथमसहस्राब्द्या मेव जातः पाणिनिराचार्य इति तु सिद्धान्तितम् (जि—भ पृ०); ततोऽपि पूर्वतनाः क्रमकारा बाभ्रव्यादयः; ततोऽपि पूर्वतनाः पदकाराः शाकल्यादयः; ततोऽपि पूर्वतना ऋक्तन्त्रादिप्रणेतारः शाक-

टायनादयः ; ततोऽपि पूर्वतना नवयुगारम्भजन्मानो लाट्यायनादयः कल्प-सूत्रकाराः (तदानी मेव नवकल्पारम्भ इत्येव तत्कालकृता ग्रन्थाः कल्पा इत्युच्यन्त इति च नासम्भवः) । एतद्युगारम्भात् पुरैव प्रणीतानि कुसुरु-विन्दादिभि ऋषिभिः अनुब्राह्मणादीनि ; ततः पूर्वस्मिन्नेव युगे कल्पे वा मह्दीदासादिभिः श्लोकानुश्लोकगाथादीनि सङ्गृह्य तदनुसारेण कृतान्यैत-रेयादीनि ब्राह्मणानि ; ततः पुर एव युगे कल्पे वा प्रवादानेवानुसृत्य प्रणीताः श्लोकानुश्लोकगाथादयः ; ततः पुर एव युगे कल्पे वा श्रूयन्ते स्म विकीर्णाः प्रवादास्तत एवाद्यापि ते श्रुतय इत्याख्यायन्ते च ; ततः पुर एव युगे कल्पे वाभवत् यज्ञप्रयोगारम्भः ; तदैवाथर्वणा कृत एकेनैव यत्नेन चतुःसंहितासङ्ग्रहः (ठा पृ०) । तत्पूर्व मेव सम्पन्ना बभूवुः सूक्तमण्डलादिसङ्ग्रहाः, तत्रापि नास्ति संशयः । ततः पुरा तु बहुकाल मभिव्याप्य बहुभिः ऋषिभिर्बहुभिरेवोच्चावचैरभिप्रायैः प्रणीता बहवो मन्त्राः । तदेवं बहुयुगपूर्व मेवारब्धा मन्त्ररचनाः, तत्कथङ्कार मद्यतनैः शक्यो निर्णेतुं तत्कालः ; अनद्यतनीयानां तादृशातिप्राचीनतमानां काल-निर्णये हि न कि मपि लिङ्गं प्रतिभासेत बहुधीमता मप्यद्यतनानाम् । भवति हि व्यक्तिनिर्णयपूर्वक एव कालनिर्णयः, न चात्र क्वापि व्यक्तिनिर्णयः सम्भाव्यते ; न ह्येतत्कृतोऽसौ मन्त्र इति क्वापि लिखितं दृश्यते । दृष्टृशब्द एव कृतवाचक इति चेत्, तथापि न व्यक्तिनिर्णयः सुकरः ; अग्निना दृष्ट इत्यादौ अग्नीत्यादिसञ्ज्ञानां सञ्ज्ञाशून्यत्वेन कल्पितसञ्ज्ञत्वेनैव वा प्रायोऽवधार्यत्वात् । यथा च खलु सूर्यवंशीयानां क्षत्रियाणा मादिपुरुषः सूर्य इति तु शब्दतः प्रतीयत एव, पर मुदीयमानस्यैतस्य दिनमणेरेवौ-रसजातः स वंश इति विश्वासस्तु कथं भवेन्नाम सर्वशेमुषीमताम् ? अतस्तद्वंशादिपुरुषस्य प्रकृतनामाज्ञानात् सौर्यत्वेन च कल्पितो नाम सूर्य इत्येव तत्र स्वीकार्यम्, तथैवात्रापि । "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् (म० सं० १. २३.)"—इत्यादि (अस्ति चात्र विशेषतात्पर्य मपि) । तस्मात् तत्त्वतः प्रणेतृव्यक्तिनिर्णयासम्भवादेव मन्त्रकालनिर्णयस्याशक्यतैव सम्पद्यते ।

"अर्चिषि भृगुः सम्बभूव (निरु० २भा० ३३२ पृ०)"–इत्यादिनिर्वचनाच्च वंशादिसम्बन्धानां किञ्चित्तात्पर्यमूलकल्पकत्व मेवानुमीयते। अथ यदि 'तुष्यतु दुर्जनः' इति न्यायेन स्वीकुर्मः,—समुत्पन्न एव कश्चित् भृगुर्नाम महर्षिस्तथैव, स्तस्य भृगोरेव भार्गवं नाम सूक्त मिति, तथापि न सम्भवेत् व्यक्तिनिर्णयः; को हि जानाति कोऽयं भृगुः कदेमां स्रुव मतक्षकारेति? यत्र क्वचन मन्त्रे वसिष्ठ-नाम श्रूयते, तस्यापि रचनाकालनिर्णयोऽस्माक मशक्य एव; यतो हि को जानाति आदिवसिष्ठः कदोत्पन्न इति? एवं यान्यपि इड़ादिभिर्भृगुभिरिन्द्रप्रमतिप्रभृतिभिर्वसिष्ठैश्च दृष्टानि सूक्तानि श्रूयन्ते, तेषा मप्युद्भवकालविषयता गाढ़तमोभिराच्छन्नैव; वर्वंश्यैव हि तत्र तत्रापि कालनिर्णायकलिङ्गाभावः, नापि हि आदिभार्गवस्यैव भार्गव इति, आदिवासिष्ठस्यैव च वासिष्ठ इति व्यवहारनियमो विद्यते लोकेऽन्यत्र वा। तथैव वेदे काश्यपवचन मप्यस्ति सत्यम्! परं न ह्यत्र पृथिव्या मेक एव काश्यपः सञ्जातः, अह मपि काश्यपः, मत्पुत्रोऽपि काश्यपः; मत्पौत्रोऽपि भविष्यति काश्यप एव। एवं भारद्वाजादयोऽपि। तस्मादेतादृशनामपर्यालोचनया च मन्त्रप्रणयनकालनिर्णये यत्नः सर्वथा व्यर्थ एव।

एतच्च निर्णीत मेव विद्वद्भिः,—अद्य यावत् यावतां प्राचीनप्रबन्धाना मनुसन्धानं सम्पन्नम्, तेषु सर्वेष्वेवैष मन्त्रभागः प्राचीनतम इति ध्रुवम्; अस्मादपि पुरातनः कश्चित् प्रबन्धो बभूव, इदानीं लुप्त इत्यपि वक्तुं न कस्यापि पुरातत्त्वानुसन्धित्सोरोष्ठाधरौ स्फुरताविव दृश्येते; वर मस्यैव निगमकल्पतरोर्बह्व्य एव शाखाः प्रलयवात्या कालसागरे निमग्ना उपलभ्यन्त एव। एकस्यैव हि ऋग्वेदस्य नव शाखाः स्थिता इति सर्वसम्मतम्, पर मतिप्राचीनेन निरुक्तकारेण यास्केनापि एकैवैषाद्यप्रचलिता शाखाऽदर्शीति गम्यते, नान्याः; निरुक्ते ऽसकृदेव दशतयीत्यस्यैवोल्लेखदर्शनात्। न हि सर्वासा मेव शाखानां दशमण्डलात्मकत्वेन दशतयीत्वसम्भवः। अद्यापि विद्यमानासु शुक्लयजुषः काण्वमाध्यन्दिनमैत्रावरुणशाखासु परिच्छेदवैषम्यं हि दृश्यते

एव; तथैव तत्राप्यवश्य मेव भवितव्यम्; तस्मात् न कथ मपि सर्वासा मेव बह्वृचशाखानां दशतयीत्वसम्भवः। एवञ्च यास्कजन्मतो बहु प्रागेव नूनं शिष्टा अष्टौ शाखा एकैकशः क्रमाद् विनष्टा इत्यनुमानं च नासङ्गतम्। तदेवं विचारयन्तु धीमन्तः,—यास्ककालात् मन्त्रकालस्य कीदृक् प्राचीनत्व मिति। तदित्थं मन्वन्तरयुगीयत्वात् व्यक्तिविज्ञानवाप्तेः रचयितृव्यक्तिनिर्णयाभावात् मन्त्रभागस्य कालनिर्णयस्तु सर्वथा अशक्य एवास्माक मद्ययुगीयाना मिति॥

ब्राह्मणग्रन्थाना मपि कालनिर्णये यत्नोऽप्येव मकिञ्चित्कर एव; न हि तेषु कस्याप्येकस्य कालनिर्णयसहायः संवादोऽवगम्यते क्वापि लोके शास्त्रे वा। ततः सर्वेषा मेव युगान्तरीयग्रन्थानां कालनिर्णये एतत्सङ्ख्यकाब्देऽसौ प्रणीत एवेति निर्द्धारणे वय मसमर्था एव सर्वथा। मन्त्रब्राह्मणयोः सम्यक् पर्यालोचनया मन्त्रभागात् परभवो ब्राह्मणभाग इति तु वक्तुं युज्यते; एवम् मन्त्रब्राह्मणयोरुभयोरपि भागयोरन्तरेऽपि एतस्मान्मन्त्रादेष मन्त्रः परभवः, एतस्माच्चैष प्राग्भवः, किञ्चैतस्माद् ब्राह्मणादेतद् ब्राह्मणं ब्राह्मणवाक्यं वा परभवम्, एतस्माच्चैतद् प्राग्भव मित्यपि प्रायो निःशङ्कं निर्णेतुं शक्यते; पर मेतद्युगीयैतत्सङ्ख्यकेऽब्देऽसौ मन्त्रग्रन्थो ब्राह्मणग्रन्थो वा प्रणीतो ग्रथितः सङ्कलितो वेति नास्मादृशां बोधयोग्यम्। अतएव मन्त्रभागस्येव ब्राह्मणभागस्याप्यनादित्व मुपचर्यतेऽद्येति॥

यद्यप्यैतरेयभाष्यभूमिकायां सायणाचार्येणापि प्रकाशित एवेतरायाः पुत्रो महिदासाख्यो भूमिदेवतातो वर मवाप्य भाषितं यद् ब्राह्मणं, तदेव प्रथित मैतरेय मितीति प्रवादः। तथापि तस्यापि ब्राह्मणस्य न शक्यः कालनिर्णयः; प्रदर्शितप्रवादात्त्विद मेव हि ज्ञायते,—इतरेतिप्रसिद्धायाः कस्याश्चिदपि ऋषिरमण्याः पुत्रेणेदं प्रोक्त मिति, परं तस्मान्नैव मभिव्यज्यते,—एतद्युगीये एतस्मिन्नब्दे किल सा ऋषिरमणी तद्ब्राह्मणग्रन्थं प्रणेष्यन्तं कुमारं प्रसूयेमं जगतीतल मलङ्कृतवतीति। एवञ्चैतरेयादिग्रन्थानां कालनिर्णयाय तादृशप्रवादादीना मवलम्बन मपि सुदूरपारसागर मुत्तितीर्षोः प्लवमानकाशकुशावलम्बनकल्प मेवेति॥

यदस्त्यैतरेयके—"एतेन ह वा ऐन्द्रेण महाभिषेकेण तुरः कावषेयो जनमेजयं पारिक्षित मभिषिषेच ; तस्मादु जनमेजयः पारिक्षितः समन्तं सर्वतः पृथिवीं जयन् परीयायाश्वेन च मेध्येनेजे। तदेषाभि यज्ञगाथा गीयते—'आसन्दीवति धान्यादं रुक्मिणं हरितस्रजम्। अश्वं बबन्ध सारङ्गं देवेभ्यो जनमेजयः'–इति (८. ४. ७.)"—इत्येवमादि ; ताण्ड्यब्राह्मणे चैवं श्रूयते—"जनमेजयस्यार्बुदो ग्रावः (२५. १५.)"—इति। एवमादिश्रुतेन यदि कश्चिदध्यवस्येत्,—अर्जुनपौत्रजनमेजयात् बहुदिनानन्तर मेवैतानि प्रणीतान्यैतरेयकादीनि ब्राह्मणानीति, तथाच यौधिष्ठिरीयाया मन्यून-द्वितीयशताब्द्या मेवैषां सम्पन्नं प्रणयन मितो निर्णीत एवैतत्काल इति; तर्हि सः स्यादवश्यं भ्रमावर्त्तमग्नः स्वातिबुद्ध्यैव वञ्चितः। ऐतरेयादीनां यौधिष्ठिरीयद्वितीयशताब्दीजत्वे हि पाणिनिसमकालत्व मेव प्रसज्येत ; पाणिनेरपि यौधिष्ठिरीयद्वितीयशताब्दीजत्वनिर्णयात् (भि पृ०); न चेष्टा-पत्तिः; पाणिनीये एव हि व्याकरणे ब्राह्मणग्रन्थाना मतिप्राचीनत्वेन प्रोक्तत्वादिस्वीकारात् ; न हि समकालिकाना मेव ग्रन्थानां प्रोक्तत्वेन व्यपदेशः सङ्गच्छते, नापि छन्दस्त्वादिक मुपपद्यते।

अस्मन्मते तु बभूवैव कश्चन पुराकल्पेऽपि परीक्षितो जनमेजयश्च, तत्तन्नामश्रुत्यनुसारत एवाभिमन्युपुत्रस्याभवन्नामकरणं परीक्षित इति, तथा तत्पुत्रस्य जनमेजय इति च। तद्यथा, दृश्यत एव हि भागवतादिषु सत्य-व्रतो नाम, तत एव मन्नामकरणं सम्पन्नं सत्यव्रत इति ; न च मन्नामकर-णतः पश्चात् प्रणीतानि भागवतादीनि। अप्येवं वङ्गकवेर्वङ्किमस्य लेखनी-जातानि कपालकुण्डलादिनी च नामानीदानीं बहुष्वेव वङ्गाङ्गनेषु श्रूयन्त एवेति। एव मेव समाधानं सर्वत्रैवावश्य मुररीकर्त्तव्यम् ; अन्यथा वेदेषु भोजनामश्रवणात् भोजसमसामयिकस्य वेदभाष्यकृदुव्वटस्यापि वेदसम-कालजत्वं प्रसज्येतैव, तत् कथङ्कारं वार्य्यतेति। तथा हि ऋक्संहितायां (८. ६. ४. ५.) श्रूयते—"भोजस्येदं पुष्करिणीव वेश्म"—इति ; श्रूयते चैतरेयब्राह्मणे तत्रैवाभिषेकप्रकरणे—"भोजं भोजपितरम् (८. ४. ३.)"

—इति ; उक्तश्चोव्वटेन—"मन्त्रभाष्य मिदं कृतं भोजे पृथ्वीं प्रशासति"—इति । तदत्र कथयन्तु धीमन्तो यदि नाम नामदर्शनादेव कालनिर्णयः स्यात्तर्हि तत्तद्वेदग्रन्थाविर्भावकाले एव किं नाविरभूत् वेदभाष्यकार उव्वटो वज्रटात्मजः ? इह नेत्युक्ते स्वीकार्य एवायं न्यायोऽन्यत्रापि सर्वत्रैव ; न हि कुक्कुट्या एको भागः पाकाय, अपरो भागः प्रसवाय कल्प्यत इति ॥

यच्चोक्तम्,—शतपथं नाम ब्राह्मणं पाणिनीयतोऽप्युत्तरभव मपि तु कात्यायनसमकालिकेन याज्ञवल्क्येन प्रणीतम् ; "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ४. ३. १०५.)"—इति हि पाणिनिसूत्रम्, तत्स्थं वार्त्तिकादिकं च तत्र मा[illegible]मिति । तदप्यतीव विस्मयकर मस्माकम् ; गम्यते हि तस्मादेव सूत्रात् तत्स्थात् वार्त्तिकादिकाच्च शतपथस्यापि पाणिनीयतः खलु प्राचीनत्व मेव । तथा ह्यस्त्येतत् सूत्रं पाणिनीयम्—"पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (४. ३. १०५.)"—इति । "तृतीयान्तात् प्रोक्तार्थे णिनिः स्यात्, यत्प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति । पुराणेन चिरन्तनेन मुनिना प्रोक्ताः । भल्लु—भाल्लविनः । शाट्यायनः—शाट्यायनिनः । कल्पे—पिङ्गेन प्रोक्तः पैङ्गी कल्पः । पुराण इति किम् ?. याज्ञवल्क्यानि ब्राह्मणानि, आश्मरथः कल्पः ।"—इति तत्रैव वैयाकरणसिद्धान्तकौमुदी । तत्रैतद् विचार्यम्— यदि नाम याज्ञवल्क्यं ब्राह्मणं शतपथ मिति यावत् पाणिनेर्नावगतं स्यात्, तर्हि किं प्रत्युदाहरणं भवेत् ?—अतिव्याप्तिवारणाय सूत्रे पुराणविशेषण मुपपद्येत ? न हि भविष्यमाणग्रन्थस्य शतपथादेः प्रोक्तत्वं पाणिनेरभिमतं भवितु मर्हति, तत् किंव्यावर्तकं सूत्रस्थं पुराणपद मिति । वस्तुतस्तु पाणिनिना यथा प्राचीनत्वेन ज्ञातं पैङ्ग्यादिकं कल्पशास्त्रम्, तथैव ज्ञात मेव आश्मरथ्यादिकं च ; अतएव प्रोक्तत्वेन तेषां सर्वेषा मेव ग्रहणसम्भवेऽनिष्टं प्रसज्येतेति प्राचीनेष्वपि कल्पेषु ये पुराणप्रोक्ताः = प्राचीनतमाः, तेभ्य एव णिनिर्विधाय आश्मरथ्यादिभ्यो णिनिप्रसक्ती वारितः ; तथा सर्वेभ्य एव कल्पेभ्योऽपि प्राचीनेषु सुतरां प्राचीनतरेषु ब्राह्मणग्रन्थेषु सर्वत्रैव णिनिप्रसङ्गवारणाय

तत्रापि पुराणविशेषणं सार्थकम्; सति हि पुराणविशेषणे प्राचीनतरेभ्यः सर्वेभ्य एव ब्राह्मणग्रन्थेभ्यो न भवति णिनिः; अपि तु तत्रापि ये पुराणप्रोक्ताः = प्राचीनतमाः, तेभ्य एवेति सिद्धं शाट्यायनि ब्राह्मण-मित्यादि; ये तु प्राचीनतरेष्वपि ब्राह्मणग्रन्थेषु शाट्यायनादिपरभवप्रोक्ताः न तेभ्यो णिनिरिति सिद्धं याज्ञवल्क्यं ब्राह्मण मित्यादि च। एवञ्चातिप्रा-चीनेष्वेव पुराणप्रोक्तत्वं तदितरत्वं चेष्टं पाणिनेरिति याज्ञवल्क्यब्राह्मणादे-रप्यतिप्राचीनत्वमव्याहत मेव।

एव मेतत्सूत्रस्थं वार्त्तिक मप्यस्मन्मतसाधक मेव। तथाहि—"पुराण-प्रोक्तेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्"–इति वार्त्तिकम्। शा-ट्यायनादिप्रोक्तानां ब्राह्मणानां, पिङ्गादिप्रोक्तानां कल्पानाञ्च यथा पाणिनि-पूर्वप्रोक्तत्वम्, तथैव याज्ञवल्क्यादिप्रोक्तानां ब्राह्मणाना मश्मरथादिप्रोक्ता-नाञ्च कल्पाना मिति सर्वेषा मेवैषां पाणिनिपूर्वप्रोक्तत्वेन तुल्यकालत्वात् पुराणप्रोक्तत्वं समान मिति सर्वेभ्य एवैतेभ्यो णिनिः प्रसक्तः; तन्निवारणाय याज्ञवल्क्यादिभ्यः प्रतिषेधरूपो यत्नविशेषः कर्त्तव्य इति च तद्वार्त्तिकाशयः। एवञ्चैतद्वार्त्तिकारम्भात् भगवतः कात्यायनस्य अतिप्राचीनेष्वेव ब्राह्मणेषु कल्पेषु च पुराणप्रोक्तत्वापुराणप्रोक्तत्वनिर्णये संशयः, तन्निरासाय च यत्नोऽवश्यं कर्त्तव्य इत्येवाशयः फलितः। कात्यायनसमकालिकस्यैव कस्य-चित् याज्ञवल्क्यस्य तु सति शतपथनिर्माटत्वे तत्र पुराणप्रोक्तेष्विति णिनिप्रसङ्ग एव कथम्? कथं वा तन्निरासाय वार्त्तिकारम्भो भवेत् प्रयोजनीयः?। ततो पाणिनिसमकालिकानां पाणिनिसदृशानाञ्च धीमतां प्राचीनतमेष्वपि ग्रन्थेषु पौर्वापर्यनिर्णयो यथा सुगमः, न तथा तत्पर-कालिकानां कात्यायनादीना मपीति तदानी मेव याज्ञवल्क्यादीनां परि-गणनं सप्रयोजन मासीत्, तत् किं मद्यतनानां त्वस्मादृशाम्।

एव मेतदीयं भाष्यञ्चास्मन्मतपोषक मेव। तथाहि—"पुराणप्रोक्तेषु ब्राह्मणकल्पेष्वित्यत्र याज्ञवल्क्यादिभ्यः प्रतिषेधो वक्तव्यः। याज्ञवल्क्यानि ब्राह्मणानि, सौलभानीति। किं कारणम्? तुल्यकालत्वात्; एतान्यपि हि

तुल्यकालानीति"—इत्येव तद्भाष्यम् । "तुल्यकालत्वादिति—शाट्यायनादि-प्रोक्तैर्ब्राह्मणैरेककालत्वादित्यर्थः"—इत्येव च तथोक्तवान् कैयटो जैयटात्मजः। यद्यपीह वार्त्तिकमत मेवानुमोदितं भाष्यकारेणेति गम्यते, तथापि नो न क्षतिः। श्रीमन्नागेशभट्टस्य मते तु शाट्यायनादिसमकालतैव याज्ञवल्क्यादि-प्रोक्तानां शतपथादीनाम्; अतस्तेभ्यो णिनिः प्राप्तः, कात्यायनवचनेन वारितोऽनुमोदितश्च तद्वचनं भाष्यकारेणेति (ल० श० शे०)। तथाहि—"याज्ञवल्क्यानीति। कण्वादिभ्य इत्यर्थः। ते हि पाणिन्यपेक्षया आधुनिका इत्यभिमानः; भाष्ये तु शाट्यायनादितुल्यकालत्वाद् * * * वचन मेवा-रब्धम्"—इति। वस्तुतो भाष्ये एतत्पूर्व मेव "छन्दोब्राह्मणानि च तद्विषयाणि (पा० ४. २. ६६.)"—इत्यत्रोक्तम्—"वक्तव्येतत् 'याज्ञवल्क्यादिभ्यः प्रतिषेध-स्तुल्यकालत्वात्'—इति। तत्रैव वक्तव्यम्; तद्विषयता च न भवतीति"—इति। "वक्तव्येतदिति। पुराणप्रोक्तेष्वित्यत्र"—इत्येव च तत्र कैयटः। तथा च अतिप्राचीनेष्वेव ब्राह्मणकल्पग्रन्थेषु ये पुराणप्रोक्ताः, तत्रैव णिनिः पाणि-निना विहितः; ये तु नूतनप्रोक्ताः, तत्र तु णिनिविषयतैव नास्तीति अर्थं वार्त्तिक मिति तद्भाष्याशयः। पाणिनिकालेऽपि ये ग्रन्था अतिप्राचीना इति प्रसिद्धा अतएव प्रोक्ता इत्येव व्यपदिष्टास्तदानीन्तनैः शिष्टैः, तेष्वेव के पुराणप्रोक्ताः के वा नेति निर्णयार्थैव परिगणन मवश्यं कर्त्तव्य मिति वार्त्तिककारमतम्; "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादल-क्षणम्"—इति भाष्योक्त्या च तत्खण्डनं योग्य मित्येवात्र सारम्। तदित्थं सूत्रकारवचनात्, वार्त्तिककारवचनात्, भाष्यकारादिवचनाच्चेद मेव सिद्धम्,—याज्ञवल्क्यादिप्रोक्तं शतपथादिकं शाट्यायनादिभ्योऽर्वाचीन मपि पाणिनीयतः खलु प्राचीनतम मेवेति।

वार्त्तिककारकात्यायनसमकालिकः कश्चन याज्ञवल्क्यो नासीदासीदेति नास्मद्विचारविषयः;—अपि तु शतपथप्रवक्ता याज्ञवल्क्यस्तु वार्त्तिककार-कात्यायनसमकालिकः कथ मपि नैव; पाणिनिसमकालिकोऽपि न सः कथ मपि; प्रत्युत पाणिन्यादयो यस्मिन् युगे जातः, यस्मिन् कल्पे जातः,

सतोऽपि पूर्वतन एव; किञ्च तस्य शाखाध्ययनादिसमकालिकत्वाभावेऽपि शाखायाकालगतत्वमवितथ मेवेति तत्कालनिर्णयोऽप्यस्माकं मध्यस्थ एवेति शम्॥

---

(११)

अथेतर्हि समालोचयितव्य मस्ति के विषयास्तैतन्निरुक्तप्रतिपाद्या इति। सर्वेषा मेव वेदाङ्गानां साक्षात्परम्परया वा वेदार्थज्ञान मेव प्रयोजनम्, तत्साधनायोपदेश एवैकः प्रतिपाद्यविषय इति तु वेदवित्प्रसिद्ध मेव; तदिह निरुक्ते वेदार्थज्ञानसाधनाय तत्प्रसक्तश्च येऽखिलविषयाः प्रतिपादिताः, तानेव व्याकर्तुं समग्र मेवेमं ग्रन्थं समासतः किञ्चिद्व्यासतश्चालोचयाम इति यावत्।

अत्रैतस्य हि निरुक्तशास्त्रस्य बीजानि पुरातन् श्रुतिवारिधौ विकीर्णानि; अतएवोच्यत इद मपि शास्त्र मानुश्रविक मिति। ततो ब्राह्मणग्रन्थेषु यथाप्रयोजन मेकैकं चीयमान मङ्कुरितम्; तस्मादेव च तस्य सम्यक् मालवालीभूतग्रन्थान्तर्गतत्वम्। ततोऽनुब्राह्मणेषु विशेषतः प्रोच्यमानं परिपुष्टम्। तत एव काले निदानसूत्रेषु पल्लवितं सत् प्रकरणविशेषात्मकत्व मुपगतम्। ततस्तेभ्य एव शाकपूण्यादिभिः शाखाप्रशाखादिभिः सञ्चितः प्रणीतो ग्रन्थविशेषो निरुक्त मिति। तान्येव सर्वाण्यवलम्ब्य कृत मेतन्निरुक्तं भगवता यास्केन पुष्पितं फलितश्चैव मेवेति वृद्धाः।

तस्यास्य प्रथमाध्यायस्तु ग्रन्थभूमिकारूपः; तत्र निघण्टुनिर्वचनादीनि च प्रतिपादितानि। द्वितीयतृतीयाध्याययोर्निर्वचनप्रकारादिकथनपूर्वकं भाषितं नैघण्टुककाण्डव्याख्यानम्। चतुर्थादिषु तु त्रिष्वध्यायेषु एकपदीत्वाख्यापनपूर्वकं कृतं नैगमकाण्डव्याख्यानम्। तत उत्तराधीतेषु षट्स्वध्यायेषु देवतात्वबोधनपूर्वक माख्यातं दैवतकाण्डव्याख्यानम्। इत ऊर्द्धं मतिस्तुति मधिकृत्यात्मतत्त्वोपदेशादीनि प्रदर्शितानि त्रयोदशाध्यायरूपे प्रथमपरिशिष्टे। ततश्च चतुर्दशाध्यायात्मको द्वितीयपरिशिष्टः; तत्रोर्द्धमार्गगति मधिकृत्याख्यातानि च परमपुरुषार्थसाधनानीति सङ्क्षेपः॥

किञ्चिद्दिग्दर्शनमस्येदमालोचनम् ।—

(१) यद्यप्येतन्निरुक्तं खलु निघण्टुभाष्यरूप मेव, परं न तत्र नैघण्टुकानां सर्वेषा मेव पदानां व्याख्यानान्युक्तानि । यथाहि—नैघण्टुकसमाम्नाये पृथिव्या नामधेयानि एकविंशतिसङ्ख्यकानि परिपठितानि दृश्यन्ते, तेषा मेक मेव गौरिति व्याख्यातं द्वितीयाध्यायीयेन समग्रद्वितीयपादेन (२ भा० १७५—१६४ पृ०); अपरेषामपुनर्नाम्ना मुल्लेखोऽपि न कृतः । अत एवोक्तं तदन्ते वृत्तिकृता—"अनुक्रमणं त्वधिकृतम्, तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थम्"-इत्यादि ।

(२) प्रसङ्गसङ्गत्या वैदिकतत्त्वान्यपीह बहूनि प्रतिपादितानि । तद्यथा —"पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे (१भा० २४पृ०)"-इत्येव-मादीनि ।

(३) व्याख्यातानि चेह स्वप्रदर्शितनिगमश्रुतपदादीनि च प्रायः सर्वा-ण्येव । अतएवोक्तं निघण्टुटीकाकृता—"नैघण्ड्वागतेष्वेव पदेष्वध्यर्द्धशत-त्रयमात्राणि पदानि भाष्यकारेणैव तत्र तत्र निगमेषु प्रसङ्गान्निरुक्तानि (१ भा० ४पृ०)"-इति ।

(४) मन्त्रश्रुतपदान्येव व्याख्योदाहरणत्वेन प्रायः सर्वत्रोपात्तानि; ब्राह्म-णीयानि तु न तथादृतानि; तथाचेदानीं मन्त्रब्राह्मणयोर्वेदनामधेयत्वेऽपि मन्त्रगताना मेव पदानां व्याख्यानेन वेदव्याख्याने कृतकृत्यम्मन्यो बभूव स इति चावगम्यते । प्रत्यक्षयोग्ये कृतं मानान्तरोपादानेन ।

(५) नात्र च मन्त्रगताना मेव पदानां निर्वचनानि समुपदिष्टानि; अपि तु तत्सन्नियोगात् लौकिकानाञ्च बहूनाम् । तद्यथा निर्वचनारम्भे एव —गोशब्दनिर्वचनप्रसङ्गात् पयः-शब्दस्य कृतं निर्वचनम्,तत्प्रसङ्गात् क्षीर-शब्दस्यापि (२ भा० १७५ पृ०)। एव मेवोत्तरत्रापि बहुत्र ।

(६) लोकवेदयोः साधारणा विषयश्चात्र बहव उक्ताः । तद्यथा— "चत्वारि पदजातानि"-इत्यादयः, "षड् भावविकारा भवन्ति"—इत्येव-मादयश्च (१ भा० ७, ३४ पृ०) ।

(७) सम्प्रदर्शितेषु नैगमेषु कृतानां पदनिर्वचनादीनां स्वकपोलकल्पितत्वदोषपरिहाराय मतभेदप्रकाशाय च पूर्वाचार्याणां बहूना मेव नामादीन्यपीह कीर्त्तितानि । तद्यथा—आग्रयणः, आग्रायणः, आचार्याः, एके, ऐतिहासिकाः, औदुम्बरायणः, औपमन्यवः, और्णवाभः, कात्थक्यः, क्रौष्टुकिः, गार्ग्यः, गालवः, चर्मशिराः, तैटिकिः, नैदानाः, नैरुक्ताः, परिव्राजकाः, पार्षदानि, मनुः, याज्ञिकाः, पूर्वे याज्ञिकाः, वार्ष्यायणिः, वैयाकरणाः, शाकटायनः, शाकपूणिः, शाकल्यः, स्थौलाष्ठीविः, हारिद्रवकम्—इत्यार्षसूची मवलोक्य निरुक्ते द्रष्टव्यानि ।

(८) निर्वचनान्येव प्रदर्श्य च न मेने यास्कः स्वकृतकृत्यताम् ; अपि तु मन्त्रार्थज्ञानाय यथायथा यतितव्यम्, तत्सर्व मेवेहोपदिष्टम् । द्वितीयाध्यायस्य प्रथमपादस्तु सर्व एवैवमर्थकः (२ भा० १४७—१७४ पृ०) । एव मन्यत्रापि ।

(९) विरुद्धार्थवादिना मपि मन्त्राणां तात्पर्यपरिग्रहेण प्रामाण्यं स्वीकार्य मित्यपि प्रादर्शि तेन । तद्यथा—"यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति, लौकिकेष्वप्येतत् । तद्यथा—(२भा० ११२पृ०)"—इत्यादि ।

(१०) आशङ्कनीयेषु वेदार्थेषु सिद्धान्तकरणप्रकारश्चोपदर्शितः । तद्यथा—"यद्दवसं गावः पश्यदन मवतेर्गत्यर्थस्यासौ नामकरणस्तस्मान्नावगृह्णन्ति (२भा० ११९ पृ०)"—इत्यादिः ।

(११) पूर्वतनैः ऋषिभिरपि कृतेषु ग्रन्थेषु न तस्यासीद् भ्रमशून्यत्वविश्वासः, अपि तु भ्रमविजृम्भितत्वप्रदर्शने तादृशसिद्धान्तापाकरणे च नैवार्षानार्षविचारः कर्त्तव्यः प्रत्युत सर्वत्रैवास्ति भ्रमसम्भवः, अतोऽतिविश्वासः सर्वत्रैव दूषणीयः, परीक्षणीयाश्च सर्वे एव सिद्धान्ताः, परीक्षया प्रमाणिते च तत्र भ्रमे कर्त्तव्य एवानादर इत्येषोऽप्युपदेशो ध्वनित एवेह । तद्यथा— बभूव शाकल्यो नाम ऋषिः ऋक्संहितायाः पदकारः, पाञ्चालो बाभ्रव्य ऋषिश्च तदवलम्बनेनैव क्रमप्रवक्ता । इहैकत्रैव तयो-

उभयोरपि भ्रमः प्रदर्शितः—(३भा० २५५ पृ०) "वायः, वेः पुत्रः। * * *। वेति च य इति च चकार शाकल्यः। उदात्तं त्वेव माख्यात मभविष्यत्, असुसमाप्तश्चार्थः"—इति।

(१२) उणादिसूत्राणा मपि बहुत्रानादरः सूचितः। उक्तं हि एकादशे 'व्योम'—इत्यस्यार्थो 'अवने'—इति (४ भा० २२९ पृ०); तथा च विपूर्व-कादवतेरेव व्योम नाम इति व्यक्तस्तदभिप्रायः। पदकारादीना मप्येषोऽर्थः सम्मत एव; तत्र 'वि॑ऽओमन्'—अवग्रहादिदर्शनात् (ऋ० सं० प० २. ३. २२. १.)। उणादिसूत्रेण तु 'व्येञ् संवरणे'—इत्यत एव मनिनि निष्पद्यते व्योमेति (उ० सू० ४. १५०.)। एव मन्यत्रापि बहुत्रैव स्पष्टम्।

(१३) यत्र यत्र संहिताभेदतोऽवग्रहे मतभेदो विद्यते, तादृशपदानां तथा निर्वचनवैविध्य मपि प्रकटितं बहुत्रैव। तद्यथा— अस्ति सूर्यशब्द-स्यावग्रहे पदकारादीनां मतभेदः; बह्वृचां पदक्रमग्रन्थयोः किल न क्वाप्य-वगृहीतः पठ्यते सूर्यशब्दः; छन्दोगानान्तु क्वचित् क्वचिदवगृहीतोऽपि 'सु। ऊर्यस्य'—इत्यादि (सा० छ० प० ६. १. ५, ६.)। अतएवात्र कृत मेव तथा निर्वचनवैविध्यम्—"सूर्यः, सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा"—इति ४भा० २७४पृ०। ततश्च गम्यते—बह्वृक्पदकारमते सर्वत्रैव सर्त्तेः सुवतेर्वा निष्पद्यते सूर्य इति न तेन तत्रावग्रहः कृतः क्वापि; सामपदकारनये तु अर्थानुरोधतः क्वचित् सर्त्तेः सुवतेर्वा क्वचित् स्वीर्यतेः (सूपसर्गपूर्वादीर्यतेः) स्वीकार्यं सूर्यनामेति क्वचिदवग्रहः कृतः क्वचिन्नेति च। तथाहि—छन्दः-पदसंहितायाः षष्ठप्रपाठकीयप्रथमार्द्धस्य पञ्चमे दशति द्वितीये मन्त्रे 'सूर्यम्'—इत्यनवगृहीत मेव पठितम्, परं तत्रैवानुपदं षष्ठे ऽवगृहीतं 'सु। ऊर्यस्य'—इति। एवं मित्रशब्दोऽपि द्वाभ्या मेकतश्च निरुक्तः—"मित्रः, प्रमीते स्त्रायते सम्मिन्वानो द्रवतीति वा मेदयतेर्वा"—इति ४भा० १०८ पृ०। अतएव बह्वृचां "प्रेष्ठं वो अतिथिं स्तुषे (ऋ० सं० ६. ६. ५. १.)"—इत्यस्य पदपाठे 'मित्रम्'—इत्यनवगृहीतं श्रूयते; छन्दःपदसंहितायान्तु तत्रैव मन्त्रेऽवगृहीत मेव 'मि। त्रम्'—इति (सा० छ० प० १. १. १. ५)।

पुत्रशब्दोऽप्येव मेव द्वाभ्या मेकतस्य निरुक्तः—"पुत्रः, पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा"—इति २भा० १९९पृ० । अतएव बह्वृचाम् "इन्द्र क्रतुं न आभर (ऋ० सं० ५. ३. २१. ६.)"—इत्यस्य पदपाठे 'पुत्रेभ्यः'—इत्यनवगृहीतं श्रूयते ; छन्दःपदसंहितायां तु तत्रैव मन्त्रेऽवगृहीत मेव 'पु । त्रेभ्यः'—इति (सा० छ० प० ३. २. २. ७.)। सखिशब्दस्तु यास्केन द्विर्निरुक्तः, परिशिष्टेऽप्येकत्र (२भा० ४३३पृ०, ४भा० ३६०,३८० पृ०), परं समाननामोपपदात् ख्यातेरित्येकविध एव सर्वत्र ; तथा च तत्पदपाठे खल्ववग्रहेणैव भवितव्यम् ; न च तथा दृश्यते बह्वृग्ग्रन्थेषु । तथाहि—"इमं स्तोम मर्हते (ऋ० सं० १. ६. ३०. १.)"—इत्यस्य पदपाठे 'सख्ये'—इत्यनवगृहीत मेव श्रूयते ;—छन्दःपदसंहितायान्तु तत्रैव मन्त्रे ऽवगृहीतं 'स । ख्ये'—इति (सा० छ० प० १.१.२. २. ४.) । वस्तुतः सर्वत्र पदकाराभिप्रायबोधोऽस्माकं दुरूह एव ; क्रमकारास्तु तदनुगताः, जटादिपाठास्च तन्मूलका एव । बह्वृच तु सामपदसंहिताया मनवगृहीत मपि बह्वृचां पदपाठेऽवगृहीत मेव श्रूयते । तद्यथा—"अभि त्वा मह्याँ असि (ऋ० सं० ३. ५. ९. १.)"—इत्यस्य बह्वृक्पदपाठे 'देव ऽयुम्'—इत्यवगृहीतम् ; छन्दःपदपाठे तु 'देवयुम्'—इत्यनवगृहीत मेव (सा० छ० प० १. १. ३. ४.) । एवम् "इन्द्र मिद्देवतातये (ऋ० सं० ५. ७. २५. ५.)"—इत्यस्य बह्वृक्पदपाठे 'देव ऽतातये'—इत्यवगृहीतम् ; छन्दःपदपाठे तु 'देवतातये'—इत्यनवगृहीत मेव (सा० छ० प० ३. २. १. ७.) स्थित मिति सङ्क्षेपः ।

(१४) यदि क्वचिद् वेदव्याख्याने प्रामाणिकानां व्याख्यातॄणां मतान्तरता लक्ष्येत, तत्र विनिगमनाविरहात् सर्वेषा मेव मताना मादरोऽस्माकं कर्त्तव्य एवेत्यपि निदर्शितम् । तद्यथा—ऋक्संहितायाः पदकारः शाकल्यो नाम ऋषिः ; सामवेदीयायाश्छन्दोनामसंहितायाः पदकार ऋषिर्गार्ग्यो नाम च ; तदेतावुभावेव प्रामाणिकौ वेदव्याख्यातारौ ;—एतयोरनुगताः क्रमादिकारास्चातुर्ध्यानादिग्रन्थकारास्चावश्यं प्रामाणिका एवेत्यत्र च नैवास्ति

संशयः। अस्ति चैको मन्त्रो "यदिन्द्र चित्र मेहनास्ति"—इति ऋक्संहितायाम्; छन्दःसंहितायाञ्च। तत्र ऋक्पदग्रन्थे, तदनुसृतेषु क्रमग्रन्थादिषु च यदवगम्यते 'मेहनास्ति'—इति पदद्वयम्; तदेव छन्दःपदग्रन्थे, तदनुसृतेषु सामग्रन्थादिषु क्रमग्रन्थादिषु चावगम्यते पदचतुष्टयत्वेन; तदेष द्विविध एव पदच्छेदोऽभ्युपेयोऽस्माभिर्विनिगमनाविरहादिति बोधयितु मुक्तम्,—"मेहनास्ति * * * मंहनीयं धनम् अस्ति यत्, म इह नास्तीति वा त्रीणि मध्यमानि पदानि"—इति २भा० ३८७पृ०। अत्रैतदपि परिव्यक्तम्—संहिताभेदकृतः पाठभेदोऽप्यवश्य मभ्युपेय इति। यथा—"यदिन्द्र चित्र मेहनास्ति"—इति ऋक्पाठः (४. २. १०. १.); "यदिन्द्र चित्र म इह नास्ति"—इति तु सामपाठः (४. २. १. ४.)।

(१५) मन्त्रकृता मृषीणां रचनाविधिर्ष्वपि लक्ष्यः सर्वथा स्थापनीयो वेदार्थबुभुत्सुभिरित्यपि ध्वनितम्। तद्यथा—"अभ्यासे भूयांस मर्थं मन्यन्ते,—यथाहोदर्शनीयाहोदर्शनीयेति; तत् परुच्छेपस्य शीलम्; परुच्छेप ऋषिः (४ भा० १४६ पृ०)"—इत्यादि।

(१६) मन्त्रार्थं निर्ब्रुवता प्रकरण मप्युपेक्षितव्य मिति च ध्वनितम्—"उप प्रागात् सुमन्मे धायि मन्म * * * इत्याश्वमेधिको मन्त्रः (३भा० २३२पृ०)"—इत्येवमादिभिः।

(१७) कालभेदतो देशभेदतश्च नामभेदादीन्यपि सम्भाव्यानीति चेह ज्ञापितानि। तद्यथा—"आर्जीकीयां विपाडित्याहुः। * * *। पूर्वं मासीदुरुञ्जिरा"—इति ४ भा० ३६ पृ०। "विजामातेति शश्वद्दाक्षिणाजाः क्रीतापति माचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतः"—इति च ३ भा० १७६ पृ०। "मर्त्तारोदिवीव धनलाभाय दाक्षिणाजी (२ भा० २६६ पृ०)"—इत्येवमादीनि च।

(१८) मन्त्राणा मुत्पत्तिबीजान्यपि सुन्दर मभिबोधितान्येतेन। तथाहि—"अथापि शपथाभिशापौ ०——०; अथापि कस्यचिद् भावस्याचिख्यासा ०——०; अथापि परिदेवना कस्माचिद् भावात् ०——०;

अथापि निन्दाप्रशंसे ०——० ; एव मुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति"–इति २भा० २६६ पृ० ।

(१९) अपि मनुष्याणा मेवाध्ययनादितपःप्रभावादृषित्वं ख्यापितम् । "तद् यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्, तदृषीणा मृषीत्वम्"–इत्येवमादिभिः (२भा० १९९पृ०)। परिशिष्टेऽपि तथा "मनुष्या वा०——० यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद् भवति"–इति ४ भा० ३५८ पृ० ।

(२०) मन्त्राणा मुत्पत्तौ च बहूना सांसारिकघटनादीना मेव हेतुत्वं निरूपितम् । तद्यथा—"त्रितं कूपेऽवहित मेतत् सूक्तं प्रतिबभौ (२ भा० ३९४ पृ०)"–इति, "इदञ्च मेऽदादिदञ्च मेऽदादित्यृषिः प्रसङ्ख्यायाह (२ भा० ४१७ पृ०)"–इति, "ऋषिपुत्र्या विलपितं वेदयन्ते (३ भा० १० पृ०)"–इति च। तथाच यद्यपि मीमांसकमते सर्व एव मन्त्रा यज्ञसम्पादनायैव दृष्टाः, परं यास्कमते तु नैव सर्वेषां यज्ञसम्पादनायैवोत्पत्तिरित्यपि सुव्यक्तम् ।

(२१) वेदार्थबोधस्यातिदुरूहत्व मपि बोधितम् । तद्यथा—"अप्येकः पश्यन्न पश्यति"–इत्यादि २ भा० १३२—१४३ पृ० ; एवमन्यत्रान्यत्रापि । परिशिष्टेऽपि "यस्तन्न वेद किं ऋचा करिष्यति (४ भा० ३५२ पृ०)"–इति, "अयं मन्त्रार्थचिन्ताभ्यूहः"–इत्यादि, "तस्यास्तपसा पार मीप्सितव्यम्" –इत्यादि च (४ भा० ३५७—३६५ पृ०) ।

(२२) मन्त्राणां दैवतनिर्णयस्यापि दुरूहत्वं वेदार्थबोधगर्वस्याकर्त्तव्यत्वञ्चेत्येतद्द्वय मपि दृष्टान्तप्रदर्शनेन दृढीकृतम् । तद्यथा—"शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति । तस्मै देवतोभयलिङ्गा प्रादुर्बभूव । तां न जज्ञे । तां पप्रच्छ विविदिषाणि त्वेति । सास्मा एता मृच मादिदेशैषा मद्देवतेति"–इति २भा० १८८पृ० ।

(२३) वेदार्थविषये क्वचित् क्वचित् स्वस्यापि संशयः ख्यापितः । तद्यथा —"पूषा त्वेतश्च्यावयतु (ऋ० सं० ७. ६. २३. ३.)"–इत्येतस्या ऋचो व्याख्यानावसरे स्वकण्ठरवेणैवोक्तम्—"स त्वैतेभ्यः परिददत् पितृभ्य इति

सांशयिकस्तृतीयः पादः । पूषा पुरस्तात् तस्यान्वेदेश इत्येकम्, अभिरूपरिष्ठात् तस्य प्रकीर्त्तनेत्यपरम्"–इति २भा० ३५० पृ० ।

(२४) वैदिकोपाख्यानाना मुपमादिमूलकत्ववर्णनेनावास्तविकत्व मपीह ध्वनितं बहुत्र । तद्यथा—"तत्रोपमार्थेन युद्धवर्णा भवन्ति (२भा० २१७ पृ०)"–इत्येवमादीनि समालोच्यानि ।

(२५) मन्त्रेषु श्रुताः स्वसादिसम्बन्धिशब्दा अपि साहचर्यादिमूलका गौणार्था एव, न तु मुख्यार्था इति चेह बहुत्रावेदितं तेन । तद्यथा—"उषस मस्य (आदित्यस्य) स्वसार माह,—साहचर्याद्रसहरणाद्वा (२ भा० ३२१ पृ०)"–इत्यादि ।

(२६) मीमांसाग्रन्थेषु यथा ब्राह्मणग्रन्थदृष्टाना मपि प्रावाहणिरित्येवमादीनां सर्वेषा मेव सञ्ज्ञापदानां यौगिकत्वं तथा कल्पितव्यक्तिवाचकत्वञ्च सिद्धान्तितम्; नात्र तथा; इह तु प्रकृतव्यक्तिनामान्यपि श्रूयन्त एव मन्त्रेष्वपि, तत् किं ब्राह्मणवाक्येष्वपीति स्फुट मभ्युगतम् । तद्यथा—"कुरुङ्गो राजा बभूव; कुरुगमनाद् वा कुलगमनाद्वा (३ भा० २३७ पृ०)"–इति, "त्रिबुशा व्रततिर्भवति (३ भा० २५५ पृ०)"–इत्यादि च ।

(२७) प्रमाणरूपतया ब्राह्मणवचनान्यपीह बहून्युद्धृतानि ; तद्यथा—"षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन", "सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन (२ भा० ४९० पृ०)"–इत्येवमादीनि ।

(२८) प्रसङ्गसङ्गत्या बहूनां ब्राह्मणवचनानां चाटुकारवचनवत्त्वेनाप्रामाण्यञ्चेह दर्शितम् । तद्यथा—"बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति"–इति ३ भा० ४१९ पृ० ।

(२९) वेदानां प्रामाण्यं तु हृदयेनैवाङ्गीकृत मासीत्तस्य खलु भगवतो यास्कस्य । अतएवोक्तम्—"आम्नाय वचनादहिंसा प्रतीयेत (२ भा० ११२ पृ०)"–इति, "आम्नायवचनादेतद् भवति (३ भा० ४१६ पृ०)"–इत्यादि च ।

(३०) पौर्वतनीयानि विज्ञानानि चेह प्रसङ्गतः कतिचित् निदर्शितानि। तद्यथा—द्वितीये भागे १८१, १८५, १९२, १९५, २१५, २१७, २३०, २३३ (द्विः), ३७८, ४०७, ४११, १३०, ४६२ (द्विः) ४७४ पृष्ठेषु द्रष्टव्यानि; विशेषतः परिदर्शनादन्यान्यपि। एवं तृतीयचतुर्थभागयोरपि। वस्तुतो निरुक्तप्रणयनकाले हि विपश्चितां हृदयाः खलु वैज्ञानिकभावपूर्णा एवासन्; अतएव "दिवं जिन्वन्त्यग्नयः (३भा० ६१४पृ०)"—इत्येतादृशस्य विज्ञानगर्भवचनस्यापि निगदव्याख्यातत्व मुररीकृत्याव्याख्येयत्व मुक्तं यास्केनेति दिक्।

(३१) तदानीं प्रचलिताः सामाजिकव्यवहारकथाश्चात्रता इह प्रतीयन्ते क्वचित् क्वचित् प्रसङ्गतः। तद्यथा—"स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते, न पुंसः, पुंसोऽपीत्येके"—इति २ भा० २५६ पृ०। "देवरः कस्मात्? द्वितीयो वर उच्यते"—इति २ भा० ३१५ पृ०। एवमादयः। अपि मांसाहारस्य च तदासीदेव प्राशस्त्यम्। तथा चाह—"मांसं माननं वा मानसं वा मनोऽस्मिन् सीदतीति वा"—इति २भा० ३७८ पृ०। औरसभिन्नानां पुत्राणा मप्राशस्त्य मतीवेति च। तदाह—"अन्योदर्यो मनसापि न मन्तव्यो ममाय मिति (२भा० २५७पृ०)"—इत्यादि।

(३२) पापपुण्ययोश्चात्र बोध उपदिष्टो दिक्प्रदर्शनेन। तद्यथा—"न पापा मन्यामहे;—नाधनाः, न ज्वलनेन हीनाः; अस्त्यस्मासु ब्रह्मचर्य मध्ययनं तपो दानकर्म इत्यृषिरवोचत् (३ भा० २४७ पृ०)"—इति, "सप्त मर्यादाः कवयश्चक्रुः। तासा मेका मप्यधिगच्छन्नंहस्वान् भवति। स्तेयम्, तल्पारोहणम्, ब्रह्महत्याम्, भ्रूणहत्याम्, सुरापानम्, दुष्कृतस्य कर्मणः पुनः पुनः सेवाम्, पातके नृतोद्य मिति (३ भा० २५१ पृ०)"—इति, "ब्राह्मणाय बुभुक्षितायौदनं देहि, स्नातायानुलेपनम्, पिपासते पानीयम् (३भा० ३७३ पृ०)"—इत्यादि। किञ्चेहोक्तं स्नातायानुलेपन मिति च चिन्तनीयम्।

(३३) प्रकृतिपुरुषाना मेव चेह देवत्व मुररीकृतम्। तदत्र मत्कृता नैरुक्तदैवतसूची विशेषतः पर्य्यालोच्या।

(३४) देवतानां पुरुषाकारादिचिन्तनस्यातात्विकत्वञ्चोपन्यस्तम् "अथा-कारचिन्तनं देवतानाम्"—इत्येवमादिभिः (३ भा० ३३१—३४३ पृ०)।

(३५) ईश्वरज्ञान मिह द्विविधं प्रकटितम्। तद्यथा—"ईश्वरः सर्वेषां भूतानां गोपायितादित्यः"—इति, "ईश्वरः सर्वेषा मिन्द्रियाणां गोपायि-तात्मा"—इति च २ भा० ३०२ पृ०। वस्तुतस्त्वार्थाणां सर्वथैव एकेश्वरवा-दित्वे एव तात्पर्यम्। अस्य हि परमात्मनो विशेषनामरूपाभावात् सर्व-रूपैः सर्वनामभिश्चोपास्यत्व मेवार्यसम्मतम्। अतएव यथाप्रयोजनं जड-स्याजडस्य च स्तुतिरुपपद्यते वेदे। तथाचाह्राय मपि—"एक मात्मानं बहुधा मेधाविनो वदन्तीन्द्रं मित्रं वरुण मग्निं दिव्यं च गरुत्मन्तम्"—इति ३भा० ३६०पृ०।

(३६) पुरुषशब्दनिर्वचनावसरे औपनिषदं ब्रह्मज्ञान मपि वर्णितं किञ्चित्—"यस्मान्नापर मस्ति किञ्चित् (२भा० १६५पृ०)"—इत्यादिना। ततो "ब्रह्म स्वयम्भु (१६८ पृ०)"—इति च। अस्य टीका तु मूलसम्मता न वेति संशय एवास्माकम्।

(३७) एतद्द्वितीयपरिशिष्टे तु बहवो दार्शनिकभावा अपि देदीप्यन्ते। तद्यथा—"आकाशगुणः शब्दः"—इत्येवमादयः (४ भा० ३७० पृ०)।

(३८) तत्रापि साङ्ख्याना मादरातिशयो दृश्यते। "अथैष महानात्मा त्रिविधो भवति—सत्त्वं रजस्तम इति (४ भा० ३७० पृ०)"—इत्येव-मादयो द्रष्टव्याः।

(३९) पुनर्जन्मविवेकश्चाख्यातः, तत्र च साङ्ख्ययोग मिति स्पष्ट मभि-हितम्। "मृतश्चाहं पुनर्जातः"—इत्यादि, "शुभाशुभं कर्मैतच्छरीरस्य प्रमाणम्"—इत्यन्तञ्च द्रष्टव्यम् (४ भा० ३७४ पृ०)।

(४०) तत्रैव शारीरिकतत्त्वानि च कानिचिदभ्युक्तानि। "अष्टोत्तरं सन्धिशतम् (४ भा० ३७५ पृ०)"—इत्येवमादीनि।

(४१) सपरिशिष्टश्चैतन्निरुक्त मुपसंहृतं मोक्षविज्ञानात्मपरमपुरुषार्थ-ख्यापनेनातिमधुरेणेति। तद्यथा—"सरूपतां सलोकता मश्नुते (४ भा०

४०५ पृ०)"–इति, "मृत्योर्मुक्षीय मा मृतात् (४ भा० ४१० पृ०)"–इति, "सैषा सर्वभूतजिज्ञासा, ब्रह्मणः सारिष्टं सरूपतां सलोकतां गमयति य एवं वेद (४ भा० ४१२ पृ०)"–इति च। तदित्थं सर्वेषा मेव वेदवेदाङ्गानां परमपुरुषार्थोपदेश एव चरम उद्देश्य इति सिद्धम्॥

---

(१२)

"अथार्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"–इति सायणीयप्रथमलक्षणलक्षितस्य, मूलात्मनिरुक्तस्य, वस्तुतो निघण्टुसमाम्नायस्य टीका येह सम्पादिता; किञ्च "एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेणोच्यन्ते तन्निरुक्तम्"–इति सायणीयद्वितीयलक्षणलक्षितस्य, भाष्यात्मनिरुक्तस्य, वस्तुतो निघण्टुसमाम्नायभाष्यस्य या चेह टीका सम्पादिता; अनयोष्टीकयोः प्रणेतारौ क्रमात् देवराजयज्वा दुर्गाचार्यश्च। तयोरेव टीकाकृतोर्जीवितकालनिर्णयाय, प्रसक्तः पाण्डित्यादिवर्णनाय च यथाबोध मद्योत्सहे।

तत्र, निघण्टुटीकाकारस्यास्य देवराजइतिसमाख्यादर्शनादेवोपलभ्यते रामानुजपरभविकत्वम् ; प्रपन्नामृतादिरामानुजसम्प्रदायीयग्रन्थालोचनतः स्फुटं ह्यवगम्यते प्रथमं रामानुजस्वामिन एवासन्नुपनामानि देवराजो देवमन्नाथो मन्नाथश्चेति ; ततः प्रभृत्येव लोके प्रचलिता देवराज इत्यादयः समाख्याश्च।

श्रीवैष्णवसम्प्रदायप्रवर्त्तकस्य तस्य रामानुजस्वामिन आविर्भावसमयस्त्वेवं प्रपन्नामृते—"शालिवाहशकाब्दानां तत्राष्टचिंशदुत्तरे। गते नवशते श्रीमान् यतिराजोऽजनि क्षितौ॥"—इति (११५ अ० २७ श्लो०)। रामानुजस्वामिकर्तृकं यादवाद्रौ नारायणपुरनिर्म्माणं नारायणप्रतिष्ठापनं च द्वादशाधिकसहस्रशकाब्दातीते समभवदिति च तत्रैव। तथा हि—"शकाब्दे वर्षसाहस्रे गते तद्द्वादशाधिके। ततोऽब्दे बहुधानाख्ये पुष्ये मासि शुभे तदा॥ शुक्लपक्षे चतुर्दश्यां सुप्रभावपुनर्वसौ। आविर्बभूव भग-

वान् तत्र नारायणो हरिः॥"—इति (४७ अ० २५, २६ श्लो०)। तदन्तर्द्धानप्रकारसमयौ च तत्रैव मुक्तौ—"गोविन्दाङ्के निधायाथ शिरः शेते महामनाः। आन्ध्रपूर्णस्य चोत्सङ्गे समसार्याङ्घ्रिपङ्कजे॥ शिष्येषु तेषु सर्वेषु यतीन्द्रस्य जगद्गुरोः। भृगुवल्लीं ब्रह्मवल्लीं पठत्स्वपि महात्मसु॥ पराङ्कुशप्रबन्धादीन् प्रबन्ध मखिलं च तम्। वादकैर्वाद्यमानेषु वाद्येषु निखिलेषु च॥ संस्थाप्य पुरतः यङ्गन् महापूर्णस्य पादुके। ध्यायन् हृदि सदा धीमान् यामुनार्याङ्घ्रिपङ्कजम्॥ शिरःकपालं निर्भिद्य ब्रह्मरन्ध्रेण योगिराट्। रामानुजो जगामाशु तद्विष्णोः परमं पदम्॥"—इति, "स विंशत्युत्तरशतं वत्सराणां भुवस्थले। + + +। वैकुण्ठ मगमच्छेषो लीलामानुषविग्रहः। माघशुक्लदशम्यान्तु मध्याह्ने मन्दवासरे॥"—इति च (६८, ११६ अ० २०—२४, ६२—६७ श्लो०)। प्रपन्नामृतोक्ते दीर्घायुष्ट्वे त्वस्त्येव संशयः; प्रायः सर्वेषा मेव स्वसम्प्रदायाचार्याणां तथोक्तेः (११० अ० द्र०)।

यद्यप्योक्तं रामानुजसम्प्रदायीयदेवराजाख्याप्रचलनात् पर मेव चलितं देवराजनामेत्यनुमानं नान्दतं स्यात्, तर्हि स्थूलतः सम्भाव्यते—शालिवाहनशकाब्दाना मन्यूनसपादद्वादशशताब्दीगते, विक्रमाब्दानां सार्द्धैकादशशताब्दीगते, खीष्टाब्दानां चैकादशशताब्दीगते जातोऽयं देवराज इति।

तथेह नैघण्टुकनिर्वचने प्रमाणत्वेनोपन्यस्त मुवटकृतं च वेदभाष्यं दृश्यते बहुत्रैव। उवटेन तु स्वकृतमन्त्रभाष्यावसाने स्फुटं ज्ञापितस्तद्रचनाकालः—"मन्त्रभाष्य मिदं क्लृप्तं भोजे पृथ्वीं प्रशासति"—इति। राजस्थानेतिहासलेखकेन टड्-महोदयेन त्रयो भोजाः परिचायिताः। तत्र प्रथमस्य संवत् ६१४=५५७ खी०, द्वितीयस्य संवत् ७२२=६६५ खी०, अन्तिमस्य तु भोजस्य संवत् १०६२=१०३५ खी० राज्यारम्भकालो निर्णीतः। तदन्तिमभोजराज्यकाले एव प्रणीतं तत् मन्त्रभाष्य मिति स्वीकृतेऽपि न हि तद्राज्यारम्भकाले एव प्रणयन मुपगम्यते, नाप्यन्यूनार्द्धशताब्दी मन्तरा तदानीं कस्यचिदपि ग्रन्थस्य सर्वत्र प्रकृतिसम्भवः प्रामाण्यतया ग्रहणञ्च भवेदिति तत्रान्यूनाष्टपञ्चाशदङ्का अपि योजनीयाः। तदेवं

११५०-संवत्समातः पर मेव प्रणीत मिदं नैघण्टुकव्याख्यानं देवराजेनेति च प्रतीयते ।

निघण्टुभाष्यरूपस्य यास्कीयनिरुक्तस्य ऋज्वर्थाभिधायाष्टीकायाः प्रणेता दुर्गाचार्यस्तु अस्मात् देवराजयज्वनो नूनं परभवः ; देवराजकृतायां नैघण्टुकव्याख्याननामटीकायां क्वापि दुर्गाचार्यस्य तद्‌ग्रन्थस्य वा नामोल्लेखाऽदर्शनात् । अस्ति हि नैघण्टुकव्याख्यानभूमिकायां (१ भा० ४, ५ पृ०) 'इदञ्च समनीषिकया न क्रियते'—इत्यादिः, 'अतोऽस्माभिर्यथामति प्रदर्शितौ प्रतिपदनिर्वचननिगमौ विद्वांसो बुद्ध्वा निरूप्य सुकभाषितवन्मनसि कुर्वन्तु'—इत्यन्तः, प्रमाणपारायणग्रन्थसन्दर्भः ; यदि नाम दुर्गाचार्यकृता मत्सम्पादिता 'ऋज्वर्थां' निरुक्तवृत्तिरपि तस्य देवराजयज्वनः परिचिता स्यात्, तर्ह्यवश्यं तत्र तस्यापि स्मरणं गम्येत । ततो ग्रन्थमध्येऽपि बहूनां ग्रन्थानां ग्रन्थकृतां च समुल्लेखो विद्यते, विशेषतः स्कन्दस्वामिकृतस्य निरुक्तभाष्यस्य प्रमाणत्वेनोपन्यासः परिदृश्यते तत्र पदेपदे ; पर मेकत्रापि निन्दामुखेन च नैव स्मृतो लक्ष्यते दुर्गाचार्यस्तदीय एष ग्रन्थो वा । अतो निःसंशय मेवावगम्यते निघण्टुव्याख्याकारो यज्ववंशदीपो देवराजो नून मृज्वर्थारचयितुर्दुर्गाचार्यस्याग्रजन्मेति । किञ्च निघण्टुटीकायाम्,—'नैगमदेवताकाण्डगतानाञ्च पदानां भाष्यकारेण (यास्केन) निरुक्तानां स्कन्दस्वामिना च तद्व्याख्यातानां प्रक्रिययोन्मीलितत्वम् ; अतस्तु नैघण्टुककाण्डनिर्वचनानन्तरं तदुन्मीलयितुमत्राय मस्मत्परिश्रमः'—इति (१भा०४ पृ०) लेखात्, 'निगमदेवताकाण्डयोश्च निर्वचनं भाष्यस्कन्दस्वामिभ्यां प्रदर्शितं विशदप्रत्ययाभावात् प्रक्रियां विशदीकृत्य क्रमेण व्याख्यायते । तत्र, निगमव्याख्यानानि यदत्रानुसंहितं तत् तत्रैव द्रष्टव्यम्'—इति (१ भा० ३७७ पृ०) नैगमकाण्डीयव्याख्यानोपक्रमवचनाच्च स्फुटं प्रतीयते देवराजीयैतट्टीकाप्रणयनकाले स्कन्दस्वामिकृता निरुक्तटीकैवासीत् सुप्रचलिता ; न तु दुर्गाचार्यकृतेयं मत्सम्पादितेति ।

अप्ययं दुर्गाचार्यः किल सर्ववेदभाष्यकृतः सायणतस्तु प्राग्भवः ; न

हि सायणीयविस्तृतभाष्यदर्शिनस्तथाविधं जटिलं निरुक्तोदाहृतमन्त्रव्याख्यानं युज्यते। यच्च दृश्यतेऽत्रैकत्र (१भा० २३४ पृ०) सायणीयरीत्या समुल्लङ्घ्य कृतं व्याख्यानम्, यथावदुद्धृत मेव तत् सायणेन स्वकीये ऋग्वेदार्थप्रकाशे (ऋ० सं० ७ ७. २६. १. सा० भा०); काण्वरवेणोरटीकृतञ्च तत्रैव—'एतस्या व्याख्यानं निरुक्तटीकाया उद्धृतम्'–इति। अतोऽद्य निःसंशय मेव वक्तुं शक्यते, सायणीयादृग्संहिताभाष्यात् प्राक् प्रणीतेयं दौर्गी निरुक्तवृत्तिरिति।

सायणाचार्यस्य तस्य परिचयस्तु तदीययज्ञतन्त्रसुधानिधिप्रभृतिग्रन्थभूमिकादितोऽभ्युपेयते। तद्यथा—"वंशे चान्द्रमसे तदन्वयनिधिः श्रीसङ्गमोऽभूत्। तस्मात् प्रादुरभूदभीष्टसुरभिः श्रीबुक्कपृथ्वीपतिः॥ हरिहरनिभो भूमौ कामदोग्धो जगत्याम्, हरिहरनरपालस्तस्य चाभूत् कनिष्ठः। + + + । तस्याभूदन्वयगुरुः सत्यसिद्धान्तदेशतः। सर्वज्ञः सायणाचार्यो मायणार्यतनूद्भवः॥ उपेन्द्रस्येव तस्यासीदिन्द्रः सुमनसां प्रियः। महाक्रतूनामाहर्त्ता माधवार्यसहोदरः॥"–इत्यादि। माधवार्यो माधवाचार्य इत्यभिन्नः। तेन स्वकृतव्यवहारमाधवादिग्रन्थभूमिकादौ स्वस्य बुक्कामात्यत्वं स्वकुलवर्णनं चोक्तं विशेषतः। तद्यथा व्यवहारमाधवे—"सत्यैकव्रतपालको द्विगुणधीस्त्रार्थी चतुर्वेदिता, पञ्चस्कन्धकृती षडन्वयदृढः सप्ताङ्गसर्वंसहः। अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दिशत्प्रत्ययः, स्मार्त्तोच्छ्रायधुरन्धरो विजयते श्रीबुक्कणः क्ष्मापतिः॥ इन्द्रस्याङ्गिरसो नलस्य सुमतिः ०——० यद्वत्तस्य विभोरभूत् कुलगुरुर्मन्त्री तथा माधवः॥ + + + ॥ श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता। सायणो भोगनाथश्च मनोबुद्धी सहोदरौ॥ यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी। भारद्वाजं कुलं यस्य सर्वज्ञः स हि माधवः॥"–इति।

तदेव मवगम्यते,—चन्द्रवंशीयस्य श्रीसङ्गमस्य नृपतेः कुलगुरुरासीत् मायणाचार्यः। तस्य राज्ञो बुक्कहरिहरौ पुत्रौ सुयोग्यौ बभूवतुः; मायणस्य च माधव-सायण-भोगनाथास्त्रयः पुत्रा आसन्। तत्र ज्येष्ठस्य बुक्कस्य

गुरुरभूत् मायणस्य ज्येष्ठपुत्रो माधवः ; कनिष्ठस्य हरिहरस्य गुरुरासीत् मायणस्य मध्यमपुत्रो माधवानन्तरजातः सोदरः सायणः। सर्वकनिष्ठस्य भोगनाथस्य तु ताभ्यां मध्यविद्यत्वात्, सर्वकनिष्ठत्वाद्वा बुक्कहरिहरयो-र्गुरुत्वालाभादनाश्रयत्वात् नैवाभूत् तथा प्रसिद्धिः, यथा तज्ज्येष्ठयो-र्माधवसायणयोः। माधवाचार्येण हि बुक्कराजसाहाय्यात् व्यवहारमाध-वाधिकरणमालादयो ग्रन्थाः प्रणीताः, स्वानुजेन सायणेन च कारितानि वेदभाष्याणि सर्वाणि। सायणाचार्येण तु हरिहरराजसाहाय्यात् यज्ञ-तन्त्रसुधानिध्यादयः प्रणीताः। सर्वदर्शनसङ्ग्रहकारो माधवस्त्वन्य एव, निर्वचनानुक्रमण्यादिग्रन्थानाञ्च प्रणेता माधवोऽप्यन्यः, सामवेदीयविव-रणग्रन्थकारश्च माधवो विभिन्न एव ; तेषु 'वागीशाद्याः सुमनसः'— इत्यादि-मायणवंशीयमङ्गलाचरणादिदर्शनाभावादिभ्यः।

तदनयोर्माधवसायणयोराश्रयौ यौ बुक्कहरिहरौ राजानौ, तयोस्तु ख्री० १३४४-समाया मभूच्छासनारम्भ इति निर्णीति मद्यतनीयैरैतिहासिकैः प्राय एकमत्येव। तथाच १४००-संवत्समातः परस्तादेव माधवाज्ञातो सायणेन प्रणीतानि वेदभाष्याणीति च गम्यते स्फुटम्। दुर्गाचार्येण तु सायणीयभाष्यतः प्रागेव निरुक्तवृत्तिर्निरमायीति तु प्रतिपादितं पुरस्तात्। नैघण्टुकनिर्वचनरचयितायं देवराजस्तु ततोऽपि पूर्वतन इति च निरूपितं प्राक्। तदेवं संवत्कालतोऽप्यधिकसार्द्धत्रयोदशशताब्दीमध्ये एव समु-त्पन्नोऽयं देवराज इत्यपि वक्तुं युज्यत एव।

तथा शुक्लयजुर्भाष्यप्रणेता महीधरमिश्रः खलु सायणमाधवयोरग्रज इत्यपि ध्रुवम् ; महाराजजयचन्द्रप्रदत्तदानपत्रतो महीधरपौत्रस्य १२३२ संवत्समाया मवस्थित्युपलब्धेः। तथाहि तत्ताम्रशासनत एवेह किञ्चि दुद्धरामः—"यश्चोपरिलिखितग्रामौ सजलस्थलौ सलोहलवणाकरौ सम-त्स्याकरौ सगर्त्तोषरौ सगिरिगहननिधानौ समधूकाम्रवनवाटिकाविटपतृ-ण+तिगोचरपर्यन्तौ सोर्द्धाधश्चतुराघाटविशुद्धौ स्वसीमापर्यन्तौ द्वात्रिं-शदधिकद्वादशसंवत्सरे भाद्रे मासि शुक्लपक्षे त्रयोदश्यां तिथौ रविदिने

अङ्कतोऽपि संवत् १२३२ भाद्रसुदि १३ रवौ अद्येह श्रीमद्विजयवाराणस्यां गङ्गोदकेन स्नात्वा ०—० महापण्डितश्रीमहीधरपौत्राय महामिश्रपण्डित-श्रीहालेपुत्राय महापण्डितश्रीहृषिकेशशर्म्मणे ब्राह्मणाय ०—० प्रदत्तौ मया"—इत्यादि। मुद्रितश्चैतत्पत्रं ताम्रपत्रकतः काशीविद्यासुधानिधौ (September, 1869.)। नन्वेवं महीधरीयप्रथममङ्गलाचरणवाक्यत एव यदवगम्यते माधवीयभाष्यस्य च ततः प्राचीनत्वं "भाष्यं विलोक्यौवटमाधवीयम्"—इति; अस्य का गतिरिति चेत्, अत्र वच्मि—देवराजेनापि दृष्टं प्राचीनतर मेव माधवीयभाष्यं तच्च प्रामाणिकत्वेनोपन्यस्तं महीधरेणेति। इह हि नैघण्टुकनिर्वचने उद्धृतानां माधवीयभाष्यवचनाना मेक मपि नोपलभ्यते सायणमाधवीयेऽस्मद्दृष्टभाष्ये; अत आसीदेव तदानीं तद्व्याख्यान्तरं माधवीयं नामेत्यत्रास्ति को विचार्य्यः। वाजसनेयिसंहिताभाष्ये यदेवोक्तम्महीधरेण माधवस्त्वित्यादि (१३. ४५.), तदपि न सायणमाधवीयवचन मिति च ध्येयम्।

तदेवं १२३२-संवत्समायां स्थितस्य हृषीकेशस्य पितामहो महीधरः प्रायो द्वादशशताब्दीचतुर्थपादे (सं० ११७६—१२००) प्रणिनाय वेददीपं नाम शुक्लयजुर्भाष्य मित्यनुमानञ्च भवेन्नासङ्गतम्।

तस्मात् शुक्लयजुर्भाष्याच्च प्राचीन मिदं नैघण्टुककाण्डनिर्वचन मिति प्रतीयते; अत्रोल्लिखितभाष्यनामादिषु माहीधरस्यादर्शनात्। तथाच विक्रमाब्दाना मन्यूनसार्द्धैकादशशताब्द्यतीते द्वादशशताब्दीचतुर्थपादारम्भाच्च पूर्वं (सं०११५१—११७५) प्रणीत मिदं देवराजेन नैघण्टुककाण्डनिर्वचन मित्यस्माकम्॥

अथैतन्नैघण्टुककाण्डनिर्वचनभूमिकायाश्चतुर्थपञ्चमश्लोकतः (१ भा० १, २ पृ०) खल्वस्य पितामहो देवराजः, पिता च यज्ञेश्वरार्य इति व्यज्यते। ततश्चानुमीयते,— बभूव य एको यज्ववंशीयो विद्वान् यज्ञमूर्त्तिः, काले रामानुजशिष्यत्व मुपगतो देवराज इति प्रसिद्धः,—"ततो विद्वान् महान् कश्चित् यज्ञमूर्त्तिरिति श्रुतः। + + + शिष्यविद्यादिसम्पद्भिः

संयुक्तोऽप्रतिवैभवः। + + + आसाद्य रङ्गनगरं लक्ष्मणार्य त मब्रवीत्। रामानुज! मया सार्द्धं शास्त्रवादं कुरु स्वयम्॥ + + + प्रणम्य लक्ष्मणार्यं च बद्धाञ्जलिपुटोऽब्रवीत्। त्वया जितोऽहं योगीन्द्र! रक्ष मां शरणागतम् + + + ज्ञानपुत्रस्य मे चास्य यज्ञमूर्त्तिरिदं मुदा। + + + देवराजमुनिश्चेति नामान्तर मथाकरोत्॥"
—इत्यादिभिः प्रपन्नामृते पञ्चविंशषड्विंशाध्याययोर्वर्णितः, स एवास्य स्यात् पितामहः; किञ्च तत्रैव प्रपन्नग्रन्थे यज्ञेश्वरसंवादोऽप्यस्ति (२६ अ० १० श्लो०), स एव वास्य पितेति। पितामहपौत्रयोर्नामैक्यं यद्यपि भवितु मर्हत्येव विचारणीयम्; पर मेव मन्यत्रापि दृश्यत इति नासङ्गतम्। तद्यथा—अस्त्येको ग्रन्थो गुणरहस्याख्यः, तत्र न्यायमतानुसृतषट्पदार्थान्यतमो गुणो बोधितः सम्यक्। तस्य चैका टीका विश्रूयते गुणसारमञ्जरीति। तत्प्रणेता किल माधवदेवपौत्रो माधवदेव एव। तथाहि तद्ग्रन्थीयान्तिम मिदं वाक्यम्—"इति श्रीगोदावरीतटविराजमानधारापुरनिवासिमाधवदेवात्मजलक्ष्मीदेवसूनुकाशीनिवासिमाधवदेवेन गुणरहस्यप्रकाश-गुणसारमञ्जरी विश्वेश्वरप्रीतये कृता"—इति।

अपि मङ्गलाचरणपञ्चमश्लोके 'रङ्गेशपुरीपर्यन्तग्रामवास्तव्यः'—इत्युक्तिदर्शनादवगम्यतेऽयं देवराजो दाक्षिणात्यः; अस्ति हि रङ्गेशपुरी त्रिशिरपल्लीप्रदेशे कावेर्याः शाखाद्वयेन वेष्टिता प्रसिद्धा; तस्या एवोपकण्ठे स वसति स्मेति। इयमेव रङ्गेशपुरी पुरा बभूव रामानुजादीनां श्रीवैष्णवानां प्रधानतो रङ्गभूमिः, तदत्राविर्भूतो देवराजो यज्ववंशजातोऽपि कथं न स्यात् विष्णुपदाश्रयः? अत एव स्मृत मिह प्रसङ्गतस्तेन—'वाचं शौरिकथालापप्रसङ्गे पुनीमहे—इत्युक्तेः (८० पृ०)'—इति।

किञ्च निरुक्त मिति प्रसिद्धे यास्कीये निघण्टुभाष्ये, स्कन्दस्वामिकृतायां तट्टीकायाञ्च यथा नैगमदैवतकाण्डपठितानि पदानि प्रत्येक मुपादाय निरुक्तानि दर्शितनिगमानि च, न तथा नैघण्टुकानि; अतो देवराजयज्वना नैगमदैवतपदानां व्याख्याने न तथा श्रमः कृतो यथा नैघण्टुक-

व्याख्याने; एतदेव प्रकटयितुं कृतं स्वग्रन्थनामकरणं 'नैघण्टुककाण्ड-निर्वचनम्'—इति। ध्वनितञ्चैतत् भूमिकायाम् (२ पृ० ७ पं०—४पृ० ४ पं०) स्फुट मिति।

इह भूमिकायां 'स्कन्दस्वामि-भवस्वामि-गुहदेव-श्रीनिवास-माधवदेव उवटभट्ट-भास्करमिश्र-भरतस्वाम्यादि-विरचितानि वेदभाष्याणि'—इत्युक्तम्। तत्रादिपदात् हरदत्तमिश्रकृतस्य च वेदभाष्यस्य प्रामाण्यतयाच ग्रहण मनुमीयते; ग्रन्थमध्येऽस्य स्थानेषु तद्व्याख्यानोद्धृतिदर्शनात्। अय मेव हरदत्तः पाणिनिवृत्तेः काशिकायाः टीकाकारोऽपि स्यात्। एतत्कृता वेदव्याख्या त्वस्माभिर्नाद्यापि दृष्टा, पर मापस्तम्बसूत्रवृत्तिस्तु विद्यत एव।

(१) स्कन्दस्वामी। अनेन वेदभाष्यं प्रणीतम्, निरुक्तस्यापि टीका कृता। तावुभावेव ग्रन्थौ नैघण्टुकनिर्वचनप्रणयनकालेऽस्यातां सुप्रचलितौ; नान्यथा तत्र तयोः प्रतिपद मेव संस्मरणं युज्येत। ऋज्वर्थाग्रथनसमये तु स्कन्द-स्वामिकृतं वेदभाष्य मासीन्न वेति को वदेत्, परं निरुक्तव्याख्यानं दुर्लभ मपि लभ्येतैवेति सम्भाव्यते; न हि कि मप्यालम्बन मन्तरैव निरुक्तव्याख्याने कृतकार्यता दुर्गाचार्यस्य गम्यते। इदानीन्तु तन्नैवोपलभ्यते। अय माचार्यः खलु रामानुजात् बहुपूर्वज एव स्यात्; रामानुजाभ्युदयात् बहुपूर्वं मेवेह भारते स्कन्ददेवनामादिप्रचारश्रुतेः। प्रपन्नामृतेऽपि हि षट्त्रिंशा-ध्याये जगन्नाथक्षेत्रतः सुदूरे वेङ्कटाद्रौ कूर्म्मक्षेत्रम्, तत्र च 'स्वामिपुष्कर-णीतीरे स्कन्दं मत्वा तदाक्रमन्। स्कन्द मित्येव शैवास्ते वैष्णवा वेङ्कटेश्व-रम्॥'—इति वर्णितम्। तथा ६२७-शाकीयताम्रशासनतोऽपि प्रायो-ऽवगम्यते, भवेत्तच्छताब्दीज एवाय मिति। द्रष्टव्य मेतत् Bombay Branch R. A. S.-प्रकाशिते पत्रे (III. 208—1851.)।

(२) भवस्वामी। एतत्कृतभाष्यस्य किञ्चिदंशस्यापि दर्शनं नूनं सम्पन्नं देवराजस्येत्येव गम्यते भूमिकोक्तिपाठतः, परं ग्रन्थमध्ये न क्वापि भवस्वामि-वचन मुद्धृतं दृश्यते; ततस्तदानी मेव तद्भाष्यं विरलप्रचार मुपगत मिति प्रतीयत एव; इदानीन्तु नैव लभ्यते। तत्कृतोऽग्निष्टोमप्रयोगस्त्वद्यापि

क्वचित् क्वचिदस्त्येव। भट्टभास्करकृते आपस्तम्बसंहिताभाष्येऽप्यस्य नाम-स्मरणं लभ्यते। Burnell-महोदयेन तस्य खिष्टीयाष्टमशताब्द्यामिह स्थितिरनुमिता (Catalogue pp. 24—30.)।

(३) गुहदेवः। अयं खलु रामानुजस्वामिनोऽप्यतीवपूर्वतनः, किं मधिकेन वेदान्ताचार्यसम्प्रदायगुरुषु तृतीयः। तथाहि रामानुजशिष्यवरेण श्रीश्रीनिवासदासेन यतीन्द्रमतदीपिकारम्भे एव मुक्तम्,—'व्यास-बोधायन-गुहदेव-भारुचि-ब्रह्मानन्दि-द्रविडाचार्य-श्रीपराङ्कुशनाथ-यामुनमुनि-यतीश्वर-प्रभृतीनां मतानुसारेण'—इत्यादि। यतीश्वर इति रामानुजस्यैव समाख्यान्तरम्; प्रपन्नामृतप्रभृतिग्रन्थतस्तथैवोपलब्धेः। यामुनमुनिस्तु तत्पूर्वतनो वेदान्ताचार्यः, पराङ्कुशनाथस्तु ततोऽपि पूर्वतन इति च प्रपन्नामृतादिभ्य एव ज्ञायते। एतदीयवेदभाष्यात्, सम्भवतः खण्डितातीवजीर्णपुस्तकात् एक मेव पदव्याख्यान मुद्धृत मिह देवराजेन—'गरम् उदकं गिरन्ति गरगिरः'—इति (३० पृ०)।

(४) उवटभट्टः। १०९२-संवत्समातः समनन्तर मेतेन मन्त्रभाष्यं प्रणीत मिति निरूपितं पुरस्तात्। टान्तनामसाम्यात् काव्यालङ्कारकर्तुः रुद्रटस्य समकालिकोऽय मित्येवं सम्भावितेऽपि गम्यते प्रायस्तथैव; ११२५ संवत् समतीते काव्यालङ्कारटीकाप्रणयनावगमात्। तथाहि तत्समाप्तौ—"एवं रुद्रटकाव्यालङ्कृतिटीप्पनकविवचनात् पुण्यम्। यदवापि मया तस्मात्मनः परोपकृतिरतिभूयात्। + + +। पञ्चविंशतिसंयुक्तैरेकादश-समाशतैः। विक्रमात् समतिक्रान्तैः प्रावृषीदं समर्थितम्"—इति। एतत्कृतं मन्त्रभाष्यं नाम शुक्लयजुःसंहिताव्याख्यानम्, ऋक्प्रातिशाख्यभाष्यम्, कात्यायनप्रातिशाख्यभाष्यं चेति ग्रन्थत्रय मुपलभ्यतेऽदुर्लभ मद्यापि।

(५) श्रीनिवासः। अय मेव श्रीमत्पूज्यपादस्य भगवतः शङ्कराचार्यस्य गुरुरासीदिति श्रुतं सत्यञ्चेत्, तत्समकालिकत्वात् सार्द्धाष्टशतसंवत्समाभ्यन्तरे एव स इमां भुव मलञ्चकारेति नूनम्। नैघण्टुकनिर्वचने षट्स्वेव स्थानेषु एतन्मत मुद्धतं दृश्यते, ततश्चावगम्यते देवराजकाले एवैतत्कृतस्य

भाष्यस्याभवत् लुप्तकल्पतेति ; तदेतर्हि तत्प्राप्तिः कथं सम्भावनैव ।

(६) माधवदेवः । दृश्यतेऽप्यपरमेकं वेदव्याख्यानं विवरणं नाम ; तस्य रचयिता बभूवैको माधवः ; वेदार्थप्रकाशाख्यभाष्यगणस्य कारयिता सायण-ज्येष्ठोऽप्येक आसीत् माधवः ; ताविमावुभावेव माधवौ देवराजोल्लिखित-नाम-माधवादस्माद् विभिन्नावेव ; नैघण्टुककाण्डनिर्वचने माधवीयेतिसमुद्धृतानां व्याख्यावचनाना मेकस्यापि तत्र विवरणवेदार्थप्रकाशयोरदर्शनात् । Benfey-महोदयेन च सामार्चिकसम्पादनावसरे (खी० १८८४) सायणीय मिति यदुद्धृतं क्वचित् क्वचित् किञ्चित् किञ्चित् पूर्वार्चिकव्याख्यानम्, तदपि नैव सायणमाधवीयं वेदार्थप्रकाशाख्य मपि तु विवरण मेव ।

अपि सायणज्येष्ठो माधवः खलु मायणपुत्रः ; देवराजीयो माधवः किल वेङ्कटाचार्यतनयः ; इहैव भूमिकायां 'श्रीवेङ्कटाचार्यतनयस्य माधवस्य भाष्यकृतौ'–इत्युक्तेः । वेङ्कटाचार्यौ च द्वौ प्रसिद्धौ । तत्र, यद्ययं 'शुल्व-मीमांसा'-कारः स्यात्, नूनं तर्ह्यासीत् हरिहरयोः समानभावेनैवोपासको ऽभेदधिषणः ; तत्र तथैव मङ्गलाचरणादिदर्शनात् । तथाहि—

'पारावारात् प्रोद्धृते चन्द्रलक्ष्म्यौ, याभ्यां शश्वन्मौलिवक्षौ बुभूषे ।
सर्वैर्लोकैः पूजिते सद्गृहीते, वन्दे देवौ वामदेवाच्युतौ तौ ॥ ५ ॥"–इत्यादि, '—इति श्रीमदद्वैतविद्याचार्यस्य •——• सर्वतन्त्रस्वतन्त्रस्य •——• श्रीवेङ्कटेश्वरदीक्षितस्य कृतिषु बौधायनशुल्वमीमांसायां प्रथमोऽध्याय.'–इत्येवमादि च । यद्ययं 'रहस्यत्रयसार'-कृत्, 'न्यासतिलक'-प्रणेता च स्यात्, नूनं तर्ह्यासीत् रामानुजमतानुगो भेदधिषणश्च ; तत्र तत्र रामानुजमतस्यैव प्रतिपत्त्यवगमात् ; न्यासतिलकस्य च व्याख्यानं रामानुज-शिष्येण श्रीश्रीनिवासदासेन सबहुमानकृत मिति दर्शनाच्च ।

यद्युच्येत,—शुल्वमीमांसारचयिता, न्यासतिलकादिप्रणेता चाभिन्न एवेति, तदप्युपपद्येतैव ; दृश्यत एव हि शुल्वमीमांसाया अन्तवाक्ये यथा वेङ्कटाचार्यस्य विशेषणं सर्वतन्त्रस्वतन्त्रस्येति, रहस्यत्रयसारस्यान्तेऽपि तथैव । तथाहि—'इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीम-

वेङ्कटेशस्य वेदान्ताचार्यस्य कृतिषु श्रीरहस्यत्रयसारः समाप्तः'–इति। वेङ्कटाचार्यः, वेङ्कटनाथः, वेङ्कटेशः, वेङ्कटेश्वरः, वेङ्कटदीक्षितश्चैक एव स्यात्; एकस्मिन्नेव ग्रन्थे वेङ्कटस्य तस्य बहुविधायाः समाख्यायाः व्यवहारदर्शनात्। वेङ्कट इति व्यङ्कट इति द्विधा लेखश्चोपगम्यतेऽत्र सर्वत्र।

ननु एकस्यैव अभेदवादित्वं भेदवादित्वं च कथ मुपपद्येतेति चेत्, न; कालान्तरतया मतपार्थक्यसम्भवात्। यावदासीत् सोऽभेदधिषणो यागभक्तस्य, तत्रैव प्रणिनाय शुल्बमीमांसादिकान्; यदा त्वभूत् रामानुजाभ्युदयवाताहृतभेदधीः कैङ्कर्यव्रतः प्रपन्नः, तत एव विरचितवान् न्यासतिलकादिकानिति; अत्र किं मस्ति वैचित्र्यम्।

यद्येवं कल्पना नान्तता स्यात्, तर्ह्यवश्यं तत्पत्रो माधवदेवो नैघण्टुकव्याख्यानकृतो देवराजस्य प्रायः समकालिक एव भवेत्। तथा सति समकालिकव्यक्तिकृताद् ग्रन्थात् प्रामाण्यतया पुनःपुनः व्याख्यानाद्युद्धृतिर्देवराजस्यामानुषीत्येव स्वीकार्यम्। न च ग्रन्थस्योत्कर्ष मेव तत्र बीज मिति वाच्यम्; तदीयपूर्वापरविरोधप्रदर्शनेन तदौत्कर्ष्याभावबोधनात्। तद्यथा—'मह्यी मे अस्य ०—०इत्यत्र माधवस्य प्रथमभाष्यम्—+ + + मांश्चत्वे अश्वनामैतत् + + +; प्रभ्रं मांश्चतो ०——० इत्यत्र माधवः— + + + मांश्चतोर्वरुणस्य + + + इत्यभाषयत्; निरूपणीयम्'– इति (१५०पृ०)। अस्तु वा तत्तथैव; परं देवराजकृत मिदं निर्वचनं यथा लब्ध मस्माभिः; कथं नैवं लभ्यन्ते तत्समसामयिककृतानि भाष्यनामानुक्रमण्यादीनि? इत्यपि विचार्य मेव।

अस्मन्मते तु वेङ्कटाचार्यद्वयपक्ष एवाश्रयणीयः; तत्राग्रजः शुल्बमीमांसाकारो वेङ्कटाचार्यस्त्वासीत् मीमांसको दीक्षितश्च, रामानुजात्तु का कथा भगवच्छङ्कराचार्याच्च प्राग्भवो मुण्डनमिश्रादिसमसामयिकः सः; तद्ग्रन्थालोचनात्तथैव प्रतीतेः। तत्पुत्रेणैव माधवदेवेन वेदभाष्यादीनि प्रणीतानि। देवराजकाले स्थितान्यपि तानि साम्प्रतं विलुप्तान्येव वा।

माधवपुत्रेण विनायकेन कृतं कौषीतकीब्राह्मणभाष्यं तु क्वचित् क्वचित्

लभ्यत एव; परं स हि कौषीतकीब्राह्मणव्याख्याता विनायकोऽस्यैव माधवस्य पुत्र इत्यत्र तु नोपलभ्यते निःसंशयं मानम्। एवं विनायकभ्रान्तिरितिप्रथिते क्षुद्रग्रन्थे सामगानां संहितातो ब्राह्मणाच्चाशेषमन्त्राणां सङ्ग्रहः कृतो वर्त्तते। तस्य कर्त्ता विनायकश्च किमु स्यादस्यैव माधवस्य सूनुः? तथा षड्गुरुशिष्यस्यैकं विनायक मन्यतमं गुरु माह। तथाहि—'नमः षड्गुरवे तुभ्यं नमोऽस्मद्गुरवेऽपि च। विनायकस्त्रिशूलाङ्को गोविन्दः सूर्य एव च। व्यासश्च शिवयोगी च ये षट् तेभ्यो नमः सदा'—इति। सोऽपि विनायकः किं मस्यैव माधवस्यात्मजः? इमानीह विचार्याण्येव।

(७) भास्करमिश्रः—भट्टः। बभूवैको ज्योतिषशास्त्रीयग्रन्थानां प्रणेतातिप्रसिद्धो भास्कराचार्यः। नायं सः; तस्य वेदविदांवरत्वेन प्रसिद्ध्यभावात्। वेदान्तशास्त्रीयप्रकरणग्रन्थविशेषस्य सिद्धान्तसिद्धाञ्जनस्य रत्नतूलिकाख्याख्यटीकायाः प्रणेतापि बभूवैको वेङ्कटयज्वपुत्रो भास्करः; स चास्माद् विभिन्न एव तत्रैव हि दीक्षित इति दत्तस्वपरिचयो न तु मिश्र इति। वैदिकग्रन्थेषु एतर्हि सुदुर्लभाः त्रिकाण्डमण्डनाख्ययज्ञकारिकाः प्रशस्ताः, तासां प्रणेता बभूवापरो भास्करः; किञ्च वेदाङ्गच्छन्दःसूत्राणां मतिदुर्लभस्यात्युत्कृष्टस्य भाष्यराजाख्यस्य भाष्यस्य रचयिता च बभूवान्यो भास्करः। नून मनयोः कतरेणैव वेदभाष्यकारेण भवितव्यम्। न च त्रिकाण्डमण्डनकारो भाष्यराजकारस्याभिन्नः; तयोः पितृपरिचयभेदात्। तद्यथा—त्रिकाण्डमण्डनकारस्य भास्करस्यासीज्जनकस्तत्र परिचितः कुमारस्वामी; स एव वा स्यात् कुमारिलस्वामी; भाष्यराजकारस्य तु गम्भीरराजः। तदत्र गम्भीरराजसूनुना कृतं तद् वेदभाष्य मुत कुमारिलतनूजेनेति चिन्तिते कुमारिलात्मजेनैव कृतं वेदभाष्यं दृष्टं देवराजेनेति प्रतीयते; नैघण्टुककाण्डनिर्वचने पृषेतिपदव्याख्यानावसरे '—इति भट्टभास्करमिश्रः (१ भा० १६ पृ०)'—इत्येव मुल्लेखदर्शनात्; न हि गम्भीरराजसूनुर्भट्टः; अपि तु दीक्षित इत्येव परिचितस्तत्र भाष्यराजे; कुमारिलस्वामी तु भट्ट इति प्रसिद्ध एव मीमांसकानाम्। यदीद मनुमानं नान्ृतं भवेत्, तर्हि

सार्द्धसप्तशतसंवत्सराभ्यन्तरजातस्य सुतरां श्रीमच्छङ्कराचार्य्यप्राग्भवस्य मीमांसावार्त्तिकप्रणेतुर्भट्टकुमारिलस्यैवाय मपत्यं भास्करमिश्रः। सायणतो ऽन्यूनचतुःशताब्दीपूर्व्वजोऽय मिति चानुमितं Burnell-महोदयेनापि (Catalogue pp. 12—14.)। एतत्कृतं रुद्राध्यायमात्रस्य भाष्य मस्माभिर्दृष्टम्; परं कस्याप्येकस्य वेदस्य सम्पूर्णं भाष्यं नाद्याप्यस्माक मभवद् दृग्गोचरम्; आपस्तम्बसंहिताभाष्यं तु पूर्ण मेव प्राप्यत इति नः श्रुतमात्रम्।

(८) भरतस्वामी। एतत्कृतग्रन्थत एकत्रैक मेव क्षुद्रं निर्व्वचनवाक्य मुद्धृतं देवराजेन; ततोऽवगम्यते,—तदानी मेवैतत्कृतस्य सम्पूर्णस्य भाष्य-स्यातिदुर्लभत्वम्; इदानीं तु नैवोपलब्धिसम्भावनापि। अतस्तस्यापि भरतस्वामिनः परिचयः सम्प्रत्यस्माक मज्ञेयकल्प एव। पर मस्ति क्वचित् पुस्तकालये छन्दोगारण्यकमात्रस्यैव तत्कृतं भाष्य मतिजीर्णं मिति च नः श्रुतम्। ६२७-शाकीयताम्रशासन मस्यापि कालनिर्णये स्याद्वा निदान मिति।

अथास्य व्याख्यानशैली त्वजटिलेति प्रशस्यैव विपश्चिताम्। परं पौरा-णिकमतप्रबलकालप्रभवत्वादस्य बह्वत्रैव पौराणिकमतानुसृता अपि व्याख्याः दृश्यन्ते। तद्यथा—'पञ्चाशत्कोटियोजनविस्तीर्णेति पृथिवी (१२पृ०)'–इति, पर्व्वतोऽपि पक्षच्छेदात् पूर्व मन्तरिक्षे व्रजति स्म (६४पृ०)'–इति, पक्षच्छे-दात् पूर्वं पर्व्वतस्य (६६पृ०)'–इति, 'उभयत्रापि छेद्यच्छेदकभावेन सम्बन्धः ०——० तेषा मिन्द्रः पक्षानच्छिनत् (६७पृ०)'–इति,'पिनाकम् ०——० दण्डाकारं धनुरुच्यते; तच्च रूढितो महादेवीय मेव सामान्येन (२८५पृ०)' –इति च। नैरुक्तविज्ञानभावावगमे चासमर्थ एवासीत् स इति च गम्यतेऽत्रानेकत्र। तथाहि—'विकृतत्वं ज्योतिषः शीतत्वात् ह्रासवृद्धिभ्यां वा (४२०पृ०)'–इत्येवमादीनि समालोच्यानि।

नैरुक्तशासनात्तस्य बह्वत्र ज्ञाननेत्रोन्मीलन मपि प्रतीयतेऽत्र। तद्यथा— 'यमः == मध्यस्थानवायुः (४७८पृ०)'–इति, 'यमः ०—० == अस्तमयावस्थ

आदित्य उच्यते (४८४पृ०)'–इति, 'विष्णुः=तीव्ररश्मिद्वारेण सर्वत्र व्याविशति (४६३)'–इति, 'अदितिः ०—०=ऐतिहासिकानां मते देवमाता, नैरुक्तानां मते अदीनादिगुणा, आत्मपक्षे प्रकृतिः (४०१पृ०)'–इति च । 'पञ्चजनाः'–इतिपदस्य व्याख्यानावसरे शूद्रस्य यज्ञाधिकारित्वं च विचारित मतिसुन्दरम् (१८५—१८७ पृ०) । 'यत्रैकार्थानां पदानां सन्निपातः, तत्रैकं तस्य वाचकं भवति ; अन्येषां निरुक्त्या योजनं कर्त्तव्य मिति मर्यादा (१२ पृ०)'–इत्यादिर्व्याख्योपदेशस्तु तस्य नूनं मूल्यवानेव । 'रलयोरभेदः (१३पृ०)'–इति, 'डलयोरेकत्वस्मरणात् (१४पृ०)'–इति, 'बवयोरभेदः (४५७पृ०)'–इत्येवमादयस्तु तत्प्रदर्शितविषय उणादिपदसाधने भवन्त्येव बहुत्र सहायकाः ।

निघण्टुसमाम्नायविरुद्धा अपि भवन्ति पदपाठा इति चेद्ध्वनितम् । तद्यथा—'सतीकम् ०——० अत्र स-शब्दे अवग्रहकरणं पदकाराणा मभिप्रायस्य वैचित्र्यात् (११८पृ०)'–इति । अस्मन्मते तु सतीक मित्यस्य तथैव निर्वचनं कार्य्यम्, यतो नैव विरुद्ध्येत 'स । तीकम्'–इति पदग्रन्थः ; तस्यापि संहितावत्त्वेन व्यपदेशात् तद्विरोधस्यानुपेक्षणीयत्वात् । वस्तुतो 'सूतीकम्'–इत्येव नैघण्टुकम् ; न पुनः सतीक मिति । एवं हिक मित्यादेर्निर्वचनावसरे (३२८पृ०)'–यदुक्त मेते निपाता इत्येव, तदपि पदग्रन्थविरोधान्निन्दनीय मेव । तत्र त्वस्मन्मते 'एते नव निपातसमुदायाः' –इत्येव वक्तुं युक्तम् ; अन्यत्राप्येवं समुदितपदद्वयस्य पदत्वेन परिगणनं दृश्यत एव हि निघण्टाविति । सायणाचार्य्यस्तु ऋग्भाष्यादौ हिक मित्यादीनां पदपाठरीत्यैव व्याख्यान मलिखत् ; न तु निर्वचनरीत्येति पश्यत्विदं स्वग्रन्थप्रमाणं किल देवराजः ।

व्योमशब्दनिर्वचनावसरे त्वेकत्र पदग्रन्थमर्यादाभङ्गभिया उणादिसूत्रस्य यास्कीयनिर्वचनस्यापि ध्वनितोऽनादरः । तथाहि—"उणादौ तु ०—० वीयते तद्वायुना व्योम । तथाच निरुक्तम्—'येनिरन्तरिक्षं महानवयवः परिवीतो वायुना (२ भा० १८८ पृ०)'–इति । इदं निर्वचन

मेतत्पदकारयोः शाकल्यात्रेययोरनभिमतम्; वीत्यस्मिन् अवगृहीतत्वात्”–इति (२६पृ०)। वस्तुतो यास्केनापि पदकाराभिमत मेव निरुक्तं व्योम व्यवन मिति (४ भा० २२९पृ०); परिवीत इति तु नैव व्योमनिर्वचनम्, अपि संहितापद मेवेत्यतो भ्रम एवात्र लक्ष्यते देवराजस्य। अथवा उणादिसूत्रदूषणे एवास्य तात्पर्यं मिति सर्व मनवद्यम्।

इहानेकत्र निगमस्यान्वेषणीयता च प्रतिपादिता स्वकण्ठरवेणैव। तथाच १७, २१ (३), २२, २३, २६, २८, २९, ३१, ३३, ३४, ३५, ४१ (२), ४५, ४६ (३), ४७ (२), ४८, ५६, ५७, ६१, ६२ (२), ६५, ६६ (२), ६७, ७१, ७८, ८३, ८४, ८९, ९० (२), ९४, ९५, १०४, १०६, १०७, ११० (२), ११२ (२), ११३ (२), ११४, ११५, ११६ (२), ११७, ११८, १२२ (२), १२३, १२४, १२५ (२), १२७, १२८ (३), १३५, १३६, १३७, १३८, १४० (२), १४८, १४९, १५१, १५७ (३), १६७, १६८ (२), १६९, १७३ (२), १८०, १८८ (२), १८९, १९१, १९४, १९९, २००, २१७, २१९ (३), २२१ (३), २२२, २२३, २३०, २३२, २३३ (४), २३४, २३५, २४०, २४९, २५९, २६३, २६६, २७०, २७४ (२), २७५, २७६, २७७, २८०, २८५, २८८, २९०, २९७ (३), ३०१, ३०२, ३०६, ३०७ (२), ३०९, ३१० (२), ३११, ३१५, ३१६, ३२१ (२), ३२२, ३२३ (२), ३२८, ३३०, ३४२, ३४४ (२), ३४५ (२), ३४८, ३४९ (२), ३५०, ३५१ (२), ३५९ (२), ३६०,[1] ३६१ (३), ३६२, ३६३, ३६४, ३६६ (२), ३६८ (२), ३७२ (२), ३७३ (२), ३७४ (५) ३७५ (५), ३७६, ३९९, ४०९, ४११, ४४४ पृष्ठेषु द्रष्टव्यम्। नैव मन्वेषणीयत्वप्रतिपादनं दूषणीयं मन्यतेऽस्माभिः; ‘न हि सर्वः सर्वं वेत्ति’–इति-प्रज्ञावत्सिद्धान्तात्, लुप्तशाखीयनिगमानां लाभासम्भवाच; परं यदत्र ब्राह्मणवादा अपि निगमा इति प्रदर्शिताः;—‘वेकुरानामासि जुष्टा–इति निगमः’–इति (९५पृ०), ‘देव्याः शमितार आरभध्व मुत मनुष्याः–इति च (१७७पृ०)’ –इत्यादयः। त इमे न रोचन्तेऽस्मभ्यम्; निघण्टुसमाम्नायस्य ब्राह्मण-

पूर्वभवत्वेन प्राच्यीयप्रदेशे लच्यासम्भवात्, द्वादशाध्याय्यां निरुक्ते क्वापि तथाविधनिगमास्मरणाच्चेति दिक्॥

अथ निरुक्तटीकाया ऋज्वर्थायाः प्रणेता दुर्गाचार्यस्तु नूनं निघण्टु-व्याख्यातुर्देवराजयज्वनोऽवरजः, सर्ववेदभाष्यकृतः सायणाचार्याच्च पूर्वजः—इति तु प्रतिपादित मेव पुरस्तात्; सम्प्रति सम्भाव्यते,—सोऽपि दाक्षिणात्य एव भवितु मर्हति; तत्र नैसर्गिकगौडविद्वेषदुर्गन्धोपलब्धेः। तथाहि—"वन्दनाः=वन्दितारः, लाडगौडादयः"—इत्यादि (२ भा० ४५८ पृ०)। सायणाचार्योऽपि दाक्षिणात्य एव, परं न स दुर्गाचार्य इवापरिमार्जित-रुचिः; तेन हि वेदार्थप्रकाशे 'वन्दना'—इति पदस्य 'वन्दनानि, रक्षांसि'—इति व्याख्यान मकारि। नन्वेवं ऋज्वर्थायाः परिच्छेदान्तेषु दृश्यमानस्य 'जम्बूमार्गाश्रमवासिनः'—इतिविशेषणस्य का गतिरिति चेत्, अत्र वच्मि—दक्षिणापथीयप्रदेशेभ्यो जम्बूदेशं गन्तुं प्रस्थितानां पान्थानां मार्गे एव स्थितस्तदाश्रमः, तत एव तत्र तथा विशेषण मुपपद्येतेति; न ह्येतेन तस्य दाक्षिणात्यत्वं निरस्यते।

ऋज्वर्थायां निघण्टुनिरुक्तयोः कर्तृपार्थक्यं सुप्रतिपादितम्। तथाहि—"एतस्मिन् मन्त्रे 'अकूपारस्य दावने'—इत्यय मनयोः पदयोरनुक्रमः, समाम्नाये पुनः 'दावने अकूपारस्य'—इति मन्त्रपाठव्यतिक्रमेणानुक्रमः। तेन ज्ञायतेऽन्यैरेवाय मृषिभिः समाम्नायः समाम्नातः, अन्य एव चायं भाष्यकार इति (२ भा० ४३६ पृ०)"—इत्यादि। वाय्विन्द्रयोर्भिन्नाभिन्न-त्वविचारोऽप्यत्र दर्शनीयः। तद्यथा—"वायुर्वेन्द्रो वेति किं मेकस्य पर्यायवचनावेतौ शब्दौ उताभिधेयौ भिद्येते?"—इत्यादिः (३ भा० ३२३ पृ०)। तत्रैव "कस्मात् पुनर्मध्यमस्य शब्दद्वयेनोपदेशः क्रियते, पार्थिवोत्तमयोरेकैकेन? (३२५ पृ०)—"इति विचारोऽपि भवेदेव प्रेक्षावता मभिधेयवचनः। "पात्रस्य इन्द्रपान मिति समाख्या (३ भा० ४४५ पृ०)"—इत्येवमादि व्याख्यानञ्च दुर्गाचार्यस्य तस्य याज्ञिकत्व मावेदयति। "तासु तनूनपादेवैकः + + + नास्त्येव नराशंसः; तत्र

नराशंसयाजिनां सौत्रामणीप्रयोगे कथं प्रयोगः ? (३ भा० ५०३ पृ०)"—इति तत्प्रश्नोद्भावन मपि प्रशस्य मेव। "आथर्वणे रोदसीत्यप्रस्त्थं पदम्, तदपेक्ष्यैकवचनेन भाष्यकारो निराह 'रोदसी रुद्रस्य पत्नी'—इति (४ भा० ३३२ पृ०)"—एषापि पङ्क्तिरस्य वङ्गमूल्यैव। "सा च पुनर्व्याख्या (२ भा० ३७८ पृ०)"—इत्याद्यनुक्रमणार्थवचनस्यास्य भवेदेव प्रशंसनीयम्। देवानां द्वैविध्यम् (४ भा० ३२२ पृ०), पितॄणां त्रैविध्यम् (४ भा० १९२ पृ०), देवयानपरिचयः (४ भा० ३७८ पृ०), मन्त्रेषु देवतानिर्णयप्रकारोपदेश-व्याख्यानं (२ भा० ३११ पृ०) चेत्येवमादिक मपीह द्रष्टव्य मेव।

परं मन्त्राणां छन्दोनिर्णये तु क्वचित् क्वचिदिह छन्दोऽनुक्रमणीविरोधः परिलक्ष्यते। तथाहि—'रं मा तपन्त्यभितः (ऋ० सं० १. ७. २१. ३.)'—इत्यस्या ऋचो निर्णीतं तेन पङ्क्तिच्छन्दः; अनुक्रमण्यां तूक्तं मत्र—"पांक्त मन्त्या त्रिष्टुबन्तमौ महाबृहती यवमध्या"—इति। एतदेव छन्दोऽनुक्रमणीमत मनुसृत्य सायणाचार्येण तु निर्णीत मियं यवमध्या महाबृहत्येवेति। तत्र हि मध्यपादस्य द्व्यक्षरन्यूनत्वैवैतादृशमतद्वैधे निदान मुपगम्यते। वस्तुतस्तु तादृशस्थले छन्दः सन्दिह्यत एव; प्रदर्शिताया हि ऋचो मध्यमः पादो दशाक्षरः श्रूयते, न च दशाक्षरमध्या द्विचत्वारिंशदक्षरा पञ्चपदा काचिदस्ति विशुद्धा बृहती पङ्क्तिर्वेति; अतो नूनं चिन्तनीय मेवैतस्या ऋचो विराड्-यवमध्या नाम महाबृहतीच्छन्दः उत स्वराट्-पथ्या नाम पङ्क्तिच्छन्दः? इति। ईदृक्सन्देहापनोदनायैव सः पिङ्गलाचार्यसूत्रे—"आदितः सन्दिग्धे, देवतादितश्च (६, २१. ७, १.)"—इति। एवश्चास्या ऋचः पाङ्क्तसूक्तमध्यपतितत्वात् पङ्क्तित्व मेव ज्यायः। न जाने कथ मनुक्रमणीकारोऽस्या महाबृहतीत्व माख्यदिति। क्वचित् सूत्रानुरोधतोऽपि ऋक्छन्दोऽनुक्रमणीविरोधो गलेकुठारन्यायेन सोढव एव दुर्गाचार्येण। तद्यथा—"अभि न इला (५भा० २४२पृ०)"—इत्यस्य खण्डस्य वृत्तिर्मदीया टीप्पनी च (||) द्रष्टव्या। सायणाचार्येण तु ऋग्भाष्ये अनुक्रमण्यनुरोधतो नैरुक्तस्वरसोऽपि किमु व्याथितः? अपि वा नव तेन

तदानी मेव निरुक्तग्रन्थः स्मृतः ? अन्यथा ह्येतदुल्लेखोऽपि कथं न तत्र कृतस्तेन । वस्तुतोऽत्र निरुक्तानुक्रमणीकारयोः प्रतीयत एव मतभेदः, तत् किङ्कर्त्तव्यमूढ एवाभवता मिह देवराजः सायणश्च ।

दुर्गाचार्यदृष्टनिघण्टुसमाम्नायपुस्तकगतलिपिकरप्रमादादिदोषतश्च क्वचित् क्वचिद् भ्रान्तिः प्रतीयते ऋज्वर्थायाम् । तद्यथा—निघण्टौ नैगमे काण्डे ऽन्हेत्याद्यखण्डे समाम्नात मेवैकत्रिंशत्तमं 'नू च'–इति (१भा० ३८८पृ० १०पं०) ; तदवलम्बेनैवोक्तं भगवता यास्केन "पुराणनवयोर्नू चेति च"–इति (२भा० ४३०पृ०) ; निगमश्चोदाहृतस्तत्रैव "नू च पुरा च सदनं रयीणाम् (ऋ० सं० १. ७. ४. २.)"–इति । दुर्गाचार्यस्त्विहाह "अयन्तु नू चिदित्येतस्यैवार्थसामान्यप्रसङ्गादसमाम्नात एवोदाहृतः (४३५ पृ०)"–इति । किञ्चात्रयास्कीयग्रन्थः पदपाठविरुद्ध इव लक्ष्यते । पदकारा हि 'नू । चित्', 'नू । च'–इत्येव मवगृह्णन्ति ; निरुक्ते तु 'नूचित्' –इति, 'नूच'–इति चैतौ अनवग्रहणीयावेव निपातौ सूचिताविति गम्यते । निघण्टुसमाम्नाये तु द्विचाण्यपि पदानि पदत्वेन परिगणितानि दृश्यन्ते "शं योः (४. १. ४८.), सोमो अक्षाः (४. २. १३.)", देवो देवाच्या कृपा (४. ३. ३९.)"–इत्यादीनि । तथा चैवंविधसन्देहनिरसनाय तादृश-समाम्नायपाठदर्शनस्याकिञ्चित्कर मेव । तदत्र टीकाकृतोऽत्र वचन मेव भवेच्छरण मस्मादृशाम् ; दौर्भाग्य मेवास्माकं यदिह ऋज्वर्थाकृतो नैवौ-ष्ठाधरप्रस्फुरणं दृश्यते ! अहह एष विरोधः किमु तेन नैव लक्षितः ? दशमेऽपि पुनः नूचिदित्यस्यैव 'नवं च पुराणं च'–इत्यर्थः कृतो यास्केने-त्याह स एव स्फुटम्,—"नूचित्–इति नवपुराणाभिधायको निपातः (४भा० ७२पृ०)"–इति । तत्रापि नैव दृष्टस्तेन तत्पदग्रन्थः ? सायणाचार्येण तु तत्र नूचिदित्यस्य नवपुराणार्थतापि न स्वीकृता ! इद मेवोच्यते 'मुरारे-स्तृतीयः पन्थाः'–इति । तत्त्वतः सायणाचार्यकृतं तद्याख्यानं तु निरुक्त-विरुद्धं पदग्रन्थविरुद्ध मिव च प्रतीयत एव ।

क्वचिदिह मूलादृष्टपदस्यापि व्याख्यानं कृतं गम्यते । तद्यथा—'सह-

खिणः'—इत्यादिः, 'वायव्ये मन्ते'—इत्यन्तो ग्रन्थः (४भा० ४८७पृ०) समालोच्यः। तदेवंविधं स्वकपोलकल्पितपदव्याख्यानं चातीव विस्मयावहम्।

क्वचित्तु मूलपाठेऽपि स्वसंशयः प्रकाशितोऽनेन। तद्यथा—'भाय्य मन्त्र'—इत्यादि (३ भा० २७७ पृ०)। तत्र तादृशाशङ्काया निदानोल्लेखस्योचितत्वस्य; नान्यथा हि ग्रस्तवक्तव्यतादोषो भवेत् सुपरिहार्यः। अस्माकं त्वल्पधियां न तत्रासम्यक्‌ताबोध उपजायते। सायणाचार्येणाप्येतदेव नैरुक्तं व्याख्यान मुत्सृष्टं मत्त्वेव प्रशंसापूर्वकं सम्पूर्ण मुद्धृतं यथायथ मृग्वेदार्थप्रकाशे। तत् कथं मन्यामहे दुर्गाचार्यस्यैव नैरुक्तपाठसंशयो नूनं धीमतां विचारविषय इति।

मूलोक्तलक्षणाना मुदाहरणेषु समन्वयाः खलु टीकाकृद्भिरवश्यं दर्शनीयाः; पर मिहानेकत्र न तथा दर्शिता दुर्गाचार्येण; ततोऽत्र वक्तव्यैव भवेत् लक्षणसमन्वयसंशयस्य दुष्परिहार्यता च। तद्यथा—परोक्षकृताना मृचां यल्लक्षण मभिहितं मूले "परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य (३ भा० ३८५ पृ०)"—इति; एतस्योदाहरणान्यपि दर्शितानि तत्रैव "इन्द्रो दिव (३८६ पृ०)—इत्यादीनि; पर मुदाहृतेषु तेषु परोक्षकृतनिगमेषु न हि श्रूयन्ते सर्वा एव प्रथमपुरुषक्रियाः; प्रत्युत 'अनूषत', 'गायत', 'अर्यसत'—इति तिस्रो मध्यमपुरुषक्रियाश्च। तदिह कथं भवेल्लक्षणसमन्वयः? इतीह वृत्तिकृतोद्भावनीय मेव। न च तथोद्भावितं दुर्गाचार्येण। किञ्च 'अनूषत'—इत्यस्य अभिष्टुतेति प्रतिशब्ददानं, तदनुगतं सर्वं तन्मन्त्रव्याख्यानं च तस्य व्याख्याप्रयास एवोद्भावयति। सायणभाष्ये तु 'अनूषत'—इत्यस्य स्तुतवन्त इति प्रतिशब्दः प्रदत्तः, तथा न चोपलभ्यते तत्र यूय मिति, स्फुट मप्युक्तं तत्साधनिकायां 'लुङि व्यत्ययेनात्मनेपदं झस्यादादेशः'—इति। अहो इहैतदपि विचार्यम्—अल्पैकस्यैवास्य दुर्गाचार्यस्य व्याख्याने दोषः, परं सर्ववेदभाष्यकारेण सायणेनापि 'गायत'—इत्यस्य व्याख्यायां कथं न याक्षीयलक्षणोदाहरणमर्यादा परिरक्षिता? गड्डलिकाप्रवाह एव किं मत्र वीज मिति।

'एष व्याख्यानसमयः'–इत्येतन्नैरुक्तवचनस्य (१ भा० ३४२ पृ०) दुर्गाचार्यकृतव्याख्यानदर्शनाद् गम्यते नून मेतत्प्रचलितं महाभारतं निरुक्ताच्च पुरैव प्रणीत मिति ; तदैवाद्दष्टव्याख्यानं तु पौर्वापर्यज्ञानविधुरेणैव कृत मिति कालज्ञानकृतश्रमाणा मैतिहासिकानां भवेद्धास्यास्पद मेव। एव मन्यत्रापि बहुत्रैव विद्यते स्फुटम् ।

क्वचिद्विशेषतो व्याख्येयानि मूलवचनानि च नैव व्याख्यातान्येतेनाचार्येण; अमार्जनीय एवैष दोषो व्याख्यातृणाम् । अतः स च मयोद्घोषितो बहुत्र टीप्पन्याम् । तद्यथा—१ भा० ३४५ पृ०*, ३११ पृ०*, ३६१ पृ०* इत्यादि । किञ्च यद्दिहानेकशोक्तं भगवता यास्केन "–इति सा निगदव्याख्याता"–इति (१ भा० ४१४ पृ०, ४ भा० ७, १०, २५, ३२, ५३, ६२, १०२, ११८, १६४, १७४, २३७, २५० पृ०), तेषां सर्वेषा मेव निगमानां विशेषतो व्याख्यानानि कर्त्तव्यान्येव वृत्तिकृताऽस्य । अहो बत, तादृशानां व्याख्याकथा तु दूरे आस्ताम्, असकृदुक्तस्य निगदव्याख्यातेति पदस्यापि व्याख्यानं न कृतं तेन क्वचिदपि ! वस्तुतस्तु यास्ककाले यासा मृचा मर्थबोध आसीदतीव सुगमः, तासां व्याख्यानं निष्प्रयोजन मिति मत्त्वैवाह तत्र तत्र यास्को निगदव्याख्यातेति । श्रूयन्ते चैवं निगदव्याख्याता मन्त्रास्तैत्तिरीयारण्यकादावपि । तथाहि—"अथ निगदव्याख्याताः । ताननुक्रमिष्यामः"–इति तै० आ० १ प्र० ९ अनु० ४ ख० । 'निगद्यमानेनैव मन्त्रपाठेनैव + + + विस्पष्ट माख्यातो भवति, तान् एतान् मन्त्रान् अनुक्रमेण कथयिष्यामः'–इति च तत्र तद्भाष्यं सायणीयम् ।

क्वचिदहो चैकालिकाभावविशिष्टस्य मन्त्रकमलस्यापि सुगन्धोऽवापि तेन; दृष्टश्च क्वचिन्निराकार मपि साकारम् । अतिगम्भीरमूलजलधौ दिग्भ्रम एव तत्र तत्र तद्बीज मनुमीयते ; नान्यत् कि मपि । तद्यथा—१ भा० ४४२ पृ०१—६ पङ्क्तयो द्रष्टव्याः ।

क्वचित् पदग्रन्थविरोध मुररीकृत्य च कृतं नरुक्तनिगमव्याख्यान मेतेनातिपण्डितम्मन्येन । तद्यथा—वराहनिगमव्याख्यानावसरे लिपेरूप मिद

मिति मत्त्वैवोक्तम्—‘त्विषितः = सन्दीपितः’—इति (१भा० २६ पृ०)। पद-संहितायां तु ‘त्वाऽइषितः’-इति सावग्रहपाठः श्रूयते। तथाचावगम्यते बहुक्तपदकारस्य शाकल्यस्यैव नीच त्विषेरूप मिद मिति। एवञ्चानयो-र्विरोधः स्फुटम्। नून मवगतश्चैव विरोधस्तेनापि वेदार्थपटुना; अत एवानुपद मुक्तम्—‘नान्यथार्थ उपपद्यते’—इति। ‘अन्यथा’ पदकारनये ‘त्वा ऽइषितः’—इत्यवग्रहानुरोधतः त्विषेरूप मिद मिति स्वीकाराभावे इति च तद्भावः। एतच्च प्रौढ़िवादमात्रम्; सायणाचार्येण तु पदकारमत मनुसृत्य क्षत एव हि त्विषित इति पदस्य ‘त्वया प्रेरितः’—इत्यय मर्थोऽसकृत्। वस्तुतोऽस्माभिः सर्वत्र तथैवार्थः कल्पनीयो यथा न विरुध्येत पदपाठः! आर्षं पदपाठ मवमत्यार्थकरणन्तु साहस मेवेत्यत्र कास्ति वक्तव्यता।

एव मनुक्रमणीकारस्य शौनकस्य, कल्पकारस्याश्वलायनस्य च मतविरुद्ध मिह प्रतीकोपादान मपि लक्ष्यते। तद्यथा—आचष्ट आसा मिति निरुक्तोदाहृतनिगमस्य व्याख्यानाय अभि वो देवी मिति प्रतीकोपादानं तद्व्याख्यानं च द्रष्टव्यं मत्कृतया टीप्पन्या सहैव (२ भा० १६८ पृ०, †)।

स्वस्य वैज्ञानिकज्ञानाभावोऽपि द्योतितोऽत्र बहुत्र। तद्यथा—‘वि-क्षतज्योतिष्कः’—इतिनैरुक्तपदस्य व्याख्यान मुक्तम्—“तद्धि तस्य विक्षतं ज्योतिः, शीतत्वात्; इतराणि उष्णानि ज्योतींषि सूर्यादीनि, तान्यपेक्ष्य (२ भा० ६६ पृ०)”—इति। स्वभावस्यान्यथाभाव एवोच्यते विकारो नाम लोके; तद्यदि हि पूर्व मुष्ण मनन्तरं चन्द्रमः-सम्बन्धात् शीत मिति स्याद् विज्ञानवेद्यं चान्द्रमसं ज्योतिः, तर्ह्येवोपपद्येत चन्द्रवाचकस्य ‘ऋक्षः’ —इतिपदस्य यास्कीयं निर्वचनं ‘विक्षतज्योतिष्कः’—इति। स्वभावशीतस्य तु विक्षतत्व मेव किन्नामेति संशयोऽपि नोद्भूतः किमु दुर्गाचार्यस्य ?।

एवं यदा पौराणिकाख्यानघनघटाभिराच्छन्नं वैदिकं ज्योतिः, तादृश एव निविड़ान्धकारग्रस्ते भारते यतोऽयं जातो दुर्गाचार्यः, ततोऽपीह ऋज्वर्थायां मूलाभिप्रायविरुद्धानि मूलासम्बद्धानि च बहून्याख्यानानि दृश्यन्ते। तत्र, मूलाभिप्रायविरुद्धं यथा—“एव मुच्चावचैरभिप्रायैर्ऋषीणां

मन्त्रदृश्यो भवन्ति"–इतिनैरुक्तस्य व्याख्यानप्रसङ्गे "मन्त्राणां द्रष्टारो भवन्ति, न तु कर्त्तार इत्यभिप्रायः (२ भा० ३०६ पृ०)"–इति। न चाय मभिप्रायो मूलकृतो यास्कस्येति गम्यते। तत्वतस्तु अनिर्द्दिष्टकालिकाना मतिप्राचीनानां ग्रन्थादीनां दृष्ट इति, युगारम्भकालिकानां प्राचीनानां प्रोक्त इति, मध्यकालिकाना मनतिप्राचीनाना मद्यतनीयानाञ्च कृत इति व्यवहारः समार्थ एव। मूलासम्बद्धानि च यथा—"सप्त सिन्धून्, स्यन्दना आकाशनदीः, इला च इला चेत्येवमाद्याः (२ भा० ४४२ पृ०)"–इति। किञ्च "समारोहणे = उदयगिरौ"–इत्यादि (४ भा० १०२ पृ०) व्याख्यानन्तु ततोऽप्यधिकं विचित्रम्; तथा "इह कथं चन्द्रमा मध्यस्थानः?"–इति स्वारब्धविचारस्य समाधान मपि (४ भा० १७२ पृ०)।

एवमपि यास्कीयवचनव्याख्यानानुरोधात् तस्य बहुत्राऽवितथवादित्व मपीह व्यज्यते। तद्यथा देवताना माकारविचारप्रकरणे–"तदाहुः 'नैतदस्ति यद्देवासुरम्'–इति। × × × 'तद्यथा—अग्निः, वायुः, आदित्यः, पृथिवी, चन्द्रमाः–इति'। प्रत्यक्षत एतान्यपुरुषप्रकाराणि, इत्येतेषा मतोऽन्यथाभ्युपगमे दृष्टहानिः स्यात्! न चैतदिष्टम्। तस्मादपुरुषविधा अग्न्यादयः, तत्सामान्याददृष्टा इन्द्रादयोऽप्यपुरुषविधाः, न हि मनुष्यत्वे तुल्ये केचिदाकारिणः केचिदनाकारिणः इति, तथैव देवताना मपीह न्यायः। तस्मादपुरुषविधा इति (२ भा० ३३६ पृ०)"–इति। एतेन अग्न्याद्यन्तःपुरुषकल्पकल्पन मप्यपास्त मिति स्फुटम्। एवं भगवता यास्केन पृथिव्याः वहिःप्रभाशून्यत्वं वर्णितम्—"अपगतभास मपहृतभास मन्तर्हितभासं गतभासं वा (२ भा० २७८)"–इति। ततश्च दुर्गाचार्येण कृष्णच्छाया भवति पृथिवीत्यवगतम् (२ भा० २८० पृ०)। तत एव पौराणिकवर्णितं राहोर्ग्रासे सूर्यस्य ग्रहण मित्यपि तस्याभूद्वा विदितम्।

परमन्तःसारशून्यो वंशतरुश्चन्दनवनस्थोऽपि न कथ मपि चन्दनायते! दुर्गाचार्यः खलु देवताना मपुरुषविधत्वं व्याख्यायाप्यनुपद मनुससारैव पौराणिकमतम् "परे तु (२ भा० ३४२ पृ०)"–इत्यादिना। अहो काव

प्रमादजो मतिविभ्रमः ! वेदाङ्गग्रन्थकर्त्तुर्भगवतो यास्कस्यापि मतं खर्वीकर्त्तु मिच्छत्ययम् !! एव मगस्त्यजन्मव्याख्यानादावपि पौराणिकाख्यान मेवानुसृतम् ; न तु तत्त्वं व्याख्यात मेतेन ।

क्वचिदिह व्याकरणप्रक्रियाख्यान मप्यपरिस्फुटम् । तद्यथा—'अस्मे'—इति नैगमपदव्याख्यानायोक्तो भगवता यास्केन 'अस्मे ते बन्धुः'—इत्यादिः खण्डः । तत्र अस्मच्छब्दात् प्रथमादीनां सर्वासा मेव विभक्तीनां बहुवचनानां 'जस्-शस्-भिस्-भ्यस्-भ्यस्-आम्-सुप्'—इत्येतेषां स्थाने "सुपां सुलुक्-पूर्वसवर्णाच्छेयाडाड्यायाजालः"—इति (७. १. ३९) पाणिनीयेन सूत्रेण शे-आदेश एवेष्टः । तथाच 'अस्मे'—इत्येकस्यैव पदस्य वयम्, अस्मान्, अस्माभिः, अस्मभ्यम्, अस्मत्, अस्माकम्, अस्मासु—इति सप्तविधा एवार्था भवितु मर्हन्ति, भवन्ति च यथास्थानं यथानुगम मित्येव सूत्रतात्पर्यम् । परं दुर्गाचार्येण लेषा वैयकरणप्रक्रिया नैव तत्र कण्ठरवेणोद्गोषिता ; अपि तूक्तं " 'अस्मे'—इत्यस्य 'वयम्'—इत्येवम्प्रथमया विपरिणाम उपपद्यते"—इत्येवमादि (३ भा० १९३—१९७ पृ०) ।

क्वचिच्चेह पाठक्रमाभिकोक्तिश्च लक्ष्यते । तद्यथा—'इह तूत्तमः (४ भा० ३०२ पृ०)'--इत्युक्तिर्भ्रामयत्येव पाठकान् मध्यमस्याप्यन्वेषणाय ।

क्वचित्तस्य नामविभ्रमावर्त्तमग्नता च परिदृश्यते, या खल्विदानीन्तनाना मल्पधियां तु का कथा, आसीत् सर्वानुक्रमणीवृत्तिकारषड्गुरुशिष्यादेरपि । तद्यथा—"वसिष्ठस्येद मार्षम्, युष्मदश्चात्र प्रयोगः—'उतासि'—इति ; तदेतद्विरुद्धार्थं मुपलक्ष्यते ?"—इति (३ भा० ७८ पृ०) । अहो कोऽत्र विरोधः ? वसिष्ठस्य सहस्रतमपुरुषोऽपि हि किं नोच्येत वसिष्ठ इति ! वस्तुतो वसिष्ठ इति गोत्रनामैव ; न तु व्यक्तिनाम ; पुरासीत् गोत्रनामत एव प्रायः सर्वव्यवहारः ; यथाद्यापि दृश्यते यूरोपीयसभ्यानाम् ।

क्वचिदिह यास्कप्रदर्शितनिगमार्थस्य चान्वेषणीयतोपदिष्टा । तद्यथा —"दयमानोड्डीयमानः काकोऽन्तरिक्षेणाधस्तात् मां सुप्तं दोषाया मबोधयत् । मृग्योऽत्र शेषः (२भा० ४३५ पृ०)"—इति । नून मिह उक्तातिं-

रिक्तस्यार्थस्यैव मन्यतोपदिश्यते; तत्त्वनुचितं वृत्तिकृताम्। किञ्चात्र 'दयमानोड्डीयमानः'-इत्यशुद्धपाठस्तु स्याल्लेखकप्रमादज एव; 'दयमान उड्डीयमानः'-इत्येवम्पाठेनैव भवितव्यम्; पर मिह 'दोषायाम्'-इत्यपि पाठः किं लिपिकरप्रमादादेव सम्पन्नः? न हि 'दोषा'-इत्यव्ययस्य युज्यते तथाविधं रूपम्।

निगमान्वेषणीयता तु बह्वत्रैवोपदिष्टा। तद्यथा—"जामिशब्दस्य (अतिरेकार्थस्य) पर्येष्यो निगमः"—इति, ततः "एतस्य (वालिशार्थस्य) अपि पर्येष्यो निगमः"—इति च (२भा० ४६१पृ०)। जामिशब्दस्यातिरेक-वालिशार्थयोर्मन्त्रात्मनिगमप्रदर्शने देवराजोऽप्यभवदसमर्थ इव (१भा० ४००पृ०)। सायणभाष्यदर्शिनो वयन्त्वतिरेकवाचिनस्तस्य निगम मपि पश्याम एव—"जामि ब्रुवत आयुधम् (ऋ०सं० ५. ८. ६. ३.)"—इति। 'जामि, अतिरेकनामैतत्'-इत्यादि हि तत्र सायणीयं भाष्यम्।

वस्तुतस्तु नैघण्टुकव्याख्यान मेवास्यासीन्निगमसङ्ग्रहे मुख्य मवलम्बन मिति च प्रतीयते; तत्र हि येषां पदानां निगमा नैव विद्यन्ते, इहापि न तेषां त उपलभ्यन्ते; अपि तत्र खलु येषां पदानां ये च यथा च निगमाः प्रदर्शिता देवराजेन, प्रायस्त एव तथैवेह च दृश्यन्ते। तद्यथा—तत्र क्रोधनामसु पठितस्य हरइतिनैघण्टुकपदस्य 'निगमोऽन्वेषणीयः'-इति व्याख्यान मुपसंहृतं देवराजेन (१भा० २३४पृ०); तथेह क्रोधनामनिरुक्त-व्याख्यानावसरे दुर्गाचार्येणापि तन्निगमो नैवादर्शि (२भा० २८६पृ०)। परं सायणीयभाष्यसाहित्यात्तस्माभिरवगम्यते एव क्रोधवाचिनोऽपि हरः-शब्दस्य निगमः—"अवयाता हरसो दैव्यस्य"—इति (ऋ० सं. ६. ४. ११. २. । अथ० सं० २. २. २.)। "त्वं 'दैव्यस्य' 'हरसः' क्रोधस्य 'अवयाता' पृथक्कर्त्ता"—इति हि तत्र सायणीयं भाष्यम्। पुनस्तस्यैव हरःशब्दस्य ज्योतिर्दिनार्थयोः क्रमात् यौ निगमौ प्रदर्शितौ देवराजेन, तावेव ऋज्व-र्थाया मपि; किञ्च अह्नर्थे यथा मन्त्रात्मनिगमालाभः सूचितो देवराजेन, ऋज्वर्थाया मपि तथैव; अहो तत्रैव ततश्चोक्तं देवराजेन

'उदकश्लोकवाचिनिगमौ पर्य्यायौ'—इति, तत एवानन्यगत्या दुर्गाचार्य्येणा-पीह मौन मेवावलम्बितम् (१भा० ३९८ पृ०, २भा० ४५० पृ०)। तथाचाव-गम्यतेऽस्य वृत्तिकृतो दुर्गाचार्य्यस्यापि वेदविद्या प्रायोऽस्माक मिवासम्पूर्णै-वासीदिति। इत्यास्मादृशाना मर्द्धशिक्षितानान्त्वेतादृशमहार्हवैदिकग्रन्थ-व्याख्याने प्रवृत्तिविडम्बनायैवेत्यलं पल्लवितेनेति शम् ॥

अथेदं निरुक्तालोचन मुपसंहरन्निह किञ्चिद् वच्मि। सर्व्वत्रैव ग्रन्थ-कालनिर्णये स्मर्त्तव्य मेतत्,—प्राचीनार्य्याणां गोत्रनाम्ना मेव व्यवहार आसीन्न पुनर्व्यक्तिनाम्ना मिति; यथाद्यापि दृश्यते इंलण्डीयादीनां तथा सपिण्डनामनामव्यवहारो दाक्षिणात्यानां भारतीयाना मपि। अतएव व्यासाश्वलायनपाणिनिशौनकयास्कादीनां बहुत्वात् तत्तत्कृतेष्ववश्यम्भावी पौर्व्वापर्य्यविभ्रमो भवत्येव। यद्गुरुशिष्यादयोऽपि प्रायः सर्व्वे तद्विभ्रमा-वर्त्तमग्ना एवासन्; अत्रैव पूर्व्वं मयापि यत् स्वीकृतं प्रातिशाख्यादीना मेककर्त्तृकत्वम् "नात्र वादं मध्यामः (७ पृ०)"—इति, तदपि तादृश-भ्रमादेव। तत्त्वतो बृहद्देवताकृच्छौनकस्तु प्रातिशाख्यकृतः शौनकात्, निरुक्तकृतो यास्काच्च बह्ववरः; तत्र बहुत्रैव तयोर्नामोल्लेखदर्शनात्। तथाहि—

"पद मेकं समादाय द्विधा कृत्वा निरुक्तवान्।
पुरुषादः पदं यास्को वृत्तेऽस्ते इति त्वृचि ॥"—इति*।

दृश्यते चैव मेवात्र यास्कीये निरुक्ते 'पुरुषादनाय'—इति†।

---

* बृ० दे० ९अ० ११२श्लो०। † निरु० २भा० १८१पृ०।

तथा, "काव्यीवतं सर्वमिति भगवानाह शौनकः।"—इति*।
लभ्यते चैव मेव शौनकीयानुक्रमणिकातोऽपि†।

न हि कोऽपि विज्ञः स्वं भगवानिति वक्तुमुत्सहेतेति नून मनुक्रमणीकृच्छौनको बृहद्देवताकृच्छौनकात् प्राचीन इत्यवतिष्ठते; तथा च षड्गुरुशिष्यकृतः 'शौनकीया दश ग्रन्थाः'—इति सिद्धान्तः कथं न विलीनो जलमध्यस्थमसौष्ठोद्ववदिति सुधीभिरेव विभाव्य मिति दिक्।

एवं पातालविजय-जाम्बवतीविजय-काव्ययोः प्रणेता पाणिनिः, व्याकरणसूत्रप्रणेतुः पाणिनेराचार्यात् अन्यो बहुपरभवश्च; न हि व्याकरणाचार्यस्य पाणिनेः रचनायां व्याकरणाशुद्धिः सम्भवेन्नाम, नापि हि महाभाष्यकृत्पतञ्जलिकालपर्यन्ताविर्भूतेन केनचिद् वैयाकरणेन प्रयुक्तं किमपि पद मशुद्ध मिति गणयितुं शक्यते तत्परजातैः कालिदासादिभिश्च प्रयोगपटुभिः। अस्ति च व्याकरणाशुद्धिदोषः पातालविजये; उदाहृतश्च स रुद्रटकृतकाव्यालङ्कारटीकाकृता नेमिसाधुना च्युतसंस्कृतिदोषोदाहरणप्रसङ्गे 'सन्ध्यावधूं गृह्य करेण'—इति। तत्र गृहीत्वेति वक्तव्ये गृह्येति प्रयोग एवाशुद्धः।

अत्रेदं विचार्यम्;—अशेषशेमुषीसम्पन्नस्य, महेश्वरवरप्रसादालब्धव्याकरणविद्यस्य, सिद्धवाग्विभवस्य, व्याकरणकृत्तस्य पाणिनेर्व्याकरणाशुद्धिः कदापि सम्भवेत् किमु? उत यदि गृह्येति पदं तेनैव पाणिनिना प्रयुक्तं स्यात्, तर्हि तत्प्रयोगबलादेव साध्विति कथं न मन्येत; प्रयोगा अपि हि पाणिनि-कात्यायन-पतञ्जलीनां साधुत्वनियामका भवन्त्येवेत्युररीक्रियत एव सर्वैः। तदेवं, यतः खलु गृह्येति पदं न कोऽपि साधु मन्यते; अतएव ज्ञायते नेदं व्याकरणाचार्य्येण तेन पाणिनिना प्रयुक्तम्, न च पतञ्जलिपूर्वकालीनेनापि केनचिदिति। वस्तुतः पाणिनिः खलु महाकवेर्वाल्मीकेश्च बहुपूर्वभवः; वाल्मीकीयाद्रामायणात् पूर्वं सूत्रकाल एवासीत्, तदोपजात्यादिवृत्तानां कथा तु दूरपराहता स्यात्, आनुष्टुभेनापि छन्दसा कश्चिल्लौकिको ग्रन्थो रचितो न वेति महान् संशय एवेति।

---

* बृ० दे० ३अ० १५२श्लो०। † ऋ० स० १. १२५. १. सा० भा०।

अथेह विदुषः सानुनय मभ्यर्थये।—अतिप्राचीनग्रन्थानां कालनिर्णये बहवश्च विद्वांसोऽपि भ्रान्ता इवोपलभ्यन्ते, तस्मादस्मदुक्तेर्भ्रमविज्‍म्भितत्वे वक्तव्यतेति सम्भाव्यत एवात्र भ्रमबाहुल्यम्; पर मेतदाद्यन्तं सर्व मेव धीमद्भिर्धैर्य्येणानुकम्पानयनाभ्यामेवालोचयितव्यम्; आर्यभाषयोपनिबद्ध मिदं नूतन मिति वा, आवर्जनाराशितोऽपि किञ्चिद् ग्रहणीयं क्वचिल्लभ्यत इति निश्चित्यैव वेति। अपि चेह व्याकरणाशुद्धिश्च सम्भाव्यते; सर्वदा वैदिकग्रन्थालोचकस्य श्रोत्रियस्योक्तावकामतोऽपि छान्दसपदप्रयोगस्या-वश्यम्भावितयान्यत्र महार्हग्रन्थेष्वपि तथा दृष्टत्वात्। अतएवोक्तं केन चिल्लौकिकप्रयोगनिपुणेन कविना—

"गुरुनटदैवज्ञभिषक्छ्रोत्रियमुखगह्वराणि यदि न स्युः।
व्याकरणभीता अपशब्दमृगाः क्व विचरेयुः॥"—इति।
(सुभाषितावलिः २३०१)

कलिकाता।
संवत् १९४८।
खी० १८९१।

अहमपि श्रोत्रियः,
श्रीसत्यव्रतशर्म्मा।

(काश्यप-चट्टोपाध्याय-भट्टाचार्य-आवसथ्यान्वयः,
सामश्रमीतिलब्धोपनाम, सामगाचार्य इति प्रसिद्धश्च.)